This is a reproduction of a library book that was digitized by Google as part of an ongoing effort to preserve the information in books and make it universally accessible.

Google books

https://books.google.com

Digitized by Google

8700 E 1(2).

Indian Institute, Oxford.

86 F 9/7

Per. 10 d. 42

Digitized by Google

Digitized by Google

Digitized by Google

काशीविद्यासुधानिधिः

THE PANDIT.

A MONTHLY PUBLICATION

OF THE

BENARES COLLEGE,

DEVOTED TO

SANSKRIT LITERATURE.

NEW SERIES.

VOL. VII.

BENARES:
PRINTED AND PUBLISHED BY THE PROPRIETORS,
E. J. LAZARUS AND CO., AT THE MEDICAL HALL PRESS.

1885.

Digitized by Google

Digitized by Google

INDEX TO VOLUME VII. NEW SERIES.

MÁDHAVÍYA DHÁTUVṚITTIH, 1, 105, 154, 216, 273, 353, 433, 473, 529, 569, 641.

KHAṆḌANAKHAṆḌAKHÁDYAM, 9, 71, 113, 193, 225, 281, 361, 417, 508, 545, 589, 676.

AKÁṄḌATÁṄḌAVA OF PARIBHÁSHENDUŚEKHARA, 17, 129, 245, 445.

ŚÁSTRADÍPIKÁ, 33, 145, 500, 636, 659.

ŚRÍBHÁSHYAM, 46, 97, 161, 201, 265, 343, 408, 441, 491, 557, 618, 665.

ŚRAUTAPADÁRTHANIRVACHANAM, 49, 89, 122, 182, 236, 334, 403, 481, 537, 577, 649.

SAṂKSHEPŚÁRÍRAKAM, 57, 169, 297, 391, 522.

VEDÁNTAPARIBHÁSHÁ WITH TRANSLATION, 313, 369, 450, 608.

Digitized by Google

Digitized by Google

॥ माधवीयधातुवृत्तिः ॥

(*Continued from page* 656. Vol. VI.)

भष भर्त्सने ॥ इह भर्त्सनं श्वरवो मुख्यैवायं प्रसिद्धः । भषति । भषकः । क्वुन् ॥ ६७९ ॥

उष दाहे ॥ ओषति । ओषां चकार । उषविदेत्याम्विकल्पः । उवोष । ऊषतुः । उवोषिथ । पिद्वचनेषु गुणस्य स्थानिवत्त्वादुषशब्दस्य द्वित्वम् । पुनर्गुणोऽभ्यासस्येत्युवङ् । न चाभ्यासस्यानादिष्टादचः पूर्वत्वे गुणस्य स्थानिवत्त्वम्, असवर्णग्रहणसामर्थ्यादिति प्रागेवोपपादितम् । ओषिता । ओषिष्यति । ओषतु । औषत् । ओषेत् । उष्यात् । औषीत् । ओषिषिषति । ओषयति मा भवानुषिषत् । प्रत्युष्टमित्यत्र भट्टभास्करः । 'आदितश्चे'त्यत्र चकारस्यानुक्तसमुच्चयार्थत्वादाश्वस्तादिवदिट्प्रतिषेधः । ऊष्मा । मनिनि बाहुलकाद् दीर्घः । ऊष रुजायामित्यस्माद्वा । उष्णः । इणसिञ्ज्युषीति नक् । उष्णिका यवागूः 'ब्राह्मणकोष्णिके संज्ञायामि'ति कनि निपात्यते । उष्णं करोति उष्णकालसः 'शीतोष्णाभ्यां कारिणी'ति कन् । उष्णं न सहते उष्णालुः । 'शीतोष्णतृप्रेभ्यस्तदसहन' इत्यालुच् । ओष्ठः । उषिकुषिकाशिभ्यष्ठविति ठन् । बिम्बोष्ठी । बिम्बोष्ठा । नासिकोदरौष्ठेति वा ङीष् "ओत्वोष्ठयोः समासे वे'ति पररूपं वृद्धेरपवादः । पक्षे पररूपम् । अन्यदा वृद्धौ । बिम्बौष्ठी बिम्बौष्ठा । पार्योष्ठम् । सप्तम्यर्थेऽव्ययीभावः । तस्माद्भवार्थे 'परिमुखादिभ्य उपसंख्यानमि'ति ष्यञ् । उष्ट्रः । ष्ट्रन्विति ष्ट्रन् बाहुलकादगुणत्वम् । उष्ट्राणां समूहः औष्ट्रकम् । गोत्रोक्षोष्ट्रेति वुञ् उष्ट्रस्य विकारावयवयोरपि औष्ट्रकम् 'उष्ट्राद्वुञि'ति वुञ् ॥ ६८० ॥

जिषु विषु मिषु सेचने ॥ जेषति । जिजेष । जेषिता । जिजिषिषति । जिजेषिषति । जिषित्वा । जेषित्वा । रलो व्युपधादिति क्त्वाविकल्पः 'उदितो वे'ति क्त्वायामिड्भावे जिष्ट्वा । जेषिष्यति । जेजेष्टि । जेषयति । अजीजिषत् ।

Digitized by Google

जिष्टम् । वेषति । विवेष । विविषतुः । विवेषिथ । विविषिव । शिषिं पिषिं शुष्यतिपुष्यती त्विषिं प्लिषिं विषिं तुष्यतिदुष्यती द्विषिमित्यनिट्कारिकापाठादस्यानिट्त्वेपि क्रादिनियमादिट् । वेष्टा । वेक्ष्यति । अविक्षत् । शल इगुपधेति क्सः विविक्षति 'हलन्ताच्चे'ति सनः कित्त्वम् । उदित्वात् क्त्वायामिड्विकल्पः विषित्वा । वेषित्वा । विष्ट्वा । विष्टम् । वेषण संपादी वेष्यो नटः 'कर्मवेषाद्यदि'ति तृतीयान्तात्संपादीत्यर्थे यत् संपत्तिः शोभातिशयः । वेषेणात्यन्तं शोभतइत्यर्थः । विष्लृव्याप्तौ जुहोत्यादौ । विष विप्रयोगइति च क्र्यादौ । मेषतीत्यादि जेषतिवत् । मेष इति पचादिषु दर्शनादचि । टित्वात्स्त्रियां मेषी । अयं स्पर्द्धायां तुदादौ ॥ ६७१ ॥

पुष पुष्टौ ॥ पोषति । पुपोष । पुपोषिथ । पोषिता । पोषिष्यति । अपोषीत् । शिषिं पिषिं शुष्यतिपुष्यती इति श्यना निर्देशादयं सेट् । तथः पुषादीत्यङ्विधावपि दैवादिकस्य ग्रहणं सेट्त्वात् क्तोपि न भवति । स्वपोषं पोषति 'स्वे पुष' इति णमुल् । अत्र स्वशब्दः पितिर्निर्दिश्यते तेन पित्यर्यायवचनस्य तद्विशेषार्थस्य च ग्रहणमित्युक्तत्वात् स्वशब्दे तत्पर्यायवाचिनि विशेषवाचिनि चोपपदे प्रत्यय इति गोपोषं धनपोषमिति दैवादिकस्य भवति । पोषितः । पुषितः । पुष्टमिति । पोषितमिति णयन्तस्य पोषयतीति पोषयिष्णुः । स्तनिहर्षिगदिमदिपुषिभ्यो णेरिष्णुजिति णयन्तादिष्णुच् । अयामन्तेति णेरयादेशः । अयं दिवादिः क्र्यादिश्च । धात्वार्थश्चुरादिः । नन्वेक एव पुषिः विकरणभेदाय पुनः पठ्यते क्व चिच्चायं सेट् अन्यत्र पाठादनिट् इत्यर्थादार्धधातुके विकल्पितेट्त्वादस्य विभाषेतीठा न भवितव्यं निष्ठायाम् । नैतत् । यस्य वाचनिक इड्विकल्पस्तस्यैव तत्राश्रयणात् ॥ ६७२ ॥

श्रिषु श्लिषु प्रुषु प्लुषु दाहे ॥ श्रेषति । शिश्रेष । श्रेषिता । श्लेषति । शिश्लेष । शिश्लेषिथ । श्लेषिता । शिषिं पिषिं शुष्यतिशिष्यती त्विषिं श्लिषिमित्यनिट्कारिकायां दैवादिकस्य श्लिषेर्ग्रहणं नास्येतीड् उदाहृतः । उक्तं च क्षेयटे । श्लिष आलिङ्गनइति क्सविधावनिठइत्यनुवर्त्तनात् दाहर्थस्य सेटो ग्रहणाभाव इति । एवं न्यासपदमञ्जर्योरपि । यस्त्वनिट्कारिकाव्याख्यान-

न्यासे दुयोर्यहणमिति पाठः। स स्वोक्तिविरोधाद् ग्रन्थान्तविरोधाच्च प्रमादलिखितः । तथा च वर्द्धमानस्वामिसंमताकारादयश्चामुं सेटमाहुः । श्लेषति। श्लेषः । ‘श्याद्व्यधास्रुसंस्रवतीणवसावहृलिहश्लिषश्वसश्चे’ति कर्त्तरि णः। श्लेष्म । श्लेष्मलः। मत्वर्थे। श्लेष्मणः। पामादित्वान्नः। अयमपि मत्वर्थे श्लेष्मघ्नः शमनं कोपनं वा श्लैष्मिकम् । ‘तस्य निमित्तप्रकरणे वातपित्तश्लेष्मभ्यः शमनकोपनयोरुपसंख्यानमि’ति ठक् । श्लक्ष्णः । श्लिषेरच्चोपधाया इति क्सप्रत्ययः । उपधायाश्चाकारः । श्लिष्यतेर्वा श्लक्ष्णः । आचारश्लक्ष्णः । पूर्वसदृशेत्यादिना समासः । आलिङ्गने दिवादिः । श्लेषणे चुरादिः । प्रोषति । प्रोषतीत्यादि । प्रुष्यतीति दिवादिपाठात् सेट्। प्रुषिप्रुषी द्वौ स्नेहने क्र्यादौ ॥ ६७६ ॥

पृषु वृषु मृषु सेचने॥ मृषु सहने च। इतरौ हिंसासंक्लेशनयोश्च । अत्र काश्यपः । पृषु हृषु वृषु हिंसासंक्लेशनदार्नेष्वित्यादि पपाठ । पर्षति । पर्षिता । पर्षिष्यति । पर्षतु । अपर्षत् । आशिषि पृष्यात् । अपर्षीत् । पिपर्षिषते । परीपृष्यते । पर्पृषीति । पर्पर्ष्टि । पर्पर्षि । लोटि पर्पृड्ढीत्यत्र हेर्ङित्त्वान्न गुणः । पर्पृषाणि । नाभ्यस्तस्याचि पितीति गुणनिषेधः। लङि सिप्सिपोर्हल्ङ्यादिलोपः । अपर्पट् । ‘रात्सस्ये’ति नियमात् न संयोगान्तलोपः । अपर्पृषीत् । पूर्ववद्गुणत्वं रिक्रीकोरुदाहार्यम् । पर्षयति । अपपर्षत् । अपीपृषत् । पर्षित्वा । पृष्ट्वा । उदित्त्वाद्विकल्पः । पृष्टं, ‘पृषितम् । बाहुलकात् पृषेः किच्चेति तच् अस्मादपीति । पृषतम् । पृषिरञ्जिभ्यां किदित्यतच् । पृषन् विन्दुर्मृगश्च । वर्त्तमाने पृषन्महद्बृहज्जगच्छतृवच्चेत्यतिप्रत्यये गुणाभावः । शतृवद्भावात् उगितश्चे’ति स्त्रियां ङीपि पृषती । पार्ष्णिः । घृणिपृश्निपार्ष्णिभूर्णिचूर्णितूर्णिरित्यादिणिप्रत्यये निपात्यते । पार्ष्णीलः । ‘सिध्मादिभ्यश्चे’त्यत्र पार्ष्णिधमन्योर्दीर्घश्चेति पाठात् लचि दीर्घः । तच्चान्यतरस्यांग्रहणस्यानुवर्त्तनात् पार्ष्णिमान् । वर्षति । वर्षः । वर्षति वर्षः । अज्विधौ भयादिभ्य उपसंख्यानं नपुंसके क्तादिनिवृत्त्यर्थमित्यत्र वृषेर्वा वर्षमाविति भाष्यकारप्रयोगात् ल्युट् । वृष्टिः । तितुत्रेति नेट् ।

वृषभः । ऋषिवृषिभ्यां किदित्यभच् । वृषः । इगुपधलक्षणः कः । वृषाय हितं वृष्यम् । 'खलयवमाषतिलवृषब्रह्मणश्चे'ति यत् । अत्राकारान्तस्य वृषशब्दस्य ग्रहणात् कनिन्युवृषीतिकनिनन्तात् वृषन्शब्दाद्यन्न भवति । प्राक्क्रीतीयस्त्वन-भिधानान्न भवति । वृषमात्मन इच्छति वृषस्यति । मैथुनं इच्छति इत्यर्थः । अश्ववृषलवणानामात्मप्रीतौ क्यचि इत्यसुक् । अश्ववृषयोर्मैथुनेच्छायाम् इति । अन्यत्र 'क्यचि चे'तीकारे वृषीयति । वृष्णिः । घृवृषिभ्यां किदिति निः । वृषणः । बाहुलकात् क्युन् । वर्षतइति स्नेहने गतः । मर्षति । ममर्ष । मृषित्वा । मर्षित्वा । 'तृषिमृषिकृशेः काश्यपस्ये'ति सेट्त्क्वः कित्त्वविकल्पः । अनिट्पक्षे मृष्ट्वा निष्ठायां मृषे मृषस्तितिक्षायामि'ति कित्त्वमनिटो निष्ठायामेवेति दैवादिकस्य तत्र ग्रहणं स हि सेट् मृषस्तितिक्षायामिति दिवादिर्युजादि-ष्वपि स्वरितेतौ ॥ ६७९ ॥

घृष संघर्षे ॥ घर्षति । संघर्षणम् । घृष्टम् ॥ ६८० ॥

हृषु अलीके ॥ हर्षति । हृष्टानि लोमानि हर्षितानि लोमानि । हृष्टं लोमभिर्हर्षितं लोमभिः । अत्रोदित्त्वान्नित्यमनिट्त्वे प्राप्ते 'हृषेर्लो-मस्वि'ति लोमविषयालीकवाचित्वात्पक्षे इडागमः । यस्तु दिवादौ हृष तुष्टा-विति पठ्यते तस्य तु सेट्कत्वान्निष्ठायामनेन पक्षे इणिनषिध्यते इतीय-मुभयत्र विभाषा, अत्र लोमान्यङ्गजानि केशाश्चेति वृत्तावुक्तम् । लोम-भ्योऽन्यत्र हृष्टमित्येव भवति, दैवादिकस्य तु हृषितमिति । हृष्टो देव-दत्तः हृषितो देवदत्तः, विस्मित इत्यर्थः । हृष्टा दन्ता हृषिता दन्ताः प्रतिहता इत्यर्थः । 'विस्मितप्रतिघातयोश्चेति वक्तव्य'मिति इड्विकल्पः । हर्षुलः । 'हृषेरुलजि'त्युलच् । हर्षयित्नुः । स्तनिहृषीत्यादिना इत्नुच्प्रत्ययः ॥ ६८१ ॥

तुस ह्रस ह्लस रस शब्दे ॥ तोसति । तुतोस । तोसिता । तोसिष्यति । तोसतु । अतोसत् । तोसेत् । आशिषि । तुस्यात् । अतोसीत् । तुतुसिषति । तुतोसिषति । तुसित्वा । तोसित्वा । रलो व्युपधादिति कित्त्वविकल्पः । तोतुस्यते । तोतोस्ति । तोतुषीत्यत्र सेर्ह्यपिभावे धकाधीतिव'द्धि चे'ति

सलोपः । लङि तिप्सिपोर्हल्ङ्यादिलोपे 'तिप्यनस्ते'रिति सकारस्य दत्वे अतोतोदिति भवति । सिपि तु 'सिपि धातोरुर्वे'ति पक्षे रुत्वे अतोतोरिति भवति । तोसयति । अतूतुसत् । ह्रसति । जह्रास । ह्रसितेत्यादि । जिह्रसिषति । जाह्रस्यते । जाह्रस्तीत्यादि तुसिवत् । ह्रासयति । अजिह्रसत् । ह्रस्वः । बाहुलकाद् ह्रस्वं लघ्विति निर्देशाद्वा वप्रत्ययः । ह्रसिष्ठः । ह्रसीयान् । 'पृथ्वादिभ्य इमनिज्वे'ति इमनिच् । स्थूलदूरेति इष्ठेमेयःसु यणादिपरं लुप्यते पूर्वस्य च गुणः । एतत्स्थूलादिविषयं यथासंभवम् । अत्र यणादिलोपस्यासिद्धवदत्रेत्यसिद्धत्वाट्टेरिति लोपो न भवति । ह्रस्वं करोति ह्रसयति । णाविष्ठवदिति यणादिलोपः । अङ्गवृत्ते पुनर्वृत्ताविति वृद्ध्यभावः । भाष्ये अग्लोपित्वाच्चङि इत्वाभावादजह्रसत् । ल्हसतीत्यादि ह्रसिवत् । रसतीत्यादि । रस स्नेहन इति तानादिकस्य णयन्तस्य रसयतीति हि तस्य व्युत्पत्तिः ॥ ६८५ ॥

लस श्लेषणक्रीडनयोः ॥ लसतीत्यादि । विलासी । वौ कषलसेति तच्छीलादौ घिनुण् । न लसः, अलसः । अलसस्य भावः, आलसम् । 'न नञ्पूर्वात्तत्पुरुषादचतुरसंगतलवणवटबुधकतरसलसेभ्य' इति नञ्पूर्वात्तत्पुरुषादचतुरसंगतलवणाद्युत्तरे भावप्रत्यया न भवन्तीति निषेधश्चतुरादिपर्युदासादिह नेति ष्यञ् भवति । एवं नरसेः आरस्यमिति । अलसोप्यालस्यः । चातुर्वर्ण्यादित्वात्स्वार्थे ष्यञ् भवति । लस शिल्पयोग इति चुरादौ ॥ ६८६ ॥

घस्लृ अदने ॥ अयं न सार्वत्रिकः 'लिट्यन्यतरस्यामि'ति अदेर्घस्लादेशविकल्पविधानवैयर्थ्यप्रसङ्गात् । द्वैरूप्यं हि साध्यम् । ततश्च यत्र लिङ्गं वचनं वास्ति तत्रैवास्य प्रयोगः । अत्रैव पाठः शपि परस्मैपदे लिङ्गम् । लृदित्करणमङि । घसिश्च सान्तेष्विति इण्निषेधो वलाद्यार्धधातुके । यत्र प्रत्यये प्रतिपदोपादानं 'सृघस्यदः क्मरजि'त्यादौ तद्वचनम् । घसति । घस्ता । घत्स्यति । 'सः स्यार्धधातुक' इति तत्वम् । घसतु । अघसत् । घसेत् । घबभावादाशिष्यस्य प्रयोगात् अघसत् लृदित्त्वादङ् । घत्स्यते देवदत्तेनान्नमित्यादौ अपरस्मैपदाभावेपि वलादिनिमित्तः प्रयोगः । घस्मरः 'सृघस्यदः क्मरच्'

इति क्षरस्व तव्क्षीलादौ । घासः भक्ष्यतृणादिः । अनिघसिभ्यामिण् घासिं बघासेति घासः अघास इति भट्टभास्करः । बहुलं छन्दसीति घसौ प्रत्याहेव औणादिक इत्याह । तदस्य घसेरस्मरणात् ॥ ६८७ ॥

जर्ज चर्च झर्झ परिभाषणहिंसातर्जनेषु ॥ जर्जति । चर्चति । झर्झति । झर्झरः । बाहुलकादरः चर्चझर्झयोस्तुदादौ पठिष्यमाणयोरिह पाठः स्वरार्थ इति देवमैत्रेयपुरुषकारेषु । उभयान्तेषु पाठोऽर्थानुरोधादिति च मैत्रेयः । चर्च अध्ययनइति चुरादौ ॥ ६९० ॥

पिसृ पेसृ गतौ ॥ पेसति । पेसयति । अपिपेसत् । एकारोपधपाठः क्विदर्थ इति पिपेसतुः । पेपेस्यतइत्यादि । पेस्वरः । 'स्येशभासपिसकसो वर-जि'ति वरच् । इह क्व चित् विसृ वेसृ इत्यपि पठ्यते । आद्यौ दन्त्योष्ठ्यादी दन्त्योष्मान्तौ इतरौ । तालव्योष्मान्ताश्चत्वार एते मैत्रेयादिषु न दृश्यन्ते । पिस अवयवइति तु चुरादौ ॥ ६९१ ॥

हसे हसने ॥ हसति । जहास । अहसीत् । ह्म्यन्तक्षणेत्यादिना वृद्धिनिषेधः । व्यतिहसन्ति । प्रतिषेधे हसादीनामुपसंख्यानमिति तङ्निषेधः । हसः 'स्वनहसोर्वे'त्यनुपसृष्टात् पक्षे अप् । तदभावे घञ् हासः । उपसृष्टात् तु नित्यं घञेव प्रहास इति । हस्तः । हसिमृग्रिणित्यादिना तन् । तितुत्रेतीण् निषेधः । हस्तोऽस्यास्तीति हस्ती 'हस्ताज्जाता'विति इनु प्रत्ययः । हस्तिनां समूहो हास्तिकम् । 'अचित्तहस्तिधेनोष्ठक्' इति ठक् 'नस्तद्धित'इति टिलोपः । लिङ्गविशिष्टपरिभाषया हस्तिनीशब्दादपि ठकि 'भस्याढे तद्धित'इति पुंवद्भावः । हास्तिकमित्येव । हस्तिधेनुभ्यां तदन्तविधेरिष्टत्वात् बालहास्तिकमित्यादपि भवति । हस्तिप्रमाणमस्य हास्तिनः पुरुषः । 'पुरुषहस्तिभ्यामण् चे'ति प्रथमान्तात् प्रमाणोपाधिकात् अस्येत्यर्थे अण्प्रत्ययः । चकाराद् द्वयसज्दघ्नञ्मात्रचो भवन्ति हस्तिद्वयसम् । हस्तिदघ्नम् । हस्तिमात्रमिति । अणि न'स्तद्धित'इति टिलोपे 'इनण्यन-पत्य'इति प्रकृतिभावाच्च भवति । हस्तेन दीयते कार्यं वा हस्त्यम् । तेन 'पद्यात्पाद्यहस्तभ्यां यत्'विति तृतीयान्तात् दीयते कार्यमिति एत-

योरर्थयोर्यत् । ह्रस्वे मनुष्ये जातो ह्रस्वः । नक्षत्रायाः श्रविष्ठाफल्गुनीत्यादिना लुक् । ह्रस्वं मुखम् । स्फायितञ्चीत्यादिना रक् ॥ ६९२ ॥

णिश समाधौ ॥ तालव्योष्मान्तः । नेशति । प्रणेशति । निनेश । नेनिशानि । निर्णिशयति । निनेशिषति । निशित्वा । नेशित्वा । नेनिश्यते । नेनेष्टि । प्रस्वादिना वत्वं ष्टुत्वम् । नेशयति । अनीनिशत् । अत्र मैत्रेयो निशाशब्दमस्मादाह । तस्याभिप्रायः क्विपि । आपं चैव हलन्तानां यथा वाचा निशा दिशेति । अन्ये तु नितरां शेरतेस्यामिति शेतेः अधिकरणे ड्प्रत्यये व्युत्पादयन्ति । निशायां भवं नैशिकम् । 'निशाप्रदोषाभ्यां चे'ति शैषिकः पक्षे ठञ् । तदभावे प्राग्दीव्यतीयेऽणि नैशम् ॥ ६९३ ॥

मिश मश शब्दे रोषकृते च ॥ इमौ तालव्योष्मान्तौ । मेशति । मशतीत्यादि । मशकः । सञ्ज्ञायां क्वुन् ॥ ६९५ ॥

शव गतौ ॥ दन्त्योष्ठ्यान्तः । शवति । शवम् । क्विप्यूठि वृद्धौ शौः ॥ ६९६ ॥

शश प्लुतगतौ ॥ तालव्योष्माद्यन्तः । शशति । शशः । शशनः । चलनशब्दार्थेति युच् । अत्र कश गताविति क्व चित् पठ्यते तत् 'प्रतिष्कशश्च कशेरि'त्यत्र वृत्तौ कश गतिशासनयोरित्यदादिकस्योपादानादनार्षमिव प्रतीयते । तथा नाभ्यस्तस्येत्यत्र प्रकृतमकारणां चेति भाष्यवृत्तौ प्रकृत्य तद्व्याख्यातृभिरादादिक एवोपादीयते ॥ ६९७ ॥

शसु हिंसायाम् ॥ दन्त्योष्मान्तः । शसति । शशास । शशसतुः । न शसेत्येत्वाभ्यासलोपनिषेधः । शस्यतेनेनेति शस्त्रम् । दाम्नीशसेति करणे ष्ट्रन् । षित्वात् स्त्रियां शस्त्री । शस्यम् । तकिशसीत्यादिना यत् । शंस्यमिति हन्त्यर्थाश्चेति चुरादिपाठात् स्वार्थे णौ यति । शसित्वा शस्त्वा । उदित्वादिड्विकल्पः । शस्तो वृषलो विनीत इत्यर्थः । 'धृषिशसी वैयात्ये' । धृषिशसी यदा वैयात्यविषयौ' तदैवैताभ्यां परस्या निष्ठाया इडभाव इति नियमादन्यत्र विशसित इति भवति । विशसितुर्धर्म्यं वैशस्त्रम् । विशसितुः

इति षष्ठ्यन्ताद्भूम्यमित्यर्थेऽञ्प्रत्ययः । तत्र विश्वसितुरिड्लोपश्चेति वचनादिड्लोपः । आशंसतरतीच्छायां गतः ॥ ६९८ ॥

शंसु स्तुतौ । अयं दुर्गत्यामपीति दुर्गः । द्वावपि तालव्योष्मादी । शंसति शशंस । शंसितेत्यादि । आशिषि किस्त्वादनिदितामित्युपधालोपे शस्यात् । शिशंसिषति । शाशस्यते । ङित्त्वान्नलोपः शाशंस्ति । यङो लुका लुप्तत्वात् प्रत्ययलक्षणाभावान्नलोपाभावः । शासस्त इत्यादौ तसादीनां ङित्त्वान्नलोपः । शासधि इत्यत्र हेरपित्त्वात् ङित्त्वान्नलोपः । शंसयति । अशंसयत् । शस्यम् । शंसिदुहिगुहिभ्यो वेति वक्तव्यमिति नलोपः । क्यबभावे ण्यति शंस्यम् । शंसित्वा । शस्त्वा । उदित्त्वादिड्विकल्प इति 'न क्त्वा सेडि'त्यकित्त्वान्नलोपाभावः । शस्तम् । 'यस्य विभाषे'ति नेट् । नॄन् शंसतीति नृशंसः । कर्मण्यण् । नरा एवं न शंसन्ति नरा अस्मिन्नासीनाः शंसन्तीति वा नराशंसः, घञ् । अग्निर्देशविशेषो वा । वनस्पत्यादिषु पाठात्पूर्वपदस्य दीर्घः । ब्राह्मणानि शंसतीति ब्राह्मणाच्छंसी रूढिरियमृत्विग्विशेषस्य । सुप्यजाताविति णिनिः 'ब्राह्मणाच्छंसिन उपसंख्यानमित्यलुक् । अस्मादेव निर्देशात् द्वितीयार्थे पञ्चमी । श्रेष्ठः । ज्येष्ठः । श्रेयान् । ज्यायान् । 'प्रशस्यस्य श्रः' । 'ज्य चे'त्यातिशायनिकयोरजाद्योः श्रज्यावादेशौ भवतः । आदेशयोरकारोच्चारणसामर्थ्याट्टिलोपो न भवति । ज्यायानित्यत्र 'ज्यादादीयस'इति ज्यशब्दात्परस्य ईयसुन आदेराकारः । श्रेयसोपत्यं श्रायसः । 'देवकाशिंशपादित्यवाड्दीर्घसत्रश्रेयसामादि'ति वृद्धिनिमित्तपरत्वादेकारस्य स्थाने आकारादेशः । प्रशस्यमाचष्टे श्रापयति । ज्यापयति । तत्करोतीति णिचि णाविष्ठवदिति श्रज्यादेशयोर्वृद्धौ पुक् ॥ ६९९ ॥

(शेषमग्रे)

॥ खण्डनखण्डखाद्यम् ॥

(*Continued from page* 648. Vol. VI.)

समयबन्धस्यावश्यं हेतुत्वेऽनिष्टमाशङ्कते–। "नचैवमि"ति। विचारविप्लवः=साधनदूषणप्रयोगाव्यवस्था। विचार्यविप्लवः=पक्षविपक्षाव्यवस्था, वादिप्रतिवाद्यव्यवस्था वा; तयोरपि विचार्य्यत्वात्। फलविप्लवः=जयभङ्गाऽव्यवस्था, तत्त्वनिर्णयाऽव्यवस्था च। यद्वा विचारविप्लवः=प्रमित्यजनकत्वं, विचार्य्यविप्लवः=प्रमित्यविषयत्वं, फलविप्लवः=जयाद्यभावः। अविद्याविद्यमानत्वाभिधानं समयबन्धस्याप्यपारमार्थिकत्वाय। अनादिपारम्पर्य्यायातस्येत्यवश्याभ्युपगन्तव्यत्वार्थम्। गृहीतसंवादस्येत्यप्रामाण्यशङ्कानिरासाय। ननु समयबन्धस्याज्ञानरूपतया स्वतःसिद्धत्वमनुपपन्नम्? अत उक्तमन्यथाभावासम्भाव्यतालक्षणेति। समयबन्धो न कर्त्तव्यः–इति सम्भावनाविरह एव तस्य स्वतःसिद्धत्वमिति भावः॥ "इत्यमि"ति। समयबन्धाङ्गताङ्गीकारप्रकारेणैवेत्यर्थः॥ अन्यथासिद्धिमाह–।"तादृशे"ति॥ समयबन्धस्योपजीव्यत्वमाह–। प्रमाणादीति॥

मू० नापि तृतीयः, लोकव्यवहारो हि [a]"प्रमाणव्यवहारो वा स्यात्?, पामरादिसाधारणव्यवहारो वा?। नाद्यः, विचारप्रवृत्तिमन्तरेण [b]तस्य दुर्निरूपत्वात्, [c]तदर्थमेव च पूर्वं नियमस्य गवेषणात्। नापि द्वितीयः, [d]शरीरात्मत्वादीनामपि तथासति भवता स्वीकर्त्तव्यतापातात्। *[e]पश्चात् तद् विचारबाध्यतया नाभ्युपेयते*?–इति चेत्, [f]तर्हि प्रमाणादयोपि यदि विचारबाध्या भविष्यन्ति तदा नाभ्युपेया एव, अन्यथानुपगन्तव्याः; इति 'लोकव्यवहारसिद्धतया

मूलस्य षट्यो लाभार्थम् *a*, *b*, *c*, इत्यादि क्रमस्यात्यन्तमुपयुक्ततया प्रागनुपन्यस्तत्वेपोहोपन्यासः कृतः, शेषार्थस्तु पश्चाच्चिपमपत्रे स्फुटो करिष्यते।

सत्त्वमभ्युपगम्यते'—इति तावन्न भवति। नापि चतुर्थः, [g]यादृशो भवताप्रमाणादीन्यभ्युपगम्य व्यवहारनियमः कथायामालम्ब्यते तस्यैव प्रमाणादिसत्त्वाऽसत्त्वानुसरणोदासीनैरस्माभिरप्यवलम्बनात्, तस्य (१) यदि मां प्रति फलातिप्रसञ्जकत्वं, तदा त्वां प्रत्यपि समानः प्रसङ्गः।

टी०। [a]"प्रमाणे"ति। लोक्यते (२) इति लोकः, प्रमाणमित्यर्थः। प्रामाणिकलोकव्यवहार इति वाऽर्थः॥ [b]"तस्ये"ति। प्रमाणव्यवहारस्येत्यर्थः॥ तर्हि विचारप्रवृत्त्यैव तत्सिद्ध्यतामत आह—। [c]"तदर्थमेवे"ति। विचारार्थमेवेत्यर्थः। तथाच—विचारप्रवृत्त्या प्रमाणाद्यभ्युपगमस्य प्रमाणसिद्धत्वं, तत्प्रमाणसिद्धत्वेन च तदधीनविचारप्रवृत्तिरित्यन्योन्याश्रय इति भावः॥ [d]"शरीरे"ति। 'अहं स्थूलः' इति प्रत्ययात् शरीरे एवात्मव्यवहारादित्यर्थः॥ विचाराऽबाध्यलोकव्यवहारसिद्धत्वमभ्युपगम्यतायां तन्नेत्याह—। [e]"पश्चादि"ति॥ विचाराऽबाध्यलोकव्यवहारसिद्धत्वं प्रमाणादीनामप्यसिद्धमित्याह—। [f]"तर्ही"ति॥ [g]"यादृश"इति। तत्त्वनिर्णयविजयातिप्रसङ्गभिया प्रमाणाद्यभ्युपगमः कथातः पूर्वं त्वया क्रियते, यदि नियतसमयबन्धेनैव तद्द्वयं निवर्तेत तदा वृथा प्रमाणाद्यभ्युपगम इत्यर्थः॥

मू० *[a]स्यादेतत्, नियत(३)वाग्व्यवहारक्रियासमयबन्धेन कथां प्रवर्तयतापि व्यवहारसत्ताभ्युपगन्तव्या, [b]न हि सत्तामनभ्युपगम्य व्यवहारक्रियाऽभिधातुं शक्या, क्रिया हि नि-

(१) तस्य=व्यवहारनियमस्य।

(२) यथा व्युत्पत्त्या मूले लोकव्यवहारपदस्य 'प्रमाणव्यवहारः'—इत्यर्थो निष्पन्नस्तां दर्शयति,—तत्र कर्मधारयमाश्रित्याह—लोक्यते इति,षष्ठीतत्पुरुषमादायाह—प्रामाणिकेति; एतद्व्याख्याऽनुरोधेन मूले 'प्रामाणिकव्यवहारः'—इति प्रायो दृश्यमानः पाठ उपेक्षणीयः, अन्यथाग्रे 'तस्येति प्रमाणव्यवहारस्येत्यर्थः'—इति व्याख्यानाऽसाङ्गत्यप्रसङ्गात्।

(३) नियतत्वं समयबन्धस्य विशेषणं, तथा च वाग्व्यवहारक्रियया क्रियमाणो वा, वाग्व्यवहारक्रियारूपो वा, वाग्व्यवहारक्रियायाः सम्बन्धी वा, यो नियतसमयबन्धस्तेन कथां प्रवर्तयतापीत्यर्थः।

ण्याद्दना, अस्तु: सद्रूपतापादनमिति यावत् । "प्रमाणै(१)र्व्यवहर्त्तव्यमि'ति नियमबन्धनं (प्रमाणकारणभावस्य नियमान्तर्भावात् नियतपूर्वसत्त्वं कारणत्वं प्रमाणानामनादाय) न पर्य्यवस्यति । दूषणानां(२) चास्तित्वेन भङ्गावधारणनियमबन्धने, साधनाङ्गव्याप्त्यादीनां सत्त्वेन तद्विषयस्य तत्त्वरूपताव्यवहारनियमनादौ च, [d]कण्ठोक्तमेव तस्य तस्य सत्त्वमङ्गीकृतमिति रिक्तमिदमुच्यते—'प्रमाणादीनां सत्तामनभ्युपगम्य कथारम्भः शक्यते'—इति*?। नैवम्, 'एभिरपि बाधकैः कथायामारब्धायामेवाभिमतस्य प्रसाधनीयत्वे पूर्वोक्तबाधाया अनिस्तारात् ।

टी० ननु द्वैतापत्तिभयेन प्रमाणादिसत्तां नाभ्युपैषि, तच्च व्यवहारसत्त्वाभ्युपगमेप्यविशिष्टं, किञ्च व्यवहारादिसत्ताभ्युपगमनान्तरीयक एव प्रमाणादिसत्ताभ्युपगमोपीति कथायां तद्धेतुत्वमवर्जनीयमिति शङ्कते—[a]"स्यादेतदि"ति ॥ व्यवहारसत्ताभ्युपगममुपपादयति—। [b]"न ही"ति ॥ प्रमाणसत्ताभ्युपगममुपपादयति—। [c]"प्रमाणैरि"ति ॥ [d]"कण्ठोक्तमि"ति। 'दूषणानि सन्ति' व्याप्तिरस्ति'—इत्यादिवचनं तत्सत्ताभ्युपगमपरमेवेत्यर्थः॥ प्रवृत्तायामेव कथायामयं बाधकस्त्वया वाच्यः, तत्कथाप्रवृत्तिवत् कथान्तरप्रवृत्तिरपीति न किञ्चिदेतदिति परिहरति—। [e]"एभिरपी"ति । यद्यपि सा कथा प्रमाणाद्यभ्युपगमपूर्विकैव, त्वं पुनरिदानीं तत्र विप्रतिपन्नः समयबन्ध-

(१) न केवलं व्यवहारसत्त्वं स्वोक्त्यैवेष्टं, प्रमाणादिसत्त्वमपि त्वदुक्तिबलादेवापद्यते—इत्याह—प्रमाणैरिति । प्रमाणैः,—इति तृतीयया करणत्वाऽभिधानात् तस्य च कारणविशेषत्वात् कारणत्वस्य च कार्याऽव्यवहितप्राक्सत्त्वरूपत्वात्प्रमाणानां सत्त्वमनङ्गीकृत्य नियमबन्धनमेव न पर्यवस्यतीत्यर्थः ।

(२) 'यस्य मते दूषणानि सन्ति तस्य भङ्गोऽवधारणीयः, यस्य तु हेतौ साधनाङ्गव्याप्त्यादीनां सत्त्वं तस्य पक्षस्तत्त्वरूपो व्यवहर्त्तव्यः'—इति नियमबन्धने कण्ठोक्तमेव तस्य तस्य व्याप्त्यादेः सत्त्वमित्याह—। दूषणानामिति ।

मङ्गीकुर्वन् प्रमाणादिसत्ताभ्युपगममङ्गीकार्य्यसे, इति नानुपपत्तिः, तथापि प्रमाणादिसत्ताभ्युपगमेऽपि न प्रमाणादिसत्तासिद्धिः, अपेवक्ष्यमाणयुक्तेरिति हृदयम् ॥

मू० * [a]नच व्यवहारनियमस्य स्वेच्छास्वीकृतस्यैव प्रमाणादिसत्तास्वीकारपर्य्यवसायितया नायं दोषः स्यात् *। यतः सत्ताज्ञानस्य तत्रा(१)ङ्गत्वं, नतु सत्तायाः। [b]नच(२) किं सत्त्वावगममात्रात् सत्ताभ्युपगम्येति मन्यसे?, अबाधितात्तदवगमाद्वा?। न तावदाद्यः, मरुमरीचिकादौ जलरूपतासद्भावाभ्युपगमप्रसङ्गात्। द्वितीयेऽपि किं वादिप्रतिवादिमध्यस्थमात्रस्य (तस्यापि कथाकालमात्रे एव) बाधितावगमाभावात्?, अथवा कस्यचिदपि कालान्तरेऽपि च बाधितबोधविरहात्?। नाद्योऽतिप्रसङ्गात्, [c]पुरुषत्रयावगतस्यापि (३)एकक्षणावगतस्य पुरुषान्तरेण, तेनापि क्षणान्तरे, बहुलं बाध्यत्वदर्शनात्। नचासावर्थोऽसत्योऽपि द्वित्रादिपुरुषमात्रपूर्वजातनत्प्रतीत्यनुरोधा(४)द्, बाधदर्शने सञ्जातेऽपि, तथैव सन्नित्यभ्युपगम्यते। तस्माद् [d]द्वितीयः पक्षः परिशिष्यते–'यत्र सर्वप्रकारेण बाधितत्वं नास्ति तत्सदित्यभ्युपगन्तव्यम्।

टी० ननु कथायां कस्याश्चित्प्रमाणादिसत्ताभ्युपगमो न मया त्वां प्रति साध्यते, किंतर्हि, स्वेच्छया यः समयबन्धः परिगृहीतः स प्रमाणादिसत्त्वाभ्युपगमपर्य्यवसन्नः–इति त्वं बोध्यसे? इत्यत आह–। [a]"नचे"ति। सम-

(१) तत्र=कथायाम्।

(२) तत्र=प्रमाणादिसत्ताज्ञानस्य कारणत्वस्वीकारे सति।

(३) पुरुषत्रयावगतस्यापि पुरुषान्तरेण बहुलं बाध्यत्वदर्शनात्, एकक्षणावगतस्य च क्षणान्तरे तेनापि बहुलं बाध्यत्वदर्शनादित्यन्वयः।

(४) अबाधितबुद्ध्यनुरोधादित्यर्थः।

पक्षत्रः प्रमाणादिसत्ताज्ञानमात्रमाक्षिपति, नतु प्रमाणादिसत्तामपि, येन, द्वैतापत्तिरिति भावः ॥ ननु प्रमाणादिसत्ताज्ञानं चेदायातं तदा तदभ्युगमोऽपि(१)सिद्धः, तत्रैव च त्वं विप्रतिपन्नः? इत्यत आह—। [b]"तत्र किमि"ति। यद्वा 'नावगममात्रं कथाहेतुरपितु प्रमाणादिसत्तावगमः'—इति विशिष्टकारणताग्राहकं मानं(२)विशेषणमपि विषयीकरोतीति प्रमाणादिसत्ताभ्युपगमो(३)पि कथाहेतुः,— एवं तदवगमोपीत्यत आह—। "तत्र किमि"ति ॥ अतिप्रसङ्गमेव दर्शयति—। [c]"पुरुषत्रये"ति ॥ [d]"द्वितीय"इति। द्वितीयपक्षस्य द्वितीयपक्ष इत्यर्थः ॥ तमेवाह—। "यत्र सर्वप्रकारेणे"ति ॥

मू० [a]तदित्थं (४), यदि नाम वादिप्रतिवादिमध्यस्थमात्रस्य दूषणादिसत्तावगमः कथाकालमात्रे तै(५)रबाध्यमानः कथाङ्गत्वेनाभ्युपेयते तदा [b]किमायातं सर्वप्रकाराबाधिततत्सत्त्वावगमायत्ततत्सत्ताभ्युपगमकथाङ्गतानङ्गीकारस्य(६) । [c]कतिपयप्रतिपत्तृ-कतिपयकाल-तथात्वावगमादेव प्रायेण लौकिको व्यवहारः प्रतीयते, तादृशश्चायं सत्त्वावगमः कथाङ्गम्। [d]एतत्तदुच्यते(७)—'व्यावहारिकीं प्रमा-

(१) प्रमाणादिसत्तास्वीकारोपीत्यर्थः ।

(२) प्रमाणादिसत्ताविशिष्टाऽवगमनिष्ठकारणताग्राहकं मानं विशेषणीभूतां सत्तामपि कारणत्वेन विषयीकरोतीत्यर्थः ।

(३) 'अभ्युपगमः'—इत्यापाततः कीर्त्तनं, प्रमाणादिसत्तापि कथाहेतुरिति तु परमार्थः । यद्वा पूर्वं प्रमाणादिसत्ताविशिष्टावगमोक्त्या प्रमाणादिसत्ताभ्युपगमविशिष्टत्वमेवलक्षणयोक्तं भवतीति ।

(४) 'तद इत्थं वादिनोच्यते एव, परं न घटते, सर्वप्रकाराबाध्यत्वस्याऽसर्वज्ञेनाऽविज्ञेयत्वात्'—इति विद्यासागरोक्तोऽर्थः। तत्र तदित्थमित्यस्य तवेत्यर्थकस्य पूर्वत्रैवाऽन्वयः, प्रक्रान्तशाङ्करव्याख्यानुरोधेन त्वयं इति विज्ञेयम्। क्वचित्तु मूलव्याख्यानयोः 'तदिदम्' इति पाठः।

(५) तैः=वाद्यादिभिरित्यर्थः ।

(६) मदभ्युपगतस्य,—इति शेषः ।

(७) 'तवेतद्विद्वद्भिरपि "स्वप्नवद्व्यवहरेम" इत्यादावुच्यते, न तु मयैव'—इति विद्यासागराः । वयं तु, तत्=तस्मिन्नेतस्मिन्पूर्वोक्तेऽर्थे, एतत्=वक्ष्यमाणम्, उच्यते=उक्तं भवतीति वदामः ।

णादिसत्तामादाय विचारारम्भः—इति। तस्माद् 'यादृग्व्यवहारनियमः कृतस्तन्मर्यादाऽनेन नोल्लङ्घिता'—इति यद्वादिवाग्व्यवहारे मध्यस्थावगमः, स विजयते; यस्य तु वचसि नैवं तस्यावगमस्तस्य पराजयः; यत्र(१)वाद्युक्तनिग्रहस्थानावगमः, स निगृहीतः; तदितरस्तु न तथा—इत्यादिनियम एव कथारम्भाय ग्राह्यः।

टी० कथाव्यवहारे(२) सर्वप्रकाराबाधितत्वं(३) नास्ती(४)त्यत आह—।[a] "तदित्थमि"ति॥ ननु प्रमाणादिसत्ताभ्युपगमे त्वं विप्रतिपद्यसे, स च त्वयैवाङ्गीकृतः? इत्यतआह—।[b] "किमायातमि"ति। सर्वप्रकारेणाऽबाधितो यः प्रमाणादिसत्तावगमस्तदायत्तः(५) प्रमाणादिसत्ताभ्युपगमः कथाङ्गं न भवतीति मदीयः पक्षः, तत्र त्वया न किञ्चिदुक्तमिति भावः। *ननु प्रतिज्ञान्तरमिदं यत्प्रमाणाद्यभ्युपगमः कथाङ्गं न भवतीति प्रतिज्ञाय सर्वप्रकाराऽबाधितप्रमाणादिसत्ताऽधिगमायत्तप्रमाणाद्यभ्युपगमः कथाङ्गं न भवतीति प्रतिज्ञायते*?—इति चेत्, पूर्वमपि विशिष्टस्यैव प्रतिज्ञानात्, प्रतिज्ञान्तरस्यापि खण्डनीयत्वा(६)च्चेति भावः॥ नन्वबाधित एव प्रमाणादिसत्ताभ्युपगमः कथाङ्गमस्त्वित्यत आह—।[c] "कतिपये"ति। त्रैकालिकसार्वलौकिकबाधवैधुर्याकलनमशक्यमिति कतिपयप्रतिपत्तृमात्रबाधविरह एव प्रवृत्त्यङ्गम्,—इत्यवश्यं वाच्यं, नैतावता वस्तुस्थितिरिति भावः॥[d] "एतत्तदुच्यते" इति। तदेतदुच्यते इत्यर्थः॥[e] "व्यावहारिकीमि"ति। पारमार्थिकत्वस्य दुष्परिच्छेद्यत्वा(७)दिति भावः॥

(१) यत्र=प्रतिवादिनीत्यर्थः।

(२) मूलानुरोधात् 'कथाव्यवहारे'-इत्यस्य, कथाव्यवहारकाले-इत्यर्थः।

(३) 'सर्वप्रकाराऽबाधितत्वं नास्ति,-इति तु प्रायोदृश्यमानः पाठः प्रामादिकः।

(४) प्रमाणादिसत्ताऽवगमस्य,-इति शेषः।

(५) तदायत्तः=तदधीनः।

(६) सर्वनिग्रहस्थानखण्डनवेलायां द्वितीयपरिच्छेदे,-इति शेषः। इति भाव इति। पूर्वमेकदा भावस्योक्तत्वादत्र 'भावः' इति नोचितं, यद्वाप्राथमिकस्य 'भावः'-इत्यस्य स्थाने 'अर्थः'-इति पाठेन भाव्यम्।

(७) परिच्छेदः=अवधारणं, तथा च 'दुष्परिच्छेद्यत्वात्'-इत्यस्य, दुरवधारणत्वादित्यर्थः। अत्र खलु आवश्यकत्वेन दुष्परिच्छेदत्वादिति पाठं तु युक्तमनुमन्ये।

मू० [a]"'अनेन नियमेन वक्तव्यम्'—इत्यस्यायमर्थः,—'अनेन(१) नियमेनोक्तमनेने'ति मध्यस्यावगमस्य विषयीभवितव्यमिति। *[b]नच वाच्यमन्ततस्तदवगमस्यापि(२)सत्ताभ्युपेयेति*। तस्यापि(३)सत्ताचिन्तायां तत्सत्तावगमान्तरस्यैव शरणत्वात्।*[c]नचैवमनवस्था *। तदनुसरणाऽवश्यम्भावानङ्गीकारात्, [d]"एवं त्रिचतुरज्ञानजन्मनो नाधिका मतिः"—इति न्यायात्। *नचान्तिमासत्त्वे पूर्वप्रवाद्याऽसत्त्वापत्तिः, तथा-चाऽवगममादायापि व्यवहरतो न निस्तारः-इति वाच्यम्*। [e]अस्तु, [f]एवं हि, [g]तथापि त्रिचतुरज्ञानकक्षागवेषणमात्रविश्रान्तेन विचारेण ततः परमननुसरणरमणीयेनैव च समयं बद्धा कथायां मिथः सम्प्रतिपत्त्या प्रवर्त्तनात् ।

टी० ननु प्रमाणादिसत्ता माभ्युपगम्यतां, नियमबन्धश्चेदङ्गीकृत एतावतैव द्वैतापत्तिरित्यत आह—। [a]"अनेने"ति॥ अवगमसत्तया द्वैतापत्तिं निरस्यति—। [b]"नच वाच्यमि"ति। आपाततः सर्वशून्यतानयनगरप्रवेशे तात्पर्य्यम्॥ ननु ज्ञानमपि चेन्न परमार्थसत् किन्तु तज्ज्ञानात्तद्व्यवहारसिद्धिरेवं तच्च तत्रापि मन्तव्यं, तदाऽनवस्थया कोपि व्यवहारो न सिद्ध्येदित्यत आह - । [c]"नचे"ति। भवेदेवं यदि ज्ञानमवश्यं स्वव्यवहारार्थं स्यात्, किन्तर्हि, विषयव्यवहारार्थमनुसृतस्य व्यवजिहीर्षायां ज्ञानान्तरमनुश्रीयतां (४) नतु तत्तज्ज्ञान व्यवहारपरम्पराध्रौव्यं, येनाऽनवस्था स्यादित्यर्थः॥ अत्रार्थे भट्टाचार्य्यानुमतिमाह—। [d]"एवमि"ति। प्राकट्यानुमेयज्ञानपक्षे तत्तज्ज्ञानपरम्पराऽनुमानानवस्थापरिहारार्थं भट्टाचार्य्यचरणैरिदमुक्तमिति भावः॥ ननु ज्ञानस्यापि

(१) अनेन वादिना अनेन नियमेनोक्तम्,—इति मध्यस्याऽवगमस्य विषयत्वेन भवितव्यमित्यर्थः, तथाचाऽवगमसत्तैव सिद्धा, न नियमबन्धसत्तेति भावः ।

(२) तदवगमस्यापि=नियमबन्धावगमस्यापीत्यर्थः ।

(३) नियमबन्धविषयकाऽवगमस्यापि प्रातीतिकमेव सत्त्वमित्याह—तस्यापीति ।

(४) वयं तु अनुश्रीयतामित्यस्य स्थाने अनुस्रियतामिति पाठः साधुरिति वदामः।

व्यावहारिकी सत्ता, तथा चान्तिमज्ञानमव्यवह्रियमाणमसत्स्यात्, तन्मात्रा- धीनसत्ताकं तत्पूर्वज्ञानमप्यसदापद्येत?—इत्याशङ्क्य सर्वशून्यताभिप्रायेणेष्टा- पत्त्या परिहरति—। [e]"अस्त्वि"ति। अस्त्वितीष्टापादनं, सर्वासत्त्वमस्त्वित्यर्थः॥ [f]"एवं ही"ति। एवमेव यतो विचारबलात् सेत्स्यतीत्यर्थः। (१) हि—शब्दः किलाऽर्थे वा ॥ ननु प्रमाणादिसत्त्वमनभ्युपगम्यापि कथाप्रवृत्तिरितीदानीं तवोद्देश्यं, तच्च सर्वासत्त्वस्वीकारविरुद्धं, प्रमाणाद्यसत्त्वे विचारप्रवृत्त्य- नवकाशादत आह—। [g]"तथापी"ति ॥

मू० [a]अन्यथा प्रमाणादिसत्त्वाऽभ्युपगमेपि ज्ञानाऽनवस्थायाः दुष्परिहरत्वात् । *[b]नच वाच्यं—मत्पक्षे स्वरूपसता ज्ञानेन व्यवहारस्य चरितार्थयितुं शक्यत्वात् तज्ज्ञानपरम्पराऽननुसरणमुचितं, नत्वेवं त्वत्पक्षे स्वरूपसता ज्ञानेन व्यवहारस्य चरितार्थता, ज्ञानस्वरूपसत्त्वाङ्गीकारप्रसङ्गादिति * । स्वरूपसत्त्वमादायापि परिहरतो ऽनवस्थाप्रसङ्गस्य स्वप्रकाशप्रस्तावे वक्तव्यत्वात् । [c]यथा च त्वत्पक्षे स्वरूपसत्त्वाऽविशेषेपि विज्ञानस्वरूपसत्तैव परं व्यवहारोपपादिका, न घटादिसत्ता, एवमेव (२) असत्त्वाविशेषेपि ज्ञानमेवासद् व्यवहारोपपादकं, नान्यत्। *[d]असत्त्वोपपादकं च—इति व्याहतम् *?—इति चेन्न, [e]सदुपपादकम्—इति कुतो न व्याहतम्?। नहि सदुपपादकम्, असन्न,—इति क्वचिदावयोः सिद्धम्। *[f]ननु तदसत्त्वाविशेषात्कार्यस्याऽन्यदापि जन्मप्रसङ्गः *?।

(शेषमग्रे)

(१) 'यत'-इत्येतदर्थे हि-शब्दमभिधायेदानीं किलार्थे आह-हीति ।
(२) मत्पक्षे,-इति शेषः ।

॥ श्रीः ॥

॥ परिभाषेन्दुशेखरस्याकाण्डताण्डवम् ॥

(*Continued from page* 616. Vol. VI.)

यद्यपि सानुबन्धे बोधकत्वनिश्चये सत्यनुमितेर्न प्रयोजनम् । तथापि तन्निश्चयस्याप्रामाण्यसंदेहनिराकरणाय युक्त्याऽवयवत्वव्यवस्थापनायानुमितिः प्रवर्त्तत एवेति बोध्यम् ।

अनुकूलतर्कान् विशदयति । एवं ही (१)त्यादिना ।

केचित्त्वन्वयव्याप्त्युदाहरणस्यैव संभवेन व्यतिरेकव्याप्त्यादिप्रदर्शनं प्राचामनुरोधेन । अत एव भाष्ये "तद्यथा वृक्षस्य शाखा इत्येकान्ता" इत्याद्यन्वयव्याप्तिरेवोदाहृतेति प्राहुः ।

इमुडित्यादौ समुदायाद्विभक्तिस्तु पक्षद्वयेऽपि सौत्रत्वादेव । लोपश्शित्यत्र शकारप्रश्लेषं विनापि लोपो यीत्यत्रत्यलोपग्रहणेऽनुवर्त्तमाने पुनर्लोपग्रहणात्सर्वादेशत्वमिति भाष्य एव स्पष्टम् ।

भाष्ये(२)ऽपि "उभयमिदमनुबन्धेषूक्तमेकान्ता अनेकान्ता इति । किमत्र न्याय्यमेकान्ता इत्येव न्याय्यम् । कुत एतत् । अत्र हि हेतुर्व्यपदिष्टः । यच्च नाम सहेतुकं तन्न्याय्यम्" इत्युक्त्या पूर्वानुमानस्य हेतुरहितत्वं सूचितम् ।

संशयस्त्वेकत्र हेतुसद्भावात्परत्र हेत्वाभाससद्भावाच्चानुपपद्यते ।

क(३)य्यटेन तु यस्यैव संशयहेतुत्वं तस्यैव निश्चयहेतुत्वं कथमित्या-

(१) एवं हि बहुव्रीहिरपि न्यायत उपपन्नः । अन्यशब्दे लक्षणा च न । किं चानवयवत्वे णमकप्रत्ययादौ कादेरित्त्वानापत्तिः । प्रत्ययादित्वाभावात् । वग्रहणच- कारस्य वैयर्थ्यापत्तिश्च । सू० ॥

(२) प्रथमाध्यायतृतीयपादप्रथमाह्निकान्तःस्थे तस्य लोप इतिसूत्रव्याख्यानाव- सर इत्यर्थः ।

(३) यद्यप्यर्वाचीनपुस्तकेषु लिखितेषु मुद्रितेषु च ग्रन्थकारनाम्न्याद्यवर्णा ऐकारस्व- रविशिष्टा द्वितीयवर्णस्त्वेकयकारक एव परिदृश्यते । तथापीदं नाम निरर्थकमपि कथं- कारमात्मकुलोचितां रीतिमसति बाधके नानुपालयेत् । प्रसिद्धश्चैतद्ग्रन्थकर्त्तुर्भ्रात्रा मम्म- टोव्वटेतिनाम्नोराद्यो वर्णः सजातीयसंयुक्तहलद्वयाव्यवहितपूर्ववर्त्ती ह्रस्वः । तथैतद्ग्रन्थ- कर्त्तुः पितुर्जय्यटेतिनाम्न्यपि । निरीक्ष्यतेऽपि प्राचीनपुस्तके बहुशस्तथैव लेखः । यस्त्वाधुनि- कपुस्तकेष्वैकार उपलभ्यते स तु यकारद्वयपूर्ववर्त्त्यकारैकारयोरुच्चारणविशेषस्य दुरवधार- तामूलकं तादृशलिपिपथमनुसृत इवाभातीति नात्र तथा लेख आदृतः । एवं यकार- द्वयपूर्ववर्त्त्यैकारादिलेखोपीति दिक् ॥

शङ्क्य, एवार्थावधारणगर्भस्य तत्रैवोपलम्भादित्यस्य निश्चयहेतुत्वमिति व्यवस्थापितम् ।

अत्र केचित् । संशयहेतुकोटिद्वयमध्ये एकत्राप्रामाण्यग्रहे तदुत्थापकापरकोट्यन्तर्गतहेतोरेव निश्चयहेतुत्वस्यान्यत्र प्रसिद्धतयाऽत्रापि भाष्यस्य तादृशाशयकत्वे काऽनुपपत्तिरित्याहुः ।

एवन्तु यद्यपि भाष्योक्तरीत्या तत्रोपलब्धेरेव हेतुत्वमायाति । तथापि काकादावपि वृक्षादावुपलब्धेर्दर्शनेन विलक्षणसम्बन्धेन तत्रोपलब्धेरेकजातीयसम्बन्धेनान्यत्रोपलम्भाभावविशिष्टस्य तत्रोपलम्भस्य वा हेतुभावेऽवश्यं भाष्यतात्पर्यमिति तत्रैवोद्द्योते स्पष्टम् ।

यद्यप्यनेकान्तत्वपक्षे वक्ष्यमाणपरिभाषात्रितयं न कर्त्तव्यं भवतीत्यस्ति लाघवम् । तथापि तत्साधकसद्धेतोरभावस्य भाष्य एवोक्ततया फलमुखगौरवस्यादुष्टत्वं प्रकृते निषादस्थपतिन्यायप्रदर्शितदिशा बोद्धव्यम् ।

तत्सर्वं मनसि निधायाह । इद(1)मिति ।

अत्रेदं (2) ध्येयम् । णकारेत्संज्ञकोऽकारो भवतीत्यादिक्रमेणाऽत्वादिविधायकाना(3)मर्थः, णकारेत्संज्ञकेऽकार इत्येवं क्रमेणानुवादे(4)ऽर्थ इत्युक्तं शेखरादौ । तत्र विधायकशास्त्रीयविधेयतावच्छेदकदले णकारेत्संज्ञकत्वादिप्रवेशस्य क उपयोगः । विधेयतावच्छेदकानन्तर्गतेनापि स्वरूपसता(5) णकारेत्संज्ञकत्वेन सकलव्यवस्थोपपत्तेः(6) । एवमनुवादेऽपि णकारेत्संज्ञकेऽकार इत्यर्थेऽङ्गीक्रियमाणेऽणादिनिमित्तककार्य्यस्य णादाव-

---

(१) इदं च तस्य लोप इत्यत्र भाष्ये स्पष्टम् । तत्र युक्तमेकान्ता अनुबन्धा इत्येव न्याय्यमिति दिक् ॥ ५ ॥ मू० ॥

(२) मूलस्यास्य दिगित्यस्यार्थमाह । अत्रेदमित्यादिना ॥

(३) कर्मण्यण्, शिवादिभ्योऽणित्यादिसूत्राणाम् ॥

(४) षपूर्वहन्धृतराज्ञामणि, अन्, इत्यादौ ॥

(५) स्वरूपतो वर्त्तमानेन ॥

(६) हृभृधृसृस्तृशृभ्य इमनिजित्युणादिचतुर्थपादस्थसूत्रविहितेमनिजन्तान्तोदात्ताद् भरिमादिशब्दात्, उणादितत्पादस्थमिथुने मनिरिति सूत्रविहितमनिप्रत्ययान्तान्तोदात्तसुशर्म्मादिशब्दात्, समासत्वादन्तोदात्तब्रह्मदत्तादिशब्दाच्च समूहार्थके विकारार्थके वाऽनुदात्तादेरित्यञि प्रकृतिभावाभावस्य, अनोऽकारलोपाभावस्य चोपपत्तेरित्यर्थः । इदं चोदाहरणप्रदर्शनायाशोकवनिकान्यायेनोक्तमित्यन्यान्यपि फलान्यूह्यानि ॥

Digitized by Google

प्याप्तेः(१),रित्यन्त्यत्वार्थ इचेत्संज्ञावदकार इत्येवं क्रमेणार्थोऽवसेयः । बोध्ये चकारेत्संज्ञकत्वं त्वौषदानुपूर्व्याव्यत्ययेऽप्यभेदाध्यवसायात् । आरोपाद्वा ।

अनेकान्तपक्षे तु बोधकेऽपीत्संज्ञकचकारनिष्ठावयवतानिरूपकत्व-स्यासत्त्वेन तत्रापि त(२)दारोपितमेव । आरोपितस्यापि बोधकवृत्तिधर्मस्य बोध्य आरोपेण च बोध्ये तत्तत्कार्यसंपत्तिः । वैयाकरणो चित्स्वरस्तु न । ऐच्छब्दावयवचकारस्येत्संज्ञकसदृशत्वेऽपि वस्तुत इत्संज्ञकत्वाभावेन(३),का-न्तपक्षे चकारेत्संज्ञकत्वस्य वास्तविकस्य बोधकेऽभावेनानेकान्तपक्षे चेत्संज्ञ-कसामीप्यस्य बोधकावयव ऐकारेऽसत्त्वेन तन्मूलस्येत्संज्ञकचकारावयवक-त्वारोपस्याभावेनारोपितस्यापि चकारेत्संज्ञकत्वस्य बोधकेऽसत्त्वेन बोध्ये तदारोपस्यासम्भवात् ।

केचित्तु अनुवादे सन्यत इत्यादौ सन्पदस्य स्ववृत्त्यानुपूर्व्यवच्छिन्न-बोधकत्वमेव, बोध्ये सन्त्वादिवैशिष्ट्यं पूर्वोक्तरीत्याऽऽरोपादिनैव । न वेति चेतिसूत्रस्थभाष्यस्या(४),सङ्गतिस्तत्र हि"पदे किम् तन्त्रयुतं नैतदस्ति लक्षणप्रतिपदोक्तपरिभाषयैव सिद्धम्, एवं तर्हि इकोह्रस्वादित्युत्तरार्थं पद-ग्रहण"मित्याद्याशयकमुक्तम् । तत्र चोकारोत्तरजत्वस्यैकान्तपक्षे वास्तविक-स्यानेकान्तपक्षे च सामीप्यमूलकारोपविषयीभूतस्य वा बोधके वेञ्शब्देऽस-त्त्वेन बोध्ये तदारोपासम्भवेनोञादिपदस्य स्ववृत्त्यानुपूर्व्यवच्छिन्नबोधकत्वे तद्भाष्यासङ्गतिः स्पष्टैव । उञोऽत्यादिपदस्य ञकारेत्संज्ञकोकार इत्यादि-क्रमेणार्थेऽङ्गीकृते तु बोधकवेञ्शब्दवृत्तिञकारेत्संज्ञकत्वस्य बोध्य आरोपेणो-कारत्वस्य च तत्र स्वतःसिद्धत्वेन भूताकारस्मृतानुबन्धाभ्यामित्युक्तरी-त्या (५) तत्र ञकारेत्संज्ञकोकारत्वस्याऽऽर्थसमाजग्रस्तत्वेन तद्भाष्यसंगति-

(१) अचित्याद्यणुनिमित्तकप्रकृतिभावादेस्ताच्छीलिकेतरपरहरणाऽऽर्थके वा इत्यर्थः ॥

(२) इत्संज्ञकचकारनिष्ठावयवतानिरूपकत्वम् ॥

(३) हलन्त्यमित्यनेनैऔजिति सूत्रघटकचकारस्यैवेत्संज्ञा, व्यक्तिपक्षे च तस्माच्च-कारादैच्छब्दावयवचकारो भिन्न एवेति नास्येत्संज्ञकत्वम् । अपि त्वित्संज्ञकसदृशत्वमेव, आदिरन्त्येनेत्यस्याप्यन्त्येत्संज्ञकसदृशेन सहेत्यर्थमाश्रित्य आदिरित्यादेरर्थ इत्याद्यन्यत्र प्रपञ्चितमिति तात्पर्यम् ॥

(४) अष्टमाध्यायतृतीयपादप्रथमाह्निकान्तःस्थस्येत्यर्थः ॥

(५) प्रथमाध्यायप्रथमपादाष्टमाह्निकान्तर्गतस्यानिदित्सूत्रस्थभाष्योक्तरीत्या, सप्त-माध्यायतृतीयपादद्वितीयाह्निकान्तर्गतयाङाप इतिसूत्रभाष्योक्तरीत्या चेत्यर्थः ॥

Digitized by Google

रिति वाच्यम् । तद्भाष्यस्यानेकान्तपक्षाभिप्रायकत्वात् । अत एव तस्य लोप इति सूत्रशेषे कय्यटे(१) "हेतुरहितत्वादिहानेकान्तपक्षो भाष्यकृता त्यक्तः प्रदेशान्तरे त्वनेकान्तपक्षेणापि व्यवह्रियत" इत्यादिनाऽनेकान्तत्वपक्षस्यापि भाष्यव्यवहारनिर्वाहकत्वमुक्तम् । अनेकान्तपक्षे चोऽत्वस्य बोधके वास्तविकस्यासत्त्वेनारोपस्यावश्यकत्वे अकारेत्संज्ञकोकार इतिक्रमेणैवार्थ इति अुताकारेति पूर्वोक्तरीत्यैव भाष्यसंगतिः । तद्भाष्यस्य(२) कदेश्युक्तित्वस्योत्तरभाष्ये(३) व्यक्तत्वेन तद्विरोधस्याकिञ्चित्करत्वाच्च । अतिगद्ग्रायेत्यत्रत्यअुताकारेत्यादेरपि अन्यस्य बोधकस्थस्याकारोत्तरपकारत्वस्य बोध्य आरोप इत्येव तात्पर्य्यम् । एवञ्च न कुत्रापि क्लिष्टकल्पना । अतो रोरित्यादिघटकरुत्वघटकोकारत्वं चानुनासिकत्वसमानाधिकरणमेवेति न धातुरुशब्दस्य ग्रहणमित्याहुः ।

अन्येतु तस्य लोप इति शास्त्रेण सानुबन्धके स्वं रूपमितिशास्त्रेण प्रसज्यमानं बोध्यत्वं निरनुबन्धके तच्छास्त्रबाधपूर्वकं बोध्यते । एवन्तु स्थानिवद्भावेन लक्ष्ये बोध्ये सत्त्वावगतेर्न का चित् क्लिष्टकल्पनेत्याहुः ।

अपरे तु तस्य लोप इति शास्त्रमुच्चारणाभावरूपलोपस्यैव विधायकं तत्रापि लक्ष्ये बोध्यघटकस्यैव । एवञ्चानुबन्धविनिर्म्मुक्तपदार्थोपस्थितेरनङ्गीकारे बोध्यनिरूपितावयवत्वानवयवत्वयोरनुबन्धेषु सन्देहात्तन्निरूपितमेवावयवत्वमनुमानादिना निर्णीयते । न तु बोधकनिरूपितमवयत्वादिकम् । तदवयवत्वनिर्णयस्य काकदन्तसङ्ख्यानिर्णयतुल्यत्वात् । नित्त्वादिप्रयुक्तकार्याणां बोध्य एव प्रवृत्तेर्बोधकेऽप्रवृत्तेश्च । एवञ्च सनादिपदानां स्वरूपबोधकत्वाव्याहत्या स्वं रूपमित्येतच्छास्त्रबाधोऽपि न । भाष्ये(४) त्क्तोपलम्भादिति हेतुबोधकवाक्यस्य बोध्य उपलम्भादित्येव तात्पर्य्यम् । बोधक उपलम्भादित्येतदर्थकत्वेपि वा स्वंरूपमित्येतच्छास्त्रार्थज्ञानवतो बोध्यबोधकयोः समानानुपूर्वीकत्वनिश्चयेन न भाष्योक्तहेतौ काऽप्यनुपपत्तिः ।

(१) प्रथमाध्यायतृतीयपादप्रथमाह्निकान्तःस्थ इत्यर्थः ॥

(२) उञ्ञ चेतिसूत्रस्थस्य भाष्यस्य ॥

(३) पदान्तस्य ङमो ङमुड्डित्यर्थेन सिद्धस्य दधिङनेत्यादेस्तत्फलत्वेन प्रदर्शनपरेण प्रकृतसूत्रस्थेन ङमो ह्रस्वादितिसूत्रस्थेन चेत्यर्थः ॥

(४) प्रथमाध्यायतृतीयपादप्रथमाह्निकान्तर्गततस्य लोप इतिसूत्रस्थभाष्येत्यर्थः ॥

एवञ्च विधेये नित्त्वादिकं स्वतः सिद्धमेवेति नारोपादेरुपयोगः । यच्चाप्युञि चेतिसूत्रस्थपूर्वोक्तभाष्यस्य(१) शेखरे(२)क्तरीत्या उकारेत्संज्ञकोकार इति क्रमेणार्थेऽङ्गीकृत एव सङ्गतिरन्यथोञशब्दत्वस्य बोधकत्वेऽशब्दे बोध्ये चाऽसत्त्वेन तद्भाष्यासङ्गतिः स्फुटैव । तथाऽप्युक्तभाष्यस्यै(३)कदेश्युक्तितायामत्यलाघवानुरोधोऽपि साधको मुख्य एवेति बोध्यमित्याहुः ।

तत्रेदं वक्तव्यम् । अनुबन्धानां बोध्यावयवत्वे भाष्यसिद्धान्तसिद्धतया स्थिरीकृते इदम इशित्यादावणत्वान्सवर्णग्रहणं प्राप्तमप्रत्यय इति निषिद्धत इत्याद्याशयकाणुदित्सूत्रस्थसिद्धान्तिभाष्यं(४) कथं संगच्छताम् । बोध्यबोधकयोरुभयोरप्यणत्वाभावादितीति ॥ ५ ॥

ज्ञापकप्रदर्शनमुखेनैव परिभाषामवतारयति । नन्वेकान्तत्व(५) इति ।

अये शिद्ग्रहणमेवेत्यादि कथनं तु मन्दबुद्धिसाधारण्येन स्फुटप्रतिपत्त्यर्थमेव । तेन पौनरुक्त्यं नोद्भावनीयम् ।

नन्वनेकान्तत्वेऽपि नित्त्वादिप्रयुक्तकार्य्यसंपत्तये समीपेऽवयवत्वारोपस्यावश्यकत्वस्योक्ततयेशादिष्वनेकाल्त्वाचत्या शिद्ग्रहणं व्यर्थमेवेति चेन्न । समीपेऽवयत्वारोपेऽपि बोधकत्वस्येकार एवाङ्गीकारात् । न चानेकाल्त्वमनेकाल्निष्ठावयवतानिरूपकत्वं तच्चेकारेऽक्षतमेव शकारस्याप्यारोपिततदवयवत्वादिति वाच्यम् । अनेकालित्यस्यैकत्वविशिष्टाल्भिन्न इत्यर्थेनेकारे तादृशभेदाभावेन तस्यानेकाल्त्वाभावात् । अवर्णादौ तु प्रत्येकभेदं समुदायेऽङ्गीकृत्यानेकाल्त्वोपपत्तिः ।

(६)नन्वनेकाल्सूत्रे बोध्यवृत्त्यनेकाल्त्वस्यैव ग्रहणमावश्यकमन्यथा

---

(१) अष्टमाध्यायतृतीयपादप्रथमाह्निकान्तःस्थस्य पदग्रहणप्रत्युदाहरणप्रदर्शनपरस्येत्यर्थः ॥

(२) संज्ञाप्रकरणस्थहलन्त्यमितिसूत्रस्थ"अन्यत्र इत्यादौ च नकारेत्संज्ञक"इत्यादिशेखरेत्यर्थः ॥

(३) अष्टमाध्यायतृतीयपादप्रथमाह्निकान्तस्थोञि चेतिसूत्रस्थभाष्यस्येत्यर्थः ॥

(४) प्रथमाध्यायप्रथमपादनवमाह्निकान्तःस्थं भाष्यमेतत् ॥

(५) नन्वेकान्तत्वेऽनेकाल्त्वादेवेशादीनां सर्वादेशत्वसिद्ध्यानेकाल्सूत्रे शिद्ग्रहणं व्यर्थमत आह (नानुबन्धकृतमनेकाल्त्वम्) शिद्ग्रहणमेवैतज्ज्ञापकम्॥ मू० ॥

(६) एकान्तत्वपक्षेऽप्यनेकाल् शित्सर्वस्येतिसूत्रस्थशिद्ग्रहणस्य वैयर्थ्याभावमुपपादयितुमारभते । नन्वित्यादिना ॥

पादस्य लोप इत्येतच्छास्त्रघटकबोधकस्य लोपशब्दस्यानेकाल्त्वात्तस्या तद्विधेयस्यापि सर्वादेशत्वापत्तिः । एवं च शेखरो(१)क्तरीत्याऽनुबन्धविनिर्मुक्तस्यैव बोध्यतया तत्र चानेकाल्त्वाभावात्कथं शिद्ग्रहणवैयर्थ्यम् । बोधकवृत्त्यनेकाल्त्वस्यापि बोध्य आरोपाद्विनाऽङ्गीकारे तु पुनरपि लोपस्य सर्वादेशताऽपरिहृतैव । एतेन विधौ निर्दिष्टो योऽनेकाल् स सर्वस्येति सूत्रार्थ इति शेखर(२)मनुगच्छन्तोऽपि प्रत्युक्ता इति चेन्न ।

अनेकाल्त्यस्यानेकाल्वृत्तिधर्मावच्छिन्नविधेयताश्रय इत्याशयकल्पनेनैशादावनुबन्धविनिर्मुक्तपदार्थोपस्थितिकल्पेऽपि विधेयतावच्छेदकत्वस्यैशत्व एवाङ्गीकारेण तस्य चानेकाल्वृत्तिधर्मतया, लोपपदप्रयोज्यविधेयतावच्छेदकत्वस्य चाभावत्वे सत्त्वेन तस्य चानेकाल्वृत्तित्वाभावेनादोषात् ।

येषान्तु मतेऽनुबन्धसहितस्यैव बोध्यत्वं पश्चादित्संज्ञालोपौ । अत एव शित्करणादेवात्र सर्वादेशो भविष्यतीत्यनेकाल्शितिसूत्रस्थभाष्य(३)-सङ्गतिस्तन्मते तु न कापि शङ्का ।

परन्तु सानुबन्धकस्यैव बोध्यत्वाङ्गीकार इदम इशित्यादावण्त्वात्सवर्णग्रहणं प्राप्तमप्रत्यय इत्यनेन निषिध्यत इत्यवाशयकमणुदिदिति सूत्रस्थं भाष्यं(४) कथं संगच्छतामिति त एव प्रष्टव्याः । स्पष्टं चेतत्तत्रैवो(५)द्द्योते ।

बोध्यबोधकयोरारोपितस्यान्यादेशभावकल्पे तु न ल्यपीतिलिङ्गेन सानुबन्धकबोधकवृत्तिधर्मस्य(६) बोध्य आरोप इति सामान्येन कल्पनया बोधकवृत्त्यनेकाल्त्वस्य बोध्य आरोपेण शिद्ग्रहणवैयर्थ्यमुपपाद्यम् ।

---

(१) संज्ञाप्रकरणस्थहलन्त्यसूत्रव्याख्यानान्तर्गत"नकारेत्संज्ञकः शीभवती"त्यादिशेखरेत्यर्थः ॥

(२) परिभाषाप्रकरणस्थानेकाल्सूत्रस्थशेखरेत्यर्थः ॥

(३) प्रथमाध्यायप्रथमपादसप्तमाह्निकान्तःस्थभाष्येत्यर्थः ॥

(४) प्रथमाध्यायप्रथमपादनवमाह्निकान्तस्थमेतद्भाष्यम् ॥

(५) अणुदित्सूत्र एवेत्यर्थः ॥

(६) अल्त्वव्याप्यधर्मघटितस्याप्यनेकाल्त्वमित्यादेरिति भावः । लोपशब्दवृत्त्यनेकाल्त्वस्य विधेयेऽभाव आरोपवारणाय बोधकः सानुबन्धकत्वेन विशेषितः ॥

केचित्तु नाऽननुबन्धास्त्रनसामर्थ्यात्तदनुवादसूत्रारम्भसामर्थ्या-च्च स्थान्यादेशभावाऽनङ्गीकारेऽपि सानुबन्धकबोधकवृत्तिधर्म्मस्य बोध्य आरोपः ।

एवञ्च लोपस्य सर्वादेशत्वाभावः, औशीविधेयस्य सर्वादेशत्वं च सिद्ध्यति ।

औरित्यादौ बोधकवृत्तिहलन्तत्वमारोप्य हलन्तात्परत्वेन सुलो-पस्तु न शङ्क्यः । नानुबन्धकृतमनेकाल्त्वमित्यनयैव निषेधात् ।

एतेन स्थान्यादेशभावकल्पेऽपि सुलोपशङ्का प्रत्युक्ता ।

अस्या अर्थश्चेत्त्वाघटितधर्मस्य सानुबन्धकबोधकवृत्तेरपि नारोप इति । एवं च यथानेकाल्त्वस्य नारोप एवं हलन्तत्वादेरपि नारोपः । तित्त्वादेरारोपस्तु नित्त्वादिवदित्त्वघटितत्वेन भवत्येव ।

तित्त्वारोपेणैव हलन्तत्वमार्थसमाजग्रस्तमिति तु न वाच्यम् । आरोपितधर्मसमनियतधर्म्मप्रयुक्तकार्याभावस्यारोपस्वभावसिद्धत्वस्य लोक-प्रसिद्धत्वात् ।

अत एव पितृपत्नि भिक्षां देहीत्युक्ते क्रुद्ध्यन्त्या अपि मातर्भिक्षां देहीत्युक्ते लोके प्रसिद्धा क्रोधानुत्पत्तिरुपपद्यते । तत्रारोपविषयीभूतमातृ-त्वसमनियतस्याप्यनारोपितस्य पितृपत्नीत्वस्य क्रोधाजनकत्वं लोके सुप्र-सिद्धमेव ।

अन्यत इत्यादिघटकसनादिपदानामानुपूर्व्यवच्छिन्नबोधकत्वकल्पे तु नानुबन्धकृतमित्यस्येत्त्वाघटितआनुपूर्व्यघटितश्च धर्म्मो बोधकवृत्तिर्ना-रोपणीय इत्यर्थः । इत्थं तु तत्त्वादेरानुपूर्वीघटिततया तदारोपे न किं-चिद्बाधकम् ।

औशृत्वारोपेऽपि हलन्तत्वप्रयुक्तकार्याभावस्तु पूर्वोक्तरीत्या(१)वोप-पादनीयः । हलन्तत्वादेस्त्वानुपूर्व्यघटितत्वेनेत्त्वाघटितत्वेन च नारोप इति ग्रन्थसङ्गतिं वर्णयन्ति ।

अन्ये तु बोध्यवृत्त्येवानेकाल्त्वमनेकाल्सूत्रे गृहीतम् । एवं च लोपस्य न सर्वादेशत्वप्रसक्तिः । इत्थादौ त्वनुबन्धविनिर्म्मुक्तपदार्थोपस्थित्यभ्युपग-

(१) आरोपितधर्मसमनियतधर्मत्याद्यनुपदोक्तरीत्येत्यर्थः ॥

मेऽपि शकारोच्चारणसामर्थ्याद्भूतपूर्वानेकाल्त्वमादाय सर्वादेशत्वम्। लोपपदादौ तु कस्यापि न वैयर्थ्यं येन बोधकवृत्तिभूतपूर्वमनेकाल्त्वमाश्रीयेत। अत एवानेकाल्सूत्रे जश्शसोः शिरित्यत्रत्यशकारस्य विभाषाङिश्योः शि सर्वनामस्थानमित्यत्र विशेषणतया चारितार्थ्याद्भूतपूर्वानेकाल्त्वाश्रयणे प्रमाणाभावेन तदर्थं शिद्ग्रहणस्यावश्यकत्वमुट्टङ्कितं भाष्ये(१)। अये प्रकारान्तरेण(२) समाहितमित्यन्यत्। एतेन घ्वसोरित्येतदर्थं शिद्ग्रहणमावश्यकमित्यपास्तम्। तत्रापि शकारोच्चारणसामर्थ्येन भूतपूर्वानेकाल्त्वस्य ग्रहीतुं शक्यत्वात्।

न चेशादिशकारस्य श्रवणार्थत्वम्। भाष्यविरुद्धेत्संज्ञालोपविधायकशास्त्रबाधकल्पनापेक्षया भूतपूर्वानेकाल्त्वाश्रयणबोधकत्वकल्पनाया एव लघीयस्त्वात्।

न चोक्तरीत्यैव ज्ञापितेऽपि शकारोच्चारणसामर्थ्याद्भूतपूर्वानेकाल्त्वेनैव सर्वादेशत्वसिद्धौ न शिद्ग्रहणस्य चारितार्थ्यमिति वाच्यम्। नानुबन्धकृतमनेकाल्त्वमित्यस्य शकाराद्युच्चारणसामर्थ्याद्भूतपूर्वानेकाल्त्वाश्रयणकल्पना न कर्तव्येत्यर्थेन लघीयसीमपि तां कल्पनां परित्यज्य श्रवणार्थत्वकल्पनाप्रसक्तौ तद्वारणायैव शिद्ग्रहणस्य चारितार्थ्यात्।

न चैवं ज्ञापकस्य सुपाश्वभून्यायायितत्वापत्तिः। दिव औदित्यत्रत्यतकारस्य सर्वथा निरर्थकतया तत्रापि भूतपूर्वानेकाल्त्वमादाय सर्वादेशत्वप्रसक्तौ तद्वारणाय चारितार्थ्यात्।

तस्य श्रवणार्थत्वाभावस्तु पत्यावैश्वर्ये ददृद्धावित्यादिनिर्देशैरैतस्तकारस्यैव लक्ष्यानुसारादिनेव सर्वैरेवाङ्गीकरणीयः।

दिव औदित्यत्रत्यतकाराकरणे त्वेषा व्यर्था। अनेकाल्सूत्रस्थं शिद्ग्रहणं च व्यर्थमेव।

---

(१) प्रथमाध्यायप्रथमपादसप्तमाह्निकान्तःस्थमेतद्भाष्यम्॥

(२) सर्वादेशत्वमन्तरा प्रत्ययादित्वाभावेनेत्त्वस्याप्रवृत्तौ विशेषणार्थताया वक्तुमशक्यतया भूतपूर्वानेकाल्त्वेन सर्वादेशत्वद्वारकेत्संज्ञाद्वारैव विशेषणार्थत्वस्य वक्तव्यतया शिद्ग्रहणाभावेऽपि सर्वादेशत्वस्य सिद्धतया शिद्ग्रहणं व्यर्थमित्याशयकतत्सूत्रस्थोत्तरभाष्यप्रोक्तशिद्ग्रहणवैयर्थ्योपपादकप्रकारेणेत्यर्थः॥

एतेन ससजुषोरुरित्यत्र रोरसावित्याद्येतत्फलं तृङ्हङ्ङितिन्यासेन न्यासकृद्यन्तः समाहिताः । रोरकारस्य विशेषणार्थतया चाद्यादेशावयवस्यो-गित्कार्य्यसंपादनेन च चारितार्थ्येन शिद्ग्रहणाभावे तत्र भूतपूर्वानेकाल्-त्वमादाय सर्वादेशत्वाप्रसक्तौ तयोः सर्वादेशत्वाभावस्यैतत्फलत्वाभावेन तत्र न्यासान्तरानुधावनस्य व्यर्थत्वादित्यादिग्रन्थकाराशयमाहुः ।

तत्रेदं वक्तव्यम् । तेनार्वणस्तृत्यादेर्न सर्वादेशत्वमिति ग्रन्थः कथं संगच्छतामिति ।

परिभाषायाः फलं निरूपयति । तेने(१)ति ।

यद्यपि भाष्ये(२) "किमेतस्य ज्ञापने प्रयोजनम् । तत्रासरूपसर्वा-देशदाप्प्रतिषेधेषु पृथक्छिर्दिशोऽनाकारान्तत्वादित्युक्तं तन्न वक्तव्यं भवती"-त्युक्तम् । तथापि तस्य यत्तुदृक्षोतौक्रीत्याऽनुबन्धानामल्त्वव्यवहाराभाव-ज्ञापनद्वारा तिसृणामपि(३) परिभाषाणामनयैव संग्रह एवं च न ल्यपी-ति सूत्रमपि चरितार्थमिति यथाश्रुतमेव तात्पर्य्यं वर्ण्यते, तर्हि क्ङोरि-त्यादौ हलन्तत्वस्याप्यतिदेशः प्रसज्येत । यदि चेत्पदार्थविशेषितानामेवा-नुबन्धानामल्त्वव्यवहाराभाव इत्याशयस्तर्हि क्व तिसृणामेकरूपेण संग्रहः ।

किं च न ल्यपीति सूत्रेणैव सामान्येनाल्त्वव्यवहाराभावज्ञापनेनो-पपत्तौ शिद्ग्रहणस्य चारितार्थ्याद्भाष्योक्तज्ञापकत्वस्यैव शिथिलमूलत्वापत्तिः ।

तस्मात्तद्भाष्यस्यापि(४) समुदायप्रदर्शनद्वाराऽवयवे प्रयोजनप्रदर्शन एव तात्पर्य्यं वर्णनीयम् । एवञ्च न प्रकृतग्रन्थे तद्भाष्यविरोधः ।

यदि तु न ल्यपीत्यनेनैव विशेषरूपेणोत्त्वघटित आनुपूर्वीघटितो वा सानुबन्धकबोधकवृत्तिर्धर्म्मो बोध्य आरोप्यत इत्यर्थो ज्ञाप्यत इत्युच्यते तर्हि क्ङोरित्यादौ हलन्तत्वस्यातिदेशाप्रसक्त्या परिभाषेयं न कर्त्तव्या ।

---

(१) तेनार्वणस्तृत्यादेर्न सर्वादेशत्वम् ॥ मू० ॥

(२) प्रथमाध्यायप्रथमपादसप्तमाह्निकान्तर्गतानेकाल्सूत्रस्य इत्यर्थः ॥

(३) नानुबन्धकृतमनेकाल्त्वम्, नानुबन्धकृतमनेजन्तत्वम्, नानुबन्धकृतमसारू-प्यमित्येतासाम् ॥

(४) पूर्वोक्तस्य "किमेतस्य ज्ञापने प्रयोजनमि"त्यादिभाष्यस्यापीत्यर्थः ॥

अनेकाल्त्वं तु तत्रतत्रोच्चारणसामर्थ्याद्भूतपूर्वं गृह्यत इति शित्त्वग्रहणमपि न कार्यम् । अवर्णास्त्रित्यादौ तु अकारादेश्चारितार्थ्याद्भूतपूर्वगत्यनाश्रयणेन दोषाभावाद्व्यासान्तरमपि न कार्य्यम् । अत एवा(¹)नेकाल्सूत्रोद्द्योते शेखरे चावर्णास्त्रित्यादीनां चर्चापि न कृता, किन्तु दिव औदित्येव प्रदर्शितम् (²)। एवं तु तत्रापि तकारो नैव कर्त्तव्यः । दिव उदित्यत्रत्यतकारस्य तु भाव्यमानोप्युकाकार इत्येतज्ज्ञापकतया चारितार्थ्यान्न दोष इति विभाव्यते ।

तर्हि तथैवास्त्वित्यत्रेष्टापत्तिरम् । ध्वनितं चास्याः परिभाषायाः शिथिलफलकत्वं फलप्रदर्शनमुखेनास्याः परिभाषा अवतारयताप्यनेनां ज्ञापकप्रदर्शनमुखेनावतारयता ग्रन्थकारेणैवेत्यलम् ॥

के चित्तु अनुबन्धानां सामान्यतोऽल्त्वव्यवहाराभावेऽङ्गीक्रियमाण आदेच इतिसूत्रस्थैत्संज्ञकशकारादावित्याद्यर्थप्रतिपादनपरशेखरभाष्या(³)दिविरोधः । अनुबन्धानामल्त्वाभावेन यस्मिन्विधिरित्यस्याप्रवृत्तेः ।

न चासौ ग्रन्थः प्राचीनानुसारेण, स्वमते त्वित्संज्ञके शकार इत्येतावतैवेशश्शकारस्येकारेण व्यवधानात्तत्राप्रवृत्तौ न कोपि दोष इत्याशय इति वाच्यम् । तावतापि देवश्चोर इत्यादौ क्वोरित्यादौ च हल्ङ्याब्भ्यो दिलोपस्य दुर्वारत्वात् । चित्रलदिवी इत्यादौ यलोपस्य स्थानिवत्त्वेन लोपो व्योरित्यनेन वलि लोपस्य प्रसङ्गाच्च ।

तस्मात् सुलोपविधायके ङ्याब्ग्रहणेन(⁴) क्व चिदनुबन्धानामल्त्वव्यवहारोऽपि । क्व चित्तु नेत्येव पूर्वोक्तोद्द्योताशयः । लक्ष्यानुरोधाच्च व्यवस्था ।

एवन्तु "नानुबन्धकृतमनेकाल्त्वम्" "अनुबन्धकार्येऽनल्विधाविति निषेधो न प्रवर्त्तते" "नाश्रयमनुबन्धकार्ये नादेशाना"मिति वचनत्रयमेकरूपेणैव संगृहीतं भवतीति प्राहुः ॥

---

(१) सिद्धान्तरीत्याऽवर्णास्त्रित्यादिविषये प्रकृतपरिभाषाफलविरहादेव ॥

(२) प्रकृतपरिभाषाफलविषयत्वेनेत्यादिः ॥

(३) भ्यादिप्रकरणस्थशेखरःषष्ठाध्यायप्रथमपादतृतीयाह्निकान्तस्थभाष्येत्यर्थः ॥

(४) सर्वथानुबन्धानामल्त्वव्यवहाराभावे रमा गौरीत्यादौ हलन्तत्वमारोप्यैव सुलोपसिद्धौ तत्र सुलोपसंपत्तये कातस्य ङ्याब्ग्रहणस्य वैयर्थ्यमेव स्यादिति भावः ॥

अनुपूर्व्यादि(१)ति । आनुपूर्व्यमेवानुपूर्व्यं क्रमस्तस्मात् स्वार्थे ष्यञ् । अनेकाल्वृत्तिक्रमस्यापि कथं चित्सर्वादेशत्वप्रयोजकत्वमस्त्येवेति भावः । न च जसश्शीत्यत्र परे त्वित्यादिना निर्भरेणेत्संज्ञायोग्यत्वस्यैवानुबन्धत्वव्यवहारप्रयोजकताया उपपादितत्वेन कथमत्रानुपूर्व्यादिति ग्रन्थः सङ्गच्छतामिति वाच्यम् । एतद्ग्रन्थस्य प्राचीनानुसारित्वात् । डादेशस्य सर्वादेशत्वं तु डा आ इति प्रश्लेषादेवेति नानुपपत्तिः । स्पष्टं चैतल्लुटः प्रथमस्येति सूत्रे भाष्य (२) उद्द्योते च ।

के चित्त्वनुबन्धत्वस्याभावेन विनैव डादिविषय आनुपूर्व्यात्सर्वादेशत्वमिति योजयन्त इत्संज्ञायोग्यत्वेनानुबन्धत्वस्य डादेशडकारे सत्त्वेऽपि प्रश्लेषादेव सर्वादेशत्वमिति भावमाविष्कुर्वन्तो ग्रन्थविरोधं परिजिहीर्षन्ति ।

के चित्तु डादेशविषये नानुबन्धकृतमित्यस्य न प्रवृत्तिरुपजीव्यविरोधात् । तथाहि । यदीयं परिभाषा तत्र प्रवर्त्तेत तदा डादेशस्यान्त्यादेशत्वं स्यात्, ततश्चेत्संज्ञाया अप्राप्तौ डकारस्यानुबन्धत्वमेव न स्यादित्यस्य स्वप्रवृत्तिनिमित्तभूतानुबन्धत्वविघातः स्पष्ट एव ।

स्पष्टप्रायं चैतदनित्त्वात्सर्वादेशत्वमित्यर्थकेन लुट इत्यत्र परस्मैपदानामित्यत्र च भाष्ये(३) ।

तद्भाष्यस्य(४) इत्संज्ञायोग्यत्वरूपानुबन्धत्वस्य सत्त्वेनानित्त्वादित्येकदेश्युक्तिरित्युद्द्योतग्रन्थस्तु चिन्त्यः । सत्यामुपपत्तौ भाष्यस्यैकदेश्युक्तित्वस्याप्रामाणिकस्य वक्तुमयोग्यत्वात् ।

अत एव परस्मैपदानामितिसूत्रे भाष्य एकसूत्रोपात्तयोरण्यादेशयोरकारादेशस्य प्रश्लेषेण, णलादेशस्य चानित्त्वादित्यादिनैव सर्वादेशत्वं

(१) डादिविषये तु सर्वादेशत्वं विनानुबन्धत्वस्यैवाभावेनानुपूर्व्यात् सिद्धम् ॥ ६ ॥ सू० ॥

(२) द्वितीयाध्यायचतुर्थपादद्वितीयाह्निकान्तःस्थे भाष्ये, तत्रैवोद्द्योते चेत्यर्थः ॥

(३) द्वितीयाध्यायचतुर्थपादद्वितीयाह्निकान्तःस्थे, तृतीयाध्यायचतुर्थपादप्रथमाह्निकान्तस्थे च भाष्ये ॥

(४) लुटः प्रथमस्येति सूत्रस्थस्तद्बोधकः परस्मैपदानामित्येतत्सूत्रस्थश्चेत्यर्थः ॥

प्रतिपादितम् । अन्यथा णलादेशेऽपि प्रश्लेषावश्यकत्वेन तदनुक्त्याऽत्यन्त-न्यूनतापत्तिः ।

डादेशस्य तु प्रश्लेषेणापि सर्वादेशत्वं निर्वहतीत्यनास्थयैव लुट इति सूत्रे भाष्ये[1] तदुक्तम् । प्रश्लेषं विनाप्युपपत्तौ गुरुभूतप्रश्लेषानुधावनवैय-र्थ्यस्य तद्भाष्य[2] एव ध्वनितत्वात्[3] ।

जसश्शीत्यत्र तु नानुबन्धकृतमितिपरिभाषाप्रवृत्तावपि शित्त्वादेव शीभावस्य सर्वादेशत्वनिष्पत्तौ न स्वप्रवृत्तिनिमित्तभूतानुबन्धत्वस्य को-ऽपि विघातः ।

इत्थं च प्रकृतेऽनेकाल्त्वात्सर्वादेशताप्रतिपादकेन ग्रन्थेन न जस-श्शीत्यत्रत्यग्रन्थविरोध इत्याहुः ॥ ६ ॥

नन्वेवमप्यवदातं मुख[4]मिति । कृत इत्यन्तेन पक्षतावच्छेदकाव-च्छिन्ननिर्देशः । घुसंज्ञाप्रतिषेधाभावश्च साध्यः । दाप्त्वाभावस्तत्र हेतुः । दाप्त्वाभावे च पकारसत्तासमानकालिकैजन्तत्वाभावप्रयुक्तात्त्वाप्राप्तिविशि ष्टपलोपोत्तरकालिकप्रवृत्तिकाकारावयवकत्वसमानाधिकरणपकारावयवक-त्वाभावो हेतुः । एवञ्च पलोपोत्तरमित्यस्य न पौनरुक्त्यम् । एकस्य पक्षताव-च्छेदकदलेऽपरस्य हेतुतावच्छेदकदले च प्रवेशात् ।

अनेकान्तत्वपक्षे तु बोधकत्वस्यानुबन्धरहित एव पर्याप्त्याऽनु-बन्धसत्ताकालेऽप्यनुबन्धरहितभागस्योपदेशत्वाज्ञ्चत्याऽऽत्त्वादिप्रवृत्तिरि-ति न कोऽपि दोष इति भाष्य[5] एव स्पष्टम् ।

केचित्तु ननु दाधाग्रहणेन देङादीनां ग्रहणमेव न स्यात् प्रकृतप रिभाषाभावेऽनुबन्धलोपेऽपि चेता स्तोतेत्यादाविवोपदेश एजन्तत्वाभावे-नात्त्वाप्रवृत्तेरिति चेन्न । स्यसिच्सूत्रेऽज्ग्रहणेनैव सिद्धे ग्रहादिग्रहणेनोपदे-

(१) द्वितीयाध्यायचतुर्थपादद्वितीयाह्निकान्तःस्थभाष्य इत्यर्थः ॥

(२) लुट इतिसूत्रस्थभाष्य इत्यर्थः ॥

(३) अनित्त्वाद्वेतिप्रकारान्तरस्य प्राक् प्रदर्शनद्वारेति शेषः ॥

(४) नन्वेवमप्यवदातं मुखमित्यत्र पलोपोत्तरमात्त्वे कृतेऽदाबितिघुसंज्ञाप्रतिषेधो न स्यादाक्षेपः पकारसत्त्वेऽनेजन्तत्वादात्त्वाप्राप्त्या पलोपोत्तरं पकाराभावेनास्य दाप्त्वाभावादत आह (नानुबन्धकृतमनेजन्तत्वम्) ॥ मू० ॥

(५) प्रथमाध्यायप्रथमपादपञ्चमाह्निकान्तःस्थघुसंज्ञासूत्रस्य इत्यर्थः ॥

Digitized by Google

षत्वस्यानुबन्धरहित एव विश्रान्तेः कल्पनात् । अत एव पिष्लृधातोः प्रनिपेष्टेत्यादौ शेषे विभाषा कषादावित्यस्याप्रवृत्तिः । तस्माददाबिति निषेधे दैपोऽपि निषेधसिद्धिः फलमित्याहुः ।

तत्र यद्वक्तव्यं तदनुपदमेव वक्ष्यते ।

ननु शेखरकाररीत्या[1] हि दाप्त्वं पकारेत्संज्ञकदाशब्दत्वं तच्चानुबन्धलोप आत्त्वे च कृते दाशब्दत्वस्य स्वतःसिद्धतया पकारेत्संज्ञकत्वस्य चारोपेणावतमिति कथं दाप्त्वाभावादिति संगच्छतामिति चेन्न । तद्रीत्याऽपि दाप्त्वस्य पकारेत्संज्ञकदाशब्दबोध्यत्वात्मकतया तस्य च प्रकृतेऽसम्भवेनावतरणसंगतेः । अस्तु वा पूर्वोक्तरीत्या दाबादिशब्दानामानुपूर्व्यवच्छिन्नबोधकत्वमेव शेखरकृतामप्यभ्युपगतम् । देवदत्तहीत्यादौ यथाऽदोषस्तथा निरूपितम् । नकारेत्संज्ञके सशब्द इत्यादिशेखरकारोक्त[2]पङ्क्तेस्तु सनादिवृत्तिसकारोत्तराकारोत्तरनकारत्वात्मकानुपूर्वीघटकं नत्वमित्स्वसमानाधिकरणमेवेति नातिप्रसङ्ग इत्येवाशयः ।

ननु दाधा घ्वापिदित्येवोच्यतामत एव प्रणिदापयतीत्यादौ घुत्वं सिद्धमन्यथा तत्रादाबिति प्रतिषेधात्तदप्राप्तिरिति चेन्न । अनुपदोक्तदिशा दाप्त्वघटकपकारत्वस्येत्स्वसमानाधिकरणस्यैव प्रविष्टत्वेन प्रणिदापयतीत्यत्रादोषात् । अदाबित्यत्र बान्तस्य प्रतिषेधाच्चेति स्पष्टं दाधेति सूत्रे भाष्ये[3] ।

यत्तु लक्षणप्रतिपदोक्तपरिभाषाया अप्रवृत्त्यर्थमपिदिति विहायादाबिति कृतम् । तेन दाधाग्रहणेन लाक्षणिकस्यापि ग्रहणसिद्धिरिति ।

तन्नेदं वक्तव्यं लाक्षणिकग्रहणस्य दैप् शोधन इति सामान्यग्रहणार्थपकारेण मूल एव ज्ञापयिष्यमाणतया तदर्थमदाबित्यस्य न चारितार्थ्यमिति ।

केचित्तु दाप्त्वं पकारेत्संज्ञकदाशब्दत्वं तच्चानुबन्धलोप आत्त्वे च कृते दात्वस्य स्वतः सिद्धतया पकारेत्संज्ञकत्वस्य चारोपादक्षतम् ।

(१) संज्ञाप्रकरणे हलन्त्यमिति सूत्रे "नकारेत्संज्ञकः सो भवती"त्यादिग्रन्थेन पर्यालोचितयेत्यर्थः ॥

(२) संज्ञाप्रकरणस्थहलन्त्यसूत्रव्याख्यानावसरोक्तेत्यर्थः ॥

(३) प्रथमाध्यायप्रथमपादान्तर्गतपञ्चमाह्निकान्तस्यमेतद्भाष्यम् ॥

Digitized by Google

अत एवोसिचे ति सूत्रस्थं भाष्यं(१) घसंज्ञासूत्रस्थं नदीतरे ह्रस्वापादनपरं भाष्यं(२) स्थानिवत्सूत्रस्थमतिखट्वायेत्यत्र दीर्घे कृतेऽप्यप्राप्तौ भूतपूर्व इति भाष्यं(३) च संगच्छते। अत एव भाष्ये(४) भूतपूर्वगत्या भविष्यतीत्यादिना प्रकारान्तरेण सिद्धिः प्रदर्शिता।

यद्वा विवादो दाप् शोधन इति पाठम्, ताच्छीलिके चानशि दायमान इत्यत्र शपि चानशोऽन्तोदात्तत्वं श्यनि तु सति शिष्टत्वाद्धातोरुदात्तत्वमिति स्वरे विशेषः स्यादिति तु न शङ्क्यम्। विकरणनिमित्तकान्यस्यैव सतिशिष्टस्वरस्य बलवत्त्वेनोभयथापि चानश एवान्तोदात्तत्वेन भेदाभावादिति तत्रैवोद्द्योते स्पष्टम्। ध्वनितश्चायमर्थोऽथ वा दाबेवायं न दैबस्तीत्यादिना भाष्य(५) एव।

एवञ्चेयं परिभाषा निष्फला। उदीचामित्यत्रापि मेङ इति, उदीचां म इति वा वक्तव्यम्। न च म इत्युच्यमाने माङोऽपि ग्रहणापत्तिः। माङः कर्मव्यतिहारेऽनभिधानात्। अन्यथा माङ इति निर्देशस्यापि माङ्ग्रहणेनोपपत्तौ भाष्यो(६)क्तज्ञापकत्वस्यैवासङ्गतिरित्याहुः।

तन्नेदं वक्तव्यम्। परिभाषाभावे मेङादावनुबन्धलोपोत्तरमप्यादेच इत्यात्त्वं न स्यात्। उपदिश्यमानत्वस्य मेङ्शब्दे सत्त्वेन तस्य चैजन्तत्वाभावात्।

यदि तु दो दद् घोरित्यत्र दधातेर्धातेर्हिरिति ह्यादेशेन बाधितत्वाद्ददादेशाविषयतया घुसंज्ञकधेण्मात्रनिवृत्तिप्रयोजनकेन द इत्युपादानेनानुबन्धलोपोत्तरमवशिष्टभागे तत्त्वप्रत्यभिज्ञयोपदेशत्वकल्प-

(१) अष्टमाध्यायतृतीयपादप्रथमाह्निकान्तर्गतमेतद्भाष्यम् ॥
(२) प्रथमाध्यायप्रथमपादपञ्चमाह्निकान्तःस्थमेतद्भाष्यम् ॥
(३) प्रथमाध्यायप्रथमपादाष्टमाह्निकान्तर्गतमेतद्भाष्यम् ॥
(४) प्रथमाध्यायान्तर्गतप्रथमपादान्तःस्थपञ्चमाह्निकघटकघुसंज्ञासूत्रव्याख्यानपरमेतद्भाष्यम् ॥
(५) इदमपि भाष्यं प्रथमाध्यायप्रथमपादपञ्चमाह्निकान्तःस्थघुसंज्ञाविधायकदाधा घ्वदाबितिसूत्रव्याख्यानावसरस्थमेव ॥
(६) प्रथमाध्यायप्रथमपादपञ्चमाह्निकान्तस्थघुसंज्ञाविधायकसूत्रव्याख्यानपरभाष्येऽयं ॥

Digitized by Google

नेन न दोष इत्युच्यते । तर्हि तेनैव(१) ज्ञापकेनानुबन्धसहिते समुदाय उपदिश्यमानत्वाभाव एव सामान्येन कल्प्यताम् । ततश्च मेङादावात्वादिरनुबन्धलोपात्प्राक् पश्चाद् वोपपद्यते ।

अत एव स्यसिच्सूत्रेऽज्ग्रहणे कृतेऽपि पुनर्हनादिग्रहणं चरितार्थम् ।

एवञ्च नानुबन्धकृतमनेजन्तत्वमित्यस्य नानुबन्धकृतमनुपदिश्यमानत्वमित्यर्थः । अत एव घुसंज्ञासूत्रे कय्यटेन(२) दैप्धातोरनुबन्धलोपोत्तरमप्यात्वप्रवृत्तिरेतत्फलत्वेनोपन्यस्ता ।

अत एव नेर्गदेति सूत्रे(३) घुप्रकृतिमाङिति पठित्वा मेङोऽपि ग्रहणसिद्धिः प्रतिपादिता ।

यद्यपि भाष्य(४) एव पक्षान्तरावप्यथ वेत्यादिनोपन्यस्तौ । तथापि तयोः पक्षयोरपरितोषस्तत्त्वं भाष्या(५)देव प्रतीयत इति ।

परिभाषार्थस्तु । अनुबन्धकृतमनेजन्तत्वं यथा न भवेत्तथोहनीयमिति । तथा च एजन्तत्वमेज्निष्ठचरमावयवतानिरूपकत्वम् । चरमत्वं तु तद्घटकवर्णप्रागभावानधिकरणक्षणवृत्तित्वविशिष्टं तद्घटकत्वम् । तत्र तद्घटकवर्णा अनुबन्धभिन्नत्वेन विशेषणीया इति फलितोऽर्थः । एवमेवादन्तत्वादिव्यवहारघटकीभूता अपि वर्णा अनुबन्धेतरत्वेन विशेषणीयाः । यथाऽनुबन्धकृतमनेजन्तत्वं न भवेत्तथा कल्प्यमित्यर्थात् ।

अतएवा(६)दुपदेशग्रहणं सार्थकमन्यथा तास्यनुदात्तेन्ङिच्छादित्येव ब्रूयात् । एतेन पचति भवतीत्यादावेकान्तत्वपक्षेऽकारान्तोपदिश्यमानत्वाभावात् स्वरो न स्यादित्यपास्तम् ।

अनुबन्धानामनेकान्तत्वे तु दैवाद्द उपदिश्यमानत्वात्तत्या चरमत्वघटकवर्णस्यानारोपितावयवत्ववत एव ग्रहणेन पकारे तदवयवत्वारो-

---

(१) अनुपदं निरूपितेन दाधा घ्वदापिति सूत्रघटकेन घोरित्यनेनैव ज्ञापकेनेत्यर्थः ॥

(२) प्रथमाध्यायप्रथमपादपञ्चमाह्निकान्तःस्थोऽयं कय्यटग्रन्थः ॥

(३) एवमपि भाष्यं प्रथमाध्यायप्रथमपादपञ्चमाह्निकान्तर्गतघुसंज्ञाविधायकसूत्रव्याख्यानावसरस्यमिति बोध्यम् ॥

(४) प्रथमाध्यायप्रथमपादपञ्चमाह्निकान्तःस्थघुसंज्ञाविधायकस्य इत्यर्थः ॥

(५) प्रथमाध्यायप्रथमपादपञ्चमाह्निकान्तःस्थघुसंज्ञाविधायकसूत्रव्याख्यानपरात् प्रकृतपरिभाषाज्ञापकत्वप्रदर्शनपराद् भाष्यादित्यर्थः ॥

(६) यथानुबन्धेत्याद्यर्थद्वाराऽदन्तत्वादिव्यवहारप्रयोजकतावच्छेदकवर्णानामप्यनुबन्धेतरतया विशेषणीयत्वादेव ।

पेऽप्यारोपितसमनियतादिधर्म्मप्रयुक्तकार्यप्रवृत्त्या चेजन्तत्वात्तन्या च पकारसत्त्व एवात्त्वे कृत इत्संज्ञकपकारसमीपवर्त्तिदाशब्दबोध्यत्वमक्षतमेवेति न परिभाषोपयोगः ।

दैप्शब्द एजन्तत्वेऽप्यात्त्वं तु निर्द्दिश्यमानस्यैव । उपदिश्यमानेजन्तावयवनिर्द्दिश्यमानस्यात्त्वमिति तदर्थात् ।

परिभाषायां प्रमाणमुपन्यस्यति उदीचा(१)मिति ।

उदीचां माङ इत्यत्रत्यमाङ इतिनिर्द्देशस्यानुपपत्तिं प्रकृतपरिभाषाया अर्थादापादिकां विशदयति । आदेच(२) इत्यादिना ।

अङ्गीकृतायामपि प्रकृतपरिभाषायां माङ इतिनिर्द्देशानुपपत्तितादवस्थ्यमुट्टङ्कयति । न चे(३)ति ।

उद्धरति । तत्रे(४)ति ।

धातोरित्यस्य निवृत्तेरिति । गोभ्यामित्यादावुपदेशत्वाभावान्नातिप्रसङ्गः । एवमेधादिघटकैकारादीनामपि । समुदायोपदेश एवावयवानामुपदिश्यमानत्वानङ्गीकारात् । इरेप्रत्ययस्य तु अशित्प्रत्ययपरत्वाभावान्नात्त्वं, प्रसज्यप्रतिषेधकल्पेऽपि यत्र शित्परत्वयोग्यता तत्रैव तत्प्रवृत्तेरिति घुसंज्ञासूत्र उद्द्योत(५) एव स्पष्टम् । किञ्चेरेशब्दादावेकारोच्चारणसामर्थ्यादपि नात्त्वम् । यद्यप्येकारोच्चारणस्य तङादेशानां टेरेत्वं नेत्यर्थज्ञापकत्वमन्यत्रोक्तम् । तथापि यावता विनेतिन्यायेनोभयार्थज्ञापकत्वे न कोऽपि विरोध इति दिक् ॥

अन्यत्रेति । भ्वादिप्रकरण आदेच इति सूत्रे शब्देन्दुशेखर इत्यर्थः ।

प्रागुक्त प्रमाणप्रमेयादौ भाष्यकारसंमतिं सूचयति । स्पष्ट(६)मिति ॥ ७ ॥ (शेषमग्रे)

काशीस्थराजकीयप्रधानपाठालयाध्यापकः श्रीद्विवेदहरिनाथमनीषी ॥

---

(१) उदीचां माङ इति निर्द्देशोऽस्या ज्ञापकः ॥ मू० ॥

(२) आदेच इति सूत्रेणोपदिश्यमानैजन्तस्यात्त्वं क्रियते । इकारवत्त्व एजन्तत्वाभावादात्वाप्राप्तेस्तस्यासंगतिः ॥ मू० ॥

(३) न चास्यामवस्थायां तस्य धातुत्वाभावात् कथमात्त्वम् ॥ मू० ॥

(४) तत्र धातोरित्यस्य निवृत्तेरित्यन्यत्र विस्तरः ॥ मू० ॥

(५) प्रथमाध्यायप्रथमपादपञ्चमाह्निकान्तःस्थे "मेङ इती"तिप्रतीकमुपादाय प्रोक्ते विवरणेतिनामान्तरप्रसिद्धे ग्रन्थविशेष इत्यर्थः ॥

(६) स्पष्टं चेदं दाधा घ्विति सूत्रे भाष्ये ॥ ७ ॥ मू० ॥

॥ ओं नमो भगवते मीमांसाद्वयगुरवे श्रीरामानुजाचार्याय ॥

॥ शास्त्रदीपिका ॥

भट्टकुमारिलमतानुगा पूर्वमीमांसासूत्रव्याख्या विषमपदटिप्पणीसमेता ।

ओं श्रीगणेशाय नमः ।

लक्ष्मीकौस्तुभवक्षसं मुररिपुं शङ्खासि[1]कौमोदकी-
हस्तं पद्मपलाशताम्रनयनं पीताम्बरं शार्ङ्गिणम् ।
मेघश्याममुदारपीवरचतुर्बाहुं प्रधानात्परम्
श्रीवत्साङ्कमनाथनाथ[2]ममृतं वन्दे मुकुन्दं[3] मुदा[4] ॥ १ ॥
न्यायाभासतमश्छन्नशास्त्रतत्त्वार्थदर्शिनीम् ।
कुमारिल[5]मतेनाहं करिष्ये शास्त्रदीपिकाम् ॥ २ ॥

---

१ शङ्खाब्जेति (ख) पुस्तकपाठः ।
२ मन्वादिश्रीशमिति (ख) पु॰ पाठः ।
३ विभुं चक्रिणमिति (ख) पु॰ पाठः ।

४ इन्द्रवरुणाग्नियमादित्यप्रजापतिप्रमुखदेवगणानां यागभागधेयभागितायां स्रग्-यजुस्सामस्वाम्नानेपि यज्ञपुरुषपदाभिधेयो देवता सार्वभौमो भगवान् विष्णुः परम-सत्त्वैकसिन्धुरपाणिपादशरीरादानन्दविग्रहोपि भक्तिभाजां ध्यानसौकर्यसम्पिपादयिषया परिगृहीतानेकदिव्यमङ्गलविग्रहः "श्रीश्च ते लक्ष्मीश्च पत्न्यावहोरात्रे" इति पुरुषसूक्तोक्त-लक्ष्मीसमाश्लिष्टो भक्ताभयप्रद इति तं स्मरति । "लक्ष्मीकौस्तुभवक्षसम्" इति । एतेन मार्यिकार्थसार्वसिद्धौपयिकसम्पद्भिरभिहिता । सम्पद्विशाल्यप्युपेक्षमाणो न भक्ताभयद इत्याह । "मुररिपुम्" इति । एतेनाशक्तप्रशमितस्वाश्रितजनविपद–इत्ययमाश्रयणीयत्वे हेतुरभिहितः । नन्वस्त्रविधुरः कथं पालयतीत्यत आह । "शङ्खासीति" । "पद्मपलाशता-म्रनयन"मित्यनेन ध्यानसौकर्यमवाबूबुधत् । न केवलं शारीरमेव सौष्ठवं, परं वेषेपीत्याह । "पीताम्बरमिति" । भक्ताभयदानव्यग्रो सौ न केवलं शङ्खासिकौमोदकीकरः किन्तु तुर्येपि शार्ङ्गधर इति । "शार्ङ्गिणमिति" । जगन्मङ्गलहेतुत्वमुसूचयिषया "मेघश्याममिति" । नन्वसौ कथमनेकशस्त्रधर इत्यत आह । "उदारेति" । एतेन चतुर्भुजोसावौदार्यगुणयोगेन पुरुषार्थच-तुष्टयं यौगपद्येन देयादित्याशंसापि । "प्रधानात्पर"मित्यनेन दिव्यविग्रहत्वं दर्शितम् । भृगु-पादप्रहारसमुत्पन्नश्रीवत्सलक्ष्मणालित्वसंकीर्तनेन सेवनौपयिकक्षमावत्त्वमावेदितम् । दोष-दूषितमुखहीनवेतनानामयं सुलभोपासन इत्याह । "अनाथनाथम्" इति । पुरुषार्थेष्व-भ्यर्हिततमं मोक्षमसावमतो देयादयमर्थः 'अमृतं' 'मुकुन्द'मित्याभ्यां बोध्यते । 'मुकुम्' इति मोक्षाख्यं मान्तमव्ययं तदेवंविधदेवताचक्रवर्त्तिनं हृदैनैवास्मदास्कारवाणीति मुदेति ।

५ कुमारो गुहदेवः स्वात्मतया विद्यतेऽस्येति कुमारिलः, कुमारावतार इति तु निर्वाचितम् । अत्र पिच्छादेराकृतिगणत्वादिलच् अयं चार्थो मार्कण्डेयशङ्करविजये स्पष्ट-

Digitized by Google

ओं० सू० ॥ अथातो धर्मजिज्ञासा ॥ १ ॥

अनेन[1] सूत्रेण प्रारिप्सितस्य शास्त्रस्य श्रोतृप्रवृत्तिसिद्धये धर्मज्ञानं प्रयोजनं कथ्यते । यदा हि धर्मजिज्ञासा कर्तव्येत्युक्त्वा शास्त्रमारभ्यमाणं दृश्यते तदा नूनमिदं शास्त्रं धर्मज्ञानप्रयोजनमित्यवगम्यते । विदितं तावत्प्रयोजनं, संबन्धोऽपि शास्त्रस्य प्रस्तावहेतुर्वक्तव्यः । यथा शास्त्रान्तरेषु शिष्यप्रश्नानन्तर्यादिसंबन्धः प्रस्तावको वर्ण्यते, तथेहापि शास्त्रारम्भे प्रयोजकानां संबन्धानामन्यतमो वक्तव्यः—अनेन संबन्धेनेदं शास्त्रमायातमिति । अन्यथा ह्यसंबद्धप्रलपितं स्यात् । सत्यम् इह तु य एवायं प्रयोजनेन सह शास्त्रस्य साध्यसाधनत्वसंबन्धः स एव शास्त्रस्य प्रस्तावको नान्यः । भवति[2] हि साधनत्वमेव साध्यार्थिनः साधने प्रवृत्तिहेतुः, स चायं संबन्धः प्रयोजनोक्त्यैवार्थाज्ज्ञायत इति न सूत्रकारेण पृथगुक्त इत्यदोषः । अत्रेदं चिन्त्यते । किम् अध्ययनानन्तरं धर्मजिज्ञासया गुरुगृहे ऽवस्थातव्यम् ? उत गुरुगृहात्समावर्त्तितव्यम् ? इति । यदि हि स्वाध्यायाध्ययनविधिना धर्ममात्रार्थमध्ययनं स्वर्गाद्यर्थेन विधीयते, ततस्तन्मात्रेणैव शास्त्रार्थस्य समाप्तत्वा"दधीत्य स्नायादि"ति स्मृतिवचनबलेन च समावर्त्तितव्यमिति । अथाक्षरग्रहणादिपरम्परोपजायमानवाक्यार्थज्ञानार्थमध्ययनं विधीयते, ततस्तस्य विचारमन्तरेणासंभवादध्ययनविधिनैवार्थाद्विचारो विहित इति गुरुगृहे एवावस्थाय विचारयितव्यो धर्मः । तत्र "विनापि विधिना दृष्ट[3]लाभाच्चहि तदर्थता । कल्प्यस्तु विधिसामर्थ्यात् स्वर्गो विश्वजिदादिवत्" स्वाध्यायसंस्कारद्वारेणाध्ययनस्यार्थज्ञानहेतुत्वं विनैव विधिना प्रमाणान्तरेण सिद्धमेवेति तादर्थ्ये

मुक्तः, "इत्यूचिवांसमथ भट्टकुमारिलं तम्, ईषद्विकस्वरमुखाम्बुजमाह मौनी । श्रुत्यर्थकर्मविमुखान्सुगतान्निहन्तुं जातं गुहं भुवि भवन्तमहं नु जाने" इति ॥

१ श्रोतृप्रवृत्तिप्रयोजकीभूतज्ञानविषयत्वरूपानुबन्धत्वाक्रान्तेषु विषयप्रयोजनसंबन्धाधिकारिषु धर्माख्यविषयप्रतिपत्तेः सूत्राक्षरैः साक्षजिकतया प्रयोजनसंबन्धोभयप्रतिपादकतां सूत्रस्य व्याकुरुते 'अनेने'ति ॥

२ उपायेच्छायां फलेच्छायाः प्रयोजकत्वमित्याह भवति हीति, समावर्तनं नाम ब्रह्मचर्याद् गृहस्थाश्रमं प्रविविक्षोः प्रसिद्धः संस्कारः ॥

३ ज्ञानलाभादिति (ख) पु० पाठः ।

विध्यानर्थक्यम् । न चावघातादिविधिवन्नियमार्थत्वम् । अवघातो हि दर्शपूर्णमासापूर्वं नियम्यते,—अवघातनिष्पन्नैरेव तण्डुलैरपूर्वं सिध्यतीति । न तण्डुलस्वरूपे, प्रमाणान्तरविरोधात् । तद्बुद्धिहापि ज्ञानस्याध्ययनमन्तरेणापि दर्शनात् तत्स्वरूपे नियमासंभवात् क्रत्वपूर्वेऽप्येव अध्ययननियमो-विधातव्यः,—अधीतैरेव वेदैरवगतानि कर्माणि फलदानीति । न चैवं युक्तम् । अक्रत्वर्थत्वादध्ययनस्याऽनारभ्याधीतत्वात् । श्रुत्याद्यभावाच्चाक्रत्वर्थम्[1] । तस्माददृष्टार्थमेव स्वाध्यायाध्ययनमित्यध्ययनमात्रादेव समाप्ते शास्त्रार्थे गुरुगृहात्समावर्त्तितव्यमिति प्राप्तेऽभिधीयते "लभ्यमाने फले दृष्टे नादृष्ट-परिकल्पना । विधेश्च नियमार्थत्वाच्चानर्थक्यं भविष्यति" । यदुक्तं "ज्ञानस्व-रूपे क्रत्वपूर्वे वा न नियमः संभवती"ति । तत्राभिधीयते । नोभयथापि ब्रूमः। कथं तर्हि, योऽयमग्निहोत्रादिष्वधीतवेदानां त्रैवर्णिकानामेवाधिकारो-नानधीतवेदानां शूद्राणामित्यधिकारनियमः स प्रयोजनमध्ययनविधेः । तथा हि । असत्यध्ययनविधावग्निहोत्रादिशास्त्राणि विद्वांसमलभमानानि अविद्वांसमेवाधिकृत्य विद्यामन्तरेणानुष्ठानासंभवाद्विद्यामाक्षि[2]पन्त्यविशे-षाच्चतुरोवर्णानधिकुर्युः । सति त्वध्ययनविधौ त्रैवर्णिकानामेव विदुषाम-धिकारो भवति न तुरीयादेः[3] । तथा हि 'वसन्ते ब्राह्मणमुपनयीत' 'ग्रीष्मे राजन्यं' 'शरदि वैश्य'मिति द्वितीयानिर्देशादुपनयनसंस्कृतास्त्रैवर्णिकाः किमस्माभिः कर्तव्यमित्यपेक्षन्ते । तत्सन्निधौ चाध्ययनमनिर्दिष्टकर्तृकं विधीयमानं कर्तारमपेक्षते । तत्रापेक्षासन्निधियोग्यत्वैरेवं विज्ञायते,—त्रैव-र्णिकैरेवोपनीतैरक्षरग्रहणेनाध्ययनादिपरम्परयार्थज्ञानं कर्तव्यमिति। एवं च फलवदध्ययनकर्तृभूतमाणवकसंस्कारत्वादुपनयनमध्ययनाङ्गम्[4] । अध्यय-नमपि दृष्टार्थज्ञानार्थम्, अर्थज्ञानन्तु अनुष्ठानौपयिकत्वात्प्रसिद्धफलक-मेवेति सर्वेषां फलवत्त्वम् । एवं च त्रैवर्णिकेषु विद्वत्सु लब्धेषु नाग्नि-

१ अक्रत्वर्थत्वमिति (ख) पु॰ पाठः ।
२ अत्रन्तमिदम् ।
३ न तुरीयस्येति (ख) पु॰ पाठः ।
४ कार्यजनने सहकारित्वमङ्गत्वं, अन्योद्देशेन प्रवृत्तकृतिविषयत्वं वा तत्, यथा वेदेनार्थे बोधनीये व्याकरणं तदङ्गम् ।

Digitized by Google

होत्रादिविधयश्चतुर्थवर्णस्य विद्यामाक्षिपन्ति, किन्तु त्रैवर्णिकानेव विद्वांसोऽधिकुर्वन्ति । सोऽयमधिकारनियमोऽपशूद्राधिकरणे वक्ष्यमाणोऽध्ययनविधिप्रसादलभ्य इति फलवानेव विधिः । तेनार्थज्ञानावसानमध्ययनमध्ययनविधिना विधीयत इति विचारमन्तरेण तदनुपपत्तेरध्ययनविधिरेव विचारमाक्षिपंस्तद्विरुद्धं स्मार्तं स्नानं बाधत इति—सिद्धमध्ययनानन्तरं धर्मजिज्ञासा कर्तव्येति । केचित्पुनराचार्यकरणविधिप्रयुक्तत्वमध्ययनस्याङ्गीकृत्य किमाचार्य[1]कसिद्धिरेवाध्ययनस्य प्रयोजनमुतार्थज्ञानमिति विचार्यान्तरङ्गत्वादर्थज्ञानमित्याहुः । किं पुनः कारणमाचार्यकरणविधिप्रयुक्तत्वेऽध्ययनस्य ? अध्ययनविधेरधिकारशून्यत्वादाचार्यकरणविधिप्रयुक्तया चात्मलाभे विश्वजिदादिवत्फलकल्पनानुपपत्तिः । कः पुनराचार्यकरणविधिः ? कथं वा तेनाध्ययनस्य प्रयुक्तिः ? । उच्यते, "उपनीय तु यः शिष्यं वेदमध्यापयेद् द्विजः । सकल्पं सरहस्यं च तमाचार्यं प्रचक्षते" इति-स्मृ[2]त्यनुमितः उपनीयाध्यापनेनाचार्यकं कुर्या[3]दित्याचार्यकरणविधिः । अत्र चाध्यापनमाचार्यत्वसाधनम्, उपनयनं तु तस्य—प्रत्ययान्तस्यैवाङ्गम् । तच्च केन प्रकारेणाध्यापनस्योपकरोतीत्यपेक्षायामुपनेयासक्तिरेवास्य द्वारमङ्गीक्रियते लिङ्गात् । तदुपनेयोऽपि नाकिंचित्करोऽङ्गमिति तद्व्यापारापेक्षायामुपनयनं प्रक्रम्य विहितमध्ययनमध्यापनोपकारित्वादुपनीतस्य व्यापारत्वेनाध्यवसीयते । तदेवं स्वाङ्गभूतमुपनयनं प्रयुञ्जानोऽध्यापनविधिस्तद्द्वारेणाध्ययनं प्रयुङ्क्ते । तदिदमनुपपन्नम् । तथा हि । नियोगार्थस्याध्ययनस्याचार्यकप्रयोजनता, ऽर्थज्ञानप्रयोजनता वा, न शक्यते शास्त्रेण बोधयितुम् साध्यद्वयस्यैकत्रासंभवात् । नियोगार्थतैव शास्त्रेण बोध्यते ऽर्थज्ञानार्थतायां त्वनुज्ञामात्रमिति चेत्, तथाप्यर्थद्वयं स्यादेव । किंचैवं सकृदुच्चरितस्य लिङ्—प्रत्ययस्य विध्यर्थत्वमनुज्ञानार्थत्वं चेति वैरूप्यमपि स्यात् । तेन संशय एवानुपपन्नः । तथा सिद्धान्तोऽप्यनुपपन्न एव । प्रमाणा-

१ योपधाद्गुरूपोत्तमाद् वुञ् । ५ । १ । १३२ । इति पाणिनीयेन भावार्थे वुञ् ।
२ मनुः । अ० २ श्लो० १४० ।
३ आचार्यत्वं भावयेद् पा० ।

न्तरसिद्धत्वादर्थज्ञानार्थत्वं न शास्त्रगोचरतामनुभवतीति, तत्र यदेवास्मदभिमतं विधेर्नियमार्थत्वं महता प्रयत्नेन भवद्भिर्दूषितं तदेव भवद्भिरपि मुक्तलक्षेणानन्यमतिकत्वादाश्रयणीयमापन्नम् । नियमानङ्गीकारे च पूर्वपक्ष एव श्रेयानापद्यते । आचार्यत्वस्यादृष्टत्वेन प्रयोजनतोपपत्तेः । अर्थज्ञानार्थत्वे चाऽध्ययनं स्वाध्यायसंस्कारो नियोगार्थत्वे तु प्रधानकर्मेति वैरूप्यमपि स्यात् । अर्थोज्ज्ञातमर्थज्ञानं प्रयोजनं न शास्त्रत इति चेत्, आचार्यत्वमपि प्रयोजनं न स्यात् । तस्याप्यर्थोज्ज्ञातत्वात् । स्मृतिबाधेन च ज्ञानोत्कर्षो न स्यात् अशास्त्रस्वीकृतत्वाद्विचारस्य ।

किंच ।"नियोज्यः कल्पनीयोऽत्र विध्यर्थानुपपत्तितः । न चोपनयनस्याङ्गभावोऽस्याध्यापनं प्रति ॥ द्वितीयाश्रुतिसामर्थ्यात्सा माणवकसंस्क्रिया तथा सत्यन्तरङ्गत्वादङ्गमध्ययनस्य तत्"॥ यत्तावच्चियोज्याभावादप्रयोजकत्वमध्ययनविधेरिति तदयुक्तम् । अभावासिद्धेः । अश्रुतस्यापि विश्वजिदादिवत्कल्पनात् । कार्यं हि विध्यर्थः । संबन्धिशब्दश्चायं–'कार्य'मिति । कस्यचिद्धि किंचित्कार्यं भवति न, सर्वं सर्वस्य, अतः कस्येदं कार्यमित्यस्ति संबन्ध्यपेक्षा । साऽवश्यमध्याहृतेन केनचिद्विवर्तनीयाऽस्येदं कार्यमिति । यस्येदं कार्यं स एव नियोज्य इत्युच्यते । यद्यपि कथंचित्परप्रयुक्तानुष्ठानादेवात्मलाभः स्यात्, तथापि न तावता कार्यत्वं सिध्यति । न हि कृतिसाध्यतामात्रं कार्यत्वं, किं तर्हि ? यत्कृतिसाध्यं कृतिं प्रति प्रधानभूतं तत्कार्यमित्युच्यते । प्राधान्यं च कृतेस्तदुद्देशेन प्रवृत्तिः, ततश्चाध्ययननियोगेन कार्येण भवता ऽवश्यं पुरुषव्यापारोद्देश्येन भवितव्यम् । न चासति नियोज्ये तदुद्देशेन कश्चित्प्रवर्त्तेत । अध्यापनविधिना हि प्रवर्त्यमानो माणवकः कथंचिदध्ययनमात्रमनुतिष्ठेत्, न त्वपूर्वमुद्दिशेत् । न हि तस्य तदुद्देश्यं प्रमाणाभावात् । प्रयाजाद्यपूर्वाणि दर्शपूर्णमासाऽपूर्वोपकारित्वात्तदधिकृतेन पुरुषेण तत्सिद्ध्यर्थमुद्दिश्य क्रियमाणानीति युक्तं, यदसत्यपि साक्षान्नियोज्योपादाने कार्यत्वं लभन्ते । अध्ययननियोगस्य तु नान्योपायिकत्वं, यतस्तद्रूपेणोद्देश्यता स्यात् । अर्थज्ञानस्य च नियम[1]-

[1] विषयेति (ख) पु॰ पाठः ।

फलत्वेन नियोगानपेक्षत्वात् । तस्मादस्य कार्यत्वसिद्धये ऽवश्यं नियोज्यः कल्पनीयः । यच्चाध्यापनविधेरुपनयनद्वारमध्ययनप्रयोजकत्वमुक्तम्, तदप्ययुक्तम् । उपनयनप्रयुक्तेरेवाभावात् । तद्द्वारेणाध्यापनप्रयुक्तिर्दूरापास्ता । क्त्वा–प्रत्ययेन हि समानकर्तृकत्वमेवोच्यते, तेन चैकप्रयोगता कल्प्यते । अङ्गाङ्गिभावस्तु तद्वशात्कल्पनीयः । द्वितीयया तु साक्षादङ्गित्वमेवोच्यते । अतो यथा त्रिवृता यूपपरिव्याणं यूपार्थं नोपाकरणार्थमेवमुपनयनमपि माणवकसंस्कारार्थं नाध्यापनार्थम् । स्मृतिगतश्च क्त्वा-प्रत्ययः प्रत्यक्षवेदगता तु "वसन्ते ब्राह्मण मिति" द्वितीया । अतोऽपि माणवकार्थत्वम् । भवतु माणवकसंस्कारस्तद्द्वारेण त्वध्यापनाङ्गं नाध्ययनाङ्गमिति चेत् । मैवम् । अन्तरङ्गत्वादध्ययनस्य तादर्थ्यमेव संस्कारस्य युक्तम् । अध्ययनमपि फलवदध्यापनमपि, तयोः कस्यायं माणवकसंस्कारोऽङ्गं भवत्वि? त्यपेक्षायामध्यापनस्य पुरुषान्तरगामित्वेन बहिरङ्गत्वान्माणवकगताध्ययनार्थत्वमेव युक्तम् । यथैव ह्यध्ययनस्याचार्यकसिद्धिप्रयोजनतामनादृत्य "वेदमधीत्य स्नायादि"ति स्मृतिं बाधित्वान्तरङ्गत्वादर्थज्ञानार्थतैवाश्रीयते तथोपनयनस्याप्यध्ययनार्थता वेदितव्या । स्मरणादपि पाणि[1]नीयादध्ययनाङ्गतैवोपनयनस्यावगम्यते । अध्ययनाङ्गतां हि स्मरन्नाचार्यकरणे नयतेरात्मनेपदं विधत्ते । अध्यापनाङ्गत्वे हि कर्त्रभिप्रायत्वात् क्रियाफलस्य ञित्त्वादेवात्मनेपदं सिद्ध्येत् 'उपनीय तु यः शिष्यमि'ति क्त्वा-प्रत्ययो हि कथंचि"द्दर्शपूर्णमासाभ्यामिष्ट्वे"तिवदसत्यप्यङ्गाङ्गिभावेऽवकल्पते । पुनर्विधानं चात्मनेपदस्यात्यन्तानर्थकम् । तस्मादध्ययनाङ्गमुपनयनं स्यात् । न तु स्यात्[2] । तज्जन्यः संस्कारो हि माणवकसमवायी । सत्यम् । माणवकसमवेतोऽपि न तदर्थः कर्त्रर्थत्वं च फलस्य कर्त्रभिप्रायत्वं न तु तत्समवायः । अन्यथा हि "अग्नीनादधीते"त्यात्मनेपदं न स्यात् । आधानफलस्याहवनीयत्वादेरग्निसमवेतत्वेन कर्तृसमवायाभा-

१ संमाननोत्सञ्जनाचार्यकरणज्ञानभृतिविगणनव्ययेषु नियः । १ । ३ । ३५ ।

२ आत्मनेपदविधानमनर्थकं न स्यादित्यर्थः ।

धात्। इयं च स्मृतिः "उपनीय तु यः शिष्यमि"ति। अतो बलीयसी द्वितीयास्मृतिः। तस्मा[1]च्चाध्यापनाङ्गमुपनयनमिति न तद्द्वारेणाध्ययनस्य प्रयुक्तिः। यच्चोपनीतस्य व्यापारापेक्षायामुपनयनं प्रक्रम्य विहितमध्ययनं तद्व्यापारत्वेनाध्यवसीयत इति। तदप्यबुद्धिपूर्वकम्। एवं हि वदताऽध्यापनाङ्गमध्ययनमित्युपपादितं भवति। यदा ह्यध्यापनार्थत्वेनोपनीतस्य माणवकस्य तदुपयोगिव्यापारापेक्षायामध्ययनविधिरध्ययनं तदुपयोगिव्यापारतया विधत्ते—त्रैवर्णिकैरुपनीतैरध्यापनौपयिकव्यापारापेक्षैरध्ययनव्यापारः कर्तव्य इति तदापि स्पष्टमेवाध्यापनशेषोऽध्ययनमिति दूरनिरस्तमर्थज्ञानार्थत्वमिति सुनिरूपितो[2] वाक्यार्थः। यथाध्ययनविधिरध्ययनमर्थज्ञानार्थतया विधत्ते नाध्यापनौपयिकतया तदा त्वा[3]ध्ययनस्य तदौपयिकत्वं केन प्रमाणेन गम्यते?। नह्यत्र प्रत्यक्षादीनि क्रमन्ते। संनिधाना[4]दिति चेत्। न संनिधानं नाम स्वयं प्रमाणम्। शब्दस्य त्वर्थं प्रतिपादयतः संनिध्यपेक्षायोग्यत्वानीतिकर्तव्यता नेत्रस्येवोन्मीलनम्। शब्दश्चेदध्यापनौपयिकतयाध्ययनं विदध्यात्। नार्थज्ञानार्थता सिद्ध्येत्। अर्थज्ञानार्थतया विधानेऽध्यापनौपयिकता न सिद्ध्येत्। अतोनोपनयनसंनिधौ "स्वाध्यायोऽध्येतव्य" इति विहितस्याध्ययनस्योपनयनद्वाराध्यापनविधिना प्रयुक्तिसंभवः यदि परमध्यापनस्याध्ययनमन्तरेणासंभवात्पदार्थस्वभावेनाध्ययनमाक्षिप्यते, तथा सत्यविहितेन लौकिकेनाध्ययनेन तत्संभवाच्च विहितस्याध्ययनस्य नियोगतस्तत्प्रयुक्तिः। नच प्रयुक्तिलाघवादपि विहितोपजीवनम्। तदुपजीवनेपि प्रयुक्त्यनवलोपात्। विहितमप्यध्ययनमध्यापनविधिनैव त्वन्मते प्रयुज्यते न स्वविधिना। तस्माल्लौकिकमेवाध्ययनमुपनीतानामध्यापनविधिराक्षिपेत्। विधिविहितमध्ययनं परप्रयुक्त्यभावादधिकारं[5] प्रकल्पयेत्।

---

१ द्वितीयास्मृतिविरोधात् पाणिनिस्मृतिविरोधाच्चेत्यर्थः।

२ काक्वा परमते वाक्यार्थासंगतिर्दर्शिता।

३ वादाहवे प्राभाकरं संमुखीनतया बोधयितुम् 'आत्थे'ति कथयेत्यर्थकम्।

४ अध्यापनाङ्गोपनयनविधिसंनिधानादित्यर्थः।

५ नियोगविशेषणीभूतार्थज्ञानकामनाम्।

Digitized by Google

किंच । यद्युपनयनमध्यापनाङ्गं ततो ध्ययनविधिरर्थज्ञानार्थः स्वा-ध्यापनार्थतयोपनीतैस्त्रैवर्णिकैः संबध्येत येऽध्यापनार्थतयोपनीतास्त्रैवर्णि-कास्तदुपयोगिव्यापारमपेक्षन्ते तेऽर्थज्ञानार्थमधीयीरन्नित्यसंबद्धमेव स्यात् । ततश्चोपनीतैरसंबध्यमानोऽध्ययनविधिश्चतुर्णामपि वर्णानां स्यादिति शूद्रा-धिकारप्रसङ्गः । तस्मादुपनीतानां प्रयोजनापेक्षिणामध्ययनकरणिकाऽर्थज्ञान-भावना विधीयत इत्यध्ययनाङ्गमेवोपनयनं त्व[1]विधिप्रयुक्तं चाध्ययनं प्रपञ्चे-नायं पक्षो न्यायरत्नमालायामेव निरस्त इत्युपरम्यते । तस्मात्पूर्वोक्त एव वि-चारः । किमदृष्टार्थमध्ययनमुताक्षरग्रहणादिपरम्परयार्थज्ञानार्थमिति । य-थवा नात्र किंचिद्विचार्यते नावमिकन्यायेनैवाध्ययनस्याक्षरसंस्कारादिपरंपर-यार्थज्ञानार्थत्वसिद्धेः । नवमे हि साम्नामृगक्षराभिव्यक्तिद्वारेण स्तुत्युपयोगि-त्वदर्शनात्तादर्थ्यमेव नादृष्टार्थत्वमिति वक्ष्यते तेनैव न्यायेनाध्ययनस्यार्थज्ञा-नार्थत्वसिद्धेरध्ययनानन्तरं धर्मजिज्ञासा कर्तव्येति सिद्धमेवैतत्प्रयोजनवि-वक्षया सूत्रकारेणोच्यते । यदाहुः । "धर्माख्यं विषयं वक्तुं मीमांसायाः प्र-योजन"मिति । न त्वत्र कस्यचिद्वेदवाक्यस्यार्थो विचार्यते । तदप्याहुः "न चात्र चोदनाध्यक्ष्या गौरवं तत्र चोदितमि"ति । तत्सिद्धमध्ययनानन्तरं धर्मजिज्ञासा कर्तव्येति । सा चतुर्विधा । धर्मस्वरूप–प्रमाण–साधन–फलैः । नन्वध्ययनविधिना वेदवाक्यार्थविचारमात्राक्षेपाद्धर्मस्वरूप–प्रमाण-जिज्ञासयोः कः प्रसङ्गः? । उच्यते । उपोद्घातत्वात्प्रसङ्गः । यदि हि वेदवा-क्यार्थो धर्मः स्याद्वेदश्च प्रमाणं, ततोऽसौ विचारः कर्तव्यो भवति । इतरथा काकदन्तपरीक्षावत्स्यात् । तदध्ययनविधिरेव प्रमाणादिवि-चारमप्याक्षिपति धर्मग्रहणं चोपलक्षणार्थम् । अधर्मस्यापि हानाय जिज्ञा-स्यत्वात् । अकारप्रश्लेषेण वा सूत्रमधर्मजिज्ञासायामपि व्याख्येयमिति निरवद्यम् ।

चोदनालक्षणोऽर्थो धर्मः ॥ २ ॥

प्रथमं तावत्को धर्मः? कथंलक्षणकः? इत्येतद् द्वयमनेन सूत्रेण प्रत्यर्था-

[1] तु शब्दः पुनरर्थः ।

भ्यां निरूप्यते । यो धर्मः स चोदनालक्षणः चोदनैव तस्य लक्षणं प्रमाणम् । चोदना च तस्य लक्षणमेवेति श्रुत्या प्रमाणविधावर्थाच्चोदनागम्य एवाग्निहोत्रादिधर्मोनातल्लक्षणश्चैत्यवन्दनादिरिति स्वरूपमपि सिद्ध्यति । तथा यश्चोदनालक्षणः स धर्म इति स्वरूपविधावर्थात्प्रमाणसिद्धिर्वेदितव्या । कश्चित्त्वाह । कार्यरूपो वेदार्थो न सिद्धरूप इत्येतदनेन सूत्रेणोच्यते । चोदनालक्षणशब्देन कार्यमुच्यते, धर्मशब्देन वेदार्थ इति । तदयुक्तम् । यानि तावद्विधिवाक्यानि तेषां विधावेव प्रामाण्यं वस्तुस्वरूपे चाप्रामाण्यं विस्पष्टमेवेति न तत्र किंचिद्वक्तव्यम् । ह्रेपिष्ठादिवाक्यानामपि विध्येकवाक्यतया तत्रैव प्रामाण्यम् । मन्त्राणामपि प्रकरणेन प्रधानविधिशेषत्वं द्वितीयपादे वक्ष्यत इति न तत्रापि वक्तव्यमस्ति । तेन कस्याश्च सिद्धार्थतां निरस्य कार्यार्थतोच्यते । "अविनाशी वा अरे अयमात्मे"-त्यादीनामुपनिषद्वाक्यानामिति चेत् । तेषामपि यदि विध्येकवाक्यत्वमस्ति ततोऽर्थवादाधिकरणेन गतम् । अथ नास्ति, कथं तेषां कार्यार्थता स्यात् । अथ तेषां विध्यश्रवणाद्विध्यन्तरैकवाक्यत्वाभावाच्च कार्यार्थत्वानुपपत्तेर्व्युत्पत्तिविरहाच्च सिद्धार्थे प्रामाण्यायोगादप्रामाण्यमेवाभिमतम् । किमिदानीमात्मादिवाक्यानामप्रामाण्यप्रतिपादनपरमिदं सूत्रं? सुव्याहृतं तर्हि शास्त्रारम्भे प्रथमं तावत्सूत्रकारोऽप्रामाण्यमेव वेदवाक्यानां प्रतिपादयतीति । कथं च कार्य एव प्रामाण्यम् । तत्रैव व्युत्पत्तेः । प्रवृत्त्यधीना हि व्युत्पत्तिः सा च कार्यावगमाधीनेति व्युत्पत्तिरपि तत्रैव भवतीति चेन्न । अवश्यं प्रवृत्त्यधीनैव व्युत्पत्तिः । काष्ठैः स्थाल्यामोदनं पचतीत्यादिवर्तमानापदेशेष्वपि प्रसिद्धतृतीयार्थानामप्रसिद्धकाष्ठप्रातिपदिकार्थानां च पुरुषाणां काष्ठार्थे व्युत्पत्तिदर्शनात् । अथ प्रथमव्युत्पत्तिः कार्यविषयैव । न हि तदा शब्दान्तरवशेन शब्दान्तरस्यार्थे व्युत्पत्तिः संभवति । सर्वस्य धर्मस्याप्रसिद्धत्वादिति चेत् । अस्त्वेवम् । तथापि पश्चाद्बहुशः सिद्धार्थे शब्दप्रयोगदर्शनात् "कोऽयं राजा ?," "पाञ्चाल" इत्यादिषु प्रश्नप्रतिवचनादिषु कार्यस्य व्यभिचारादव्यभिचार्यर्थमात्रं वाच्यमिति सुज्ञानम् । यथैव हि कस्यांचिद्व्यक्तौ प्रथमं गोशब्दस्य प्रयोगदर्शनात्तस्यैव वाच्यत्वावगमे सत्यपि पश्चाद्व्यक्त्यन्तरे प्रयोगं दृष्ट्वा पूर्वव्यक्तिव्य-

भिचाराद्व्यभिचारिसामान्यमेवार्थ इत्यध्यवसीयते तथा कार्यपरतामवगतामपि पश्चात्सिद्धार्थप्रयोगदर्शनेन बाधित्वाऽर्थमात्रमेवाऽव्यभिचाराद्वाच्यमिति युक्तम् ।

किंच । प्रथमव्युत्पत्तावाक्रतिपयानामेव शब्दानां कार्यार्थत्वमवगतं न सर्वशब्दानामतः पश्चाद् व्युत्पाद्यमानस्य काष्ठादेः सिद्धार्थे व्युत्पत्तिः केन वार्यते । नच व्युत्पत्तौ शब्दानां पौर्वापर्यनियमोस्ति । अतः सर्वे शब्दाः पश्चाद्व्युत्पाद्यमानाः केचित्सिद्धार्था भवन्ति । सर्वेषान्तु कार्यार्थत्वे सिद्धार्थपरेषु लौकिकवाक्येषु सर्वशब्दानां लाक्षणिकत्वाच्च कश्चिदन्विताभिधायी स्यात् । तत्रान्वितप्रतीतिः कथं सिद्ध्येत् । वक्तृज्ञानानुमानादिति चेत् न । यद्विषयं हि वाक्यं तद्विषयमेव वक्तृज्ञानमनुमातव्यम् । नचान्वितप्रतिपादकं वाक्यमुच्चारितमिति कथमन्वितज्ञानानुमानम् । अथार्थस्वरूपस्मारकैः पदैरन्वितत्वज्ञानमनुमीयते, ततः कार्यवाचकेष्यसिद्धेरन्विताभिधानं न स्यात् ।

किंच प्रथममेव कार्येव्यभिचारः शक्योऽवगन्तुम् । यदा हि पुत्रस्ते जातइत्युक्तस्य कस्यचिन्मुखविकासं पार्श्वस्थः पश्यति तदा हर्षहेतुरनेन शब्देन प्रतिपादित इति हर्षहेतुभूतसिद्धार्थप्रतिपादने शब्दस्य सामर्थ्यं कल्पयति । यद्यपि च तदानीमर्थविशेषो न ज्ञायते हर्षहेतूनां बहूनां संभवात् । तथापि सिद्धार्थता तावदवगता । तावतापि कार्ये व्यभिचारः सिद्धः ।

किंच । बहुशः पुत्रजनने सत्येवं शब्दप्रयोगादन्येषु हर्षहेतुष्वप्रयोगात्पुत्रजननरूपार्थविशेषोपि सुज्ञान एव ।

किंच । प्रवृत्त्यधीनापि व्युत्पत्तिर्नावश्यं कार्यविषयैव भवति । तथा हि यदा कश्चित्प्रवृत्तावत्यन्तासमर्थं वृद्धमातुरं वा प्रति विनोदार्थं वाक्यं प्रयुङ्क्ते नद्यास्तीरे पञ्च फलानि सन्तीति । तत्रान्यो देवदत्तः कश्चिदर्थी । तद्वाक्यमर्थीकृत्वा नदीतीरं गत्वा फलान्याहरति । एतत्सर्वं पश्यन्नन्योऽव्युत्पित्सुः फलसद्भावप्रतिपादने शब्दस्य सामर्थ्यं व्युत्पद्यते । तस्मान्नैकान्ततः कार्यार्थता शब्दानाम् । का चास्य सूत्रस्य वचनव्यक्तिः । यदि

तावद्यत्कार्यं तद्वेदार्थ एवेति कार्यमुद्दिश्य वेदार्थता विधीयते । तथा सत्युद्देश्यस्योपादेयेन व्याप्तिनियमा[1]त्सर्वस्य लौकिकस्यापि गवानयनादि-कार्यस्य वेदार्थता स्यात् ।

किंच उपादेयस्य वेदार्थस्योद्देश्येन कार्यरूपेणाग्नेरिव धूमेनाव्या-प्तेरकार्येऽपि वेदस्य प्रामाण्यमनिरस्तं स्यात् । अथ यो वेदार्थः स कार्य-रूप एवेति ततो यो धर्मः स चोदनालक्षण इति वचनव्यक्तिः स्यात्, तत्रार्थ—शब्दोऽभ्युदयवाची कस्य विशेषणं, यद्युपादेयस्य चोदनालक्षणपदा-र्थस्य, ततः सर्वस्य वेदार्थस्य कार्यत्वमर्थत्वं च विधीयते इति श्येनादिनि-योगानामप्यर्थत्वं स्यात् । अथोद्देश्यवेदार्थविशेषणम्, ततोऽयमर्थो भव-ति, योऽर्थात्मकोऽभ्युदयात्मको वेदार्थः, स कार्यरूपः ततश्च श्येनादिवियो-गानां निषिद्धफलत्वेनानभ्युदयरूपाणां कार्यता न स्यात् । माभूदिति चेत् । न । तेषामपि लिङा कार्यतावगमात् श्येनयागस्य कार्यता निवा-रयितुं शक्यते, न नियोगस्य । तस्य कार्यैकस्वभावत्वात् । असति च कार्यत्वे श्येनवाक्यस्य कार्यार्थत्वाभावात्सिद्धार्थतैव वक्तव्या स्यात् । न च तथा संभवति विधिप्रत्यययोगात् । सिद्धे चार्थे व्युत्पत्तिविरहादप्रामाण्यमेव श्येनादिवाक्यानां स्यात् । अथ पूर्वसूत्राद् वेदार्थपरं धर्मपदमनुषज्य चोद-नालक्षणो वेदार्थ इत्येकं वाक्यमर्थो धर्म इत्यपरं वाक्यम् । तदिदं स्वप्रज्ञाविलसितमात्रम् । अनुषङ्गवाक्यभेदयोर्विना फलमाश्रयणात् । अप्रति-ज्ञातस्य च धर्मस्य लक्षणमसङ्गतम् । अथ प्रतिज्ञातस्यैव वेदार्थस्य कार्य-त्वसिद्धये धर्मत्वमुच्यते, किं कार्यमेव धर्मरूपो वेदार्थः ?, स एव जिज्ञास्यो न सर्वः । तथाच य एव जिज्ञास्यो धर्मस्तस्यैव सूत्राक्षराविनाशेन जिज्ञासा प्रतिज्ञातव्येति वेदार्थप्रतिज्ञावचनमनर्थकम् । अथ त्वर्थशब्द[2]मनादृत्य यो वेदार्थः स कार्यरूप इत्युच्यते, ततोऽर्थपदमनर्थकं वस्तुमात्रपर्यायमनुवा-दकं स्यात् । अनर्थकानुवादासार्थता चास्य भाष्य[3]कारेणोक्ता । तस्माद्विशेषणा-

१ उद्देश्यतावच्छेदकावच्छेदेन विधेयान्वयनियमादित्यर्थः ।
२ यद्यर्थशब्दमिति (ख) पुस्तकपाठः ।
३ शबरस्वामिना ।

मेवैतत् । विशेषणत्वे चाभ्युदयरूपस्य वेदार्थस्य कार्यत्वाभिधानादनभ्युदयरूपस्य वेदार्थस्य कार्यत्वं न स्यादिति सर्वस्य वेदस्य कार्य एव प्रामाण्यमिति नियमो न स्यात् । ततश्च "विनाशी वा अरे अयमात्मे"त्यादीनामात्मस्वरूपपरत्वं न निराकर्तव्यमित्यास्तां तावत् । तस्माद्धर्मस्वरूपप्रमाणप्रतिपादनार्थमेवेदं सूत्रम् । तदिह धर्मं विषयीकृत्य चिन्त्यते—किमस्य न किंचित्प्रमाणमस्ति ? किं वा प्रत्यक्षादिकमेव प्रमाणम् ? उत चोदनैव ? अथवा विकल्पः ? अथवा समुच्चयः ? इति । तत्र शब्दस्य प्रमाणान्तरप्राप्तप्रापकत्वेन स्वयमप्रमाणत्वात्प्रत्यक्षादीनां चासामर्थ्यादप्रमाणको धर्म इत्येकः पक्षः । प्रत्यक्षादिगम्य एवेत्येकः पक्षः । योगिनां प्रत्यक्षगम्यः, अर्वाचीनानां तु चोदनागम्य इत्यपरः । जगद्वैचित्र्यार्थापत्त्या किमप्यदृष्टमस्तीति सामान्येन प्रसिद्धो धर्मश्चोदनयाग्निहोत्रादिविशेषरूपेण गम्यते, तस्मात्समुच्चय इति पक्षान्तरम् । चोदनैव, सा च प्रमाणमेवेति सिद्धान्तः । तदिह चोदनैव प्रमाणं सा च प्रमाणमेवेत्यवधारणद्वयं प्रतिज्ञायते । निमित्तसूत्रे तु प्रथमद्वितीयसूत्रमात्रालोचनया वेदो धर्ममूलमित्यादिवदुपदेशशास्त्रताशङ्का मा भूदिति परीक्षाशास्त्रमिदमिति[1] ज्ञापयितुं परीक्षाप्रतिज्ञानम् । यद्यपि चोपरितनव्यापारादेव[2] परीक्षाशास्त्रत्वं गम्यते, तथापि वक्ष्यमाणमेव श्रोतृबुद्धिसमाधानाय कीर्तितम् । प्रत्यक्षसूत्रे तु प्रत्यक्षस्य विद्यमानोपलम्भनत्वाद्भविष्यति धर्मे प्रामाण्यासंभवात्तत्पूर्वकत्वेनेतरेषामप्यप्रामाण्यात्प्रमाणान्तरनियम—विकल्प—समुच्चयनिराकरणाच्चोदनैवेत्ययमर्थः सिद्ध्यति । औत्पत्तिकसूत्रे तु स्वतःप्रामाण्यमर्थान्यथात्व—कारणदोषज्ञानाभ्यामप्रामाण्यमित्याश्रित्याग्निहोत्रादिचोदनाभ्योऽसंदिग्धज्ञानोत्पत्तेः स्वतःप्रामाण्यम्[3] न चापवादकमर्थान्यथात्वज्ञानं साक्षादस्ति । नापि कारणदोषज्ञानं । पुरुषाश्रयत्वाच्छब्ददोषाणाम् । पदपदार्थसंबन्धस्याकृत्रिमत्वात्तद्वारेण पुरुषानुप्रवेशाभावाच्चोदनानामिति स्थिते शब्दस्यैवानित्यत्वात्कुतः

१ मेवेदमिति (ख) पुस्तके पाठः ।

२ व्यवहारादेवेति (ख) पुस्तके पाठः ।

३ प्रामाण्यमाप्तमिति (ख) पु॰ पाठः ।

संबन्धनित्यतेत्याक्षिप्य शब्दस्य नित्यतया शब्दाधिकरणे संबन्धनित्यत्वे समाहिते माभूत्पदपदार्थसंबन्धद्वारेण पुरुषानुप्रवेशः, वाक्यवाक्यार्थयोस्तु लोके संबन्धादर्शनान्निर्मूलोऽग्निहोत्रादिवाक्यार्थप्रत्यय इत्यतो व्यामोहः सामयिको वा । अतो न वाक्यार्थे वेदस्य प्रामाण्यमित्याशङ्क्य पदार्थानां सम्बन्धग्रहणं समयं चानपेक्षमाणानामेव वाक्यार्थे प्रामाण्यं सम्भवतीति तद्भूताधिकरणेन प्रतिपादिते पुनर्वेदानां वाक्यात्मकत्वात्काठकादिसमाख्यानाच्च पौरुषेयत्वात्तद्द्वारेण दोषसंस्पर्शमाशङ्क्य स्मर्तव्यत्वे सत्यस्मरणाद्योग्यानुपलब्धिनिरस्तस्य कर्तुरनुमानासम्भवात्समाख्यायाश्च प्रवचननिमित्तत्वादपौरुषेया वेदाः, इति तदेकदेशानां चोदनानां सिद्धं प्रामाण्यमित्येवं समस्तः[1] प्रथमः पादश्चोदनासूत्रप्रतिज्ञातार्थोपपादनेन तस्यैव परिकरः । सोयं भाष्यकारानुसारेण पादा[2]र्थानुक्रान्तः । वृत्ति[3]कारमतं तु पश्चादनुक्रमिष्यामः । प्रकृतमनुसरामः । प्रतिज्ञातं तावच्चोदनैव प्रमाणं सा च प्रमाणमेवेति ।

ननु प्रत्यक्षादेरन्यानपेक्षं प्रामाण्यं संभवतीति तस्यैव धर्मे प्रामाण्यं, शब्दस्य तु सर्वदैव प्रमाणान्तरप्रमितविषयत्वाच्च तदनपेक्षं प्रामाण्यं संभवतीति । उच्यते । प्रत्यक्षं तावत्संयुक्तविषयत्वेन विद्यमानोपलम्भनत्वाद्भविष्यति धर्मे न समर्थम् । यद्यपि गोदोहनादिद्रव्यं, यागादिक्रिया, नीचैष्ट्वादिगुणश्च, फलसाधनत्वाद्धर्मशब्देनोच्यते, अपूर्वादय इति श्रेयस्करभाष्ये वक्ष्यते । तथापि तेषां फलसाधनरूपेण धर्मत्वात्फलस्य च जन्मान्तरादिभावित्वात् धर्मस्वरूपेण प्रत्यक्षविषयत्वं न संभवति तत्पूर्वकत्वाच्चानुमानादिकमपि न प्रमाणम् । भावनाबलजन्तु योगिप्रत्यक्षं भविष्यत्यपि धर्मे समर्थमिति मनोरथमात्रम् । भावना ह्यनुभूतगोचरा नियतानुभूतेष्वेव निश्चयरूपां स्मृतिं जनयेत् ।

(शेषमग्रे)

१ प्रामाण्यमिति प्रतिपादितमेवं समस्त इति (ख) पुस्तकपाठः ॥
२ पदार्थानुक्रान्त इति पाठान्तरं मह्यं न रोचते ।
३ उपवर्षवृत्तिं तेने जैमिनीयतन्त्रे सा चाधुनादुर्लभा ।

॥ श्रीः ॥

॥ श्रीं नमः श्रीमते भगवते रामानुजाचार्याय ॥

अथ श्रीभाष्यं विशिष्टाद्वैतपरं रामानुजदर्शनम्

श्रुतप्रकाशिकासमेतं विषमपदटिप्पणीसहितम्

तत्र प्रथमोऽध्यायः ।

मू० श्री० अखिलभुवनजन्मस्थेमभङ्गादिलीले
विनतविविधभूतव्रातरक्षैकदीक्षे ।
श्रुतिशिरसि विदीप्ते ब्रह्मणि श्रीनिवासे
भवतु मम परस्मिन् शेमुषी भक्तिरूपा ॥ १ ॥

श्रु० वरदं द्विरदाद्रीशं श्रीनिधिं करुणानिधिम् ।
शरण्यं शरणं यामि प्रणतार्तिहरं हरिम् ॥ १ ॥
बहिरन्तस्तमश्छेदि ज्योतिर्वन्दे सुदर्शनम् ।
येनाव्याहतसंकल्पं वस्तु लक्ष्मीधरं विदुः ॥ २ ॥
सम्यङ्न्यायकलापेन महता भारतेन च ।
उपबृंहितवेदाय नमो व्यासाय विष्णवे ॥ ३ ॥
तस्मै रामानुजार्याय नमः परमयोगिने ।
यः श्रुतिस्मृतिसूत्राणामन्तर्ज्वरमशीशमत् ॥ ४ ॥
वन्देऽहं वरदार्यं तं वत्साभिजनभूषणम्[1] ।
भाष्यामृतप्रदानाद्यः संजीवयति मामपि ॥ ५ ॥
प्रपद्ये प्रणवाकारं भाष्यं रङ्गमिवापरम् ।
परस्य ब्रह्मणो यत्र शेषित्वं स्फुटमीक्ष्यते ॥ ६ ॥
श्रुत्यन्तेषु श्रुतं भाष्ये मतं ध्यातं हृदम्बुजे ।
लक्ष्मीपतिं प्रपद्येऽहं दृष्टं श्रीरङ्गधामनि ॥ ७ ॥
प्रमाणं च प्रमेयं च प्रमातारश्च सात्त्विकाः ।

१ वत्सः—श्रीवत्सोनामातिमहानुभावः पूर्वाचार्य,स्तस्याऽभिजनो=वंश,स्तस्य भूषणमलङ्काराऽऽकारमित्यर्थः ।

जयन्तु क्षपितानिष्टा[1] सदा सर्वत्र सर्वथा ॥ ८ ॥
अविस्तृताः सुगम्भीरा रामानुजमुनेर्गिरः ।
दर्शयन्तु प्रसादेन स्वं भावमखिलं दृढम् ॥ ९ ॥
श्रीरङ्गेशाज्ञया लब्धव्याससञ्ज्ञं[2] सुदर्शनम् ।
वाचा[3] विजयिनः[4] पुत्रं भाष्यभक्तिर्[5]ववृधत् ॥ १० ॥
गुरुभ्योऽर्थः श्रुतः शब्दैस्तत्प्रयुक्तैश्च योजितः ।
सौकर्याय बुभुत्सूनां संकलय्य प्रकाश्यते ॥ ११ ॥
कः कृत्स्नं वेत्ति भाष्यार्थं श्रुतांशस्थितये कृतिः ।
पाठैः काकणिके[6]वैषा नोपेक्ष्या भाष्यवित्तमैः ॥ १२ ॥
भाष्यं चेद्गृणोत्स्वयं यतिपतिर्व्याख्यानवाचां तथा
गाम्भीर्यादनवस्थितिर्मितमतिर्दूरे जनस्तद्गिराम् ॥
प्रष्टव्यः कथमीश्वरः स हि न नः प्रत्यक्षरूपो दृशां
तद्भाष्यं स च भाष्यकृत्स च हरिः सम्यक् प्रसीदन्तु नः ॥ १३ ॥

सर्वेषां पुरुषाणां प्रमाणाधीनप्रमेयनिश्चयानामुपादित्सितजिहासितेष्टानिष्टतत्साधनानामलौकिके पुरुषार्थे तत्साधनरूपे च वस्तुनि शब्दैकसमधिगम्ये तत्राप्यपुरुषशेमुषीदोषमसी[7]मालिन्यस्य[8] वेदाख्याक्षरा-

---

१ ख पुस्तके ‘क्षपितारिष्टाः’—इति पाठः ।

२ भगवतः श्रीरङ्गनाथस्य समर्पितहवीरूपप्रसादप्राशनेन जनन्या उत्पन्नो यो व्यासो-नामास्य श्रुतप्रकाशिकाकृतः पूर्वपुरुषस्तद्वंश्यतया ऽयमपि कुलक्रमाऽऽगतयैव भगवदाज्ञा-परिप्राप्तया व्याससञ्ज्ञया तथा प्रसिद्धस्तम् ।

३ वाचा=नाम्ना सुदर्शनम् ।

४ विजयिनो=विजयाचार्यस्यात्मजम् ।

५ श्रीभाष्यभक्तिः स्वव्याख्यायां प्रवर्त्तितवतीत्यर्थः ।

६ यद्यपि मेदिन्यमरकोशाद्यनुसारेणैष काकिणिका इत्येव समुचितः पाठः प्रति-भाति, तथाप्यादर्शद्वये काकणिका इति पाठसत्त्वादस्मदीयापरपुस्तकेष्वपि तथै-वोपलम्भात् काकिणिका इति पाठमुपैक्षिषि, गुरुमुखतोऽप्यहमध्यगीषि काकणिका इत्येवेति स एवावस्थापितः पाठः ॥

७ मषी इति मूर्द्धन्यान्तपाठस्य दुर्गादेशोद्धारनागेशटीकयोरुपलम्भेऽपि मूर्द्धन्यो-पधपाठस्याप्रचुरप्रचारतया मूर्द्धन्यघटितमुपेक्ष्य मसी इति दन्त्योपधपाठ एव समादृतः त्रिकाण्डशेषामरकोशयोरपि दन्त्योपध एव ॥

८ भ्रमप्रमादविप्रलिप्साकरणाऽपाटवादयः पुरुषबुद्धिदोषा एव मसी तदात्मकं मालिन्यं न विद्यते यस्य तस्येत्यर्थः ।

Digitized by Google

शेरेव प्रधानतः प्रमाणतयाऽऽश्रयणीयत्वे सिद्धे तत्र च पशुपुत्रक्षेत्रस्वर्गाद्यैहिकामुष्मिकार्वाचीनफलतत्साधनपरेऽवगते पूर्वभागे परमपुरुषार्थतत्साधनावबोधके च तदुपरिभागे पूर्वाचार्याभिमतमुक्तिघण्टापथकण्टकायमानविविधकुदृष्टिजनदुर्वचनशतोपप्लुते तदुपदर्शितकुपथप्रवृत्तिनि जगति च मोमुह्यमाने तदुज्जीवयिषया सदसद्विवेचनचतुरपूर्वाचार्यपरिचिन्तितं प्राचीनमेव समीचीनमध्वानं निष्कण्टकीकृत्य परमपुरुषार्थाभ्यर्थिजनसार्थं कृतार्थयितुं भवभयाभितप्तजनभागधेयवैभवभावितावतरणेन परमकारुणिकेन भगवता भाष्यकारेण शारीरकं शास्त्रं व्याचिख्यासितम्। परमर्षिप्रणीतानि[1] व्याख्येयानि तेषां च महर्षिप्रणी[2]तानि व्याख्यानानि च, सन्ति च तान्येवानुरोद्धव्यानि। नह्यनृषेः सूत्रमर्शित्वम्, ऋषेरभिप्रायमृषिरेव स्वतो वेदितुमर्हति न तु जडमतिरितरो जनः। ऋषिवचसामेवाभिन्नवक्तृकाणां मिथो विरोधे पूर्वपक्षाभिप्रायवैभववादादिभिरविरोधो नेयः। भिन्नवक्तृकाणां तु विरोधे दुष्परिहरे युक्तियुक्तं ग्राह्यमिति न दोषः। ये[3] पुनः सन्त्यपि तान्यनादृत्य व्याख्येया[4]न्तराणि व्याख्यानान्तराणि च तद्विरुद्धानि रचयन्ति तेषामाग्रहगृहीतहृदयत्वे पण्डितमानित्वे पाण्डित्यख्यापनपरत्वे च तत्प्रवृत्तिरेव प्रमाणम्। इतरेषां च व्याख्यातॄणामार्षव्याख्यानातिलङ्घित्वम् "उपासात्रैविध्यात्[5]" "सर्वत्र प्रसिद्धोपदेशात्[6]" "भूमा संप्रसादात्[7]" "दहरउत्तरेभ्य[8]" इत्यादिषु स्पष्टतरम्[9], इह तु वृत्त्यनुसारः प्रतिज्ञातः[10]।

(शेषमग्रे)

---

१ व्याससूत्राणि।
२ बोधायनवृत्त्यादीनि।
३ गौडपादाचार्य–शङ्कराचार्य–यादव–भास्करप्रभृतयः।
४ गौडपादाचार्यकृतमाण्डूक्यकारिकाः।
५ अ०।१।पा० १।सू० ३१।
६ अ०।१।पा० २।सू० १।
७ अ०।१।पा० ३।सू० ८।
८ अ०।१।पा० ३।सू० १४।
९ यथा चोदाहरार्थत्वं तथाग्रे भाष्ये निवेदयिष्यते।
१० बोधायनमहर्षिप्रणीतवृत्त्यनुसारिव्याख्यानं करिष्यत इत्यर्थः।

Digitized by Google

॥ श्रीः ॥

श्रौतपदार्थनिर्वचनम् ।

अथ पाशुकपदार्थानां नामान्युच्यन्ते ।

(*Continued from page* 664 Vol VI.)

१०८ मार्जनानन्तरं ब्रह्मणे प्राशित्रं परिहरेत्यादि कृत्वा ब्रह्मणे चतुः परिहरेत्याह । तत आग्नीध्रस्तथा करोति । यजमानः अन्वाहार्यप्रतिग्रहानन्तरं ऋत्विग्भ्यो गां ददाति । देवस्येत्यादिप्रतिग्रहमन्त्रे ब्रह्मण ओदनमित्यस्य स्थाने रुद्राय गामिति विशेषः । अथाऽध्वर्युः सम्प्रैषमाह । अग्नीदौपयजानङ्गारानाहरोपयष्टरुपसीद ब्रह्मन् प्रस्थास्यामः समिधमाधायाग्नीदग्नीन्त्सकृत्सकृत्संमृड्ढीति । अयमुपयाजप्रैष इत्युच्यते ॥

१०९ तत आग्नीध्रः शामित्राग्निसकाशादङ्गारानादाय होतुः पुरस्तादासादयति । प्रतिप्रस्थाता गुदतृतीयभागं वसाहोमहवनीं चादाय होतुरुत्तरपार्श्वे उपविश्य गुदं प्रत्यनुयाजमनुयाजप्रचारकाले स्वधितिनाऽसंभिन्दन् प्रच्छिद्य वसाहोमहवन्या अपर्यावृत्य जुहोति । अध्वर्युः पृषदाज्यग्रहणीस्थं समस्तं पृषदाज्यं विहृत्य जुह्वां समानीय पृषदाज्यग्रहणीमुपभृत्स्थाने धृत्वाऽत्याक्रम्याश्राव्य प्रत्याश्रावितमाह । देवेभ्यः प्रेष्येति । वषट्कारसमकालं अध्वर्युः पृषदाज्यं जुहोति प्रतिप्रस्थाता गुदखण्डं समुद्रं गच्छ स्वाहेति मन्त्रेण जुहोति । देवाय बर्हिष इदमिति समुद्रायेदमिति च त्यागानन्तरं बर्हिषोऽहमित्यादि प्रकृतिवदनुमन्त्रणं च यजमानस्य । अध्वर्युर्द्वितीयादिष्वनुयाजेषु मैत्रावरुणं प्रतिप्रेष्येत्येव प्रेष्यति । ऊर्जादिषु बर्हिर्वर्जेष्वनुयाजेषु प्रयास्त्वा सह यजेति वदति । प्रतिप्रस्थाता द्वितीयादिष्वनुयाजेषु

Digitized by Google

अन्तरिक्षं गच्छ स्वाहेत्यादि वैश्वानरं गच्छ स्वाहेत्यन्तैर्दशभि-
र्मन्त्रैर्होतुर्वषट्कारसमकालं क्रमेण दश गुदखण्डानि प्रच्छिद्य
जुहोति। एते प्रतिप्रस्थातृकर्तृका गुदहोमा उपयाजा इत्युच्यन्ते॥
११० यजमानस्य द्वितीयादिष्वनुयाजेषु त्यागाः क्रमेण। देवीभ्यो
द्वार्भ्य इदम्० अन्तरिक्षायेदम्० प्रथमानुयाजे। देवीभ्यामुषासान-
क्ताभ्यामिदम्०। देवाय सवित्र इदम्० द्वितीये। देवीभ्यां जोष्ट्री-
भ्यामिदम्० अहोरात्राभ्यामिदम्। तृतीये। देवीभ्यामूर्जाहुति-
भ्यामिदं० मित्रावरुणाभ्यामिदम्०। चतुर्थे देवाभ्यां दैव्याभ्यां
होतृभ्यामिदम्० सोमायेदम्० पञ्चमे। देवीभ्यस्तिसृभ्यस्तिसृभ्यो
देवीभ्य इदम्० यज्ञायेदम्० षष्ठे। देवाय नराशंसायेदम्० छन्दो-
भ्य इदम्० सप्तमे। देवाय वनस्पतय इदम्० द्यावापृथिवीभ्यामि-
दम्० अष्टमे। देवाय बर्हिषे वारितीभ्य इदम्० दिव्याय नभस इद-
दम्० नवमे। देवायाग्नये स्विष्टकृत इदम्० अग्नये वैश्वानरा-
येदम्०। दशमे। इति द्वितीयादिषु दशसु त्यागा एते। अथा-
नुमन्त्रणानि क्रमेण प्रथमादीनामेकादशानामनुयाजानाम्।
बर्हिषोऽहन्देवयज्यया प्रजावान् भूयासम्। द्वारामहन्देव० प्रजा-
वा०। उषासानक्तयोरहम्०। जोष्ट्र्योरहम्०। ऊर्जाहुत्योरहं०।
पशुमान्०। दैव्ययोर्होत्रोरहम्०। तिसृणां तिसृणामहम्० नरा-
शंसस्याहन्देवयज्यया०। वनस्पतेरहम्० आयुष्मान्०। बर्हिषो-
वारितीनामहं० प्रजावान्०। अग्नेः स्विष्टकृतोऽहं० आयुष्मान् यज्ञेन
प्रतिष्ठां गमेयम्। ततः प्रतिप्रस्थाता बर्हिषि हस्तौ निमार्ष्टि अद्-
भ्यस्त्वौषधीभ्य इत्यादि मन्त्रेण। तनूत्वचमित्यादि मन्त्रेण।
तनूत्वचमित्यादि मन्त्रेण यजमान औपयजिकं धूममन्वीक्षते।
अध्वर्युरुदङ्ङुत्याक्रम्य जुह्वां स्रुवमवधायोत्तरवेदेः पुरस्तात्प्रत्य-

ह्मसुखास्तिष्ठन् दिवन्ते धूमो गच्छत्वित्यादि मन्त्रेण जुहोति । यजमानः आयुष इदमिति त्यागं पठति । अयं स्वरुहोम इत्युच्यते ॥
१११ अध्वर्युर्यथायतनं स्रुचो सादयित्वा वाजवतीभ्यां स्रुगव्यूहने उपभृदनन्तरं तेनैव मन्त्रेण पृषदाज्यग्रहणीं व्यूहति । सूक्तवाकाम्ने जुहोति पदस्य स्थाने प्रष्येति वदति । उज्ज्ञानिवापने आज्यभागानन्तरं इन्द्राग्नियोरहू० । वनस्पतेरहू० । देवानामाज्यपानामित्यादि प्रकृतिवत् । प्रस्तरेण सह आसादविधं प्रहरति । अग्नीदित्यादि संस्रावहोमान्तं प्रकृतिवत् । उत्करे स्रुचो विमुञ्चति । तन्मन्त्रे अमित्यादीनां द्विवचनानां स्थाने व इत्यादीनां बहुवचनानामूहः । पृषदाज्यग्रहण्यास्तृतीयत्वात् । प्रदक्षिणमावृत्य प्रत्यङ्ङुदेत्य सोमं त्वष्टारं चाज्यस्थाल्याज्येन चतुर्गृहीतेनेष्ट्वा जुह्वामुपस्तीर्य जाघन्या अलोमप्रदेशात् द्विरवदायाभिघार्य देवानां पत्नीः पूर्ववद्यजति । पुनर्जुह्वामुपस्तीर्य जाघन्या अधोभागात् द्विरवदायाभिघार्याग्निं गृहपतिं यजति । अथैते चत्वारः एव पत्नीसंयाजा भवन्ति । अन्तिमयोर्द्वयोर्होमद्रव्ये प्रकृत्यपेक्षया विशेषः प्रदर्शित एव । होतुर्हस्ते उपस्तीर्य जाघन्या अलोमप्रदेशात् द्विरवदाय दत्वाऽभिघार्य प्रकृतिवदिडामन्वारभते । इडोपह्वानानन्तरमग्नीधे जाघन्या अधोभागादेव षडवत्तं प्रकृतिवद्दत्वा स्रुचि चतुर्गृहीतं गृहीत्वा ऽन्वाहार्यपचने प्रकृतिवत्प्रायश्चित्तं हुत्वा पत्नीव्रतं विसर्ज्य प्राक्रेत्य ध्रुवामाप्याय्य दर्शपूर्णमासोक्तप्रायश्चित्तानि हुत्वा वस्त्रघातून् समज्य प्रहृत्य दक्षिणेन पदा वेदिमाक्रम्य तिष्ठन् ध्रुवाज्यात्स्रुवेणोपहत्य जुहोति यज्ञ यज्ञं गच्छेत्यादिमन्त्रेण । यज्ञायेदमिति यजमानस्य त्यागः । पुनस्तथैव जुहोति यज्ञते

यज्ञ इत्यादिमन्त्रेण । यज्ञपतय इदमिति यजमानस्य त्यागः । ततः स्रुवं निधाय ध्रुवामादाय प्रकृतिवत्समिष्टयजुर्जुहोति । ततो यजमानो विष्णुक्रमादिव्रतविसर्गान्तं प्रकृतिवत्करोति । ततोऽध्वर्युः स्फ्यमुदपात्रं हृदयशूलं चादाय एहि यजमानेति यजमानमामन्त्र्य पत्न्या सर्वैर्ऋत्विग्भिश्च सहान्तरेण चात्वालोत्करावुदङ्ङुपनिष्क्रामति । अध्वर्युरग्रेण स्फ्येनोद्धृत्यावोक्ष्य शुष्कार्द्रयोः सन्धौ हृदयशूलमुपगूहति । सर्वे शुगसि तमभिशोचेत्यादिमन्त्रं पठन्ति इदं हृदयशूलोपगूहनमुच्यते ॥

११२ अध्वर्युर्हृदयशूलं धाम्नो धाम्नो राजन्नित्यादि मन्त्रेण प्रोक्षति । यजमानोऽञ्जलिना ऽपो गृह्णाति सुमित्रान आप ओषधय इत्यादि मन्त्रेण । ता अपो नैर्ऋत्यां दिशि दुर्मित्रास्तस्मै भूयासुरित्यादि मन्त्रेण प्रक्षिपति । सर्वे अप उपस्पृश्य हृदयशूलमनवेक्षमाणा आगच्छन्तः सन्तोऽर्धपथे आर्द्राः सपलाशास्तिस्रस्तिस्रः समिध आददते । प्रत्येकादाने एधोस्येधिषीमहीतिमन्त्रः । आगत्याहवनीये यद्वृक्रमेण समिधोऽभ्यादधति । तत्र तिसृणां समिधामाधाने प्रत्येकं क्रमेण समिदसि स्वाहा तेजोसि स्वाहा तेजो मयि धेहि स्वाहेति त्रयो मन्त्राः । ततः सर्वे अपो अन्वचारिषमित्यृचा आहवनीयमुपतिष्ठन्ते । औपयाजिके ऽग्नो वेद्यां स्तीर्णं बर्हिरुपोषति यत्कुसीदमित्यादि भवामीत्यन्तेन मन्त्रेण । इदं बर्हिरुपोषणमुच्यते ॥

११३ ततो यजमानो व्रीहिसक्तून् यवसक्तून् वा अपूर्वाज्येनोपस्तीर्णाभिघारितान् बर्हिषा प्रदीप्ते आहवनीये अञ्जलिना विश्वतोपवीत्यादिमन्त्रेण जुहोति । अग्नय इदमिति त्यागः हस्तौ

परस्परं संघृष्याश्वादेवत्यादिमन्त्रं पठन् लेपमपनयति । अयं पांशुकसक्तुहोम इत्युच्यते ॥

११४ यान्यपामित्यादिमन्त्रेण पूर्ववत् द्वितीयं जुहोति । जीवेभ्य-इदमिति त्यागः । पूर्ववन्मन्त्रेण हस्तलेपमपनयति । अनृणा-अस्मिन्नित्यादि मन्त्रेण तृतीयं जुहोति । अग्नय इदमिति त्यागः । हस्तलेपनिनयनं समन्त्रकं पूर्ववत् । वेद्यां तिष्ठन्नु-त्तरवेद्यग्निमुपतिष्ठते अयं नोनभेत्यादिमन्त्रेण इदमुत्तरवेद्यग्न्यु-पस्थानमुच्यते ॥

११५ सत्वं नोनभेत्यादि मन्त्रेण वायुमुपतिष्ठते । इदं वायूपस्थान-मित्युच्यते ॥

११६ देवसंस्फायनेत्यादिमन्त्रेणादित्यमुतिष्ठते । इदं पांशुकादित्यो-पस्थानमित्युच्यते ॥

११७ आशासान इत्यादि यजमानाय तिष्ठेत्यन्तेन मन्त्रेण यूपमुपति-ष्ठते । इदमन्तिमयूपोपस्थानमित्युच्यते ॥

११८ बर्हिरुपोषणप्रभृत्येतावत्पर्यन्तं कर्माध्वर्युर्यजमानो वा करोति । समारोपणपक्षे पत्नीयजमानाभ्यामन्वारब्धोऽध्वर्युः उत्तरवे-द्यग्निं अयन्त इत्यादिमन्त्रेण समिधि समारोपयति । तां समिधं आजुह्वान इत्यादि सीदतेत्यन्तेन मन्त्रेण शालामुखीये ऽभ्याद्धाति । उद्बुध्यस्वाग्ने प्रतीत्यृचा पयस्वतीरित्यादि यजुषा च शालामुखीयं ज्वलयित्वा ऽपूर्वाज्यं स्रुचि चतुर्गृहीतं गृहीत्वा सप्तमे अग्न इत्यृचा पूर्णाहुतिं जुहोति । सप्तवते ऽग्नय इदमिति यजमानस्य त्यागः । यजमानोऽध्वर्यवे गां वरं ददाति । ततो यज्ञो बभूवेत्यादि ब्राह्मणतर्पणान्तं प्रकृतिवत् । अथ समारो-पणपक्षे ऽग्नीन् समारोप्याग्निहोत्रशालां गत्वा मथित्वा विहृत्य

मनस्वतीं हुत्वा होमकाले उपस्थिते सत्यग्निहोत्रहोमं करोति। बोधायनसूत्रानुसारेण यजमानपत्नीप्रतिप्रस्थात्रध्वर्य्वग्नीध्राणां पाशुकसम्बन्धिकर्माणि प्रतिपादितानि । अथाश्वलायनसूत्रानुसारेण होतृमैत्रावरुणयोः कर्माणि प्रतिपाद्यन्ते। तत्र पश्वनुष्ठानात्पूर्वं आग्नेयी आग्नावैष्णवीतीष्टिद्वयम् । अनयोरन्यतरा वा । अथवा कापि न । इति पक्षत्रयम् । एवं पश्वनुष्ठानानन्तरमपि पक्षत्रयम् । तत्राग्नेयीष्टौ अग्निर्मूर्धा दिवः ककुदित्यग्नेः पुरोनुवाक्या । भुवो यज्ञस्य रजसश्चनेतेति याज्या । अन्यत्सर्वं प्रकृतिवत् । इयं पाशुकाग्नेयेष्टिरित्युच्यते ॥

११९ आग्नावैष्णव्यामिष्टौ अग्नाविष्णू सजोषसेत्यग्नाविष्ण्वोः पुरोनुवाक्या अग्नाविष्णू महितधाम प्रियं वामिति याज्या । अन्यत्सर्वं प्रकृतिवत्। अनयो रिष्ट्योः संस्थाजपो नास्ति इयं पाशुकाग्नावैष्णवेष्टिरुच्यते ॥

१२० यूपायाज्यमानायानुब्रूहीति प्रेषितो होता पाशुबन्धिक्या वेदेः पश्चात् मन्त्रेण निरसनोपवेशने कृत्वा यूपाञ्जनीया ऋचोऽन्वाह। आदौ सामिधेनीवद्धिंकृत्य अञ्जन्ति त्वामध्वरे देवयन्त इत्यृचं त्रिवारमनुब्रूयात् । तृतीये वचने अर्धर्चमुक्त्वा प्रेषान्तरश्रवणपर्यन्तं विरमेत् । यूपायोच्छ्रीयमाणायानुब्रूहीति प्रेषितो द्वितीयार्धर्चान्तिमप्रणवान्तेनोच्छ्रयस्व वनस्पते इत्यृचं सन्धाय तदन्तिमप्रणवेन समिद्धस्य श्रयमाणः पुरस्तादित्यृचं तत उत्तरीत्येव ऊर्ध्वऊषुणऊतयइति द्वे ऋचो ततो जातो जायते सुदिनत्वे अह्नामित्यृचं सन्धाय तस्या अर्धर्चे प्रेषान्तरश्रवणपर्यन्तं विरमेत् । ततो यूपाय परिवीयमाणायानुब्रूहीति प्रेषितो ऽवशिष्टार्धर्चप्रणवान्तेन युवासुवासाः परिवीतआगादि-

तृचं परिधानीयां त्रिवारमनुब्रूयात् । समस्तव्याहृतिमन्त्रेण वाग्विसर्गः । इदं यूपाञ्जनीयानुवचनमित्युच्यते ॥

१२१ ततश्चातुर्मास्योक्तरीत्याऽग्निमन्थनम् । पूर्वोक्ता ऋचो यूपाञ्जनाय हिता इति व्युत्पत्त्या यूपाञ्जनीया इत्युच्यन्ते ॥

१२२ अग्नये समिध्यमानायानुब्रूहीति प्रेषितः पृथुपाजा अमर्त्य इति द्वे धाय्यासंज्ञके ऋचौ अधिके कृत्वा वेदिश्रोण्योत्तरया पार्ष्णी समां निधाय स्थित्वा सप्तदश सामिधेनीरनुब्रूयात् । आज्यभागदेवतानामावाहनानन्तरं इन्द्राग्नी आऽवह । इति विशेषः । वनस्पतिमाऽवह । इति विशेषः । सम्मार्गैः सम्मृज्याप उपस्पृश्य प्रवृत्ताहुतीर्जुहोति प्रत्यगुदगाहवनीयादवस्थायाज्यस्थाल्याः स्रुवेणाज्यमादाय जुहोति । तत्र मन्त्राः । जुष्टो वाचे भूयासं जुष्टो वाचस्पतये देवि वाक् यद्वाचो मधुमत्तमं तस्मिन्माधाः सरस्वत्यै वाचे स्वाहा । पुनः स्रुवेणाज्यमादाय पञ्चाहुतीर्विग्राहं जुहोति । स्वाहा वाचे । स्वाहा वाचस्पतये । स्वाहा सरस्वत्यै स्वाहा सरस्वते । महोभ्यः संमहोभ्यः स्वाहा । वाच इदमिति त्यागः प्रथमे । द्वितीयादिषु यथालिङ्गं यजमानस्य त्यागः । एताः षडाहुतयः प्रवृत्ताहुतय इत्युच्यन्ते ॥

१२३ प्रवृत्ताहुतिहोमानन्तरं प्रशास्तस्तीर्थेन प्रपद्यस्वेति मैत्रावरुणं प्रत्याह । ततः प्रशास्ता तीर्थेन प्रपद्यते । होता प्राङ्मुखः प्रशास्त्रे दण्डं प्रददाति दक्षिणोत्तराभ्यां पाणिभ्यां मित्रावरुणयोस्त्वा बाहुभ्यां प्रशास्त्रोः प्रशिषा प्रयच्छामि इति मन्त्रेण । ततः प्रशास्ता मित्रावरुणयोस्त्वा बाहुभ्यां प्रशास्त्रोः प्रतिगृह्णाम्यक्रो विधुरो भूयास मिति दण्डं प्रतिगृह्णाति । इदं कर्म मैत्रावरुणदण्डप्रदानमित्युच्यते ॥

१२४ प्रशास्ता दण्डं प्रतिगृह्योत्तरेण होतारमतिव्रजेद्दक्षिणेन दण्डं हरेन्नचानेन कञ्चिदपि संस्पृशेत् आप्रेषवचनात् । होतृवदनात् दक्षिणतः प्रह्वो। वस्थाय वेद्यां दण्डमवष्टभ्य ब्रूयात् । प्रैषांश्चा-देशमनुवाक्यां च सप्रैषे पूर्वा प्रैषात् । पर्यग्निस्तोकमनोतीर्न्नीय-मानसूक्तानि च सोमे । उपविश्यान्यत्पठेत् । अध्वर्युणा समिद्भ्यः प्रेष्येति प्रेषितः सन् आह । होतायक्षदग्निं समिधासुषमिधा-समिद्धं नाभापृथिव्याः सङ्गथेवामस्य वर्ष्मन् दिवइडस्पदेवेत्वा-ज्यस्य होतर्यज १ । १ ॥ अयं समित्प्रैष इत्युच्यते ॥

१२५ अध्वर्युणा प्रेष्येत्युक्ते आह । होतायक्षत्तनूनपातमदितेर्गर्भं भुव-नस्य गोपाम् ॥ मध्वाद्यदेवो देवेभ्यो देवयानान्यथो अनक्तु वेत्वाज्यस्य होतर्यज ॥ २ ॥ अयं तनूनपात्प्रैष इत्युच्यते ॥

१२६ प्रेष्येत्युक्ते आह । होतायक्षन्नराशंसं नृशस्तं नृप्रणेत्रम् । गोभि-र्वपावान्त्स्याद्वीरैः शक्तीवान्रथैः प्रथमयावा हिरण्यैश्चन्द्रीवे०॥ ३ ॥ अयं नराशंसप्रैष उच्यते ॥

१२७ होतायक्षदग्निमिळईळितो देवो देवां आवक्षद्दूतोहव्यवाळमूरः ॥ उपेमंयज्ञमुपेमां देवो देवहूतिमवतुवेत्वा० ॥ ४ ॥ अयमिड-प्रैषउच्यते ॥

१२८ होतायक्षद्बर्हिः सुष्टरीमोर्णम्रदाअस्मिन्यज्ञे विचप्रचप्रयतां स्वा-सस्थं देवेभ्यः ॥ एमेनदद्यवसवो रुद्रा आदित्याः सदन्तु प्रियमिन्द्रस्यास्तुवे० । ५ । अयं बर्हिःप्रैष उच्यते ॥

१२९ होतायक्षद्दुरऋष्वाः कवष्योकोषधावनीरुदाताभिर्जिहतां विप-क्षोभिश्रयतां सुप्रायणा अस्मिन्यज्ञे विश्रयन्तामृतावृधोव्यन्त्वा०॥ ६ ॥ अयं द्वारां प्रैष उच्यते ॥ (शेषमग्रे)

सटीकसंक्षेपशारीरकम् ।

(*Continued from page* 672. Vol. VI.)

मू० ॥ अपि विशिष्टविधौ वचनान्तरा-
दनुपपत्तिबलानुमितादिह ॥
विधिरशेषविशेषणगोचरो
न तु पुनस्तत एव विधानतः ॥ ५३० ॥

टी० ॥ दृष्टान्तेऽपि विशेषणं लैङ्गिकविनियोगवचित्यानुमेयश्रुतित एव सिद्ध्यति न तु विशिष्टविधिसामर्थ्यात्, अन्यतः सिद्धेर्थे विधिव्यापारान्तरकल्पनागौरवायोगादित्याह । अपि विशिष्टेति । तत्रैव विशिष्टविधावप्यनुपपत्तिबलानुमिताद्विशेषणासिद्धिं विना विशिष्टविधानानुपपत्तिकल्पिताद्वचनान्तरादशेषविशेषणगोचरो विधिः सिध्यतीत्यर्थः ॥ ५३१ ॥

मू० ॥ जन्मादिलक्षणमिदं जगतो यदुक्तं
तद्ब्रह्मणस्तदिह चिन्हतयोपदिष्टम् ॥
नास्मिन् प्रमाणमपरे पुनरेतदेव
ब्रह्मप्रमाणमनुमानमुदीरयन्ति ॥ ५३२ ॥

टी० ॥ एवं कार्यलिङ्गसंभाविताभिन्ननिमित्तचेतनकारणानुवादेन वादिप्रसिद्धकारणविलक्षणे ब्रह्मणि यतो वेत्यादिश्रुतिः पर्यवस्यतीत्युक्तम् । संप्रति उक्तमर्थमनुवदन् कार्यलिङ्गकमनुमानमेवेश्वरे प्रमाणमिति मतमनूद्य दूषयति । जन्मादिलक्षणमिति । जगतो यदिदं जन्मादि तत्कारणत्वरूपं सविर्दुष्टं ब्रह्मणो लक्षणमुक्तं तदिह ब्रह्मणि चिन्हतया परसिद्धकारणविलक्षणब्रह्मोपस्थितये उपलक्षणतयोपदिष्टं तदस्मिन् ब्रह्मणि न प्रमाणं ततः सावयवाद्यसिद्धेरित्युक्तम् । अपरे वैशेषिकादयः पुनरेतदेव वर्णितसंभावनामात्रहेतुकार्याख्यं लिङ्गमेव ब्रह्मप्रमाणमनुमानमुदीरयन्ति । क्षित्यादिकं सकर्तृकं कार्यत्वाद्घटवदिति कार्यलिङ्गकमनुमानं मानमीश्वरे वदन्तीत्यर्थः ॥ ५३३ ॥

Digitized by Google

मू० ॥ कार्यानुमानपरतन्त्रमिदं हि शास्त्रं
शास्त्रस्य नोपकरणं तदितीक्षमाणाः ॥
तद्दुर्घटं न खलु कारणमद्वितीयं
चैतन्ययुक्तमिति कार्यवशात् प्रतीमः ॥ ५३९ ॥

टी० ॥ ननूदाहृतश्रुतिप्रमुखवाक्येषु सत्सु तदर्थसंभावकतया तदु-पकरणमनुमानमेव तत्र प्रमाणमिति कथं वदन्तीत्याशङ्क्याह । कार्यानुमा-नेति । श्रुतिर्हि कार्यलिङ्गकानुमाननिर्णयतात्पर्यकतया तत्परतन्त्रेति तेषा-मभिमानः। शास्त्रस्य नोपकरणमिति। व्याप्तिपक्षधर्मतायुक्तत्वेन धूमादिलि-ङ्गवदुन्नयादौ कार्यत्वमपीश्वरे स्वतन्त्रमेव प्रमाणं न तु तत् प्रमाणश्रुतेरुपक-रणमित्यर्थः । दूषयति । तद्दुर्घटमिति । कुतस्तत्राह । न खल्विति । श्रुतिः खल्वद्वितीयं सर्वज्ञं जगत्कारणं प्रतिपादयति । न हि तत् कथमपि कार्य-लिङ्गवशाद् वयमवगच्छामः । तस्य तत्रासमर्थत्वादिति भावः ॥ ५३९ ॥

मू० ॥ वेदान्तवाक्यमिह येन पथा प्रवृत्तं
लोकप्रसिद्धपदशक्तिमुपाददानम् ॥
विश्वोद्भवस्थितिलयप्रकृतौ निमित्ते
सच्चित्सुखात्मनि परात्मनि नैवमन्यत् ॥ ५४० ॥

टी० ॥ ननु कार्यलिङ्गतोऽपि लाघवाद् विश्वकर्तर्येकस्मिन् सिद्धे तत्सार्वज्ञ्यमप्यधिकरणसिद्धान्ततया सिद्ध्यति । अद्वितीयत्वं तु स्वोपजीव्या-नुमानविरोधाच्छ्रुत्याऽपि न स्पृश्यत इति कथं कार्यवशान्नेश्वरं प्रतीम इत्युक्तं तत्राह । वेदान्तवाक्यमिति । न हि कार्यलिङ्गमनुमानं वेदान्तैः शक्तिनिर्णयायापेक्ष्यते। प्रागुक्तन्यायेन लोकत एव तत्सिद्धेः । नापि तात्पर्य-निश्चयाय। तस्याप्युपक्रमोपसंहारादिपरामर्शादेव सिद्धेः। अतः कथमपि तन्न वेदान्तोपजीव्यम् । कार्यलिङ्गतोऽपि जगत्कर्त्रैकत्वासिद्धेरुक्तत्वाच्च तत्सार्वज्ञ्यं सिद्ध्यति ततस्तदेकत्वसिद्धावपीश्वरस्य नित्यकृतिपक्षे तदनुपयोगाज्ज्ञान-मेव न सिध्येत् कुतः सार्वज्ञ्यं कृतेर्ज्ञानसमानाश्रयत्वनियमेन तत्सिद्धौ च तद्ध-

मित्यदुःखादिकमपि प्रसज्येत ततो नानुमानादीश्वरसिद्ध्याशा कर्तव्या । किंच वेदान्तवाक्यं सृष्ट्यादिकारणानुवादेन लोकप्रसिद्धपदशक्त्यनुसारिलक्षणमार्गेण तत्सच्चित्सुखात्मकमद्वयं प्रत्यगभिन्नमिति प्रतिपादयति । न चैवमनुमानं किमपि साधयितुं शक्नोतीति श्रुतिरेव तत्र प्रमाणं नान्यदनुमानम् । तथा च श्रुतिः, नैषा तर्केण मतिरापनेयेत्याशयेनोक्तम् । येन यथेत्यादिना ॥ ५४० ॥

मू० ॥ भङ्क्त्वा कथं चिदनुमानवशेन सिद्धे
सर्वेश्वरे कणभुगादिभिरुच्यमाने ॥
वेदान्तवाक्यमपि योज्यमतोऽनुमाने
सापेक्षतोपनिषदां यदि साहसं तत् ॥ ५४१ ॥

टी० ॥ यत्पुनरुक्तं कार्यानुमानपरतन्त्रमिदं हि शास्त्रमित्यनेन श्रुतेरनुमानसापेक्षत्वं स्वार्थप्रतिपादनमिति न तद्विरुद्धोपक्रमादिशाब्दन्यायावगताद्वयादिस्पृक्शास्त्रमिति तदप्येवं सति निरस्तं विपक्षे वेदाप्रामाण्यप्रसङ्गश्चेत्याशयेनाह । भङ्क्त्वेति । उपक्रमादिनाऽद्वये निर्णीततात्पर्यमपि वेदान्तवाक्यं कथं चिद्भङ्क्त्वा लोकवत्प्राधान्यमात्रपरत्वकल्पनेन स्वार्थात्प्रच्याव्यानुमानसिद्धे कणभुगादिभिरुच्यमाने सद्वितीये सर्वेश्वरे विषये योज्यमतोऽनुमानसापेक्षतैवोपनिषदामिति यदि तत्साहसम्, तथात्वे वेदान्तानामप्रामाण्यप्रसङ्गादित्यर्थः ॥ ५४१ ॥

मू० ॥ निष्कारणं श्रुतिशिरोवचनस्य भङ्गं
ये वर्णयन्ति सहसा स्वमनोरथेन ॥
दीप्तस्य दावदहनस्य न ते किमर्थं
ज्वालां पिबन्ति कथनीयमिदं बहुज्ञैः ॥ ५४२ ॥

टी० ॥ साहसमित्येतदेव प्रकटयति । निष्कारणमिति । श्रुतिसिद्धाद्वये बाधकाभावेऽपि तस्यार्थे निष्कारणं एवेत्यर्थः । यदि श्रुतिसिद्धमर्थमबाधितमपि स्वाभ्युपगतसिद्धान्तानुरोधेन त्यक्त्वा तस्यार्थान्तरं

दर्शयन्ति । तेषां तदन्यथाभावकृतं किमपि नेति वक्तुमशक्यत्वादपि दीपकां कथं न ते पिबेयुरत्र बहुभिर्वैशेषिकैः कारणं किं चिद्भुक्तव्यमिति ॥ ५४२ ॥

मू० ॥ ननु सच्चिदादिवपुषो जगतः
प्रकृतित्वबोधनमकारककम् ॥
परमात्मनो न हि पदार्थयुजा
रहितेह संभवति योग्यतया ॥ ५४३ ॥

टी० ॥ ननु श्रुतिरपि जगत्प्रकृतित्वेन सच्चित्सुखात्मकं ब्रह्म कथं प्रतिपादयेत्तस्य तदसंभवादिति शङ्कते । नन्विति । अकारककं प्रमाणरूप-कारणशून्यम् । न च शब्दप्रमाणमेव तत्कारकमित्याह । न हीति । उक्तरूपे परमात्मनि योग्यतया रहिता पदार्थयुक् सृष्टिकारणत्वपदार्थानां संबन्धो न हि संभवतीति भावः ॥ ५४३ ॥

मू० ॥ उपादानता सच्चिदानन्दमूर्ते-
र्विरुद्धा जडेष्वेव सा दृश्यते हि ॥
विरुद्धैः पदार्थैर्न वाक्यार्थसिद्धि-
र्न खल्वग्निनोक्षेदितीहान्वयोऽस्ति ॥ ५४४ ॥

टी० ॥ तस्य तदयोग्यत्वमेव विवृणोति । उपादानतेति । विरोध-मेवाह । जडेष्वेवेति । यज्जडं मृदादि तदेवोपादानं दृश्यत इति चेतन-स्योपादानत्वं विरुद्धमित्यर्थः । तद्विरोधप्रतिपादनफलमाह । विरुद्धैरिति । तत्र दृष्टान्तो न खल्विति । उक्षेत् सिञ्चेत् ॥ ५४४ ॥

मू० ॥ उपादानता चेतनस्यापि दृष्टा
यथा स्वप्नसर्गे विचित्रे प्रतीचः ॥
यथा चोर्णनाभस्य तूपेषु पुंसां
यथा केशलोमादिसृष्टौ च दृष्टा ॥ ५४५ ॥

टी० ॥ किं चेतनस्य द्रव्योपादानत्वं विरुद्धमुतोपादानत्वमात्रम् । नोभयमपि । सिद्धान्ते हि विकारोधिष्ठानत्वमेवोपादानत्वम् । तच्च मृदादिव-

मित्यचेतनस्यापि घटादिकं प्रत्यक्षमेव। एवं गुणवादे स्वाभाव्यारोपेऽपि चेतनस्य द्रव्योपादानत्वम् । तथा स्वस्य चात्मनो विविधप्रपञ्चोपादानत्वं प्रतीत्यनुरोधेन वक्तव्यमित्याशयेनोपसंहरति । उपादानता चेतनस्येति । सिद्धान्ते समुच्चयासंभवादपि व्यवस्थापये। मृदादेरपि घटादिपरिणाममाश्रित्य तत्समुच्चयमाहो वा । एवं परिणामवादेऽपि नायं नियम इत्यभिप्रेत्य दृष्टान्तान्तरमाह । यथा चेति । ऊर्णनाभो लूताकीटस्तस्योपादानता दृष्टेत्यनुषङ्गः । ननु तत्सूत्रं लालाख्यपरिणाम एव सा च न चेतनेत्यरुचेस्तत्रान्यं दृष्टान्तमाह । पुंसश्चेति । जीवानामित्यर्थः । ननु जीवच्छरीरस्यैव केशलोमाद्युपादानत्वं न तु जीवस्येति चेन्न । मृतशरीरे केशादिवृद्ध्यदर्शनेन परस्परं तादात्म्येनाध्यस्तयोरप्यविविक्तयोरेव तदुपादानत्वात् । अत एव श्रुतिः । यथोर्णनाभिः सृजते गृह्णते च यथा पृथिव्यामोषधयः संभवन्ति यथा सतः पुरुषात् केशलोमानि तथाक्षरात् संभवतीह विश्वमिति दृष्टान्तेन ब्रह्मणः प्रपञ्चोपादानत्वमाहेति ॥ ५४५ ॥

मू० । बुद्ध्यादिकार्यस्यापि चेतनोऽयं
भवेदुपादानमितीष्यते च ।
आत्मा गुणी ते च गुणाः प्रसिद्धा
गुणी गुणानां प्रकृतिश्च सिद्धा ॥ ५४६ ॥

टी० । वैशेषिकादीनामपि यदुपादानं तज्जडमेवेति न नियमो बुद्ध्याद्युपादाने चेतने व्यभिचारात् । न च द्रव्योपादानस्यैव तथात्वनियम इति वाच्यम् । गुणोपादानेष्वपि पृथिव्याद्यष्टसु चेतनत्वादर्शनादात्मनो गुणोपादानत्वमपि न स्यात् । न चानुभवाच्चेतनस्यापि गुणोपादानत्वमिति वाच्यम् । घटादावपि सत्तास्फूर्त्यनुभवात्सतश्चेतनस्य तदभ्युपगम्यताम् । न च तत्र सत्तास्फूर्त्योस्तदुपादानादन्यता संभवति । न च घटः सन्निति सत्तादात्म्यानुभवो वैशेषिककल्पितसत्ताजातिविषयः । तज्जातौ मानाभावात् । न च सदनुगतधीरेव तन्मानम् । तस्याः सत्त्वसंबन्धमात्रविषयतया मृद्घट इतिवद्धर्मिविषयत्वेनाप्युपपत्तेर्न धर्मसाधकत्वम् । न च घटनिष्ठत्वेन प्रतीतेः

सा धर्मः । तस्या बाधायोग्यत्वरूपाया घटेऽवृत्तेः । न हि घटस्याबाध्यत्वे मानमस्ति । तस्मात् कालत्रयाबाध्यश्चिदात्मैव सर्वत्रोपादानतयाऽनुस्यूतः सद्बुद्धिविषयः । जाड्यबुद्धिस्त्वविद्याकृतेति द्रष्टव्यम् । एवं श्रुतिबलादपि चेतनस्य तव मते बुद्ध्याद्युपादानतावद्वियदाद्युपादानत्वमविरुद्धमित्याशयेनाह । बुद्ध्यादिकार्येष्वपीति । आदिशब्देनेच्छादिर्गृह्यते । दृश्यते परैरिति शेषः । तेषामङ्गीकारमेवोपपत्तिपूर्वकमाह । आत्मेति । ते बुद्ध्यादयः । ततः किं तत्राह । गुणीति । अनित्यगुणाश्रय इत्यर्थः । अन्यथा गुणगुणिभावो बुद्ध्यादेरात्मनश्च न स्यादितिभावः ॥ ५४६ ॥

मू० ॥ आकाङ्क्षादिर्विद्यते योग्यतान्ता
यस्मादस्मिन्नागमे जायमाने
सामग्री या वैदिकैरस्य दृष्टा
तस्माद् युक्ता योनिता चेतनस्य ॥ ५४७ ॥

टी० ॥ एवमात्मनोऽपि द्रव्योपादानत्वं दृष्टान्तत उपपाद्य तत्र यदुक्तं पूर्ववादिना चेतनो द्रव्योपादानमिति वाक्यं योग्यताविरहाच्च बोधकमिति तदेवं सति न युक्तमित्याह । आकाङ्क्षादिरिति । योग्यता अन्ते यस्या आकाङ्क्षादित्रय्याः । आकाङ्क्षा आदिर्यस्या योग्यतान्तायाः सा तथा । अस्मिन्निति बुद्धिस्थं ब्रह्म प्रपञ्चोपादानमिति ज्ञानं परामृशति । अन्यत्रागमाद्वाक्याज्जायमाने ज्ञाने वैदिकैर्मीमांसकैर्लौकिकैश्च या सामग्री दृष्टा आकाङ्क्षादियोग्यतान्ता सा अस्मिन् जनयितव्ये यतो वा इत्यादिपदानामपि यस्माद्विद्यते तस्माद्युक्ताऽस्य चेतनस्य योनितेति संबन्धः । उक्तरीत्या चेतनस्य द्रव्योपादानत्वे बाधकाभावात्तत्प्रतिपादकवाक्यस्य सहकारिभूता आकाङ्क्षासंनिधानयोग्यताः सन्तीति ब्रह्मणस्तत् सिद्ध्यतीति भावः ॥५४७॥

मू० ॥ तस्मादेतल्लक्षणं चिन्हमाहु-
र्नैतत्तस्मिन् ब्रह्मणि स्यात् प्रमाणम् ॥
आम्नायस्य स्वप्रधानत्वहेतो-
र्लिङ्गस्यास्मिन् शेषभावाच्च नित्यम् ॥ ५४८ ॥

टी० ॥ एवं सृष्टिवाक्यैर्ब्रह्मणोऽभिन्ननिमित्तोपादानत्वं यदुक्तं तत्तस्य चिन्हमेव न तु तस्मिन् प्रमाणं प्रमाणं तु तत्र स्वतःप्रमाणवेदान्तवाक्यमेव, कार्यलिङ्गमपि तदर्थोपपादकतया तत्साहाय्यमाचरंस्तत्र तर्कभावं प्राप्नोतीति स्वाभिमतमुपसंहरति । तस्मादेतदिति । स्पष्टम् ॥ ५४८ ॥

मू० ॥ इत्थं जगत्कारणवादिवाक्यं
समन्वितं ब्रह्मणि तत्पदार्थे ॥
तल्लक्षणं तस्य तटस्थभूत-
मानन्त्यसिद्धै कथयद् यथोक्तम् ॥ ५४९ ॥

टी० ॥ एवं सृष्टिवाक्यस्य ब्रह्मणि तत्त्वमसिवाक्यस्थतत्पदार्थे निरूपिते परमप्रकृतं समन्वयमुपसंहरति । इत्थमिति । जगत्कारणवादिवाक्यं तस्य ब्रह्मणः सजातीयादिपरिच्छेदराहित्यरूपानन्त्यसिद्धै तटस्थभूतं कल्पितया तत्स्वरूपात् पृथग्भूतं यथोक्तमभिन्ननिमित्तोपादानत्वरूपं तल्लक्षणं कथयत् तत्पदार्थे ब्रह्मणीत्थं समन्वितमिति संबन्धः ॥ ५४९ ॥

मू० ॥ स्वात्मानमेव जगतः प्रकृतिं यदेकं
सर्गे विवर्तयति तच्च निमित्तभूतम् ॥
कर्माकलय्य रमणीयकपूयमिश्रं
पश्यन् नृणां परिवृढं तदितीयमाणम् ॥ ५५० ॥

टी० ॥ ननु ब्रह्मैकमेवोपादानं निमित्तं च चेत् कथमस्य प्रपञ्चस्य क्रमेण सृष्टिर्वैचित्र्यं वा वैषम्यं नैर्घृण्यं वा भगवतः कथं न प्रसज्येतेत्याशङ्क्योपादानकर्त्रोरेव श्रुतिबलादेकत्वमवगच्छामो न तु सृज्यमानप्राणिनां विचित्रं कर्म तद्वासनास्तेषां भोगवासना वा नेति वदाम इति तदभिव्यक्तिक्रमवैचित्र्याभ्यामेव क्रमवद्विचित्रसृष्टिरुपपन्ना । अत एवेश्वरस्य न वैषम्यादिकमपि । तथा च श्रुतिः । तद्य इह रमणीयचरणा रमणीयां योनिमापद्येरन् कपूयचरणाः कपूयां योनिमित्याद्यां विचित्रां संसारगतिमनुवदतीत्याशयेनाह । स्वात्मानमिति । यत्तदितीयमाणं तत्त्वमसि वाक्ये तत्प-

दोषात्तं प्रसिद्धं यत्तत् तत् कृष्णं रमणीयं पुण्यं कपूयं पापं मिश्रं मिलितं यदुभयं कर्म बाह्यकारणात् सर्गे कर्तव्ये तत्र निमित्तभूतमात्मन्यध्यस्तमिदं विचित्रसर्गनिमित्तमिति निश्चित्य एकमपि सन्तः स्फुरितं स्वात्मानमेव विवर्तयति वस्तुतोऽन्यथाभावमापादयतीति संबन्धः । एवं सृज्यमानप्राणिकर्मवशाच्चोक्तदोषतुषोऽपीति भावः । एवं सृष्टिवाक्यानां तटस्थब्रह्मलक्षणानुवादद्वारा तत्पदलक्ष्ये ब्रह्मणि समन्वयो निरूपितः । ततः स्वरूपलक्षणमपि सत्यं ज्ञानमनन्तं ब्रह्मेत्यादिवाक्यसिद्धं यत इति यच्छब्दप्रकृत्यंशेन चेतनानुवादेनाखण्डज्ञप्तिमात्रमित्यर्थाद्दर्शितमिति द्वितीयसूत्रेण लक्षणद्वयमपि सिद्धम् ॥ ५५० ॥

मू० ॥ पदवृत्तिसमन्वयावुभौ
प्रतिपाद्यौ प्रथमे हि लक्षणे ।
तदवान्तरवाक्यवर्त्मना
पदवृत्तिः प्रथमं प्रकीर्तिता ॥ ५५१ ॥

टी० ॥ ननु समन्वयसूत्रेणैव वेदान्तवाक्यानां ब्रह्मणि समन्वयो विचारित इति किमनेन सूत्रेणापि तन्निरूपणेनेत्याशङ्क्य तेन तत्त्वमस्यादिसमस्तवाक्यानां ब्रह्मतात्पर्यं निरूप्य द्वितीयसूत्रे तु तत्पदवृत्तिर्निरूपितेति नैतद्व्यर्थं न हि तत्पदतात्पर्यनिश्चयं विना वाक्यार्थपरिच्छेदः संभवतीत्याशयेनाह । पदवृत्तीति । लक्षणे अध्याये । यस्मादेवं तस्मादवान्तरवाक्यवर्त्मना तत्त्वमसिवाक्यं तत्पदार्थनिष्ठं वाक्यं तदर्थकथनमार्गेण प्रथमं समन्वयविचारात्पूर्वम् ॥ ५५१ ॥

मू० ॥ आद्ये सूत्रे त्वंपदस्योदितत्वाद्
वृत्तेरस्मिंस्तत्पदस्योच्यमाना ॥
वृत्तिश्चैया तत्पदार्थेऽद्वितीये
प्रत्यग्रूपे त्वंपदस्योदितेव ॥ ५५२ ॥

टी० ॥ नन्वेवं त्वंपदस्यापि वृत्तिर्निरूपणीया स्यादन्यथा वाक्यार्थापरिच्छेदादित्याशङ्क्य प्रथमसूत्रे सा निरूपितैवेति द्वितीयसूत्रे तत्पद-

मित्येव निरूप्यत इत्याशयेनाह । आद्ये सूत्र इति । अथातो ब्रह्मजिज्ञासेति सूत्र इत्यर्थः । चास्मिन् द्वितीयसूत्र इत्यर्थः । ननु द्वितीयसूत्रे तत्पदस्य कस्मिन्नर्थे तात्पर्यं निरूप्यते प्रथमसूत्रे वा कीदृशि त्वंपदस्येत्यपेक्षायामाह । तत्पदार्थ इति । अद्वितीय इति छेदः । अद्वितीये नित्यशुद्धादिस्वरूपे ब्रह्मणि तत्पदार्थे द्वितीयेन तत्पदस्य वृत्तिर्निरूप्यते । प्रथमेन तु कर्त्रादिविलक्षणापरोक्षसाक्षिचैतन्यमात्रे त्वंपदस्य सा निरूपितेत्यर्थः ॥ ५५२ ॥

मू० ॥ अनधिकारिणि शुद्धचिदात्मके
दृगदृशोरितरेतरविभ्रमात् ॥
शमदमादिसमन्विततेष्यते
भवति तेन चितोऽप्यधिकारिता ॥ ५५३ ॥

टी० ॥ ननु प्रथमसूत्रमधिकारिणो ब्रह्मज्ञानाय श्रवणकर्तव्यतां प्रतिपादयति । न तु कस्मिंश्चिदर्थे त्वंपदवृत्तिमिति चेन्न । तत्त्वमसिवाक्येऽधिकारिणि प्रयुज्यमानं त्वंपदं तस्य ब्रह्माभेदयोग्यं रूपं दर्शयति । प्रथमसूत्रं च मुक्त्यधिकारिविषयमिति तेन तन्निरूपितमेव । ननु वैराग्यशमदमादिविशिष्टस्य मुमुक्षोर्ब्रह्मविचाराधिकारः, तस्य कथं ब्रह्माभेदयोग्यतेति चेत्, सत्यं भ्रान्त्यादिमत एवाधिकारः स च तत्त्वमसिवाक्यसामर्थ्याच्चिन्मात्रं ब्रह्मैवेति स्वतो नाधिकारी किन्त्वीदृशोऽपि तस्मिन् दृग्रूपस्यात्मनोऽदृग्रूपस्याहङ्काराद्याश्चेतरेतराध्यासात्संसारवत्तद्धर्मविवेकवैराग्यशमदमादिमत्तेष्यते तेन चिदेकरसस्याप्यधिकारिता भवतीति तद्वाक्ये त्वंपदसामर्थ्यात्सिद्ध्यति । ततश्चाधिकारिनिरूपके प्रथमसूत्रे त्वंपदस्य चिन्मात्रे वृत्तिर्निरूपितेत्याशयेनाह । अनधिकारिणीति ॥ ५५३ ॥

मू० ॥ अनधिकारितया दृगवस्थिता
स्वरसतः परमेश्वरविग्रहः ॥
घनतमःपटलावरणान्वया-
दुपगता भववाद्यधिकारिता ॥ ५५४ ॥

टी० ॥ नन्वधिकारिण एव मुक्त्यन्वयित्वात्तस्य केवलस्यैवात्मनः शमादिः श्रवणाद्यधिकारश्चेति दृगदृशोरित्याद्यनुपपन्नमिति चेत्तत्राह । अनधिकारितयेति । पूर्वोक्तन्यायेन परमेश्वरस्वरूपत्वाद्दधिकारिस्वरूपभूता दृक् स्वतोऽनधिकारितया स्थितेति प्रागुक्ताध्यासादेव तदधिकार इति भावः । ननु स्वप्रकाशदृश्यध्यास एव कथमित्याशङ्क्य तस्या अप्यज्ञानावरणस्योपपादितत्वात् स उपपन्न इत्याशयेनाह । घनतम इति ॥ ५५४ ॥

मू० ॥ अज्ञानतज्जघटना चिदधिक्रियायां
द्वारं परं भवति नाधिकृतित्वमस्याः ॥
नाचेतनस्य घटतेऽधिकृतिः कदाचित्
कर्तृत्वशक्तिविरहादिति वक्ष्यते हि ॥ ५५५ ॥

टी० ॥ नन्वेवमहङ्कारादिविशिष्टस्य श्रवणाद्यधिकारे तस्यैव मोक्षोऽपि वाच्य इति न केवलात्मनि त्वंपदवृत्तिरित्याशङ्क्य यथा देहादिद्वारा स्वर्गसाधने कर्मण्यात्मनोऽधिकारो न तु तेन विनैवमहङ्कारादिद्वारा मुक्तस्यैवात्मनोऽमुक्तताभ्रान्त्या मुक्तिसाधनेऽधिकारो न तु तेन विना न वा तस्य मुक्त्यन्वय इत्याशयेनाह । अज्ञानतज्जेति । अज्ञानतज्जाभ्यां घटना संबन्धः, चितोऽधिक्रिया तस्यां द्वारं घटकमुपाधिरिति यावत् । अस्या घटनाया अधिकाराभावे हेतुमाह । नाचेतस्येति । अचेतनत्वात्तस्या अधिकृतिर्न युज्यत इत्यर्थः । अचेतनस्यापि सा किं न स्यादित्यत आह । कर्तृत्वेति । अचेतनस्य चेतनधर्मश्रवणादिकर्तृत्वायोगाच्चेतनानधिष्ठितस्य तस्य स्वातन्त्र्येण व्यापारासंभवेन च कर्तृत्वशक्तिर्नेति साङ्ख्यनिराकरणावसरे सूत्रकृता वक्ष्यत इत्यर्थः । एवं नित्यमुक्तात्मैव स्वाध्यस्तदेहद्वयतद्धर्मवैराग्यादिसंपन्नस्तद्द्वारा ब्रह्मविचारेऽधिकारीति तन्निष्ठत्वंपदस्याद्यसूत्रे तत्र वृत्तिर्निरूपितेति भावः ॥ ५५५ ॥

मू० ॥ उपपत्तिवाक्यमधिकारिणि यत्
कथितं समन्विततया प्रथमम् ॥

इदमेव चेतसि निधाय तु तन्
मुनिना प्रकीर्तितमुदारधिया ॥ ५५६ ॥

टी० ॥ ननु शुद्धचिदात्मन एवोक्तरीत्याधिकार इति त्वंपदस्य तत्रैव वृत्तिश्चेत्तर्हि तद्विज्ञानार्थं स गुरुमेवाभिगच्छेदित्यादिश्रुत्यर्थतयोपसत्साध चतुष्टयसाधन इत्यादिनाधिकारिनिरूपणप्रस्तावे भवताऽयमर्थः कथं नोक्त इत्याशङ्क्य सूत्रार्थत्वादस्य तत्र ममायमभिप्रेत एवेत्याशयेनाह । उपसत्तिवाक्यमिति तुरवधारणे । यतो मुनिना तत् कीर्तितमेवेत्यर्थः ॥५५६॥

मू० ॥ शिष्योपसत्तिवचनानि समन्वितानि
शिष्ये चिदात्मनि परात्मनि नित्यमुक्ते ॥
इत्येतदत्र कथितं मुनिना त्वमर्थे
त्वंशब्दवृत्तिकथनाय परे प्रतीचि ॥ ५५७ ॥

टी० ॥ ननूदाहृतवाक्येऽयमर्थो न प्रतीयत इति कथं मुनिनाऽपि संकीर्तित इत्याशङ्क्योक्तन्यायसिद्धमर्थं स्मारयति । शिष्योपसत्तीति । स्पष्टम् ॥ ५५७ ॥

मू० ॥ उपसदनवचो विचारमार्गात्
त्वमितिपदस्य परात्मनीह वृत्तिम् ॥
कथयति भगवान् द्वितीयसूत्रे
तदितिपदस्य परात्मनीति भेदः ॥ ५५८ ॥

टी० ॥ एवं प्रथमद्वितीयसूत्राभ्यामद्वये प्रतीचि तत्त्वंपदवृत्तिनिरूपणसमर्थनमुपसंहरति । उपसदनेति । परात्मनि देहेन्द्रियाहंकारादिविलक्षणे साक्षिणि । इह प्रथमे सूत्रे । परात्मनि जगत्कारणेऽधिष्ठानेऽद्वितीये ॥ ५५८ ॥

आवृत्त्या वा तन्त्रवृत्त्याऽथ वेदं
सूत्रं युक्तिं वेदवाक्योपयुक्ताम् ॥

अप्याचष्टे बृंहणीमन्तरेण

स्वार्थे युक्तिं वेदवाक्यं न युङ्क्ते ॥ ५५९ ॥

टी० ॥ ननु यदि द्वितीयसूत्रं यतो वेत्यादिसृष्टिवाक्यं सूचयत्तद-र्थद्वये तत्पदवृत्तिनिरूपणपरं तर्हि तदर्थद्वयसंभावकयुक्तेरसूत्रितत्वात् कथं तत् सिद्ध्येदित्याशङ्क्य तत्सूत्रस्य मर्मोद्घाटयितुमित्याशयेनाह । वाक्यस्येति । एवं द्वितीयं सूत्रं श्लोकया वृत्त्योक्तां श्रुतिं सूचयत्यन्यया वृत्त्या जन्माद्यस्य यतः संभवतीत्यध्याहारेण च वेदवाक्यार्थनिर्णयोपयुक्तां युक्तिमपि सूचयति । अथ वा तन्त्रवृत्त्या तामाचष्टे युगपदनेकार्थविवक्षयोच्चारणं तन्त्रम् । सूत्रत्वादेवानेकार्थत्वमपि नान्याय्यमिति भावः । ननु वेदवाक्यस्यानपेक्षस्य किं युक्त्या सहायेनेत्याशङ्क्याचेतनप्रपञ्चस्य चेतनोपादानत्ववत्तत्क-र्तृभेदतत्सर्वज्ञत्वसर्वशक्तित्वादीनां लोकाप्रसिद्धानां श्रुतीनामप्युपपादकयु-क्तिमन्तरेण विपरीतन्यायबाध्यत्वशङ्कया श्रुतिमात्रादसिद्धेः साप्यपेक्षिते-त्याशयेनाऽऽह । बृंहणीमिति । स्वार्थे संभावनाहेतुं युक्तिं विना वेद-वाक्यं न युङ्क्ते न स्वार्थनिश्चायकमित्यर्थः ॥ ५५९ ॥

मू० ॥ त्वंपदार्थविषयं समन्वयं

तत्पदार्थविषयं ततः क्रमात् ॥

तस्य शेषमपरं च वर्णय-

न्नुक्तवानथ महावचोगतम् ॥ ५६० ॥

टी० ॥ ननु यदि प्रथमद्वितीयसूत्राभ्यां तत्त्वंपदवृत्ती निरूपिते समन्वयसूत्रेण च समस्तवेदान्तवाक्यतात्पर्यं तर्हि वाक्यार्थविषयत्वेन प्रधानत्वात् सूत्रकारेणापि भवत्येव तदेवादौ निरूपणीयमित्याशङ्क्य शास्त्रा-रम्भाय साधिकारिविचारविधौ प्रथमसूत्रेण निरूपिते विचार्यमाणब्रह्मल-क्षणासंभवेन तदाक्षेपे तत्समाधानार्थं द्वितीयं प्रवृत्तमिति ताभ्यां पदार्थ-द्वये सिद्धे तदुभयाभेदे वाक्यार्थे तृतीयसूत्रेण श्रुतेरपौरुषेयतया स्वतः-प्रामाण्ये सिद्धे तदाक्षेपसमाधानपरसमन्वयसूत्रावकाश इति क्रमेण मुनेः सूत्रप्रणयनं युक्तमित्यभिप्रेत्याह । त्वंपदार्थेति । समन्वयं जीवस्वरूपपर-

Digitized by Google

वाक्यानामिति शेषः । तत्पदार्थविषयं सत्यादिवाक्यानामिति शेषः । समन्वयमिति चानुषञ्जनीयम् । तस्य समन्वयस्य शेषमानुकूल्यमपेक्षवे-यत्वं महावचोगतं महावाक्यगतं समन्वयमित्यनुषङ्गः । पदार्थनिश्चयं विना वाक्यार्थावगमायोगादधिकार्यादिनिरूपणव्याजेन पदार्थद्वयनिरूपणपूर्वकं सूत्रकारो वाक्यार्थं न्यरूपयदिति सिद्ध एव क्रमः साधुरिति भावः ॥ ५६० ॥

मू० । त्वंपदस्य दृशि वृत्तिमद्वये
तत्पदस्य च निवेदयन् मुनिः ।
प्रत्यगद्वयपरं समन्वयं
शेषिणं पुनरथाब्रवीत्तयोः ॥ ५६१ ॥

टी० ॥ एवं सूत्रचतुष्टयेन तत्त्वार्थमर्थं पदद्वयवाक्यवृत्तिनिरूपण-समर्थनमुपसंहरति । त्वंपदस्येति । दृशि प्रत्यगात्मनि त्वंपदस्य वृत्तिम् । अद्वये ब्रह्मणि तत्पदस्य वृत्तिम् । मुनिर्व्यासः । अथानन्तरं तयोस्तत्त्वंपद-वृत्त्योः शेषिणं समन्वयं प्रत्यगद्वये ब्रह्मणि ऐक्यरूपेणाब्रवीत् वाक्यस्येति शेषः ॥ ५६१ ॥

मू० । शक्नोति सिद्धमवबोधयितुं च वाक्यं
शक्नोति कार्यरहितं वदितुं च वाक्यम् ।
शक्नोत्यखण्डमवबोधयितुं च वाक्यं
शक्नोति मुक्तिफलमर्पयितुं च वाक्यम् ॥ ५६२ ॥

टी० ॥ समन्वयाध्यायेऽस्मिन् प्रतिपादितमर्थमुपसंहरति । शक्नो-तीति । वाक्यं वेदान्तवाक्यं सिद्धं ब्रह्मात्मवस्तु मानान्तरनैरपेक्ष्येणाववबो-धयितुं शक्नोत्येवेत्युक्तमिति शेषः । सिद्धार्थव्युत्पत्तिसमर्थनादित्यर्थः । एव-मुत्तरत्रापि कार्यरहितं कार्यशेषत्वरहितं नियोगादिनिरासेन स्वप्रधानमेवे-त्यर्थः । अत्र पूर्वार्धेन समन्वयसूत्रवर्णकद्वयार्थः क्रमेण प्रदर्शितः । तत्फ-लमखण्डब्रह्मावबोधस्तत्फलं मुक्तिश्चोत्तरार्धेन । अर्पयितुं ज्ञानद्वारेति शेषः ॥ ५६२ ॥

मू० ॥ एतत्समन्वयनिरूपणमेवमस्मिन्
बुद्धिस्थतामुपगते सति वाक्यजन्यम् ॥
विज्ञानमद्वयगतं न ततोऽन्यदन्यं
पुंसोऽपराधकृतमित्युदियात् प्रतीचि ॥ ५६३ ॥

इति श्रीदेवेश्वरपूज्यपादशिष्यसर्वज्ञात्ममहामुनेः
कृतौ शारीरकमीमांसाभाष्यप्रकरणवार्त्तिके
संक्षेपशारीरके प्रथमोऽध्यायः ॥ १ ॥

टी० ॥ समन्वय उक्तातिरिक्तमपि किञ्चिन्निरूपणीयमस्ति किमित्याशङ्कां निवर्तयन्नेतावतैव समन्वयविषयाखिलाशङ्कानिवृत्तेर्नान्यन्निरूपणीयमित्याशयेनाह । एतदिति । ननु निर्णीतपदार्थावगमस्य वाक्यात्तदर्थावगमे लोके पृथग् न्यायो नापेक्ष्यत इत्याशङ्क्य तत्त्वमस्यादिवाक्यार्थस्यातिगहनतया वादिभिः स्वेच्छया पृथक्पृथगर्थकल्पनात्तदर्थतदाभासविवेचनाय वर्णितरूपेण समन्वयोऽपि निरूपणीय एवेत्याशयेनाह । एवमस्मिन्निति । उक्तप्रकारेणाऽस्मिन् समन्वये बुद्धिस्थे सति अद्वयब्रह्मविषयमेव विज्ञानं श्रुतिजन्यं न ततोऽप्यद्वयज्ञानादन्यच्छ्रुतिजन्यं किं तु पुंसोऽपराधकृतं पुरुषस्य वेदान्ततात्पर्याज्ञानादिदोषादुत्थितमिति प्रतीचि स्वात्मनि स्वयमेवोदियात् स्फुरेदित्यर्थः । तस्मादवश्यं समन्वयसूत्रन्यायेनाधिकारिणाखण्डैकरसे ब्रह्मणि सत्यज्ञानादिलक्षणे वेदान्तानां तात्पर्यं निरूपणीयं तच्च निःशेषं निरूपितम् । तथा च वेदान्तवाक्यरूपप्रमाणगतासंभावनानिरासेन वाक्यार्थनिर्णयः समन्वयनिरूपणफलं सिद्ध्यतीति भावः ॥ ५६३ ॥

इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीविश्वेश्वरानन्दसरस्वतीपूज्यपादशिष्यश्रीमन्मधुसूदनसरस्वतीविरचितायां संक्षेपशारीरकटीकायां
प्रथमोऽध्यायः ॥ १ ॥ ॥ शुभं भूयात् ॥

(शेषमग्रे)

काशीस्थराजकीयप्रधानपाठालयाध्यापकेन श्रीद्विवेदहरिनाथशर्मणा ॥

Digitized by Google

॥ खण्डनखण्डखाद्यम् ॥

(*Continued from page* 16. Vol. VII.)

टी० ननु प्रमाणादिसत्तैव कुतो नाभ्युपगम्यते इत्यत आह–। [a]"अन्यथे"ति। त्रिचतुरकक्षाविश्रान्तिरेव तत्रापि शरणमनवस्थाभयादित्यर्थः॥ ननु मत्पक्षे ज्ञानं स्वरूपसदेव विषयव्यवहारसमर्थं, त्वत्पक्षे स्वरूपाऽसतो ज्ञानस्य ज्ञानान्तरमेव सत्त्वमिति तज्ज्ञानसत्त्वार्थमपरापरज्ञानाऽनुसरणमवश्यमित्यनवस्थेति वैषम्यमाशङ्क्य परिहरति–। [b]"न च वाच्यम्"इति। अज्ञायमानतायां ज्ञानस्य स्वरूपसत्तापि न स्यात् "को(1)ब्रूते सती सा वित्तिः? असत्येव किं न स्यात्"–इत्यादेः स्वप्रकाशप्रस्तावे वक्ष्यमाणत्वात् न वैषम्यमित्यर्थः॥ ननु ज्ञानस्याऽसत्त्वे कथं तदधीनो व्यवहारः? अथाऽसदपि व्यवहारहेतुस्तदा सदैवासतो व्यवहारः स्यादविशेषादित्याशङ्क्याह–। [c]"यथाचे"ति॥ [d]"असत्त्वे"ति। उपपत्तिकारणमुपपादकं, कारणं च नियतप्राक्कालसदिति व्याघातः॥ कारणं (2) नियतप्राक्सदित्येव नास्ति, कुतो व्याघात इत्याह–। [e]"सदि"ति॥ ननु यद्यसत्कारणं तदैतत्कालीनोत्पत्तिको घटः पूर्वमेव कथं नोत्पन्नः? इत्याह– [f]"नन्वि"ति। एतद्(3)घटोत्पत्तिक्षणभिन्नाः क्षणा यद्येतद्घटयावत्कारणाऽधिकरणक्षणाऽव्यवहितोत्तरत्वविशिष्टाः स्युः, एतद्घटोत्पत्त्यधिकरणानि स्युरि-

---

(१) कोऽनुभवः ब्रूते=अनुभावयति यत् सत्येव सा वित्तिरिति? न कोपि, ततश्चाऽनुभावकाऽभावादसत्येव सा वित्तिः किं न स्यादिति वक्ष्यमाणग्रन्थार्थः।

(२) कारणं यत्तन्नियतप्राक्सदेव, नाऽसदित्येव नाद्यापि निर्व्यूढमिति तदादाय कथं व्याघातः स्यादित्यर्थः। यद्वा कारणं=नियतप्राक्सत्, तथा च यथा ऽसत्सदिति नास्ति तथा नियतप्राक्सदनियतप्राक्सदित्येव नास्ति कुतोऽस्मान्प्रति व्याघातः।

(३) यथाश्रुतमौलिकार्थव्याख्याने कार्यस्याऽन्यदाजन्मप्रसिद्ध्यभावादप्रसिद्धापादनं दोष इति तदुद्धाराय विशिष्टमापादनार्थमाह– एतदिति, वस्तुगत्या एतद्घटोत्पत्त्यधिकरणक्षण एवैतद्घटकारणाऽव्यवहितोत्तरत्वविशिष्टः, यदि तु एतद्घटोत्पत्तिक्षणभिन्ना अपि क्षणा एतद्घटकारणदण्डाद्यव्यवहितोत्तरत्वविशिष्टाः स्युस्तदैतद्घटोत्पत्त्यधिकरणानि स्युरित्यर्थः।

Digitized by Google

त्यापादनार्थः । यद्वा (१) एतद्घटोत्पत्तिक्षणपूर्वक्षणो यद्येतद्घटसामग्र्यव्यवहितोत्तरक्षणः स्यात् एतद्घटोत्पत्तिक्षणः स्यादित्यापाद्यम् ॥

मू० [a]न, कार्यस्या(२)ऽऽद्यक्षणे इवान्यदापि सामग्र्यसत्त्वाऽविशेषात् तथापि किं नान्यदा कार्यजन्म ।* [b]अथ न मम तदानीन्तनं सामग्र्यसत्त्वं तादनीतनस्य कार्यजन्मनो नियामकं, किंतु ततः प्राक् सामग्रीसत्त्वं, तथादर्शनात् । *, ? [c]तर्हि ममापि कालान्तरस्य(३)मपि तदसत्त्वं तदातनकार्यजन्मनो नियामकं, तथादर्शनादेव ।* [d]मम तु तदव्यवहितोत्तरत्वं तदा कार्यजन्मनो नियामकम्* ?—इति चेन्न,

टी० कार्योत्पत्तिक्षणे सामग्री त्वयापि नेष्यते प्रागभावस्य तद्घटकस्याऽभावात्, तथाच यथा सामग्रीविरहिणि तस्मिन्क्षणे कार्यं तथा क्षणान्तरेपि कथं न स्यादविशेषादित्याह—। [a]"न, कार्यस्ये"ति ॥ क्षणान्तराणां सामग्रीविनाशकत्वात् त्वया घटोत्पत्त्यधिकरणत्वमापाद्यते, तच्च तदा स्याद्यदि सामग्र्यसत्त्वं कार्योत्पत्तिनियामकमस्माभिरुक्तं भवेत्, नचैवं, किन्तु कार्य्याव्यवहितपूर्वक्षणसामग्रीसत्त्वमिति शङ्कते—। [b]"अथे"ति ॥ तस्मिन्(४)क्षणे नियमतः कार्योत्पत्तिदर्शनात् यथा पूर्वक्षणसामग्रीसत्त्वं तव नियामकं, तथा ममापि नियतकालकार्यदर्शनात् पूर्वक्षणसामग्र्यसत्त्वमेव किं न नियामकं स्यादिति परिहरति—। [c]"तर्ही"ति । साम-

---

(१) पूर्वं घटोत्पत्तिक्षणभिन्नेषु यावत्सु क्षणेषु घटाधिकरणत्वमापादितमिदानीं घटाव्यवहितप्राग्भाव्येकक्षणे तदापादयति—यद्वेति ।

(२) तवापि सत्कारणवादिनो मते किं कारणसामग्रीघटकस्य प्रागभावस्याऽभावात्कार्य्यजन्म ? वा पूर्वभाविसामग्रीसत्त्वात् ? आहोस्वित् सकलसामग्र्यव्यवहितोत्तरत्वात् ? ; तत्राद्ये आह—कार्य्यस्येति ।

(३) कालान्तरस्थं तदसत्त्वमित्यस्यैव पूर्वक्षणसामग्र्यसत्त्वमिति विवरणमुत्थानिकाभिधेन शङ्करेण निर्णीतं भवति। एवमन्यत्रापि प्रायोऽस्मिन् व्याख्याने उत्थानिकयैवार्थो अवधारणीयाः ।

(४) तस्मिन् क्षणे=कार्य्यक्षणे ।

ग्रीसत्त्वं पूर्वक्षणमात्रे, तदसत्त्वं च सार्वत्रिकमिति महद्वैषम्यम्, तथापि कार्यमप्यसदेवेति(१)हृदयम् । पूर्वोपादनं तु तदा स्याद् यदि घटोत्पत्तिक्षणातिरिक्तानामपि क्षणानां याव(२)द्घटप्रयोजकोत्तरत्वं मयाऽभ्युपगम्येत, नत्वेवं, किन्तु घटजन्मक्षणस्यैव, तत्पूर्वक्षणवर्तिसामग्र्यसत्त्वस्यैव घटप्रयोजकत्वेन मयाभ्युपगमात् ॥ न वयं भिन्नकालीनं सामग्रीसत्त्वं कार्यजन्मनियामकं ब्रूमोऽपि तु कार्योत्पत्तिसमानकालीनमेव सामग्रीसत्त्वाव्यवहितोत्तरत्वं, तथा च न साम्यमित्याह–। [d]"ममत्वि"ति ॥

मू० [a]"समसमयत्वादा[b]ऽऽगन्तुकत्वा(३)च्चाऽविशेषेण नियम्यनियामकव्यवस्थाऽनुपपत्तेः ।

टी० [a]"समसमयत्वादि"ति । यदेव कार्योत्पत्तिक्षणत्वं तदेव सामग्र्युत्तरक्षणत्वमिति कथमभेदेनैव नियम्यनियामकभावः, समयस्य=क्षणस्य, समत्वादेकत्वादित्यर्थः । * नचोपाधिभेदाद्भेदः * । तथा सति दण्डित्वकुण्डलित्वाभ्यां देवदत्तो भिद्येत, "देशकालौ(४)कामं भिद्येयातां नतु तदुपरक्तस्वभावः पद्मरागो मणिः"–इति च तवैव वाचस्पतेरभिधानादिति भावः । यद्वा तुल्यकालयोः सामग्र्युत्तरक्षणत्वकार्यक्षणत्वयोः सव्येतरविषाणवन्नियम्यनियामकभावाऽभावादित्यर्थः । यद्वा समयः=व्यवस्था, तेन समसमयत्वान्नियम्यनियामकयोः समव्यवस्थत्वात्, तथाच–कार्यनियामकत्वेनाभिमतस्य सामग्र्युत्तरत्वस्य नियामकान्तरं वाच्यमित्यर्थः । एतदेवाग्रे "अन्यथा यद्विशेषान्तरं तदपि"–इत्यादिना स्फुटयिष्यति । यद्वा, समयः=

(१) अयमाशयः–भवेदिदं वैषम्यं यद्येतादृशं कार्यस्याप्यसत्त्वं मया नोच्येत, किन्तु पारमार्थिकत्वधर्मपुरस्कारेण कार्यकारणयोरुभयोरप्यसत्त्वमेव, व्यावहारिकत्वेन तु कदाचित्कार्यस्य सत्त्वोपलम्भात्तदव्यवहितप्राक्क्षणमात्रे परमार्थतो ऽसतो ऽपि कारणस्य व्यावहारिकं सत्त्वं मयाप्यङ्गीकरणीयमेवेत्यतो न वैषम्यमिति ।

(२) यावत्त्वस्य प्रयोजके ऽन्वयो न तु घटे ।

(३) "उत्तरत्वमपि नियामकान्तरपूर्वकं चेदनवस्था, न चेत्स्वयमव्यवस्थितं कथमन्यद्व्यवस्थापयेदित्याह–आगन्तुकत्वादिति"–इति प्रगल्भमिश्राः शोदर्पणे ।

(४) देशकालौ कामं=यथेष्टं भिद्येयातां नतु देशकालभेदेन पद्मरागो मणिर्भिद्यते इत्यर्थः ।

Digitized by Google

सङ्केतः(१),तथाच कार्य्यतत्सामग्र्युत्तरक्षणयोरेकार्थवाचकत्वेन तदुपस्था-प्ययोर्घटकलशपदोपस्थाप्ययोरिव न नियम्यनियामकभाव इत्यर्थः ॥ b"आग-न्तुकत्वादि"ति । अव्यवस्थितोपनिपातित्वात्, आकस्मिकोपनिपातित्व-तिव्याप्ताद्यागन्तुकपदप्रयोगात्, तथाचाऽऽगन्तुकाऽऽकस्मिकी सामग्री स्वोत्तरत्वेन कार्यजन्म कथं नियमयेदित्यर्थः । यद्वा प्रागभावेतर(२)याव-त्कादाचित्ककारणप्रागभावाऽनाधारः कार्यप्रागभावाधारः क्षणः सामग्री-त्युच्यते, कार्यप्रागभावः कार्यानुत्पाद एव, तथाच—'कार्यानुत्पादः कार्यो-त्पादं नियमयति'—इति पर्य्यवसितं, तच्चाऽनुपपन्नं, कार्यानुत्पादस्य कार्य्यो-त्पादं प्रति आगन्तुकत्वात्=उदासीनत्वात्, उदासीनो ह्यागन्तुक इत्युच्यते इत्यर्थः । तथाच समसमयत्वाऽऽगन्तुकत्वाभ्यामविशिष्टयो(३)स्त्वदभिमत-नियम्यनियामकयोर्न नियम्यनियामकभाव इति समुदायार्थः । अन्ये तु "आगन्तुकत्वादन्यथासिद्धत्वादिति वा, आगन्तुकत्वादक्लृप्तनियामकत्वा-दिति वाऽर्थः"—इत्याहुः । यद्यपि समसमययोरप्यागन्तुकयोरपि रूपरस-योर्वन्हिधूमयोरिव नियम्यनियामकभावो दृष्ट एव, तथापि कार्यस्याऽस-त्त्वमेवेति हृदयम् ॥

मू० "तस्मात् 'अन्यदास्थाया(४)एव सामग्र्यास्तदा कार्य्यजन्म-नियमोऽभ्युपेयः, तथा दर्शनात्'—इत्येव वाच्यम्, तथा-च समः(५)समाधिः । * b तथापि कार्य(६)जन्मकालस्य

(१) सङ्केतः= वाच्यवाचकभावः सम्बन्धः, शक्तिरिति यावत् ।

(२) कार्य्यप्रागभावाधारः क्षणः सामग्रीत्येतावन्मात्रोक्तौ दण्डादिकारणप्राग-भावक्षणस्यापि घटादिसामग्रीत्वं स्यादत उक्तं यावत्कारणप्रागभावाऽनाधार इति, एव-मपि यावदन्तर्गतानां देशकालादीनां प्रागभावस्यैवाऽभावात्तदनाधारः क्षणः सर्वदेवा-स्तीति पुनरपि स एव दोषस्तदवस्थ इत्यत उक्तं कादाचित्केति, कादाचित्कं कारणम-नादिप्रागभावोऽपीति पुनरुक्तदोषाऽनुद्धार इति प्रागभावेतरेत्युक्तम् ।

(३) अविशिष्टयोः=तुल्ययोः । (४) अन्यदास्थायाः=पूर्वक्षणवर्तिन्याः ।

(५) यथा तव भिन्नकालीना सामग्री नियामिका तथा ममापि भिन्नकालीनसा-मग्रीक्षणत्वे किं न नियामकं स्यादिति समः समाधिरित्यर्थः ।

(६) "यद्यपि कारणमिव कार्य्यमप्यसदेवेति तत्र समयविशेषप्रश्नो न युक्तः, तथापि प्रतिबन्दिस्थानेनैव साधनस्योपक्रमाद्विशेषमाह—कार्य्यजन्मेति"—इति प्रगल्भ-मिश्राः शोदर्पणे ।

को विशेषः *?। [c] कार्य्यजन्मैव। [d] अन्यथा यद्विशेषान्तरं(१) तदपि विशेषान्तरवतः कालस्य इत्यादित्यपर्य्यवसानमेव पर्य्यवस्येत् । *तथापि(२)तत्कालस्यानुगतं किं रूपम्*?, —इति चेन्न, ‘रूपान्तर(३)वतोऽपि किं तद्?’—इत्यस्यापि पर्य्यनुयोगस्यापत्तेः(४) ।

टी० [a] “तस्मादि”ति। सामग्र्युत्तरक्षणत्वस्य नियामकत्वे खण्डिते भिन्नकालापि त्वया सामग्र्येव नियामिका वाच्या, तथाच भिन्नकालसामग्रीसत्त्वमेव किं न नियामकमिति समः समाधिरित्यर्थः ॥ ननु क्षणान्तरेभ्यः कार्य्यजन्मक्षणस्य वैलक्षण्यमवश्यमभ्युपेयं, तच्च वैलक्षण्यं न तावत्सामग्रीसत्त्वं, तस्य क्षणान्तरसाधारण्यात्, तथाच सामग्र्युत्तरक्षणत्वमेव तथा वाच्यम् क्षणान्तरव्यावृत्तत्वादिति तदेव नियामकमित्यनुशयानः पृच्छति। [b] “तथापी”ति॥ उत्तरम्। [c] “कार्य्ये”ति ॥ विनिगमकमाह—। [d] “अन्यथे”ति। सामग्र्युत्तरत्वेऽपि विशेषान्तरमनुसरणीयम्, एवं तत्रतत्रापीत्यनवस्थेत्यर्थः। यद्यपि कार्य्यजन्मकाले सामग्र्युत्तरत्वं, तत्र च सामग्री, तस्यामपि तत्सामग्रीत्यपर्य्यवसानमेवेष्टं प्रामाणिकत्वात्, * नच कार्य्यजन्मकालगता एव सर्वे विशेषा अभिमताः नच सामग्रीपरम्परायास्तथात्व(५)मिति वाच्यम्*, सामग्रीपरम्पराया अपि परम्परया कार्य्यजन्मकालस्यैव विशेषत्वात्; अन्यथा “कार्य्यजन्मकालस्य कार्य्यजन्मैव विशेषः”—इति त्वदुक्तमपि न निर्वहेत, तत्रापि विशेषान्तराऽनुसरणौचित्यात्, तथापि कार्य्यमप्यसवित्यपेव हृदयम् ॥

---

(१) विशेषान्तरं=सामग्र्युत्तरत्वादि ।

(२) कार्य्यजन्मकालानामुपसङ्ग्राहकं रूपं पृच्छति—तथापीति ।

(३) परिहरति—रूपान्तरेति। अयमाशयः—यत्तियामकं रूपान्तरं वक्तव्यं तस्यापि रूपान्तरसापेक्षत्वेऽनवस्था, अन्ततोगत्वा कस्यापि रूपान्तराऽनपेक्षत्वे आदावेव तत्त्वोक्तौ, तच्च अनियम्यानियत्वमेवेति ।

(४) { असतः कारणभावो भवतीति समर्थितं तावत् ।
न च सत एव तु सिध्यति कारणतेति प्रदर्श्यते तदनु ॥ }

(५) तथात्वम्=निरुक्तोत्तरोत्तरसामग्र्यात्मकविशेषवत्त्वम् ।

Digitized by Google

मू० [a]किञ्च ।

अन्तर्भावित(१)सत्त्वं चेत्कारणं तदसत् [b]ततः ।
नान्तर्भावितसत्त्वं चेत्कारणं तदसत् [c]ततः ॥ ४ ॥

[d]तथा हि अन्तर्भूतसत्त्वं यदि कारणत्वं तदा स्वविशिष्टे स्ववृत्तिरंशतः स्वाश्रयत्वमापादयति ।

टी० असतः कारणत्वमुपपाद्य सतः कारणत्वं खण्डयति—। [a]"किञ्च" इति । कारणे सत्ता विशेषणम्? उपलक्षणं वा? । यदि विशेषणं, तदा सत्तायामपि कारणत्वमित्यायातं, सत्तायां च न सत्तेत्यसदेव कारणं प्राप्तम् ॥ [b]"ततः" इति । सत्ताविशिष्टे कारणत्वाऽभ्युपगमादित्यर्थः । उपलक्षणत्वे त्वसदपि कारणं प्राप्तं, सत्तायाः कारणकोटिबहिर्भावात् ॥ [c]"ततः" इति । सत्ताया उपलक्षणत्वाऽभ्युपगमादित्यर्थः । यद्वा कारणमित्युभयत्र भावप्रधानो निर्देशः, तथाच सत्तायां कारणत्वं वर्त्तते? नवा? इति विकल्पार्थः । आद्ये सदपि कारणं, सत्तायाः सत्ताविरहेणाऽसत्त्वात् । द्वितीये सत्तया सदाकाराऽनुगतप्रत्ययोऽपि न जननीय इति तन्मात्रप्रमाणिकायाः सत्ताया विलोपे सर्वकारणमसदेवेति प्राप्तम् । यद्वा कारणं=कारणत्वम् अन्तर्भावितसत्त्वं=व्यापकीभूतसत्त्वं? न वा? तथाच कारणत्वं सत्ताव्याप्यं? न वा? इति विकल्पार्थः । आद्ये सत्तायां सत्तानिवृत्त्या कारणत्वमपि निवर्तते, इति अनुगतप्रत्ययजनकत्वाभावात् प्रमाणाऽभावेन सत्ताविलोपे सर्वकारणमसदेव प्राप्तम् । अन्त्ये सत्तामपहायापि कारणत्वं वर्तते इति त्वयैवासत्कारणमभ्युपेतमित्यर्थः ॥ वार्त्तिकार्थं प्रपञ्चयति—। [d]"तथाही"ति ॥

---

(१) अन्तर्भाविता=अन्तः प्रवेशिता (विशेषणीभूता इतियावत्) सत्ता यस्मिंस्तदन्तर्भावितसत्त्वं, तच्चेत्कारणं, तदा सत्ताविशिष्टे सत्ताऽसम्भवात्कारणमसदेव स्यात्, सत्तासमवायात्सद्व्यवहारोपगमादित्यर्थः । अन्तर्भावितसत्त्वं कारणं न, किन्तूपलक्षितमिति चेत् (केचित्त्वत्राऽलुक्समासमिच्छन्ति) ततोऽपि कारणकोटौ सत्ताऽप्रवेशात्कारणमसदेवेति श्लोकार्थः ।

मू॰ "विशिष्टस्यार्थान्तरत्वे(१)पि च स्वस्मिन्स्ववृत्तिव्यतिरेकव-
त्स्वविशिष्टे स्ववृत्तिव्यतिरेकनियमदर्शनात् न सैव सत्ता
तस्मिन्निति [b]अन्यस्या विशिष्टवृत्त्यभ्युपगमे तामनिवेश्य
कारणत्वमभ्युपगन्तुः सर्वथैवासत्कारणं पर्यवस्यति, [c]अ-
पराऽपरसत्तानिवेशने चाऽपर्यवसानमेव ।

टी॰ ननु सत्ताविशिष्टे दण्डादौ कारणे सत्ता वर्तते चेत्कथमात्मा-
श्रयः(२)इत्यत आह–। [a]"विशिष्टस्ये"ति । स्वस्मिन्स्वं वर्तते इति यथा
विरुद्धं, तथा स्वविशिष्टे स्वं वर्तते इत्यपि विरुद्धमेव, विरोधप्रयोजक-
स्याऽदर्शनस्योभयत्राऽविशेषादित्यर्थः ॥ ननु स्वविशिष्टे स्वं मावर्तिष्ठ,
स्वभिन्नया द्वितीयया सत्तया प्रथमसत्ताविशिष्टानां सत्त्वं, सत्त्वाच्च का-
रणत्वमुपपत्स्यते? इत्यत आह–। [b]"अन्यस्या" इति । प्रथमसत्तायाः
अकिञ्चित्करत्वेपि तत्तुल्यतया द्वितीयसत्तामप्यनिवेश्यैव त्वया कारणत्वं
वाच्यम्(३)तथाच न प्रथमया न वा द्वितीयया सत्तया सतां कारणत्व-
मिति सर्वथैवासत्कारणमिति भावः ॥ ननु स्वविशिष्टे स्ववृत्तावात्मा-
श्रयः, अन्योन्यविशिष्टेऽन्योन्यवृत्तावन्योन्याश्रयः, इति पूर्वपूर्वसत्ताविशिष्ट-
परापरसत्तया सत्स्यात्कारणं च स्यादिति कथमसत्कारणमित्यत आह –।
[c]"अपरापरे"ति। उत्तरोत्तरसत्तास्वप्यन्तर्भावितसत्त्वं चेदित्यादिविकल्पकद-
र्थनया क्वापि पर्यवसानं न स्यादित्यर्थः ॥

मू॰ * [a]"नच सत्ताभेदानन्त्यमस्त्येवेत्यपि पादप्रसारिका नि-
स्ताराय*। सत्ताभेदे हि सद्बुद्धिव्यवहाराऽनुगमसमर्थनल-
ङ्घिनः प्रथमापि सत्ता नस्याद् इति वृद्धिमिच्छतो मूलमपि
ते नष्टमिति हा! कष्टतरम्।* नच स्वरूपसत्तोपगमाय

(१) विशेषणविशेष्यतत्सम्बन्धेभ्योऽतिरिक्तत्वपक्षेपीत्यर्थः ।

(२) अत्र 'विशिष्टस्य विशेषणीभूतसत्तादितोऽतिरिक्तत्वस्य मयाऽभ्युपगन्तव्य-
त्वात्'–इति हेतुः पूरणीयः ।

(३) वचनप्रकारस्तु–'स्वभिन्नया तृतीयसत्तया द्वितीयसत्ताविशिष्टानां सत्त्वं,
सत्त्वाच्च कारणत्वमुपपत्स्यते'–इति ।

Digitized by Google

स्वाप्ति* । भिन्नानप्यनुगत(१)बुद्ध्याद्याधानपदेऽभिषिञ्चता त्वया हि जातिमाचाय जलाञ्जलिर्विनीर्य्येत । ""माभूद्-नुगतिः स्वरूपसत्त्वस्य"—इति च वदन् तद्गर्भिणीं कारणतां कथमनुगमयितासीति ।

टी० ननु बीजाङ्कुरपरम्परावत्सत्तापरम्पराऽस्तु को दोषः? इत्यत आह—। ""नचे"ति । यथा तावत्यः सत्ताः सत्तामन्तरेणैव सत्यस्तथा दण्डादयोऽपि सत्तामन्तरेणैव सन्तः सन्तु किमाद्ययापि सत्तया । * न च तावतीषु सत्तास्वेका काचित्सत्ता वर्त्तते यया तासामनुगमः, तस्याः पुनरेकस्याः(२) किमनुगमकेन सत्तान्तरेणेतिवाच्यम् * । तर्हि सती(३)न स्यात्, तदसत्त्वे च तासामसत्त्वात् तदाऽऽश्रयपर्यन्तमसत्त्वमित्यसदेव कारणं पर्यवसन्नमिति भावः । यद्यपि स्वाविशिष्टे स्वं वर्त्तते एव विरोधाभावात् *नचादर्शनं* सर्वत्र तथैव दृष्टत्वात् । नहि स्वाऽविशिष्टे क्वचित्स्ववृत्तिर्दृष्टा । यदि च स्वविशिष्टे स्वं न वर्त्तेत, तदा स्वविशिष्टमेव न स्यात्स्ववृत्त्यैव हि तत्स्वविशिष्टम्, अन्यथा दण्डिनि दण्डवत्कुण्डलिनि कुण्डलवत् कुण्डलिनि दण्डोऽपि स्यात् । *एवं तर्हि दण्डेऽपि दण्डः स्यात् *? । न, आपादकाभावात् । *विशिष्टवृत्तित्वमेवापादकम्*?,—इति चेच्च, यद्विशिष्टवृत्ति तद्विशेषणवृत्तीति नियमाभावात्, व्यभिचारस्य(४) दर्शितत्वात् । *तत्र(५)दण्डकुण्डलयोर्न

(१) अनुगतबुद्ध्यादिराधीयते अनेनेत्यनुगतबुद्ध्याद्याधानं, तत्पदे=तत्स्थाने इत्यर्थः ।

(२) 'एकस्याः'—इति साधारणं हेतुगर्भं विशेषणम्, एकत्वादेवेत्यर्थः ।

(३) यदि सर्वसत्तास्वनुगतैकसत्तायां सत्तान्तरं न स्यात्तर्हि सा सत्येव न स्यादिति तदसत्त्वे तदाधारभूतानां प्रथमसत्तानामप्यसत्त्वं तदसत्त्वे च तदाश्रयाणां दण्डादीनां कारणानामप्यसत्त्वमित्यर्थः । न च सर्वसत्तास्वनुगतैकसत्ता स्वात्मकसत्तयैव सती । तथा सति प्रथमास्वेव तत्स्वीकरणीयतया तत्त्यागे मानाऽभावात् ।

(४) सर्वत्र स्वाविशिष्टे एव विशेषणं वर्त्तते, न चैतावता स्ववृत्तित्वं तस्येति (यद्यपीत्यत आरभ्य स्यादित्यन्तं) व्यभिचारस्य दर्शितत्वादित्यर्थः ।

(५) ननु विशेषणं सर्वत्र स्वाऽविशिष्टे एव वर्त्तते, नचैवं सति कुण्डलिनि दण्डोऽपि स्यादिति वाच्यम्, दण्डादीनामुपलक्षणत्वेन विशेषणत्वानङ्गीकारादित्यत आह—तत्रेति ।

विशेषणत्वं, किन्तूपलक्षणत्वम् *?—इति चेत्तर्हि सत्ताप्युपलक्षणमस्तु, यथा वि-नश्वरत्वेनापि दण्डेन पुरुषो दण्डी, तथा सत्तयापि तादृश्या कारणं सदस्तु। वस्तुतो विशेषणत्वेऽपि न दोषः, नहि विशेष्यवृत्तिधर्मकत्वं विशेषणत्वं किन्तु स्वकालनियत(१)व्यावृत्तिबोधजनकत्वं, प्रत्याय्य(२) व्यावृत्त्यधिकरणतावच्छे-दकत्वे सति व्यवच्छेदकत्वं वा, तच्च(३) विशेष्यवृत्तिधर्मविरहेऽपि समानम्। यत्र(४) संयोगलक्षणा वृत्तिर्दण्डादौ तत्र कार्यस्य विरोधोपसंहारेऽपि समवा-यलक्षणवृत्तौ स्वविशिष्टे सत्त्व स्ववृत्तिरभ्युपगन्तव्या, तत्र स्वाऽविशिष्टवृत्त्या-या अभावात्, गोत्वाऽविशिष्टे महिषादौ गोत्ववृत्तिप्रसङ्गात्। तथाच तत्त्व-त्वं स्वविशिष्टे स्ववृत्तिरङ्गीकर्तव्या। *तत्र केवले वृत्तिः*?—इति चेन्न(५), केव-लस्यापि स्वविशिष्टत्वात्। नहि तत्र स्वं न विशेषणम्। *ननु(६) सत्तायां सत्ताविरहात् कथं साऽनुगतप्रतीतिकारणम्*?—इति चेन्न, सत्तैव केवलम-सती कारणमिति न, किन्त्वसद्भावविरहस्यप्रसवैव कारणम्। *तर्हि सत्का-रणं, नत्वसदिति कोऽयं तव सिद्धान्तः*?—इति चेत्, सोपाख्यं कारणं, नतु निरुपाख्यमलीकमित्यवेहि। *तर्हि सत्तास्थाने उपाख्यामावेश्य उपाख्या,

---

(१) कीदृशोऽन्वेन व्यावृत्तिबोधजनकत्वमुपलक्षणस्याप्यस्त्यतः स्वकालनियत-त्वेन बोधो विशेषितः।

(२) पूर्वोक्तविशेषणलक्षणस्योपाधावतिव्याप्तिमभिप्रेत्य लक्षणान्तरमाह—प्रत्या-य्येति। प्रत्याय्या=ज्ञाप्या या व्यावृत्तिस्तदधिकरणता दण्डादेस्तदवच्छेदकत्वं दण्डा-देरेव विशेषणस्य, नतूपाधेरुपलक्षणस्य चेति नातिव्याप्तिः।

(३) तदेतल्लक्षणं विशेषणे विशेष्यगतधर्मस्याभावेऽपि सति समनुगतमित्याह—तच्चेति।

(४) ननु "नहि स्वाऽविशिष्टे क्वचित्स्ववृत्तिर्दृष्टा"—इत्यस्य स्वदुक्तस्याव्याप्य-वृत्तित्वेनाऽभिमतसंयोगादौ व्यभिचाराद्विरोधस्तदवस्थ इत्यत आह—यत्रेति। संयोगेति। संयोगेन लक्ष्यते=ज्ञायते या सा संयोगलक्षणा, संयोगाऽवच्छिन्ना वृत्तिरिति यावत्। यद्वा वृत्तिवृत्तिताऽवच्छेदकयोः समनियतत्वेनाऽभेदोपचारात् संयोगलक्षणा वृत्तिरित्युक्तम्। एवं "समवायलक्षणवृत्तौ"—इत्यत्रापि ज्ञेयम्।

(५) 'केवले वृत्तिः'—इत्यत्र केवलशब्देन किं सर्वथा गोत्वादिविशेषणाऽसंसृष्टं पदार्थो, उत तत्संसृष्टम्? । आद्ये महिषादावपि गोत्ववृत्तिः स्यादित्येतद्धृदि निधायाह—नेति, द्वितीये तु पूर्वोक्तमेव स्मारयति—केवलस्यापीति।

(६) नन्वेवं स्वविशिष्टे स्ववृत्तित्वमुपपाद्य स्वया दण्डादीनां कारणत्वं व्यव-स्थापि, असतां तु सत्ताविशिष्टत्वस्याप्यभावात् कथं कारणत्वं स्यादिति शङ्कयतेनिको मावकनिकां प्रकृते—नन्विति।

विशिष्टं निरुपाख्यमेवेति पूर्ववत्(१)दावर्त्तनीयम्* ?—इतिचेत्, आवर्त्तने क्रियमाणे एव व्याघातात् । नह्युपाख्याविशिष्टं निरुपाख्यं वक्तुमपि शक्यते, उपाख्याविशिष्टत्वेनैवोपाख्यातत्वात्, तन्निरुपाख्या हि नाम, तथावाऽभिधाना(२)नभिधानयोर्जितं नैयायिकैरिति, तथापि(३)दण्डादौ सत्त्वापि कारणकोटौ न प्रविशतीति हृदयम् ॥ ननु च सत्ताविरहि(४)ण्यपि सत्ता स्वरूपसत्येव, दण्डादिरपि सत्ताबहिर्भावेन कारणमस्तु स्वरूपसत्तायाः स्वरूपमात्रनिबन्धनत्वात्, प्राभाकरादिभिस्तथैवाङ्गीकाराच्चेत्यत आह—। *b* "नचे"ति । स्वरूपसत्त्वस्य प्रतिस्वं विश्रान्तत्वेनाऽननुगतत्वात् अनुगतसद्व्यवहारविलोपप्रसङ्गात्, अननुगतेनैव चाऽनुगतधीजनने गोत्वादिकमपि नस्यादित्यर्थः ॥ नन्वनुगमाभावेपि स्वरूपसत्तया सत्कारणमिति तावदायातं, तदेव च मया साधयितुमुपक्रान्तमित्यत आह—। *c* 'माभूदिति' । कारणताया अनुगमः त्वदभ्युपगतो न स्यात् स्वरूपसत्तायास्तदनुगमकत्वेनाभ्युपेताया अननुगतत्वात्, सत्ताजातेश्च खण्डितत्वादित्यर्थः ॥

मू० *a* "किञ्च, स्वरूपसत्त्वं स्वरूपात् घटाद्यात्मनो नाधिकम्, सतोपि स्वरूपं स्वरूपमेव, नह्यसन् घटादिर्न घटादिः, तथा सति(५)'घटादिर्न'—इत्यपि न स्यात्, असतोऽघटादि-

(१) पूर्ववत् "अन्तर्भावितसत्त्वं चेत्कारणं तदसत्ततः"—इति कारिकोक्तप्रकारेणैव—'अन्तर्भावितोपाख्यं चेत्कारणं तदसत्ततः, नान्तर्भावितोपाख्यं चेत्कारणं तदसत्ततः' इत्यावर्त्तनीयमित्यर्थः ।

(२) अभिधाने निरुपाख्यत्वव्याघातः, अनभिधाने नैयायिकाऽभिमतसोपाख्यकारणत्वसिद्धिरिति विवेकः ।

(३) 'तथापि'—इत्यस्य 'यद्यपि स्वविशिष्टे स्वं वर्तते एव' इति दूरव्यवहितेन यद्यपिकारेणाऽन्वयः ।

(४) जात्यात्मकसत्ताविरहिणीत्यर्थः ।

(५) तथा सतीति । यथा 'घटः सन्'—इत्यत्र घटसत्त्वयोः सामानाधिकरण्योपलम्भाद्घटः सत्त्वास्वीयते, तथा 'घटोऽसन्'—इति सामानाधिकरण्योपलम्भादसन् घटोऽपि स्वीकार्य्यः, अन्यथा 'घटोऽसन्'—इति सामानाधिकरण्यमेव न स्यादिति ग्रन्थाभिसंमतोऽर्थः । विद्यासागरास्तु "अप्रसिद्धप्रतियोगिकनिषेधायोगादसतः प्रतिषेधप्रतियोगित्वेनाऽसन् घटादिरेष्टव्यः"—इत्याहुः । तत्र मन्ये ग्रन्थभोक्तेऽर्थे मूलस्याऽपिग्रन्थस्यैवकार्थकत्वकल्पनाप्रयुक्तगौरवाद्विद्यासागरोक्तमेवरम्यमिति ।

त्वात् । [b]अथ सदपि सत्तामनन्तर्भाव्य कारणं, तदानीमसदपि तत्तथास्तु, सत्त्वासत्त्वयोः कारणकोट्यप्रवेशाऽविशेषात् । [c]अथ*न सत्ता कारणकोटिनिविष्टा, किन्तु कारणत्वं सत्त्वं, नियतपूर्वसत्तां हि कारणतां मन्ये*?—इति मन्यसे, [d]तर्हि मत्पक्षेऽपि सैव कारणतास्तु ।* [e]तर्हि कारणस्य सत्तामभ्युपगतवानसीति घट्टकुट्यां(१)प्रभातम् *?—इति चेन्न, भावाऽनवबोधात्,

टी० घटस्य च निरूप्यमाणं घटस्वरूपसत्त्वं घट एव पर्यवस्यति, तथाच घटः=कारणमित्याऽऽयातम्, असन्नपि घटो घट एव,—इति मत्पक्षात् त्वत्पक्षे न कश्चिद्विशेष इत्याह—। [a]"किञ्च" इति । यद्यपि च स्वरूपं सदिति पारमार्थिक(२)मभिमतम्, अयमेव च त्वत्पक्षाद्विशेषः, त्वया दण्डादीनामपारमार्थिकत्वाङ्गीकारात्, तथापि पारमार्थिकत्वखण्डने हृदयम् ॥ श्लोकद्वितीयार्द्धं व्याचष्टे—। [b]"अथे"ति । सत्ताया इवाऽसत्ताया अपि कारणकोट्यप्रवेशादसत्कारणवादित्वादुभयमपि नोपालभ्याः, यतो दण्डादिः कारणमित्यावयोः समानोऽभ्युपगमः, सच सदसत्त्वाभ्यां क्रमेण विचारणीयमित्यर्थः ॥ ननु सत्ताघटितं कारणत्वं न ब्रूमः, किन्तर्हि? सत्तैव कारणत्वमिति, तथाच कारणत्वमभ्युपगच्छता त्वया सत्ताप्यङ्गीकर्तव्येति शङ्कते—। [c]"अथ ने"ति ॥ ममापि नियतपूर्वसत्त्वमेव कारणत्वमिति परिहरति—। [d]"तर्ही"ति ॥ ननु कारणत्वं कारणानां धर्मः, स चेत्सत्ता, तदा सन्त एव दण्डादयः कारणानि, नाऽसन्तः, इति पर्यवसितं विवादेनेत्यत(३) आह—। [e]"तर्ही"ति ॥

(१) शौल्किकभयाद्विशायां मार्गान्तरेण गच्छतः क्षपितनिशस्य घट्टकुट्यां=शुल्कशालायां, यथा प्रभातं कस्यचिद्वणिजस्य तथा तव सत्त्वापत्तिभयाद्भावान्तरेण वञ्चयतोऽपि सद्भाव आपन्न इत्यर्थः । विद्या० ।

(२) पारमार्थिकमित्यत्र 'स्वरूपम्'—इति शेषः ।

(३) इति पूर्वपक्षिणः शङ्कामनूद्य 'भावानवबोधात्' इत्यन्तं सिद्धान्त्याहेत्यर्थः । वस्तुतस्तु अत्र 'इत्याह'—इत्येव पाठ उचितः; पूर्वपक्षस्यैव ग्रन्थस्योपस्थितत्वात्, अतो न क्लिष्टकल्पनं दोषः, पाठान्तरं तु लेखकप्रमादात् ।

मू० "सत्तामसतीमभ्युपगच्छतामपि सत्ता मयाऽभ्युपगतैव, अन्यथा कासावसतीति(१)। [b]त्वमपि किं सत्तां तत्सत्तामन्तर्भाव्य कारणत्वमिच्छसि? नत्वेवं(२), पूर्ववत्कापि सत्तात्यागो वा अनवस्थायां वा पर्य्यवसानं स्यात्। [c]*असत्त्वाविशेषात् कारणनियमः कथं स्यात्*?—इति चेन्न, [d]सत्त्वाविशेषेपि तुल्यत्वात्। [e]*सत्त्वेऽन्वयव्यतिरेकानुविधानं, तस्य, तज्जातीयस्य वा, त्वत्पक्षे त्वसत्त्वाऽविशेषाद्यतिरेकः, परं सोप्यनियतः, यदा कारणाऽभावस्तदा कार्य्याभावावश्यम्भावानभ्युपगमात्, नित्याऽसतः कारणस्याऽसत्त्वे एव कदाचित्कार्य्या(३)त्पादात्, अन्वयस्तु न कचिदपि*?—इति चेन्[f] न, तुल्यत्वात्।

टी० भावमाविष्करोति—[a]"सत्तामि"ति। न वयमसतीमपि सत्तां वाभ्युपेमः, किन्तर्हि? सती(४)म्, अन्यथा किमुद्दिश्याऽसत्त्वमपि मया विधेयमित्यर्थः॥ त्वयापि या सत्ता कारणत्वेनाभ्युपेयते सा स्वान्तर्भावेनैव कारणत्वं वाच्यम्, स्वाधिष्ठिता च सा त्वन्मतेऽप्यसत्येव, यदि च(५)स्वात्मानं तटस्थीकृत्य सा सत्ता कारणत्वं तदा तया सत्तया तटस्थया कार-

(१) केषुचित्पुस्तकेषु 'इति'—शब्दो न दृश्यते।

(२) विद्यासागरोक्तव्याख्यानाऽनुरोधेन नत्वेवमित्येतत्स्थाने 'नन्वेवम्'—इति पाठः, यतस्ते व्याचख्युः "अङ्गीकरोति वद्वादी नन्विति"—इति। प्रकृतशङ्करव्याख्यानानुरोधेन तु नत्वेवमित्यतोऽग्रेऽयमन्वयोजनासौकर्य्यार्थं 'तथा सति'—इति शेषः पूरणीयः।

(३) यद्यपि कार्य्योत्पादकालेपि कार्य्यस्य परमार्थतोऽसत्त्वमेवेति व्यतिरेकोऽबाधितस्तथाप्यभिप्रायमविदुषः प्रश्न इतरथा।

(४) "किं तर्हि? सतीम्"—इत्यत्रापि 'नाभ्युपेमः'—इति सम्बन्धनीयम्।

(५) तटस्थीभूतसत्ताया अपि सद्व्यवहारप्रयोजकत्वमङ्गीकृत्याह—यदि चेति॥ "सत्तैव तु न सती"ति, कारणत्वात्मिका सत्तैव तु न तटस्थीभूतसत्तान्तरवतीत्यर्थः। कारणता सती निर्वहेदित्यत्र केचित् 'कारणता असती निर्वहेदि'ति पठं लिखन्ति। तत्र "तथा स्वस्य तटस्थीकारे कारणत्वं सत्त्वं निर्वहेत्"—इत्यग्रिमोत्तरग्रन्थेन पौनरुक्त्यापातादिति।

जाता सती निर्वहेत्, सत्तैव तु न सती, तस्याः सत्तान्तराभावात्, भावे वा पुनरपर्य्यवसानं स्यात्, नवा स्वस्य तटस्थीकरणे कारणत्वं सत्त्वमिति निर्वहेदित्याह–। [b]"त्वमपी"ति ॥ ननु यद्यसत्कारणं तदेदं कारणमिदमकारणमिति कितो नियमः? इत्याह–। [c]"असत्त्वे"ति ॥ त्वन्मतेपि कारणाऽकारणविभागोऽनुपपन्नः, सत्त्वाऽविशेषादित्याह–। [d]"सत्त्वे"ति ॥ ननु सतः कारणत्वे दण्डजातीये सति घटः, व्यतिरेके च तस्य घटजातीयस्य व्यतिरेकः,–इत्यन्वयव्यतिरेकौ कारणताग्राहकौ सम्भवतः, नासतः कारणत्वे ताविति शङ्कते–। [e]"सत्त्वे" इति ॥ यथा सतोऽन्वयव्यतिरेकौ, तथैवासतोपि, परन्तु निरूप्यमाणौ ता(१)वप्यसन्तौ पर्य्यवस्यतः,–इत्यन्यदेतदित्याह–। [f]"न तुल्यत्वादि"ति ॥

मू० [a]अन्वयो नास्तीत्यभ्युपगच्छताप्यन्वयोपगमात् । [b]अन्वयस्यापि(२)सत्तान्तर्भावने कथितदोषापत्तेः । [c]एतेन "आम्रामोदकतृप्ता ये, ये चोपार्जितमोदकाः । रसवीर्य्यविपाकादि, तुल्यं तेषां प्रसज्यते"–इत्यस्यापि बाधकत्वमाम्रामोदकायते, [d]सत्तान्तर्भावाऽनन्तर्भावाभ्यां प्रत्यादेशात्, [e]आम्रामोदकादिनापि च रसवीर्यविपाकादिजननात् । *तदसत्कथं कार्य्यं स्यात्*?–इति चेन्न, [f]सत्तामन्तर्भाव्य कार्य्यत्वोपगमे कारणवत्कार्य्येपि उक्तदोषस्य, अनन्तर्भावे वाऽविशेषस्य, पूर्ववदावृत्तेः ।

टी० किञ्च । 'असतोन्वयोनास्ति'–इति वदता त्वयाऽन्वयो निषेध्यत्वेनाप्यभ्युपगम्यते एवेत्याह–। [a]"अन्वय"इति ॥ ननु तथापि सदन्वयो नास्ति, स च प्रयोजकः? इत्यत आह–। [b]"अन्वयस्यापी"ति । "अन्तर्भावितसतश्चेदन्वयो न स संस्ततः । नान्तर्भावितसतश्चेदन्वयो न स संस्ततः"–इति दोषापत्तेरित्यर्थः ॥ ननु यद्यसत्कारणं तदा भोजनेऽभोजने

(१) तावपि=सतोऽप्यन्वयव्यतिरेकावित्यर्थः ।
(२) अन्वयस्यापि कुक्षौ सत्ताप्रवेशने इत्यर्थः ।

च रसवीर्य्यादितौल्यं स्यादित्यत आह—। [c] "एतेने"ति। आशा=प्रत्याशा, मनोरथ इति यावत्। उपार्जनं=भक्षणम्। रसः=आद्यो धातुः। वीर्य्यं=बलं, चरमधातुः। विपाकः=परिणामः, लौहित्यमिति यावत्। 'रसो(१)मधुरादि'रित्यादि व्याख्यानमयुक्तं, तस्य भोजनाऽजन्यत्वात्। आदिपदादिन्द्रियपाटवादिग्रहणम्॥ एतेनेत्यस्याऽतिदेश्यमाह। [d] "सत्त्वे"ति। सतः कारणत्वमभिप्रेत्य बाधोयं भवताभिधीयते, तच्चा(२)न्तर्भावितसत्त्वं चेदित्यादिना पूर्वमेव निरस्तमित्यर्थः॥ भोजनाऽभोजनयोस्तुल्यत्वापादनमिष्टापत्त्या निरस्यति—। [e] "आशामोदके"ति। भोजनेप्यसन् रसादिर्भोजनेपि तथेति तौल्यमेवेत्यर्थः॥ [f] "सत्तामि"ति। 'अन्तर्भावितसत्त्वं चेत्कार्य्यं स्यात्तदसत्ततः। नान्तर्भावितसत्त्वं चेत्कार्य्यं स्यात्तदसत्ततः"—इति दोषापत्तेरित्यर्थः। दृष्टं च गुञ्जापुञ्जस्थले असता हुताशनेनाऽसतः शीतापनोदस्योत्पत्तिर्वानराणाम्, असत्यैव च मत्तकाशिन्या(३)सम्भोगसुखमसदेव स्वप्ने सुप्तानामिति भावः। यद्वा, ननु प्रागसतः सत्त्वं कार्यत्वम्, इति कार्य्यसत्तावश्यमङ्गीकार्य्येत्यत आह—। "सत्तामि"ति। यथा नियतपूर्वसत्त्वं कारणत्वमित्यत्राऽसती सत्ताऽभ्युपगता, तथा कार्य्यसत्तामप्यसतीमङ्गीकृत्यैतन्मया समाधेयमित्यर्थः॥

मू० [a] तस्मात्।

पूर्वसम्बन्धनियमे हेतुत्वे तुल्यएवं नौ (४)।
हेतुतत्त्वबहिर्भूतसत्त्वाऽसत्त्वकथा वृथा॥ ५॥

* [b] आस्तां प्रतिबन्दिग्रहाऽऽग्रहः (५), कथं पुनरसतः

(१) विद्यासागरायुक्तं व्याख्यानमाविर्पति—रसोमधुरादिरिति।

(२) तच्च=सतः कारणत्वं च।

(३) मत्तकाशिनी=उत्तमस्त्री, "वरारोहा मत्तकाशिन्युत्तमा वरवर्णिनी"—इति कोशात्।

(४) नौ=आवयोः सदसद्वादिनोः, हेतुत्वे कार्य्याऽव्यवहितपूर्वक्षणसम्बन्धनियमे तुल्ये सति 'सतः कारणत्वं, नाऽसतः'—इति हेतुत्वाऽनुपयोगिनी सत्त्वाऽसत्त्वचिन्ता वृथेत्यर्थः।

(५) प्रतिबन्दिग्रहे=प्रतिबन्दिग्रहणे, भवतां य आग्रहः स आस्तामित्यर्थः क्वचित्तु 'प्रतिबन्दिग्रहग्रहः' इति पाठस्तत्राप्ययमेवार्थः।

Digitized by Google

कारणत्वमभ्येयम् प्राक्सत्त्वनियमस्य विशेषस्यानभ्युपगमात्, असत्त्वस्य चाऽविशेषात् * ?—इति चेन्न, "इदमस्मान्नियतप्राक्सदि"ति बुद्ध्या विशेषात् । [d] * भ्रान्तै(१)वंबुद्धिगोचरेऽतिप्रसङ्गः * ?—इति चेन्न,

टी० न सत्कारणं, नाप्यसत्कारणं, किन्तु नियतपूर्ववर्त्तिकारणं, तच्च यथा सत्. तथा असदपि, इति सदेवकारणमिति त्वत्कथावत् असदेवकारणमिति मत्कथाप्याऽऽपततो वृथा, विचारस्तु करिष्यते इत्युपसंहरति—। [a] "तस्मादि"ति ॥ ननु असत्त्वाविशेषात्कारणानियमः कथं स्यात्,—इति मदुक्ते 'सत्त्वाविशेषेपि तुल्यत्वात्'—इति तु त्वया प्रतिबन्दिः कृता, प्रतिबन्दिश्च न दूषणम्, इत्यसतः कारणत्वं प्रमापकाभावादनुपपन्नमेवेति शङ्कते—। [b] "आस्तामि"ति । यद्वा "पूर्वसम्बन्धनियमे हेतुत्वे तुल्यएव नौ"—इति साम्यमात्रं त्वयोक्तम्, तच्चानुपपन्नं, सत्त्वासत्त्वपक्षे ग्राहक(२)सत्त्वाऽसत्त्वाभ्यां विशेषादिति शङ्कते—। "आस्तामि"ति । प्राचि काले सत्त्वं कारणत्वं ग्राह्यं, तदस्मन्मतेऽस्ति, त्वन्मते तु सर्वदैवासत्त्वम्, इति प्राचि काले सत्त्वं ग्राह्यं नास्त्येव किं गृह्येतेत्यर्थः ॥ ग्राह्यानुपपत्त्या ग्राहकाऽनुपपत्तिर्न भवत्यसत्यपि दण्डादौ घटप्राक्सत्त्वबुद्धिसम्भवात्, शुक्तौ रजतत्वबुद्धिवत्, सा बुद्धिर्दण्डचक्रादावेव न तु रासभादावपि, येन तत्रापि घटकारणत्वं व्यवह्रियेतेति परिहरति—। [c] "ने"ति ॥ रासभादावपि कदाचिदेवंबुद्धिसम्भवाच्च हि भ्रान्तिहेतवोपि केनचिन्नियम्यन्ते इति तस्यापि घटकारणत्वतद्व्यवहारयोः प्रसङ्ग इत्याह—। [d] "भ्रान्तैवमि"ति ॥

मू० [a] "यादृश्या हि धिया विचतुरकक्षाबाधाऽनवबोधविश्रान्तया वस्तुसत्त्वनिश्चयस्ते, तादृश्यैव विषयीकृतस्य ममा-

(१) भ्रान्तस्य 'रासभः घटनियतपूर्ववृत्तिः'—इत्येवंभूतबुद्धिगोचरे रासभादौ कारणत्वप्रसङ्ग इत्यर्थः ।

(२) ग्राहकौ=कारणताग्राहकावन्वयव्यतिरेकौ, तत्सत्त्वाऽसत्त्वाभ्यामित्यर्थः, सत्त्वपक्षे ग्राहकयोरन्वयव्यतिरेकयोः सत्त्वं, नाऽसत्त्वपक्षे इति विभागः ।

पि कारणतानिश्चयः (१), [b] केवलं ततः परास्वपि कक्षासु बाधात्पूर्वपूर्वभ्रान्तिसम्भवेन न तावता सत्त्वावधारणं वयं मन्यामहे—इति विशेषः । [c] परदर्शनसिद्धान्तस्य भूरिकक्षाबाधाविनोऽपि ततः परकक्षाबाध्यमानत्वेनाऽन्यथाभावोपगमात् । [d] अन्यथैकदर्शनपरिशेषः स्यात् ।

टी० कारणाकारणयोरेवंबुद्धिसम्भवेऽपि कारणे झटिति बाधानवतारोऽकारणे तु झटित्येव बाधावतारः, इत्यवतीर्णबाधाऽनवतीर्णबाधबुद्धिकृतो विशेष इत्याह—। [a] "यादृश्ये"ति ॥ ननु यद्यनवतीर्णबाधया धिया प्राक्सत्त्वं विषयीकृतं, तदा तत्पारमार्थिकमभ्युपगन्तव्यं त्वयैवेत्यत आह—। [b] "केवलमि"ति । आपाततोऽबाधविशेषमात्रमाचक्ष्महे, पर्यन्तत(२)स्तत्रापि बाधाऽवतार एवेति न वस्तुतत्त्वस्थितिरिति भावः । यद्यपि क्रमेणापि बाधितया धियाऽबाधितया वा बाधः? । आद्ये न (३) क्षतिः, अन्त्ये तद्बाधो वस्तुतत्त्वाधीन एव त्वया वाच्य इति सिद्धं वस्तुतत्त्वम् । * न च तत्रा(४)प्यबाधितबुद्धिविषयत्वमेव शरणं *, तत्राप्येतद्विकल्पाऽवतारात् । किञ्चाऽन्यथात्वबोधनं बाधोऽन्यथात्वप्रमापणं वा, आद्ये बाध्यापि(५)बुद्धिर्बोधिका स्यात्, अन्त्ये तत एव वस्तुव्यवस्थितिः, तथापि सर्वोऽयं विशेषो बुद्धिकृतो न वस्तुकृत इति भावः ॥ नन्वापाततश्चेदबाधस्तदा तावता तत्र क्रमिकबाधाऽभावोऽप्युन्नेष्यते(६)इत्यत आह—। [c] "परदर्शने"ति ।

(१) असति दण्डादौ इति शेषः ।

(२) पर्य्यन्ततः=अन्ततोगत्वा, तत्त्वज्ञाने सतीति यावत् । तत्रापि=आपाततोऽबाधितबुद्धिविषयेऽपि । बाधावतार इत्यत्र क्रमेणेति शेषः ।

(३) न क्षतिः, बाधिकाया धियो बाधे प्रपञ्चेऽबाध्यत्वस्यैव विश्रामात् ।

(४) तत्रापि=अबाधितबुद्धावपि, द्वित्रिचतुरकक्षास्वबाधितबुद्धिगोचरत्वलक्षणमेवाऽबाधितत्वं, पर्य्यन्ततस्तत्रापि बाध एवेत्यर्थः ।

(५) बाध्यापि 'इदं रजतम्'–इत्याकारिका बुद्धिः शुक्तिज्ञानस्य बाधिका स्यात् अन्यथात्वबोधनस्य तत्र सत्त्वादित्यर्थः ।

(६) उन्नेष्यते=अनुमास्यते, तथाहि—उत्तरोत्तरबुद्धिविषया घटादयो अबाध्याः, विषयत्वात्, द्वित्रिचतुरकक्षाऽबाधितबुद्धिविषयघटादिवदिति ।

शब्दनित्यत्वे मीमांसकाभिमते नैयायिकस्य त्रिचतुरकक्षाबाधाऽनवतारेऽपि क्रमबाध्यत्वस्वीकार इत्यर्थः, तथाच—यथा कतिपयकक्षायां बाधविरहाऽधीनोऽभ्युपगमोऽभ्युपगम्यमानो वार्थः सिद्धान्त(१)स्तथा कारणत्वाऽकारणत्वव्यवस्थितिरपि तावतैव (२), नतु सर्वप्रकाराऽबाध्यतयेति भावः ॥ ननु तथैव (३)किं नस्यादित्यत आह—। [d] "अन्यथे"ति । सर्वप्रकाराऽबाध्यत्व निबन्धनश्चेत्सिद्धान्तस्तदैक एव सिद्धान्तो भवेत् सर्वेषां दर्शनानामिति सिद्धान्तभेदकृतो दर्शनभेदोऽपि न स्यादित्यर्थः । यद्वा त्रिचतुरकक्षाबाधवैधुर्यमात्राद्यदि पारमार्थिकत्वं मनुषे, तदा सर्वदर्शनसिद्धान्तः पारमार्थिक एवेति पारमार्थिकत्वाऽपारमार्थिकत्वैमत्यनिबन्धनो दर्शनभेदो न भवेदित्यर्थः । * ननु सर्वबाध्यत्वेऽपि दर्शनभेदोऽनुपपन्न एव * ?। नैवम्, मद्दर्शनस्याऽबाध्यत्वात्, तथाच—वक्ष्यामः (४) 'तत्त्वप्रकाशपरमार्थचिदेव भूत्वे"तीति भावः ॥

मू० [a] एतेन 'असत्त्वाविशेषेऽपि कथं कस्यचित्पक्षस्य त्रिचतुरकक्षाबाधावित्वाऽबाधावित्वमास्ताम्'—इत्यपि निरस्तम् । [b] * अनेवंबुद्धिविषयतादृशायां को विशेषः * ?—इति चेत्, [c] यदाकदापि तादृशबुद्धिविषयतैव ।

टी० ननु रासभे घटप्राक्सत्त्वज्ञानवद्गुण्डेऽपि चेत्तद्बाध्यमेव तदा त्रिचतुरकक्षाबाधितत्वाऽबाधितत्वलक्षणोऽपि विशेषो न भवत्येवेत्यत आह—। [a] "एतेने"ति । शुक्तौ रजतत्वज्ञानस्य, शब्दे नित्यत्वज्ञानस्य च, बाध्यत्वाऽविशेषेऽपि त्वयाप्येतादृशस्यार्थनियमस्याऽभ्युपगमेनेत्यर्थः । यद्वा परकीयसर्वसिद्धान्तानां बाध्यत्वे बहुकक्षाबाधावित्वाऽबाधावित्वविशेषः किं निबन्धनः ? इत्यत आह—। "एतेने"ति । परसिद्धान्तस्थले रजतज्ञाने च त्वयाप्येतादृशस्य विशेषस्याऽभ्युपगमेनेत्यर्थः ॥ ननु कारणाऽकारणयोः

(१) सिद्धान्त इत्यत्र मीमांसकस्येति शेषः ।
(२) तावतैव=त्रिचतुरकक्षाबाधाऽबाध्यतयैव ।
(३) तथैव=सर्वप्रकाराऽबाध्यतयैव सिद्धान्तः किं न स्यादित्यर्थः ।
(४) चतुर्थपरिच्छेदप्रारम्भे वक्ष्याम इत्यर्थः ।

Digitized by Google

कार्य्यप्राक्कालसत्त्वासत्त्वे यदि न वस्तुनी, किंतु बुद्धिमात्रकृते, तदा तादृशबुद्ध्यभावकाले कारणस्याऽकारणाद्विशेषो न भवेदित्याशङ्कते—। [b] "अनेवमि"ति ॥ इदमस्मान्नियतप्राक्सदिति बहुकक्षाधाविनियतबुद्धिविषयत्वाऽत्यन्ताभावाऽनधिकरणत्वमेवाऽकारणात्कारणस्य विशेष इति परिहरति—। [c] "यदाकदापी"ति । यद्यपि यस्यकस्यचिद्भ्रासभेऽपि तादृशबुद्धिविषयत्वमिति सोऽप्येवं कारणं स्यात्, कारणेऽपि च कस्यचित्स्वयमबुद्ध्यैव कारणत्वव्यवहारो, नाऽनेककक्षाधाविधिया, अन्यस्याऽनेककक्षाधाविबुद्धिविषयत्वसत्त्वेऽप्यन्यस्य तदज्ञानात्कारणत्वव्यवहारो न स्यादिति कारणत्वं वस्तु स्वीकर्तुमर्हति, तथापि तादृशी(१)बुद्धिः तद्व्यवस्थापिकेति तथापि दुर्घटमिति हृदयम् ॥

खं० [a] "अन्यथा कथञ्च कथम् अन्यदातनतादृशबुद्धिविषयतयाऽन्यदा सत्त्वं स्यात्। [b] *तदा सत्त्वमन्यदास्थेन गृह्यते* ?—इति चेत्, [c] अन्यकालिकमेव तर्हि तत् तदातनकारणत्वोपयोगीति समानम्। [d] तदेतत्संवृतिसत्त्व(२)मिति गीयते। [e] असती सा न विशेषिका, सती सा नेष्टा, इत्यभिसन्धानेन संवृतिरपि सती नैवेति पृच्छन्(३) प्रतिवक्तव्यः, [f] विज्ञानं तावद्व्यवहारोपपादकतया द्वाभ्यामप्यनुमतं, तस्यापि जिज्ञासायां चिचतुरकक्षाविश्रान्तगवेषणस्य यदि सत्तोपपन्ना भविष्यति तदा सता [g] तेनेदमुपपादितं भविष्यति,

(शेषमग्रे)

(१) तादृशी बुद्धिः=इदमस्मान्नियतप्राक्सदित्येवंभूता बुद्धिः, तद्व्यवस्थापिका=इति दण्डादौ कारणत्वव्यवस्थापिका,-इति तथापि दुर्घटमित्यर्थः ।

(२) संव्रियतेऽनयेति संवृतिरविद्या, असत्यकाशनशक्तिरिति यावत्; तथा च संवृतिसत्त्वमित्यस्याऽऽविद्यकं सत्त्वमिति पर्यवसितोऽर्थः ।

(३) 'पृच्छन्'-इत्यस्य यथाकथञ्चित् प्रतिक्षिपन्नित्यर्थः, कतिपयपुस्तके तु 'सती नैव'-इत्यस्य स्थाने 'सती न वा'-इति पाठः, तत्र तु पृच्छन्नित्यस्य यथाश्रुत एवार्थः ।

Digitized by Google

॥ श्रीः ॥

श्रौतपदार्थनिर्वचनम् ।

अथ पाशुकपदार्थानां नामान्युच्यन्ते ।

(Continued from page 56 Vol VII.)

१३० होता यक्षदुषासानक्ता बृहती सुपेशसा नृःपतिभ्यो योनिं कृण्वाने ॥ संस्मयमाने इन्द्रेण देवैरेदम्बर्हिः सीदतां वीतामाज्यस्य होत० ॥ ८ ॥ अयमुषासानक्ताप्रैष उच्यते ॥

१३१ होतायक्षद्दैव्याहोतारामन्द्रापोतारा कवीप्रचेतसा ॥ स्विष्टमद्यान्य: करदिषास्वभिगूर्तमन्यऊर्जासतवसेमं यज्ञं दिवि देवेषु धत्तां वीतामाज्यस्य० ॥ १३० ॥ अयं दैव्यहोतृप्रैष उच्यते ॥

१३२ होतायक्षत्तिस्रोदेवीरपसामपस्तमाऽच्छि द्रमद्येदमपस्तान्वताम् ॥ देवेभ्यो देवीर्देवमपो व्यन्त्वाज्यस्य० ॥ ६ ॥ अयं तिसृणां देवीनां प्रैष उच्यते ॥

१३३ होतायक्षत्त्वष्टारमचिष्टुमपाकं रेतोधां विश्रवसं यशोधाम् ॥ पुरुरूपमकामकर्शनं सुपोष: पोषै: स्यात्सुवीरो वीरैर्वेत्वा० ॥ १० ॥ अयं त्वष्टृप्रैष उच्यते ॥

१३४ होतायक्षद्वनस्पतिमुपावस्रक्षद्धियोजोष्टारं शशमं नर: ॥ स्वदात्स्वधितिर्ऋतुथाद्यदेवो देवेभ्यो हव्यावाड्वेत्वा० ॥ ११ ॥ अयं वनस्पतिप्रैष उच्यते ॥

१३५ होतातु दण्डप्रदानानन्तरं होतृषदनस्य पश्चादवस्थायाहे दैधिषव्य इत्यादि मन्त्रेण होतृषदनाभिमन्त्रणादि स्रुगादापनान्तं प्रकृतिवत् करोति । प्रयाजसम्बन्धिन्यो याज्या ऋचो यत्र पठितास्तानि सूक्तान्याप्रीसूक्तानीति गीयन्ते ॥

१३६ शौनकगोत्रस्य यजमानस्य समिद्धो अग्निर्निहित: पृथिव्यामित्याप्रीसूक्तं भवति । वासिष्ठगोत्रस्य जुषस्व न: समिधमिति सूक्तम् । अन्येषां सर्वेषां समिद्धो अद्य मनुषो दुरोण इति सूक्तम् ।

इत्येकः पक्षः । सुसमिद्धो न आवहेति काण्वगोत्रस्याप्रीक्तम् । समिद्धो अग्न आवहेति आङ्गिरसगोत्रस्य । समिद्धो अद्य राजसीति आगस्त्यगोत्रस्य । समित्समित्सुमना बोध्यस्मे इति विश्वामित्राणाम् । सुसमिद्धाय शोचिषेत्यात्रेयगोत्रस्य । समिद्धो विश्वतस्परीति काश्यपगोत्रस्य । इमां मे अग्ने समिधं जुषस्वेति वाध्र्यश्वगोत्रस्य । समिद्धो अद्य मनुषो दुरोण इति जामदग्न्यगोत्रस्यानुक्तानामन्येषां च । इति द्वितीयः पक्षः । अध्वर्युप्रेषितो मैत्रावरुणः पूर्वोक्तैः समित्प्रैषादिप्रैषैर्होतारं प्रेष्यति । होता यजमानगोत्रानुसारेण तत्तत्सूक्तगता आप्रीसंज्ञकयाज्याः पठति । पर्यग्नये क्रियमाणायानुब्रूहीति प्रेषितो मैत्रावरुणः अग्निर्होता नो अध्वर इति तृचं सूक्तं अभिहिंकारानन्तरं आद्योत्तमे ऋचौ त्रिरभ्यस्यान्वाह । एतदनुवचनं पर्यग्निकरणसाधनत्वात्करणल्युटा पर्यग्निकरणमित्युच्यते ॥

१३७ ततो मैत्रावरुणो होतारं प्रेष्यति । अजैदग्निरसनद्वाजं नि देवो देवेभ्यो हव्यवाट् प्राञ्जोभिर्हिन्वानो धेनाभिः कल्पमानो यज्ञस्यायुः प्रतिरन्नुपप्रेष्य होतर्हव्या देवेभ्य इति । अयमध्रिगुप्रैषप्रैष इत्युच्यते ॥

१३८ ततो मैत्रावरुणप्रेषितो होता ऽध्रिगुप्रैषमाह । दैव्याः शमितार आरभध्वमुत मनुष्या उपनयत मेध्या दुर आशासाना मेधपतिभ्यां मेधम् । प्रास्मा अग्निं भरत स्तृणीत बर्हिरन्वेनं माता मन्यतामनु पिता ऽनु भ्राता सगर्भ्यो ऽनु सखा सयूथ्यः । उदीचीनां अस्य पदो निधत्तात्सूर्यं चक्षुर्गमयताद्वातं प्राणमन्ववसृजतादन्तरिक्षमसुं दिशः श्रोत्रं पृथिवीं शरीरम् । एकधास्य त्वचमाच्छ्यतात्पुरा नाभ्या अपिशसो वपामुत्खिदतादन्तरेवोष्माणं वारय

ध्यात् । श्येनमस्य वक्षः कृणुतात्प्रशसा बाहू शला दोषणी कश्य-
पेवांसाच्छिद्रे श्रोणी कवषोरू स्रेकपर्णाष्ठीवन्ता षड्विंशतिरस्य वङ्क्रय-
स्ता अनुष्ठ्योच्यावयताद्गात्रं गात्रमस्यानूनं कृणुतात् । ऊव-
ध्यगोहं पार्थिवं खनतात् । अस्नारक्षः संसृजतात् । वनिष्ठु-
मस्य माराविक्षोह्युरुकं मन्यमाना नेद्वस्तोके तनये रविता रवच्छ-
मितारः । अध्रिगो शमीध्वं सुशमि शमीध्वं शमीध्वमध्रिगा३उ ।
अपाप ॥ इति । अध्रिगो इत्यादि अपापेत्यन्तं त्रिवारं
पठति । अयमध्रिगुप्रैष इत्युच्यते ॥

१३९ अत्र प्रैषे अस्नारक्षः संसृजतादिति वाक्यं उपान्त्यवाक्यस्थं शमि-
तार इति पदं अन्त्यवाक्यस्थं अपापेति पदं चोपांशु प्रयुज्य-
ते । ततः शमितारो यदत्र सुकृतं कृणवथास्मासु तद्यद्दुष्कृ-
तमन्यत्र तदिति मन्त्रं जपित्वा यथोपविष्ट एव दक्षिणाङ्गेनावृत्य
प्रत्यङ्मुखो विहारं पृष्ठतः कृत्वास्ते । एवं मैत्रावरुणोपि । पशु-
संज्ञपनानन्तरं होतृमैत्रावरुणौ तथैवावृत्य प्राङ्मुखावासाते ।
वपाश्रपणकाले अध्वर्युणा स्तोकेभ्योऽनुब्रूहीति प्रेषितो मैत्राव-
रुणो जुषस्व सप्रथस्तममित्यृचमिमं नो यज्ञमिति सूक्तं चाध्यर्ध-
कारवर्जं सामिधेनीवदन्वाह । इदं स्तोकानुवचनमित्युच्यते ॥

१४० अध्वर्युणा स्वाहाकृतीभ्यः प्रेष्येति प्रेषितो मैत्रावरुणो होतारं
प्रेष्यति । होता यक्षदग्निं स्वाहाऽऽज्यस्य स्वाहा मेदसः स्वाहा
स्तोकानां स्वाहा स्वाहा कृतीनां स्वाहा हव्यसूक्तीनां स्वाहा देवा
आज्यपा जुषाणा अग्न आज्यस्य व्यन्तु होतर्यजेति । अयमेका-
दशस्य प्रयाजस्य प्रैषः स्वाहाकृती प्रैष इत्युच्यते ॥

१४१ उक्तप्रैषेण प्रेषितो होता मन्त्रेण निरसनोपवेशने कृत्वाऽग्नि-
र्होतावेत्वित्यादि स्रुगादापनं पठित्वा एकादशीं प्रयाजयाज्यां

पठति । सौम्याज्यभागौ । मैत्रावरुणोऽनुवाक्यां पठति । प्रैषांश्चादेश्यमनुवाक्यां चैत्याश्वलायनसूत्रे मैत्रावरुणो यत्र यागे प्रैषति तत्र स एवानुवाक्यां पठेदित्युक्तत्वात् । होता यक्षदग्निमाज्यस्य जुषतां हविर्होतर्यजेति प्रैषं मैत्रावरुणोऽध्वर्युणाऽग्नय आज्यस्यावदीयमानस्यानुब्रूहीति प्रेषितः पठति । अयं होता यक्षदित्यादिप्रैष आग्नेयाज्यभागप्रैष इत्युच्यते ॥

१४२ अनेन प्रेषितो होताऽग्निं जुषाणो अग्निराज्यस्येति याज्यां पठति । अध्वर्युणा सोमायाज्यस्यावदीयमानस्यानुब्रूहीति प्रेषितो मैत्रावरुणोऽनुवाक्यां पठति । ततोऽध्वर्युणा सोमायाज्यं प्रस्थितं प्रेष्येत्युक्ते प्रशास्ता होता यक्षत्सोमायाज्यस्य जुषतां हविर्होतर्यजेति प्रैषेण होतारं प्रेष्यति । अयं प्रैषः सौम्याज्यभागप्रैष इत्युच्यते ॥

१४३ अनेन प्रेषितो होता ये यजामहे सोमं जुषाणः सोम आज्यस्य हविष इति याज्यां पठति । अध्वर्युणा इन्द्राग्निभ्यां छागस्य वपाया मेदसोऽवदीयमानस्यानुब्रूहीति प्रेषितो मैत्रावरुण आवृत्रहणा वृत्रहभिः शुष्मैरित्यनुवाक्यां पठति । तत इन्द्राग्निभ्यां छागस्य वपाया मेदसः प्रेष्येति प्रेषितः सन् होता यक्षदिन्द्राग्नी छागस्य वपाया मेदसो जुषेतां हविर्होतर्यजेति प्रैषेण होतारं प्रेष्यति । अयं वपायाज्याप्रैष इत्युच्यते ॥

१४४ अनेन प्रेषितो होता शुचिं नु स्तोमं नवजातमद्येति याज्यां पठति । वपाहोमानन्तरं ब्रह्मा होता मैत्रावरुणश्च चात्वाले मार्जयन्ते सुमित्र्या न आप ओषधयः सन्तु दुर्मित्र्यास्तस्मै सन्तु योऽस्मान् द्वेष्टि यञ्च वयं द्विष्म इति मन्त्रेण । मैत्रावरुणस्तु दण्डं निधाय । इदं ब्रह्मादिवपामार्जनमित्युच्यते ॥

१४५ ततः पुरोडाशप्रचारपर्यन्तं प्रसाद्यस्तीर्थेन निष्क्रम्य तूष्णीमासते शृतेषु पश्वङ्गेषु तीर्थेन प्रविश्य पुरोडाशेन प्रचरन्ति । तत्राभरतं शिवतं वज्रबाहू इति मैत्रावरुणो ऽनुवाक्यां पठति इन्द्राग्निभ्यां पुरोडाशस्यावदीयमानस्यानुब्रूहीत्यध्वर्युणा प्रेषितः सन् अध्वर्युणा इन्द्राग्निभ्यां पुरोडाशं प्रस्थितं प्रेष्येत्युक्ते मैत्रावरुणो होतायक्षदिन्द्राग्नी पुरोडाशस्य जुषेतां हविर्होतर्यजेति वदति । अयं पशुपुरोडाशयाज्याप्रैष इत्युच्यते ॥

१४६ ततो होता गीर्भिर्विप्रः प्रमतिमिच्छमान इति याज्यां पठति । ततो ऽध्वर्युणा ऽग्नये ऽनुब्रूहीत्युक्ते इळामग्ने पुरुदंसं सनिं गोरित्यनुवाक्यां मैत्रावरुणः पठति । अध्वर्युणा ऽग्नये प्रेष्येत्युक्ते मैत्रावरुणो होतायक्षदग्निं पुरोडाशस्य जुषतां हविर्होतर्यजेति पठति । अयं पुरोडाशस्विष्टकृत्प्रैष इत्युच्यते ॥

१४७ ततो होता स्वदस्व हव्या समिषो दिदीहीति याज्यां पठति । अयं पशुपुरोडाशप्रचार इत्युच्यते ॥

१४८ इडाभक्षणान्ते मार्जनम् । मनोतायै हविषो ऽवदीयमानस्यानुब्रूहीत्यध्वर्युणा प्रेषितो मैत्रावरुणः अभिहिंकृत्य अध्यर्धकारवर्जं सामिधेनीवत् त्वं ह्यग्ने प्रथमो मनोतेति सूक्तमन्वाह । एतत् मनोतासूक्तमित्युच्यते ॥

१४९ अध्वर्युणा इन्द्राग्निभ्यां छागस्य हविषो ऽनुब्रूहीत्युक्ते मैत्रावरुण उभावामिन्द्राग्नी आहुवध्या इत्यनुवाक्यां पठति । अध्वर्युणा इन्द्राग्निभ्यां छागस्य हविः प्रस्थितं प्रेष्येत्युक्ते मैत्रावरुणो होतायक्षदिन्द्राग्नी छागस्य हविष आत्तामद्य मध्यतो मेदउद्भृतं पुरा द्वेषोभ्यः पुरा पौरुषेय्या गृभः । घस्तां नूनं घासे

अज्राणां यवसप्रथमानां सुमत्क्षराणां शतरुद्रियाणामग्निष्वात्तानां पीवोपवसनानां पार्श्वतः श्रोणितः शितामतउत्सादतोऽङ्गादङ्गादवत्तानां करत एवेन्द्राग्नी जुषेतां हविर्होतर्यजेति प्रैषेण होतारं प्रेष्यति । ततो होता प्रचर्षणिभ्यः पृतनाहवेष्विति याज्यां पठति अस्या अर्धर्चं पठित्वा यावत्प्रतिप्रस्थाता वसाहोमं करोति तावद्विरमति । जाते वसाहोमे उत्तरार्धर्चेन वषट्करोति । अध्वर्युणा वनस्पतये ऽनुब्रूहीत्युक्ते मैत्रावरुणो देवेभ्यो वनस्पते हवींषीति पुरोनुवाक्यां पठति । अध्वर्युणा वनस्पतये प्रेष्येत्युक्ते मैत्रावरुणो होतायक्षद्वनस्पतिमभिहिपिष्टतमयारभिष्ठयारशनयाधित । यत्राग्नेराज्यस्य हविषः प्रियाधामानि यत्र सोमस्याज्यस्य हविषः प्रियाधामानि यत्रेन्द्राग्न्योश्छागस्य हविषः प्रियाधामानि यत्र वनस्पतेः प्रिया पाथांसि यत्र देवानामाज्यपानां प्रियाधामानि यत्राग्नेर्होतुः प्रियाधामानि तत्रैतं प्रस्तुत्येवोपस्तुत्येवोपावस्रक्षद्रभीयांसमिव कृत्वीकरदेवं देवो वनस्पतिर्जुषतां हविर्होतर्यजेति प्रैषेण होतारं प्रेष्यति अयं वनस्पतियाज्याप्रैष इत्युच्यते ॥

१५० ततो होता वनस्पतेरशनया नियूयेति याज्यां पठति । अध्वर्युणा ऽग्नये स्विष्टकृते ऽनुब्रूहीत्युक्ते मैत्रावरुणः पिप्रीहि देवाँ उशतो यविष्ठेत्यनुवाक्यां पठति । अध्वर्युणा ऽग्नये स्विष्टकृते प्रेष्येत्युक्ते मैत्रावरुणो होतायक्षदग्निं स्विष्टकृतमयाळग्निरग्नेराज्यस्य हविषः प्रियाधामान्ययाट् सोमस्याज्यस्य हविषः प्रियाधामान्ययळिंद्राग्न्योश्छागस्य हविषः प्रियाधामान्ययाड्वनस्पतेः प्रियापाथांस्ययाड्देवानामाज्यपानां प्रियाधामानि

Digitized by Google

यक्षदग्नेर्होतुः प्रियाधामानि यक्षत्स्वं महिमानमायजतामे- ज्याइषः कृणोतु सोऽअध्वराजातवेदा जुषतां हविर्होतर्यजेति होतारं प्रेष्यति । अयं पशुस्विष्टकृद्याज्याप्रैष इत्युच्यते ॥

१५१ ततो होतास्विष्टकृन्निगदरहितामग्नेयदद्यविशो अध्वरस्य हो- तरिति याज्यांपठति । ततः पश्विडाभक्षणं मार्जनान्तं कृत्वा ऽनुयाजेश्चरन्ति अध्वर्युणा देवेभ्यः प्रेष्येत्युक्ते मैत्रावरुणः देवं बर्हिः सुदेवन्देवैः स्यात्सुवीरं वीरैर्वस्तोर्वृज्येताक्तोः प्रभ्रियेता- त्यन्यान्नायावर्हिष्मतोमदेमवसुवनेवसुधेयस्यवेतु यजेति होता- रम्प्रेष्यति । होता प्राकृतेनैव प्रथमानुयाजेन यजति । अध्वर्यु- णा प्रेष्येत्युक्ते मैत्रावरुणः देवीर्द्वारः संघाते विड्वीर्यामंछिथिरा- ध्रुवादेवहूतौ वत्सईमे नास्तरुणा आमिमीयात्कुमारोवानवजा- तोमेनाअर्वारेणुककाटः पृणग्वसुवने वसुधेयस्य व्यन्तु यजेति होतारं प्रेष्यति । होतादेवीर्द्वारोवसुवने वसुधेयस्यव्यन्तुवौऽष- डिति याज्यां पठति । अध्व० रुणः देवीउषासा नक्ता द्यास्मि- न्यज्ञे प्रयत्यह्वेतामपिनूनं देवीर्विशः प्रायासिष्टां सुप्रीते सुधिते वसु- वने वसुधेयस्य वीतां यजेति होतारं प्रेष्यति । स देवीउषासानक्ता- वसुवने वसुधेयस्य वीतां वौषडिति यजति । अध्व० रुणः देवी- जोष्ट्री वसुधितीययोरन्याघाद्वेषांसि युयवदान्यावक्षद्वसुवार्याणि यजमानाय वसुवने वसुधेयस्य वीतां यजेति होतारं प्रेष्यति । होतादेवीजोष्ट्रीव०वीतां०डिति यजति । अध्व०रुणः देवीऊ- र्जाहुतीइषमूर्जमन्यावक्षत्सग्धिंसपीतिमन्यानवेन पूर्वं दयमानाः स्याम पुराणेन नवंतामूर्जमूर्जाहुतीऊर्जयमाने अधातां वसुवने वसुधेयस्य वीतां यजेति होतारं प्रेष्यति । होतादेवीऊर्जाहुती-

Digitized by Google

वसु०वीतां०हिति यजति। अध्व०हृष: देवा दैव्या होतारा नेष्टारा पोतारा हताघशंसा वा भरद्वसूवसु०ष्यति। होता देवा दैव्याहोतारा वसु०वीतां०हिति यजति। अध्व०हृष: देवीस्तिस्रस्तिस्रो देवीरिळासरस्वती भारती द्यांभारत्यादित्यैरस्पृक्षत्सरस्वतीमं रुद्रैर्यज्ञमावीदिहैवेळयावसुमत्या सधमादंमदेम वसुवने वसुधेयस्य व्यन्तु यजेति होतारं प्रेष्यति। होता देवीस्तिस्रस्तिस्रो वसु०व्यंतु३वे३०हिति यजति। अध्व०हृष:देवो नराशंसस्त्रिशीर्षा षडक्ष: शतमिदेनं शितिपृष्ठा आदधति सहस्रमींप्रवहन्तिमित्रावरुणेदस्य होत्रमर्हतो बृहस्पतिस्तोत्रमश्विनाध्वर्यवंवसु०वेतुयजेति०ष्यति। होतादेवो नराशंसोव सु०वेतु३०जति। अध्व०हृष: देवोवनस्पतिर्वर्षप्रावाघृतनिर्णिग्द्यामग्रेणास्पृक्षदान्तरिक्षंमध्येनाप्रा: पृथिवीमुपरेणादृंहीद्वसु०वेतुयजेति हो०ति। होतादेवोवनस्पतिर्वसु०वेतु३०जति। अध्व०हृष: देवं बर्हिर्वारितीनां निधेधाप्रिवच्युतीनामप्रच्युतंनिकामधरणंपुरुस्पार्हं यशस्वदेना बर्हिषान्या बर्हींष्यभिष्यामवसु०वेतु यजे०ष्यति। होतादेवं बर्हिर्वारितीनां वसु०वेतु३०जति। अध्व०हृष: देवोअग्निः स्विष्टकृत्सुद्रविणामन्द्र: कवि: सत्यमन्मायजीहोताहोतुर्होतुरायान्‌ग्नेयान् देवानयजीषाङ्क्ष्यां अपिप्रयैतेहोत्रेऽअमत्सततांसनुषींहोत्रांदेवंगमां दिवि देवेषु यज्ञमेरयेमं स्विष्टकृच्चाग्नेहोताभूर्वसुवनेवसुधेयस्य नमोवाके वीहियजे०ष्यति। होताऽनेनन्यगदेन आदौ होतायक्षदित्यस्य स्थाने येयजामहइति पदं पठित्वा ऽन्तेयजेत्यस्य स्थाने वषट्कारं कृत्वा यजति। एते मैत्रावरुणेन पठ्यमाना एकादशप्रैषा अनुयाजप्रैषा इत्युच्यन्ते॥ (शेषमग्रे)

Digitized by Google

॥ श्रीः ॥

॥ श्रीं नमः श्रीमते भगवते रामानुजाचार्याय ॥

अथ श्रीभाष्यं विशिष्टाद्वैतपरं रामानुजदर्शनम्

श्रुतप्रकाशिकासमेतं विषमपदटिप्पणीसहितम्

तत्र प्रथमाऽध्यायस्यावशेषः ।

(*Continued from page* 48. Vol. VII)

नच तत्प्रतिज्ञानमहृदयमिति शङ्कनीयम् । दुष्परिहरबाधकानुपलम्भात् । यद्यपि कर्ममीमांसायां च क्वचित्क्वचिदर्वाचीनैर्व्याख्यातृभिराकुलत्वमापादितम् । तथापि तत्र तत्र प्रयोगमार्गे स्खलनाभावादनुष्ठानमात्राधीनायाः स्वर्गादिफलसिद्धेर्देवतास्वरूपतद्याथात्म्यसत्कार्यवादादिज्ञानमेरपेक्ष्यं, परमपुरुषार्थस्य च ज्ञानैकसाध्यतया ज्ञानमार्गस्खलनस्यात्म[1]हानिफलकत्वेन तद्विपरीतज्ञानानामवश्यपरिहर्तव्यत्वम्, उत्तरभागे च तत्तदर्थोपयिकतया प्रसक्तानां पूर्वभागार्थानां शिक्षणीयत्वं प्रदर्शितयैव दिशानुक्तानामपि शिक्षणीयार्थान्तराणां सुकरनिर्वाहत्वं चाभिप्रेत्य ब्रह्मसूत्राण्येव भगवान् भाष्यकारः प्रारभते विवरीतुम् । एवं प्रारिप्सितस्य प्रबन्धस्याविघ्नपरिसमाप्तिप्रचयगमनार्थं स्मृत्याचारसिद्धमिष्टदेवतोपासनरूपं मङ्गलं श्रोतमाचरति—

अखिलेत्यादिना श्लोकेन ।

मङ्गलाचारयुक्तानां नित्यं च प्रयतात्मनाम् ।
जपतां जुह्वतां चैव विनिपातो न विद्यते ॥ १ ॥

इति स्मर्यते ।

आचर्यते च तत्तत्प्रबन्धृभिः, श्रोतृबुद्धिसमाधानार्थे[2] शास्त्रार्थसंक्षेपश्चार्यतः क्रियते । यथा चोदनासूत्रेण धर्मस्वरूपं प्रमाणं च श्रुत्यर्थाभ्यां निरूपितम् । प्रसिद्धं हि श्रोतुः—

---

१ योऽन्यथा सन्तमात्मानमिति महाप्रत्यवायश्रवणादित्यर्थः ।
२ समवधानार्थमिति पाठान्तरम् ।

प्रतिपत्तिसौकर्याय वक्तुरर्थप्रतिपादनस्य संक्षेपपूर्वकत्वम् । दृष्टं हि विदुषां लोके समासव्यासधारणमिति शास्त्रार्थसंक्षेपेण वस्तुनिर्देशो भवत्वित्याशीर्वादश्च कृतो भवतः । "विनतेति" "भक्तिरूपे"ति च ब्रह्मणि प्रह्वीभावावगमात् प्रणतिरपि फलिता । णमु प्रह्वत्वे इति हि धातुः । एवं त्रिविधं मङ्गलमाचरितं भवति । श्लोकस्य प्रथमपादेन पूर्वस्याध्यायद्विकस्यार्थः संक्षिप्तः । द्वितीयेन तूत्तरद्विकस्य । कर्ममीमांसायां प्रतिपाद्यभेदेन षट्कभेदवदत्रापि विषयविषयिरूपप्रतिपाद्यभेदेन द्विकभेदः । शास्त्रप्रतिपाद्यमुपायोपेयात्मकम् । सिद्धोपाय उपेयश्च ब्रह्म । साध्योपायो भक्तिः । तत्र सप्तम्यन्तैः पदैः सिद्धोपायरूपमुपेयञ्च ब्रह्मोच्यते। भवतीति भुवनं कार्यवर्गः । रूढिशक्त्या तत्कारणस्य कुलालादितो व्यावृत्तिः भुवनशब्दो हि विपुलतरकार्यविशेषे रूढः, अखिलशब्देन सर्वदेशसर्वकालवर्तीन्यण्डजातानि विवक्षितानि तेन ब्रह्मादिव्यावृत्तिः, खिलं नास्तीत्यखिलं कार्येषु ब्रह्मणः सृष्ट्यादिव्यापाराविषयभूतं न किंचिदित्यर्थः । अनया व्यतिरेकोक्त्या प्रायिकत्वनिवृत्तिः । "अज्ञातं नास्ति ते किंचिदि"ति वत् । अतः सकलमित्यन्वयमुखेनानुक्तिः ॥ अकारोपक्रमत्वसिद्धये निखिलेत्यनुक्तिः । "अ"इति । भगवतो नारायणस्य प्रथमाभिधानं भगवतो वाचकम् । "अकारं प्रयुञ्जानेन किञ्चान मङ्गलं न कृतमि"ति चाभियुक्तैरप्यधायि । अत्र भगवद्वाचित्वाविवक्षायामपि भगवद्वाचकत्वशक्तियोगादकारो माङ्गलिकः । "अइउण्"। इत्यत्राकारवत् । नञो निषेधवाचित्वेपि निषेध्यवशात् शुभत्वाशुभत्वे । अतो "निष्प्रत्यूहमुपास्महे" इत्यादिनिर्देशस्येव शुभतरत्वं, वैकल्यनिषेधेन पौष्कल्यपरत्वात् । अखिल[1]शब्देन चिदचिद्भेदाप्यभिप्रेतः ॥ "जन्म" नित्यनैमित्ति[2]कप्राकृतरूपं 'स्थेमा'' स्थितिः । सा चान्तर्यामि–विभवावतार–लोकपाल–मन्वादि–नृप–मातापित्रादिमुखेन क्रियमाणा बहुविधा विव-

---

१ अखिलशब्दस्य सकलपर्यायतया साकल्यस्य च भेदघटितत्वेन तथा प्रयुञ्जानेन चिदचितोर्भेदोभिप्रेतइति भावः ॥

२ जन्मत्रैविध्यं पुराणोक्तभङ्गत्रैविध्यविधया ध्येयम् ॥

Digitized by Google

क्षिता "भङ्गः"। नित्य[1]नैमित्तिकप्राकृतरूपः। मोक्षस्य लयान्तर्भावेपि शास्त्रस्य परमप्रयोजनत्वादत्र स नान्तर्भावितः॥ अत एवादिशब्देपि नान्तर्भाव्यः॥ तस्य साधारणतया स्फुटप्रतिपत्तिहेतुत्वाभावात्॥ पृथगेव हि पूर्वैश्च स्फुटतरं निर्दिष्टो मोक्षः॥ "जगदु[2]द्भवस्थितिप्रणाशसंसारविमोचनादयः" इति॥ जगज्जन्मस्थितिध्वंसमहानन्दैकहेतव इति च भगवान् भाष्यकारश्च तथा निर्दिशति यथा वेदार्थसङ्ग्रहे "उद्भवस्थितिप्रलयसंसारनिवर्तनैकहेतुभूत" इति, भाष्ये च निखिलजगदुदयविभवलयमहानन्दैककारणे"मिति "विनते"त्यादिपदेन स्थेमान्तर्भूतस्वर्गादिसांसारिकफलप्रदत्वस्य पृथगुक्तिरनपेक्षिता शास्त्रासाधारणस्य परमप्रयोजनस्य मोक्षस्यैव हि पृथगुक्त्यपेक्षा। आदिशब्देन सृष्ट्याद्यौपयिकमन्तःप्रवेशनियमनादि गृह्यते तथा च भाष्ये स्वयमेव वक्ष्यति "जगदुत्पत्तिस्थितिसंहारान्तःप्रवेशनियमनादिलील"मिति जन्मस्थेमभङ्गानामेवान्तःप्रवेशनियमनादेरर्थसिद्धत्वाद्ग्रहणमयुक्तम्। अध्यासपरिणाम[3]पक्षयोस्तस्यार्थत्वाभावेन तद्व्यावृत्त्यर्थं स्वमते पृथग्वक्तव्यत्वाच्छाब्दत्वे संभवत्यार्थत्वकल्पनाऽयोगाद्विस्तरेणोक्तस्यार्थस्य संक्षेपोक्तौ विवक्षितत्वोपपत्तेश्च "लीला"शब्देन भगवतः परिपूर्णत्वानन्यप्रेर्यत्वस्वच्छन्दचेष्टितत्वादिकमभिप्रेतम्॥ यथोक्तम् महाभारते "अप्रमेयोऽनियोज्यश्च यत्र कामगमो वशी। मोदते भगवान् भूतैर्बालः क्रीडनकैरि"वेति। अप्रमेयत्वं परिपूर्णत्वम्। अनियोज्यत्वमनितरचेतनप्रेर्यत्वं यत्र कामगम इत्यनेन वायूदकादिप्रेरणाधीनाऽबुद्धिपूर्वपरिस्पन्दादिचेष्टाव्या-

---

१ नित्यः—प्रतिक्षणं भावेषूपचयापचयलक्षणः परे तु नित्यप्रलयपदेन सुषुप्तिलक्षणप्रलयमभिप्रयन्ति न च तल्लक्षणो विशिष्टाद्वैतमते, नैमित्तिकः—ब्राह्मनिशालक्षणः प्राकृतः—कार्यब्रह्मविनाशनिमित्तकसकलकार्यप्रणाशलक्षणः। अमुमेव विलयमात्यन्तिकमाचक्षते पौराणिकाः॥

२ यामुनाचार्यैरामानुजाचार्यप्राचार्यैः 'आलवन्दारस्तवे' तथाभ्यधायि समस्तपद्यं तु "स्वदाश्रितानां जगदुद्भवस्थितिप्रणाशसंसारविमोचनादयः। भवन्ति लीलाविधयश्च वैदिकास्त्वदीयगम्भीरमनोनुसारिणः" इति॥

३ यद्यपि स्वमतेपि परिणाम एवेति न स निराचिकीर्षितस्तथापि स्वसिद्धान्ते चिदचिद्विशिष्टस्य ब्रह्मणो वेदान्तप्रतिपाद्यत्वेन तच्छरीरभूताचित्पदार्थे परिणामाङ्गीकारेण न श्रुतिबोधितापरिणामित्वभङ्गप्रसङ्गो नापि वाल्लभानामिवाविकृते परिणामाङ्गीकार इति तद्व्युदासविवक्षया पार्थक्येनाभिधानं भाष्ये इति टीकाकृतामाशयः॥

Digitized by Google

वृत्तिः । स्वेच्छाकृतप्रवृत्तिविघातव्युदासो वा स्वाधीनलीलोपकरणत्वं वशि-शब्दार्थः । विश्वं वशे यस्य स वशी । इन्द्रियव्यापाराधीनचेष्टाव्यावृत्त्यर्थो वा वशि—शब्दः बालक्रीडनकदृष्टान्तेन लीलायाः प्रयोजनान्तरनैरपेक्ष्यमभिप्रेतम् । अनेन राज्ञां पक्षबन्धपूर्वकद्यूतादिव्यावृत्तिः । कार्यवर्गापेक्षया भगवन्महिम्नो विपुलतरत्वं "क्रीडनक"मित्यनेन फलितम् ॥

ननु प्रयोजकव्यापारो हि लीला, अतोभङ्गस्य लीलात्वे युक्तेऽपि कथं प्रयोज्यव्यापारभूतयोर्जन्मस्थित्योर्लीलात्वम् । उच्यते । "बहु स्यां प्रजायेये"ति हि श्रुतिः । अतः प्रयोजकव्यापारवत् प्रयोज्यव्यापारस्य च लीलात्वकथनेनोपादानत्वं फलितम् । लीलाशब्देन निमित्तत्वं च "भङ्गादी"त्यन्तेन प्रथमाध्यायार्थः संक्षिप्तः अवाप्तसमस्तकामस्य व्यापारानुपपत्तिं परिहरता लीलाशब्देन विरोधपरिहारपरद्वितीयलक्ष[1]णार्थः सूचितः एवं पूर्वद्विकोक्तं कारण[2]त्वरूपं परत्वं संक्षिप्तम् । तस्यैव पर[3]स्य ब्रह्मणः समाश्रयणीयताप्रतिपत्त्यर्थमुत्तरद्विकोक्तमभिगम्यत्वमोक्षप्रद[4]त्वलक्षणं सौलभ्यं संक्षिप्यते । "विनते"त्यादिपदेन केवलं परत्वं केवलं सौलभ्यं च कनकाचललोष्टशकलयोरिव न समाश्रयणीयत्वाय कल्पत इति तदुभयव्यावृत्त्यर्थमिदं पदद्वयम् । विशेषेण नताः प्रह्वीभूता विनताः न्यासोपासनात्मकाशेषविद्याविशेषनिष्ठाः सर्वे विवक्षिताः । वैविध्यं च "तदुपर्यपि बादरायणः संभवात्" "ऊर्ध्वरेतःसु चे"त्यादिना वक्ष्यमाणदेवत्वमनुष्यत्ववर्णाश्रमादिभेदेन जन्मगुणैश्चाभिप्रेतं भगवज्ज्ञानेन लब्धसत्ताकत्वं भूतशब्दार्थः । "अस्ति ब्रह्मेति चेद्वेद सन्तमेनन्ततो विदु"रिति हि श्रुतिः । लब्धस्वरूपाणां च "तेषामेवानुकम्पार्थमहमज्ञानजं तमः । नाशयाम्यात्मभावस्थः" ।

१ लक्षणमध्यायः । २ सर्वकारणत्वरूपम् ।

३ हिरण्यगर्भादिलोकपालव्यावृत्तस्य ।

४ तृतीयाध्यायस्योपायनिरूपणपरतया पञ्चाग्न्यादितत्त्वसिद्धोपायभावाया अभिगमनापरपर्यायायाः प्रपत्तेः पञ्चमोपायस्वरूपायाः शाण्डिल्यविद्याद्युपदेशमुखेन प्रतिपादनतया तस्योपायप्रतिपादनपरत्वं, चतुर्थाध्याये तु द्वितीयपादे "तदोकोऽग्रज्वलनं तत्प्रकाशितद्वारो विद्यासामर्थ्यात्तच्छेषगत्यनुस्मृतियोगाच्च हार्दानुगृहीतः शताधिकया" इति चोक्ते सूत्रे स्फुटमेव हार्दानुगृहीत इत्यनेन भगवतो मोक्षप्रदत्वमभिहितं स्मृतिरप्यमुमर्थमनुगृह्णाति "ददामि बुद्धियोगं तं येन मामुपयान्ति ते" इति ।

Digitized by Google

"ददामि बुद्धियोगं तम्" । "अहं स्मरामि मद्भक्तमि"त्याद्युक्तप्रकारेण प्राप्तप्राप्यविरोधि-निवर्तनादिकं हि भगवत एव भार इति । न स्वक-प्रच्युतिसंभवः । भूतसंबन्धी व्राती भूतव्रातः । संश्रितसंबन्धिनोऽपि तत एव कारणाद् भगवता रक्ष्या इत्यभिप्रायः । यथा "आस्फोटयन्ति पितरः प्रनृत्यन्ति पितामहाः, वैष्णवो नः कुले जातः स नः संतारयिष्यती"ति । "पशुर्मनुष्यः पक्षी वा ये च वैष्णवसंश्रयाः । तेनैव ते प्रयास्यन्ति तद्विष्णोः परमं पदमि"ति च ॥

ननु षष्ठ्यन्तनिर्दिष्टानतिरिक्तविषयः समुदायशब्दः, यथा 'ब्राह्मणसमाज'इति । नैवम् । राजपरिषदित्यादिष्वतिरिक्तस्यापि दर्शनात्, समासान्तर्गतायाः षष्ठ्याः संबन्धमात्रविषयत्वात् षष्ठ्यन्तनिर्दिष्टानतिरिक्तत्वनियमस्यानुशासनाभावाच्च समुदायशब्दे श्रुते समुदायिनः के ? इत्यपेक्षायां संनिहितशब्दवाच्यनिष्ठः समुदायः शीघ्रं प्रतीयत इति, ब्राह्मणसमूह इत्यादिष्वनतिरेकप्रतीतिः । राजपरिषदित्यादिष्वतिरिक्तस्यापि दर्शनात् तत्तत्समुदायिग्राहकप्रमाणानुरोधेनार्थवर्णनं युक्तमिति यथोक्त एवार्थः । एवं च सति व्रात-शब्दप्रयोगस्यार्थवत्त्वं स्यात् इष्टप्रापणपर्यन्तानिष्टनिवारणलक्षणा रक्षा तस्यामेकदीक्षः प्रधानदीक्षः "दीक्षा"-संकल्पः स्वरक्षाया अपि संश्रितरक्षासंकल्पनिर्वर्तनस्यात्यन्ताभिमतत्वं प्राधान्यम् । "अप्यहं जीवितं जह्या"मिति ह्युक्तम् । "काममात्मानं भार्यां पुत्रं वोपरुन्ध्यान्न त्वेव दासकर्मकरमि"ति चापस्तम्बः । ईदृशीयं स्मृतिर्यस्याज्ञा, तस्यापि तथानुष्ठानस्याभिमततरत्वम् । "अप्यहं जीवितं जह्या"मित्यनेनावगम्यते । दीक्षायाः प्राधान्येन रक्षाप्राधान्यं फलितम् । दीक्षा-शब्देनाश्रितसंरक्षणस्य स्वप्रयोजनत्वं दर्शितम् । व्रतभंगसमाप्त्योरनर्थाभ्युदयफलित्वं हि व्रतिन एव, संश्रितरक्षणं च तद्व्रतम् । यथा "ददाम्येतद्व्रतं मम"इति । विरत-रक्षा-शब्दाभ्यां तृतीयचतुर्थाध्यायार्थौ संक्षिप्तौ । एवं जगत्कारणत्वमोक्षप्रदत्वे कथिते, एते हि राज्ञः छत्रचामरवद् ब्रह्मणोऽसाधारणे चिह्ने ममत्वसौलभ्ये च संश्रयणीयतायामिति निमित्ततयावगते

यथा "य एनं विदुरमृतास्ते भवन्ती"त्युपक्रम्य[1] "संबाहुभ्यां धमति संपतत्रैर्द्यावाभूमी जनयन् देव एक" इति, "सर्वलोकमहेश्वरं सुहृदं सर्वभूतानां ज्ञात्वा मां शान्तिमृच्छती"ति च । प्रमेयशरीरं साधीयः यदि प्रमाणमुपलभामहे इत्यपेक्षायां त्रिकटुयशेषभूतचतुःसूच्यर्थं वदन् प्रमेयानुरूपं प्रमाणं दर्शयति । "श्रुतिशिरसि विदीप्ते"इति श्रूयते नित्यमिति श्रुतिः, अनेनापौरुषेयत्वान्निर्दोषत्वं विवक्षितम् । अत एव पूर्वमीमांसान्यायानां प्रामाण्याद्युपयोगिनामत्रोपजीव्यत्वं सूचितं शिरः–शब्देनानन्यपरत्वं विवक्षितम् । परतत्त्वप्रधानामन्त्रब्राह्मणभागाद्युपनिषदः "विदीप्ते" पूर्वभागेऽपि अग्नीन्द्रादिरूपतया ब्रह्मण एव प्रतिपाद्यत्वं "तदेवाग्नि[2]स्तदादित्यस्तद्वायु"रित्यादिनोपनिषद्वाक्येनैव ज्ञायत इति विशेषेण दीप्तं यद्वा क्षुद्रसुखसाधनभूतदुःखात्मकप्रवृत्तिनिवृत्तिरूपं प्रयोजनं पूर्वभागे दीप्तं ब्रह्म तु स्वयं निरतिशयानन्दरूपतया परमपुरुषार्थभूतमुपरितनभागे विशेषेण दीप्तमिति भावः । अनेन समन्वयाधिकरणार्थः सूचितः । तत्पूर्वाधिकरणत्रयार्थश्चात्र द्योतितो भवति व्युत्पत्तिलक्षणसौष्ठवाभावे श्रुतिशिरोवैयर्थ्यायोगात् श्रुतिशिरःशब्दस्य प्रमाणान्तरव्यावर्तकत्वाच्च । "ब्रह्मणी"ति सामान्यपदमौपनिषदानां सद्ब्रह्मात्मादिसामान्यशब्दानां प्रदर्शनार्थम् । "श्रीनिवास"इति विशेषपदं नारायणादिविशेषशब्दानां प्रदर्शनार्थम् । "पशुना यजेत" "छागस्य वपाया मेदस" इत्यत्र "छागो वा मन्त्रवर्णा"दिति सूत्रोक्तन्यायेन पशुशब्दस्य छागशब्दपर्यवसायित्वनिर्णयात् सामान्यवाचिपदानां विशेषपदे सति तात्पर्यावसायित्वात् सद्ब्रह्मादिसामान्यपदानां नारायण एव विशेषे पर्यवसानं सूचितम् । श्रीनिवास–शब्दस्यावयवशक्त्या नित्यविभूतिमत्त्वं सूचितं रूढिशक्त्या त्रिमूर्तिसाम्यं तदैक्यं ब्रह्मणस्तदुत्तीर्णत्वं च निषिद्धम् । ईश्वर एव ब्रह्म स त्रिमूर्त्यतिरिक्तः । सदाशिवः ब्रह्मादयस्त्रयोऽप्यनीश्वरा इति पक्षश्च व्युदस्तः "परस्मिन्नि"ति "परमतः सेतू न्माने"त्यधिकरणार्थः सूचितः । तेनैवोपेयान्तरव्यावृत्तिः

---

१ शुक्लयजुः संहितायाः अ॰ १७ अ॰ १९ ॥

२ शुक्लयजुःसंहितायाः अ॰ ३२ अ॰ १ ॥ तत्संहितायाः अ॰ ३२ अ॰ १ ॥

'ब्रह्मविदाप्नोतिपर''मित्यत्र प्राप्यस्य परशब्देनाभिधानात् ॥ यद्वा कारणत्वशङ्कितदोषव्युदासाय "न स्थानतोपि परस्ये''त्यधिकरणसिद्धं शोधकवाक्योक्तमुभयलिङ्गतया वैलक्षण्यं सूचितम् । अथोपायस्वरूपं वदति "शेमुषीति'' अयं सामान्यशब्दः "भक्तिरूपे''ति विशेषशब्दः । अत्रापि "छागपशुन्यायवद्'' न्यायोऽभिप्रेतः । शेमुषीशब्दोपादानेन ज्ञानकर्मसमुच्चयमतव्यावृत्तिः । भक्तिरूपे''ति वाक्यार्थज्ञानव्यावृत्तिः । 'शुद्धभावङ्गतो भक्त्या शास्त्राद्वेद्मि जनार्दनम्'' । 'भक्त्या त्वनन्यया''"ज्ञातुं द्रष्टुं च तत्त्वेन प्रवेष्टुं'' चेत्युक्तप्रकारेण ज्ञानदर्शनप्राप्तिसाधनभूता भक्तिरत्र विवक्षिता अविशेषेण "भक्तिरूपे''त्युक्तत्वात् 'अहमस्म्यपराधानामालय'' इत्याद्युक्तप्रकारेण । स्वात्मानमनुसन्धायाह "ममेति'' 'भवत्वि''ति भक्तेरेव स्वादुतमतया प्रार्थनीयता सूचिता यद्वा न हि भक्तिः सर्वेभ्योपि स्वदत इत्यत्राह "ममेति'' मम—प्रतिबन्धकपापरहितस्य शान्ततापितस्य हि क्षीरे स्वादुतमताबुद्धिरिति भावः । रक्षैकदीक्षे परस्मिन्नित्यन्तैः सप्तम्यन्तैः पदैरुपेयभूत एव सिद्धोपाय उक्तः "भक्तिरूपे''ति साध्योपायः अत्र श्लोके शास्त्रप्रतिपाद्यैकदेशभूतः परपक्षप्रतिक्षेपश्चार्थतः सूचितो भवति जन्मस्थेमभङ्गादिशब्देन युगपत्सर्गादिकमनभ्युपगच्छन्तो भाट्टप्राभाकरा व्यावर्तिताः लीलाशब्देन साक्षिमात्रेश्वरवादिहैरण्यगर्भव्युदासः विनतेत्यादिपदेन जीवानां परस्परं ब्रह्मणा च भेदमनभ्युपयन्तो ब्रह्माज्ञानवादिनोऽपास्ताः श्रुतिशिरसीत्यनेन वेदबाह्यचार्वाकबुद्धार्हन्मतनिरासः तेनैव पदेनानुमानिकेश्वरवादिनो व्युदस्ता ब्रह्मणीत्यनेनाब्रह्मात्मकप्रधानपरमाणुकारणवादिसांख्यवैशेषिकादिव्युदासः श्रीनिवास—शब्देन पाशुपतादिव्युदासः । अनेनैवेश्वरोत्तीर्णब्रह्मवा[1]दिनो भेदाभेदवादिनो व्युदस्ताः शेमुषी—शब्देन ज्ञानकर्मसमुच्चयोपायवादिव्युदासः । भक्तिरूपेतिवाक्यार्थज्ञानमात्रोपायवादिव्युदास इत्येवमनुसन्धेयम् ॥

पाराशर्यवचः सुधामुपनिषद्दुग्धाब्धिमध्योद्धृताम् ।
संसाराग्निविदीपनव्यपगतप्राणात्मसंजीविनीम् ॥

१ ब्रह्मभिन्नशबलेश्वरवादिनः ।

श्रुतेरेवोपायोपेयावगतौ सत्यां किं भवतोवक्तव्यमित्यत्राह "पाराशर्येति" प्रथमश्लोकेन स्वप्रबन्धस्य परमप्रयोजनतया सिद्धरूपः परमविषयोदर्शितः साध्यरूपं प्रयोजनं च रसापदेनाभिसंहितम् । अथ द्वितीयेन श्लोकेन स्वप्रबन्धस्यावान्तरविषयः परम्परया ब्रह्मविषयत्वं स्वप्रबन्धं प्रति सम्यग्ज्ञानस्याव्यवहितावान्तरप्रयोजनत्वं परम्परया मुक्तेः प्रयोजनत्वं स्वव्याख्येयस्य प्रमाणमूलताकथनेन व्याख्येयान्तराणामप्रमाणमूलता स्वव्याख्येयविषयभाष्यान्तरव्यावृत्त्यर्थं स्वोक्तार्थस्य साम्प्रदायिकत्वमित्यादिद्योतमुच्यते स्तुत्यात्मकगुरूपासनरूपमङ्गलाचारश्चार्थतः क्रियते "जायमानं हि पुरुषं यं पश्येन्मधुसूदनः" । "तद्विद्धि प्रणिपातेन" "ददामि बुद्धियोगन्त"मित्यादिभिराचार्योपसत्तेरपि भगवत्कटाक्षहेतुकत्वावगमात् परदेवतोपासनानन्तरभावित्वं गुरूपासनस्य युक्तम् तथा च श्रुतिः ।

"यस्य देवे परा भक्तिर्यथा देवे तथा गुरा"विति । पूर्वैरपि तथा चरितम् । यथाभगवता वैशम्पायनेन "नमस्कृत्य हृषीकेशम्" "नमो भगवते तस्मै व्यासाये"ति । यथा च द्रमिडाचार्यैः "नमः प्रचुरगुणगणैकास्पदाय स्थिरचरकुलबीजकुम्भभूताय भुवनकोशस्य गोप्त्रे ब्रह्मणे नमो जैमिनये वेदरहस्यसंपुटनिगूढविस्फारयित्रे न्यायप्रज्वलितचेतसे नमोस्त्वाचार्येभ्य"इति पाश्चात्यैश्च "विशुद्धज्ञानदेहाय" "अभिवन्द्य गुरूनादा"विति "प्रणम्य हेतुमीश्वरं मुनिं कणादमन्वत"इति च पाराशर्य-शब्देन जन्मोत्कर्षः "सहोवाच व्यासः पाराशर्यः"इति श्रुतिसिद्धः ।

तस्यैव बादरायणसंज्ञत्वं च विवक्षितम् तथोक्तम् ।

महर्षिणात्र "द्वीपे बदरिकामिश्रे बादरायणमच्युतम् पराशरात्सत्यवती पुत्रं लेभे परन्तपमि"ति यद्यपि ऋष्यन्तरेपि बादरायणशब्दप्रयोगः तथापि सूत्रकृद्विषयोबादरायणशब्दः पाराशर्यगोचरएव तथाच स्कान्दे व्यक्तमुक्तम् ।

नारायणाद्विनिष्पन्नं ज्ञानं कृतयुगे स्थितम् ।
किंचित्तदन्यथा जातं त्रेतायां द्वापरे खिलम् ॥

(शेषमग्रे)

॥ माधवीयधातुवृत्तिः ॥

(Continued from page 8. VOL. VII.)

वह परिकल्कने ॥ कल्कनं शाठ्यम् । वहति । ववाह । वेहतुः । वहितेत्यादि । अवहीत् । ह्मन्तत्वाच वृद्धिः । विवहिषति । वावह्यते । वावाढि । 'हो ढः,' 'झषस्तथोर्धोऽधः' । 'ष्टुना ष्टुः,' 'ढो ढे लोपः' । ढ्रलोपेति दीर्घः । अयं चुरादौ मित्प्रकरणे कथादौ च मित्सु पान्तं मैत्रेयः पठिष्यति ॥ ७०० ॥

मह पूजायाम् ॥ महतीत्यादि । वहिवत् । महीति गौरादिपाठात् ङीष् । महिषः । अविमह्योष्टिषच् । टित्वात् स्त्रियां महिषी । महिषा अस्मिन् सन्ति महिष्मान् देशः । 'महिषाच्चेति वक्तव्यमि'ति 'तदस्मिन्नस्तीति देशे तन्नाम्नी'ति विषये डुमतुप् । डित्वाट्टिलोपः । महिष्मा धर्म्यं माहिषम् । 'अणमहिष्यादिभ्य' इत्यण् तस्य धर्म्यमिति विषये । महान् । महान्तौ । महान्तः । 'वर्तमाने पृषन्महद्बृहज्जगच्छतृवदित्यतिप्रत्यये निपातितः । शतृवद्भावाचुम् सान्तमहत इत्यसंबुद्धौ सर्वनामस्थाने दीर्घ उपधायां, संयोगापेक्षमुपधात्वम् । संबुद्धौ तु संयोगान्तलोपे हे महन् । शतृवद्भावादतिप्रत्ययस्य स्त्रिया मुगितश्चे'ति ङीपि महती । महांश्चासौ पुरुषश्च महापुरुषः । 'सन्महत्परमोत्तमोत्कृष्टाः पूज्यमानै'रिति पूजावचनाः सदादयः पूज्यवचनैः समानाधिकरणैः समस्यन्तइति तत्पुरुषे 'आन्महतः समानाधिकरणजातीययो'रिति समानाधिकरणउत्तरपदे जातीयरि च प्रत्यये महत आत्वमित्याकारः । जातीयरि महाज्जातीयः । 'प्रकारवचने जातीयरि'ति प्रकारो भेदः सादृश्यं च तत्र वर्तमानात् स्वार्थं जातीयरिति जातीयर् । कथं महाबाहुर्देवदत्त इति यावता सन्महदिति प्रतिपदोक्ते समासे समानाधिकरणस्योत्तरपदस्य संभवस्तत्रैवात्वेन भाव्यम् । सत्यम् । यद्येतावत् प्रयोजनं स्यात् आन्महतो जातीयरि चेत्येव ब्रूयात् । चशब्देनोत्तरपदमाक्षिप्यते तच्च प्रतिपदोक्तमेव भविष्यति, एवं सिद्धे सति यदेतत् समानाधिकरणग्रहणं तत्समानाधिकरणमात्रप्रत्ययार्थं विज्ञा-

Digitized by Google

स्यते । महत्या घासो महाघासः । महत आत्वे घासकारविशिष्टेषूपसं-
ख्यानं पुंवद्वचनं चेति पुंवद्भाव आत्वं च । एवं महाकरो महाविशिष्ट
इति । अमहान् महान् संपद्यते महद्भूतश्चन्द्रमाः । अत्र अमहत्यां
प्रकृतौ वर्तमानात् महच्छब्दात् कारणभूतस्य कार्यात्मताभावे च्व्यन्ते वि-
धीयतइति महच्छब्दस्य गौणार्थत्वात् मुख्ये च कार्यसंप्रत्ययात् आत्वाभावः।
महतो भवः महिमा। पृथ्वादित्वादिमनिचि 'टे'रिति टिलोपः । महतइति
वृद्धौ गतः ॥ ७०१ ॥

रह त्यागे ॥ रहतीत्यादि। महतिवत् । रहः । रहसी । असुन्प्रत्ययः ।
विरहीकरोति । अभूततद्भावे कृभ्वस्तियोगे संपद्यकर्तरि 'अरुर्मनश्चक्षुश्चे-
तोरहोरजसां लोपश्चे'ति च्विप्रत्ययः स लोपश्च । 'अस्य च्वा'विति
ईत्वम् । रहसि भवं रहस्यम् । दिगादित्वाद्यत् । अनुरहसम् । अवरहसम् ।
तप्तरहसम् । 'अन्ववतप्ताद्रहस'इति अन्वादिपूर्वाद्रहःशब्दान्तात् समास-
भावादच् समासान्तः । राहुः । हसिनिरहिजीनीत्यादिना उण् । रह
त्यागइति कथादौ मित्प्रकरणे च चुरादौ ॥ ७०२ ॥

रहि गतौ ॥ रंहति । ररंह । रंहिता । इत्यादि । इदित्त्वेन रारंह्यते
इत्यादौ न लोपो न भवति । रंहः । असुन् ॥ ७०३ ॥

दृह दृहि वृह वृहि वृद्धौ ॥ दर्हति । ददर्ह । दर्हितेत्यादि ।
दरीदृह्यते । रीगृत्वत इति रीक् । दर्दृहीति । दर्दर्घि । 'दादेर्धातोर्घ' इति
झलि पदान्ते च हकारस्य घकारः । झषस्तथोरिति धत्वम् । 'झलां
जश् झशी'ति जश्त्वेन गकारः । दाधर्त्सीत्यत्र एकाचो बश इति दकारस्य
धकारः । 'खरि चे'ति धकारस्य चर्त्वे तकारः । लङि तिप्सिपोरपृक्तलोपे
घत्वभष्भावजश्त्वचर्त्वेषु अदधर्क् । 'रात्सस्ये'ति नियमाच संयोगान्त-
लोपः । चर्त्वस्य पूर्वत्रासिद्धत्वाद् झषन्तत्वम् । दर्हयति । अददर्हत् ।
अदीदृहत् । दर्हित्वा । दर्हितम् । दृंहति । ददृंह । दृंहिता । दिदृंहि-
षति । दरीदृंह्यते। रीगृत्वत इति रीक् । दर्दृंहीति । दर्दृन्धि । दर्दृन्धः ।
लङि तिप्सिपोर्हल्ङ्यादिलोपे संयोगान्तलोपे पदान्तत्वे झषन्तत्वाभा-
वाच भष्भाव इति अदर्दृन्। दृंहित्वा । दृंहितम् । दृढः । 'दृढः स्थूलबल-

यो'रिति तस्यानिट्त्वात्तकारस्य ढत्वं नकारहकारयोर्लोपश्च निपात्यते ।
वृंहेरपीदं निपातनम् । तथा च वृत्तिः । अथ वृहिः प्रकृत्यन्तरमस्ति तस्याप्ये-
तदेव सर्वं नलोपवर्जमिति । स्थूलबलाभ्यामन्यत्र वृंहितः । नन्वत्र तका-
रस्य ढत्वे हकारलोपश्च किमर्थं निपात्यते । यावता हो ठे झषस्तथोरिति
धत्वे ष्टुत्वढलोपयोः सिद्धं वृढ इति । सत्यं सिध्यति । इह हि द्रढिमा ।
द्रढीयान् । द्रढिष्ठः । वृढमाचष्टे द्रढयति । 'र ऋतो हलादेर्लघो'रिति
ऋकारस्य विधीयमानो रभावो ढलोपस्य पूर्वत्रासिद्धत्वात् संयोगपरत्वेन
गुरुत्वाल्लघुत्वाभावाच्च स्यात् । तथा च परिद्रढय्येत्यत्र परिवृढमाचष्ट
इति विगृह्य सोपसर्गाच्चेत्संग्रामयतेरेवेति नियमाद् वृढशब्दाण्णौ टिलोपे
ल्यबन्ते समासे क्त्वो ल्यपि च कृते 'ल्यपि लघुपूर्वादि'ति लघुपूर्वाद्वर्णात्प-
रस्य णेर्ल्यपि परे विधीयमानोऽयादेशो न स्यात् । नन्वेवमपि टिलोपस्या-
सिद्धवदित्यसिद्धत्वाच्च लघुपूर्वाद्वर्णात्परो णिर्भवति । नैतत् । णौ टिलोपो णे-
र्ल्यप्ययादेश इति व्याश्रयत्वेनासिद्धत्वाप्रसङ्गात् । न च पूर्वस्मादपि विधौ
स्थानिवद्भाव इति टिलोपस्य स्थानिवत्त्वेन व्यवधानम् । प्रभिदय्य गतः प्रस्त-
नय्य गत इत्यादीनां भाष्ये उदाहरणात् । यद्वा लघुपूर्वादित्यनेन साम-
र्थ्यादन्यपदार्थस्य वर्णस्यापेक्षयात्र वर्णग्रहणे जातिग्रहणमिति निपात एका-
जित्येकग्रहणेन ज्ञापकात्स्थानिवद्भावेन व्यवधानेऽपि न दोषः । तथा परि-
वृढस्यापत्यं पारिवृढिः । 'अत इञ्' । 'इतो मनुष्यजाते'रिति
ङीष् । पारिवृढी कन्या । यत्राणिञोरिति अनार्षे गोत्रे यावणिञौ तदन्त-
योर्गुरूपोत्तमयोः स्त्रियां ष्यङिति ष्यङ् प्रसज्येत । वर्हति । वृंहतीत्यादि
पूर्ववत् । कादित्वाभावाच्च णत्वमिति झलि पदान्ते हो ढः । एवं परिवृढः ।
'प्रभौ परिवृढ' इति इडभावादि पूर्ववन्निपात्यते । अत्रापि ढलोपादेः
पूर्ववत् प्रयोजनम् । प्रभोरन्यत्र परिवृंहित इति सानुषङ्गावेव पाणिनीयौ ।
यदाह वृत्तिकारः वृढपरिवृढनिपातनं यदि वृहिः प्रकृत्यन्तरमस्तीति निर-
नुषङ्गौ भाष्यकारीयौ, वृस्येते हि वृढनिपातनं किमर्थं न वृंहेरिड् भवती-
त्येवोच्येत परिवृढनिपातनं किमर्थं परिपूर्वाद्वृंहतेर्नेड्भवतीत्येवोच्येतेति । तथा
'न धातुलोप आर्धधातुक'इत्यत्र वृहिः प्रकृत्यन्तरमस्तीति ॥ १०७ ॥

Digitized by Google

बृहि शब्दने । बृंहितं करिगर्ज्जितम् । बृहिर् इति चन्द्रगुप्तो । तत्फलं च अवृहत् । अबर्हीदिति पक्षे इट्सिद्धिरित्याह । क्षीरस्वामी वृह वृहि भाषार्थौ । बर्हतइति प्राधान्ये गतम् ॥ ७०८ ॥

तुहिर् दुहिर् उहिर् अर्द्दने ॥ तोहति । तुतोह । तोहिता । लुङि 'इरितो वे'ति पक्षे अङ् । अतुहत् । अतोहीत् । तुतुहिषति । तुतोहिषति । तुहित्वा । तोहित्वा । रलो व्युपधादिति वा कित्त्वम् । तुह्यते । तोतोढि । तोतूढ इत्यादि । तोहयति । अतूतुहत् । तुहितम् । वेपितुह्योर्ह्रस्वश्चेतीन् प्रत्ययः ह्रस्ववचनं वेपत्यर्थम् । दोहतीत्यादि । तोहतिवत् । दिहिर्दुहिर्मर्हतिरोहत्यनिट्कारिकायां मैत्रेयादयो नास्य ग्रहणमिच्छन्ति । ओहति । उवोह । ऊहतुः । ऊहुः । ओहितेत्यादि उषिवत्प्रक्रिया । लुङि मा भवानुहत् ॥ ७११ ॥

अर्ह पूजायाम् ॥ इकारप्रसङ्गादनिडपीह पठितः । अर्हति । आनर्ह । अर्हिता ॥ अर्जिहिषति । मा भवानर्जिहत् । सुखार्हः । दुखार्हः । 'अर्ह'इति कर्मण्युपदेच । अर्हन् । 'अर्हः प्रशंसाया'मिति शता । प्रशंसाया अन्यत्र वधमर्हति चोरः । अर्हतो भावः । आर्हन्त्यम् । अर्हतो नुम् चेति ब्राह्मणादिपाठात् ष्यञ्नुमौ । अर्घः । संज्ञायामघमेघनिदाघा इति न्यङ्क्वादिपाठात् कुत्वम् । अर्घो विक्रीयमाणस्य धान्यादेरियत्ता । अन्ये तु मूल्यमिति तथा चानर्घ्य इति पठ्यते । अमूल्यमित्यर्थः । पूजाविधिरप्यर्घार्थः । अर्घार्थमुदकमर्घ्यम् । 'पादार्घाभ्यां चे'ति तादर्थ्ये । यत् । अर्हेति'राधुवीयोपि । घुषिरादय उदात्ता उदात्तेतः ॥ ७१२ ॥

एवं तुहिरादितुह्यन्तान् विकल्पितेटः परिसमाप्य आत्मेपदपरस्मैपदभेदेन विकल्पितेटो ऽन्यानप्याह ॥

द्युत दीप्तौ ॥ एतदादयः क्लृपूपर्यन्ता उदात्ता अनुदात्तेतः । द्योतते । दिद्युते । 'द्युतिस्वाप्योः संप्रसारण'मिति हलादिशेषं बाधित्वा संप्रसारणमभ्यासस्येति शेषः । द्योतिता । द्योतिष्यते । द्योतताम् । द्योतेत । आशिषि द्योतिषीष्ट । अद्योतिष्ट । अद्युतत् । 'द्युद्भ्यो लुङी'ति वा परस्मैप-

धम् । द्युत्त इति बहुवचनादाद्यर्थावगतिः । यदा परस्मैपदं तदा पुषा-
दित्वादङ् । दिद्युतिषते । दिद्योतिषते । द्युतित्वा । द्योतित्वा । रलो
व्युपधादिति वा कित्वम् । देद्युत्यते । द्युतिस्वाप्योरित्यभ्यासस्य संप्र-
सारणे 'गुणो यङ्लुकोः' इति गुणः । देद्युतीति । देद्योत्ति । द्योतयति ।
अदिद्युतत् । द्युतिस्वाप्योरित्यभ्यासनिमित्तत्वेन प्रत्ययेनानन्तर्यमाश्रीयते
इति णिचा व्यवधानेऽप्यत्र संप्रसारणं भवति । अत एव तत्र वृत्तौ अदिद्युतदि-
त्युदाहारि । तथा दाधर्त्यादिसूत्रे दविद्युतदित्यत्र द्युतेर्यङ्लुगन्तस्य शतरि
अभ्यासस्य संप्रसारणाभावो विगागमश्चात्वं चास्य निपात्यत इत्युक्तम् ।
आनन्तर्ये ह्याश्रीयमाणे यङो लुका लुप्तत्वादानन्तर्याभावाच्च संप्रसारणस्य
प्रसङ्ग इति किं तदभाववचनेन । अत्र शिवदेवः । हेरचङीति अभ्यासा-
दुत्तरस्य हिनोतेः कुत्वमुक्त्वा तस्याचङीति निषेधाल्लिङ्गात्प्रकृतिग्रहणे
ण्यधिकस्यापि ग्रहणमिति सामान्येन परिभाषामाश्रित्य पर्यहार्षीत् । अ-
भ्यासस्य निमित्ते प्रत्ययानन्तर्ये आश्रीयमाणे ऽजीहयदित्यत्र णिचा ऽङो
व्यवधानात्कुत्वाप्रसङ्गेऽपि क्रियमाणोऽयं निषेधो ण्यधिकस्य ज्ञापयति । अस्याः
परिभाषायाः सामान्यापेक्षत्वं वार्त्तिककारस्यानभिमतम् । यदाह देवः । च-
ङोऽन्यत्र ण्यधिकस्यापि कुत्वं भवति तेन प्रजिघाययिषतीति सिद्धं भव-
तीति । तथा च वार्त्तिकमपि । हेश्चङि प्रतिषेधानर्थक्यमङ्गान्यत्वात्,
ज्ञापकत्वं त्वन्यत्र ण्यधिकस्य कुत्वज्ञापनार्थमिति । एवं 'स्तम्बकर्णयोर-
मिजपोः' 'अर्हः' इत्यादौ ण्यधिकस्य ग्रहणाभावाद् ण्यन्तादचो ऽभावादचि
सुखार्हीत्यादि सिद्ध्यति । यदुक्तं क्षीरदेवेन ण्यधिकपरिभाषाया अव्यापि-
नीत्वात् अर्हादावप्रवृत्तिरिति । सामान्यत्वमङ्गीकृत्य तदपि वृत्ति-
वार्त्तिकविरोधादेव प्रत्युक्तम् । अस्योदुपधत्वाद् उदुपधाद्भावादिकर्म-
णोरिति निष्ठायाः कित्वविकल्प उदाहार्यः । द्युतितमनेन द्योतितमनेने-
त्यादि । दिद्युत् । भ्राजभासेत्यादिना क्विप् । विद्युत् । द्युतिगमिजुहोतीनां
द्वे चेति क्वौ द्वित्वे ऽभ्यासस्य संप्रसारणम् । ज्योतिः । द्युतेरिसिन्, आदे-
श्च ज इत्यसन् आदेश्च जः ॥ ७१३ ॥

Digitized by Google

ञिष्विदा वर्णे ॥ श्वेतते । शिश्विते । श्वेतिता । अश्वितत् । अश्वेतिष्टेत्यादि पूर्ववत् । श्वित्तम् ‘आदितश्चे’ति निष्ठायामनिट्त्वम् । भावादिकर्मणोस्तु ‘विभाषा भावादिकर्मणो’रितीडप्युदाहार्यः । श्वितितमनेनेत्यादि । श्वित्रम् । स्फायितञ्चित्यादिना रक् ॥ ७१४ ॥

ञिमिदा स्नेहने ॥ मेदते । मिमिदे । मेदिता । अमिदत् । अमेदिष्टेत्यादि । ‘मिदेर्गुणः’ इत्यत्र शिद्ग्रहणमनुवर्तते तच्च कर्मधारय इति यस्मिन्विधिरितीत्संज्ञकशकारादौ गुण इति अप्यगुणाभावः । मिन्नः । ञीतः क्तः । रदाभ्यामिति नत्वम् । आदित्त्वादनिट्त्वम् । भावादिकर्मणोस्तु ‘विभाषा भावादिकर्मणो’रिति वेट् निष्ठाशीङ्किति सेटो निष्ठायामकित्त्वागुणे मेदितमनेनेत्यादि । मेदुरः । ‘भञ्जभासमिदो घुरच्’ । मित्त्रम् । अमिमिदिषसिभ्यः क्त्रिति त्रन् । अयं दिवादिश्चुरादिश्च । मिद मेधाहिंसनयोरिति भ्वादौ । ञिमिदा स्नेहनस्य मोचने च । स्नेहनमोचनयोरिति क्व चित्पठ्यते ॥ ७१५ ॥

ञिष्विदा मोचनप्रस्रवणे ॥ स्वेदते । सिष्विदे । स्वेदिता । अस्विदत् । अस्वेदिष्ट । सिस्विदिषते । स्तौतिण्योरेवेत्यषत्वम् । सेष्विद्यते । सेष्वेत्ति । स्वेदयति । असिस्विदत् । ण्यन्तात्सनि ‘सः स्विदिस्वदिसहीनां चे’ति अभ्यासात्परस्य सत्वम् । सिस्वेदयिषतीति निष्ठायां मिदिवत् । स्विन्न इत्यादि । अत्र स्वामी ञिक्ष्विदेति क्ष्वकारं पठित्वा ञिक्ष्विदेति नन्दीत्याह । तत्र क्ष्वेदते । चिक्ष्विदे । अक्ष्विदत् । अक्ष्वेदिष्टेत्यादि । क्ष्वेदतीत्यव्यक्ते शब्दे भविष्यति । स्विद्यतीति स्नेहनस्नेक्षयोर्दिवादौ । स्विद्यतीति गात्रप्रक्षरणे ॥ ७१६ ॥

रुच दीप्तावभिप्रीतौ च ॥ रोचते देवदत्ताय मोदकः । ‘रुच्यर्थानां प्रीयमाण’ इति प्रीयमाणस्य संप्रदानत्वाच्चतुर्थी । रुरुचे । रोचिता । अरुचत् । अरोचिष्ट । रुरुचिषते । रुरोचिषते । रुचित्वा । रोचित्वा । भृशं रोचत इत्यर्थे यङ्लुगिण्यतइति वृत्तिन्यासादौ । रोचयति । रोचयते । अणावकर्मकादिति कर्त्रभिप्राये प्राप्ते परस्मैपदे ‘न पादम्याङ्यमाङ्यसपरिमुहरुचिनृतिवद-

वस इति निषिध्यते । रोचयति । रोचनः । रोचनम् । नन्दिवासिदमित्यसो-
र्धिर्वाहुरोचिष्ण्यो । गवन्तेभ्यः संज्ञायामिति नन्द्यादिपाठाल्ल्युः । रोचिष्णुः ।
अलंकृञ्जिन्यादिनेष्णुच् । रुच्यः । राजसूयेत्यादीना कर्त्तरि क्यप् निपात्यते ।
रोकः । घञ् । 'चजोः कुघिण्ण्यतोरि'ति निष्ठायामनिटः कुत्वं वदता वार्त्ति-
ककारस्य 'विभाषा श्यावारोकाभ्यामि'ति निपातनात् कुत्वम् । रोचिः । शुचि-
रुच्योः संज्ञायामिति सिः । रुक्मम् । युजिरुचितिजां कश्चेति मन्प्रत्ययः ।
चकारस्य ककारः । रोचकः । क्वुन् शिल्पिसंज्ञायोरिति क्वुन् ॥ ७१७ ॥

घुट परिवर्त्तने ॥ घोटते । जुघुटे । घोटिता । अघुटत् ।
अघोटिष्ट । घुटित्वा । घोटित्वा । रलो व्युपधादिति वा कित्वाज्जोघुट्यते ।
जोघोट्टि । घोटयति । अजूघुटत् । घुटितः । भावादिकर्मणोः कित्त्वविकल्पे
घुटितमनेन घोटितमनेनेत्यादि । अच् । घोटः । घोटकः । संज्ञायां कन् ।
घुटिका । संज्ञायां क्वुन् । अयं तुदादौ च ॥ ७१८ ॥

रुट लुट लुठ प्रतीघाते ॥ आद्यौ प्रथमान्तौ । अन्त्यो द्वितीयान्तः ।
अयं पाठो दैवमैत्रेयादीनाम् । हरियोगिनस्तु द्वावेव । धातोः कर्मणः इत्यत्र
कैयटे द्वितीयान्तौ पठितौ । क्षीरस्वामी त्वेवं पठित्वा आह रुट लुटेत्येके ।
आद्यु लोटने इति लिङ्गात् इति । तथा लुठ दीप्ताविंत्यप्यसावाह लुट इति
तु शाकटायनः । सुधाकरस्तु भूवादिसूत्रे लुठतिर्द्वितीयान्तोपि लुठितो
लोठमान इति प्रयोगदर्शनादित्याह । रोठते । लोठते । इत्यादि पूर्ववत् ।
लोठतीति लोडने गतम् । रुण्टति लुण्ठतीति स्तेये । रोठति लोठतीत्युप
घाते । लुण्ठतीत्यालस्यप्रतिघातयोः । रुण्ठति लुण्ठतीति द्वयं गत्यर्थे ॥ ७२१ ॥

शुभ दीप्तौ ॥ शोभते । शुशुभे । अशुभत् । अशोभिष्ट । शुशुभि-
षते । शुशोभिषते । शुभित्वा । शोभित्वा । शोशुभ्यते । शोशोब्धि । शोभ-
यति । अशूशुभत् । हिंसाभवनयोः शोभति । शुभति ॥ ७२२ ॥

क्षुभ सञ्चलने ॥ संचलनं प्रकृतिविपर्यासो गमनं च । क्षोभते । अक्षु
भत् । अक्षोभिष्टेत्यादि पूर्ववत् । क्षुब्धो मन्थः । क्षुब्धस्वान्तेति मन्थे निष्ठा-
यामनिट्त्वं निपात्यते । अन्यत्र क्षुभितः । अयं दिवादिः क्र्यादिश्च ॥ ७२३ ॥

क्षभ तुभ हिंसायाम् ॥ क्षभते । नेभे । नभिता । अनभिष्ट । तोभते । तुतुभे । तोभिता । अतुभत् । अतोभिष्ट । णभिरयमभावेऽपि वर्त्तते । नभन्तामन्यके समइत्यत्र मा भूवन्नन्यके सर्व इति विवृतम् । तथा नभन्तामन्यके शाश्याका अधिधन्वसु इत्यत्र भाष्येषु अन्यकेषां शत्रूणां धन्वसु स्थिता ज्याकाः छिन्ना मा भवन्त्विति । नभः समुद्रमाकाशञ्च । असुनित्यादिना असुन्प्रत्ययः । इमौ दिवादौ क्र्यादौ च ॥ ७२५ ॥

स्रंसु ध्वंसु भ्रंसु अवस्रंसने ॥ ध्वंसु गतौ च ॥ स्रंसते । सस्रंसे । स्रंसिता । अस्रसत् । अस्रंसिष्ट । अङि नलोपः । सिस्रंसिषते । सनीस्रं-सीति । सनीस्रस्तः । नीग्वञ्चुस्रंस्वित्यादिना नीक् । स्रंसित्वा । स्रस्त्वा । उदित्त्वादिड्विकल्पः । इट्पक्षे कित्त्वाभावान्नलोपाभावः । स्रस्तम् । उखायाः स्रंसते इति उखास्रत् । क्विप् चेति क्विप् । वसुस्रंसुध्वंस्विति पदान्त-सकारस्य दकारः । सनीस्रस्तः यङ्लुगन्तात् क्तो नलोपः । दत्वं सानुब-न्धकनिर्देशान्न भवति । रुत्वविसर्जनीयौ । अत्वसन्तस्येति दीर्घो ऽधा-तोरिति निषेधान्न भवति । सनीस्रंसः । अच्परे यङ्लुकि यङो लुप्तत्वात् प्रत्ययलक्षणाभावान्नलोपाभावः । एवं ध्वंसते । भ्रंसते इत्यादि । अत्र तृतीयं मैत्रेयस्वामिबोधन्यासमताकारादयः तालव्योपधान्तं पठन्तो नीग्वि-धावपि तथा वदन्ति । भ्रंशतइत्यादि । अत्र क्वचिल्लभ्रंशिरपि पठ्यते । भ्रशु भ्रंशु अधःपतनइति दिवादौ दैवमैत्रेयादिमते । भ्रंशते इति प्रमादे गतः ॥ ७२८ ॥

स्रम्भु विश्वासे ॥ विस्रम्भते । सस्रम्भे । स्रम्भिता । अस्रभ-त् । अस्रम्भिष्ट । सिस्रम्भिषते । सास्रभ्यते । सास्रम्भि । स्रम्भयति । असस्रम्भत । स्रम्भित्वा । स्रब्ध्वा । विस्रम्भी । वौ कषलसेति घिनुण् । स्रम्भतइत्यादि । तालव्यादिः काश्यपादिमते प्रमादे गतः ॥ ७२९ ॥

(शेषमग्रे)

॥ खण्डनखण्डखाद्यम् ॥

(*Continued from page* 88. Vol. VII.)

टी० [a]"अन्यथे"ति । यदाकदाचित्तादृशबुद्धेरतन्त्रत्वे तथापि तादृशबुद्धिविरहदशायां प्राक्सत्त्वस्य वस्तुनः कथं सिद्धिरित्यर्थः ॥ तादृशबुद्ध्यभावदशायामपि कारणत्वमन्यदास्थेन तादृशबुद्धिविशेषेण गृह्यते इति शङ्कते–। [b]"तदा सत्त्वमि"ति ॥ यथाऽन्यकालीनं तादृशज्ञानमन्यकालीनमपि कारणत्वं व्यवस्थापयति तथाऽन्यकालीनमपि तादृशबुद्धिविषयत्वमन्यकालीनस्यापि कारणत्वं भविष्यतीति परिहरति–। [c]"अन्यकालिकमेवे"ति ॥ ननु तवैवेयं कल्पनेत्यत आह–। [d]"तदेतदि"ति । संवृतिस्तावत्सती, तया स्वकीयेन सत्त्वेन स्वविषयस्याऽसत्त्वं संव्रियते इति संवृतिसत्त्वं परेपि मेनिरे, यदाहुः–"पररूपं स्वरूपेण यथा संव्रियते धिये"ति भावः ॥ "इदमस्मानियतप्राक्सदिति बुद्ध्या विशेषात्"–इत्युक्तं, तत्राऽसती बुद्धिर्न विशेषिका, सती च नेष्टा, द्वैतापत्तेरिति वस्तुतत्त्वमेवाङ्गीक्रियतां किं संवृतिसत्त्वेनेत्यत आह–। [e]"असती"ति ॥ प्रतिवचनमाह–। [f]"विज्ञानमि"ति । यद्यपि विज्ञानमपि विषयाङ्कितमतस्तदभ्युपगमे एव विषयाऽभ्युपगमः, निर्विषयस्य विज्ञानस्याऽभावाद्व्यवहारानुपपादकत्वाच्च; तथाच–व्यवहाराऽनुरोधश्चेत्तदा ज्ञानविषययोस्तुल्ययोगक्षेमत्वमेव, तथापि व्यवहारानुरोधोपि मया त्यज्यते एवेति हृदयम् ॥ [g]"तेने"ति । विज्ञानेनेत्यर्थः ॥

मू० अथाऽसत्ता तस्य पर्य्यवसास्यति तदाऽसतैव तेनेदमुपपाद्यते–इति स्वीकर्त्तव्यम्, [a]भ्रमविषयेणेव भ्रमे विशिष्टताव्यवहारः । अविचार्य्यैव तावत् [b]तस्य सदसत्त्वं विचार आरब्धव्यः । [c]अन्यथा प्रथममेव मतिकर्द्दमे(१)कथाऽऽ

---

(१) मतिकर्द्दमे=विचारेपि विचारस्तत्रापि विचार इत्यनवस्थानात् मतिकालुष्ये सति, पङ्कमग्नहस्त्यादिवत्ततो द्रुतं निर्गमनासम्भवात्कथारम्भ एव न स्यादित्यर्थः।

रम्भणमशक्यमापद्येत, [d] स्वीकृतं च भवतापि भविष्यदादिविषये विज्ञाने विशिष्टव्यवहारनिदानत्वमसतो विषयस्य, [e] कारणशक्तेश्च विशेषकमसदेव कार्य्यम् ।

टी० [a] "भ्रमे"ति । यथाऽसदेव रजतं स्वविषयं ज्ञानं विशेषयति—'रजतीयं ज्ञानम्' इति, तथा बुद्धिरप्यसती विषयं विशेषयति—"इदमस्मा वियनप्राक्सत्" इति बुद्धिविषयत्वमेव कारणत्वमित्यर्थः । यद्यपि भ्रमविषयोऽपि सच्चेव(१), तथा च न दृष्टान्तः, तथाप्यसत्ख्यात्यभिप्रायेणैतत् द्रष्टव्यम् ॥ [b] "तस्ये"ति । ज्ञानस्येत्यर्थः । यद्यपि विषयाऽसत्त्वं चेत्तदा ज्ञानसत्तासन्देहस्थिता(२)वपि न विचारप्रयोजनं, तथापि ज्ञानसत्तासन्देहाऽऽवर्जितो विषयसत्तासन्देहोऽस्त्येवेति न विचारवैयर्थ्यमिति भावः ॥ [c] "अन्यथे"ति । यदि प्रथममेव ज्ञानसदसत्त्वं विचारणीयमित्यर्थः । यद्यपि तवाऽयं मतिकर्दमः, न तु ममापि, ज्ञानविषययोर्द्वयोरपि सत्त्वेनैवाभ्युपगमात्, न वा त्वया सह कथारम्भणमुद्देश्यमपि, तथापीयमेव कथा तथा सति न स्यादिति हृदयम् ॥ भवतु वेदानीमेव संवृतेरसत्त्वपरिच्छेदः, तथापि तस्या विषयविशेषकत्वं स्यादेव, भवति हीदानीमसत्त्वेनैव परिच्छिन्नेन भाविना पुत्रेण "मम पुत्रो भविष्यति" इति ज्ञानस्येदानींतनस्य विशिष्टत्वव्यवहार इत्याह—। [d] "स्वीकृतं चे"ति ॥ असदन्तरस्य विशिष्टताव्यवहारहेतुत्वमुदाहरति—। [e] "कारणशक्तेरि"ति । कारणशक्तिः=कारणत्वं(३), तच्च सदेव कार्यं विशेषयति, भवति हि 'घटकारणं दण्डः'—इति विशिष्टव्यवहार इत्यर्थः ॥

(१) सत्ख्यात्यादिवादिमते ।

(२) ज्ञानसत्तासन्देहस्थितौ=ज्ञानसत्तासन्देहनिवृत्त्यर्थं विचारे ऽक्रियमाणे, विषयस्याऽसत्त्वे विषयसिद्धिलक्षणं विचारप्रयोजनं न, तथापि परमार्थतोऽसत्त्वेऽपि विषयस्य, ज्ञानसत्तासन्देहावर्जितः = ज्ञानसत्तासन्देहाधीनो विषयसत्तासन्देहोऽस्त्येवेति तन्निवृत्त्यर्थत्वाद्विचारस्य न वैयर्थ्यमित्यर्थः ।

(३) न्यायनयेऽतिरिक्तशक्त्यभावात् "कारणशक्तिः=कारणत्वम्"—इत्युक्तम् । "तच्चे"ति । सदिति द्वितीयैकवचनम् ।

मू० * [a] "नच कालान्तरसम्बन्धिनी सत्ता तस्यैकस्य, अन्यस्य नाऽन्यदापि,—इति वैधर्म्यमेतयो(१)रपीति वक्तव्यम *। [b] विशिष्टव्यवहारप्रवृत्तिसमये [c] 'द्वयोरप्यसत्त्वाऽविशेषात् । प्रयोजनाऽनुपयुक्ते काले तस्य स्वरूपतोऽवस्थानं पाटच्चर(२)लुण्ठिते वेश्मनि यामिकजागरणवृत्तान्तमनुहरति । * [d] तथापि कालान्तरस्थित्या घटादिकं स्वरूपतो (३) विशेषणतश्च व्यवच्छिन्नं तद्विज्ञानेन [e] 'स्वभावबलात् स्वविशेषणत्वेनोपादीयते, न त्वेवमत्यन्ताऽसद्भवितुमर्हति, तस्य [f] स्वरूपतो विशेषणतश्च व्यवच्छिन्नतयाऽनङ्गीकारात्; [g] कुत (४) स्वभावतो विज्ञानं सम्बन्धि निरूप्येत *। न, [h] उक्तमत्राऽसतोऽपि हि तदेव स्वरूपं, तस्य नियतस्वरूपस्यैव नियतविशेषणस्यैवासत्त्वात्, अन्यथाऽतिप्रसङ्गात् ।

टी० ननु भविष्यदादेः कार्यस्य स्वकाले सत्त्वमस्त्येव अतस्तयोर्विशेषणत्वमुचितं, ज्ञानविषययोस्तु सार्वदिकमसत्त्वमिति नाऽन्योन्यं विशेषणविशेष्यभाव इत्याशङ्क्याह—। [a] "नचे"ति ॥ असत्ताविशिष्टताव्यवहारस्त्वयाऽभ्युपगम्यते एव तावतैव सिद्धं नः समीहितमित्याह—। [b] "विशिष्टे"ति ॥ [c] "द्वयोरि"ति । भविष्यदादिकार्ययो(५)रित्यर्थः ॥ ननु यस्याऽऽत्यन्तिकमसत्त्वं तस्य विशेषणत्वं विशेष्यत्वं वा न स्वीकुर्मः, भविष्यत्पुत्रादेः कार्यस्य च नात्यन्तिकमसत्त्वं, स्वकाले तयोः सत्त्वादित्याह—। [d] "तथापी"ति ॥

(१) एतयोः=दृष्टान्तदार्ष्टान्तिकयोः ।

(२) पाटच्चरेण=चौरेण, वेश्मन्यपहृतसर्वस्वे सति पूर्वापरकालयोर्यामिकस्य=यामरक्षकस्य, जागरणमिन्वयकथायेव यद्वत्तद्वत्कार्यकालात्पूर्वापरकालयोः स्वरूपतो ऽवस्थानमनुपयुक्तमित्यर्थः ।

(३) स्वरूपतः=पृथुबुध्नोदरत्वादेः, विशेषणतः=घटत्वादेरित्यर्थः ।

(४) 'कुतः' इति पाठे तु केन स्वभावेनेत्यर्थः कर्तव्यः ।

(५) भविष्यत्पुत्राद्यर्थघटादिकार्ययोरित्यर्थः ।

Digitized by Google

[e] "स्वभावबलादि"ति । भविष्यदाद्याऽऽलम्बनमपि ज्ञानं शब्दलिङ्गमहिम्ना जायते इति तादृशो विशेषस्तद्विशिष्ट एवेत्यर्थः ॥ [f] "स्वरूपत" इति । विषयस्वरूपमपि त्वन्मतेऽत्यन्ताऽसद्विशेषणं, संवृतिरप्यत्यन्ताऽसतीत्यर्थः ॥ उपसंहरति—। [g] "कुत्रे"ति । स्वभावतोऽपि ज्ञानमत्यन्तासद्विषयसम्बन्धि कथं भवेत्, तथाच त्वन्मतेऽत्यन्ताऽसतोर्ज्ञानविषययोर्न सर्वथा विशेषणविशेष्यभाव इति भावः ॥ [h] "उक्तमत्रे"ति । "वस्त्वसन् घटो न घटः" इत्यादिनेत्यर्थः । यथा कम्बुग्रीवादिविशिष्टो घटस्त्वया सत्त्वेनाऽभ्युपगम्यते तथैव मयाप्यसत्त्वेन, तादृशानङ्गीकारे तु स्यादतिप्रसङ्ग(१) इत्यर्थः ॥

मू० [a]भ्रान्तिविषयेण दत्तोत्तरत्वाच्चेत्यलमतिप्रपञ्चे(२)न ।

—•••—

टी० ननूक्तम्—'अत्यन्तासतो न विशेषणत्व'मत आह—। [a]"भ्रान्ती"ति। यद्यपि घटज्ञानादीनामसत्त्वं न तावदभावप्रतियोगित्वम्, इष्टत्वात्(३); नापि केवला(४)न्वय्यत्यन्ताभावप्रतियोगित्वं, स्वसमवायिनि स्वकाले च सत्त्वात्; नापि सत्तासामान्यरहितत्वं, सत्तावत्तयैव प्रतीयमानत्वात्; नापि विधिनिषेधव्यवहाराऽभाजनत्वं, तदुभयभाजनत्वेन त्वयाऽभ्युपगमात्; अन्यथा व्याघातात्; नापि स्वस्नभिन्नत्वम्, इष्टत्वात्; नाप्यभावत्वं, विधिमुखप्रत्ययवेद्यत्वात्; नापि मिथ्यात्वं, तद्व्याप्रामाणिकत्वं, तदा प्रमाणविषयत्वव्यवस्थापनयैव निरस्यं; नापि(५) मिथ्यापदाभिधेयत्वम्,

(१) अतिप्रसङ्गः=घटसत्त्वस्याप्यभावप्रसङ्गः, यद्वा. 'असन् घटो न' इत्यस्याप्यभावप्रसङ्गः, अलीकप्रतियोगिकनिषेधायोगात् ।

(२) तदेवं शून्यतावादिमतमाश्रित्य दर्शितम् ।

मानमेयादिभावानामसत्त्वं व्यक्तयुक्तिभिः ॥ २ ॥

इदानीं ज्ञानभिन्नानामसत्त्वं सम्यगुच्यते ।

योगाचारोक्तरीत्येह चित्त्वं चास्वप्रसंविदः ॥ ३ ॥

(३) ध्वंसप्रागभावादिप्रतियोगित्वस्य नैयायिकानां पक्षे इष्टत्वादित्यर्थः ।

(४) केवलान्वय्यत्यन्ताभावः=सार्वत्रिकः सार्वदिकोऽत्यन्ताभावः, तत्प्रतियोगित्वमित्यर्थः ।

(५) क्वचित्पुस्तके 'नापि'—इति न दृश्यते तदनुरोधेन 'यदि स्यात् मिथ्यापदाभिधेयत्वम्'—इत्यन्वयः; यथादृष्टपाठे तु वदीत्यतः प्राक् तच्छब्दमध्याहृत्य 'तच्चेत् स्वतः'—इति ग्रन्थयोजना कर्तव्या ।

यदि स्वतः(१), तदा स्वसङ्केतेन ब्रह्मण्यपि गतत्वात्; यदीश्वरसङ्केतेन, तदा न घटादावपीति; * बाध्यत्वमसत्त्वम् * ?—इति चेच, बाध्यत्वस्य बाध्यत्वाऽबाध्यत्वाभ्यामनुपपत्तेः(२); बाधस्य च विपरीतप्रमात्वेन घटादिनिरूपितवैपरीत्यस्य सिद्धौ, घटादिसिद्धेः(३); तदसिद्धौ, बाधाऽसिद्धेः(४); * विचारासहत्वम् * ?—इति चेच, विचारस्य निर्विषयत्वेन दुर्विचारत्वात्; सविषयत्वेऽपि, विषयसिद्धेः; * विचारविषयः सिद्ध एव किंत्वसन् * ?—इति चेच, असत्त्वस्यैव विचार्यमाणत्वात्; * व्यावहारिकत्वमेवासत्त्वम् * ?—इति चेत्, तद्यदि ज्ञानरूपव्यवहारविषयत्वं, तदिष्टापत्तिः, ब्रह्मणोऽप्येतादृश स्यासत्त्वस्यत्वयेष्यमाणत्वात्; अथ व्यवहारोऽभिलापस्तद्विषयत्वं, तदा सुतरामिष्टं, ब्रह्मसाधारणं च; * अनिर्वचनीयत्वम् * ?—इति चेत्, अनिर्वचनीयतयैव निर्वचनीयत्वात्; घटत्वादिना निर्वचनात्, निर्वचनीयत्वस्य केवलान्वयित्वेन तदभावासिद्धेः; * सत्त्वासत्त्वाभ्यां दुर्व्यवस्थापनम् * ?—इति चेत्, घटादेरुभाभ्या(५)मपि व्यवस्थितत्वात्, घटादेस्सत्त्वासत्त्वयोर्द्वयोरभ्युपगमात्; किञ्च, असत्तया चेद्व्यवहारार्थक्रिययोर्यथाऽस्मदभ्युपगतयोरुपपत्तिस्तदा सत्तैव त्वयाऽसत्तेत्यभिधीयते, तथाच नाम्नि परं विवादः; तथापि(६) सत्त्वेनापाततो व्यवस्थापयितुमशक्यत्वमसत्त्वमिति भावः ॥

मू० "[a]अपरे(७)पुन[b]र्वेतस्तेऽपि शून्यताङ्गीकारे मनःप्रत्ययमनासादयन्तः 'सर्वमिदमसदेव विश्वम्'—इत्यभिधातुं सच्चसैवानुत्सहमानाः मन्यन्ते—विज्ञानं तावत् [c]'स्वप्रकाशं, [d]स्वत एव सिद्धस्वरूपं, 'न खलु विज्ञाने सति जिज्ञासो-

(१) स्वतः स्वसङ्केतेनेत्यर्थः ।

(२) बाध्यत्वस्य बाध्यत्वे ऽबाध्यत्वमेव अगतो व्यवतिष्ठेत, अबाध्यत्वे तु तत एव द्वैतापत्त्यादिरित्युभयथाऽप्यनुपपत्तेरित्यर्थः ।

(३) प्रतियोगिविधया घटादिसिद्धेरित्यर्थः ।

(४) 'तदसिद्धेः', इत्यपि क्वचित्पाठस्तत्रापि बाधासिद्धेरित्येवार्थः ।

(५) उभाभ्यां=सत्त्वाऽसत्त्वाभ्याम् ।

(६) तथापीत्यस्य विप्रकृष्टेन "भ्रान्तो"तिप्रतीकान्तिमेण यद्यपि सत्त्वेनाऽन्वयः ।

(७) यद्यपि स्वमतमेवैतत्स्यवादात् पर्यवसास्यति तथापि योगाचारमतावादकत्वेनाऽभिधानात् 'अपरे तु'—इत्युक्तम् ।

(१)रपि कस्यचित् 'जानामि न वा'—इति संशयः, 'न जानामि'—इति वा विपर्ययः, व्यतिरेकप्रमा(२) वा, तेन जिज्ञासितस्याऽतत्त्वज्ञानव्यतिरेकप्रमाणामभावसमुदायः स्वव्यापकं जिज्ञासितस्य प्रमितत्वमानयति। अन्यथा(३) हि जिज्ञासितप्रमितत्वव्यतिरेकव्यापकं जिज्ञासितव्यतिरेकोल्लेखि ज्ञानमविघ्नितजिज्ञासस्य स्यात्। अतः सर्वजनस्वात्मसंवेदनसिद्धमेवास्य बोधस्य स्वरूपम्।

टी॥ तदेवं माध्यमिकमतमाश्रित्य विश्वासत्त्वमुपपाद्य योगाचारमतमाश्रित्य ज्ञानभिन्नस्याऽसत्त्वमुपपादयितुमाह—। a"'अपरे पुनरि'"ति॥ b"चेतस" इति। ज्ञानस्येत्यर्थः॥ मनःप्रत्ययः=विश्वासः। अविश्वासे तु युक्तिः,—यदि शून्यत्वं जगतो वास्तवं, तदा क्व शून्यत्वं, शून्यत्वस्यैव धर्मस्य सत्वात्; अथ शून्यत्वमवास्तवं, तदा पूर्णत्व(४)मेव। शून्यतायाश्च स्वत एव सिद्धिः?, परतो वा?। आद्ये स्वप्रकाशतया ज्ञानस्वरूपैव शून्यतेति; अन्त्ये शून्यतासाधकस्यैव सत्त्वान्न शून्यता। किञ्च, किं तच्छून्यं यस्य धर्मः शून्यता? मिथ्या वा? अलीकं वा? असद्वा? अनिर्वचनीयं वा? विचारासहं वा? प्रपञ्चो वा? बाध्यं वा? तच्च सर्वमनुभवार्थक्रियाविरो-

(१) पथि गच्छतस्तृणादेः सर्वथा ज्ञानाभावदशायामजिज्ञासिते तृणादौ संशयाद्यभावो हेतुर्दृष्टः प्रमितत्वलक्षणं साध्यं च नास्ति तद्वारणाय 'जिज्ञासो'रित्युक्तम्।

(२) योग्यानुपलब्धिजन्यमभावावगाहिज्ञानं व्यतिरेकप्रमा,—न जानाम्येवेति। ननु विज्ञाने सत्यभावप्रमाप्रसङ्ग एव नास्ति किमिदमुच्यते "व्यतिरेकप्रमा वा न जायते"—इति, इति चेत्सत्यं, तथापि सतोऽप्रमितस्य जिज्ञासितस्य संशयविपर्ययान्यतरगोचरत्वं, जिज्ञासितस्याऽप्रमितस्य त्रयाणामन्यतमविषयत्वमिति विभज्य योजनीयत्वान्न दोषः।

(३) अन्यथा ज्ञानस्याऽप्रमितत्वे कदाचिज्ज्ञानविषयकं व्यतिरेकप्रमादिकमपि स्यादित्याह—अन्यथेति, अन्यथा=ज्ञानस्याऽप्रमितत्वे, अविघ्नितजिज्ञासस्य=जिज्ञासोः पुरुषस्य, जिज्ञासितज्ञाननिष्ठप्रमितत्वस्य यो व्यतिरेकोऽभावस्तद्व्यापकं जिज्ञासितस्य व्यतिरेकोल्लेखि ज्ञानमपि कदाचित्स्यादित्यन्वयपूर्वकोऽर्थः। व्यतिरेकोल्लेखिज्ञानमित्युपलक्षणं संशयविपर्यययोरपि।

(४) पूर्णत्वं=सत्त्वम्।

धादनुपपन्नमेव ॥ [c]"स्वप्रकाशमि"ति । स्वस्य प्रकाशः=विषयीभावो यत्र तत्स्वप्रकाशं, स्वं वा प्रकाशो यस्य तत्स्वप्रकाशं, स्वस्मात् प्रकाशो यस्येति वा ॥ तदेव विवृणोति—। [d]"स्वत एवे"ति ॥ स्वप्रकाशत्वे प्रमाणमाह—। [e]"न खल्वि"ति । देवदत्तस्य घटज्ञानोत्पत्तिक्षणो घटज्ञानज्ञान(१)वान्, जिज्ञासितघटज्ञानगोचरसंशयविपर्ययव्यतिरेकप्रमाऽनाधारत्वात् घटानुव्यवसायक्षणवत् चैत्रवदिति मानार्थः । अयं ज्ञातघटज्ञानः, जिज्ञासुत्वे सति तद्विषयसंशयादिरहितत्वात्—;इति व्यतिरेकी वा हेतुर्विवक्षितः। ज्ञानाभाववद्दशायां व्यभिचारवारणाय 'जिज्ञासोरपी' ति। अतत्त्वज्ञाने(२)च व्यतिरेकप्रमा च अतत्त्वज्ञानव्यतिरेकप्रमाः, तासामित्यर्थः । यद्यपि स्वप्रकाशे जिज्ञासैव नावतरति, जिज्ञासा हि ज्ञातुमिच्छा, नहि सा ज्ञाते एव ज्ञाने सम्भवति, तथाच ज्ञानस्य स्वप्रकाशतां जिज्ञासा न सहते—इति न तया लिङ्गं विशेष्टुमर्हति, तथापि व्याप्ति(३)स्तावदीदृशीति हृदयम् ॥

मू० *[a] व्यवसायस्यानुव्यवसायनियमान्न तत्र संशयादिः *?— इति चेन्न, [b] यत्रवानुव्यवसाये ज्ञेयता नोपेया तत्र जिज्ञासायाम् [c] आत्मधर्म्मिकं तत्संशयमारभ्य व्यवसायविषयपर्यन्तं संशयाक्रान्तेर्दुष्परिहरत्वात्; [d] विषयिसद्भावसंशये तद्विषयेऽपि संशयस्य सम्भवात् ।

टी० ॥ संशयाद्यभावसमूहे हेतावन्यथासिद्धिमाशङ्कते—। [a]"व्यवसायस्ये"ति। अनुव्यवसायेन व्यवसायस्य प्रतीतत्वात्तत्र संशयविपर्ययव्यतिरेकप्रमा इत्यर्थः ॥ परिहरति—। [b]"यत्रे"ति । यद्यनुव्यवसायाः प्रोच्यन्ते तदाऽनवस्था, विषयान्तरसञ्चाराभावः, अननुभवश्च; तद्विरामे(४)तु

(१) घटज्ञानविषयकं ज्ञानं च स्वात्मकमेव ग्राह्यं, न तु ज्ञानान्तरं, स्वप्रकाशत्वस्य साध्यत्वात्; एवमग्रेऽपि ।

(२) अतत्त्वज्ञाने=संशयविपर्ययौ ।

(३) यत्रयत्र जिज्ञासुत्वे सति संशयाद्यभाववत्त्वं तत्रतत्र प्रमितत्वमिति व्याप्तिरेव जिज्ञासाघटितेत्यत्रैव तात्पर्यं, न तु लिङ्गकुक्षौ तन्निवेशेऽपीत्यर्थः ।

(४) अनुव्यवसायधाराविरामेऽपीत्यर्थः ।

Digitized by Google

विषयपर्यन्तं संशयः, इत्यगत्या ज्ञानं स्वप्रकाशमेषितव्यमित्यर्थः ॥ ननु ज्ञानं ज्ञातं यदि, तदा न तत्र संशयो ज्ञातत्वात्; अथाऽज्ञातं, तदापि न तत्र संशयोऽज्ञातत्वात्; नहि धर्म्यदर्शनेपि संशयः, तथा सति तत्र[1] धर्मिनियमो न स्यादित्यत आह—। [c] "आत्मधर्मिकमि"ति। अनुव्यवसायानन्तरम्'अहं तृतीयज्ञानवान्नवा' 'अहं ज्ञानविषयतृतीयज्ञानवान्नवा' 'अहं ज्ञातघटज्ञानो[2]नवा'—इत्यात्मधर्म्मिकसंशय[3]मुपक्रम्य विषयपर्यन्तं संशयः स्यात्, नचैतादृशी संशयधारानुभूयते, तन्नूनं स्वप्रकाशमेव ज्ञानमित्यर्थः। यद्वा, 'घटज्ञानजिज्ञासावानयं चैत्रो यदि ज्ञातघटज्ञानो न स्यात्[4] प्रमिततद्विरहस्स्यात्'—एवं द्वितीयतृतीयादिज्ञानपरम्परापूरणेन तत्तद्विरहप्रमामापाद्याऽर्थापत्त्या स्वप्रकाशता साधनीयेत्यर्थः। यद्यप्यनुव्यवसाये सति न तत्र जिज्ञासा, ज्ञानधारया[5] विच्छेदात्; नोत्तरकालीना,[6] विषयाभावात्; तथाप्यनुपसंजात[7]विरोधितया पूर्वजिज्ञासाया एव तथासामर्थ्यमभिप्रेतम् ॥ ननु 'ज्ञानगोचरसंशयेन तद्विषयसंशयोपि'—इति कथमेतदत आह—। [d] "विषयी"ति। यद्यपि नायं नियमस्तथापि सम्भवमात्राभिप्रायेणैतदुक्तम्, अत एव 'सम्भवा'दित्युक्तम् ॥

---

(१) तत्र=संशये, 'एकस्मिन्धर्मिणि विरुद्धनानाकोटिकज्ञानं संशयः'—इति धर्मिनियमः क्वचिदपि न स्यादिति पङ्क्त्यर्थः।

(२) संशयत्रितयप्रदर्शनं क्रमशः तृतीय—तृतीयद्वितीय—तृतीयद्वितीयप्रथमज्ञानविषयकं बोध्यम्।

(३) आत्मधर्मिकसंशयं, चरमानुव्यवसायधर्मिकसंशयमित्यर्थः।

(४) अत्र 'तदा'—शब्दमध्याहृत्य 'तदा प्रमिततद्विरहः (प्रमितस्तस्य ज्ञानस्य विरहो यस्य पुंसः स तथा) स्यात्'—इति योजनीयम्।

(५) अनुव्यवसायात्मकज्ञानधाराकाले इच्छाया असम्भवादित्यर्थः।

(६) ज्ञानधारोत्तरकालेऽपीच्छा न सम्भवति, इच्छाविषयस्य ज्ञानस्यैव तदानीमभावादित्यर्थः।

(७) अनुपसंजाता विरोधिता यस्या जिज्ञासाया ज्ञानेन सहैतादृशी या ज्ञानात्प्राचीना जिज्ञासा तस्या एव संशयादिसहकृतत्वेनाप्रमात्वसाधकत्वं व्यवहार्यविषयपर्यन्तसंशयसंक्रमयितृत्वं चेत्यर्थः। सामान्यतो विषयज्ञानस्यैव जिज्ञासायां कारणत्वेन विषयस्य तत्र कारणत्वाऽकल्पनादिति भावः।

Digitized by Google

मू० [a] एवं(१)चिच्चतुरसंवेदनकल्पाज्ज्ञानध्रौव्यनियमाभ्युपगमेपीति । [b] स्वप्रकाशे तु मानमेयभावव्यवस्थाया अभावादेव तदाश्रया दोषा निरवकाशाः । [c] अन्यथा तु बोधस्वरूपमेव न सिद्ध्येत् । [d] यदि हि विज्ञानं परतः सिद्ध्येत् तदाऽनवस्था स्यात् । * [e] नच वाच्यमवश्यवेद्यता वित्तेर्नाभ्युपेयते, स्वाथ व्यवहारस्तु स्वरूपसत्तया प्रसूयते इति क्वाऽनवस्था—इति* ।

टी० ननु व्यवसायवदनुव्यवसायोपि गृह्यते एव, तथाच कथं विषयपर्यन्तः संशय इत्यत आह—। [a] "एवमि"ति । क्वचिद्विरामस्यावश्याभ्युपगमनीयत्वेन विषयपर्यन्तसंशयधाराध्रौव्यादित्यर्थः ॥ ननु स्वप्रकाशनये तदेव ज्ञानं कर्म स्यात्, क्रिया च, नचैवं सम्भवति, क्रियाकर्मणोर्भेदगर्भत्वात्; कथं वाऽत्यन्तमभिन्नतया विषयविषयिभावः ? इत्यत आह—। [b] "स्वप्रकाशे त्वि"ति । यदि भिन्नयोः क्रियाकर्मभावो वा विषयविषयिभावो वा क्वचिन्मयाऽङ्गीक्रियेतोपपद्यो वा स्यात् तदा विरोधो भवेत्, नत्वेवं, स्वप्रकाशज्ञानातिरिक्तवस्तुनो मया योगाचारनयनगरप्रवेशादेवानभ्युपगमादित्यर्थः । यद्वा, ननु ज्ञानप्रामाण्यसंशयाधीनः संशयस्तवापि विषयपर्यन्त इत्यत आह—।"स्वप्रकाशे त्वि"ति ॥ यदि भेदेन विषयविषयिभावो भवेत्तदा बोधस्वरूपमेव न सिद्ध्येदित्याह—। [c] "अन्यथे"ति ॥ अस्तु वा भेदेन विषयविषयिभावस्तथापि ज्ञाने तथा नाङ्गीकर्त्तव्यमित्याह—। [d] "यदि ही"ति ॥ ननु ज्ञानस्यापि व्यवहारं न तदेव ज्ञानाधीनं ब्रूमो येनानवस्था दिश्येत, किंतु घटादिसत्ताविलक्षणा ज्ञानसत्तैव स्व(२)विषयव्यवहारायेत्याशङ्कते—। [e] "नचे"ति ॥

(शेषमग्रे)

(१) नियमाभ्युपगमेपि एवं (विषयपर्यन्तं संशयाक्रान्तिः)—इति सम्बन्धः ।
(२) क्वचित्पुस्तके 'स्व'—इति नास्ति ।

॥ श्रीः ॥

श्रौतपदार्थनिर्वचनम् ।

अथ पाशुकपदार्थानां नामान्युच्यन्ते ।

(*Continued from page* 96 Vol VII.)

१५२ अध्वर्युणा इषिता दैव्या होतारो भद्रवाच्याय प्रेषितो मानुषः सूक्तवाकाय सूक्ता३ब्रू३हीत्युक्तो मैत्रावरुणः अग्निमद्यहोतारमवृणीतायं यजमानः पचन्पक्तीः पचन्पुरोडाशं गृह्णन्नग्नय आज्यं गृह्णन्त्सोमायाज्यं बध्नन्निन्द्राग्निभ्यां छागं सूपस्था अद्य देवो वनस्पतिरभवदग्नय आज्येन सोमायाज्येनेन्द्राग्निभ्यां छागेनाघस्तां तं मेदस्तः प्रतिपचताग्रभीष्टामवीवृधेतां पुरोडाशेन त्वामद्यर्षे आर्षेय ऋषीणां नपाद्वृणीतायं यजमानो बहुभ्य आसङ्गथेभ्यः ॥ एषमेद्देवेषु वसु वार्यायक्ष्यत इति तायादेवादेवदानान्यदुस्तान्यस्मा आ च शास्वा च गुरस्वेषितश्च होतरसि भद्रवाच्याय प्रेषितो मानुषः सूक्तवाकाय सूक्ता३ब्रू३हीति प्रैषेण होतारं प्रेष्यति । ततो होता सूक्तवाकं पठति । तत्राज्यभागदेवतानन्तरं इन्द्राग्नीइदं हविरजुषेतामवीवृधेतां महोज्यायोक्रातां । वनस्पतिरिदं हविरजुषतावीवृधत महोज्यायोकृत । ततो देवा आज्यपा इत्यादि प्रकृतिवत् संस्थाजपवर्जं सर्वं अध्वर्युणा उपोह्यमानं हृदयशूलमनुमन्त्रयते होता मैत्रावरुणो ब्रह्मा च शुगसि योस्मान् द्वेष्टि यं च वयं द्विष्मस्तमभिशोचेति मन्त्रेण । ततः । द्वीपेरावावरुणस्य गृहो मितो हिरण्ययः ॥ स नो धृतव्रतो राजा धाम्नो धाम्न इह मुञ्चतु ॥ धाम्नोधाम्नो राजन्नितो वरुण नो मुञ्च ॥ यदापो अघ्न्या इति वरुणेति शपामहे ततो वरुण नो मुञ्च ॥ मयि वायो मोषधीर्हिंसीरतो विश्वव्यचाभूस्त्वेवरुण

नो मुञ्च ॥ सुमित्रा न आप ओषधयः सन्तु दुर्मित्रास्तस्मै भूयासुर्योऽस्मान् द्वेष्टि यं च वयं द्विष्मः ॥ एतैर्मन्त्रैस्तस्योपरिष्टादप उपस्पृशन्ति । शूलमनवेक्षमाणा असंस्पृशन्तः प्रत्यायन्तस्तिस्रस्तिस्रः समिधो गृह्णीयुः । अग्नेः समिदसि तेजोऽसि तेजो मयि धेहि इति प्रथमाम् । एधोऽस्येधिषीमहीति द्वितीयाम् । समिदसि समेधिषीमहीति तृतीयाम् । एत्योपतिष्ठन्ते आपो अद्यान्वचारिषमित्यृचा । ततो यथाक्रमेण समिधोऽभ्यादधत्याहवनीये । अग्नेः समिदसि तेजोऽसि तेजो मे दाः स्वाहेति प्रथमाम् । सोमस्य समिदसि दुरिष्टेर्मा पाहि स्वाहेति द्वितीयाम् । पितॄणां समिदसि मृत्योर्मा पाहि स्वाहेति तृतीयाम् । इदं पाशुकसमिदाधानमित्युच्यते ॥

१५३ ततः संस्थाजपेनोपतिष्ठन्ते । एतावान् अथवाश्वलायनसूत्रानुसारेणेत्यादि ग्रन्थः होतृब्रह्ममैत्रावरुणपाशुककृत्यमुच्यते ॥

---

१५४ इदं सर्वं पाशुकं कर्म निरूढपशुरिति पशुबन्ध इति चोच्यते ॥

१५५ अथ सप्तमी हविर्यज्ञसंस्था पशुत्रयसाध्या सौत्रामण्याख्या तद्दीयपदार्थनामानि प्रोच्यन्ते । सा द्विविधा । एका कौकिली अपरा चरका । सर्वापीयं नित्या । हविर्यज्ञसंस्थान्तर्गतत्वात् । एतयान्नाद्यकामो यजेत स्वर्गकामश्चेत्यादिना फलश्रवणात्काम्यत्वमपि । बार्हस्पत्यं पशुं चतुर्थं यद्दीत्यादिना नैमित्तिकत्वमपि श्रूयते । यजेत्सौत्रामण्यामपत्नीकोऽप्यसोमप इत्येतरेयब्राह्मणोक्तया अपत्नीकासोमपयजमानकर्तृका सौत्रामणी सा कौकिल्येव स्वतन्त्रा । अग्निं चित्वा सौत्रामण्या यजेतेत्यादौ अङ्गत्वेन श्रूयमाणा चरकेव । तत्र कौकिल्या बोधायनसूत्रस्य

समयस्यानुपलभ्यमानत्वात् आपस्तम्बोक्तसूत्रानुसारेण बोधायनसूत्राविरुद्धः प्रयोगः अनुक्तो वरकातिदेशः । तस्य निरूढपशुकालएवानुष्ठानकालः । पर्वणि यथा त्रिपशुरूपं प्रधानकर्म संपद्येत तथा कर्तव्यम् । तथा च द्वादश्यां नान्दीश्राद्धोदकशान्तिप्रतिसरबन्धादि कृत्वा त्रयोदश्यामैन्द्रेण पशुना आदित्यचरुणा च प्रचर्य चतुर्दश्यां त्रिपशूपस्थं कृत्वा पर्वणि त्रिपशुमवभृथं महापितृयज्ञं च कृत्वा प्रतिपदि वायोधसेन पशुना आदित्येन चरुणा च प्रचर्य समापयति । असम्भवे पितृयज्ञोऽपि प्रतिपदि कार्यः । त्र्यहे पुरस्तादिति वचनं सुरासन्धानकरणपक्षे नवम्यामारम्भपरम् । अयं सौत्रामणीकाल इत्युच्यते ॥

१५६ यद्यपि सुरोच्छेषणभक्षस्यैव निषेधो न तु स्वाद्वीन्त्वेत्यादिमन्त्रैः सुरासन्धानकरणादेस्तथापि कल्पोक्तसुरासन्धानप्रकारस्येदानीमुच्छिन्नत्वात् लोकविद्विष्टत्वात् पयोग्रहा वा स्युरित्यापस्तम्बवचनाच्च मुख्यसुराग्रहणमुपेक्ष्य पयोग्रहग्रहणपक्षाश्रयणं क्रियते । यदि चयनं चिकीर्षेत तर्हि त्रिपशौ प्रधानभूते एव कुर्यात् । आद्यन्तपश्वोस्तु न । तयोरङ्गत्वात् । समप्राधान्यपक्षे तयोरपि चयनं कुर्यात् । सुरासन्धानपक्षस्यानाश्रयणात् अन्वाधानादितिस्रो रात्रीर्वसतीत्यन्तं निवर्तते । पयसः सुराप्रतिनिधित्वात् स्थानापत्त्या सुराधर्मा अनूहश्च भवन्ति । नतु सांनाय्यधर्मा आज्यधर्मा वा भवन्ति । यथा प्रयोगचातुर्मास्यवत् एकप्रयोगत्वात्सर्वार्थमुदवसानम् । प्राकृतविहारात् अन्यत्र गमनं कर्मानुष्ठानार्थं उदवसानमित्युच्यते ॥

१५७ ऋत्विग्वरणं षड्ढोतृकूष्माण्डादिहोमश्च सकृदेव सर्वपश्वर्थः । ते एव विहाराः । दक्षिणतः पैतृकी वेदिः । आद्यन्तपशुबन्धयोः पाशुकी वेदिस्तु द्वादशपदा भवति ॥ विपशो साग्निचित्ये निरग्निचित्ये वा ऽष्टादशपदा सा भवति । सौत्रामणीकर्मसम्बन्धिनः पदार्थाः । त्रयो यूपाः । चयनार्थे शर्कराः साग्निचित्ये । सुराग्रहार्थे क्रमेण पलाशन्यग्रोधाश्वत्थकाष्ठनिर्मितान्युलूखलाकाराण्यूर्ध्वमुखानि प्रादेशमात्राणि त्रीणि पात्राणि । एतान्येव सुराग्रहा इत्युच्यन्ते ॥

१५८ यज्ञियस्यफलेग्रहेः पलाशादिवृक्षस्य तादृशान्येव त्रीणि पात्राणि तानि पयोग्रहा इत्युच्यन्ते ॥

१५९ चुक्रसदृशे महापुष्करे द्वे पत्रे ते द्रोणकलशपदवाच्ये ॥

१६० एकः कुम्भः । शतातृण्णास्थाली । नकलबदरकर्कन्धूनां सक्तवः । नकलादयोबदरभेदाः यवगोधूमोपवाकानां सक्तवः । हरितयवाः । श्येनस्य पक्षिणो द्वौ पक्षौ । सिंहव्याघ्रवृकाणां लोमानि । अजाविलोम्नां दशापवित्रमध्वर्योः । गवाश्वलोम्नां प्रतिप्रस्थातुः । नाभिदघ्नपादा अरत्निमात्रशीर्षण्यानूच्यामौञ्जविवयनाया सा आसन्दीत्युच्यते ॥

१६१ प्रभूतं पयः । अन्येपि यउपयुक्ताः पदार्थास्ते सम्पादनीयाः । श्रीपरमेश्वरप्रीत्यर्थं स्वर्गकामो वा कौकिल्या सौत्रामण्या यक्ष्ये चिरूपांशु चिरुच्चैः । अयं सौत्रामणीसङ्कल्प इत्युच्यते ॥

१६२ प्रशास्तृवर्ज्ञानृत्विजो वृत्वा ऽर्हयित्वा । पुण्याहं कृत्वा । अन्वारम्भणीयामिष्टिं कृत्वा ऽरण्योरग्नीन् समारोप्य अथ वा ऽजस्तानग्नीन् गृहीत्वोदवसायमथित्वा मनस्वत्या जुहोति ।

साग्निचित्येतु या:पुरस्तादित्यादि जपित्वा स्वर्गकाम आहव-केतुकमग्निं चेष्ये इत्ययमग्निचयनसङ्कल्प इत्युच्यते ॥

१६३ पुनर्या: पुरस्तादित्यादि । श्रीपरमेश्वरप्रीत्यर्थमैन्द्रेण पशुना यक्ष्ये इत्ययमैन्द्रपशुसङ्कल्प इत्युच्यते ॥

१६४ ततोऽग्नीन् विहृत्य षट्होतृकूष्माण्डसारस्वतहोमा: सर्वपश्व-र्थमादावेव सकृत् । नतुप्रतिपश्वावर्तते । एकप्रयोगत्वात् । पशिवष्टिस्त्वावर्तते । परन्त्वाश्वलायनमते पूर्वोत्तरयोरैन्द्रप-श्वोरङ्गत्वात् पशिवष्टिस्तयोर्न भवति । समप्राधान्ये तु सर्वप-शुषु पशिवष्टिर्भवति । पशुचये च वेदियूपाहुत्यादि यूपोपस्था-नान्तं निरूढवत्करोति । अस्मिन्नैन्द्रपशौ ऋषभो दक्षिणा । पुनरालम्भवर्जं सन्तिष्ठत एष पशु: । अयं सौत्रामणीपूर्वपशुरि-त्युच्यते ॥

१६५ अथ तदानीमेव पुनर्विहृत्यादित्येष्टि: । आदित्यो द्वौ कोकि-ल्यां सौत्रामण्यामितिकर्मान्तसूत्रात् । अस्यामिष्टौ वत्सो दक्षि-णा । वत्सं पूर्वस्यां ददाति मातरमुत्तरस्यामिति वचनात् । अंहसो मुच्येयमिति यजमानस्यानुमन्त्रणम् । पुनरालम्भवर्जे-मियमिष्टि: सन्तिष्ठते । इयं सौत्रामणीपूर्वेष्टिरित्युच्यते ॥

१६६ ततोऽह्यह: सद्योवाचिपशु: । श्रीपरमेश्वरप्रीत्यर्थं चिपशुना पशु-बन्धेन यक्ष्ये इति सङ्कल्प इदानीमेव चयनसङ्कल्प इत्येके । अयं चिपशुसङ्कल्प इत्युच्यते ॥

१६७ अथ चिपश्वनुष्ठानोपयोगिनी पाशुकी वेदि: । सा चेत्थं निर्मा-तव्या । प्राकृतविहारात्पूर्वत: पूर्वनिर्मितामैन्द्रपश्वनुष्ठानोपयो-गिनीं पाशुकवेदिमुद्वास्य यूपञ्चोद्वास्याहवनीयात्संचरमवशेष्य

सोमिक्या वेदेर्द्विसप्तत्यधिकनवशतपदत्वेषफलायास्तृतीयांशत्वेष-फलमूलषट्त्रिंशत्यङ्गुलदण्डेन द्वादशपदा प्राची दशपदा पश्चाद्-द्वादशपदा पुरस्तादिति सौषामणिकी वेदिःकार्या । शम्यामा-त्रोत्तरवेदिर्भवति द्वादशाङ्गुलपदपक्षे षट्तिलो नैकविंशत्यङ्गुल-दण्डेन दशाङ्गुलपदपक्ष सप्तदशाङ्गुलदण्डेनापि । तथैव विभा-गदण्डादि । चयोदशाङ्गुलसमचतुरस्रोत्तरनाभिः । त्वाग्नेमयि गृह्णामीत्युपधानमन्त्रप्रभृति ये ब्राह्मणाबहुविदइत्यन्तं कृत्वा-आहुणकेतुकचयनपक्षे सद्यस्कालत्वपक्षे तु पशिवपूयनन्तरं यूपाहुत्यादि भवति । अग्निचयनपक्षे तु वेदं विमाय परिस्तीर्य भोजनवपनस्नानवासःपरिधानाञ्जनाभ्यञ्जनादि दीक्षायाद्रूपं कुर्वन्ति । पिपशोर्देवतासङ्कल्पः । सौषामण्याः सप्तदश सा-मिधेन्यः । एकादश प्रयाजाः । अग्नीषोमावाज्यभागौ । अ-श्विनौ सरस्वती इन्द्रश्च प्रधानदेवताः । अश्विनौ सरस्वती इन्द्रः सुत्रामा च ग्रहदेवताः । वनस्पतिः पृषदाज्यदेवता । देवा आज्यपाः । अग्निः स्विष्टकृत् । समानं स्विष्टकृदिति पक्षे नाच स्विष्टकृदुल्लेखः । इन्द्रः सविता वरुणश्च पुरोडाशानां देवताः । अग्निः स्विष्टकृत् । एकादशानुयाजाः । एकदशोपयाजाः सूक्तवाकशंयुवाकौ । अष्टौ पत्नीसंयाजाः एवमात्मकेनेत्यादिश्वः सद्यो वा यक्ष्येइति सङ्कल्प्य अग्नीन् विहृत्य अन्वाधानादिव्रतोपा-यनं शाखाहरणादि । चयनपक्षे मैत्रावरुण्याः शाखां प्लक्षशाखां चाहृत्य पञ्चविधं बर्हिः प्रसूमयं प्रस्तरं शेवधी विधृती चयो-विंशतिदारुकमिध्मंचाहृत्य वेदं करोति । चयनपक्षे इदानीमेव वेदिकरणम् । तदन्तर यूपावटीयाच्छङ्कुः प्रत्यक् विभागास्त्रय-इत्युत्तमं चक्रं परिलिख्य कर्षूःखात्वोच्छ्रयंत्यपस्याः । अथ

पात्न्याज्यस्थाज्यस्थालीमित्यादिमयि गृह्णाम्यग्रे अग्निमित्यादिना दर्भस्तम्बे चाहुतीर्हुत्वा अथपाचतिस्फ्यमुदपात्रं बर्हिः-शम्यामित्यादि चात्वाललेखनप्रभृत्युत्तरवेदिनाभिप्रच्छादनान्तं करोति । उत्तरवेद्या दक्षिणतश्चात्वालपुरीषेण हस्तमात्रं चतु-रङ्गुलोन्नतं चतुरस्रमायतनं करोति तत् खर इत्युच्यते ॥

१९८ तत्र स्रुचां स्थापनं करोति । तस्य खरस्य पश्चादपरः खरः क्रियते तस्मिन् ग्रहाः स्थाप्यन्ते । ततोऽभ्यादानादि यूपाव-टकरणान्तम् । तत इन्द्रघोषस्त्वेत्यादिना संस्रावाभिघारणादि सिकतासमीकरणान्तं ततः शाखापवित्रमुपवेषं च करोति । ततोऽग्निप्रणयनं करोति । ततो ब्रह्मयजमानयोः स्वायतने उपवेशनम् । ततोऽध्वर्युरुत्तरपरिग्राहपरिग्रहादि स्फ्यप्रक्षालनान्तं करोति । आग्नीध्रः शालामुखीये स्रुचः प्रतितप्य स्रुववत् स्व-धितिं सम्मार्ष्टि । अध्वर्युः जुह्वादिषु आज्यग्रहणादि सर्वाज्या-भिमन्त्रणान्तं करोति । ततः सायमग्निहोत्रं हुत्वा शालामुखी-यस्योत्तरतः दर्भेषु तिस्रः पशुकुम्भीः त्रीणि शाखापवित्राणि ति-स्रो यूपरशनाः पशुरशनाश्च त्रीणि वपाश्रपणी युग्मानि । त्री-णि हृदयशूलानि त्रीन्ययोग्रहांस्तथा सुराग्रहांश्च नकुलबदरकर्क-न्धूनां यवगोधूमोपवाकानां च सक्तून् द्वे श्येनपत्रे द्वे दशापवित्रे द्वे द्रोणकलशौ शतातृष्णां स्थालीं चासादयति । एतानि सौत्रा-मणीपाशुकपात्राणीत्युच्यन्ते ॥

१९९ ततोमैत्रावरुण्याः सायंदोहः । श्वोभूते प्रातरग्निहोत्रहोमानन्तरं प्रातर्दोहः । आरुणकेतुकचयनपक्षे महारात्रे जागृतो भूत्वा तदानीमेवापकृष्य प्रातरग्निहोत्रं जुहोति । कर्मणो विहित-कालात्पूर्वमेव यदनुष्ठानं तदपकर्ष इत्युच्यते ॥ (शेषमग्रे)

Digitized by Google

॥ श्रीः ॥

॥ परिभाषेन्दुशेखरस्याकारसनाथत्वम् ॥

(*Continued from page* 32. Vol. VII.)

वासरूपसूत्रेणे(१)ति । वासरूपेत्यस्य यदि सारूप्यावच्छिन्नप्रतियोगिताकभेदवानित्यर्थस्तर्हि तव्यानीययोरपि कृत्प्रत्ययत्वप्रत्ययत्वादिना सादृश्यसत्त्वात् सूत्रस्यैव निर्विषयत्वप्रसङ्ग इति निषादस्थपतिन्यायसहकारेण न समानमसमानमसमानं रूपं यस्येति निरुक्त्या(२) विभिन्नरूपवानित्यर्थमङ्गीकृत्य ण्वोध्याकारे कृत्स्यानुपूर्व्यारोपे ण्वोध्याकारान्निरूपवत्त्वं तस्याहतमिति वासरूपसूत्रप्रवृत्तिः स्यादिति भावः ।

वैरूप्यं स्वानुपूर्वीघटितमिति न तदारोपो नानुबन्धकृतमनेकाल्त्वमिति परिभाषाविरुद्धः ।

यद्वा नानुबन्धेतिपरिभाषया अनुबन्धत्वाघटितं यद् बोधकावयवाल्घटितं रूपं तदेव नारोप्यत इत्यर्थः ।

एवञ्च हलन्तत्वाद्बोधकावयवाल्घटिततया ऽनारोपेऽपि वैरूप्यस्य तथात्वाभावादारोपे न किञ्चिद्बाधकमिति वासरूपसूत्रप्रवृत्तिरविहतेति भावः ।

के चित्तु सरूपपदघटकीभूतरूपपदेनानुपूर्व्येव विवक्षिता न तु धर्म्ममात्रम् ।

एवञ्च तव्यत्स्यानुपूर्व्यवच्छिन्नप्रतियोगिताको भेदोऽनीयेऽस्त्यत एवेति न सूत्रस्य निर्विषयत्वप्रसङ्ग इत्याहुः ।

परन्तु रूपपदेनानुपूर्वीग्रहणेऽपि निषादस्थपतिन्यायेन(३) विभिन्नानुपूर्वीमानित्येवार्थः स्याच्चानुपदोक्तदिशेति चिन्तनीयम् ॥

---

(१) नन्वेवमपि वासरूपसूत्रेण कविषयेऽस्त्वोऽप्यापत्तिरत आह (नानुबन्धकृतमसारूप्यम्) ॥ सू० ॥

(२) ज्योतिर्जनपदरात्रिनाभीतिसूत्र उत्तरपदेन न पूर्वपदस्याक्षेपः । आक्षेपेऽपि वा पूर्वपदत्वस्य यथाकथं चिदाश्रयो गृह्यते न तु पर्य्याप्त्येव । वाऽसरूपसूत्रस्य भाष्यसामान्यात् । यद्वा न समानमिति फलितार्थप्रदर्शनम् । विग्रहस्तु समानं रूपं सरूपं न सरूपमसरूपमसरूपं विद्यतेऽस्येत्यसरूप इतीति भावः ॥

(३) निषादस्थपतिं याजयेदिति विधौ निषादस्थपतिपदस्य निषादानां स्थपतिबोधकत्वमाहोस्वित् निषादरूपस्थपतिबोधकत्वमिति संशये निषादाभिन्नस्थपतिबोधकत्वे शूद्रजातिविशेषस्य निषादस्य मन्त्रानधिकारात्तत्कर्तृकयागोऽनुपपन्न इति विरुध्य

Digitized by Google

परिभाषासत्त्वे त्वनुबन्धघटितसमुदायवृत्तिवैरूप्यस्यातिदेशनिषेधा-च्च बोध्ये तदादिषु इति न क्वाऽपि वाऽसरूपसूत्रप्रवृत्तिरिति बोध्यम् ।

अनेकान्तपक्षे तु बाधकत्वमप्युभयप्रकारस्यैवेति किंगतं वैरूप्य-मास्थेयेत प्रतिमिलित्वा स्थलद्वये वाऽसरूपसूत्रप्रवृत्तिरिति न परिभाषोपयोगः ।

ननु वाऽसरूपसूत्रे बाधकगतमसारूप्यं विवक्षितम्, बाध्यगतं वा ।

नाद्योऽसरूपवचनस्यैव वैयर्थ्यम् । बाध्यवृत्तिसारूप्यवताऽपवादेना-ऽौत्सर्गिकस्यबाधे वैकल्पिकबाधे वा फलेऽविशेषात् ।

अन्त्ये तु कार्यबोध्ययोरसारूप्याभावात् स्वत एव वाऽसरूपसूत्राप्र-वृत्तौ परिभाषावतरणासङ्गतिरिति चेत् ।

अत्राहुः । बाधकगतासारूप्यविवक्षायामपि मूर्तौ घन इति विहि-तेनापा हनश्च वध इतिविहितस्यापो वैकल्पिकबाधाभावायाऽसरूपवच-नस्य चारितार्थ्यं स्पष्टमेव ।

वैकल्पिकबाधे तु तत्सन्नियोगेन वधादेशापत्तौ मूर्तावप्यवध इत्यापत्तिः ।

न च तन्मात्रप्रयोजनकत्वेऽसरूपपदमपहायानपित्येव वाच्यं नैक-मुदाहरणमिति न्याया(१)नुपपत्तेरिति वाच्यम् ।

नर्थक्यप्रसङ्गभिया निषादसंबन्धिस्थपतिबोधकत्वमेवेति पूर्वपक्षमुद्भाव्य तथाविधेऽर्थे निषादशब्दस्य जघन्यवृत्त्या स्वार्थसंबन्धिबोधकत्वमङ्गीकरणीयं स्यादिति निषादाभिन्नस्थपतिबोधकत्वमेवास्य वाक्यस्य, निषादपदस्य स्वशक्यार्थबोधकत्वपरिरक्षितलाघवानुरोधात् । तादृशवाक्यार्थबोधे च सति निषादस्य शूद्रजातिविशेषस्य मन्त्रानधिकारात्तद्विधिवैयर्थ्यं स्यादिति तद्विधिबलादेव तावत्कर्मोपयोगिमन्त्राधिकारोऽपि कल्प्यत इत्यन्यत्र सिद्धान्तितम् । तत्सिद्धान्तसिद्धोऽयं न्याय इति तात्पर्यम् । एष एव न्यायः फलमुखगौरवं न दोषायेत्यादिवाक्यान्तरैरन्यकारैर्व्यवह्रियते । तत्र फलमुखेत्यस्य तात्पर्यमुखेत्यर्थः । मुखे वाक्यार्थबोधजनकशक्तिज्ञानादौ लाघवं यस्य तादृशवाक्यार्थबोधः पश्चात्कालिकस्यानुपपत्तिमूलकपदार्थान्तरकल्पनागौरवसंवलितोऽपि युक्त एवेति तद्भावः ॥

(१) नैकमुदाहरणं योगारम्भं प्रयोजयतीति तत्र तत्र भाष्य उक्तम् । तस्य च यदि यथाश्रुत एवार्थस्तदा नैरर्थक्यापत्तिः तत्तत्स्थलेऽनेकेषामां बहूनां शास्त्राणामसं-गतिः । नैकमित्यादिभाष्यकारोक्तेर्निर्मूलत्वेन भाष्यकारादिप्रामाण्यमात्रावलम्बनेनापूर्वस्य वचनस्य कल्पनापत्तिश्चेति नैकमित्यादिभाष्यकारोक्तेरल्पतरलक्ष्यसंस्काराय संभवति शास्त्रस्य आरम्भोऽल्पलक्ष्ये बहुलतायास्तया निर्देशे तावन्मात्रलक्ष्यसंस्काराय व्यापकध-र्मावच्छिन्नोद्देश्यकतया शास्त्रस्य निर्माणोऽनुचित इत्याशयः । एवं च नैकमित्यादिभा-ष्यकारोक्तिर्युक्तिकं वस्तु निर्दिशति न त्वपूर्वं वचनमित्यादि बोधयितुं न्यायेत्युक्तम् ॥

मूलविभुजादिभ्य इति विहितकेनेगुपधलक्षणकस्य नित्यबाधानापत्तौ कः इगुपधलक्षणं कं बाधित्वा कर्मण्यणित्यणा प्रसङ्गात् ।

उपपदमतिङित्यस्याप्रवृत्तौ वैकल्पिकसमासापत्ते(१)श्च ।

(२)एवं पचाद्यचो हरतेरनुद्यमन इति विहितेनाचा नित्यबाधानापत्तौ तद्विषयेऽपि वैकल्पिकसमासापत्तावंशस्य हर इत्यादेरपि साधुत्वापत्तिश्च ।

(३)एवं बोध्यगतासारूप्यविवक्षायामपि बोध्यगतस्यासारूप्यस्य बोध्य आरोपादिनाऽसत्त्या तदादाय वासरूपसूत्रप्रवृत्तावप्यसकृत्तौ को बाध इति ।

वासरूपसूत्रे भाष्ये(४) तु वाऽसरूपसूत्रस्योत्सर्गवृत्तिरूप भिन्नरूपवताऽपवादेन वैकल्पिक उत्सर्गबाध इत्यर्थे ग्रामणीर्ग्रामणाय इति क्विबणोः समावेशानुपपत्तिं क्विपो रूपवत्त्वसामान्याभावमभिप्रेत्याशङ्क्य, वाऽसरूपसूत्र औपदेशिकरूपग्रहणेन क्विपोऽपि तादृशरूपवत्त्वेन न समावेशानुपपत्तिरिति समाधायौपदेशिकासारूप्यग्रहणे काणो वैकल्पिकबाध्यबाधकभावमाशङ्क्यानुबन्धानामनेकान्तत्वेन समाधायाथ वेत्यादिना प्रायोगिकासारूप्यविवक्षायामपि दृशश्वेतोरिति ज्ञापकसिद्धेन लादेशेषु वासरूपविधिर्नेति वचनेन श्वः पक्तेत्यत्र पाक्षिकीं लडापत्तिं परिहृत्याथ वेत्यादिना प्रायोगिकासारूप्यविवक्षायां सकलेष्टा(५)सिद्धिमुक्त्वा पुनरौपदेशिकमेवासारूप्यं विवक्षितमित्युट्टङ्कयैकान्तपक्षेऽपि ददातिदधात्योरिति सूत्रस्थवि-

---

(१) इदं च महोपाध्यायश्रीसीरदेवकृतपरिभाषावृत्तौ तृतीयाध्यायस्य प्रथमे पादे स्पष्टम् । तस्य चायं भावः । मूलविभुजादिभ्य इत्यत्र यद्यपि शब्दतो न सप्तमी श्रूयते तथापि सप्तमीमर्थादापतितामादाय मूलादिशब्दानामुपपदसंज्ञा विधातव्याऽत एव मूलानां विभुजो रथ इति प्रयोगो न साधुरिष्यत इति ॥

(२) मूलविभुजादिभ्य इत्यत्र सप्तम्याः शब्दतोऽनुपात्तत्वेन तत्रोपपदसमासस्य दृढप्रमाणानुपबृंहिततया मूलानां विभुज इत्यस्यानिष्टत्वमप्रामाणिकमिति मत्वोपपदसमासविषय एव दूषणान्तरमाह ॥

(३) अन्ये त्वित्यादिना पूर्वमुपपादितं दोषमुद्दिधीर्षति ॥

(४) तृतीयाध्यायप्रथमपादषष्ठाह्निकान्तस्थमेतद्भाष्यम् ॥

(५) ग्रामणीर्ग्रामणाय इत्यादेर्न सिद्धिः क्विपि प्रायोगिकरूपसामान्यस्याभावेन प्रायोगिकासारूप्यसत्त्वात्तद्रूपभिन्नरूपवताऽपवादेनोत्सर्गस्य वैकल्पिको बाध इत्येतदर्थकस्य वाऽस-

भावापहत्वमूलकेनापवादत्वस्यानुबन्धभेदे रूपभेदे वा सत्येव सम्भवेनासरूपवहत्वस्यैव वैयर्थ्यात्तन्मूलकेन वा नानुबन्धकृतमसारूप्यमिति वचनेन समाधायाथ वेत्यादिना पूर्ववद्वेशा(१)सरूपवहत्ववैयर्थ्यमुपपाद्य तत्सामर्थ्यात् प्रायोगिकौपदेशिकोभयविधासारूप्यस्यैव वैकल्पिकबाधनिमित्तत्वमुपवर्ण्य कार्योरत्र प्रायोगिकासारूप्यासत्त्वेन न वैकल्पिकबाध्यबाधकभाव इति समाधाय पुनरथ वेत्यादिना पूर्ववदेव वासरूपसूत्रस्यासरूपवहत्ववैयर्थ्यमुपवर्ण्यासरूपवहत्वस्य प्रायोगिकासारूप्यविवक्षणे ज्ञापकत्वमुपन्यस्य तादृशासारूप्यस्य कार्योरभावान्न वैकल्पिकबाध्यबाधकभाव इति समाहितम् ।

तद्रीत्या तु वाऽसरूपसूत्र औपदेशिकासारूप्यग्रहणे लादेशेष्वित्यस्य प्रायोगिकासारूप्यग्रहणे च नानुबन्धकृतमित्यस्यानावश्यकत्वं प्रतीयते ।

(२)किं चोक्तभाष्यप्रामाण्यादेव पूर्वोक्तानामभ्रवध इत्यादिप्रयोगाणामनभिधानकल्पनमप्यावश्यकमन्यथा पक्षत्रये(३)ऽपि भाष्यकृदुपपादितस्यासरूपवहत्ववैयर्थ्यस्यासम्भव(४) एव स्यात् ।

(५)एवं प्रायोगिकासारूप्यग्रहणपक्षे चेदौपदेशिकस्यासारूप्यस्य स्यात् प्रयोगेऽतिदेशस्तदापि कार्ययोर्वैकल्पिकबाध्यबाधकभावप्रसक्त्या भाष्यमसंगतमेव स्यादिति प्रयोगेऽसारूप्यस्य नातिदेशः ।

यद्यपि प्रायोगिकासारूप्यविवक्षापक्ष उभयविधासारूप्यविवक्षापक्षे च न क्तिक्तचोः समावेशः परिगृहीतोऽत एव "अथ वा प्रयोगेऽस-

---

रूपोऽस्त्वयमित्यस्यापत्त्या क्तिक्तचोः समावेशानुपपत्तिरित्यर्थः । स्फुटीभविष्यति चेदमनुपदमेवोपरिष्टात् ॥

(१) अनुबन्धभेदाभावे रूपभेदाभावे चापवादत्वमेव न सम्भवतीति पूर्वोक्तप्रकारेणैवेति तात्पर्य्यम् ॥

(२) परिभाषावृत्तिप्रदर्शितप्रागुक्तफलानां भाष्यविरुद्धत्वं स्फुटयति ॥

(३) कार्ययोर्वैकल्पिकबाध्यबाधकभावाभावाय नानुबन्धकृतमसारूप्यमितिवचनस्वीकारपक्षे वाऽसरूपसूत्र औपदेशिकप्रायोगिकेतूभयविधमसारूप्यं विवक्षितमिति पक्षे तत्सूत्रे प्रायोगिकमसारूप्यं विवक्षितमिति पक्षेऽपीत्यर्थः ।

(४) अभ्रवध इत्यादिविषये प्रागुक्तरीत्या तच्चारितार्थ्यसम्भवादिति भावः ॥

(५) अन्त्ये त्वित्यादिना पूर्वमुक्तं दोषं प्रागुक्तोदाहरणोद्घाटनेन द्रढयति ।

रूपाणां वा विधौ न सर्वमिष्टं संगृहीतमिति कृत्वा द्वितीयः प्रयोग उपास्यते कोऽसावुपदेशो नाम उपदेशे चेतेऽसरूपा" इत्यनुपदमेव भाष्य(१) उक्तम् । व्याख्यातं च कय्यटेन(२) "क्तिन्नादयो न संगृहीता" इति ।

तथापि वाऽसरूपसूत्रस्यासरूपपदेन सारूप्याभाववानेव विवक्षितो न विभिन्नरूपवान् । एवं च क्तिन्नपि रूपाभावेऽपि सारूप्याभाववत्त्वमक्षतमेवेति न तयो(३)रपि पक्षयोः काप्यनुपपत्तिः । न सर्वमिष्टं संगृहीतमिति पूर्वभाष्यं तु न सिद्धान्त्युक्तिः । ध्वनितं चैतत्तत्रैवोद्द्योत इति केचित् ।

तत्रेदं वक्तव्यम् पूर्वोक्तभाष्यप्रामाण्यात् कथञ्चिदुक्तप्रयोगाणामनभिधानकल्पनेऽपि प्रायोगिकासारूप्यपक्षे प्रयोगे बाधकवृत्तिनिष्ठादेरारोप इवासारूप्यस्यारोपः केन वार्य्यताम् ।

प्रायोगिकासारूप्यपक्षसामर्थ्येनेति चेद्वङ्गीकृतैवैषा नानुबन्धकृतमसारूप्यमिति । यतोऽस्या अपि नासारूप्यस्यारोप इत्येवार्थः ।

किं चोक्तयोः पक्षयोः क्तिन्नादिसंग्रहायासरूप इत्यस्य समानरूपाभाववदित्यर्थकत्वे निषादस्थपतिन्यायविरोधापत्त्या तौ पक्षा(४)वेकदेश्युक्तिविलसितावेव ।

एवं च तदुपपादकासरूपपक्षवैयर्थ्योपपादनमपि न सिद्धान्तिसंम्मतमिति प्रागुक्तप्रयोगाणामनभिधानमपि न प्रामाणिकम्(५) ।

प्रकृतपरिभाषाज्ञापकत्वं तु ददातीति सूत्रस्याविभाषापक्षस्यैव नासरूपपक्षस्य ।

(६)एकमौपदेशिकासारूप्यपक्षेऽपि लुङ्लटोरौपदेशिकासारूप्याभावस्या समावेशाभावाय लादेशेषु वाऽसरूपविधिर्नास्तीत्यावश्यकमेव ।

---

(१) इदमपि भाष्यं तृतीयाध्यायप्रथमपादषष्ठाह्निकान्तर्गतवाऽसरूपसूत्रव्याख्यानपरं बोध्यम् ॥

(२) तत्रत्यग्रन्थव्याख्यानतत्परेणैवेत्यर्थः ॥

(३) प्रायोगिकासारूप्यपक्ष,प्रायोगिकौपदेशिकोभयविधासारूप्यपक्षात्मकयोः प्रागुक्तयोः पक्षयोरित्यर्थः ॥

(४) भाष्योक्तौ प्रायोगिकासारूप्यविवक्षाप्रायोगिकौपदेशिकोभयविधासारूप्यविवक्षारूपौ पक्षावित्यर्थः ॥

(५) सिद्धान्तिभाष्यसम्मतमित्यर्थः ॥

(६) तत्पक्षभाष्यस्यैकदेश्युक्तितायां युक्त्यन्तरमाह ॥

योपदेशिकासारूप्यविवक्षायां कथादिसमावेशाभावार्थमावश्यकतया प्रकृतपरिभाषयैव लुङ्लृटोः समावेशाभावः सिद्ध इति तु न युक्तम् । आदेशगतासारूप्यस्य लकार आरोपेण वाऽसरूपसूत्रप्राप्तिरित्युक्तेत एवोक्तत्वात् ।

आदेशगतासारूप्यस्यारोपोऽप्रामाणिक इति चेत्तर्ह्येव सर्वथा नादूरेऽस्विति वचनम् । भाष्यन्तु न कथमप्यादेशगतमसारूप्यं स्थान्यारोपादिनाऽङ्गीकृत्य लापयितुं शक्यमिति सूत्रदृशा भावयितव्यमिति ।

वाऽसरूपसूत्रप्रदर्शितनानाविधप्रकाराणां सिद्धान्तसंमतं प्रकारमाह । (१)ददातीति ।

इदमेव ज्ञापकं महामहोपाध्यायश्रीसीरदेवैर्व्याकृतम् ।

णबाधकस्येति । श्याद्व्यधेति परत्वाच्छेणाऽऽदन्तत्वप्रयुक्तप्राप्तिकस्य णस्य बाधको यः शप्रत्ययस्तस्य यद्विभाषाविधायकं ददातीति सूत्रं तद्घटके विभाषाग्रहणं ज्ञापकमित्यर्थः ।

ज्वलितीत्युत्तरसूत्रविषयेऽपि वाऽसरूपसूत्रेणैव पक्षेऽच्प्रत्ययस्य सिद्धतया नोत्तरार्थमपि विभाषाग्रहणमिति भावः ।

ननु नानुबन्धकृतमसारूप्यमिति परिभाषायां ज्ञापितायामपि ददातीति सूत्रमेव व्यर्थम् । दद दाने दध धारणे इत्यनयोः पचाद्यचि शप्रत्ययान्तसमानाकारयो डुदाञ् दाने डुधाञ् धारणे इत्यनयोरादन्तत्वप्रयुक्तणप्रत्ययबाधकशप्रत्ययान्तशब्दयोः सिद्धेर्विध्यनूद्यत्वादिति चेत् ।

अत्र केचित् । अच्प्रत्ययान्तयोर्ददधशब्दयोर्नञाऽशक्तावाक्रोशे वा षष्ठ्यां समासेऽददोऽदध इत्यत्रेष्टस्य तत्पुरुषे तुल्यार्थेति पूर्वपदप्रकृतिस्वरस्यानापत्तिः । अजन्तं कान्तं च नञः परमन्तोदात्तमित्याद्यर्थकेनाच्काववशक्तावाक्रोशे चेत्यनेन बाधापत्तेः । शप्रत्ययान्तयोस्तु पूर्वपदप्रकृतिस्वरो निरपवादो भवतीति शविधानमावश्यकमिति समादधते ।

तत्रेदं वक्तव्यम् । तावन्मात्रफलकत्वे स्वरप्रकरणे ददधौ चेत्येव

(१) ददातिदधात्योर्विभाषेति [illegible] ॥ सू०॥

ब्रूयात् । एवं च विभाषा तृन्नन्नेत्यस्य छन्दोविषयत्वात् पूर्वे पाठे विभाषा-पदं न कर्तव्यं भवतीत्यपरं लाघवम् ।

किं च इदुदुपधस्य चाप्रत्ययस्य इति सूत्रे व्यवस्थितविभाषात्वाश्रयणेन ततो वा-रतया ददीयिषतीत्यादिसिद्धिः ।

ददातीति सूत्रस्थे तु सन्यतः इत्यस्य प्रतिषेधाद्वित्वा-भाव उक्तरूपसिद्धिर्भवतीति तत्संदेहस्यैव, तस्येव स्वरदोषपर्यन्तानुधावनं संप्रदायाननुमतमिति ।

अस्यां परिभाषायां व्यवस्थितविभाषा विभाषा छन्दसीति सूत्रस्थं विभाषाग्रहणमपि ज्ञापकमनुसंधेयम् ।

विभाषा घ इति सूत्रघटकविभाषापदं तु व्यवस्थार्थकमिति न तत् प्रकृतपरिभाषां ज्ञापयितुं प्रभवतीति बोध्यम् ।

परिभाषाज्ञापकमुक्त्वा फलमाह । ([1]) तेनेति ।

इतीति । प्रागुक्तं ज्ञापकं फलं चेत्यर्थः ।

भाष्य इति । तृतीयाध्यायप्रथमपादषष्ठाह्निक इत्यर्थः ।

([2])अत्र केचित् । परिभाषात्रितयकरणलाघवानुरोधेनोदीचां माङ इति निर्देशस्यानुबन्धानामनेकान्तत्वमित्यर्थज्ञापकत्वमेवोचितम् ।

अत एव सिद्धमनुबन्धानामनेकान्तत्वादिति घुसंज्ञासूत्रस्य([3])दाऽप-रूपसूत्रस्या([4])दिभाष्येण विरोध इत्याहुः ।

तन्न शोभनम् । तस्य लोप इति सूत्रे भाष्य([5]) एकान्तत्वानेकान्त-त्वपक्षयोर्युक्तत्वायुक्तत्वसंप्रधारणायामेकान्तत्वपक्षस्यैव युक्तत्वस्य कण्ठर-वेणैवोक्तत्वेन तद्विरोधात् ।

---

(१) तेन गोपेन क्रियायाः साधितानि कार्याणि भाष्ये स्पष्टम् ॥ ६ ॥ सू० ॥
(२) व्याख्यातपरिभाषात्रितयोपयुक्तं किं चिद्वक्तव्यं परिशिष्यादन्त आह ॥
(३) प्रथमाध्यायप्रथमपादपञ्चमाह्निकान्तस्थमेतद्भाष्यम् ॥
(४) तृतीयाध्यायप्रथमपादषष्ठाह्निकान्तस्थमेतद्भाष्यम् ॥
(५) प्रथमाध्यायतृतीयपादप्रथमाह्निकान्तःस्थं भाष्यमेतत् ॥

Digitized by Google

अनेकान्तत्वपक्षस्य निर्हेतुकत्वबोधनपरभाष्य(१)विरोधाच्च ।

फलमुखगौरवस्यादोषाच्च ।

सिद्धमनुबन्धानामनेकान्तत्वादिति भाष्यस्य(२) तत्रतत्रैकान्तपक्षेऽपि प्रकारान्तरं प्रदर्शयतोत्तरभाष्येणैवैकदेश्युक्तित्वबोधनाच्च ।

न हि कण्ठाभिव्यक्तिजनकेत्याद्यन्यत्र प्रतिपादितरीत्यानेकान्तत्वपक्षेऽपि दृष्टप्रयत्नसंस्कारमूलकस्यैकस्य वचनस्य(३) कल्पनीयत्वेन तत्रतत्र(४) सानुबन्धाद्विभक्त्युत्पत्तेः सोच्चत्वस्य कल्पनेन बहुषु टिदादिशब्देषु(५) सामीप्यमूलकावयवत्वारोपस्य कल्पनेनाद्यन्तशब्दयोर्बहुषु स्थलेषु(६) लक्षणाया आवश्यकत्वेन च लाघवाभावाच्च(७) ।

एकान्तपक्षेऽपि च स्यपीत्यस्य विशेषरूपेण(८) ज्ञापकत्वाङ्गीकारे नानुबन्धकृतमनेकाल्त्वमित्येतदनावश्यकत्वस्य पूर्वमुपपादितत्वाच्च ।

पूर्वोक्तव्यवस्थितालत्वव्यवहारतदभावयोरनुबन्धेषु स्वीकृतत्वे हलन्त्यादेर्लक्ष्यानुरोधादिनाऽनारोपे तिसृणामपि परिभाषाणामेकरूपेणैव संग्रहाच्च ।

मतान्तरे(९) सत्त्वादेरानुपूर्वीघटितधर्मस्यारोपावश्यकत्वेऽपि सादृश्याभावस्यानुपूर्व्यघटितत्वाङ्गीकारे तृतीयाया अनावश्यकत्वाच्च ।

(१०)अल्त्वव्यवहाराभावज्ञापनद्वारेति विवरणस्या(११)नुबन्धानामल्-

---

(१) तस्य लोप इतिसूत्रस्थं "कुत एतत् । अत्र हि हेतुर्व्यपदिष्टः, यच्च नाम सहेतुकं तन्न्याय्यम्" इति भाष्यं प्रकृतभाष्यपदेन विवक्षितम् ।

(२) घुसंज्ञादिविधायकसूत्रस्थस्येत्यर्थः ॥

(३) एकान्तपक्षेऽनावश्यकस्येति शेषः ॥

(४) अग्नेर्ढगित्यादौ ॥

(५) आद्यन्तौ मिदचोऽन्त्यादित्यादिघटकेषु ॥

(६) आदिर्ञिटुडवः हलन्त्यमित्यादिषु ॥

(७) अनेकान्तत्वपक्षेऽपीति शेषः ॥

(८) इत्त्वघटित एव सानुबन्धकवृत्तिधर्मे आरोप्यत इत्यादिप्रागुक्तरूपेणेत्यर्थः ॥

(९) अन्यत इत्यादिघटकसनादिपदानां सकारोत्तराकारोत्तरनकारत्वरूपानुपूर्व्यवच्छिन्नबोधकत्वाभ्युपगन्तृमत इत्यर्थः ॥

(१०) एकान्तत्वपक्षे परिभाषात्रितयाश्रयणप्रयुक्तगौरवप्रवादं परिमिमार्जयिषति ॥

(११) प्रथमाध्यायप्रथमपादसप्तमाह्निकान्तःस्थस्यानेकाल्शित्सर्वस्येतिसूत्रव्याख्यानपरभाष्यप्रदीपोद्द्योतस्येत्यर्थः ॥

त्यादिना व्यवहारविषयता यथा न स्यात्तथा कल्पनीयम् । ततश्चानुबन्धाना-
मविद्यमानत्वबुद्धिर्विद्यमानानामपि कर्त्तव्या । ततश्च हलन्त्यादेरारोपस्य
प्रसङ्ग एव नास्ति । मेद्यादौ सतोऽपि इकारस्याविद्यमानतयैजन्तत्वस्याक्ष-
तिश्च । कार्य्यान्तरविषये चानुबन्धानामविद्यमानत्वेन क्व बोधकेऽप्यसारूप्यं य-
द्बोध्य मारोप्येतेति न तत्रापि कोऽपि दोषः(१) । (२)नित्त्वादिप्रयुक्तकार्यं
तु न स्यदीतिलिङ्गेनानुबन्धासञ्जनसामर्थ्येन वेत्त्वघटितधर्म्मनिमित्तके
विधौ कर्त्तव्ये नानुबन्धानामविद्यमानत्वमिति कल्पनेन नाविद्यमानत्वम् ।
एवं सन्यत इत्यादिघटकसनादिपदस्यानुपूर्व्यवच्छिन्नबोधकत्वकल्पे तत्त-
त्सूत्रप्रणयनसामर्थ्येनानुपूर्वीघटितधर्म्मनिमित्तके विधावप्यविद्यमानवद्भा-
वाभावकल्पनेन सन्त्वादिनिमित्तकतत्तत्कार्य्य(३) प्रवृत्तौ न कोपि बाधः ।
असारूप्यस्य चैतत्कल्प(४)आनुपूर्व्यघटितत्वादेव नारोप इत्याद्याशयकल्पनेन
"नानुबन्धकृतमनेकाल्त्वं" "नानुबन्धकृतमनेजन्तत्वं" "नानुबन्धकृतमसा-
रूप्य"मिति तिसृणामप्येकरूपेण संग्रहे गौरवगन्धाभावाच्च ।

(५) एतेनानेकालितिसूत्रस्थं शित्त्वग्रहणं व्यर्थं(६) कुत्र इत्यादिनिर्द्देशे
नैव नानुबन्धकृतमनेकाल्त्वमिति परिभाषाज्ञापनसम्भवादिति परास्तम् ।

परिभाषायास्तन्निर्द्देशमूलकत्वेऽविद्यमानत्वाद्यलाभात्तिसृणां संग्र-
हाभावात्(७) ।

तन्निर्द्देशेन नानुबन्धकृतमनेकाल्त्वमित्यस्यां ज्ञापितायामोषादौ
सर्वादेशत्वसम्पत्त्यर्थं शित्त्वग्रहणस्यावश्यकत्वाच्च ।

(८) अत एवानेकाल् सूत्रशेषे भाष्ये(९) "तत्रासरूपसर्वादेशदाप्प्रतिषे-

---

(१) वैकल्पिकबाध्यबाधकभावादिरूप इत्यर्थः ॥

(२) नन्वनुबन्धानामविद्यमानत्वकल्पने नित्त्वादिप्रयुक्तकार्य्याणामनुपपत्तिः, न-
कारादीनामविद्यमानत्वादत आह ॥

(३) सन्यत इतीत्त्वादिकार्येत्यर्थः ॥

(४) सनादिपदानां सानुबन्धकपर्यायानुपूर्व्यवच्छिन्नबोधकत्वकल्प इत्यर्थः ॥

(५) उक्तं विवरणस्याशयं युक्त्यन्तरेण द्रढयितुमीहते ॥

(६) व्यर्थमेवेत्यर्थः ॥

(७) अनुगतेनैकरूपेणेति शेषः ॥

(८) उक्तं विवरणस्याशयं प्रामाण्येनोपष्टम्भयति ॥

(९) प्रथमाध्यायप्रथमपादसप्तमाह्निकान्तर्गतमेतद्भाष्यम् ॥

Digitized by Google

धेषु पृथङ्निर्देशोऽनाकारान्तत्वादित्युक्तं तत्र वक्तव्यं भवती"ति सामान्येन तिसृणां परिभाषाणामकर्तव्यत्वं नानुबन्धकृतमनेकाल्त्वमित्येतत्परिभाषाफलत्वेनोक्तं साधु सङ्गच्छते ।

(१) समुदायद्वाराऽवयवे प्रयोजनवर्णनपरतया व्याख्यानं तु क्लिष्टतरमिति दिक् ।

(२) अत्रेदमवधेयम् । नानुबन्धकृतमनेकाल्त्वमित्यादिप्रवृत्तावनुबन्धत्वयोग्यतापि निमित्तम् ।

अत एव काशीविषये नानुबन्धकृतमसारूप्यमित्यस्य प्रवृत्तिर्वाऽसरूपसूत्रे भाष्य(३) उक्ता। अन्यथा वाऽसरूपसूत्रस्य शास्त्रवाक्यार्थबोधवेलायां प्रवृत्त्या तदानीं च प्रत्ययादित्वज्ञानाभावेनेत्संज्ञाया अप्रवृत्तावनुबन्धत्वस्याप्यज्ञानान्नानुबन्धकृतमसारूप्यमित्येतत्प्रवृत्तिप्रदर्शकवाऽसरूपसूत्रस्थभाष्या(४)ऽसङ्गतिरित्यादि स्पष्टं जसः शीत्यादिशेखरादौ(५)। ध्वनितं च वाऽसरूपसूत्रलुटः प्रथमस्येतिसूत्रादिविवरणादौ(६) ।

तस्यायमाशयः । यद्यपि नानुबन्धकृतमसारूप्यमित्यत्रैवानुबन्धत्वयोग्यत्वस्यापि ग्रहणेन तद्भाष्य(७)लापनसामञ्जस्यं नानुबन्धकृतमनेकाल्त्वमित्येतत्प्रवृत्तावनुबन्धत्वयोग्यत्वस्य निमित्तत्वे न फलं नापि मानम् । एवमनेकाल्सूत्रप्रवृत्तौ शित्त्वयोग्यत्वस्य निमित्तत्वे न फलं नापि मूलम् ।

तथापि वाऽसरूपसूत्रस्थभाष्य(८)प्रामाण्यात् सामान्येनेत्संज्ञायोग्यत्वस्याप्यनुबन्धत्वव्यवहारप्रयोजकत्वे गतिविरहेण तथैव कल्पनीयमिति।

---

(१) नन्वेतद्भाष्यं प्रायोजितमेवेत्यत आह ॥

(२) अनुबन्धप्रसङ्गात्तद्विषये किंचिद्विशेषमाह ॥

(३) तृतीयाध्यायप्रथमपादषष्ठाह्निकान्तर्गत इत्यर्थः ॥

(४) तृतीयाध्यायप्रथमपादषष्ठाह्निकान्तर्गतभाष्येत्यर्थः ॥

(५) अजन्तपुल्लिङ्गस्थसर्वादिप्रकरणस्थ इत्यर्थः ॥

(६) तृतीयाध्यायप्रथमपादषष्ठाह्निकान्तस्थं वाऽसरूपसूत्रविवरणम् । लुट इति-सूत्रस्थं तु द्वितीयाध्यायचतुर्थपादद्वितीयाह्निकान्तःस्थं विवरणमिति बोध्यम् ॥

(७) तृतीयाध्यायप्रथमपादषष्ठाह्निकान्तर्गतवाऽसरूपसूत्रविवरणपरभाष्येत्यर्थः ॥

(८) तृतीयाध्यायप्रथमपादषष्ठाह्निकान्तर्गतभाष्येत्यर्थः ॥

Digitized by Google

परन्तु लुट इति सूत्रस्थभाष्येण[1] परस्मैपदानामितिसूत्रस्थभाष्येणा[2]नेकाल् शित्सर्वस्येतिसूत्रस्थभाष्येण[3] चैतद्विरुणाद्धि ।

भाष्ययो[4]र्डारौरसितित्वा नानुबन्धकृतमनेकाल्त्वमित्यस्याप्रवृत्तिरुक्ता ।

अन्त्ये[5] जसश्शीत्यत्र शकारस्य विशेषणार्थतया सार्थक्येन तदर्थमनेकाल्सूत्रस्थशिद्ग्रहणस्य चारितार्थ्यमाशङ्क्य "अन्त्यस्यायं स्थाने भवन् प्रत्ययः स्यात् । असत्यां प्रत्ययसंज्ञायामित्संज्ञा न स्यात् । असत्यामित्संज्ञायां लोपो न स्यात् । असति लोपेऽनेकाल् । यदानेकाल् तदा सर्वादेशः । यदा सर्वादेशस्तदा प्रत्ययः । यदा प्रत्ययस्तदेत्संज्ञा । यदेत्संज्ञा तदा लोपः" इत्यादिना शिद्ग्रहणवैयर्थ्यमुपपाद्य परिभाषाज्ञापकत्वमुक्तम् ।

अनुबन्धत्वयोग्यतया परिभाषाप्रवृत्तौ शित्त्वयोग्यतया सूत्रप्रवृत्तौ च भाष्य[6]विरोधः स्पष्ट एवेति ।

यद्यपि प्रागुक्तोपजीव्यविरोधाविरोधाभ्यामपि भाष्यं[7] ज्ञापयितुं शक्यं तथाप्यनित्स्वादिति सूत्रद्वयस्थभाष्यैकदेशयुक्तित्वप्रतिपादकोद्ग्रन्थस्य कथं संगतिः स्यादिति ।

केचित्तु नेत्संज्ञायोग्यत्वं परिभाषा[8]प्रवृत्तौ निमित्तं न चेत्संज्ञायोग्यशकारवत्त्वं सूत्र[9]प्रवृत्तौ ।

वाऽसरूपसूत्रस्थं भाष्यं[10] तु वाक्यार्थबोधकालेऽपि प्रत्यय इत्यधिकारात् प्रत्ययत्वज्ञानेनेत्संज्ञाप्रवृत्तौ न विरोध इत्याशयेन प्रवृत्तम् ।

---

(१) द्वितीयाध्यायचतुर्थपादद्वितीयाह्निकान्तःस्थेन भाष्येणेत्यर्थः ॥
(२) तृतीयाध्यायचतुर्थपादप्रथमाह्निकान्तःस्थेन भाष्येणेत्यर्थः ॥
(३) प्रथमाध्यायप्रथमपादषष्ठमाह्निकान्तर्गतेन भाष्येणेत्यर्थः ॥
(४) लुट इतिसूत्रपरस्मैपदानामितिसूत्रयोः ॥
(५) अनेकाल् शित्सर्वस्येति सूत्रे ।
(६) प्रागुक्तसूत्रत्रितयस्थभाष्येत्यर्थः ॥
(७) लुट इतिसूत्रस्थं परस्मैपदानामितिसूत्रस्थं सर्वादेशत्वबोधकसूत्रस्थं च भाष्यमित्यर्थः ॥
(८) नानुबन्धकृतमनेकाल्त्वं नानुबन्धकृतमसारूप्यमित्युभयपरिभाषेत्यर्थः ॥
(९) अनेकाल् शित्सर्वस्येति सर्वादेशताबोधकसूत्रेत्यर्थः ॥
(१०) कार्यकालपक्षे नानुबन्धकृतमसारूप्यमित्येतत्परिभाषाप्रवृत्तिप्रतिपादनपरं भाष्यमित्यर्थः ॥

जसश्शी लुटः प्रथमस्येत्यनयोस्तु प्रत्ययाधिकारस्थत्वाभावेन न तद्भाष्या(१)सङ्गतिः ।

अत एव घुसंज्ञासूत्रे भाष्ये(२)ऽनैमित्तिको ह्यनुबन्धलोपस्तावत्येव भवतीत्युक्तम् ।

परस्मैपदानामित्यस्य तु प्रत्ययाधिकारस्थत्वेऽपि तत्र स्थानिगतप्रत्ययत्वेनैवेष्टसिद्धौ प्रत्ययाधिकारस्य न फलमित्येतत्सूचनाय तद्भाष्यं(३) तथा प्रवृत्तमिति तद्विरोधोऽपि नेत्याहुः ।

तत्रेदं वक्तव्यम् । अनेकाल्सूत्रे जसश्शीत्यस्य तदुदाहरणत्वप्रतिपादकं भाष्यं(४) कथं संगच्छताम् । तस्य प्रत्ययाधिकारस्थत्वाभावात् पूर्वमित्वाप्रवृत्तेरिति ।

तस्मादत्रत्यप्राचीननवीनग्रन्थौ कस्मिंश्चिदंशे भाष्यविरुद्धौ कुत्रचिदंशे भाष्यसंमतौ चेति विरम्यतेऽनयोर्युक्तत्वायुक्तत्वावधारणे इति ॥ ४ ॥

सिंहावलोकितपद्धतीमुरीकृत्य निरूप्यापि पूर्वं संज्ञाविशेषविषयिकाः परिभाषाः पुनः संज्ञासामान्यविषयिकां परिभाषामवतारयति । (५)नन्विति ।

केचित्तु सामान्यसंज्ञाविषयकत्वेनान्या अपि लौकिकन्यायमूलकत्वेन च सामान्यसंज्ञाविषयककार्यकालयथोद्देशपक्षयोर्निरूपणानन्तरमेवैतन्निरूपणमुचितमित्याहुः ।

सीरदेवादिकृतपरिभाषावृत्त्यादौ पृथक्कृतापि दृष्टामपि कृत्रिमाकृत्रिमपरिभाषां न्यायसिद्धतया प्रकृतपरिभाषाऽवतरण एवोपन्यस्यति । (६) प्रकरणस्येति ।

(१) लुटः प्रथमस्यानेकाल् शित्सर्वस्येतिसूत्रद्वितयस्थप्रागुक्तभाष्येत्यर्थः ॥

(२) प्रथमाध्यायप्रथमपादपञ्चमाह्निकान्तर्गतदा धेतिसूत्रव्याख्यानपरभाष्येत्यर्थः ॥

(३) परस्मैपदानामितिसूत्रस्थं भाष्यमित्यर्थः ॥

(४) प्रथमाध्यायप्रथमपादान्तर्गतसप्तमाह्निकान्तस्थमेतद्भाष्यम् ॥

(५) ननु संख्याग्रहणे बह्वादीनामेव ग्रहणं स्यात् ॥ सू० ॥

(६) प्रकरणस्याभिधानियामकत्वसिद्धात् कृत्रिमाकृत्रिमयोः कृत्रिमे कार्यसंप्रत्यय इति न्यायात् । अस्ति च प्रकृते बह्वादीनां संख्या संज्ञा करोतीत्यात्मकं प्रकरणं न तु लोकप्रसिद्धैकत्वादीनामत आह (उभयगतिरिह भवति) ॥ सू० ॥

Digitized by Google

कृत्रिमाकृत्रिमन्यायस्यापि भाष्यकारादिरीत्या पृथगेव फलादिप्रदर्शनं सूचितमिति केचित् ।

ननु प्रत्येकसूत्र उभयगत्यभावात् पूर्वोक्तमनुपपन्नमत आह । शास्त्र(¹) इति ।

ततश्च क्व चित् कृत्रिमस्यैव क्व चिदकृत्रिमस्यैव च गतावपि शास्त्र उभयगतिः सिद्धैवेति भावः । अत एव परिभाषायामिहेत्युक्तम् । अन्यथोभयगतिर्भवतीत्येतावतैव निर्वाहे तदुक्तिर्विफलैव स्यात् ।

प्रकृतपरिभाषायां ज्ञापकमाह । (²)संख्याया इति ।

त्यन्ता शदन्ता वेति । कतीत्यादेः कृत्रिमसंख्यायाः सत्त्वेऽपि तत्रत्यतिशब्दस्यानर्थक्याच्च निषेधप्रसक्तिरिति न तदर्थस्त्यन्तप्रतिषेध इति भावः ।

न चैवमर्थवत्परिभाषाया एव कुतो न बाधो येन त्यन्तप्रतिषेधसार्थक्यं स्यादिति वाच्यम् ।

अतिशदन्ताया इत्यस्य बहुव्रीहिगर्भतत्पुरुषत्वेन तिपदादिजन्योपस्थितिकाल एवार्थवत्परिभाषयाऽर्थवतो ग्रहणे निर्णीते पश्चात् संख्यापदार्थेनाभेदान्वयकाले कृत्रिमाकृत्रिमन्यायप्रवृत्तौ तन्मूलकानुपपत्तिप्रतिसंधाने च जातः संस्कार इति न्यायेन निषादस्थपतिन्यायेन फलमुखगौरवस्याकिञ्चित्करतया च परिभाषाज्ञापनस्यैवोचितत्वादिति स्पष्टं संख्यासंज्ञासूत्रोद्द्योते ।

उभयगतिरिह भवतीत्यस्याः परिभाषायाः संख्यासंज्ञासूत्रभाष्यो(³)क्तं फलमाह । (⁴)तेनेति ।

---

(१) इह शास्त्रे ॥ मू० ॥

(२) संख्याया अतिशदन्ताया इति निषेधोऽस्या ज्ञापकः । न हि कृत्रिमा संख्या त्यन्ता शदन्ता वास्ति ॥ मू० ॥

(३) प्रथमाध्यायप्रथमपादपञ्चमाह्निकान्तःस्थबहुगणेतिसूत्रव्याख्यानपरभाष्येत्वर्थः ॥

(४) तेन कर्तरि कर्मव्यतिहारे, कण्वमेघेभ्यः करणे, विप्रतिषिद्धं चानधिकरणेत्यादौ लौकिकक्रियाद्युपादानमतिः ॥ मू० ॥

कृत्रिमाकृत्रिमयोर्ग्रहणव्यवस्थायां बीजमाह । (१)तत्रेति ।

सर्वासु संज्ञासु कृत्रिमाकृत्रिमयोरुभयोर्ग्रहणाभावे फलमाह । (२)अत एवेति ।

प्रागुक्तयोर्द्वयोरपि परिभाषयोस्तद्विषयव्यवस्थायां तत्फले च भाष्यकारसम्मतिमाह । (३)स्पष्टमिति ।

कय्यटोपाध्यायोक्तं कृत्रिमाकृत्रिमन्यायबीजं खण्डयितुमुपन्यस्यति । (४)यत्त्विति ।

सिद्धे शब्दार्थसम्बन्ध इतिवार्त्तिक(५)कारोक्तया शब्दार्थसम्बन्धस्यापि सिद्धत्वेन न तद्बुत्पादनार्थमपि वृद्धिरादैजित्यादि संज्ञाशास्त्रमिति भावः ।

कय्यटोपाध्यायोक्तकृत्रिमाकृत्रिमन्यायबीजस्योक्तन्यायसाधने स्वरूपासिद्धिमाह । (६)तन्नेति ।

संबन्धस्य सिद्धत्वेऽपि संबन्धग्रहस्यासिद्धत्वात्तद्विधायकत्वं स्यादेव वृद्धिरादैजित्यादीनां संज्ञाशास्त्राणामिति भावः ।

सर्वे सर्वार्थेति । स्वारसिकलक्षणया शक्तिभ्रमाद्वा सर्वस्मादपि शब्दात् सर्वार्थविषयकबोधस्यानुभवसिद्धतया शब्दमात्रे सकलार्थनिरूपिता बोधकतारूपा शक्तिरङ्गीकरणीयैव ।

एवं पदत्वहेतुकानुमानेनाप्यर्थत्वेन निखिलार्थनिरूपितशक्तिरीहीतैव ।

---

(१) तत्र क्वोभयगतिः क्वाकृत्रिमस्यैव क्व कृत्रिमस्यैवेत्यत्र लक्ष्यानुसारि व्याख्यानमेव शरणम् ॥ मू० ॥

(२) अत एवाभेहितशब्देन कृत्रिमस्यैव ग्रहणं न तु द्विस्त्रिर्घुष्टमात्रस्य ॥ मू० ॥

(३) स्पष्टं चेदं संख्यासंज्ञासूत्रे भाष्ये ॥ मू० ॥

(४) यत्तु संज्ञाशास्त्राणामसंख्यत्वेनानेन शब्देनैत एव ग्राह्या इति नियमार्थत्वं कृत्रिमाकृत्रिमन्यायबीजमिति ॥ मू० ॥

(५) इदं च वार्त्तिकं पस्पशाह्निके प्रथममेवेति बोध्यम् ॥

(६) तन्न । तेषामगृहीतशक्तिग्राहकत्वेन विधित्वे संभवति नियमत्वायोगात् । सर्वे सर्वार्थवाचका इत्यभ्युपगमेऽपि योगरूढ्या न त्वस्मदूहदृष्ट्या । किंच सर्वशब्दार्थज्ञानस्याशक्यत्वात् । सामान्यज्ञानं तु न बोधोपयोगीत्यन्यत्र निरूपितम् ॥ ८ ॥ मू० ॥

वृद्धिपदादादैचत्त्वेनार्थत्वेन वादैचां बोधे लक्ष्यगतं न किमपि वैलक्षण्यं यदर्थमादैचत्त्वेनादैचां बोधाय सूत्रसार्थक्यमासादितं स्यादिति भावः ।

योगिदृष्ट्येति । सकलार्थविषयकज्ञानस्य केनापि रूपेणास्मदादीनामसम्भवाच्च तथा युज्यते शक्तिग्रहस्तेनतेन रूपेण ।

एवमादैचपदार्थमज्ञानानस्यार्थत्वेनाप्यादैचु नैव कस्यापि पदस्य ग्रहीतुं शक्या शक्तिरिति कथं तस्य पुरुषस्य वृद्धिपदादादैचामुपस्थितिशाब्दबोधौ स्यातामित्यधिकारिविशेषज्ञानसम्पादनाय चरितार्थं संज्ञाशास्त्रम् ।

ये त्वधिकारिविशेषा ज्ञातारो योगिनो न तदर्थं शास्त्रमिदमाचार्यः प्रणीतवान् ।

न हि शास्त्रप्रणयनात् प्राक् प्रणेतुस्तद्विषयकं ज्ञानमासीच्च वेत्यस्मिन्नर्थे कस्यापि सम्भवेद्विवाद इति भावः ।

तदेतत् सकलमभिप्रेत्याह । सामान्यज्ञानं तु न बोधोपयोगीति ।

अन्यत्रेति । वृद्धिसंज्ञासूत्र उद्द्योते मञ्जूषायां चेत्यर्थः ।

कृत्रिमाकृत्रिमन्यायार्थस्त्वाधुनिकसंकेतविषयचिरन्तनसंकेतविषययोरर्थयोराधुनिकसंकेतविषय एवार्थे वक्तृतात्पर्यविषयत्वं न चिरन्तनसंकेतविषय इति ॥

बहुगणेतिसूत्रे भाष्ये तु गोपालकमानयेत्याद्युक्तौ लोके कृत्रिमस्यैव प्रतीत्या तद्वत् संख्याप्रदेशेऽपि बह्वादीनामेव ग्रहणं स्यान्नैकद्व्यादिशब्दानामित्याशङ्क्य,' न यथा लोके तथा व्याकरणे उभयगतिः पुनरिह भवति, नावश्यमिहैव तद्यथा कर्तुरीप्सिततमं कर्मेति, अथ वा नेदं संज्ञाकरणं तद्वदतिदेशोऽयम्, अथ वाऽऽचार्यप्रवृत्तिर्ज्ञापयति भवत्येकादिकायाः संख्यायाः संख्याप्रदेशेषु संप्रत्यय इति, अथ वा महत्याः संज्ञायाः करण एतत् प्रयोजनम् अन्वर्था संज्ञा यथा विज्ञायेत संख्यायतेऽनयेति संख्या एकादिकया चापि संख्यायते" इति समाधानचतुष्टयमुक्तम् ।

तत्र प्रथमस्यायमाशयः । यद्यपि लोके प्रकरणाभिज्ञस्य भवति कृत्रिमस्यैवावगतिस्तथापि प्रकृते व्याख्यातृपरम्परावगतवक्तृतात्पर्यानुपपत्त्या प्रकरणाद्यनादरेणोभयोरवगतिर्भविष्यतीति ॥

यद्वा लोके सुप्रसिद्धोऽप्ययं न्यायः कथमसति व्याकरणे तदाश्रयणे प्रमाणं भाष्यकारीयेणेति ॥

द्वितीयतृतीययोस्तु स्पष्ट एवाभिप्रायः ॥

तुरीयस्य तु बहुगणेति सूत्रे संख्येति योगो विभज्यते तत्र चान्वर्थसंज्ञाबलात् संज्ञिन आक्षिप्यन्ते । एवं च संख्यानकरणीभूताः संख्यासंज्ञाः स्युरित्यर्थः । बहुगणेति बह्वादीनां संख्यानकरणीभूतानामपि पृथक् संज्ञाविधानं त्वनियतसंख्यावाचिनां चेद्बह्वादीनामेव न भूर्यादिशब्दानामिति नियमार्थम् । बहुगणग्रहणं संघवैपुल्यवाचकयोर्विधानार्थं तु न । वैरूप्यापत्तेः । गणशब्दसाहचर्येण वैपुल्यावाचकस्य बहुशब्दस्य, बहुशब्दसाहचर्येण संघावाचकस्य गणशब्दस्य सूत्रे ग्रहणाच्च । एवमतिदेशत्वपक्षेऽपि परस्परसाहचर्येण वैपुल्यसंघवाचकयोर्बहुगणशब्दयोर्न ग्रहणमिति न तयोः संख्यासंज्ञाप्रसक्तिः । एवं चैकादिशब्दानामकृत्रिमाणां बह्वादीनां कृत्रिमाणां च संख्याप्रदेशेषु संपन्नमनायासेनैव ग्रहणमिति कय्यटेनाशयो वर्णितः ।

उद्द्योतकारेण च वैपुल्यसंघवाचकयोर्बहुगणशब्दयोः प्रागुक्तरीत्या परस्परसाहचर्येणैवाग्रहणस्य सिद्धतया बह्वादिशब्दानां नियतविषयपरिच्छेदहेतुत्वाभावेन संख्यात्वाभावेनासंख्यां संख्येत्याहेत्यतिदेशपक्षोपोद्बलकभाष्येण चान्वर्थसंज्ञाया आश्रयितुमशक्यतया च महत्याः संज्ञाया वैयर्थ्येन संख्याप्रदेशेऽन्वर्थसंख्यापदबोध्यैकादिशब्दानामपि ग्रहणं भवतीत्यभिप्राय उद्भावितः ।

तदनुसारेणैव च "चापिशब्दो वाक्यालङ्कारे, अन्वर्था संज्ञा यथा विज्ञायेतेत्यस्य संख्यासंज्ञानिमित्तकविधिशास्त्रेष्वित्यर्थ" इत्यादिरीत्या भाष्याक्षराण्यपि योजितानि ॥

एवं च सामान्येनो(१)भयगतो संख्याया अतिशदन्ताया इति सूत्रघटकशदन्तादिपर्युदासस्य ज्ञापकत्वोपवर्णनं भाष्या(२)संमतम् । (शेषमग्रे)

काशीस्थराजकीयप्रधानपाठशालाध्यापकः श्रीद्विवेदहरिनाथमनीषी ॥

(१) भाष्ये अतिशदन्ताया इत्यस्य विशेषणपेक्ष संख्याप्रदेश उभयोर्ग्रहणे ज्ञापकत्वप्रदर्शनेन कर्मणि द्वितीयेत्यादिसाधारण्येन तत्सामान्येोपवर्णनं न भाष्यसंमतमिति भावः ॥

(२) प्रथमाध्यायप्रथमपादपञ्चमाह्निकान्तःस्थसंख्यासंज्ञासूत्रव्याख्यानपरभाष्येत्यर्थः ॥

॥ ओं नमो भगवते मीमांसाद्वयगुरवे श्रीरामानुजाचार्याय ॥

॥ शास्त्रदीपिका ॥

भट्टकुमारिलमतानुगा पूर्वमीमांसासूत्रव्याख्या विषमपदटिप्पणीसमेता ।

ओं श्रीगणेशाय नमः ।

(Continued from page 45 Vol. VII.)

न च साऽत्र प्रमाणं, स्मृतित्वादेव । नतरां प्रत्यक्षमनिन्द्रियजत्वात् । नेन्द्रियजत्वं प्रत्यक्षलक्षणमपि तु कल्पनापोढत्वमिति चेत् । सुतरां धर्मस्याप्रत्यक्षत्वं फलसाधनरूपस्याविकल्पकग्रहणासंभवात् । तस्मादनिमित्तं प्रत्यक्षम् । तत्पूर्वकत्वाच्चानुमानाद्यपि । काश्यपीयाः पुनः प्रातिभज्ञानमृषीणां धर्मे प्रवर्त्तत इत्याहुः । तत्तु लिङ्गाद्याभासजत्वात्प्रमाणमेव न भवति किं पुनर्धर्मे । शब्दस्य तु बुद्धिजनकत्वादप्रत्यपवादे युक्तं प्रामाण्यम् ।

ननु न बुद्धिजननमात्रात् प्रामाण्यं युक्तम्, अयथार्थेष्वपि वाक्येषु बुद्धिजननाविशेषात् । सत्यम् । तत्र तु कारणदोष–बाधकप्रत्ययाभ्यां युक्तमप्रामाण्यं वेदे तु तदभावात्स्वतःप्राप्तं प्रामाण्यमनपनोदितं भवति । कथं पुनः प्रामाण्यस्य स्वतः प्राप्तिः? । तदर्थमिदं सर्वज्ञानान्यधिकृत्य चिन्त्यते । किं प्रामाण्यमप्रामाण्यं चोभयं स्वत एवावगम्यते? अथ वान्यतरदपि स्वभावेनानिरूपितं कारणगुणदोष(1)प्रत्ययाभ्यामवगम्यते? आहोस्विदप्रामाण्यं स्वतोऽवगम्यते, प्रामाण्यं तु कारणगुणज्ञानात्संवादज्ञानार्थक्रियाज्ञानाद्वावधार्यते? उत प्रामाण्यं स्वतः प्राप्तं तदर्थान्यथात्वकारणदोषज्ञानाभ्यामवगम्यमानेनाप्रामाण्येनापोद्यते इति(2)? । तत्र सर्वकारणानां स्वकार्यशक्तेः स्वाभाविकत्वादुभयमपि ज्ञानस्य स्वरसादेवावगम्यत इति केचित् । तदयुक्तम् । न हि ज्ञानं स्वविषयस्य तथात्वमतथात्वं च युगपच्छक्नोति

(१) कारण गुणदोषाभ्याम् इति ख॰ पु॰ पा॰ ।

(२) अयमेव चार्थोऽभिहितो यथा "प्रमाणत्वाप्रमाणत्वे स्वतः साङ्ख्याः समाश्रिताः । नैयायिकास्ते परतः सौगताश्चरमं स्वतः ॥ प्रथमं परतः प्राहुः प्रामाण्यं वेदवादिनः । प्रमाणत्वं स्वतः प्राहुः परतश्चाप्रमाणताम्" इति ॥

वेदयितुं विरोधात् । अथ कापि ज्ञानव्यक्तिः स्वप्रामाण्यं स्वतो बोधयति काप्यप्रामाण्यमित्युच्यते, तथापि न युक्तं । कारणान्तरनिरपेक्षस्य ज्ञानस्यै-वोपलम्भहेतुत्वे किं क्क ज्ञाने भवतीति न शक्यं विवेक्तुम्, अतो द्वयमपि स्वस्वभावेनानिरूपितं कारणगुणदोषज्ञानाभ्यामवगम्यत इत्यपरे(१) । तद-प्यपेशलम् । एवं हि गुणदोषावधारणात्प्रागन्यतरेणाप्याकारेणार्थमनवग-मयद्विज्ञानं निःस्वभावं स्यात् । तस्मादप्रामाण्यं स्वतः, प्रामाण्यन्तु संवादज्ञानादिभिरित्येतदेव युक्तम् । तथा हि । न ज्ञानमुत्पन्नमित्येता-वतार्थतथात्वावधारणं युक्तं व्यभिचारादनिश्चयाच्च । अप्रामाण्यमेव तस्यां वेलायां प्राप्तम्, पश्चात्कारणगुणज्ञानात्संवादज्ञानादर्थक्रियाज्ञानाद्वा प्रामाण्यावगमादपोद्यते । शब्दे चाप्तप्रणीतत्वं गुणः, न च वेदे तदस्ति अपौरुषेयत्वाभ्युपगमात् । "वनस्पतयः सत्रमासत" । "शृणोत ग्रावा-णः"इत्येवमादीनामुन्मत्तप्रलपितकल्पत्वात्(२) अप्रत्ययिततर(३)प्रणीतत्वात् । अप्रामाण्यमेव वेदानामिति प्राप्ते ऽभिधीयते । 'परापेक्षं प्रमाणत्वं नात्मानं लभते क्वचित् । मूलोच्छेदकरं पक्षं को हि नामाध्यवस्यति" । यदि हि सर्वमेव ज्ञानं स्वविषयतथात्वावधारणे स्वयमसमर्थं विज्ञाना-न्तरमपेक्षेत ततः कारणगुणसंवादार्थक्रियाज्ञानान्यपि स्वविषयभूतगुणाद्य-वधारणे परमपेक्षेरन्, अपरमपि तथेति न कश्चिदर्थो जन्मसहस्रेणाप्यध्य-वसीयेतेति प्रामाण्यमेवोत्सीदेत्(४) । अथार्थक्रियाज्ञानं स्वतः प्रमाणमिति चेत् । को विशेषः? । अव्यभिचारइति चेत् । न । स्वप्नावस्थायामसत्यप्यु-दकाहरणेऽर्थक्रियाविज्ञानदर्शनात् । अथ सुखज्ञानमेवार्थक्रिया, तच्चाव्यभि-चार्येव । न हि क्वचिदप्यसति सुखे सुखज्ञानमस्ति । सत्यमेतत् । न तु तेन पूर्वज्ञानस्य प्रामाण्याध्यवसानं संभवति । अप्रमाणेनापि प्रियासङ्ग-मविज्ञानेन स्वप्नावस्थायां सुखदर्शनात् । तस्मात्स्वतः प्राप्तं प्रामाण्यम-र्थान्यथात्वकारणदोषज्ञानाभ्यामपोद्यतइत्यवश्यमङ्गीकरणीयम् । एवं च

(१) कारणगुणज्ञानाद्दोषज्ञानाद्वाइति (ख) पु० पाठः ।
(२) प्रलपितत्वात् इति (ख) पु० पाठः ।
(३) अप्रत्ययिततरः–सर्वथानाप्तः ।
(४) प्रामाण्यमेव सर्वत्रोत्सीदेत् इति (ख) पु० पाठः ।

शब्देऽनाप्तपुरुषसंस्पर्शकृतत्वाद्दोषाणामपौरुषेये वेदे तदभावात्साक्षाद्वा-
र्थान्यथात्वज्ञानाभावादनपेतो(१)दितं प्रामाण्यं भवति । पौरुषेयवचनानि तु
पुरुषबुद्धिप्रभवत्वाद्भ्रान्त्या विप्रलिप्सया वा प्रयुक्तानि मूलदोषेण दुष्टत्वा-
दयथार्थानि भवन्तीति वैषम्यम् । केचि(२)त्त्वाहुः—न लोकेपि शाब्दस्यायथा-
र्थत्वमस्ति तद(३)भावात् । न हि लोके(४) शाब्दं प्रमाणमस्ति वक्त्रभिप्राया-
नुमापकत्वात्पुरुषवचसाम् । तेनानुमानस्यैवायं व्यभिचारो न शाब्दस्य,
न वा तस्यापि । विवेकाग्रहादलिङ्गव्यवहारप्रवृत्तिः(५) । यदि तु शाब्द-
स्यैवायं व्यभिचारोऽभ्युपेयेत स्वाभाविकमेवाप्रामाण्यं स्यात् । न हि
पुरुषदोषेण शब्दस्य दोषो भवति । यथाऽवस्थितशब्दाभिव्यक्तिमात्रे
पुरुषस्य व्यापारात् । तदिदमसारम् । यदि लोके शाब्दं नास्ति तदा
वेदेऽपि कथं तत्स्यात् । "नह्यभिप्रायानुमानक्षीणस्य शब्दस्यार्थं प्रति-
वाचकत्वे प्रमाणमस्ती"त्युक्तं न्यायरत्नमालायाम् । यच्च व्यभिचाराभ्युपगमे
स्वाभाविकमप्रामाण्यं भवति । पुरुषदोषस्य शब्देऽनवतारादिति । स्यादे-
तदेवं यदि यदीयं यद्वाक्यं तत् स पुरुषोऽभिव्यञ्ज्यात् । तत्तु तेनैव
क्रियते । वर्णा नित्याः पदानि च । वाक्यानि तु पुरुषैरेव क्रियन्ते
पौरुषेयत्वादेव । यथाऽवस्थितानि व्यज्यमानानि वेदवाक्यवदपौरुषेया-
ण्येव स्युः ततश्च वक्त्रभिप्रायानुमापकत्वमपि न स्यात् । तद्यथा अध्येतृ-
भिरभिव्यज्यमानानि वेदवाक्यानि नाध्येतॄणामभिप्रायं सूचयन्ति तथा
पुरुषवाक्यान्यपि न सूचयेयुः । यदि हि व्यभिचाराशङ्कया लोके

(१) अनपोदितमिति पाठं तु साधीयांसं मन्ये ।

(२) प्राभाकराः ॥

(३) शाब्दप्रमाणविरहादित्यर्थः ।

(४) अत्रायं भावः—वेदानामपौरुषेयत्वेन तत्र वक्तृज्ञानानुमानासंभवादननुमापकः शब्दः प्रमाणं, लोके तु शाब्दबुद्धेः प्रागेवाप्तोक्तत्वज्ञानस्यापेक्षितत्वेन आप्तत्वग्रहस्य च प्रकृतवाक्यार्थयथार्थज्ञानवत्त्वग्रहाधीनत्वेन शाब्दबोधविषयस्य पूर्वमेवावगमादनुवादको लौकिकः शब्दो न प्रमाणम् । न्यायप्रयुक्तिश्च—अयं वक्ता स्वप्रयुक्तयथार्थवाक्यार्थज्ञानवान् भ्रमाद्यजन्यवाक्यार्थज्ञानजन्यवाक्यप्रयोक्तृत्वादिति ॥

(५) विवेकाग्रहणादलिङ्गव्यवहारप्रवृत्तिरिति (ख) पु० पाठः ।

Digitized by Google

शब्दस्य प्रामाण्यं न संभवतीत्युच्यते तर्हि वक्त्रभिप्रायानुमानेऽपि तुल्यम् । अन्यथा संविदानस्याप्यन्यथा वाक्यरचनादर्शनात् ।

किं च शब्दस्य चक्षुरादेरिव सामर्थ्येन बो(१)धकत्वात् व्यभिचारेऽपि न बोधकत्वहानिः । लिङ्गस्याऽव्यभिचारिण एव गमकत्वमिति व्यभिचारिणो लिङ्गत्वमनुपपन्नम् । अथ वक्तुराप्तत्वाद्व्यभिचारशङ्कां निवर्त्यानुमानं, तथा सति शाब्दमेवार्थे प्रमाणमस्तु प्रतिबन्धिकायाः शङ्काया निरस्तत्वात् । अवश्यं हि बुद्धिविशेषमनुमित्सता प्रथमं पदार्थास्तेषां चान्वययोग्यता आलोचयितव्या ते चालोच्यमाना द्रागेव वाक्यार्थं बोधयन्तीति नानुमानं प्रतीक्षन्ते । किं चानुमिते बुद्धिविशेषे पश्चादनुवादभूतं वाक्यं वाक्यार्थमवबोधयतीति वः सिद्धान्तः । ततश्च येनामानाप्तवचाप्तबुद्ध्या गृहीतस्तद्वाक्यादयथार्थमेव ज्ञानमुत्पन्नमित्यभ्युपगन्तव्यम् । तत्र च दोषाधीनत्वादप्रामाण्यस्य वक्तृदोषाणां च शब्दे संक्रान्त्यनभ्युपगमात्स्वारसिकमेव शब्दे दुष्टत्वमापन्नमिति बलादप्रामाण्यं वेदस्य प्रसज्यत इत्यास्तां तावत् । तस्मादनाप्तवचसां सत्येवाप्रामाण्ये वक्तृदोषाधीनत्वाद्वेदे च तदभावात्प्रामाण्यमित्येव वक्तव्यम् । तस्माच्चोदनालक्षण एव धर्मः श्रेयस्कर इत्यर्थः । यदेव श्रेयस्साधनरूपं यागहोमादि तदेव धर्म इत्युच्यते लोके, नापूर्व-मन्तःकरणवृत्त्यादि वा । लोकप्रसिद्धिविरहात् । नन्वपूर्वमेव श्रेयःसाधनं । न । अवान्तरव्यापारमात्रत्वात् । तस्माद्यागादिरेव श्रेयःसाधनरूपेण धर्मस्तद्रूपाभावाच्च न शूद्रहतस्य धर्मतापत्तिः । चोदनालक्षणमात्रस्य धर्मत्वं माभूदिति अर्थ-शब्देन विशेष्यते । चोदनाशब्देन च प्रवर्तकं निवर्तकं च वाक्यमुच्यते । ततश्च नि(२)षेधवाक्यैः "न हिंस्यात्" इत्यादिभिरनर्थत्वेन लक्ष्यमाणानां हिंसादीनामपि धर्मत्वं स्यात् । तद्व्यावृत्त्यर्थं य एवार्थरूपेण प्रवर्तकवाक्यैर्लक्ष्यते तस्यैव धर्मत्वं वक्तुमर्थग्रहणम्(३) । भाष्ये च श्येनादिग्रहणं तत्साध्यहिंसादिलक्षणार्थम् । उपरिष्टात्

(१) स्वसामर्थ्येति (ख) पु॰ पाठः ।

(२) तेनेति (ख) पु॰ पाठः ।

(३) वक्तुमर्थविशेषणमिति (ख) पु॰ पाठः ॥

Digitized by Google

"हिंसा हि सा सा च प्रतिषिद्धा" इति विवरणात्(१)। केचित्तु तदर्थं परिहरन्तः श्येनादिस्वरूपमेवार्थपदस्य व्यावर्त्यं मन्यन्ते, तेषामेव नैव श्येनादयः कर्तव्या विज्ञायन्तइति विधेयत्वनिराकरणेन प्रतिषेधविषयत्वसमर्थनात् कथं पुनस्तेषां विधेयत्वं निराक्रियते?। तत्राहुः। यस्य हि विधिः स्वसिद्ध्यन्यथानुपपत्त्यानुष्ठानमाक्षिपति तद्विधेयमित्युच्यते, काम्येषु च कर्मसु कामनावशादेव प्रवृत्तिसिद्धेस्तत एव विधिः सिद्ध्यन्नन्यथानुपपत्त्यभावात् स्वयमनुष्ठानमाक्षिपति।

ननु कर्तव्यताबोधनमेव प्रवर्त्तनम्। कर्तव्यता च वेदे यागस्य लिङेव बोधितेति कथमविधेयत्वं। सत्यम्। न तु यागस्य कर्तव्यता लिङाऽभिधीयते। स्वार्थस्य कर्तव्यतां लिङभिधत्ते(२)। यागश्च तस्य विषयः कार्यं च सोयं कर्तव्यतात्मा नियोगाऽर्थोऽन्यथानुपपत्त्या स्वविषयस्य कर्तव्यतां बोधयन्ननुष्ठापक इत्युच्यते। श्येनादीनां तु रागादेवानुष्ठानसिद्धेर्न नियोगस्तेषामनुष्ठानमाक्षिपतीति न तेषां विधेयत्वम्। असति च विधेयत्वे तेषां निषेधविषयत्वादनर्थत्वमिति तद्व्यावृत्त्यर्थमर्थपदमिति। तन्नेदं वक्तव्यम्। कस्मिन्नंशे तेषां व्यावृत्तिरिति। धर्मत्व इति चेत्। न। तत्स्वरूपानभिधानात्। इदं हि सूत्रं वेदार्थस्य कार्यत्वप्रतिपादनार्थं न धर्मस्वरूपलक्षणार्थम्। यतः श्येनादीनां धर्मत्वं मा प्रसाङ्क्षीदित्यर्थपदेन व्यावृत्तिः क्रियेत यदि परं कार्यत्वव्यावृत्तिः स्यात्सा चायुक्तेत्युक्तं प्राक्। भवतु वा वाक्यभेदाङ्गीकरणेन धर्मलक्षणार्थमपि सूत्रम्। तथापि चोदनालक्षणपदेन कार्यात्मकमपूर्वमुद्दिश्य तस्य धर्मत्वमुच्यतइति वो मतम्। तत्र श्येनादियागस्य कः प्रसङ्गो यद्व्यावृत्त्यर्थमर्थपदं स्यात्। नहि ज्योतिष्टोमादियागस्यापि धर्मत्वमस्ति। अपूर्वस्य धर्मत्वाभ्युपगमात्।

अथ श्येनाद्यपूर्वस्यैव धर्मत्वमर्थपदेन व्यावर्त्यते। ततो भार्ये श्येनादिशब्देन कर्मनामधेयेन तत्साध्यमपूर्वं लक्ष्यत इत्यविशिष्टा लक्षणा स्यात्। यदि चापूर्वमेव प्रत्युदाहरणं "ततो हिंसा हि सा सा च प्रतिषिद्धेति"

(१) प्रतिषिद्धेतिविरोधादिति (ख) पु॰ पाठः।
(२) लिङ्नियोगस्याऽभिधत्ते इति (ख) पु॰ पाठः।

भाष्यमसङ्गतं स्यात् । श्येनयागो वा तत्फलं वा हिंसा न त्वपूर्वं कथंचिदपि हिंसापदास्पदम् । अस्मिंश्च कल्पे 'कथं पुनरसावनर्थः कर्तव्यतयोपदिश्यत' इति चोद्यम् । 'नैव श्येनादयः कर्तव्या विज्ञायन्त' इतिचोत्तरमपूर्वविषयं स्यात् । न च तस्य कर्तव्यत्वं शक्यते वारयितुं कार्यस्वभावत्वात् । एवं च यागकर्तव्यतानिषेधार्थमिदं भाष्यमङ्गीकृत्य यत् तत्समाधानाय प्रयत्यते कर्तव्यताविषयो हि नियोगो न पुनस्तस्य कर्तव्यतामाहेति तदपार्थकम् । काम्येष्वपि विधिरेव प्रवर्त्तको न फलं, तस्य विध्यधीनोत्पत्तिकत्वेन यागापेक्षाभावात् । विधिस्तु यागाधीननिष्पत्तित्वाद्यागमनुष्ठापयतीति युक्तम् । यदि च विधिरप्रवर्त्तकः काम्येषु स्यादितिकर्तव्यताप्यविधेया स्यात् । तस्यामपि फलतएव प्रवृत्तिसिद्धेः साङ्गप्रधानसाध्यत्वात्फलस्य । वक्ष्यति हि "तद्युक्ते तु फलश्रुतिस्तस्मात्सर्वचिकीर्षे"ति । ततश्चाग्नीषोमीयहिंसायामपि विध्यभावेन निषेधविषयत्वात्तद्युक्तस्य ज्योतिष्टोमस्याप्यनर्थत्वापत्तेः "कोऽर्थो यो निःश्रेयसाय ज्योतिष्टोमादिरिति" भाष्यानुपपत्तेः ।

ननु 'न हिंस्यादि"ति निषेधोऽनारभ्याधीतत्वात्पुरुषार्थः, तेनानेन पुरुषार्था एव हिंसाः प्रतिषेद्धव्याः । क्रत्वर्थनिषेधे हि सोऽपि क्रत्वर्थः स्यात् । अविशेषे त्वेकस्य प्रतिषेधविधेः क्रत्वर्थत्वपुरुषार्थत्वापत्त्या वैरूप्यं स्यात् । तस्मात्पुरुषार्थानामेव हिंसानामिह प्रतिषेधो न क्रत्वर्थानामिति । तदिदं बालसंमोहनम् । नह्यविशेषेणापि प्रतिषेधे वैरूप्यम् । यदि हि क्रत्वर्थत्वपुरुषार्थत्वरूपविशेषणोद्देश्य प्रतिषेधः क्रियेत ततः स्यादपि वैरूप्यं प्रतिषेध्योपस्थापितक्रतुपुरुषगोचरत्वात् प्रतिषेधस्य । यदा तु हिंसामात्रमुद्दिश्य प्रतिषेधः क्रियते तदास्य किं वैरूप्यम् । तद्यथा । या भोजनार्थं मांसोत्पादने हिंसा या च वैरिनिर्यातनार्थतया साक्षात्पुरुषार्था तस्यामुभय्यामविशेषेण प्रतिषिध्यमानायामपि नास्ति वैरूप्यमेवमिहापि । इतरथा तत्रापि भोजनाङ्गता पुरुषार्थता च प्रतिषेधस्य स्यादिति वैरूप्यं स्यात् । तस्मान्नैव काचिन्नेन केनापि प्रकारेण प्रसक्ता हिंसा सा सर्वा सामान्येन प्रतिषिध्यते । पुरुषार्थश्च प्रतिषेधोऽनारभ्या-

Digitized by Google

धीनत्वात् । तस्मादग्नीषोमीयहिंसाप्यसति विधेयत्वे प्रतिषेधगोचरः स्यात् । विधेयत्वे तु विधेर्विशेषविषयत्वात्सामान्यविषयो निषेधस्तद्विरोधाद्धिंसान्तराण्यवलम्बते ॥

ननु सत्यपि विधेयत्वे विधेः क्रत्वर्थत्वात्प्रतिषेधस्य च पुरुषार्थत्वाद्विषयभेदेनाविरोधान्न बाधः । न ह्यदं विरुद्धम्, क्रतोर्हिंसया भवितव्यं पुरुषस्य तु तद्वर्जनेनेति । सत्यम् । अङ्गविधिमात्रालोचनायां नास्ति विरोधः । ज्योतिष्टोमविधिस्तु साङ्गं प्रधानं पुरुषस्य विदधत्पुरुषार्थहिंसानिषेधमग्नीषोमीयहिंसायामवतरन्तं निरुणद्धि । न ह्यग्नीषोमीयहिंसां वर्जयता ज्योतिष्टोमः शक्यतेऽनुष्ठातुम् । तस्मादस्ति विरोध इति सामान्यस्य बाधः । विधौ त्वप्रवर्त्तके सत्यग्नीषोमीयहिंसापि प्रतिषिध्येत । किमर्थं च श्येनस्य विधेयत्वं निराक्रियते? (१) । प्रतिषेधसिद्ध्यर्थमिति चेत् । कः प्रतिषेधः? । "न हिंस्यात्सर्वा भूतानीति" नायं निषेधः श्येने प्रवर्त्तते । हिंसाविषयत्वात् । श्येनफलं च हिंसा न श्येनः । तथा चोक्तम् । "यो हि हिंसितुमिच्छेत्तस्यायमभ्युपाय इति हि तेषामुपदेश" इति । कश्चित्त्वाह-श्येनस्य कर्त्तव्यत्वे सति बलात्तत्फलमपि हिंसा कर्तव्या भवतीति न निषेद्धुं शक्यते । अतः फलकर्त्तव्यतानिरासार्थं श्येनकर्तव्यता बलान्निरस्यत इति । तदिदमसंबद्धं यथैव हि श्येनापूर्वस्य कर्तव्यतायां सत्यामपि तत्साध्यफलस्य कर्तव्यता न प्रसज्यते । तथा यागस्य कर्तव्यत्वे सत्यपि रागप्राप्तस्य फलस्य नास्ति कर्तव्यतापत्तिः । तस्मादनर्थकं श्येनकर्तव्यतानिराकरणम् । तस्माद्धिंसैवात्र प्रत्युदाहरणम् । इदं चापरमेकदेशिनः प्रष्टव्याः-अर्थशब्देन किमुच्यते? इति । यदि श्रेयःसाधनं, नित्यानां धर्मत्वं न स्यात् । अथ यन्निषिद्धफलं न भवति तदर्थ-शब्देनोच्यते । तथा सति नञर्थविष(२)यस्यापूर्वस्य धर्मत्वप्रसङ्गः । चोदनालक्षणत्वान्निषिद्धफल(३)त्वाभावाच्च । भवत्विति चेत् । न । लोकविरोधात् । यो हि हिंसा-

(१) विध्यर्थमिति (ख) पु० पा० ॥

(२) "न सुरां पिबेदि"-त्यादि नञ्पदघटितवाक्यजन्यबोधजन्य-निवृत्तिनिर्वाह्यपदापूर्वस्येति गूढम् ।

(३) यद्यपि सुरापाननिवृत्तेर्नादृष्टविशेषाधायकत्वं यागादेरिवेति तस्य नैष्फ-

Digitized by Google

यामुक्त्युक्तः प्रतिषेधश्चाभिवर्तते न तं धार्मिक इत्याचक्षते । किंत्वधर्माभि-वृत्त इत्येतावत् । तथाऽऽहुः । लोकसिद्धस्य सतश्च परीक्षकैर्वक्तव्यं न वृद्ध्यादिवत्परिभाषणमित्यास्तां तावत् इति चोदनासूत्रम् ॥ २ ॥

तस्य(१) निमित्तपरीष्टिः ॥ ३ ॥

अनेन सूत्रेण चोदनाख्यस्य निमित्तस्य परीक्षणमस्मिन्पादे वक्ष्यमाण"मथातः शेषलक्षणम्" "अथ विशेषलक्षण"मितिवत् सुखग्रहणार्थमनुकीर्त्यते ॥ ३ ॥

चोदनैवेत्यस्यार्थस्य साधनाय प्रत्यक्षादीनामनिमित्तत्वमुच्यते ।

सत्संप्रयोगे पुरुषस्येन्द्रियाणां बुद्धिजन्म तत्प्रत्यक्षमनिमित्तं विद्यमानोपलम्भनत्वात् ॥ ४ ॥

प्रत्यक्षं तावदिन्द्रियार्थसंप्रयोगजन्यत्वेन विद्यमानोपलम्भनत्वाद्भविष्यति धर्मे न निमित्तम् । सत्संप्रयोगजन्यत्वमाभासेपि तुल्यत्वादलक्षणमिति नैयायिका दूषयन्ति, तत्तु लक्षणानभिधानाददूषणम् । न हीदं लक्षणं प्रत्यक्षस्य किंत्वनिमित्तत्वकथनमात्रम् । तत्र हेतुर्विद्यमानोपलम्भनत्वं तत्साधनं च सत्संप्रयोगजत्वम् । न हि सत्संप्रयोगजमविद्यमानोपलम्भनं संभवति । इन्द्रियार्थसंयोगजत्वं सुखादिज्ञानेष्वव्याप्तेरहेतुरिति चेत् । न तेषामपि मनःसंज्ञकेन्द्रियसंप्रयोगजत्वात् । मनःसद्भावे च सुखादिज्ञानमेव प्रमाणमपरोक्षावभासज्ञानस्येन्द्रियाधीनतया रूपादिज्ञानेषु व्याप्तिदर्शनात् । सुखादिविषयमपरोक्षज्ञानमिन्द्रियमनुमापयति । तत्र चक्षुरादीनामसंभवात्तेभ्यो ऽन्यदवतिष्ठते । अत्र कश्चित् । नित्यद्रव्यगतविशेषगुणत्वात्सुखादीनां द्रव्यान्तरसंयोगजत्वम्, पार्थिवपरमाणुगतरूपादीनामग्निसंयोगजत्वदर्शनात् । यच्च द्रव्यान्तरं तन्मन इत्याह । तच्च युक्तम् । शरीरं

त्वेन 'निषिद्धफलत्वाभावा'दिति न युक्तं तथाप्यार्थवादिकफलस्य नित्ये सन्ध्यादौ ब्रह्मलोकावाप्त्यादेरिवात्राप्यभावायुक्तिः ।

(१) परीक्षणं—परीष्टिः अत्र ईक्षतेर्भावे—क्तिन् "ति तु त्रतथसिसुरकसेषु च" । ३ । २ । ९ । इत्यनेनेटः प्रतिषेधे "स्कोः संयोगाद्योरन्ते च" इति शास्त्रेण धातुकवर्णककारस्य लोपस्ततः ष्टुत्वेन 'परीष्टिः' इति ज्ञेयम् अधिकारस्यत्वेऽपि परीक्षा 'परीष्टिः' इति द्वयं तु "अर्थानुपलब्धेः" इति महाभाष्यप्रयोगानुसारेण 'ज्ञप्तिः' 'ज्ञपना' 'उपासना' 'उपास्तिः' इत्यादिवत्समाधेयं व्याकरणे कल्पनानां प्रयोगोपलम्भनिबन्धनत्वात् ।

हि भोगायतनम् । किं च तस्य भोगायतनत्वमन्यत्—तत्संयोगापेक्षसुखा-द्युत्पत्तेः । अशितपीताद्याधारत्वाच्च न बहिः शरीरात्सुखाद्युत्पत्तिः । अतः शरीरसंयोगादेव सिद्धेर्न द्रव्यान्तरानुमानम् ।

किं च पार्थिवगुणानामेव द्रव्यान्तरसंयोगापेक्षा दृष्टा न द्रव्यमा-त्रगुणानाम् ।

तेजःसंयोग एव च कारणतया दृष्टो न द्रव्यमात्रसंयोगस्तस्मान्नैवं मनःसिद्धिरिति सुखाद्यपरोक्षज्ञानमेव मनसो लिङ्गम् । किं पुनरिन्द्रियल-क्षणं चक्षुरादिषु मनसि चानुस्यूतम्? । उच्यते । यत्संप्रयुक्तेऽर्थे विशदावभासं विज्ञानं जनयति तदिन्द्रियमित्युच्यते । तच्च द्विविधम् । बाह्यमाभ्यन्तरं च । बाह्यं पञ्चविधम् । घ्राणरसनचक्षुस्त्वक्श्रोत्रात्मकम् । आन्तरं त्वेकं मनः । तत्राद्यानि चत्वारि च पृथिव्यप्तेजोवायुप्रकृतीनीत्यक्षपाददर्शनवद-भ्युपगम्यन्ते । श्रोत्रं त्वाकाशात्मकं तैरभ्युपगतम् । वयं तु "दिशः श्रोत्र"-मिति दर्शनाद्दिग्भागमेव कर्णशष्कुल्यवच्छिन्नं श्रोत्रमाचक्ष्महे । मनस्तु पृथिव्यादीनामेवान्यतमात्मकं तेभ्योऽन्यद्वा सर्वथा तावदस्ति मनः । तच्चात्मतद्गुणेष्वेव स्वतन्त्रं प्रवर्त्तते न बाह्येषु रूपादिष्वित्यान्तरमित्युच्यते रूपादिज्ञानेष्वपि तच्चक्षुरादिसहायं प्रवर्त्तते एवमनुमानादिष्वपि लिङ्गा-दिसहायमन्यमनस्कस्य संप्रयुक्तेष्वपि रूपादिषु ज्ञानानुत्पत्तेः । स्मृतावपि संस्कारपरतन्त्रं प्रवर्त्तते न स्वतन्त्रम् । नन्वनुमानादीनां मनोजन्यत्वात्तेषां च भूतभविष्यतोरपि प्रवृत्तेरिन्द्रियजन्यत्वं विद्यमानोपलम्भनत्वेनानैका-न्तिकं स्यात् । न स्यात् । न हीन्द्रियजत्वं हेतुः किं त्विन्द्रियसंप्रयोगजत्वम् । न चानुमाने अतीताया भविष्यन्त्या वा वृष्टेरनुमीयमानाया मनसा संप्र-योगोऽस्तीत्यव्यभिचारः । तदेवं प्रत्यक्षं तावद्धर्मनिमित्तं तत्पूर्वकत्वाच्चानु-मानादयपि । न ह्यगृहीते धर्मे तेन सह कस्य चित्संबन्धग्रहणं संभवति । सादृश्यविषयकत्वादुपमानं दूरभ्रष्टम् । अर्थापत्तिरपि धर्मेण विनाऽनुप-पद्यमानस्य कस्य चिददर्शनादसमर्था । ननु जगद्वैचित्र्यमनुपपन्नम् । न । स्वाभाविकत्वेनोपपत्तेः । यद्यपि तदनुपपत्त्या किंचिददृष्टं कल्प्येत । तथापि को धर्मः को वाऽधर्मइति विवेकाभावादवश्यं चोदनैवाश्रयणीया । वा चेदङ्गीकृत्य कृतमर्थापत्त्या, सामान्यतोदृष्टेन वा ॥ (शेषमग्रे)

॥ माधवीयधातुवृत्तिः ॥

(*Continued from page* 112. Vol. VII.)

वृतु वर्त्तने ॥ वर्त्तते । ववृते । वर्त्तिता । वर्त्तिष्यते । वर्त्स्यति । वर्त्तताम् । अवर्त्तत । वर्त्तेत । वर्त्तिषीष्ट । अवृतत् । अवर्त्तिष्ट । अवर्त्तिष्यत । अवर्त्स्यत् । विवर्त्तिषते । विवृत्सति । 'वृद्भ्यः स्यसनो'र्वा परस्मैपदम् । वृद्भ्य इति बहुवचननिर्देश आद्यर्थावगमार्थ इति वृतुवृधुशृधुस्यन्दिकृपीनामपि स्यसनोर्वा परस्मैपदं द्रष्टव्यम् । 'न वृद्भ्यश्चतुर्भ्य' इति सकारादेरार्धधातुकस्य परस्मैपदपरस्य इडभावः झलादेः सनः 'हलन्ताच्चे'ति किन्त्वाद-गुणत्वम् । 'न वृद्भ्यश्चतुर्भ्य' इति अत्र भाष्यवार्त्तिकयोः सिद्धं तु वृतादीनामात्मनेपदेन समानपदस्यस्येड्वचनादित्युक्तत्वात् कृतपरेपि सादौ परस्मैपदे लुकि चेटः प्रतिषेधो भवति । विवृत्सिता । विवृत्सितुम् । विवृत्सितव्यम् । विवृत्सेति । सामान्येन वलादावित्ति सिद्धे आरभ्यमाणमिदमात्मनेपदेन समानपदस्येड्विधाने ऽर्थादन्यनिवृत्त्यर्थं विवृत्सिषीयतइति आत्मनेपदेन समानपदस्यत्वेप्यन्तरेण कृताश्रयः प्रतिषेधो भवति । न तु बहिरङ्ग आत्मनेपदाश्रयो विधिः । वरीवृत्यते । रीवृत्वत इति रीक् । अवर्त्त इत्यादि नेयम् । वर्त्तयति । अववर्त्तत् । अवीवृतत् । वर्त्स्यन् वर्त्तिष्यमाणो वा वर्त्तिष्णुः । अलंकृञित्यादिना इष्णुच् । हस्तवर्त्तं वर्त्तयति । 'हस्ते वर्त्तिग्रहो'रिति हस्तवाचिनि करणे उपपदे ण्यन्तादस्मात् ग्रहेश्च णमुल् । हस्तइत्यर्थग्रहणमिति पाणिवर्त्तमित्याद्यपि भवति । कषादित्वाद्यथाविध्यनुप्रयोगः । वृत्तः । अयं यदान्तर्भावितण्यर्थस्तदा सकर्मकः यथा तेन निर्वृत्तमिति । निर्वर्त्तितमित्यर्थः । यद्येवं 'वृत्तोरध्ययने वृत्त'मिति निष्ठायामिडभावनिपातनं किमर्थं यस्मादन्तर्भावितण्यर्थादस्माद्वृत्तमध्ययनमिति भविष्यति । एवं तर्हि ण्यन्तादप्यध्ययने वृत्तमित्येव यथा स्यान्न तु वर्त्तितमित्येवमर्थं निपातनम् । अत्र वृत्तिकारो ऽमुं पक्षमुक्त्वा वर्त्तितो गुणो देवदत्तेनेति चेष्टमित्याह । अत्र हरदत्तः । तेषां नार्थः सूत्रेणेति । वृत्तं तदिति वर्त्म'उणादयो

बहुलम् । 'भूतेपि दृश्यन्त' इति मनिन् । वर्त्मनिः रथमार्गः । 'अदेर्मुट्' 'वृतेश्च'ति मुडागमो निप्रत्ययश्च । आद्दिवृतिभ्यां मुट् चेति वक्तव्ये पृथग्योगकरणात्पक्षे मुगन भवति । वर्त्तनिरित्यपि भवति । वर्त्तनी । ऌदिकारत्वान्ङीष् । अयं भावार्थश्चुरादौ ॥ ७३० ॥

वृधु वृद्धौ ॥ वर्धतइत्यादि पूर्ववत् । वर्धिष्णुः । अलंकृञित्यादिनेष्णुच् । वर्द्धनः । नन्द्यादिपाठात् ल्युः । वृद्धः । अतिशयेन वृद्धो, वर्षिष्ठः । वर्षीयान् । प्रियस्थिरेति इष्ठनीयसुनोर्यथासंख्यात् वृद्धस्य वर्षादेशः । ज्येष्ठः । ज्यायान् । 'ज्य चे'ति ज्यादेशः । अकारोच्चारणसामर्थ्याट्टिलोपो न भवतीति प्रागेवोक्तम् । वृद्धमाचष्टे वर्षयति । ज्यापयति । णाविष्ठवदिति वर्षज्यादेशौ । वृद्धिः । तितुत्रेति नेट् । वृद्ध्यर्थं द्रव्यमपि, तत् प्रयच्छतीति वार्द्धुषिकः । 'प्रयच्छति गर्ह्य'मिति द्वितीयान्ताद् गर्ह्योपाधिकात्प्रयच्छतीत्यर्थे ठगिति ठक् । वृद्धेर्वृधुषभावः । वृधुषिः प्रकृत्यन्तरं वेति वृत्तिः । वृद्धेर्गर्ह्यत्वमशास्त्रीयत्वेन । अयं भावार्थश्चुरादौ ॥ ७३१ ॥

शृधु शब्दकुत्सायाम् ॥ शर्द्धतइत्यादि पूर्ववत् । अयं प्रहसने चुरादिः । वृतादयस्त्रय उदितः ॥ ७३२ ॥

स्यन्दू प्रस्रवणे ॥ स्यन्दते । सस्यन्दे । सस्यन्दिवहे । सस्यन्द्वहे । ऊदित्त्वात्स्वरतिसूतीत्यादिना वलादावार्द्धधातुकइड्विकल्पः । स्यन्दिता । स्यन्ता । स्यन्दिष्यते । स्यन्त्स्यते । 'वृद्भ्यः स्यसनो'रिति यदा परस्मैपदं तदा स्यन्देरूदित्त्वलक्षणमन्तरङ्गमपीड्विकल्पं न वृद्भ्य इति निषेधश्चतुर्ग्रहणसामर्थ्याद्बाधते इति स्यन्त्स्यति । अस्यन्त्स्यत् । सिस्यन्त्सतीत्येव भवति । स्यन्दताम् । अस्यन्दत । स्यन्दिषीष्ट । स्यन्त्सीष्ट । अस्यन्दिष्ट । अस्यन्दिष्यत । इडभावे झलि सिलोपे चर्त्वे अस्यन्त । अस्यन्त्स्याताम् इत्यादि । 'द्युद्भ्यो लुङी'ति यदा परस्मैपदं तदा पुषादिद्युताद्यीति अङ् । अनुनासिकलोपः । अस्यदत् । अस्यदतामित्यादि । अस्यन्दिष्यत । अस्यन्त । सिष्यन्दिषते । सिस्यन्त्सते । सिस्यन्त्सति । अनुस्यन्दते जलम् । अनुष्यन्दतइति वा । अनुविपर्यभिनिभ्य इति वा षत्वम् । एवं पर्यादिभ्य उदाहार्यम् । अप्रा-

णिष्वित्यस्य पर्युदासत्वात्प्राणिसमुदायेऽपि प्राणिव्यतिरिक्त इति म-
त्स्योदके अनुष्यन्दते इत्यत्रापि वा मूर्धन्यो भवति । स्यन्दित्वा । स्यन्त्वा ।
'त्क्वि स्कन्दस्यन्दो'रित्यनिट्यपि नलोपो निषिध्यते । स्यन्नः । निष्ठायां
'यस्य विभाषे'त्यनिट्त्वम् । स्यदः । घञि 'स्यदो जवे' इति निपातनान्न-
लोपः । वृद्ध्यभावश्च । जवादन्यत्र स्यन्दः, स्यन्दनः । अनुदात्तेतश्चेति
युच् । सिन्धुः । स्यन्देः संप्रसारणं धश्चेत्युप्रत्ययः संप्रसारणं धश्चान्ता-
देशः । सिन्धोर्जातः, सिन्धुकः । सैन्धवः । सिन्ध्वपकराभ्यां कन् । अणञौ
चेति कनणौ । सिन्धुरभिजनो यस्य सैन्धवः । सिन्धुतक्षशिलादिभ्यामण-
ञावित्यण् । सिन्धौ भवादिरपि सैन्धवः । 'कच्छादिभ्यश्चे'ति शैषिकोऽण् ।
यदा त्वयं भवादिर्मनुष्यः तत्स्थो वा तदा मनुष्यतत्स्थयोर्वुञिति वुञ् । सैन्ध-
वको मनुष्यः । सैन्धवकं हसितमिति । लवणसिन्धौ भवं लावणसैन्धवम् ।
'प्राग् दीव्यतोऽण्' । 'हृद्भगसिन्ध्वन्ते पूर्वपदस्य चे'त्युभयपदवृद्धिः ॥ ७३३ ॥

कृपू सामर्थ्ये ॥ कल्पते । चकॢपे । चकॢपिषे । चकॢप्से । इत्यादि
स्यन्दिवत् । विशेषस्तु 'लुटि च कॢपः' इति लुटि स्यसनोरित्यत्र पर-
स्मैपदं तदा 'तासि च कॢपः' इति तासौ सकारादावनिट्त्वं च । कल्प्ता ।
कल्प्तासीति पूर्ववदिदमूदिल्लक्षणं विकल्पं बाधते । अत्र चात्मनेपदेन
समानपदस्थस्येति स्थितमिति सचन्तात्क्लृति परस्मैपदे लुङि च निषेधो
भवति । चिकॢप्सिता । चिकॢप्सेत्यादि । 'हलन्ताच्चे'ति सनः कित्त्वाच्च
गुणः । तथा यदा लिङ्सिचोरात्मनेपदे इडभावः तदा लिङ्सिचावात्मने-
पदेष्विति कित्त्वान्न गुणः । कॢप्सीष्ट । अकॢप्त । अकॢप्सातामित्यादि । इट्-
पक्षे कल्पिषीष्ट । अकल्पिष्टेत्यादि । 'कृपो रो लः' इति रेफस्य लत्वम् ।
तत्र वर्णात्मकस्य रेफस्य वर्णात्मको लकारः यस्त्ववर्णात्मक ऋकारस्तस्याव-
र्णात्मक ऌकारस्तत्र स्थान्यादेशयोः वर्णैकदेशयोः निर्देष्टुमशक्यत्वात् ऋका-
रस्य ऌकारः संपद्यते । चलीकॢप्यते । चल्कल्प्ति । चलीकल्प्ति । चलिकल्-
प्तीत्यादौ रिग्रीगुकामपि कृपो भक्तत्वेन तद्रूपत्वाल्लत्वं भवति । तथा कृपणम् । अदसोद्रेः पृथङ् मुत्वं केचिदिच्छन्ति लत्ववदिति । क्षुताादिना यङ्-
लुगन्तानां लुगयङ् नास्ति । पुष्पादिद्युताद्यौति गणनिर्देशात् । तेन यदे-

Digitized by Google

द्योतीदित्येव भवति। सिजपेक्षेच गुणो नाजादिपिदपेक्षः। तथा वृतादीनां यङ्लुगन्तानां न वृद्भ्य इति इण्निषेधोपि गणनिर्देशाच्च भवति। वरीवर्त्तिष्यतीत्याद्येव भवति। कृपेस्तु गणनिर्देशाभावात् 'तासि च कॢप' इति इण्निषेधो भवत्येव। चल्कॢप्तासीत्यादि। वृतादय उदात्ता अनुदात्तेतः। वृत्। संपूर्वो। वृतादिर्वृतादिश्चेत्यर्थः॥ वृतु वर्त्तन इत्यस्माद्धातोर्भूतेपि क्विप् ॥७३४॥

गणप्रयुक्तकार्यभावे। घुतादीन् वृतादींश्च परिसमाप्यान्यानपि गणप्रयुक्तकार्यभाज आह। घट चेष्टायाम् ॥ एतदादयस्त्वकारान्ता उदात्ता अनुदात्तेतः षितश्च, तत्फलं घटेत्यादौ षिद्भिदादिभ्योऽङित्यङ्। घटादयः फणान्ता मितः, तत्फलं तत्र तत्र दर्शयिष्यते। घटते। जघटे। घटितेत्यादि। जिघटिषते। जाघट्यते। जाघट्टि। घटयति। अजीघटत्। मित्वान्मितां ह्रस्व इति णावुपधाह्रस्वः यदा तु ण्यन्ताच्चिण्णमुलौ तदा 'चिण्णमुलोर्दीर्घोन्यतरस्यामि'ति चिण्णमुल्परे णौ मितामुपधाया वा दीर्घशासनात्। अघाटि। अघटि। घाटम् २ घटम् २ इति भवति। अमितस्तु वृद्धिरेव। ण्यन्तात्स्यादिषु चिण्वदिट्यपि वा दीर्घः। घटिष्यते। घाटिष्यते। अघाटिष्यत। अघटिष्यत। अघाटिषाताम् अघटिषाताम्। घाटिषीष्ट। घाटिता। घटिता। चिण्वदिटोसिद्धत्वाण्णेरनिटीति णिलोपः। चिण्वदिडभावे गुणायादेशयोः कृतयोः घटयिष्यत इत्यादि। कर्मकर्त्तर्यप्येवम्। लुङ्येकवचने तु णिश्रीति यक्चिणोर्निषेधादङि अजीघटत स्वयमेवेति भवति। अतः कर्मकर्त्तरीति चिण्विकल्पस्य ण्यन्ते न विषय इति प्रागेवोक्तम्। घटादयो मित इति गणनिर्देशेन विधीयमानत्वान्मित्वस्य यङ्लुक्यभावात् न ह्रस्वो नापि दीर्घविकल्प इति जाघाटयति। अजाघाटीत्यादि भवति। घटी। अजन्ताज्जातेरस्त्रीविषयादिति ङीष्। घटना। 'घट्टिवन्दिविदिभ्यश्चे'ति युच्। घटिका। 'कुन् शिल्पसंज्ञयो'रिति कुन्। अपरे गणान्तराधीता इह पठ्यन्ते तेषामिहोपात्तएवार्थे मित्त्वं, ये त्वपूर्वाः पठ्यन्ते तेषामर्थे न नियमः। यथा स्मृ चिन्तायामन्यत्र पठितोऽत्र स्मृ आध्याने. आध्यानमुत्कण्ठापूर्वकस्मरणम्। स्मरयति। अन्यत्र स्मारयति। अत्र तरङ्गिण्यामपीदमेवार्थतत्त्वं स्थितम्। घाटयतीति घट संघात इति

चौरादिकस्य तस्य हि मित्त्वं निषिध्यते । 'नान्ये मितो हेता'विति ज्ञपादिपञ्चकव्यतिरिक्ता अहेतौ स्वार्थे णिचि मितो न भवन्तीत्यर्थः । अत एव स्वार्थे णिचि मित्त्वनिषेधाच्चेष्टायां मित्त्वार्थं तस्यायमनुवादो न भवति ॥ ७३५ ॥

व्यथ भयसंचलनयोः ॥ व्याघ्रात् व्यथते । 'भीत्रार्थानां भयहेतु'रिति बिभेत्यर्थानां त्रायत्यर्थानां च प्रयोगे भयहेतुः कारकमपादानमिति व्याघ्रस्यापादानत्वात्पञ्चमी । व्यथते । विव्यथे 'व्यथो लिटी'त्यभ्यासस्य संप्रसारणं 'न संप्रसारणे संप्रसारण'मिति पूर्वस्य यणो यकारस्य संप्रसारणपरत्वात्संप्रसारणं न भवति । संप्रसारणेऽति च संप्रसारणभाविनीत्यर्थः । यद्वास्मादेव वचनसामर्थ्यात्पूर्वं परस्य संप्रसारणं क्रियते पश्चादन्यस्य, अत्र च वेलायामस्ति संप्रसारणपरत्वम् । अथ वा 'व्यथो लिटी'ति संप्रसारणं हलादिशेषापवाद इति परस्यैव प्रसज्यते न पूर्वस्येति न चोद्यावकाशः । व्यथितेत्यादि । विव्यथिष्यते । वाव्यथीति । वाव्यत्ति । व्यथयति । अविव्यथत् । घटिवच्चिणणमुलोर्हदाहार्यम् । न व्यथत इत्यव्यथ्यः । राजसूयेत्यादिना निपातितः । अव्यथी । जिदृक्षीत्यादिना नञ्पूर्वात्ताच्छीलिक इनिः । व्यथा । षित्त्वादङ् । विथुरः । छिदिभिदीत्यत्र व्यथेः संप्रसारणं चेति वचनात्कुरचि संप्रसारणम् । विथुरः । विधुरः । व्यथः संप्रसारणं धः किच्चेति वचनादुरचि संप्रसारणं थकारस्य धकारः । व्यथ दुःखचलनयोरिति दुर्गः । भयचलनयोरिति प्रकाशः । तवर्गवतुर्थान्तोयं विवादे ॥ ७३६ ॥

प्रथ प्रख्याने ॥ प्रथते । प्रपथे । प्रथितेत्यादि । प्रथयति । अपप्रथत् । 'अत्स्मृदृत्वरप्रथम्रदस्तॄस्पशा'मिति चङ्परे णावभ्यासस्यात्त्वं मित्स्वापवादः । अप्रथि । अप्राथीत्यादि घटिवत् । पृथिवी । प्रथेः षिवन्संप्रसारणं चेति षिवन् षित्त्वान् ङीष् । पृथिव्या निमित्तं संयोग उत्पातो वा पार्थिवः । 'सर्वभूमिपृथिवीभ्यामणञा'विति अण् । पृथिव्या ईश्वरः । पृथिव्यां विदित इति वा पार्थिवः । 'तस्येश्वरः', 'तत्र विदित'इति चेत्यण् 'पृथिव्या ञाञा'विति प्राग्दीव्यतीयेष्वर्थेषु ञाञोः पार्थिवम् । अनयोः स्त्रियां विशेषः । पार्थिवा । पार्थिवी । पृथुः । प्रथिम्रदिभ्रस्जां संप्रसा-

Digitized by Google

रवं सलोपश्चेति कुप्रत्ययः संप्रसारणं च । सलोपवचनं भृज्जत्यर्थम् । पृथोर्भावः, प्रथिमा । 'पृथ्वादिभ्य इमनिज्वे'ति इमनिच् । र ऋतो हलादेरिति ऋकारस्य रशब्दः । इमनिजभावे 'इगन्ताच्च लघुपूर्वा'दित्यणि पार्थिवम् । अत्र लघोः पूर्वत्वमिगपेक्षम् । तच्चेह द्वयोरिकारयोरनयोरणावस्थानासंभवादेकहला व्यवधानमाश्रीयते । 'वोतो गुणवचनादि'ति ङीषि पृथ्वी । गुणमुक्त्वा गुणिनि वर्त्तमानो गुणवचनः । अयं कथादावपि । अत्र के चित्पृथेति ऋकारोपधमपि पठन्ति । यदाह वर्द्धमानः । पृथिश्नन्दिवन्दिदृवादीनां घटादेः पाठः चिण्णमुलोर्वृद्ध्यर्थं इति । अत्र स्वामी प्रथेः संप्रसारणविधानमार्थं मन्यते । पुनरुकारोपि यदप्रथयत् तत्पृथिव्याः पृथिवीत्वमिति श्रौतस्य निर्वचनस्यार्षपक्षएवास्ज्जस्यमिति । अन्यथा यदपर्थयदित्येव ब्रूयात् । पुनश्चोक्तम् । अथापि पृथेर्घटादिपाठे तत्फलं घटादयः षित इति षित्त्वादङि सति पृथेति रूपं द्रष्टव्यमिति । व्यथादिस्यान्तः । पृथ प्रक्षेपइति चुरादौ ॥ ७३७ ॥

प्रस विस्तारे ॥ प्रसते । पप्रसे । पिप्रसिषति । पाप्रस्यते । पाप्रस्ति । लङि तिपि'तिप्यनस्ते'रिति दत्वे अपाप्रदिति भवति । 'सिपि धातो रुर्वे'ति दत्वरुत्वयोरपाप्रत् । अपाप्रः । प्रसयति । अपिप्रसत् । अप्रसि । अप्रासीत्यादि । प्रसा ॥ ७३८ ॥

म्रद मर्दने ॥ म्रदते । मम्रदे । म्रदिता । मिम्रदिषते । माम्रद्यते । माम्रदीति । म्रदयति । अमम्रदत् । अत् स्मृदृत्त्वरप्रथम्रदेत्यादिनाभ्यासस्यात्वं मित्त्वापवादः । मृदुः । प्रथिम्रदित्यादिना कुप्रत्ययः संप्रसारणं च । नैतेन मृद्गातेरभावोनुमातव्यः । तत्र प्रसारणस्यान्यार्थे वक्तव्यत्वात् । सत्त्वएव हि मृद्गातेर्मृद्रेत्यादिनिर्देशोपपत्तिः । मृदोरपत्यं, मार्दवम् । गुणादिभ्यश्चेति ठक् । ठे लोपोकद्र्वा इति उकारलोपः । मृद्वी । गुणवचनत्वात् ङीष् मृद्विका । कनि 'केण' इति ह्रस्वः । म्रदिमा । 'पृथ्वादिभ्य इमनि'चि र ऋत इति रः । तदभावे मार्द्रवम् । स्वादुमृदुन इदं सौवादुमृदवम् । 'द्वारादीनां चे'ति वृद्धिप्रतिषेध ऐजागमश्च । मृद चोदइति ऋकारोपधः क्र्यादौ ॥ ७३९ ॥

स्खद स्खदने ॥ स्खदनं विद्रावणमिति स्वामी । स्खदते । स्खदिता । स्खदयति । अचिस्खदत् । अस्खादि । अस्खादि । 'स्खदिरवपरिभ्यां चे'ति मित्संज्ञानिषेधस्य व्यवस्थितत्वात् प्रस्खादयति । परिस्खादयतीत्यत्र मित्त्वं न भवति । आपावपरिभ्य इति बोधिन्यासे पठ्यते । तन्मते । अपस्खादयतीत्यत्रापि मित्त्वं न भवति ॥ ७४० ॥

वजि गतिदानयोः ॥ वज इति कौशिकः । वञ्जते । ववञ्जे । वञ्जिता । विवञ्जिषते । वाव्यञ्जयते । वावङ्क्ति । झलि 'चोः कु'रिति कुत्वे 'खरि चे'ति चर्त्वम् । अनुस्वारपरसवर्णौ । वञ्जयति । अववञ्जत् । अवञ्जि । अवाञ्जि । वञ्जंवञ्जम् । वाञ्जंवाञ्जम् । मित्त्वसामर्थ्यादनुपधात्वेपि विण्णमुलोरिति दीर्घविकल्पो भवतीति मैत्रेयसुधाकरादयः । वञ्जेति गुरुमत्त्वादङ् सिद्ध्यति । एवमन्येषामपि संयोगान्तानां वजादीनां मित्त्वसामर्थ्यात् दीर्घविकल्पः ॥ ७४१ ॥

दक्ष गतिशासनयोः ॥ वृद्धिशैघ्र्ययोरनुदात्तेदयं पठितस्तस्येहार्थविशेषे मित्त्वार्थोनुवादः । दक्षयति । अददक्षत् । अदक्षि । अदक्षीत्यादि ॥ ७४२ ॥

क्रप कृपायां गतौ । क्रपते । चक्रपे । क्रपिता । चिक्रपिषते । चाक्रप्यते । चाक्रप्ति । क्रपयति । अचिक्रपत् । अक्रपि । अक्रापीत्यादि । अस्येह पाठो मित्त्वार्थः । न तु षित्त्वार्थः । यतः क्रपेः संप्रसारणं चेति भिदादिपाठात् तत्फलमङ् सिद्ध्यति । कृपाणः । त्यजियुधिकृपेः कित्वेत्यानट् बाहुलकादस्मादपि । कृपणः । बाहुलकादेव क्युन् अस्मादपि । कृपीटः । कृकृपिभ्यां कीटचिति कीटन् । अत्र 'कृपो रो ल'इति लत्वाभावार्थं कृपिस्थाने क्रपिः पठितव्य इति 'कृपो रो ल' इत्यत्र भाष्यादौ स्थितम् । कर्पूरः । खर्जपिञ्जादिभ्य ऊरोलचावित्यत्रापि क्रपिग्रहणादूरः । कृपाणादौ बाहुलकात् संप्रसारणम् । यद्वा सर्वएवैते कृपेरेव लत्वाभावे बहुलवचनादिति लत्वसूत्रे उक्तम् ॥ ८४३ ॥

(शेषमग्रे)

॥ श्रीः ॥

॥ ओं नमः श्रीमते भगवते रामानुजाचार्याय ॥

अथ श्रीभाष्यं विशिष्टाद्वैतपरं रामानुजदर्शनम्

श्रुतप्रकाशिकासमेतं विषमपदटिप्पणीसहितम्

तत्र प्रथमोऽध्यायस्यावशेषः ।

(*Continued from page* 104. Vol. VII.)

गौतमस्य ऋषेः शापात् ज्ञाने त्वज्ञानतां गते ।
संकीर्णबुद्धयो देवा ब्रह्मरुद्रपुरःसराः ॥
शरण्यं शरणं जग्मुर्नारायणमनामयम् ।
तैर्विज्ञापितकार्यस्तु भगवान्पुरुषोत्तमः ॥
अवतीर्णो महायोगी सत्यवत्यां पराशरात् ।
उत्पन्नान्भगवान्वेदानुज्जहार हरिः स्वयम् ॥
चतुर्द्धा व्यभजत्तांश्च चतुर्विंशतिधा पुनः ।
शतधा चैकधा चैव तथैव च सहस्रधा ॥
कृष्णो द्वादशधा चैव पुनस्तस्यार्थवित्तये ।
चकार ब्रह्मसूत्राणि येषां सूत्रत्वमञ्जसा ॥
अल्पाक्षरमसन्दिग्धं सारवद्विश्वतोमुखम् ।
अस्तोभमनवद्यं च सूत्रं सूत्रविदो विदुः ॥
निर्विशेषितसूत्रत्वं ब्रह्मसूत्रस्य चाप्यतः ।
सविशेषाणि सूत्राणि ह्यपराणि विदो विदुः ॥
मुख्यस्य निर्विशेषेण शब्दो येषां विशेषतः ।
इति वेदविदः प्राहुः शब्दतत्त्वार्थवेदिनः ॥
एवं विधानि सूत्राणि कृत्वा व्यासो महायशाः ।
ब्रह्मेन्द्रादिषु देवेषु मनुष्यपितृपक्षिषु ।
ज्ञानं संस्थाप्य भगवान् मोदते परमेश्वरः ॥

इत्यादिना ।

(१) विशिष्यार्थावबोधसिद्धये-इत्यर्थः ।

“वचः सुधां” वचः—शब्दस्यार्थे तात्पर्यं यथा “वेदवित्” “शास्त्रवित्” इत्यादौ वेदादिशब्दानामर्थाभिधायकं हि वाक्यं । वचसः सुधामिति केचिदाचार्याः रूपकप्रकरणात् सुधाशब्दलक्षणाभयाच्च सुधेव वच इति “उपमितं व्याघ्रादिभि” रित्यादिसमासमपरे आचार्या आद्रियन्ते सुधाशब्देन भोग्यत्वमभिप्रेतम् । एवं मतान्तरविषय उक्तः । तर्हि कथं ब्रह्मणोविषयत्वमिति शङ्कायां सद्वारकं ब्रह्मविषयत्वमित्याह “उपनिषदिति” “ब्रह्मण्युपनिषण्णेत्युपनिषत् उपनिषण्णत्वाद्वोपनिषदि”ति हि वाक्यम् । “गहनेह्येयं विद्या संनिविष्टे”ति तद्विषयं द्रमिड[1]भाष्यम् । “गहने ब्रह्मण्युपनिषण्णे”ति तद्विषया वामनटीका सद्वारकभगवत्प्रतिपादकत्वम् उपनिषण्णत्वम् । दुग्ध—शब्देन पूर्वभागादप्युपनिषदः सारत्वं विवक्षितं यथा “आरण्यकं च वेदेभ्य ओषधीभ्यो यथाऽमृतमिति” अब्धि—शब्देन आलोडितानामुपनिषदामानन्त्यादि सूचितम् । मध्य—शब्देन सर्ववाक्यानां मुख्यार्थोपरित्यागोऽभिप्रेतः मध्यस्य सर्वपर्यन्तदेशापेक्षया तुल्या व्याप[2]तिः उद्धृत—शब्देनातिनिम्नदेशनिमग्नोद्धरणमप्यभिदधता निःशेषार्थग्रहणं सूच्यते । स्वप्रबन्धस्यावान्तरविषयः पाराशर्यसूत्रं तस्यावान्तरविषय—उपनिषत् । तद्विषयभूतं ब्रह्मेति परम्परया ब्रह्मणः प्रतिपाद्यत्वं बादरायणसूत्राणामुपनिषन्मूलकत्वकथनेन सांख्यादिग्रन्थानामप्रमाणमूलत्वात्तदनादरणेतद्व्याख्यानमिति सूचितम् । प्रणाड्या शास्त्रजन्यं परमप्रयोजनमाह “संसारेति” ।

संसाराग्नि—शब्देन संसारस्य कार्त्स्न्येन तापत्रयरूपता विवक्षिता यथा स्वर्गेऽपि पातभीतस्य क्षयिष्णोर्नास्ति निर्वृति[3]रिति—। दीपन—शब्देनासंकोचात् सदाभिज्वलनवाचिना विद्यालब्धेः पूर्वं कदाचिदप्यनिवार्यत्वमभिप्रेतं वैविध्यमाध्यात्मिकादिरूपेण, तेष्वेकैकस्यापि शारीरमानसादिरूपेण च । आत्मनां प्राणः परमात्मा । “सर्वाणि ह वा इमानि भूतानि

(१) ‘द्रविडभाष्यम्’ इति तु न भ्रमितव्यं रामानुजसंप्रदाये प्राचीनाचार्यपङ्क्तौ रामानुजाचार्यापेक्षयाऽत्यन्तप्राचीनानां गुहदेवद्रमिडादीनां सुप्रसिद्धेः ।

(२) व्याप्तिरिति युक्तः पाठः व्याप्तिरायामः परिणाह इति यावत् मध्यस्य हि सर्वापेक्षया समरेखस्यत्वमिति भावः ।

(३) निर्वृतिरिह मानसोविश्रामः ।

Digitized by Google

प्राणमेवाभिसंविशन्ति" "कोह्येवान्यात्कः प्राण्यादि"ति श्रुतेः । मत- शब्देन तदलाभः, उपसर्गाभ्यां तस्यानादित्वं विविधत्वं च विवक्षितं ज्ञानदर्शन-प्राप्तिष्वन्यतमस्याप्यभावादलाभस्य वैविध्यम् । "संजीवनी[1]मिति" जीवन-मुज्जीवनम्–संसारोन्मोचनम् । "स"मिति केवल्य[2]व्यावृत्तिः ।

सू० पूर्वाचार्यसुरक्षितां बहुमतिव्याघातदूरस्थिता-
मानीतां तु निजाक्षरैः सुमनसो भौमाः पिबन्त्वन्वहम् ॥२॥

टी० ॥ अथ सांप्रदायिकत्वमाह "पूर्वेति" पूर्वशब्देन शङ्कराद्य-र्वाचीनव्यावृत्तिः "सुरक्षितां"–नोपदेशमात्रेण ग्रन्थरूपेण चेति भावः । पूर्वाचार्यग्रन्थैरर्थस्वरूपं प्रतिपन्नं चेत् किं भवतः कृत्य?मित्यत्राह "बहुमतीति" "बहुमतिव्याघातदूरस्थितां" बह्वीमतयोवा बहूनां मतयोवा तासां पर-स्परव्याघातेन ताभिः समीचीनार्थव्याघातेन वा अर्वाचीनजनैर्दुरवगमत्व-माह "दूरस्थिता"मिति न यथावदप्रतीतिमात्रम् अन्यथा च प्रतिपत्ति-रासीदिति भावः । सूत्राक्षरावान्तरविषयस्य विषयी स्वग्रन्थइति पूर्वं न कण्ठोक्तं तदाह "आनीता"मि"ति सुधापदे निजाक्षरैर्गोयत्र्यक्ष्यवभूतैर-मृताक्षरैरिति यावत् अतोऽममाक्षरैरित्यनुक्तिः सुमनसः 'सारासारविवेकज्ञा' इत्युक्ताः अनेनासदपरिग्रहो न दोषायेत्युक्तं भवति, देवादीनां वृत्तिकारा-धन्यैः सुगमत्वात् "भौमा"–इत्युक्तम् "पिबन्त्वन्वह"मि"ति रस्यतातिशया-दतृप्तिकरीति भावः फलान्तराद् भगवत्प्राप्त्युपाय एव हि स्वाद्वुत्तमः । यथोक्तम् । "क्व नाकपृष्ठगमनं पुनरावृत्तिलक्षणम् । क्व जपो वासुदेवेति मुक्ति-बीजमनुत्तम"मि"ति । यद्वा । गम्भीरत्वादन्वहं शीलनीयेति भावः ॥ २ ॥

सू० भगवद्बोधायनकृतां विस्तीर्णां ब्रह्मसूत्रवृत्तिं पूर्वाचार्याः संचिक्षिपुस्तन्मतानुसारेण सूत्राक्षराणि व्याख्यास्यन्ते ।

(१) संजीवनीम् । संजीवनीम् इति च पाठद्वयमुपलभ्यते पुस्तकेषु द्वयमपि च ग्रन्थसमर्थनं पूर्वं मुतपकाशिकाकृदनुमतः–संजीवनीम् इत्येव पाठः अत्र च पाठे कारण-स्वरूपात् स्वोक्तविवक्षायां टित्त्वान्ङीप् "जीवनमुज्जीवन"मिति तु टीकाकृतां न व्युत्प-त्तिप्रदर्शनं किं तु धात्वर्थकथनमात्रम् ।

(२) परमात्मप्राप्तिवैधुर्येण स्वस्वरूपमात्रप्राप्तिलक्षणो मोक्षः प्रकृते व्युदस्यते इति भावः ।

टी० ॥ तर्हि पुरातनग्रन्था एव वाचयितव्याः किमपूर्वग्रन्थनिर्माणेन—तत्प्रवर्तनप्रयासगौरवेणेति शङ्कायामाह । "भगवदि"ति भगवच्छब्देन शङ्करादिभ्योऽस्याप्ततम[1]त्वमभिप्रेतम् । बोधायन—शब्देन पूर्वाचार्य[2]शब्देनाप्ययोद्धृतः "विस्तीर्णां संचिक्षिपुरि"त्यनेन वृत्त्यादीनामत्यन्तविस्ततत्वेनावकार्यकरत्वं सूचितम् । बोधायनेन ह्यतिविस्तीर्णा[3] वृत्तिः कृता द्रमिडभाष्यकारादयोऽपि परपक्षप्रतिक्षेपाद्यनादरेणातिसंक्षिप्तान् ग्रन्थानरचयन्, अतिविस्तीर्णातिसंकुचितग्रन्थानां साफल्यमायुष्मद्बुद्धिमज्जनप्रचुरेषु एव भवति नहीदानीन्तनपुरुषाणां सर्वेषां शतायुष्ट्वं यावज्जीवं ग्रन्थपरिश्रमः सहजधीविशेषाश्च सन्ति । तस्मात्परमतनिरासाद्यर्थमनतिविस्तरतया सुग्रहत्वार्थं च सूत्रं व्याख्यातव्यमिति यावत् । "तन्मतानुसारेण" न तु स्वोत्प्रेक्षितमतान्तरेण "सूत्राक्षराणि" सूत्रपदानां प्रकृतिप्रत्ययविभागानुगुणं वदामः न तु स्वोत्प्रेक्षितार्थेषु सूत्राणि यथाकथंचिद्द्योतयितव्यानीति भावः । "व्याख्यास्यन्ते" व्याङ्भ्यामुपसर्गाभ्यामपेक्षितविस्तरसं[4]क्षेपौ द्योतितौ ।

ननु "सूत्रार्थो वर्ण्यते यत्र वाक्यैः सूत्रानुकारिभिः स्वपदानि च वर्ण्यन्ते भाष्यं भाष्यविदो विदुरि"ति हि भाष्यलक्षणम् । अतः सूत्रव्याख्यानरूपत्वाभावादखिलेत्यादिकं न भाष्यान्तर्भावीति चेन्न । सूत्रतात्पर्यार्थपरत्वाद् भाष्यान्तर्भाव्येव । सूत्रतात्पर्यार्थपरत्वं च श्लोकव्याख्याने स्पष्टम् । किञ्च मङ्गलाचरणं प्रारिप्सितग्रन्थाविघ्नपरिसमाप्त्याद्यर्थतया तदुपयोगीति तदन्तर्भाव्येव । शावरशाङ्करादिभाष्येषु नमस्कारादर्शनाच्च नमस्कारकरणमयुक्तमितिचेत् "नमः प्रवरगुणैकास्पदाये"ति द्रमिडभाष्ये देवतागुरुनमस्कारश्रवणात्, शावरशा[5]ङ्करयोस्त्वीश्वरानभ्युपगमाज्जीवब्रह्माभेदानभ्यु-

(१) शङ्करादिष्वनाप्तत्वं नास्तीति (ख) पु० पा० ।

(२) सद्बुद्धिविशेषाश्चेति (ख) पु० पा० ।

(३) बोधायनो महर्षिर्व्यासस्य सूत्रकृतः साक्षाच्छिष्यो व्याचकार ब्रह्मसूत्राणि भागवतीं गीतां दशोपनिषदश्चेति सुप्रसिद्धिर्बहुज्ञानाम् ।

(४) अनपेक्षितार्थे संकोचः । अपेक्षितार्थे विस्तरश्चेति तात्पर्यम् ।

(५) शावरे ईश्वरानभ्युपगमाच्छाङ्करे च मन्तव्यविरहादिति हि विवक्षितम् ।

न्यमाच्च नमस्याऽनादरः । अत्र तु सिद्धान्तानुरूप्याज्ञमस्यात्यक्तोपपत्ता[1] माङ्गल्यस्योपक्रमे च व्याख्यातृभिर्नमस्काराद्यभावात् कुमन्तत्वमाशङ्क्य “यु-ष्मद्यस्मत्प्रत्ययगोचर"त्यर्थानुसंधानेनार्थान्मङ्गलाचारः कृत इति परिहृतम् ॥

अथातो ब्रह्मजिज्ञासा ॥ १ ॥

इति, अत्रायमथ–शब्द आनन्तर्ये भवति ॥

टी० ॥ पूर्वं पदानि व्याचिख्यासुः प्रथममथ–शब्दं व्याचष्टे । “अ-त्रायमथशब्द आनन्तर्ये भवती”ति “पदच्छेदः पदार्थोक्तिर्विग्रहो वाक्ययो-जना आक्षेपस्य समाधानं व्याख्यानं पञ्चलक्षण”मिति हि व्याख्याप्रकारः ।

ननु नैतावथातः–शब्दौ व्याख्येयौ प्रयोजनाभावात् अज्ञान–संशय–विपर्ययनिवृत्त्यर्थं हि व्याख्यानम्, न तावदत्राज्ञानम् आनन्तर्ये, प्रकृतस्य हेतु-भावे च तयोः प्रसिद्धत्वात् । नापि संशयः, अर्थान्तरेषु सत्स्वपि तयोरुक्तार्थप-रत्वेन प्रसिद्धिप्राचुर्यात्, नहि गोशब्दं शृण्वतः सास्नादि प्रति संशयो जा-यते, अतएव विपर्ययोपि दूरोत्सारितइति । अत्र ब्रूमः । आनन्तर्य–वृत्त-हेतुभावपरत्वनिर्णयस्य पूर्ववृत्तविशेषावगमसापेक्षत्वात्तदप्रतिपत्त्यां प्रसि-द्धिप्राचुर्यस्य सापवादत्वात् । अथ–शब्दस्याधिकारादिषु एतच्छब्दस्य चैतदुक्तं भवती”त्यादिषु वक्ष्यमाणेऽर्थे तसेश्च सर्वविभक्त्यर्थवाचिन “इ त”इ-त्यादिषु पञ्चम्यर्थव्यतिरिक्तेऽर्थे च प्रयोगदर्शनात् संशयविपर्ययौ स्याता-मिति तन्निरासायाथातः–शब्दव्याख्यानं युक्तम् । अतस्तौ व्याख्यायेते । तत्र तावदथ–शब्दस्याधिकारार्थत्वमयुक्तम् । अधिकारोहि प्रस्तावः ब्रह्मजिज्ञासा प्रस्तूयतइति वचोमन्दप्रयोजनम्, प्रारभ्यत–इत्युक्तिं विनापि प्रारम्भादेव प्रारभ्यमाणत्वावगमात्, उच्यमानं हि वचनं ब्रवीमीत्युक्तिमन्तरेणापि संनि-हितपुरुषेणोच्यतइत्येवावगम्यते न तु नोच्यत इति, प्रस्तोतव्यत्वमुच्यत-इति चेत् । तदानीमपि न्यायप्रतिपादकस्य सूत्रस्योपदेशाज्ञापनपरत्वा-

(१) जगद्व्यापारवर्जं प्रकरणादसंनिहितत्वाच्चेति सूत्रानुसारेण मोक्षे साम्य-मात्रवाञ्छा अप्यभेदं द्विषन्तो भगवन्तमाराध्यमाद्रियन्ते मोक्षदशायामपि, ततश्चोपपत्ता नमस्येति सारम् ।

(२) इतआस्स्वेत्यादौ सप्तम्यर्थे प्रयोगोपलम्भादित्याशयः ।

भावाद्युक्तितः प्रारम्भयोग्येत्यर्थः स्यात् योग्यत्वमशाब्दम् । नन्वध्याहारेण योजना स्यात् आनन्तर्यपक्षेऽपि कर्तव्येति ह्यध्याहर्तव्यमिति चेन्न अधिकारार्थत्वपक्षेऽध्याहृतपदस्यान्वयदौर्घट्यात् । यथा च योग्येत्युक्ते समुच्चेतुं योग्येत्यर्थो न शक्याभिधानः, एवमथ योग्येत्युक्तेऽप्यधिकर्तुं योग्येत्यभिधानं हि न शक्यम् । अतएव हि महाभाष्ये "शब्दानुशासनं शास्त्रमधिकृतं वेदितव्य"मित्युक्तम्, नत्वधिकर्तुं योग्यमिति । अधिकृतमित्यपि फलितार्थकथनम् । न तु वाचनिकोक्तिः, चादीनां द्योतकत्वात् । अत्र त्वधिकृतमित्यर्थपरत्वे वैयर्थ्यमित्युक्तम् । शब्दानुशासनोपक्रमे त्वधिकारार्थत्वमगत्याश्रितम् । नह्युपनीतेन वेदमधीयानेनाध्येतव्यस्य तदङ्गभूतस्य व्याकरणस्यासाधारणोवृत्तविशेषः संभवति । इह तु प्रयोजनवदर्थान्तरसंभवादधिकारार्थत्वाश्रयणमयुक्तम् । आनन्तर्यपरत्वे प्रयोजनवत्त्वं च वक्ष्यते । मङ्गलं तु नाऽथ-शब्दवाच्यम् । अपि तु शङ्खस्वनादिवच्छ्रूयमाणोऽथ-शब्दो मङ्गला[1]वहः । ओङ्कारस्येवार्थान्तरपरत्वेऽपि मङ्गलत्वं सि[2]द्धमिति । ओङ्कारतुल्योऽथ-शब्दः स्मर्यते । "ओङ्कारश्चाथशब्दश्च द्वावेतौ ब्रह्मणः पुरा । कण्ठं भित्त्वा विनिर्यातौ तस्मान्माङ्गलिकावुभावि"ति । मङ्गलवाचित्वाभ्युपगमेऽपि मङ्गलरूपा ब्रह्मजिज्ञासेति ब्रह्मजिज्ञासा स्तुता स्यात् । ततश्च सूत्रस्यार्थवादता स्यात् । न तु न्यायनिबन्धनत्वं जिज्ञासाविशेषणत्वाभावे मङ्गलं भवतीति वाक्यभेदः स्यात् । प्रकृतादर्थादर्थान्तरपरत्वं चायुक्तम् । तद्धि प्रकृतमपेत्य वक्ष्यमाणस्यार्थान्तरत्वज्ञापनम् । तच्च कल्पान्तरोपन्यासविवक्षायामेव दृष्टम् । अत्र तु कल्पान्तरोपन्यासाभावात्तदनुपपन्नम् । प्रश्नपरत्वमप्ययुक्तम् । वचनव्यक्तेः प्रश्नप्रतिवचनरूपत्वाभावात् । तदा हि किं ब्रह्मजिज्ञासा कर्तव्येत्युक्तं स्यात् । सा कर्तव्येति वाक्यान्तरेण प्रतिवचनं स्यात् ।

न च प्रतिवचनरूपं वाक्यान्तरमुपलभ्यते । 'अथ-शब्दस्य कार्त्स्न्यपरत्वे कार्त्स्न्येन सा कर्तव्येत्यर्थः स्यात् । सोऽनुपपन्नः एकदेशकर्तव्यतायाः

(१) भोजनार्थमानीतस्य दध्नो यथास्वरूपतो माङ्गलिकत्वं तथाऽथ-शब्दस्यापीति भावः ।

(२) सिध्यतीति (ख) पु॰ पा॰ ।

शङ्कितत्वाभावात् कर्तव्यतामात्रं हि संशयपदं तन्निरासार्थं च सूत्रम् । किंच अधिकाराद्यर्थान्तरपरत्वमतः शब्दान्वयोऽपि निवारयति । अतः-शब्दो हि प्रकृतमर्थं हेतुतया परामृशन्नथ-शब्दोपस्थापितं वा ब्रह्मजिज्ञासापदं सामर्थ्याक्षिप्तं वा परामृशेत् । तत्र च यद्यथ-शब्दोपस्थापितमधिकृतत्वं हेतुतया परामृशेत् । तदा अधिकृतत्वादधिकर्तव्येति हेतोः साध्याविशिष्टता स्यात् । मङ्गलस्यानभिधेयतया न पदान्तरपरामर्शयोग्यता वाच्यत्वाभ्युपगमेऽपि तस्य च प्रकृतापेक्षत्वस्य कार्त्स्न्यस्य च पूर्वपक्षयुक्तिप्रत्यनीकत्वाभावाच्च तानि हेतुतया परामर्शनीयानि नह्यमङ्गलत्वाप्रकृतापेक्षत्वाकार्त्स्न्यैः पूर्वपक्षोत्थानं न्यायसूत्राणि च विरुद्धार्थव्युदासपराणि प्रश्नवाक्यगतप्रश्नस्तु तस्मिन्नेव वाक्ये हेतुतया परामर्शानर्ह एव किंब्रह्मजिज्ञासाकर्तव्येति वाक्ये परिसमाप्ते कथं किंशब्दार्थो हेतुतया परामृश्येत अतोऽतः शब्दपरामर्शयोग्यार्थश्चेदथशब्दोऽभ्युपगम्यते तदाधिकाराद्यर्थत्वं न घटते यदि ब्रह्मजिज्ञासापदसामर्थ्याक्षिप्तस्य पूर्ववृत्तत्वेन तत्तद्व्याख्यात्रभिमतस्य वस्तुनोऽतः-शब्देन परामर्श इष्येत तदानीं जिज्ञासानुपयोगिनस्तदाक्षेप्तव्यत्वायोगात् उपयोग्यर्थ एव तदाक्षेप्य इति तत्परामर्शिनाऽतः-शब्देन जिज्ञासोपयोगितया पूर्वभाव्यर्थविशेषोपस्थापनादथशब्दस्वारसिकानन्तर्यपरत्वे संभवत्य स्वारसिकफलार्थान्तरस्वीकारो न घटते ततश्चातःशब्दवत् ब्रह्मजिज्ञासापदसामर्थ्यमप्यधिकाराद्यर्थपरत्वनिवारकं स्यात् एवमर्थान्तराणामनुपपन्नतामर्थतो दर्शयन् आनन्तर्यार्थत्वमप्यथशब्दस्योपपादयति "अत्रायमथ-शब्द आनन्तर्ये भवती"ति 'अथ-शब्द आनन्तर्ये" इति 'प्रतिज्ञा तदुपपादकमत्रायं भवतीति पदत्रयं तत्र भवतीति पदेन आनन्तर्ये स्वारस्यं सूच्यते स्वारस्यापवादिकां पूर्ववृत्ताप्रतिपत्तिं परिहरति "अत्रायमि"ति अत्र-वेदस्योत्तरभागविचाररूपब्रह्ममीमांसारम्भसूत्र इत्यर्थः ब्रह्मजिज्ञासापदसामर्थ्यात् पूर्वभागविचाररूपवृत्तविशेष आक्षिप्त इति भावः हेत्वन्तरमभिप्रयन्नाह "अय"मिति अयमथशब्दः "अथ शब्दानुशासनम्" "अथ योगानुशासन"मित्यादिसूत्रान्तर्गताथशब्दव्यावृत्त इत्यर्थः

Digitized by Google

अतः शब्द[1]शिरस्क इत्युक्तं भवति वेदान्तसारे ह्ययमर्थः कण्ठोक्तः प्रकृतपरामर्शिनैतच्छब्देन पूर्ववृत्तसामान्यमभिहितमित्यभिप्रायः एवं समभिव्याहृतोभयपदस्वारस्यात् सामान्यतोऽभिहितं विशेषतश्चाक्षिप्तं च पूर्ववृत्तं सिद्धमिति वृत्तविशेषाप्रतिपत्तिरूपस्य स्वारस्यापवादकस्याभावादथ-शब्दस्यानन्तर्यार्थ एवेति वाक्यार्थः । एवमथशब्दस्योत्तरभागविचारारम्भगतत्वम् । अतः शब्दशिरस्कत्वमानन्तर्यस्वारस्यं च दर्शयद्भिः आनन्तर्योपपादकश्चायं भवतीति पदैरेवास्मिन् सूत्रे पर्यायान्तराणां मत्यन्तराभावस्वीकार्यताभावादरणीयत्वं फलितम् ।

सू० अतः शब्दो वृत्तस्य हेतुभावे ।

टी० अतः-शब्दं व्याचष्टे अतः-शब्दो वृत्तस्य हेतुभावइति वृत्तस्येति प्रकृत्यर्थउक्तः हेतुभावइति प्रत्ययार्थः, इयं प्रतिज्ञा अत्रायं भवतीत्यनुषक्तं पदत्रयमुपपादकं प्रकृतिप्रत्यययोरुक्तार्थपरत्वेन प्रसिद्धिप्राचुर्यं भवतिना दर्शितम् । अत्रेत्यस्य पूर्ववदर्थः अनेन वृत्तविशेषस्तस्य हेतुभावार्हत्वं चाक्षिप्तं, तदर्हत्वं च अनन्तरमेव व्यक्तं भविष्यति प्रायम् । आनन्तर्यस्वरसाथशब्दपूर्वकः अनेन वृत्तसामान्यमाक्षिप्तं नन्वथ-शब्दार्थनिर्णयोतः-शब्दार्थनिर्णयसापेक्षः अतः-शब्दार्थनिर्णयश्चाथ-शब्दार्थनिर्णयसापेक्षइत्यन्योन्याश्रयः नैवम् । अथ-शब्दस्यानन्तर्यस्वारस्यं हि नातः-शब्दार्थनिर्णयसापेक्षम् । अतः-शब्दस्य वृत्तपरत्वस्वारस्यं च नाथ-शब्दार्थनिर्णयसापेक्षम् । अथ-शब्दआनन्तर्यपरः स्वस्वारस्यात् समभिव्याहृतपदान्तरस्वारस्याच्च अतः-शब्दोपि वृत्तस्य हेतुभावपरः स्वस्वारस्यात् समभिव्याहृतपदान्तरस्वारस्याच्चेति "भवत्ययं-शब्दाभ्यां" दर्शितं भवति इमे चाभ्युच्चययुक्ती अत्र-पदाभिप्रेतब्रह्मजिज्ञासापदसामर्थ्यादेव पदद्वयस्योक्तार्थपरत्वसिद्धेः अतः स्वपरपदस्वारस्यात् ब्रह्मजिज्ञासापदसामर्थ्याच्चाथातः-शब्दौ यथोक्तार्थपराविति न दोषः । (शेषमग्रे)

(१) अतः शब्दः शिरसि-अग्रे यस्य स तथात्र सूत्रे "अथातः" इत्याम्नानाद् भवत्यथ-शब्दोऽतः-शब्दशिरस्क इत्यर्थः ।

॥ श्रीः ॥

सटीकसंक्षेपशारीरकम् ।

॥ सटीकसंक्षेपशारीरकस्य द्वितीयोऽध्यायः ॥

(*Continued from page* 70. Vol VII.)

मू० ॥ एवं समन्वयनिरूपणयावबोधो
जातोऽप्यखण्डविषये ननु वाक्यजन्यः ॥
मानान्तरेण परिपीडित एव जातो
भेदप्रकाशनकृतावनिबन्धनेन ॥ १ ॥

टी० ॥ श्रीगुरवे नमः ॥ एवं वेदान्तानां सत्यज्ञानानन्दाद्वये ब्रह्मणि समन्वयो निरूपितः, नन्वेवं सत्याद्वये समन्वितत्तयावगतवाक्यादेव तदवगमसंभवात् सिद्धमेव सर्वं विवक्षितमिति किमुत्तरलक्षणेनेत्याशङ्क्य तेनाद्वये मानाभावप्रयुक्तासंभावनायां निरस्तायामप्यनादिभवसमुद्भूतद्वैतग्राहिप्रत्यक्षादिदृढप्रामाण्याभिमानेन प्रमेयासंभवं मन्वानस्य जातोऽप्यवगमोऽर्थसाधको न भवति, ततश्च भेदग्राहिप्रत्यक्षाद्यविरोधनिरूपणायाध्यायान्तरमारम्भणीयमित्याशयेन प्रथममुक्तसमन्वयमाक्षिपति । एवं समन्वयेति । मन्वित्ति चोद्ये । प्रथममापाततो वाक्यजन्योऽनन्तरं समन्वयनिरूपणयाखण्डविषयनिश्चयो जातोपि मानान्तरेण परिपीडित एव संजात इति संबन्धः । विरोधार्थं मानान्तरं विशिनष्टि । भेदप्रकाशनकृता भेदप्रकाशनेन । यद्वा प्रत्यक्षम् । तच्चानुमानादेरप्युपलक्षणं तन्निबन्धनं कारणं यस्य तेन ॥ १ ॥

मू० ॥ मज्जत्यलाबु सहसाप्सु शिलाः प्लवन्त
इत्यादिकादभिहितादिव वाक्यजातात् ॥
जातापि बुद्धिरपबाधितगोचरैव-
मद्वैतबुद्धिरपि भेदधियात्मनि स्यात् ॥ २ ॥

टी० ॥ ननु मानान्तरविरोधस्फूर्तौ शाब्दबोध एव न जायते तदस्फूर्तिदशायां तदुत्पत्तिश्चेत् तर्हि समन्वयावगमानन्तरं सहसोत्पन्नादेव ततः

पुरुषार्थसिद्धेः किं समयान्तरेयोग्याशङ्कायोग्यतानिश्चयस्य शाब्दनिश्चयप्रतिबन्धकत्वेऽपि न शाब्दज्ञानमात्रप्रतिबन्धकत्वम् उत्प्रेक्षामूलकवाक्यादपि तदर्थप्रतीतिदर्शनादित्याशयेनाह । मज्जतीति । अलाबु शुष्कम् । वाक्यजातात् वाक्यसमूहात् । दार्ष्टान्तिकमाह । एवमिति । अद्वैतबुद्धिरपि वेदान्तजन्या भेदधियाऽपबाधितगोचरैव स्यादित्यर्थः ॥ २ ॥

मू० ॥ अध्यक्षगोचरमनर्थमवैमि वाक्यं
निर्मुक्तमाह मम रूपमनर्थहेतोः ॥
एवं च वेदशिरसोऽक्षनिबन्धनेन
ज्ञानेन बाधनमतीव हि दुर्निवारम् ॥ ३ ॥

टी० ॥ नन्वेकस्मिन् विरुद्धधर्मद्वयग्राहकं चेत् प्रमाणद्वयं स्यात् तदैकेन बलवताऽपरं दुर्बलं बाध्यत, न चौपनिषदात्मनि श्रुतिगम्ये प्रत्यक्षादिप्रवृत्तिः संभवतीति कथं तेन श्रुतिबाधः स्यादित्याशङ्क्य जीवस्वरूपे प्रत्यक्षादिप्रवृत्तिः संभवतीत्याशयेनाह । अध्यक्षगोचरमिति । ममाहमिति प्रत्यक्षसिद्धं स्वरूपमनर्थमवैमि प्रमातृत्वकर्तृत्वविविधदुःखादिभोक्तृत्वरूपानर्थकलुषितमवगच्छामि । "योऽशनायापिपासे शोकं मोहं जरां मृत्युमत्येति । न लिप्यते लोकदुःखेन बाह्यः, अनन्वागतस्तेन भवत्यसंगो ह्ययं पुरुषः तत्त्वमसी"-त्येवमादि वाक्यं मम रूपमनर्थहेतोरविद्यातत्कार्ययोगाद्विर्मुक्तमाह । न चैवं विरुद्धविषयं द्वयमपि सत्यं भवितुमर्हतीति सकलमहाजनसंमतेन प्रथमप्रवृत्तेनाध्यक्षादिनिबन्धनेन ज्ञानेन वेदशिरसोऽतीव बाधनं दुर्निवारमेव । यद्यपि ब्रह्म सत्यज्ञानानन्दात्मकं मानान्तरायोग्यमेवौपनिषदत्वश्रुतेः । तथापि प्रत्यक्षादिसिद्धप्रपञ्चसत्यत्वविरोधेन न तस्यानन्त्यं सिद्ध्येत् । एवमनुभवसिद्धप्रमात्रादिस्वभावजीवाभेदोपि तस्य न सिद्ध्येदिति तत्रापि विरोधो दुर्निवार इति भावः ॥ ३ ॥

मू० ॥ कर्तृत्वमाह मम कर्मविधिर्नियोग-
संबन्धपूर्वकमपास्तसमस्तभेदम् ॥

मामाह वेदशिरसो वचनं तथा च
सत्यस्य दुस्थितमिवापतति प्रमात्वम् ॥ ४ ॥

टी० ॥ ननु श्रुतिविरोधे परमार्थसत्यस्वांशेन तदनुपजीव्यं प्रथमप्रवृत्तमपि प्रत्यक्षादिकमेव रजताभावज्ञानेन रजतप्रत्यक्षमिव बाध्यत इति चेन्न । स्वसमकक्षकर्मकाण्डविरोधेन स्वविषयेऽप्रतिष्ठितस्योपनिषत्प्रमाणस्य प्रत्यक्षादिबाधकत्वायोगादित्याशयेनाह । कर्तृत्वमिति । दर्शपूर्णमासादिकर्मविधिर्मम नियोगसंबन्धपूर्वकं कामिनो जीवनादिमतो वा मम नियोगान्वयप्रतिपादनपूर्वकं तदनुपपत्त्या कर्तृत्वमाहेत्यर्थः कर्तृत्वग्रहणं भोक्तृत्वस्याप्युपलक्षणम् । नन्वेतावता कर्मविधिना को विरोध उक्त इति तमाह । अपास्तेति । कर्तृत्वादिविशेषरहितं निर्विशेषमित्यर्थः । अस्य वेदशिरोवचनस्य । प्रत्यक्षाद्यनुग्रहलब्धप्राबल्यकर्मवचनविरोधे श्रुतिशिरःप्रभवज्ञानस्य प्रामाण्यमत्यन्तं दुस्थितमेव स्यादित्यर्थः ॥ ४ ॥

मू० ॥ प्रत्यक्षकर्मवचसोरुभयोः समूहः
सामर्थ्यवानुपनिषद्विषयापहारे ॥
एकैकमेव तु न पारयतेऽपहर्तुं
स्वार्थप्रकाशनविधावुभयोः समत्वात् ॥ ५ ॥

टी० ॥ ननु प्रत्यक्षादिवच्छ्रुतिशिरसोऽपि समन्वयाध्यायेनाद्वये विषयविरोधेन निरूपितप्रामाण्यस्य कथं तेन बाध इत्याशङ्क्यैकस्य वस्तुनो युगपद् द्वैरूप्यायोगादन्यतरार्थस्य बाधे वक्तव्ये प्रत्यक्षादिसमुदायस्यैव श्रुतिबाधकत्वं युक्तम् । दृश्यते हि समबलसेनयोरपि राज्ञोरेकस्य रथगजाश्वाधिक्येनापरबाधकत्वमित्याशयेनाह । प्रत्यक्षेति । पारयते शक्नोति । कुतो न पारयति तत्राह । स्वार्थेति । उभयोर्वेदान्तस्य प्रत्येकं प्रत्यक्षादेश्चेत्यर्थः ॥ ५ ॥

मू० ॥ ज्येष्ठ्यात् समर्थमथ वाऽक्षजमेकमेव
तस्यैव कर्मविधिरस्तु सहायभूतः ॥

प्रत्यक्षमेव विधिवाक्यसहायमेवं
ब्रह्मात्मवस्त्वपहरिष्यति को विरोधः ॥ ६ ॥

टी० ॥ ननु प्रमाणसमुदायो न पृथक् प्रमाणं न वा प्रत्यक्षादि युगपदेव स्वंस्वमर्थं साधयत्यतः प्रवोक्तदृष्टान्तो विषम इत्याशङ्क्य कर्मकाण्डसमुपबृंहितं प्रत्यक्षमेव श्रुतिशिरोबाधकं प्रत्यक्षाद्युपोद्बलितकर्मवाक्यं वा तद्वदित्यस्याशयेनाह । ज्यैष्ठ्यादिति । अनपेक्षतया प्रथमप्रवृत्तेरित्यर्थः । अथ वेति । समुच्चयपक्ष उक्तमस्वारस्यं द्योतयति । सहायभूत इति । प्रत्यक्षादिप्रमेयस्य कर्मवाक्येनाप्युपदर्शने प्रत्यक्षाद्यप्रामाण्यशङ्काशून्यं भवतीति कर्मविधिस्तत्सहायभूत इत्यर्थः । एवमेव प्रत्यक्षादेरपि विधिवाक्यसाहाय्यं द्रष्टव्यम् । उभयथाप्युक्तसमन्वयबाध एवेत्याह । एवमिति ॥ ६ ॥

मू० ॥ अत्रोच्यते न खलु वेदशिरांसि मुक्त्वा
किं चित् प्रमाणमिह तत्त्वनिवेदनाय ॥
शक्नोति येन भवतीह विरोधशङ्का
वेदान्तवाक्यमुखतोऽवगते प्रतीचि ॥ ७ ॥

टी० ॥ उच्यते प्रत्यक्षादेः खलु व्यवहारोपयुक्तार्थनिवेदनशक्ततया व्यावहारिकमेव प्रामाण्यं न तत्त्वावेदकत्वरूपं तदर्थस्य वक्ष्यमाणयुक्तिभिः श्रुतिभिश्च बाध्यमानत्वाद्वेदान्तानां त्वव्यवहार्यब्रह्मविषयाणां तत्त्वावेदकत्वमेव प्रामाण्यमिति तैः प्रत्यक्षादिविषयसत्यत्वबाधेऽपि न तद्व्यावहारिकत्वं बाध्यते येन श्रुत्या संमते तेषां विरोधो भवेदतः कर्तृत्वादिप्रपञ्चस्य प्रत्यक्षादिसिद्धत्वेऽपि तस्य व्यावहारिकत्वादात्मनस्तत्त्वतो नित्यमुक्तत्वादिप्रतिपादकश्रुतेर्न का चित् क्षतिरित्याशयेन समाधत्ते । अत्रोच्यत इति । इह प्रतीचीति संबन्धः । मुखतस्तात्पर्यत इत्यर्थः ॥ ७ ॥

मू० ॥ अज्ञातमर्थमवबोधयदेव मानं
तच्च प्रकाशकरणत्वमित्यभिज्ञाः ॥
न प्रत्यगात्मविषयादपरस्य तच्च
मानस्य संभवति कस्य चिदपि युक्त्या ॥ ८ ॥

टी० ॥ प्रत्यक्षादेरनात्मपदार्थविषयसत्त्वनिवेदनाशक्तत्वमेवोक्तमुपपादयति । अज्ञातमिति । अभियुक्ता भट्टपादा ब्रह्मविदश्च,अनधिगतार्थबोधकं प्रमाणमिति हि ते संगिरन्ते । युक्तं चैतत् । साधकाभावनिमित्तां मेयासत्त्वशङ्कां यद् व्यवच्छिनत्ति तदेव मानं तच्चानधिगतगोचरमेव । अत एव मानाधीना मेयसत्तेत्याहुः । अन्यथा प्रमाणोपन्यासवैयर्थ्यं स्यादित्यनधिगतमेयगमेव प्रमाणमिति । ततः किं तत्राह । न प्रत्यगिति । तदनधिगतबोधनम् । अत्र जगत्यनात्मनोऽज्ञातत्वासंभवाच्च तन्मानं तथाविधमित्यर्थः । इदमिहाकूतम् । न तावत् प्रत्यक्षादिप्रमाणानां प्रामाण्यं विद्यमानार्थत्वं शुक्तिरजतादिप्रत्यक्षेऽपि तत्सत्त्वात् । नापि सदर्थकत्वम् अर्थक्रियायोग्यत्वस्य सत्पदार्थत्वेऽनिर्वचनीयप्रपञ्चेऽपि तत्संभवेन तद्ग्राहकप्रत्यक्षादेः प्रपञ्चतात्त्विकत्वनिषेधश्रुतिविरोधाभावात् । नाप्यबाध्यत्वं प्रपञ्चस्य सत्त्वं तात्कालिकाबाध्यत्वस्य स्वप्नदृष्टेऽपि सत्त्वात् । बाधाभावस्य चतुराद्यप्रमेयत्वाच्च । अत एव त्रैकालिकाबाध्यत्वं सत्त्वमित्यपि न । अनागतबाधाभावस्येदानीं ग्रहीतुमशक्यत्वाच्च । प्रपञ्चोऽपि न सत्यो दृश्यत्वादिभ्यः शुक्तिरजतवदित्याद्यनुमानैरद्वैतश्रुतिश्रुतार्थापत्तिभ्यां च तस्य बाध्यमानत्वाच्च । तस्मादज्ञातार्थग्राहकत्वं प्रमाणानां प्रामाण्यं वाच्यम् । अज्ञानं चात्मनि प्राक्प्ररूपितमिति नासंभवः । न वा पटादिप्रमाणेष्वव्याप्तिस्तस्यापि तदवच्छिन्नाज्ञातात्मगोचरस्य तदंशे प्रमाणत्वात् । न चैकस्मिन् ज्ञाने सति तद्गोचरज्ञानान्तरसत्त्वे प्रमाणमस्तीति न तत्राप्यव्याप्तिः । अज्ञाननिवृत्तिव्यतिरेकेण प्रमाणफलासंभवाच्च व्यवहारस्य तां विनाऽसंभवात् । परोक्षज्ञानेपि संशययोग्यतादिनिवृत्तिः फलमस्त्येव । सा चाज्ञातता चिदात्मन एव न जडस्येत्युक्तमिति न जडग्राहकं प्रमाणमस्ति ततो नात्मैकत्वश्रुतेः प्रत्यक्षादिबाध इति । तदिदमुक्तं युक्त्येति ॥ ८ ॥

मू० ॥ सर्वं पराग्विषयमेव हि मानजातं
वेदावसानवचनानि तु वर्जयित्वा ॥
यद्भ्रान्तिकं किमपि भौतिकगोचरं त-
द्रूपप्रदीपकनिदर्शनतः प्रसिद्धम् ॥ ९ ॥

टी० ॥ ननु तर्हि कर्त्रादिस्वभावात्मनो ज्ञाततासंभवात्तद्ग्राहिप्रत्यक्षादिप्रमाणविरोधश्चात्मनो नित्यमुक्तत्वादिग्राहकश्रुतेर्बाध इति चेत्तत्राह । सर्वमिति । वेदावसानवचनानि वर्जयित्वा वेदान्तातिरिक्तं सर्वं कर्त्रादिविषयं मानजातं पराग्विषयमेव, अनात्ममात्रविषयं वेदान्तातिरिक्तानुभवकारणत्वाद् घटादिप्रत्यक्षवत् । न चैवं बाधः कर्तृत्वादिधर्मकाहङ्कारस्य तद्विशिष्टस्य च शुद्धात्मनि कल्पिततया पराक्त्वात् तत्साक्षिण एव शुद्धस्यात्मत्वात् । न च तस्मिन् स्वप्रकाशे भेदग्राहकं किं चिदस्तीति न तच्छ्रुतिविरोधः । अत एव दृष्टान्तेपि तत्तद्विशिष्टचैतन्यविषयत्वेऽपि न साध्यवैकल्यमिति भावः । तुशब्देन वेदावसानस्यान्यतादितो विशेषमाह । तच्च शुद्धात्मतत्त्वावेदनं स्पष्टम् । किं च प्रत्यक्षादिकं भौतिकमात्रगोचरं भौतिकत्वे सति प्रकाशकत्वात् रूपादिप्रकाशकप्रदीपादिवदित्याशयेनाह । यद्भौतिकमिति । यत्किमपीति संबन्धः । रूपप्रदीपकः प्रकाशकस्तद्दृष्टान्तत इत्यर्थः । न च सिद्धान्ते वेदान्तवाक्यानामपि शब्दमयत्वेन भौतिकत्वात्तत्र व्यभिचार इति वाच्यम् । आनुपूर्वीस्वरादिविशेषवद्वाक्यात्मनो वेदस्य रज्जुसर्पादेरिवाज्ञातब्रह्मविवर्तत्वेनाभौतिकत्वात् । नापि सिद्धान्ते मनसि व्यभिचारः । तद्ग्राह्यस्य घटादेरपि भौतिकत्वादात्मनः स्वप्रकाशस्य तत्साक्षिणस्तदग्राह्यत्वादिति ॥ ९ ॥

मू० ॥ यद् व्यञ्जकं किमपि लौकिकमीक्षितं तद्
व्यङ्ग्येन तुल्यमवलोकितमत्र जात्या ॥
दीपः प्रकाशकतया विदितो हि लोके
रूपेण तैजसतया सदृशः प्रसिद्धः ॥ १० ॥

टी० ॥ नन्वभौतिकगोचरत्वेऽपि भौतिकत्वसंभवादप्रयोजकमिदमनुमानमित्याशङ्क्य व्यङ्ग्यव्यञ्जकयोः साजात्यनियमं सदृष्टान्तमाह । यद्व्यञ्जकमिति । अत्र लौकिकं व्यञ्जकमिति वेदान्तातिरिक्तप्रमाणमिति दर्शितम् । अतो न वेदान्ते व्यभिचारः । अत्र लोके जात्या व्यङ्ग्येन तुल्यं व्यङ्ग्यसजातीयमित्यर्थः । प्रकाशकतया रूपस्येति शेषः । तैजसतया

Digitized by Google

तेजस्त्वेन सर्वं हि रूपं तेज एवेति वेदान्तमर्यादयैवमुक्तम् । तेजःप्रकृतित्वात् सांख्यमतेन वा ॥ १० ॥

मू० ॥ बुद्धिः समस्तविषयावगमे प्रवृत्ता
सापि प्रकाश्यविषयेण समानजातिः ॥
बुद्धिश्च भौतिकतया श्रुतिषु प्रसिद्धा
तेनास्तु सापि खलु भौतिकगोचरैव ॥ ११ ॥

टी० ॥ ननु मनोग्राह्यं सर्वं न च तत्सर्वसजातीयमेकस्य तदसंभवादित्याशङ्क्याह । बुद्धिरिति । मन इत्यर्थः । बाह्यकरणादिसहायेन बुद्धिः समस्तविषयावगमे प्रवृत्तेत्यर्थः । प्रकाशविषयेण स्वजन्यप्रकाशविषयेण । तस्याः प्रकाश्यसाम्यमेवाह । बुद्धिश्चेति । श्रुतिषु. अन्नमयं हि सोम्य मन इत्यादिषु । अस्त्विति समर्थने लोट् । श्रुतिषु भौतिकत्वेन प्रसिद्धेभौतिकगोचरत्वमेव तस्याः समर्थनम्, सा बुद्धिर्भौतिकगोचरैव न तु परेषामिवात्मसुखादिगोचरेत्यर्थः । एवं च सर्वस्यापि मनोग्राह्यस्य भूतात्मत्वान्मनसोऽपि तथात्वात् प्रकाश्यसाम्यमित्यर्थः ॥ ११ ॥

मू० ॥ एवं प्रमाणमखिलं बहिरर्थनिष्ठं
वेदान्तवाक्यमपहाय यथोक्तहेतोः ॥
न प्रत्यगात्मविषयं श्रुतिरप्युवाच
स्पष्टं पराञ्चि वचसार्थमिमं यथोक्तम् ॥ १२ ॥

टी० ॥ एवमात्मन एवाज्ञातत्वादज्ञातगोचराणामेव प्रमाणत्वान्न प्रपञ्चस्य प्रमाणगम्यत्वं संभवति प्रत्यक्षस्य रूपादिविशेषवत्येव प्रवृत्तेर्निर्विशेषे चात्मनि तदयोगादनुमानादेश्च प्रत्यक्षोपजीवितया सविशेषमात्रविषयत्वात् सामान्यतो दृष्टस्य विशिष्य वस्त्वनिश्चायकत्वाच्चाध्यक्षादेरनात्ममात्रगोचरतेत्याशयेनोपसंहरति । एवमिति । यथोक्तहेतोः वेदान्तातिरिक्तानुभवकरणत्वादिहेतोः । न प्रत्यगात्मविषयमिति । तथा च भिन्नविषयत्वाच्च तस्य तद्बाधकत्वमित्यर्थः । श्रुतिरप्येतद्दर्शयतीत्याह । श्रुतिरिति । पराञ्चिवचसा पराञ्चीति वचनेन ॥ १२ ॥

मू० ॥ पराञ्चि खानि व्यतृणत् स्वयंभू-
स्तस्मात् पराङ् पश्यति नान्तरात्मन् ॥
कश्चिद्धीरः प्रत्यगात्मानमैक्ष-
दावृत्तचक्षुरमृतत्वमिच्छन् ॥ १३ ॥

टी० ॥ तामेव श्रुतिं पठति । पराञ्चीति । पराग्विषयाणीत्यर्थः । खानीन्द्रियाणि व्यतृणद्धिंसितवान् नानाविधानर्थोपेतपराग्विषयत्वमेव तेषां हिंसा । स्वयंभूः प्रजापतिः, इन्द्रियादि प्रमाणानि पराग्विषयाण्येव सृष्टवानित्यर्थः । पराङ् पराञ्चं नान्तरात्मन्नान्तरात्मानं कश्चिदाराधितेश्वरः, अत एव धियमीरयतीति धीरः, अमृतत्वं मोक्षमिच्छन्नावृत्तचक्षुः, चक्षुर्ग्रहणमुपलक्षणं निगृहीतसर्वेन्द्रिय इत्यर्थः । प्रत्यगात्मानमैक्षदपश्यत् पश्यतीत्यर्थः । तथा च प्रत्यगात्मा नेन्द्रियगोचरोऽत एव नानुमेयोऽपि, अत्यन्तानिन्द्रियार्थेऽव्याप्त्यसंभवादिति भावः ॥ १३ ॥

मू० ॥ यत् कर्मभावमनपास्य निजप्रमेये
संवित्तिसाधनतया जगति प्रसिद्धम् ॥
मानं जडार्थविषयं तदिहाभ्युपेयं
न प्रत्यगात्मविषयं कथितोपपत्तेः ॥ १४ ॥

टी० ॥ किं च कर्त्रादिप्रमुखप्रपञ्चस्य दृश्यत्वं सर्वाविवादमेवं च यत् प्रत्यक्षादि मानं निजप्रमेये कर्मभावं दृश्यत्वमनपास्येह जगति संवित्तिसाधनतया प्रसिद्धं तज्जडार्थविषयमनात्मविषयमभ्युपेयं नयनादिवदिति नियममभिप्रेत्याह । यत् कर्मेति । फलितमाह । न प्रत्यगिति । तन्मानमित्यनुषङ्गः । कथितोपपत्तेः, यत् कर्मभावमित्यादिनैतच्छ्लोकपूर्वभागेनोक्तयुक्तेः । दृश्यस्यानात्मत्वनियमेन तन्मानस्यानात्मविषयत्वादात्मनोऽदृश्यत्वात्तदिदमभ्युपेयमित्यनेन सूचितमिति ॥ १४ ॥

मू० ॥ यत्तु प्रमाणमवधीर्य निजप्रमेये
कर्मत्वमर्थमवबोधयितुं प्रवृत्तम् ॥

Digitized by Google

तत् प्रत्यमात्मविषयं भवितुं क्षमेत
तत्तत्त्वमादिवचनं न ततोऽन्यदस्ति ॥ १५ ॥

टी० ॥ अस्त्वेवं ततः किमित्याशङ्क्यात्ममात्रप्रवृत्तवेदान्तानां भिन्नविषयतया न प्रत्यक्षादिबाध इत्याशयेन तेषामात्मविषयत्वं साधयति । यत्तु प्रमाणमिति । वेदान्ता हि स्वप्रकाशे प्रत्यगात्मनि घटादाविव चक्षुरादिस्फुरणमनाधायैव तदविद्यानिवृत्तये तदाकारां वृत्तिं जनयन्तीति न्यायत उपपादितं तदिदमाह । अवधीर्येत्यादिना । क्षमेत युज्येत । किं तत्तादृशं मानमित्यत आह । तत्त्वमादीति ॥ १५ ॥

मू० ॥ नाज्ञातताबगतिरस्ति जडेषु पूर्वं
मेयेषु तत्स्फुरणकारणवर्जितत्वात् ॥
मानोदयान्न हि पुरा किमपीह मानं
नापि प्रमेयबलतो जडता हि तस्य ॥ १६ ॥

टी० ॥ नन्वज्ञातार्थबोधकं मानमज्ञातत्वं चात्मन एवेत्युक्तम् । अयुक्तमिदं न जानामीत्यनात्मन्यपि तदवगतिदर्शनादित्याशङ्क्य किं घटादौ चक्षुरादिप्रवृत्तेः पूर्वमेव तज्ज्ञायते किं वा मानेन तस्मिन् प्रमिते तदन्यथाऽनुपपत्त्या तज्ज्ञायते नाद्य इत्याह । नाज्ञाततेति । कुतो नास्तीत्यत आह । तत्स्फुरणेति । चक्षुरादिप्रवृत्तेः पूर्वं ततस्तज्ज्ञानासंभवात् परमते तदा तत्साधकसाक्षिणोऽभावाच्चेत्यर्थः ॥ १६ ॥

मू० ॥ नाज्ञाततावगतये स्वयमेव बाह्यं
मेयं क्षमर्थमवबोधविलक्षणत्वात् ॥
नापि प्रमाणमवबोधकमस्ति किञ्चि-
न्मानोदयात् पुर इति स्फुटमभ्युपेयम् ॥ १७ ॥

टी० ॥ नन्वात्मवद् घटादिकमेव स्वनिष्ठाज्ञानप्रकाशकमस्त्वित्याशङ्क्याह । नाज्ञाततेति । किं च न तावच्चक्षुरादिना तदवगतिः संभवत्यज्ञानस्य तदयोग्यत्वात् । नापि मनसा तद्व्यापारविरहेऽपि

सुषुप्त्यादौ तदवगमात् । नाप्यनुमानादिना तदनुभवस्य प्रत्यक्षतयाऽतत्फलत्वादित्याशयेनाह । नापीति । स्फुटमपरोक्षं यथा स्यात्तथावबोधकमिति संबन्धः । पुरः पृथक् । नापि घटादौ प्रमिते तदन्यथानुपपत्त्या तदवगतिः । घटादेरज्ञातत्वज्ञानं विना तज्ज्ञाने प्रमात्वासिध्या तत्प्रमितत्वस्यैवासिद्धेरिति भावः ॥ १७ ॥

मू० ॥ नाज्ञाततामनवगम्य पुरा प्रवेशा-
न्मानस्य किं चिदपि मानबलेन बोद्धुम् ॥
शक्नोति कश्चिदपि मानबलेन बुद्धं
किं वा स्वभाव इति निश्चयहेत्वभावात् ॥ १८ ॥

टी० ॥ किं च प्राग् घटादेरज्ञातताज्ञानाभावे तत्प्रमित्सापूर्वं प्रमातृप्रवृत्त्यसंभवेन मेयावगतिर्न स्यात् । न हि प्रमातुः प्रमित्सां विना तत्प्रमितये चक्षुरादिव्यापारयितृत्वं संभवति । अपि च प्राग्घटादेरज्ञातताज्ञानाभावे तत्स्फुरणस्य मानफलत्वं न सिद्ध्येत्तस्य घटादिस्वभावत्वशङ्काया दुरपह्नवत्वादित्याशयेनाह । नाज्ञाततामिति । मानस्य प्रवेशाद् व्यापारात् पुरेति संबन्धः । मानबलेनेदं बुद्धमिति बोद्धुमित्यनुषङ्गः । कुतस्तत्राह । मानबलेनेति । स्वभाव इति । अस्य स्फुरणमिति शेषः । न च चक्षुरादिव्यापारानन्तरभावितया ज्ञानस्य तज्जन्यत्वनिश्चय इति वाच्यम् । प्राक् प्रमेयस्याज्ञातत्वज्ञानाभावे चक्षुरादिव्यापारानन्तर्यस्यापि दुर्बोधत्वादिति भावः ॥ १८ ॥

मू० ॥ प्रक्षालनेन धवलं किमिदं बभूव
किं वा पुरापि धवलं स्वयमेव वस्त्रम् ॥
इत्येवमेष न विवेक्तुमलं कदा चिद्
यो दृष्टवान्न मलिनं वसनं पुरस्तात् ॥ १९ ॥

टी० ॥ उक्तार्थे दृष्टान्तमाह । प्रक्षालनेनेति । सुबोधम् ॥ १९ ॥

Digitized by Google

मू० ॥ एवं पुराऽनधिगतं यदि नानुभूतं
मानेन बोधितमिदं प्रतिभाति मेयम् ॥
न स्वप्रकाशमिति शक्यमिदं विवेक्तुं
केनापि नैव तदवस्थतयैव दृष्टेः ॥ २० ॥

टी० ॥ दार्ष्टान्तिकमाह । एवं पुरेति । इदं मेयं मानेनैव बोधितं प्रतिभाति न तु स्वप्रकाशमिति केनापि विवेक्तुं नैव शक्यमिति संबन्धः । विवेक्तुं कुतो नैव शक्यमित्यत आह । तदवस्थेति । स्फुरदवस्थतयैवेत्यर्थः ॥ २० ॥

मू० ॥ अज्ञातमर्थमवबोधयितुं न शक्त-
मेवं प्रमाणमखिलं जडवस्तुनिष्ठम् ॥
किं त्वप्रबुद्धपुरुषं व्यवहारकाले
संश्रित्य संजनयति व्यवहारमात्रम् ॥ २१ ॥

टी० ॥ ननु सिद्धान्ते घटाद्यज्ञाततायाः साक्षिभास्यत्वसंभवाद्घटादिग्राहकमपि प्रमाणं किं न स्यादिति चेन्न । जडस्य तदयोगात्तस्यत्वेऽप्यज्ञानादेः साक्षिवेद्यत्वस्यत्वं वाच्यम् । साक्षिणो वस्तुतः साक्ष्यसंबन्धासंभवाच्च वा साक्षी स्वासंबद्धमप्यनुभवितुं शक्नोतीति नानात्मग्राहकं प्रमाणमस्तीत्याशयेनोपसंहरति । अज्ञातमर्थमिति । जडवस्तुनिष्ठं जडवस्तुविषयम् । तर्हि प्रत्यक्षाद्यभ्युपगमवैयर्थ्यमित्याशङ्क्य घटाद्यवच्छिन्नमज्ञातमात्मानं संश्रित्य विषयीकृत्य व्यवहारकाले तदज्ञाननिवृत्ताविभिव्यक्तचिद्भास्यघटादिव्यवहारजननाच्च तदानर्थक्यमित्याह । किं त्वित्यादिना । अथ वाऽप्रबुद्धपुरुषसंज्ञं व्यवहर्तारमित्यर्थः । अत्रापि प्रागुक्तमार्गेणैव व्यवहारजनकत्वं द्रष्टव्यम् । तस्मात्सर्वमेव जडविषयं चक्षुरादि न प्रमाणमिति कुतस्ततो वेदान्तबाध इति भावः ॥ २१ ॥

मू० ॥ आबोधतः सकलमेव हि सत्यमिथ्या-
भ्रान्तिप्रमाणविनिवर्त्यनिवर्तकत्वम् ॥

स्वप्नेऽपि दृष्टमिदमेवमिहापि जाग-
त्काले भवत्वखिलमापरमात्मबोधात् ॥ २२ ॥

टी० ॥ नन्वेवं सर्वजडानां मिथ्यात्वे घटादीनां शुक्तिरजतादीनां सत्यमिथ्याविभागः सकलमहाजनसिद्धो न सिद्ध्येत् । एवं तद्ज्ञानानां प्रमाणाप्रमाणत्वनिवर्तकत्वनिवर्त्यत्वविभागोऽपीत्याशङ्क्याध्यस्तत्वेऽपि सर्वस्य तथातथा पूर्ववासनादिजन्यत्वावान्तरविशेषेण तदुपपद्यत इति दृष्टान्तेनाह । आबोधत इति । जाग्रत्पर्यन्तमित्यर्थः । आबोधतः सत्यमिथ्यादि सकलं दृष्टमेवेति संबन्धः । दार्ष्टान्तिकमाह । इदमिति । इदमखिलमिहापीति संबन्धः । इहापीत्यस्य विवरणं जाग्रत्कालेऽपीति । ननु कथं जाग्रत्कालीनपटादेरर्थक्रियाकारिणः स्वप्नतुल्यत्वमिति शङ्कां तुशब्देनाशङ्क्य निषेधति । न त्विति । स्वप्नेऽपि दृष्टस्य तत्काले व्यवहारदर्शनान्न कोऽपि जाग्रति दृष्टघटादेर्विशेष इत्यर्थः । कालेपि न त्विति पाठ एवं योजितः । काले भवत्विति पाठस्तु सुगमः । ननु यत्र त्वस्य सर्वमात्मैवाभूत्तत्केन कं पश्येदिति श्रुतिः सर्वमपि दर्शनादिव्यवहारं प्रतिषेधति तत् कथमिदमखिलमिहापीत्युच्यत इति चेत् सत्यम् । आत्मसाक्षात्कारे सति तथैव तावत्पर्यन्तं तु व्यवहारोऽनुवर्तत एवेत्याशयेनाह । आपरमात्मबोधादिति ॥ २२ ॥

मू० ॥ स्वप्ने तप्तशिलाधिरोहणगता निःश्रेयसोपायता
मिथ्याब्राह्मणतर्पणादिनिलया सत्या तथा लौकिकी ।
स्रक् सत्या तदहिर्मृषेव विदितो निद्रानिवृत्तौ पुनः
स्वप्ने दृष्टमशेषमेव वितथं ग्राह्यं तथा जागरे ॥ २३ ॥

टी० ॥ स्वप्नदृष्टान्ते उक्तमेव विभागमुदाहरणविशेषमाश्रित्य विशदयति । स्वप्न इति । तप्तशिलाधिरोहणेति । बाह्यागमप्रसिद्धमुक्तम् । तत्रैव लौकिकमपि विभागमाह । तथा लौकिकीति । नन्वेवं यथादर्शनं तदपि सत्यमस्तु न प्रबोधे सति सर्वस्यापि बाधादित्याशयेनाह । निद्रानिवृत्ताविति । दार्ष्टान्तिकस्य संक्षेपाभिधानं वाक्यम् । तथा जागर इति ॥ २३ ॥

Digitized by Google

मू० ॥ श्रेयःसाधनताग्निहोत्रनिलया सत्येति संगृह्यते
मिथ्या तप्तशिलाधिरोहणगता शिष्टैः परित्यज्यते ॥
रज्जुः सत्यतया स्थितेव तदहिर्मिथ्येव तावद् भवेद्
यावन्मूलतमोविदारणपटुर्विद्योदयो नागमत् ॥ २४ ॥

टी० ॥ तदेव प्रपञ्चयति । श्रेयः साधनतेति सुबोधः ॥ २४ ॥

मू० ॥ ननु शाक्यभिक्षुसमयेन समः
प्रतिभात्ययं च भगवत्समयः ॥
यदि बाह्यवस्तु वितथं नु कथं
समयाविमौ न सदृशौ भवतः ॥ २५ ॥

टी० ॥ ननु सर्वस्यापि वियदादिप्रपञ्चस्य स्वप्नतुल्यत्वे तद्बुद्धि-ज्ञानात्मकमेव सर्वं वक्तव्यं ततश्च विज्ञानवादिसमयप्रवेशापत्तिरिति शङ्कते । नन्विति । शाक्यो जिनबौद्धो विज्ञानवादी तत्सिद्धान्तेनेत्यर्थः । भगवतो व्यासभगवत्पादादेः समय इत्यर्थः । ननु विज्ञानवादिना वेद-प्रामाण्यानभ्युपगमात् कथं तदभ्युपगन्तृभगवत्समयस्य तत्समयतुल्यतेति चेत् सत्यम् । तथापि विज्ञानातिरिक्तविज्ञेयानभ्युपगमे कथं न तत्तौल्यं तेनापि तथैवाङ्गीकारादित्याह । यदीति । बाह्यं विज्ञानातिरिक्तं वस्तु वितथम-लीकं कथं न्विति संबन्धः ॥ २५ ॥

मू० ॥ यदि बोध एव परमार्थवपु-
र्न तु बोध्यमित्यभिमतं भवति ॥
ननु चाश्रितं भवति बुद्धमुने-
र्मतमेव कृत्स्नमिह मस्करिभिः ॥ २६ ॥

टी० ॥ व्यतिरेकमुखेनोक्तमतद्वयसाम्यमन्वयेनाप्याह । यदि बोध इति । अभिमतमिति । भवतामिति शेषः । मस्करिभिरेकदण्डिभिः ॥ २६ ॥

(शेषमग्रे)

॥ श्रीः ॥

श्रौतपदार्थनिर्वचनम् ।

अथ पाशुकपदार्थानां नामान्युच्यन्ते ।

(Continued from page 128. Vol VII.)

१०० तत आग्नेयीं पश्विष्टिं समाप्य संमर्शनादि करोति । आज्यं दधि च निरुप्यापूर्वाज्यं च निर्वपति । आज्यमधिश्रित्य पर्यग्नि करोति । चयनाभावे इदानीं वेदिकरणं आग्नीदितस्त्रिर्हरेत्यन्तम् । चयनपक्षे उत्तरपरिग्राहादि करोति । प्रतिप्रस्थाता स्फ्यमग्निहोत्रहवणीं जुहूद्वयमित्यादि पात्राण्यासाद्य कर्मणे वामित्यादि करोति । ऊर्ध्वमुखानां ग्रहाणां जुहूवत्संमार्गः । आज्यं निरुप्य महीनां पयोसीति पत्नीमाज्यमवेक्षयति । अध्वर्युर्द्रोणकलशे प्रभूतं पयो निर्वपति तूष्णीं । प्रतिप्रस्थाता सुरास्थानीयं पयः-प्राकृतवेद्यां निदधाति । अध्वर्युः पर्य्यग्निकरणादि करोति । प्रोक्षणीरासादयेध्माबर्हिरुपसादय स्रुवं च स्रुचश्च संमृड्ढि तूष्णीं पृषदाज्यग्रहणीं पत्नीं सन्नह्याज्येन दध्ना चोदेहि प्रतिप्रस्थातः सुरासोमस्य विद्धि इति प्रेष्यति । ततः प्रतिप्रस्थाता सुराकुम्भं दशापवित्रं श्येनपत्रं ग्रहान् द्रोणकलशं नकलबदरकर्कन्धूनां यवगोधूमोपवाकानां च सक्तून् सिंहव्याघ्रलोमानि शतातृण्णां स्थालीं चादाय पूर्वया द्वारा निष्क्रम्यान्तर्वेद्यासादयति । अथाध्वर्युः आज्यमुत्पूय स्वीयेनोदग्देशेनाजाविलोमनिर्मितेन दशापवित्रेण द्रोणस्थं पय उत्पुनाति पुनाति ते परिस्रुतमित्यृचा । प्रतिप्रस्थाता सुरास्थानीयं कुम्भस्थं पयः स्वीयेनोदग्देशेन गवाश्वलोमनिर्मितेन दशापवित्रेणान्तर्हिते स्वीये पात्रकलशे ऽवनाय्योत्पुनाति

ब्रह्मक्षत्रं पवते तेज इत्यादिना रसेनान्नं यजमानाय धेहीत्यन्तेन यजुषा । इदं सुरापयसोरुत्पवनमित्युच्यते ॥

१०१ सुरास्थानीयं पयः कुम्भे किञ्चित्परिशेषयति । ततोऽध्वर्युः प्रोक्षण्युत्पवनादि ऋषभो स्थ इत्यादियजुषा स्रुवस्वधितिसादनान्तं कृत्वा वेद्यामेव ग्रहेषु वक्ष्यमाणमन्त्रैः क्रमेण पयो गृह्णाति । कुविदङ्गयवमन्त इत्यृचा उपयामगृहीतोऽस्यश्विभ्यां त्वा जुष्टं गृह्णामीति यजुषा च प्रथमे गृहीत्वा यवसक्तुभिः संश्रित्य स्वीयश्येनपत्रेण परिमृज्य एष ते योनिस्तेजसे त्वा इति मन्त्रेण स्रुचां पश्चात् खरे सादयति । अयेण दक्षिणाग्निं वेद्यामेव पूर्वकृते द्वितीयखरे सादयतीत्यन्विळायन्थे उक्तम् । ततः पूर्वोक्तयैवर्चा उपयामगृहीतोऽसि सरस्वत्यै त्वा जुष्टं गृह्णामीति यजुषा च द्वितीये ग्रहे गृहीत्वा गोधूमसक्तुभिः संश्रित्य पूर्ववत्परिमृज्य एष ते योनिर्वीर्यायत्वा इति मन्त्रेण पूर्ववत्सादयति । ततस्तयैवर्चा उपयामगृहीतोसीन्द्राय त्वा सुत्राम्णे जुष्टं गृह्णामीति यजुषा च गृहीत्वोपवाकसक्तुभिः संश्रित्य परिमृज्य एष ते योनिर्बलाय त्वा इति मन्त्रेण सादयति । प्रागपवर्गमुदगपवर्गं वा ग्रहाणां खरे सादनम् । एतत्पयोग्रहासादनमित्युच्यते ॥

१०२ ततः सन्नान् ग्रहानुपतिष्ठते । तेजोसि तेजो मयि धेहि इति मन्त्रेण प्रथमग्रहम् । वीर्यमसि वीर्य्यम्मयि धेहि इति मन्त्रेण द्वितीयम् । बलमसि बलं मयि धेहि इति मन्त्रेण तृतीयम् । आग्नीध्रः द्रोणकलशस्थं सुरापयः पात्रान्तरे कृत्वा द्रोणोपरि धृतगोवालपवित्रमवनीय धारां करोति ॥ प्रतिप्रस्थाता धारायां

गृह्णाति । नाना हि वां देवहितं सदस्कृतं मा संसृक्षाथां परमे व्योमन् ॥ सुरा त्वमसि शुष्मिणी सोम एष मा मा हिंसीः स्वां योनिमाविशन् । उपयामगृहीतोस्याश्विनं तेजोऽश्विभ्यां त्वा जुष्टं गृह्णामि । आभ्यामृग्यजुर्भ्यां पर्णमये पात्रे गृहीत्वा बर्हिषी अन्तर्धाय नकुलसक्तुभिः सिंहलोमभिश्च संश्रित्य बर्हिषी दूरीकृत्य स्वीयेन श्येनपत्रेण परिमृज्य पयोग्रहाणां पुरतः उत्तरतो वा प्रागपवर्गमुदगपवर्गं वा सादयति एष ते योनिर्मोदाय त्वेति मन्त्रेण । नैयग्रोधे पात्रे द्वितीयं गृह्णाति । नानाहिवामित्यृचं पठित्वा उपयामगृहीतोसि सारस्वतं वीर्यं सरस्वत्यै त्वा जुष्टं गृह्णामीति यजुषा । ततो बर्हिषी अन्तर्धाय बदरसक्तुभिः व्याघ्रलोमभिश्च संश्रित्य अपोद्धृत्य बर्हिषी स्वीयश्येनपत्रेण परिमृज्य एष ते योनिरानन्दाय त्वेति मन्त्रेण सादयति । आश्वत्थे पात्रे तृतीयं गृह्णाति नाना हि वामित्यृचा उपयामगृहीतोस्यैन्द्रं बलमिन्द्राय त्वा सुत्राम्णे जुष्टं गृह्णामीति यजुषा च । बर्हिषी अन्तर्धाय कर्कन्धुसक्तुभिर्वृकलोमभिश्च संश्रित्य अपोद्धृत्य बर्हिषी श्येनपत्रेण परिमृज्य एष ते योनिर्महसे त्वेति मन्त्रेण सादयति । सिंहादिलोमाभावे सिंहव्याघ्रवृकान् ध्यायति । एतत्कर्म सुरास्थानीयपयोग्रहासादनमित्युच्यते ॥

१०२ सन्नान् ग्रहानध्वर्युः प्रतिप्रस्थाता यजमानश्चोपतिष्ठन्ते । ओजोसीत्यादि सुरावन्तमित्यन्तैर्वाक्यमन्त्रैः । तेषु तु वसुवाक्यसमूहेषु प्रथमवाक्यसमूहान्तपठितस्य क्षत्तेन सत्यमिन्द्रियमित्यादिवाक्यस्यानुषङ्गः क्रियते । तथाहि । ओजोस्योजो मयि धेहि । मन्युरसि मन्युं मयि धेहि । महोसि महो मयि धेहि । सहोसि सहो मयि धेहि । या व्याघ्रं विषूचिका । उभौ वृकं च

रक्षति। एतेनं पतेचिमं सिंहं सोमं पात्वंहसः। संपृचः स्थ संमाभद्रेण पृङ्क्त। विपृचः स्थ विमा पाप्मना पृङ्क्त। सोमो राजामृतं सुतः। ऋजीषेणाजहान्मृत्युम्। ऋतेन सत्यमिन्द्रियम्। विपानं शुक्रमन्धसः। इन्द्रस्येन्द्रियम्। इदं पयोऽमृतं मधु ॥ १ ॥ सोममद्भ्यो व्यपिबत्। छन्दसा हंसः शुचिषत्। ऋतेन० ॥ २ ॥ अद्भ्यः क्षीरं व्यपिबत्। क्रुङ्ङाङ्गिरसो धिया। ऋतेन स० ॥ ३ ॥ अन्नात्परिस्रुतो रसम्। ब्रह्मणा व्यपिबत्क्षत्रम्। ऋतेन स० ॥ ४ ॥ रेतो मूत्रं विजहाति। योनिं प्रविशदिन्द्रियम्। गर्भो जरायुणावृतः। उल्बं जहाति जन्मना। ऋतेन० ॥ ५ ॥ वेदेन रूपे व्यकरोत्। सतासती प्रजापतिः। ऋतेन० ॥ ६ ॥ सोमेन सोमो व्यपिबत्। सुतासुतौ प्रजापतिः। ऋतेन० ॥ ७ ॥ दृष्ट्वा रूपे व्याकरोत्। सत्यानृते प्रजापतिः ऋतेन० ॥ ८ ॥ दृष्ट्वा परिस्रुतो रसम्। शुक्रेण शुक्रं व्यपिबत्। पयः सोमं प्रजापतिः। ऋतेन सत्यमिन्द्रियम्। विपानं शुक्रमन्धसः। इन्द्रस्येन्द्रियम्। इदं पयोऽमृतं मधु ॥ ९ ॥ एतत्सुराग्रहोपस्थानमित्युच्यते ॥

१७४ उपस्थायाप उपस्पृशन्ति। ततः प्रतिप्रस्थाता ग्रहान् गृहीत्वाऽवशिष्टसुरं कुम्भद्रोणकलशं चादायाहवनीयस्याग्रतः दक्षिणखरस्याग्निसमीपे सादयति। विशाखयोः शिक्यं शतमानं पवित्रं शता तृणाञ्चासाद्य खरस्य पूर्वतः पुराणभस्मना खरान्तरं कृत्वा तस्मिन् वल्मीकवपां निदधाति। ब्रह्माणं चोपवेशयन्ति। अप उपस्पृश्य यन्मे अग्न इत्यादिमन्त्रं वाचयति यजमानम्। ततो यूपप्रक्षालनादि पाशुकं कर्म चरकवत्करोति। त्रयः पशव आलभ्यन्ते। तत्राश्विभ्यां धूम्रवर्णश्छागः। सरस्वत्यै मेषश्छागो वा। इन्द्राय ऋषभः। कलियुगे तु गवालम्भनिषेधात्कूष्माण्डादिनिधि-

त्वेन छागो भवति । छागऋषभकार्यं इति गोपालकारिकोक्त-
त्वात् । वृष्णिर्वेत्यापस्तम्बसूत्रोक्तत्वान्मेषो वा भवति । प्रतिनि-
धिस्वीकारेऽपि पशुनामादेशादौ ऋषभशब्द एव प्रयोक्तव्यः । न तु
वृष्णिशब्द उस्रशब्दो गोशब्दो वा । मन्त्रपाठे ऋषभशब्ददर्श-
नात् । एते सौत्रामणीपशव इत्युच्यन्ते ॥

१०५ पर्यग्निकरणे विशेषः । आग्नीध्रो द्वितीये पर्याये पर्यग्निकुर्वन् प्रतिप्रस्थाता उत्तरवेदेर्दक्षिणेन पथा गत्वा तत्र खरे उल्मुकैकदेशं प्रक्षिप्य करीषादिनोपसमाधायोपशादिते सति आग्नीध्रः शेषेणोल्मुकेन पर्यायान् समाप्य तदेवोल्मुकं पृथङ्निधाय पशुश्रपणकाले तदर्थं प्रणयति । अथोल्मुकप्रथमा इत्यादिना विहितस्य शामित्रशालां प्रति पशुनयनस्याङ्गभूतमुल्मुकं पृथङ्निहितस्यैवैकदेशो गृह्यते । तमेकदेशं कार्यानन्तरमाहवनीये प्रक्षिपति । ऋषभे निपतिते सति तमुदुस्तनिष्ठेत्यादिमन्त्रेणोत्थापयति । ततो वपाप्रचारान्तं पाशुकं चरकवद्भवति । पश्वङ्गमन्त्रेषु पशुबोधकशब्दानां पशुबहुत्वाद्बहुवचनान्तत्वेन सर्वेषोहः कार्यः । अश्विभ्यां छागस्य वपाया मेदसोऽनुब्रूहि इत्यनुवाक्याप्रैषः । अयमश्व्यनुवाक्याप्रैष इत्युच्यते ॥

१०६ अश्विभ्यां छागस्य वपां मेदः प्रस्थितं प्रेष्येति मैत्रावरुणं प्रत्यध्वर्युः प्रेष्यति । अयमश्विपाज्याप्रैषप्रैष इत्युच्यते ॥

१०७ सरस्वत्यै मेषस्य वपाया मेदसोऽनुब्रूहि इति । अयं सरस्वत्यनुवाक्याप्रैष इत्युच्यते ॥

१०८ सरस्वत्यै मेषस्य वपां मेदः प्रस्थितं प्रेष्येति अयं सरस्वतीयाज्याप्रैषप्रैष इत्युच्यते ॥

Digitized by Google

१७९ यजमानः अश्विभ्यामिदम्० । अश्विनोरहन्देवयज्ययेन्द्रियावी भूयासम् । वेमानं महिमानं गमेयमिति वा । सरस्वत्या इदम्० । सरस्वत्या अहं देवयज्ययेन्द्रियावी भूयासम् । वेमानमित्यादिविकल्पः पूर्ववत् । अनुमन्त्रयते । एतद्यागद्वयानन्तरं अध्वर्युः इन्द्राय ऋषभस्य वपाया मेदसोनुब्रू३हि इत्ययमैन्द्रानुवाक्याप्रैष इत्युच्यते ॥

१८० इन्द्राय ऋषभस्य वपां मेदः प्रस्थितं प्रेष्येत्ययमैन्द्रयाज्याप्रैषप्रैष इत्युच्यते ॥

१८१ ततो वपामार्जनान्तं समानम् । इदानीमेव वा पर्यायहादिग्रहणम् । ततः प्रतिप्रस्थाता पशून् विशाधि इत्यादि करोति । नैतेषु पशुपुरोडाशा विद्यन्ते । ग्रहपुरोडाशा ह्येते इति वचनात् । शमितहृदयानि जिह्वावक्षांसि तानि कुरुतात्तनिमानिमतक्नूस्तानि साधं सव्यानि दोषाण्येकपराणि कुरुतान्नानापार्श्वायवघत्तादविदाः श्रोणीरध्युद्धीः कुरुताद्दक्षिणानि दोषाणि सव्याः श्रोणीरभिमन्ति गुदानां तानि अङ्गानि कुरुताद्दनिष्कृत्य आघनीस्वावधत्ताद्धृदूप्यः कुरुतात् चिः पशून् प्रच्यावयतान् चिः प्रच्युतानां पशूनां हृदयान्युत्तमानि कुरुतात् । तस्य तस्य पशोरित्यध्याहारे तु एकवत्प्रैषोप्यन्वेमीत्यनूहो वा । अयं सोमामक्षीपशुप्रपयप्रैष इत्युच्यते ॥

१८२ इदानीमप्रैषित एवाग्नीध्रः त्रीन्पुरोडाशान्निर्वपति । इन्द्रायैकादशकपालम् । सवित्रे द्वादशकपालम् । वरुणाय दशकपालम् । सर्वाणि कपालानि त्रयस्त्रिंशद्भवन्ति । अथवा वारुणमेककपालं निर्वपति । आमिक्षाश्रपणं सोमो आप्यनिनयनान्तङ्करोति ।

Digitized by Google

पुरस्तादनुवाक्याकाले ग्रहैः प्रचरन्ति । अध्वर्युः पयोग्रहान्वंशरज्ज्वा-
द्विधा गृहीत्वा सोमार्थमेकत्र बद्ध्वा आदत्ते । प्रतिप्रस्थाता तथैवैकी-
कृत्य सुराग्रहानादत्ते । अध्वर्युर्मैत्रावरुणं सम्प्रेष्यति । अश्विभ्यां
सरस्वत्या इन्द्राय सुत्राम्णे सुरासोमाननुब्रूहि । अयं सुराग्रहा-
नुवाक्याप्रैष इत्युच्यते ॥

१८३ अत्याक्रामतोऽध्वर्युप्रतिप्रस्थातारौ । अध्वर्युराश्रावयति । आ-
ग्नीध्रेण प्रत्याश्राविते । अश्विभ्यां सरस्वत्या इन्द्राय सुत्राम्णे
सुरासोमान्प्रस्थितान् प्रेष्य । इत्ययं प्रैषः सुराग्रहयाज्याप्रैषप्रैष
इत्युच्यते ॥

१८४ होतृवषट्कारसमकाले प्रतिप्रस्थाता सुराग्रहान् अध्वर्युः पयो-
ग्रहान् सहैतौ स्वाहान्ताभ्यां जुहुतः । सुरावन्तं बर्हिषदं
सुवीरं यज्ञं हिन्वन्ति महिषा नमोभिः । दधानाः सोमं दिवि
देवतासु मदेमेन्द्रं यजमानाः स्वर्काः स्वाहा । इत्यध्वर्योः
यस्ते रसः सम्भृत ओषधीषु सोमस्य शुष्मः सुरया सुतस्य । तेन
जिन्व यजमानं मदेन सरस्वतीमश्विनाविन्द्रमग्निं स्वाहा । इति
प्रतिप्रस्थातुः । चरकोक्तयोराहाव्यग्ने हविर्यस्मिन्नश्वास इत्यन-
योर्निवृत्तिः । इमौ सुराग्रहहोममन्त्रावित्युच्यते ॥

१८५ अश्विभ्यां सरस्वत्या इन्द्राय सुत्राम्ण इदम् न ममेति त्यागो
यजमानस्य । अत्र हुतानुमन्त्रणं नास्ति । सोमधर्मत्वात् । चर-
णके आपस्तम्बसूत्रोक्तं अनुमन्त्रणं वाज्ञाय्यवत् ग्राह्यम् ।
आहाव्यग्ने हविरास्ये ते स्रुचीव घृतं चमू इव सोमः । वाजसनीं
रयिमस्मे सुवीरं प्रशस्तं धेहि यशसं बृहन्तम् ॥ १ ॥ यस्मिन्न-
श्वास ऋषभास उक्षणो वशा मेषा अवसृष्टास आहुताः । कीलालपे

Digitized by Google

सोमपृष्ठाय वेधसे । हृदा मतिं जनय चारुमग्नये ॥ २ ॥ इति मन्त्राभ्यां सुराग्रहान् हुतान् हूयमानांश्चानुमन्त्रयते यजमानः । इदं मन्त्रद्वयं सुराग्रहहोमानुमन्त्रणमित्युच्यते ॥

१८६ होतुरनुवषट्कारे तु उभौ तूष्णीं जुहुतः । यजमानः अग्नय इदम्० । अग्नेरहन्देवयज्यया सुष्मान्यसेन प्रतिष्ठां गमेयमित्यनुमन्त्रयते । प्रतिप्रस्थातुर्दक्षिणाग्नेरस्याग्नौ वा होमः । तत्पक्षे शालामुखीयादग्नेरिध्मं प्रणीयोत्तरवेदिवत्सम्भारनिधानं अध्वराहुत्यादि परिस्तरणपरिधीध्मादिसम्भारान्तं तूष्णीमध्वर्युपुरुषाः कुर्वन्तीति विशेषः प्रतिप्रस्थाता शिवनं संस्रावं सारस्वते ऽवनयति सारस्वतमैन्द्रे । अन्ते प्रत्याक्रम्याश्विनं पयोग्रहमध्वर्युर्भक्षयति । यमश्विना नमुचेरासुरादधि सरस्वत्यसुनोदिन्द्रियाय । इमं तं शुक्रं मधुमन्तमिन्दुं सोमं राजानमिह भक्षयामि इति मन्त्रेण । प्रतिप्रस्थाताग्नीध्रश्च सारस्वतं भक्षयतः । यदत्र रिप्तं रसिनः सुतस्य यदिन्द्रो अपिबच्छचीभिः । अहं तदस्य मनसा शिवेन सोमं राजानमिह भक्षयामीति मन्त्रेण । इदं हविः प्रजननं मे अस्तु दशवीरं सर्वगणं स्वस्तये । आत्मसनि प्रजासनि पशुसन्यभयसनि लोकसनि । अग्निः प्रजां बहुलां मे करोत्वन्नं पयो रेतो अस्मासु धत्त । रायस्पोषमिषमूर्जमस्मासु दीधरत्स्वाहा । आभ्यामृग्भ्यामैन्द्रं ब्रह्मयजमानौ भक्षयतः । प्रतिप्रस्थाता ऐन्द्रं सुराग्रहं होत्रे हरति । पयोग्रहत्वात् होत्रा प्रत्यक्षं भक्षयति । प्राणभक्षो वा । यदि होता न भक्षयति तदा खरे उपविष्टः कश्चिद् ब्राह्मणो भक्षयति । नाना हि वामित्यृचं यदत्र शिष्टमित्यृचा च । यदि ब्राह्मणं न विन्देत्तर्हि आहवनीयस्य दक्षिणतो

भस्मनिर्मितखरस्थवल्मीकवपायामवनयति एताभ्यामेव मन्त्राभ्याम् । अयं सुराग्रहभक्षविधिरित्युच्यते ॥

१८७ अथ ग्रहपात्राणां सुराभिनर्दनं पूरणं श्येनपत्रावगूहनञ्च । वंशपादानुच्छ्रित्य तयोरुपरि दक्षिणायं दीर्घवंशं निधाय वंशाशिक्यं च बध्वा शिक्ये शतातृण्णं कुम्भं निधाय दक्षिणाग्रगोवालपवित्रान्तर्हितं कृत्वा पवित्रे शतमानं हिरण्यं निधाय तत्रावशिष्टं सुरास्थानीयं पयोऽवनयति । यन्पतितं द्रोणे धारायेवं तद्दक्षिणामुखः प्राचीनावीती तिष्ठन् सोमप्रतीकाः पितरस्तृप्णुत इति मन्त्रेण शतातृण्णकुम्भतो धारा अग्नौ पातयति । तासु पतितासु अध्वर्युर्ब्रह्मा होता यजमानश्च प्राचीनावीतिनो दक्षिणामुखा उपतिष्ठन्ते । पवमानः सुवर्जनः । पवित्रेण विचर्षणिः । यः पोता स पुनातु मा ॥ १ ॥ पुनन्तु मा देवजनाः । पुनन्तु मनवो धिया । पुनन्तु विश्व आयवः ॥ २ ॥ जातवेदः पवित्रवत् । पवित्रेण पुनाहि मा । शुक्रेण देवदीद्यत् । अग्ने क्रत्वा क्रतूंरनु ॥ ३ ॥ यत्ते पवित्रमर्चिषि । अग्ने विततमन्तरा । ब्रह्म तेन पुनीमहे ॥ ४ ॥ उभाभ्यान्देव सवितः । पवित्रेण सवेन च । इदं ब्रह्म पुनीमहे ॥ ५ ॥ वैश्वदेवी पुनती देव्यागात् । यस्यै बह्वीस्तनुवो वीतपृष्ठाः । तया मदन्तः सधमाद्येषु । वयं स्याम पतयो रयीणाम् ॥ ६ ॥ वैश्वानरो रश्मिभिर्मा पुनातु । वातः प्राणेनेषिरो मयोभूः । द्यावापृथिवी पयसा पयोभिः । ऋतावरी यज्ञिये मा पुनीताम् ॥ ७ ॥ बृहद्भिः सवितस्तृभिः । वर्षिष्ठैर्देवमन्मभिः । अग्ने दक्षैः पुनाहि मा ॥ ८ ॥ एतैरष्टाभिर्मन्त्रैः । एतत्सुराधारोपस्थानमित्युच्यते ॥

१८८ उपस्थानानन्तरं प्रत्यङ्मुखोऽध्वर्युः त्वं सोम प्रचिकितो मनीषेति त्वया हि नः पितर इति यन्वन्नयातइति त्वं सोमपितृभिः संविदान इति तस्मै त इन्दो हविषा विधेमेति षड्भिर्ऋग्भिरुपतिष्ठते । उदङ्मुखो ब्रह्मा बर्हिषदः पितर ऊत्यर्वागिति त आगता वसेति आहं पितॄन्त्सुविदत्रानित्युपहूताः पितरः सोम्यास इति षड्भिर्ऋग्भिरुपतिष्ठते । प्राङ्मुखो होता अग्निष्वात्ताः पितर एह गच्छतेति ये अग्निष्वात्ता ये नग्निष्वात्ता इति वान्याये दुग्धे इति अग्निष्वात्ता इति षड्भिर्ऋग्भिरुपतिष्ठते । अत्र सुरायहस्थापनं चरकवत् खरे भवति । ततो यजमानः प्राचीनावीती आहवनीयस्य दक्षिणतः सुरास्थानीयं अवशिष्टं पयः पित्रादिभ्यो वेद्यामवनयति । पितृभ्यः स्वधाविभ्यः स्वधा नमः । पितामहेभ्यः स्वधाविभ्यः स्वधा नमः प्रपितामहेभ्यः स्वधाविभ्यः स्वधा नमः । अक्षन् पितरः । अमीमदन्त पितरः । अतीतृपन्त पितरः । अमीमृजन्त पितरः । पितरः शुंधध्वम् । इत्येतैर्मन्त्रैः । एतत् सौत्रामण्यङ्गपितृतर्पणमित्युच्यते ॥

१८९ अध्वर्युयजमानहोतारो दक्षिणामुखा उपतिष्ठन्ते । पुनन्तु मा पितरः सोम्यासः । पुनन्तु मा पितामहाः । पुनन्तु प्रपितामहाः० ॥ १ ॥ पवित्रेण शतायुषा । पुनन्तु मा पितामहाः । पुनन्तु प्रपितामहाः विश्वमायुर्व्यश्नवै० ॥ २ ॥ अग्न आयूंषि पवस आसुवोर्जमिषञ्च नः । आरे बाधस्व दुच्छुनाम्० ॥ ३ ॥ अग्ने पवस्व स्वपा अस्मे वर्चः सुवीर्यम् । दधत्पोषं रयिं मयि० ॥ ४ ॥ पवमानः सुवर्जनः० ॥ ५ ॥ पुनन्तु मा देवजनाः० ॥ ६ ॥ जात-

वेदः पवित्रवत्० ॥ ७ ॥ यत्ते पवित्रमर्चिषि० ॥ ८ ॥ उभाभ्यां देवसवितः० ॥ ९ ॥ वैश्वदेवी पुनती देव्यागात्० ॥ १० ॥ इति दशभिर्ऋग्भिः इदं सौत्रामण्यङ्गपवस्थानमित्युच्यते ॥

१६० ततोऽध्वर्युर्जुह्वा सकृद्गृहीतेनाज्येन जुहोति । ये समानाः समनसः पितरो यमराज्ये । तेषां लोकः स्वधा नमो यज्ञो देवेषु कल्पतां स्वाहा । इत्यनेन मन्त्रेण । पितृभ्य इदं न ममेति यजमानस्य त्यागः । तथैव प्रतिप्रस्थाता जुहोति । ये सजाताः समनसो जीवा जीवेषु मामकाः । तेषां श्रीर्मयि कल्पतामस्मिन्यज्ञे शतं समाः स्वाहेति मन्त्रेण पूर्ववत्त्यागः अयं सौत्रामण्यङ्गपितृकहोम इत्युच्यते ॥

१६१ अथाप उपस्पृश्य यज्ञोपवीतानि कुर्वते । अथान्वाहार्यमासाद्य चत्वारिंशद्वा दक्षिणात्वेन ददाति शिशुसहितां वडवां च । चयनर्पच धेन्वृषभानडुद्भ्यामन्यतमो वरः । एकविंशतिशतसहस्रान्विष्टकानामन्यतमा दक्षिणा । एवं धेन्वादिवर एकविंशतिगवादीनां विकल्पः । पष्ठौहीत्वन्तर्वत्नी वाससा समुच्चीयते । तथा च ऋत्विजः अयं व ओदनः इदं वश्चत्वारिंशद्गोनिष्क्रयद्रव्यं अश्विभ्यां च उवानिष्क्रयद्रव्यं च यथाभागं प्रतिगृह्णीध्वम् । अध्वर्यविदन्ते एकविंशतिगोनिष्क्रयद्रव्यं पष्ठौहीहिरण्यनिष्क्रयद्रव्यं वासो निष्क्रयद्रव्यं च यथाभागं प्रतिगृह्णीष्व अथवा अध्वर्यविमानि त एकविंशतिर्गाः पष्ठौहीहिरण्यवासांसि प्रतिगृह्णीष्व । इति यजमानः प्रतिग्राहयति । ते पूर्वोक्तप्रकारेण प्रतिगृह्णीयुः । अयं कर्मसमूहः सुरामहाप्रचार इत्युच्यते ॥

(शेषमग्रे)

॥ खण्डनखण्डखाद्यम् ॥

(*Continued from page* 121. Vol. VII.)

मू० [a] यतः तस्यां प्रमाणानुपन्यासे स्वरूपसत्तापि कुतः, यथा व्यवहारोपपत्तिः; को([1])ब्रूते—'सती सा वित्तिः?'; असत्येव न कुतः। *[b]सामान्यतो वित्तेस्तथात्वविषयापेक्षितसिद्धा यत्र विशेषरूपायां प्रमाणाऽप्रवृत्तिस्तदा तत्र सत्त्वसाधनाऽसत्त्वेऽपि जिज्ञासायां सत्यां पश्चाद्व्यवहारसत्त्वेव वाऽन्यदा प्रमाणमस्त्येव?*,—इति चेन्न, [c]तस्यापि कथं सत्त्वमित्यनवस्था वा स्यात्, [d]शेषासिद्धा सर्वाऽसिद्धिर्वा प्रसज्येतेत्यर्थाऽसिद्धिपर्यन्तस्य व्यसनस्य दुरुत्तरत्वात्। [e]सेयमप्रत्यक्षोपलम्भस्य नार्थदृष्टिः प्रसिद्ध्यतीति।

टी० तद्व्यवहारं ज्ञानमनङ्गीकृत्य ज्ञानसत्तैव त्वया दुरुपपादेत्याह—। [a]"यत" इति ॥ व्यवहारमात्रात्तद्विषयज्ञानमात्रं सिद्धमेव, घटादिप्रतिनियतविषयकज्ञानजिज्ञासा तु यदि स्यात्तदा प्रतिनियतविषयकव्यवहारेण वा, प्रतिनियतविषयस्मरणादिना वा, तदप्यनुमास्यते([2]) इत्याशङ्क्ते—। [b]"सामान्यत" इति। 'जानामि'—इति सामान्याकारेणाऽपेक्षितवित्तिविशेषसिद्धावपि घटज्ञानत्वादिना जिज्ञासायां वित्तिविशेषसिद्धिरिति वा([3])ऽर्थः ॥ व्यवहारसामान्यसत्त्वस्य व्यवहारविशेषसत्त्वस्य च ज्ञानज्ञापकस्य सिद्धिर्ज्ञानान्तराधीना, एवं तत्सिद्धिरपीत्यनवस्थेत्याह—। [c]"तस्यापी"ति ॥ माभूद्विज्ञानपरम्परायास्तदानीमेव सिद्धिः, किमेतावता,

(१) कोऽनुभवो ब्रूते=अनुभावयति, यत् सत्येव वित्तिरिति, न कोऽपि, तथा चानुभावकाभावात्सा वित्तिरसत्येव किं न स्यादित्यर्थः।

(२) चैत्रो घटविषयकज्ञानवान् घटविषयकव्यवहारवत्त्वात् घटविषयकस्मरणवत्त्वाद्वा—इत्यनुमानप्रकारः।

(३) [illegible] तृतीयस्वरमभिप्रेत्य 'वा'—शब्दः प्रयुक्त इति बोध्यम्।

ज्ञिचतुरज्ञानसिद्ध्यैव तद्विषयसिद्धेरित्यत आह—।[d] "शेषे"ति । यद्यपि सर्वाऽसिद्धिप्रसञ्जनमनुपपन्नं, यत्पक्षीकृत्याऽसिद्धिरापाद्या तत्सिद्धौ बाधः, तदसिद्धावाश्रयासिद्धिः, शेषासिद्धेश्चापादकत्वेनाभिमताया अप्यसिद्धिः, 'शेषस्य चरमज्ञानस्यासिद्धौ तत्पूर्वज्ञानस्यासिद्धिः'—इति विशिष्टापादने त्वद्वचनादेव तयो(१)स्तदैव सिद्धौ सुतरामापाद्यापादकयोरसिद्धिः, तथाप्यनवस्थायामेव हृदयम् ॥ [e]"सेयमि"ति । यस्य मते उपलम्भो न प्रत्यक्षः=न स्वसंवेद्यः, तन्मते(२)नाऽर्थदृष्टिः=ज्ञानमात्रमेव न सिद्ध्यति,—इति धर्मकीर्तिनाप्युक्तमित्यर्थः । यद्यपि प्राकट्यानुमेयज्ञानं भट्टं प्रति नैयायिकानामप्ययमुपालम्भः, तथापि स्वप्रकाशानभ्युपगमेऽप्युक्तदोषवत्त्वेनोपालम्भः सम एवेति भावः ॥

मू० [a]"घटसत्तां हि व्यवहरता प्रामाणिकेन तत्र प्रमाणसद्भावो वाच्यः । यदि प्रमाणमनुपन्यस्य सास्तीत्येवमङ्गीक्रियते तदा वैपरीत्यमेव(३)किं न स्यात् । ततश्च घटसत्तायां प्रमाणसत्ता दर्शनीया, तथा च प्रमाणसत्तापि तत्प्रमाणसत्तामन्तरेण प्रामाणिकस्य नाङ्गीकारार्हा,[b] सर्वप्रमाणसत्तानिवृत्तेर्वस्तुसत्तानिवृत्तिनियतत्वात्(४);[c] अन्यथा सप्तमरसादेरप्यापत्तेः—इति व्यक्तमनवस्थादौःस्थ्यमस्वप्रकाशवादिनः स्यात् ।[d] यदि हि विनैव प्रमाणसत्तां प्रमाणसत्तां परोऽङ्गीकारयेत्तदा घटसत्तामपि तथैवाङ्गीकारयतामिति घटेऽपि वृथा प्रमाणोपन्यासायासः ।

टी० अनवस्थां सर्वासिद्धं वाऽऽपादितां प्रपञ्चयति—।[a] "घटसत्तामि"ति । यद्यपि प्रमाणोपन्यासो न सत्ताङ्गीकारबीजं, किंतु प्रमाणं, तथापि

(१) तयोः=पूर्वज्ञानचरमज्ञानयोः, तदैव=त्वद्वचनावसरे एव, सिद्धौ सुतराम् आपाद्यापादकयोः=तदभावयोरसिद्धिरित्यर्थः ।

(२) 'तन्मतेन अर्थदृष्टिः=ज्ञानमात्रमेव'—इति वा पदविभागः कर्तव्यः ।

(३) वैपरीत्यमेव=घटाऽसत्त्वमेव ।   (४) नियतत्वात्=व्याप्यत्वात्

तत्र विप्रतिपन्नं प्रतीदानी(१)मेव तत्प्रमापणीयमिति भावः ॥ b "सर्वप्रमाणे"ति । यद्यपि कदाचित्सर्वप्रमाणनिवृत्त्या न प्रमेयनिवृत्तिः, तथापि सार्वदिकसर्वप्रमाणनिवृत्त्यभिप्रायमेतत् । यद्यपि सर्वप्रमाणनिवृत्तिर्दुर्वचा, तथापि प्रमाणान्तरं(२)त्वयैवोपपादनीयमिति भावः ॥ c "अन्यथे"ति । यदि प्रमाणनिवृत्तौ न प्रमेयनिवृत्तिरित्यर्थः । यद्यपि स्वप्रकाशत्वेऽपि प्रमाणापेक्षायामनवस्थैव, स्वप्रकाशत्वस्याऽस्वप्रकाशत्वात्(३),स्वप्रकाशत्वस्य प्रमाणान्तरेण त्वयैवेदानीमुपपादनीयत्वात्; एवं तदुपपादकस्यापि प्रमाणस्य वाच्यम्, अनुपपादने च कथं तत्स्वप्रकाशं वैपरीत्यमेव कथं न स्यात्—इत्याद्यवकाशः, तथापि वैतण्डिकोऽहमिति हृदयम् ॥ ननु घटसत्ताप्रमाणसिद्धा तत्प्रमाणेऽपि प्रमाणाभिधानमकिञ्चित्करमित्यत आह— । d "यदी"ति ॥

मू० a "अथ * नाव्यवधानलग्नवित्ति(४)तद्वित्तिधाराऽभ्युपगम्यते, किंनाम कदाचित्कतश्चित्कार्चिद्वित्तिः प्रमीयते, इति सर्वा वित्तिः प्रमाणसिद्धैवेत्यभ्युपेयते*?—इति चेन्न, b स्यादप्येवं यदि 'घटः'(५)—इति, 'घटं जानामि'—इत्य-

(१) इदानीं=विप्रतिपत्तिसमकालं. तत्=प्रमाणं, प्रमापणीयं=प्रतिपत्त्यर्थमुपन्यसनीयम्, इत्युपन्यासोऽप्यावश्यक इत्यर्थः ।

(२) प्रमाणे प्रमाणान्तरसत्त्वे किं तत्? इति त्वयोपपादनीयं नतु तदुपपादयितुं शक्यमनवस्थापातादिति तदभिप्रायेणैव सर्वप्रमाणनिवृत्तिप्रतिपादनमिति तात्पर्यार्थः ।

(३) 'स्वप्रकाशत्वस्य स्वाऽप्रकाशत्वात्'—इत्यपि क्वचित् पाठः । स्वप्रकाशत्वस्याऽस्वप्रकाशत्वे आपादनिकस्य पुनःपुनः प्रमाणैस्तत्प्रकाशनमेव हेतुमाह—स्वप्रकाशत्वस्य प्रमाणान्तरेणेत्यादिना ।

(४) वित्तितद्वित्त्योर्धारा चाऽभावव्यवधानेन लग्ना चेति विग्रहः । प्रमीयते इत्यस्यानन्तरं 'जिज्ञासायां सत्यामि'ति शेषः ।

(५) 'घट'—इति,'घटं जानामि'—इत्यतः (घटतज्ज्ञानविषयाद् ज्ञानद्वयाद्) अधिका वित्तिरस्मदादेरप्यवभासमाना यद्यनुभूयेत (तर्हि) एवमपि स्यात्—इति सम्बन्धः । वित्तिमेव विशिनष्टि—तादृग्विधयेति, तादृशां=विच्छिन्नप्रत्ययमात्रविषयाणां यदानन्त्यं तद्द्वारेण=गौरवेण, मन्थरा=मन्दगामिनी । तत्र हेतुमाह—घट इति, घटश्च तद्वित्तिश्च तयोः धारा=माला, तया । किंविशिष्टया? इत्यत आह—विषयभावेन=गर्भभावेनाऽनुप्रविष्टयेति ।

Digitized by Google

नोऽधिका (घटवित्तिमद्वित्तिधारया विषयभावेन प्रविष्टया नाहं त्रिविषयशतभारमन्थरा) वित्तिरस्मदादेरुत्पद्यमानाऽनुभूयेत। [d] यद्यस्मदादिविलक्षणजन्मनि सा सम्भाव्यते तदापि यस्या वित्तेस्तावद्विषयगर्भिता धीर्विषयः साप्यन्यया कयाचिदुल्लेख्येत्यच प्रमाणाभावश्च,

टी० ननु वित्तीनां धारावहनवत् प्रवाहं नाभ्युपैमि येन विषयाकारकल्पने न स्यात्, अपि तु सर्ववित्तीनां वेदनमात्रमङ्गीकुर्मः ? इत्याशङ्क्य [a] "नचे"ति। कालान्तरीयानुसन्धीयमाना या वित्तिपरम्परा सा स्वस्वविषयकत्वेनोल्लेखानुसन्धीयेत न चैतादृशं ज्ञानमुत्पद्यमानमनुभूयते इत्याह—। [b] "स्यादि"ति ॥ [c] "त्रिविषयशते"ति। यद्यपि शतमपि वित्तयो वित्तित्वेन, घटश्च विषयो घटत्वेन, भासते इति 'घटं जानामि' 'घटज्ञानवानस्मि'—इत्यनेनैवाकारेण क्रमेणापि वित्तिशतवेदनं सम्भाव्यते इति न त्रिविषयशतभारमन्थरत्वम्, नहि तास्वतीषु वित्तिषु प्रकारवैचित्र्यमस्ति येन तदुल्लेखधीर्व्यर्थानुभवविरोधः स्यात्, तथापि 'कालान्तरीयस्य घटज्ञानवानहमितिज्ञानस्य कालान्तरीयचरमवित्तिरपि विषयः'—इत्यत्र मे प्रमाणमिति हृदयम् ॥ ननु योगदशायां पूर्वपूर्वस्यक्ताः सर्वा वित्तीरेकवारेण प्रतिसन्धास्यतीति सर्वासां प्रामाणिकत्वमित्यत आह—। [d] "यद्यस्मदादौ"ति। योगिधियां स्वातिरिक्तसकलग्रहसामर्थ्येपि स्वग्रहे सामर्थ्याभावाचेतदपीत्यर्थः ॥

मू० [a] अनिर्मोक्षापत्तिश्च। [b] नहि स्वमन्तर्भाव्य कयाचिद्धिया स प्रवाहो ग्राह्यः। तथा सति स्वप्रकाशतासिद्धेः। [c] अत एव चाऽन्योन्यविषयता निरस्ता, सविषयकाऽन्योन्यग्रहे त्वग्रहापत्तेः।

टी० [a] "अनिर्मोक्षे"ति। योगिनामुक्तक्रमेण ज्ञानपरम्पराऽनुच्छेदे सकलविशेषगुणोच्छेदो मोक्षो न स्यादित्यर्थः ॥ ननु योगिनश्चरमा वित्तिः

स्वात्मानमपि विषयीकुर्वत् निवर्त्तते, इति नाविमोक्ष इत्यत आह—। "नही"ति । यद्यपि योगज(१)धर्माऽजन्य-जन्य-स्वविषयकसविकल्पकाऽजन्य-सामान्यलक्षणाप्रत्यासत्त्यजन्य-ज्ञानस्यैव स्वप्रकाशत्वं नाभ्युपेमीति न स्वप्रकाशत्वापत्तिः, तथापि परिभाषामात्रमेतदिति हृदयम् ॥ ननु योगिज्ञानपरम्परायामन्त्योपान्त्यज्ञानयोरन्योन्यविषयतायां न स्वप्रकाशता, न वाऽनवस्था, न वा कस्या अपि वित्तेरसंवेदनमित्यत आह—। "अत एवे"ति । अन्त्यज्ञानं स्वविषय(२)मुपान्त्यज्ञानं विषयीकुर्वदात्मानमपि विषयीकुर्य्यादेवमुपान्त्यमन्त्यं (३) विषयीकुर्वत् स्वात्मानमपि विषयीकुर्य्यादिति स्वप्रकाशतापत्तिरेवेत्यर्थः । यद्यपि (४) ज्ञानग्रहे विषयग्रहध्रौव्यं, न तु यावद्विषयग्रहनियमः, तथाच स्वेतरविषयकज्ञानग्रहे कथं स्वप्रकाशत्वं भवेत्, तथापि संयुक्तसमवेतविशेषणतया प्रत्यासत्त्या स्वेतरग्रहवत् स्वग्रहोऽपि स्यादेवेति भावः । यद्वा(५)ऽन्योन्यमात्रविषयकज्ञानस्थले दोषोऽयम् । यद्वा,

(१) अस्यां फक्किकायां योगजधर्माऽजन्यत्वादिविशेषणचतुष्टयेन क्रमशः योगिज्ञानेश्वरज्ञानानुमितिज्ञानसामान्यलक्षणप्रत्यासत्तिजज्ञानानि स्वप्रकाशत्वेनाऽभिमतानि व्यावर्त्त्यानि । तथाहि;—ज्ञानमात्रस्यैव स्वप्रकाशत्वाऽभावोक्तौ योगिज्ञानस्यापि स्वप्रकाशत्वं न स्यादिति तद्व्यावृत्त्यर्थं योगजधर्माजन्येत्युक्तम्, एवमपि योगजधर्माजन्यस्य भगवतो नित्यज्ञानस्यापि स्वप्रकाशत्वं न भवेदिति तद्व्युदासाय जन्येति, तावतापि योगजधर्माजन्यत्वे सति जन्याया (यत्रयत्र द्रव्यकर्मभिन्नत्वे सति सामान्यवत्त्वं तत्रतत्र गुणत्वम्—इत्यादिरूपस्वविषयकसविकल्पकव्याप्त्यादिजन्याया) 'ज्ञानं गुणः द्रव्यकर्मभिन्नत्वे सति सामान्यवत्त्वात्'—इत्यादिरूपानुमितेरपि स्वप्रकाशत्वं न सिद्ध्येदिति स्वविषयकसविकल्पकाजन्येत्युक्तम्, तथापि निरुक्तविशेषणत्रयविशिष्टस्य वित्तित्वलक्षणसामान्यलक्षणप्रत्यासत्तिजन्यज्ञानस्याशेषवित्तिगोचरत्वेन स्वगोचरतामपि गतस्य परप्रकाशत्ववारणाय ज्ञानं सामान्यलक्षणप्रत्यासत्त्यजन्येति विशेषणेन विशेषितम् । क्वचित्पुस्तके एकं जन्यपदमत्राधिकमप्युपलभ्यते, तदबुद्धिपूर्वकत्वाद्धेयं विज्ञैः ।

(२) स्वविषयं, स्वात्मकविषयविशिष्टमित्यर्थः ।

(३) अन्त्यं, 'स्वात्मकविषयविशिष्टमि'ति शेषः ।

(४) उपान्त्यज्ञानादेः स्वेतरपदार्थविषयकज्ञानग्राहकत्वेन स्वप्रकाशतापत्तिरिति शङ्कते—यद्यपीति । समाधत्ते—तथापीति । अन्योन्यविषयकत्वस्यापि ज्ञानान्तरग्राह्यत्वेनानवस्थानात्तदर्थं ज्ञानकल्पनेऽन्योन्याश्रयैव बाधक । तत्प्रत्येकाविषयकत्वबुद्धिविशिष्टस्य स्वस्यापि स्वेतरार्थवत् मनःसंयुक्तसमवेतज्ञानविषयताप्रत्यासत्त्या स्वेनैव ग्रहणे स्वप्रकाशतापत्तिरेवेत्यर्थः ।

(५) पूर्वं स्वेतरार्थमात्रविषयोपान्त्यज्ञानादेः स्वेतरार्थग्राहकत्ववत्तया स्वग्राहकताप्रसक्त्या स्वप्रकाशत्वमुक्तमिदानीं स्वान्योन्यग्राहकत्वस्थले स्वार्थ दोषो न स्वेतरार्थग्राहकत्वस्थले इत्याह—यद्वेति ।

अन्योन्यान्यज्ञानयोरन्योन्यविषयत्वमित्यपि ज्ञानान्तरवाह्यमेवेति तद्द्वाराच पुनरनवस्थादोषस्थमेवेति भावः ॥

मू० [a]नच पुरुषान्तरेण सा(१)प्रमास्यते नतु तदभावः—इति प्रमा तेऽस्ति, तदर्थमपि प्रमाणान्तरसद्भावपरम्परापत्तेः। *[b]नचैवं घटसामग्रीतत्सामग्रीगवेषणेऽप्यनवस्था स्यात्*। वैषम्यात्। [c]यदि हि घटसामग्रीतत्सामग्रीधारा क्वचिद्विच्छिद्येत तदा घटः सदातनः स्यात् इत्यर्थापत्त्यैव घटः सामग्रीपरम्पराविच्छेदरहित एव प्रमीयते। [d]यदि तु माने ऽप्येवं स्यात्,

टी० नन्वेकस्य पुरुषस्य विश्रान्तापि वित्तिपरम्परा पुरुषान्तरेण प्रमास्यते इति न शेषासिद्ध्या सर्वासिद्धिरित्यत आह—। [a]"नचे"ति। 'पुरुषान्तरेण प्रमास्यते'—इति त्वयोपपादनीयमतस्तदुपपादनपरम्परा पुनरप्यापन्ना। किञ्च, पुरुषान्तरेण सा वित्तिर्वेद्यते, नतु तदभावः, इत्यपि विशेषोपपादनप्रयासस्तवाधिक इत्यर्थः॥ ननु ज्ञानसिद्ध्यन्यथानुपपत्तिरेवा पर्यवसन्ना ज्ञानधारामाक्षिपेत्, अन्यथा घटकादाचित्कत्वाऽन्यथानुपपत्तिर्घटसामग्रीपरम्परामपि नाक्षिपेदित्यत आह—। [b]"नचैवमि"ति॥ वैषम्यमेव स्फुटयति—। [c]"यदी"ति। घटसामग्रीविच्छेदे हि घटकादाचित्कत्वमनुपपन्नं स्यात्, तथाच स्यादेव(२) न स्यादेव वा, नतु कदाचित्स्यादित्यापत्तेः; ज्ञानसिद्धिस्तु स्वस्मादपि भवन्ती न तत्परम्परामाक्षेप्तुमलमित्यन्यथासिद्ध्यनन्यथासिद्धिकृतवैषम्यमित्यर्थः। यद्वा, घटसामग्रीपरम्पराङ्गीकारेऽनवस्थैव परं, सा चान्यथानुपपत्तिप्रमाणिकेति न सापि दोषाय, ज्ञान-

(१) सा=चरमबुद्धिः, पुरुषान्तरेण प्रमास्यते, तस्या अभावो न प्रमास्यते,—इत्यत्र तत्र प्रमाणं नास्ति, तदभावाऽभाव एव परिशिष्यते,—इति विद्यासागरोक्तटीकाऽन्वयपूर्वकोऽर्थः।

(२) कारणसामग्रीविरहिणां हि द्वयी गतिर्दृष्टा,—नित्यसत्त्वमेव वाऽऽकाशादिवत्, नित्याऽसत्त्वमेव वा खपुष्पादिवत्, घटस्यापि सामग्रीविरहित्वे तदन्यतरत्वं स्यादित्येतदाह—स्यादेवेति।

परम्पराङ्गीकारे त्वनिर्मोक्षापत्तिरिति महद्वैषम्यमिति भावः॥ वैषम्यमेव ज्ञानपक्षे विशदयति—। [d]"यदि त्वि"ति ॥ [e]"एवं स्यादि"ति । ज्ञानसिद्ध्यन्यथानुपपत्तिरेव यदि ज्ञानस्य ज्ञानान्तरवेद्यत्वाऽऽवेदिका स्यादित्यर्थः ॥

मू० तदा स्वस्य प्रवेशात्स्वप्रकाशापत्तिः, अप्रवेशाद[a]नवस्था, [b]अवेदने शेषासिद्ध्या सर्वासिद्धिः,—इति व्यसनं दुरुत्तरमेव । [c]ये च मानमेयभावाश्रया दोषाः कीर्तनीयास्तेऽपि प्रसज्येरन् । * [d]न च तैर्दोषैर्नास्त्येव ज्ञानमित्याशयम् * । [e]स्वतः सर्वसिद्धस्य दुरपह्नवत्वात्, [f]स्वप्रकाशाङ्गीकारादेव चाऽनुभवस्य सर्वदोषहाने[g]र्वक्ष्यमाणत्वात् । [h]प्रकाशात्मतामात्रस्यैव स्वतःसिद्धिसम्भवे जडात्मनां धर्म्माणां केषामपि तदन्तर्भावानुपपत्तिः ।

टी० [a]"अनवस्थे"ति । तथाचाऽनिर्मोक्षापत्तिरिति भावः ॥ [b]"अवेदने"इति । चरमवित्तेरवेदने इत्यर्थः ॥ ज्ञानस्य ज्ञानान्तरवेद्यत्वे दोषान्तरमाह—। [c]"ये चे"ति । "नाऽत्यापत्त्या प्रमामात्रात्तेऽर्थाः स्वीक्रियोचिताः । तद्धियस्तदुरीकारे स्वाश्रयं कश्चिकित्सतु"(१)—इत्यादिदोषा मानमेयभावाश्रिता अत्र कीर्तनीया इत्यर्थः । यद्वा, प्रमाणखण्डनप्रकरणे दोषा(२) ये कीर्तनीयास्तेऽपि स्युरित्यर्थः ॥ इदानीं स्वाभिमतां स्वप्रकाशवस्तुसिद्धिं कटाक्षयितुमाह—। [d]"नचे"ति । मानमेयखण्डनप्रकरणोक्तदोषैर्नाऽत्यापत्त्येत्याद्युक्तदोषैश्च विज्ञानस्वरूपमपि न सिद्ध्येत्, तथाच सर्व-

(१) इयं च पञ्चत्रिंशकारिका, तस्या अयमर्थः,—प्रमामात्राद्घटादिसिद्ध्यङ्गीकारेऽन्यविषयकप्रमयाऽन्यस्यापि सिद्धिस्स्यात्, तस्मात् अत्यापत्त्या=अतिप्रसङ्गेन, तेते घटादयोऽर्थाः प्रमामात्रात् स्वीक्रियोचिताः=स्वीकर्तव्या, न, तद्धियस्तदुरीकारे=घटज्ञानाद्घटस्य, पटज्ञानात्पटस्य, सिद्ध्यङ्गीकारे तु घटादपि घटस्य, पटादपि पटस्य, सिद्धिः स्याज्ज्ञानकुक्षिनिविष्टत्वाद्घटादेः,—इत्यात्माश्रय इति ।

(२) ज्ञानान्तरवेद्यत्वे ज्ञानस्य ज्ञानान्तरेण कः सम्बन्धः? न संयोगोऽद्रव्यत्वात्; न समवायः, द्वयोर्गुणत्वात्; नापि तादात्म्यम्, एकान्तभिन्नयोरभिन्नयोर्वा तदयोगात्; न विषयविषयिभावः, तस्य सप्तपदार्थान्तर्भावाऽनन्तर्भावाभ्यामनुपपत्तेः; नचाऽसम्बद्धमेव ज्ञानं ज्ञानान्तरवेद्यम्, अतिप्रसङ्गात्;—इत्यादयो दोषाः ।

Digitized by Google

शून्यतावाद एव पर्य्यवस्येत्, ननु "ज्ञानं तावत्स्वप्रकाशं, स्वत एव सिद्ध-
स्वरूपम्"—इति प्रतिज्ञातोऽर्थोऽपि निर्व्वाहितः स्यादिति भावः(१) ॥ e "स्व-
त" इति । परतः सिद्धिमपेक्ष्य मानमेयभावव्यवहारयुक्तौ न तु स्वतः सि-
द्धिमपेक्ष्येत्यर्थः ॥ तदेवाह—। f "स्वप्रकाशे"ति ॥ g "सत्यमाप्तत्वादि"ति ।
"तत्स्वप्रकाशपरमार्थचिदेव भूत्वा"(२)—इत्यादिनेत्यर्थः ॥ ननु(३)सर्वशून्यता-
वादादपरेषां(४)पक्षे ज्ञानमात्राभ्युपगम एव विशेषः, स त्व न स्यात्, यतो(५)-
ज्ञानाङ्गीकारे तद्धर्माणां सत्तागुणत्वादीनां तत्सिद्धिनान्तरीयकसिद्धी-
नामभ्युपगमादित्यत आह—। h "प्रकाशात्मते"ति । मानमेयभावाश्रया
दोषाः स्वतःसिद्धत्वमात्रमपनेतुमशक्ताः, पराधीनसिद्धीनां तु ज्ञानधर्माणां
निरासे शक्ता एवेति भावः । पराधीनसिद्धिकत्वमेवामीषां कथमित्यत
उक्तं—'जडात्मनामि'ति ॥

मू० a अत एव धर्मो(६)पग्रहप्रवर्तिष्णुवाग्व्यवहाराऽविषयत्वं;
b कालानवच्छेदमादाय च नित्यतोपचारः; c देशानव-
च्छेदमादाय विभुत्वव्यपदेशः; d प्रकारावच्छेदविरहनिब-
न्धनश्च सर्वात्मत्वाद्वैतादिव्यवहारः; e सौगतप्राभाकरादि-
वदभावे(७), नैयायिकवच्चाभावेऽभावाऽनतिरेकस्वीकारादेव
चाऽद्वैताव्याघातः । (शेषमग्रे)

(१) पूर्व्वपक्षिणोभाव इत्यर्थः ।

(२) अयंच "आपाततो यदिदमनुपपत्तिनीनाम्" इत्यस्याः षष्टिंशकारिकाया-
स्तृतीयः पादस्तदर्थस्तु तत्रैव वक्ष्यते ।

(३) योगाचारादिमतमाश्रित्य ज्ञानभिन्नस्यासत्त्वव्यवस्थानमुपक्रान्तं तत्कथं सिध्येत्
यावता ज्ञानसिद्धौ तद्वृत्तिधर्माणां सत्तागुणत्वादीनामपि सिद्धिरान्तरायिकीत्याश-
यन्निति । (४) योगाचारादिनास्तिकानां पक्षे इत्यर्थः ।

(५) 'यत'—इति पूर्वं हेतुपदमुपादाय पुनरग्रे 'अभ्युपगमात्'—इति हेतुपदोपा-
दानं तु न साधु मन्ये ।

(६) धर्मस्य उपग्रहः=स्वीकारः, तेन प्रवर्त्तितुं शीलं यस्य वाग्व्यवहारस्य
तस्येत्यर्थः ।

(७) केषुचित्पुस्तकेषु "अभावे अभावं प्रति नैयायिकवच्चाऽभावानतिरेकस्वीका-
रात्"—इति पाठोऽपि दृश्यते, परन्त्वाऽर्थदृष्ट्या मूले यथादृष्टमेव रम्यम् ।

Digitized by Google

॥ श्रीः ॥

॥ श्रीं नमः श्रीमते भगवते रामानुजाचार्याय ॥

अथ श्रीभाष्यं विशिष्टाद्वैतपरं रामानुजदर्शनम्

श्रुतप्रकाशिकासमेतं विषमपदटिप्पणीसहितम्

तत्र प्रथमाऽध्यायस्यावशेषः ।

(*Continued from page* 168. Vol. VII.)

ननु अथातः-शब्दयोरन्यतरोपादानमिति चेत्, न। अथ-शब्दस्यानन्तर्यकालमुपस्थापयतो वर्त्तिष्यमाणब्रह्मजिज्ञासाविशेषणतया, अतः-शब्दस्य वृत्तहेतुभावपरतया चापर्यायत्वात् प्रतिज्ञाहेतुरूपेण पदयोर्भिन्नप्रयोजनत्वाच्च । ब्रह्मजिज्ञासा कर्त्तव्येति हि प्रतिज्ञेति चेत्, न। "ब्रह्मजिज्ञासे"ति धर्मिनिर्देशः। "अथेति" साध्यधर्मोक्तिः, न कर्त्तव्यतामात्रं साध्यधर्मः, अपि त्वानन्तर्यविशिष्टं कर्त्तव्यत्वम् । एवमथातःपदयोः प्रतिज्ञाहेत्वर्थत्वेन विभागो"ऽथातोधर्मजिज्ञासे"त्यत्रापि समानः। एवमर्थभेदस्याविवक्षितत्वेना "थ योगानुशासनम्" "अथ शब्दानुशासन"मित्यादिष्वतःशब्दाप्रयोगः ।

ननु ब्रह्मजिज्ञासासामर्थ्याक्षिप्ततया बुद्धिस्थस्य कर्मविचारस्य हेतुभावोऽतः-शब्दावगन्तव्य इति किमथ-शब्देन ?। नैवम् । आनन्तर्योक्तिमुखेन तस्य हेतोः शास्त्रान्तरश्रवणव्यवधाननैरपेक्ष्यद्योतनार्थत्वादथ-शब्दस्य, ततश्च वेदान्तश्रवणात् पूर्वं शास्त्रान्तरश्रवणेन विना संपादयितुमशक्यत्वात् शास्त्रान्तराणामनवसरग्रस्तत्वाच्च शास्त्रान्तरसापेक्षाणां नित्यानित्यविवेकादीनां पूर्ववृत्तत्वव्युदासः[1] फलितः स्यात् ।

ननु न यत् किंचिदतीतं पूर्ववृत्तत्वेन वक्तव्यम् अतिप्रसङ्गात् । अतो वर्त्तिष्यमाणोपयुक्तमेव पूर्ववृत्तमथ-शब्दोपस्थापितमिति तस्य हेतुत्वमपि शास्त्रान्तरश्रवणनैरपेक्ष्यञ्च तेनैव वस्तुसामर्थ्येन सिद्धमिति किमतः-शब्देन ?। नैवम् । अथ-शब्दाक्षिप्तहेतुत्वसिद्धिशङ्कापरिहारार्थत्वादतः-शब्दस्य, हेतु-

(१) नित्यानित्यवस्तुविवेकाद्यानन्तर्यपक्षोभामत्यादिषु बहुलमुपपादितस्तत्पक्षोऽरिहानुपन्यस्यार्थतो व्युदस्यते ।

एव विशिष्टः, तस्य विशेषणांशविशेष्यांशयोरसिद्धिशङ्कातत्परिहारप्रकारौ सूत्रकाराभिप्रेतौ परस्ताद्दर्शयिष्येते, इति प्रयोजनवत्तरं पदद्वयम् ।

मू॰ अधीतसाङ्गसशिरस्कवेदस्याधिगताल्पास्थिरफल-केवल-कर्मज्ञानतया संजातमोक्षाभिलाषस्यानन्तस्थिरफलब्रह्म-जिज्ञासा ह्यनन्तरभाविनी ॥

टी॰ अत्रेति-पदसूचितब्रह्मजिज्ञासापदसामर्थ्यसिद्धं वृत्तं वर्तिष्यमाणं तयोर्हेतुमद्भावं च विवृण्वन् उक्तमानन्तर्यमुपपादयति "अधीतेति" । कर्मज्ञान-शब्देन वृत्तमुक्तं, ब्रह्मजिज्ञासा-पदेन वर्तिष्यमाणमुक्तम् । अल्पास्थिरफला-नन्तस्थिरफल-शब्दाभ्यां हेतुहेतुमद्भावो दर्शितः । केवल-शब्देन ब्रह्मज्ञानपूर्वककर्मव्यावृत्तिः । कर्मज्ञानस्यैव पूर्ववृत्तत्वं कथम्?अनन्तस्थिरफलापातप्रतीतिश्च कथम्? इति शङ्कायां "अधीतेत्यादिपदेन तदुपादानम् । सशिरस्कवेद-शब्देन कृत्स्नाध्ययनस्य विहितत्वं, व्याख्यानपौर्वापर्यहेतुभूत-व्याख्येयपौर्वापर्यनियमो भागद्वयस्यैकप्रबन्धत्वं च सूच्यते । साङ्ग-शब्देनानन्तस्थिरफलापातप्रतीतिजनकत्वहेतुर्दर्शितः । "कल्पयेत् तथाङ्गानि"[1]"उपनीय तु यः शिष्यं वेदमध्यापयेद्द्विजः । सकल्पं सरहस्यं च तमाचार्यं प्रचक्षते" इत्यादिवचनान्यधीतसाङ्गसशिरस्कवेदस्येत्यत्राभिप्रेतानि । एवमधीतेत्यादिषष्ठ्यन्तविशेषणद्वयेन ब्रह्मजिज्ञासापदसामर्थ्यानुगृहीताथातःशब्दोपस्थापितोऽधिकारिविशेषः प्रदर्शितो भवति । समधिगतकर्मा सांसारिकफलनिर्विण्णोऽनन्तस्थिरफलाकाङ्क्षी हि शास्त्रमधिकरोति । "अनन्तस्थिरफलब्रह्मजिज्ञासे"ति । अनन्तस्थिरफलरूपस्य ब्रह्मणो जिज्ञासेत्यर्थः । अनन्तस्थिरफलत्वस्य ब्रह्मजिज्ञासाविशेषणत्वे जिज्ञासायास्तथात्वमागमोत्थविवेकादिजन्यज्ञानद्वारेणेति द्रष्टव्यम् । "अनन्तरभाविनी" तिपदेनाथातः-शब्दफलितं हेतोः शास्त्रान्तरनैरपेक्ष्यं विवक्षितम् । कर्मविचारानन्तरं ब्रह्मविचारस्य कर्तव्यत्वे कर्मणामल्पास्थिरफलत्वनिर्णयसहितानन्तस्थिरफलापातफलप्रतीतिरित्ययं विशिष्टो हेतुः । अतः-शब्देन वृत्तस्य कर्मविचारस्य हेतुतयोक्तत्वात् कर्मविचारस्य साङ्गाध्ययनजन्यानन्तस्थिरफलापा-

१ मनु॰ अ॰ २ श्लोक १४० ॥

तप्रतीतिपूर्वकत्वादावृत्तिविधानादिभिः कर्मणामल्पास्थिरफलहेतुत्वावगमाच्च । अयं विशिष्टो हेतु "रधिगतात्पास्थिरफलकेवलकर्मज्ञानतया संजातमोक्षाभिलाषस्ये" त्यनेनोक्तः । अत्र "धिगते" तिपदेन कर्मणः फलद्वारा ज्ञानाय ज्ञातव्यत्वं कथंचित् स्वरूपेणोपादानाय ज्ञातव्यत्वमपि, कर्मविचारपूर्ववृत्तत्वे हेतुः, अपेक्षितकर्मस्वरूपज्ञानं केवलकर्मणामल्पास्थिरफलत्वज्ञानं च कर्ममीमांसावसेयमिति हि वक्ष्यते, तत्र स्वरूपेणोपादेयताप्रतीतिरनन्तस्थिरफलाभावप्रतीत्यन्तर्भूता, उपायतदितिकर्तव्यताविशेषैः सहैव ह्यनन्तस्थिरफलाभावप्रतीतिरिति इति विशिष्टहेत्वन्तर्भावउपरितनग्रन्थाविरोधश्च ।

ननु कर्मविचारो ब्रह्मविचारस्य निरपेक्षहेतुश्चेत् कृतकर्मविचारैः सर्वैरपि ब्रह्म विचार्येतेति स्वर्गार्थकर्मानुष्ठानाभावप्रसङ्गः । नैवम् । अश्रुतमीमांसत्वेऽप्युपाध्यायादिवचनाद् येऽनुतिष्ठन्ति तेषां स्वर्गार्थानुष्ठानाविरोधात् । श्रुत्वापि ये स्वर्गार्थिनः, तेषामदृष्टवैगुण्यात् असमीचीनव्याख्यानश्रवणमूलस्यामुमुक्षुत्वस्य संभवाच्च । साङ्गाध्ययनं कर्मविचारस्य पूर्ववृत्तं चेदधीतसाङ्गवेदैः सर्वैरपि कर्म विचार्येत ।

न च तथा क्रियते, वेदेऽधीतेऽप्यश्रुतकर्ममीमांसा हि बहवो दृश्यन्ते तेषां कर्मविचारानधिगतिरदृष्टदेशकालादिवैगुण्यात् न तु साङ्गाध्ययनस्य पूर्ववृत्तत्वाभावादिति चेत् तदिहापि तुल्यं, तथा साधनचतुष्टयादिलाभेऽप्यनधिगतब्रह्मविचारानेकपुरुषदर्शनात् साधनचतुष्टयादेर्ब्रह्मविचारं प्रति नियमेन हेतुत्वं कथमिति परिचोदिते तत्पूर्ववृत्तत्वबाधादिभिरप्यदृष्टादिवैगुण्यादवदोष इति परिहर्तव्यं, तदिहापि तुल्यं दुष्परिहरदूषणान्तरसद्भावस्तेषां वैषम्यम् । तस्माद् घटनिष्पत्तेः कुलालादिवद् ब्रह्मविचारस्य कर्मविचारः पूर्वभावित्वेन नियतः, दृष्टादृष्टप्रतिबन्धकविरहितस्य समीचीनः कर्मविचारो ब्रह्मविचारसामग्रीति न कश्चिद्दोषः । एवमथातः शब्दार्थौ निरूपितौ ।

मू० ब्रह्मणो जिज्ञासा ब्रह्मजिज्ञासा, ब्रह्मण—इति कर्मणि षष्ठी "कर्तृकर्मणोः कृती" ति विशेषविधानात् ।

टी० अथ ब्रह्मजिज्ञासापदार्थं विवक्षुस्तदेकपदत्वस्य समासनिबन्धनत्वात् प्रथमं समासार्थं निरूपयति "ब्रह्मण" इत्यादिना, कर्मत्वकर्तृत्व-

दिसंबन्धविशेषेषु इतरा विभक्तयः "कर्मणि द्वितीये"त्यादिभिः सूत्रैर्विहिताः "षष्ठी शेष"इति सूत्रेण संबन्धसामान्ये षष्ठी विहिता अत्रास्याः सामान्यविषयतामाशङ्क्य कर्मविषयत्वं निश्चीयते । तत्र सामान्येन समासस्यानेकविभक्तिसाधारणत्वाद्विभक्त्यन्तरशङ्काव्यावृत्त्यर्थमिह तेषामनुपपत्तिमभिप्रयन् पदं विगृह्णाति "ब्रह्मणो जिज्ञासे"ति । चतुर्थीपरिग्रहे प्रयोजनत्वसिद्धावपि प्रकृतिविकारभावाभावे चतुर्थीसमासायोगात्तदपरिग्रहः । "सप्तमी"ति योगविभागाद् ब्रह्मणि जिज्ञासेति समासेऽपि ब्रह्मणो विषयत्वमात्रं स्यात् न तु प्रयोजनत्वमिति सप्तम्यपरिग्रहः । शङ्कुलाखण्ड इतिवत् तृतीयासमासे विषयत्वप्रयोजनत्वे न सिद्ध्येते इत्यभिप्रायः । ब्रह्मण—इति शब्दरूपस्य षष्ठीपञ्चमीसाधारण्यात् षष्ठ्याश्चानेकार्थत्वात्तन्निर्णयार्थमाह "ब्रह्मणइती"ति । कुत इत्यत्राह "कर्तृकर्मणो"रिति । षष्ठ्याः कर्तृकर्मसाधारण्येऽपि जिज्ञासाकर्तृत्वं तापत्रयातुरस्यैव, ब्रह्मणस्तु कर्मत्वमित्यभिप्रायेण "ब्रह्मणइति कर्मणि षष्ठी"त्युक्तम् कर्मणि षष्ठीस्वीकारे ब्रह्मणो विषयत्वप्रयोजनत्वे[1] सिद्ध्येतामिति भावः ।

मू॰ यद्यपि संबन्धसामान्यपरिग्रहेऽपि जिज्ञासायाः कर्मापेक्षत्वेन कर्मार्थत्वसिद्धिः तथाप्याक्षेपतः प्राप्तादाभिधानिकस्यैव ग्राह्यत्वात्कर्मणि षष्ठी गृह्यते ।

न च "प्रतिपदविधाना षष्ठी न समस्यत"इति कर्मणि षष्ठ्याः समासनिषेधः शङ्कनीयः "कृद्योगा च षष्ठी समस्यत"इति प्रतिप्रसवसद्भावात् ।

टी॰ ननु तर्हि कथं "यद्यपी"त्यादेः संबन्धसामान्यपरिग्रहशङ्काविषयस्य भाष्यस्योत्थानम्? । उच्यते । संबन्धसामान्यस्वीकारेऽपि षष्ठ्याः सामर्थ्याद् ब्रह्मणः कर्मत्वसिद्धेः, परम्परया संबन्धिनामुपायोपासकप्रतिबन्धादीनामपि जिज्ञास्यत्वसिद्धेः, प्रतिपदविहितषष्ठ्याः समासनिषेधाच्च ।

---

१ रामानुजमते ब्रह्मणः सिद्धोपायोपेयात्मतया क्रियाजन्यफलभागित्वलक्षणकर्मत्वार्थकषष्ठीपरिग्रहे प्रयोजनत्वलाभ इति तत्त्वम् ।

Digitized by Google

तत्र सामर्थ्यात् षष्ठ्याः कर्मार्थत्वसिद्धिं ब्रह्मानुबन्धिनामपि जिज्ञास्यत्वस्य सिद्धिं च शङ्कते "यद्यपी"ति । "संबन्धसामान्यपरिग्रह" इत्यत्र परिग्रह-ब्रह्मानुबन्धिनामपि जिज्ञास्यत्वसिद्धिः सूच्यते । परितो ग्रहणेन हि परितः स्थितानामपि ग्राह्यत्वं लभ्यते । अतएव सूत्रकृत "गृह्यत" इत्युक्तं न तु परिगृह्यतइति । तदुभयं परिहरति "तथापी"ति । अत्रायमर्थः । प्रधानस्य ब्रह्मणो ऽप्रधानानामन्येषां च कर्मत्वस्याक्षेपसिद्धत्वादपि प्रधानकर्मत्वस्या-भिधानिकत्वमितरेषां प्रधानसंबन्धादाकाङ्क्षावशाच्च कर्मत्वस्य सामर्थ्या-सिद्धत्वं च स्वीकर्त्तुं युक्तमित्यतः प्रतिपदविहिता षष्ठी ग्राह्या "विल-म्बितहेतोः शीघ्रधीहेतुर्बलीयानि"ति न्यायात् षष्ठ्याः संबन्धसामान्यविव-क्षायां हि कर्मधीर्विलम्बिता स्यात् कृद्योगषष्ठीविवक्षायान्तु शीघ्रभाविनी ।

ननु कर्तृकर्मणोरुभयोरप्यर्थयोः सूत्रप्रतिपन्नत्वाद् विलम्बिता कर्मधीरिति चेन्न । कर्त्तुर्जिज्ञासोरधिगतकर्मणः प्रतिपन्नत्वात् कर्मार्थत्वमेव हि प्रथमतरं धियमधिरोहेत् । समासनिषेधमाशङ्क्य परिहरति "नचे"ति । चः शङ्कासमुच्चये । प्रतिप्रसवोऽपवादापवादः सर्पिषोज्ञानमित्यादिप्रयोगेषु "ज्ञोऽविदर्थस्य करणे" इत्यादिसूत्रविहितायां षष्ठ्यां समासनिषेधस्य सावकाशत्वं, सर्पिषा प्रवृत्तिरिति हि तस्य वाक्यस्यार्थः । यद्यपि ज्ञानपदं कृदन्तं तथापि सर्पिषइति षष्ठी न कृद्योगविहिता । सर्पिषोज्ञानीतइति तिङन्त-पदान्वयार्हत्वात् धातोर्विभक्तेश्च प्रवृत्तिकारणार्थत्वाच्च । न च तत्सर्वं कृद्योगविहितत्वे सिद्ध्यति, अतोनात्र प्रतिप्रसवप्राप्तिरिति समासनिषेधस्य सावकाशत्वम् ।

ननु नेयं षष्ठी व्याख्येया अप्रयुक्तत्वात् । सूत्रे प्रयुक्त एव हि शब्दो-र्थबोधकः नत्वप्रयुक्तः, बोधकशब्दएव हि व्याख्येयः, अप्रयुक्तापि स्मृता विभक्तिर्बोधिकेति सा व्याख्येयेति चेन्न ।

तत्स्मरणेन विनाप्यर्थप्रतिपत्तेः, अर्थप्रतिपत्तिश्च प्रातिपदिकेन लक्षणया, लक्षणा च योग्यतादिना, अतोनुशासनेन तद्व्याख्यानमयुक्तम् । उच्यते । अप्रयुक्तविभक्त्यर्थस्य प्रातिपदिकेन लक्षणा हि समासः, तत्र

लक्ष्यार्थोपलक्षणतया विभक्तिरनुप्रविष्टा, अतो लक्ष्यार्थविशेषनिर्णयाय विग्रहवाक्यस्था षष्ठी व्याख्येया। तर्हि नानुशासनेन व्याख्येया, लाक्षणिकार्थो हि योग्यतादिनावसीयते, न हि गङ्गायां घोष इत्यत्रानुशासनबलात् कूलं लक्ष्यते अपि तु योग्यतादिनैवेति। मैवं, सर्वासु लक्षणासु योग्यतादिनैवार्थनिर्णय इति नियमाभावात्। स तु नियमः प्रातिपदिकेन प्रातिपदिकान्तरार्थलक्षणायाम्। प्रातिपदिकेन विभक्त्यर्थलक्षणायां त्वेतद्विभक्त्यर्थो लक्ष्यः, न विभक्त्यन्तरार्थ इति नियमो भवति, स च शब्दानुशासनाधीन इति तदनुरोधेन तन्निरूपणं युक्तम्। तत्र संबन्धसामान्यं लक्षयित्वा तेन कर्मत्वस्याक्षेपादपि प्रथमत एव कर्मत्वस्यैव लक्षणा शब्दानुशासनानुमता युक्ता, अतः समस्तपदलक्ष्यार्थविशेषनिर्णयायानुशासनानुरोधेन लक्ष्यार्थोपलक्षणभूता विग्रहवाक्यस्था षष्ठी व्याख्येयेति। यद्वा लुप्तविभक्तिकशब्देन विभक्त्यर्थबोधनं मुख्यं स्यात्। संबन्धिनो हि लक्षणा दृष्टा न संबन्धमात्रस्य। विभक्त्यर्थ एव स्वयं संबन्धरूपः।

न च संबन्धस्य संबन्धान्तरानपेक्षत्वेन स्वस्मिन् संबन्धिकार्यकरत्वेन लक्षणा संभवतीति वाच्यम्। संबन्धस्य स्वपरनिर्वाहकत्वानभिज्ञानामपि विभक्त्यर्थप्रतीतेः। न हि संबन्धः सत्तया लक्षणाहेतुः किन्तु ज्ञायमानतयैव। न चेदतिप्रसङ्गात्। एवं लक्षणानुपपत्त्या प्रयोगस्यानन्यथासिद्धत्वात् समस्तशब्देन विभक्त्यर्थबोधनं मुख्यम्। अमुख्यत्वेऽपि का नः क्षतिः।

ननु विग्रहवाक्येऽपि कथं कर्मत्वमाभिधानिकम्? प्रयुज्यमानापि ह्युपपदविभक्तिर्निरर्थिका। तद्विधानं "दाराः कलत्रमितिवत्प्रयोगसाधुत्वाय, अर्थस्त्वर्थसामर्थ्याक्षिप्तः, अतएव हि कारकविभक्तेरुपपदविभक्तेर्दौर्बल्यं, समासे त्वप्रयुक्तायाउपपदविभक्तेः कथन्तरां कर्माभिधायकत्वमिति चेदुच्यते। आभिधानिकत्ववत् कृदन्तपदप्रयोगेण शीघ्रधीविषयत्वसाम्यादाभिधानिकत्वोक्तिः। पदान्तरश्रवणापेक्षामात्राक्षेपादिवद्विलम्बाधिक्यम्। सामान्यषष्ठीपक्षे संबन्धसामान्यं प्रतिपाद्यं जिज्ञासाशब्दार्थगतसकर्मकत्वस्वभावालोचनयाऽर्थविशेषावगमादपि कृदन्तश्रवणमात्रभुवः कर्मत्वधियः शीघ्रत्वा-

विति कश्चित्परिहारः । "कर्मणि द्वितीये"तिवत् "कर्तृकर्मणोः कृती"ति सप्तम्यन्तनिर्दिष्टयोः कर्तृकर्मणोरभिधेयत्वमनुशासनस्वारस्यानुगुणमिति भाष्यकाराभिप्रेतः परिहार इति संप्रदायः कारकविभक्तेरुपपदविभक्तिवैषम्यं पदान्तरयोगविहितत्वरूपमस्त्येव ।

न च पदान्तरयोगावगम्यत्वमाभिधानिकत्वविरोधि, तस्य क्वचिन्नु-स्यार्थव्यवस्थापकत्वदृष्टेः, यथा "आदित्यस्य गावः प्रकाशय[1]न्ती"त्यादिषु । न हि तत्रादित्यादिपदान्तरयोगेन गोशब्दस्य किरणपरत्वं लाक्षणिकं पदा-न्तरपरामर्शसापेक्षत्वेन विलम्बितधीहेतुरुपपदविभक्तिः, कारकविभक्तिस्तु तन्निरपेक्षत्वाच्छीघ्रधीहेतुरिति प्राबल्यदौर्बल्यविभागएव न तु सार्थकत्व-निरर्थकत्वाभ्यां वैषम्यं विभक्त्यश्रवणादमुख्यत्वन्तु परिहृतम् ।

मू० ब्रह्मशब्देन च स्वभावतो निरस्तनिखिलदोषोऽनवधिका-तिशयासंख्येयकल्याणगुणगणः पुरुषोत्तमोऽभिधीयते ॥

टी० एवं समासान्तर्गतविभक्त्यर्थे निरूपिते समस्तयोः पदयोः प्रथमं ब्रह्मशब्दं व्याचष्टे "ब्रह्मशब्देन चे"ति । ब्रह्मशब्दस्य प्रधाना[2]चे-तनार्थान्तरेषु प्रयोगदर्शनादितरव्याख्यातृभिरीश्वरातिरिक्तवस्तुपरत्वेन व्याख्यातत्वाद्देवतान्तरपरत्वस्य कैश्चिदभ्युपगमाच्च तद्व्यावृत्त्यर्थं "ब्रह्मश-ब्देन पुरुषोत्तमोऽभिधीयत" इति प्रतिजानीते । पुरुषोत्तमशब्दस्य रूढ्या ब्रह्म-शब्दस्य देवतान्तर[3]परत्वव्युदासः । अवयवश[4]क्त्या बद्धमुक्तावस्थचेतनवैलक्ष-ण्यमुक्तम् । स्वेतरवैलक्षण्यमात्रं तृणादेरप्यस्तीति तद्व्यावृत्त्यर्थं स्वभावतइ-त्यादिना विशेषणद्वयेन तद्वैलक्षण्यं विशिनष्टि । इदं विशेषणद्वयं शब्दशक्ते-

---

१ प्रकाशयन्तइत्यादिषु (ख) पु० पा० ।

२ प्रधानाद्यर्थान्तरेषु (ख) पु० पा० ।

३ "हरिरेवैकः पुरुषोत्तमः स्मृतः" इत्युक्तरीत्या नारायणपदस्येव पुरुषोत्तमपद-स्यापि भगवति वासुदेवे रूढतया ब्रह्मशब्दस्य देवतान्तरपरत्वनिराकर्तेति टीकाशयः।

४ पुरुषेषूत्तम इति हि व्युत्पत्तिः–तत्र चोत्तमत्वं नियामकत्वं तच्च भगवत एव न जीवानां केषामपि, यथोक्तं सूत्रकृतैव "जगद्व्यापारवर्जं प्रकरणादसंनिहितत्वाच्चे"ति चतुर्थे, भगवानपि गीतासु "उत्तमः पुरुषस्त्वन्यः परमात्मेत्युदाहृतः यो लोकत्रयमाविश्य बिभर्त्यव्यय ईश्वरः । इति प्राह तदेवमुत्तमपदशक्त्या बद्धमुक्तोभयावस्थाश्चेतनाः परि-च्छिद्यन्ते इति भावः ।

रर्थसामर्थ्याच्च ब्रह्मशब्दस्य पुरुषोत्तमपरत्वप्रतिपादनोपयोगितयोक्तम् । न
तु प्रवृत्तिनिमित्ततया गुणतोऽपि बृहत्त्वे सति शब्दशक्त्यसंकोचसिद्धेर्मुमुक्षो-
रशेषदोषनिवृत्तिनिरतिशयानन्दप्राप्तिहेतुत्वाच्च । वाक्यान्तरोक्तस्याविद्यादि-
दोषान्वयस्य निर्गुणत्वस्य च व्यावृत्त्यर्थमुपाध्युपहितब्रह्मस्वरूपस्यैव कर्म-
वश्यत्वदुःखित्वादिव्यावृत्त्यर्थं ज्ञानादिशक्तियोग एवास्य स्वाभाविकः सार्व-
ज्ञ्यनिरतिशयानन्दादियोगस्तु कादाचित्क इति मतस्य च व्यावृत्त्यर्थमिदं
विशेषणद्वयमुक्तम् । निरस्तकतिपयदोषत्वं निरस्तनिखिलदोषत्वं च केषां
चिद् बद्धानां, नित्यानां मुक्तानामप्यस्तीति तद्व्यावृत्त्यर्थं "स्वभावतो निर-
स्तनिखिलदोष"इत्युक्तम् । नित्यसिद्धानामपि भगवन्नित्यसंकल्पाधीनं हि
नित्यनिर्दोषत्वं स्वभावत इत्युत्तरत्रानुषङ्गः तेन गुणानामप्यविद्याकल्पित-
त्वपक्षव्यावृत्तिः "ते ये शत"मित्यत्र पूर्वपूर्वगुणेभ्य उत्तरोत्तरगुणानामतिशयः
सावधिरिति तद्व्यावृत्त्यर्थमनवधिकातिशय-शब्दः, तत्र हि ब्रह्मगुणाति-
शयस्य वाङ्मनसागोचरतया ऽनवधिकत्वमुक्तं, सत्यसंकल्पत्वान्तर्भूता वशि-
त्वादिगुणा इति हि वक्ष्यते, अतः कस्मिंश्चिद् गुणे तद्विधाभेदरूपतया गुणानां
बहूनामन्तर्भावाभिप्रायो गण-शब्दः । नन्वनवधिकातिशयशब्दस्य गुण-
विशेषणत्वे गणशब्दसामानाधिकरण्याभावाद् बहुव्रीहिर्न स्यात् । गण-
विशेषणत्वमप्युक्तं गुणस्वरूपस्य ह्यनवधिकातिशयत्वं न तु गणस्वरूपस्य
नैवम् । गण एव विशेष्य इति बहुव्रीहिसिद्धिः तथाप्यर्थवशाद् गणान्तर्भूतैकैक-
गुणव्यक्तेरनवधिकातिशयत्वं फलितं स्यात् "यथैषा परिषदभिजनवती
श्रुतशीलशालिनी"त्यत्र श्रुतशीलादीनां परिषद्विशेषणत्वे प्रतीतेऽपि तद-
न्तर्भूतानामेव श्रुताद्यन्वयः, न तु समूहस्य ततो निर्गतानां श्रुताद्यभावप्र-
सङ्गात् । असंख्येयत्वमपि गणविशेषणं युक्तं, गणासंख्येयत्वे गुणासंख्येयत्वं
कैमुत्यसिद्धम् । अनवधिकातिशय-शब्देन नित्यसिद्धव्यावृत्तिश्च तद्गुणानां
जगद्व्यापाराननुगुणत्वेन भगवद्गुणापेक्षया सातिशयत्वात् तेषामीश्वरस्व-
गुणविभूतिसाक्षात्कारस्यात्यन्तानुकूलस्य निरवधिकातिशयत्वेऽपि तादृशासं-
ख्येयगुणाभावात्तद्व्यावृत्तिः । अनुषक्तेन "स्वभावत"इतिपदेन वा नित्यसिद्ध-
व्यावृत्तिः । तेषां तादृशगुणकत्वं हि भगवन्नित्येच्छाधीनं स्वरूपेणानवधिका-

Digitized by Google

तिशयत्वाच्च नित्यसिद्धव्यावृत्तिः ते[1]ष्वगुणस्वरूपा अतः स्वरूपस्या[2]नवधिकातिशयत्वं गर्भितम् । विभुत्वस्यापि गुणान्तर्भावित्वात् "बृहत्त्वं च स्वरूपेण गुणै"श्चेत्युपपा[3]दकमन्योक्तिः । "अभिधीयते" मुख्यया वृत्त्या बोध्यते । "अस्मिन् ग्रन्थे येनाक्षरं पुरुषं वेद सत्य"मिति श्रुतिश्चेतत्सूत्रानुवादिन्यनुसंहिता भवति तत्र हि "प्रोवाच तां तत्त्वतो ब्रह्मविद्यामि"ति पुरुषपर्यायतया ब्रह्मशब्दः प्रयुक्तः ।

मू॰ सर्वत्र बृहत्त्वगुणयोगेन हि ब्रह्मशब्दः, बृहत्त्वं च स्वरूपेण गुणैश्च यत्रानवधिकातिशयं सोऽस्य मुख्योर्थः ।

टी॰ एवं प्रतिज्ञातार्थं शब्दसामर्थ्यात् प्रथममुपपादयति "सर्वत्रे" त्यादिना । तत्रार्थान्तरेषु ब्रह्मशब्दप्रयोगस्यान्यथासिद्धिं विवक्षुस्तदुपयुक्तं गुणयोगं दर्शयति "सर्वत्रे"ति सर्वत्र–ब्रह्मशब्दप्रयोगविषयेषु बृहत्त्वगुणयोगोस्तीत्यर्थः । पुरुषोत्तमे गौणत्वमन्यत्र मुख्यत्वं च किन्न स्यादित्यत्राह "बृहत्त्वं"चेति बृहत्त्वगुणमात्रयोगिषु सर्वेषु ब्रह्म–शब्दाप्रयोगात् स्वरूपतो गुणतश्चानवधिकातिशयबृहत्त्वं प्रवृत्तिनिमित्तमित्यर्थः ।

ननु "बृहति बृंहयति तस्मादुच्यते परं ब्रह्म" "बृहत्त्वाद् बृंहणत्वाच्च तद्ब्रह्मेत्यभिधीयत" इति श्रुतिस्मृतिभ्यां बृहत्त्वबृंहणत्वे च प्रवृत्तिनिमित्ततयावगते कथमिह बृहत्त्वमात्रं निमित्तमुच्यते बृह[4]त्त्वे बृंहणत्वस्यान्तर्गतत्वादिति ब्रूमः "स चानन्त्याय कल्पत" इत्यादिश्रुतिप्रसिद्धसकलसंकोचनिवृत्तिपूर्वकनिरवधिकज्ञानविकासरूपानन्त्यावहत्वं हि बृंहणत्वं, तद्धि सकलहेयप्रत्यनीकत्वशान्तिकारुण्यादिमोक्षप्रदत्वौपयिकगुणगणात्त्वम् अतएव हि "स्वभावतो निरस्तनिखिलदोष" इत्यादिकं प्रतिज्ञावाक्येऽभिहितम् ।

---

१ गरुडविष्वक्सेनादयो नित्यभूतिस्थाः ।

२ रामानुजमते जीवानामणुरूपत्वेन भगवत्स्वरूपस्यानवधिकातिशयत्वं युक्तमिति तत्त्वम् ।

३ पूर्वग्रन्थार्थाभिधायकाविमभाष्यपङ्क्तिः ।

४ गुणतो बृहत्त्वे इति (ख) पु॰ पा॰ ।

ननु स्वरूपतो बृहत्त्वमेव निमित्तमस्तु किङ्गुणवत्त्वेनेति चेत् न। ब्रह्मगुणादेरपि स्वरूपेण बृहत्त्वाद् ब्रह्मशब्दवाच्यत्वप्रसङ्गात्। तर्हि गुणतो बृहत्त्वमेवास्तु निमित्तमिति चेच। शब्दशक्तेरसंकोचस्य स्वतः प्राप्तत्वात् स्वरूपेण च बृहत्त्वसद्भावात् "सत्यं ज्ञानमनन्तं ब्रह्मे"ति हि श्रुतिः

मू॰ स च सर्वेश्वरएव। अतो ब्रह्मशब्दस्तत्रैव मुख्यवृत्तः। तस्मादन्यत्र तद्गुणलेशयोगादौपचारिकः, अनेकार्थकल्पनायोगाद् भगवच्छब्दवत्। तापत्रयातुरैरमृतत्वाय स एव जिज्ञास्यः। अतः सर्वेश्वरो जिज्ञासाकर्मभूतं ब्रह्म।

टी॰ गुणतोबृहत्त्वञ्चाम सद्वारकबृहत्त्वं गुणद्वारा हि तत्स्वरूपेण गुणैश्च निरतिशयबृहत्त्ववद्वस्तु पुरुषोत्तमादन्यदपि स्यादन्यदेव वा स्यादित्यत्राह "स चे"ति चः शङ्कानिवृत्तौ सर्वेश्वरशब्देनैवकारेण च "तमीश्वराणां परमं महेश्वर"—"न तत्समश्चाभ्यधिकश्च दृश्यत"इति वाक्ययुगलार्थोविवक्षितः। ततः किं? मित्यत्राह "अत"इति अतः—अनवधिकातिशयबृहति ब्रह्मशब्दस्य मुख्यत्वात् सर्वेश्वरस्यैतादृशबृहत्त्वगुणयोगित्वाच्चेत्यर्थः। कथं तत्रैव मुख्यबृहत्त्वमन्यत्रापि हि ब्रह्मशब्दः प्रयुज्यत इत्यत्राह 'तस्मादि"ति तस्मात्—ब्रह्मणः। सर्वत्र मुख्यः कुतो न स्यादित्यत्राह "अनेकार्थे"ति। परस्माद् ब्रह्मणोन्यत्र प्रयोगस्यान्यथासिद्धत्वाच्च तत्र शक्तिकल्पनम्। "अनन्यथासिद्धः प्रयोगः शक्तिं कल्पयती"ति न्यायादित्यर्थः। अनेकशक्तिकल्पनं गौणत्वं वा न स्याद् बृहत्त्वगुणयोगिसर्वव्यक्तिष्वेकयैव शक्त्या मुख्यत्वसंभवादित्यत्राह "भगवच्छब्दवदि"ति तथाच श्रीमति वैष्णवे पुराणे भगवच्छब्दं प्रकृत्योक्तं "तत्र पूज्यपदार्थोक्तिपरिभाषासमन्वितः शब्दोयं नोपचारेण अन्यत्र ह्युपचारत"इति अनेन प्रस्तुतचोद्यस्य कः परिहार उक्तो भवति?। उच्यते बृहतिधातोर्मनिन्प्रत्ययान्तत्वेन निष्पन्नस्य ब्रह्मशब्दस्य प्रधानादिषु दृश्यमानः प्रयोगोनावयवशक्तिनिबन्धनः, तथा हि सति बृहन्महच्छब्दादिवदापेक्षिकबृहत्त्वयोगिषु सर्ववस्तुषु प्रयोगः

Digitized by Google

स्यान्न च तथा प्रयुज्यते, त्रसरेणुमपि हि ततोऽल्पिष्ठतयाभिमतद्रव्यान्तरापेक्षया महिमगुणशालीति वदन्ति

न च मशकादिषु ब्रह्मशब्दप्रयोगः ।

एवं सर्वत्र प्रयोगादर्शनात् पङ्कजशब्दव्यवस्थापककुमुदादिव्यावृत्ततामरसानुवृत्तपङ्कजत्वजातिवद् ब्रह्मशब्दप्रयोगविषये पञ्चस्वप्यनुवृत्तान्यव्यावृत्ताकारादर्शनादनेकशक्तिकल्पने प्राप्ते, अनन्यथासिद्धस्य प्रयोगस्य शक्तिकल्पकत्वाद् ब्रह्मशब्दप्रयोगविषयेष्वन्येषु च बृहत्त्वगुणलेशयोगेन प्रयोगस्यान्यथासिद्धत्वाच्च नानेकशक्तिकल्पनं युक्तम् । तस्मात्पुरुषोत्तमएव प्रवृत्तिनिमित्तपौष्कल्यवति मुख्यत्वम् । अन्यत्रौपचारिकत्वं च "औपचारिकस्तु प्रयोगः संकोचसहदृष्टः न तु सार्वत्रिक इति" तमिमं न्यायमभिप्रेत्य भगवच्छब्दस्य पुरुषोत्तमएव मुख्यत्वमन्यत्रामुख्यत्वं च भगवता पराशरेणोक्तम् । तथाहि ज्ञानादिमात्रं वा निरङ्कुशज्ञानादिकं वा भगवच्छब्दप्रवृत्तिनिमित्तमाद्ये पिपीलिकादावपि भगवच्छब्दः प्रयुज्येत, द्वितीये तु सर्वत्र निरवधिकज्ञानाद्यभावात् प्रवृत्तिनिमित्तासिद्धेर्नैकशक्त्या सर्वत्र मुख्यत्वम् । अनेकशक्तिकल्पनं चायुक्तं प्रयोगान्यथासिद्धेरिति भगवत्पराशराभिप्रायः ।

ननु "उत्पत्तिं प्रलयं चैव भूतानामगतिं गतिं वेत्ति विद्यामविद्यां च स वाच्यो भगवानि"ति अन्योक्तेष्वौपचारिकभगवच्छब्दप्रयोगयोग्येषु यदलौकिकार्थसाक्षात्कारित्वमस्ति तदेव प्रवृत्तिनिमित्तीकृत्य भगवच्छब्दः सर्वत्रायं मुख्यः स्यात् । नैवम् । अलौकिकार्थसाक्षात्कारमात्रस्य प्रयोगाविषयव्यावृत्तत्वाभावाच्च हि समाधिपर्यन्तयोगकाष्ठानिष्ठेषु केशिध्वज-खाण्डिक्य-प्रह्लादादिषु भगवच्छब्दः प्रयुज्यते । किंच प्रत्यक्षमूलव्युत्पत्त्या गवादिशब्दानामिवागममूलव्युत्पत्त्या समग्रषाड्गुण्यादिमत्त्येव तस्य मुख्यत्वावगमात् "ज्ञानशक्तिबलैश्वर्यवीर्यतेजांस्यशेषतः भगवच्छब्दवाच्यानि विना हेयैर्गुणादिभि"रिति निर्दोषत्वपर्यन्तानां ज्ञानादीनां प्रवृत्तिनिमित्ततया वाच्यत्वमुच्यते, निर्दोषत्वं च निमित्ततया वाच्यत्वेनोच्यते अन्यथा तदुक्तिवैयर्थ्यात् न ह्यवाच्यं सर्वं निषेद्धव्यमनुक्त्यैव ह्यवाच्यत्वं सिद्ध्यति ।

१ षाड्गुण्यादिमति इति (ख) पु॰ पा॰

न च ज्ञानशक्त्यादिष्वेकैकस्य प्रवृत्तिनिमित्तत्वं किंतु ज्ञानादिसमुदायस्यैव अन्यथा अशेषतइति षड्वैश्वर्यादेरैश्वर्यस्य समग्रस्येत्युक्तत्वात् गवादिष्वतिप्रसङ्गभयाच्च प्रकर्षविशेषवतां ज्ञानादीनां समुदायस्य प्रवृत्तिनिमित्तत्वमुक्तमित्यभ्युपेयम् एवं न्यायसिद्धार्थस्यागमसिद्धार्थाभाष्ये दृष्टान्तीकृतः "भगवच्छब्दवदि"ति तथा भगवता पाराशर्येण "परं जैमिनिर्मुख्यत्वात्" "स्याच्चैकस्य ब्रह्मशब्दव" दित्यादि सूत्रेषु ब्रह्मशब्दस्य भगवत्येव मुख्यत्वमुक्तत्रोक्तम् । अतो यथोक्तएवार्थः तथाच स्पष्टीकृतं श्रीमति गारुडे पुराणे "वेदे भूरिप्रयोगाच्च गुणयोगाच्च शार्ङ्गिणि । तस्मिन्नेव ब्रह्मशब्दो मुख्यवृत्तो महामुने" इत्यारभ्य "यस्मिन् प्रयुज्यमाने तु गुणयोगः सुपुष्कलः । तत्रैव मुख्यवृत्तोयमन्यत्र ह्युपचारतः" इत्येवं शब्दसामर्थ्यमुपपादितम् । अथ ब्रह्मशब्दस्यानेकार्थमुख्यवृत्तत्वेप्येतत्सूत्रस्थस्य तस्यार्थस्वाभाव्यात् पुरुषोत्तमपरत्वमुच्यते । 'तापत्रयातुरै'रिति "स एवामृतत्वाये"ति पदे "स्तमेवं विद्वानमृत इह भवति" "नान्यः पन्था" इत्यादिश्रुत्यर्थोविवक्षितः । अतएव हि "पुरुषोत्तमोभिधीयते" इत्युक्तं श्रुतेरपि पूर्वोक्तहेयप्रत्यनीकत्वकल्याणगुणाकरत्वविशिष्टएव तापत्रयातुरैरुपास्यः, न तु तेष्वन्यतम इति भावः न हि कारागारनिगलि[1]तएव तन्मोचनार्थिभिरभ्यर्थनीयः तथाच वैष्णवे पुराणे निर्दोषकल्याणगुणाकरस्यैव मुमुक्षूपास्यत्वमुक्तं "स सर्वभूतप्रकृतिं विकारान् समस्तकल्याणगुणात्मकोसा" वित्यादिना तज्ज्ञानमज्ञानमतोन्यदुक्तमित्यन्तेन, ब्रह्म–शब्दव्याख्यानं निगमयति अतो–निर्दोषमङ्गलगुणाकरस्य सर्वेश्वरस्यैव तापत्रयातुरैर्जिज्ञास्यत्वादत्र तापत्रयातुरजिज्ञास्यतयोक्तं ब्रह्म–सर्वेश्वरएवेत्यर्थः । यद्वा "अतः"–उक्तशब्दसामर्थ्यादर्थसामर्थ्याच्चेत्यर्थः ।

ननु ब्रह्मशब्दो व्युत्पन्नोऽव्युत्पन्नो वा भगवति मुख्यः ? अव्युत्पन्नत्वे बोधकत्वविरहिणस्तस्य न क्वचिन्मुख्यत्वम् । नापि व्युत्पन्नः स मुख्यः, अलौकिकेर्थे व्युत्पत्त्यसंभवात् कथमप्रतीति व्यवहाराविषये बुद्धिपूर्विका यादृच्छि-

१ निगडित इति तु साधु ।

कौ च व्युत्पत्तिः संभवति । उच्यते । यथा कामिनीचन्दनभवनादिषु प्रयोगेण सुखविषयतया व्युत्पन्नस्य स्वर्गशब्दस्य "यस्मिन्नोष्ण"मित्याद्यर्थवादपदसमभिव्याहारेणालौकिकसुखविशेषविषयतया व्युत्पत्तिः । यथा लोके क्वचिदप्यव्युत्पन्नत्वेपि यूपाहवनीय-स्रुव-कपाल-चषाल-चात्वालादिशब्दानां वाक्यान्तरपदान्तरसमभिव्याहारात्तत्तदर्थविषयतया व्युत्पत्तिः । एवं ब्रह्मात्मेत्यादिशब्दानां लोके केषुचिदर्थेषु प्रयोगाद् व्युत्पत्तौ सत्यामसत्यामपि । "यतो वा इमानि भूतानि जायन्ते" "सत्यं ज्ञानमनन्तं ब्रह्मे"त्यादिप्रसिद्धार्थवाक्यान्तरपदान्तरसमभिहारात् अलौकिकपरमात्मविषयत्वव्युत्पत्तिरुपपद्यते अतो ब्रह्मशब्दस्योक्तरीत्या भगवत्येव मुख्यवृत्तत्वं युक्तम् ।

अथ जिज्ञासा—शब्दस्य व्याख्येयत्वस्फोरणाय प्रकृतिप्रत्ययविभागं दर्शयति—

मू० ज्ञातुमिच्छा—जिज्ञासा इच्छायाइष्यमाणप्रधानत्वादिष्यमाणं ज्ञानमिह विधीयते ।

टी० "ज्ञातुमिच्छा जिज्ञासे"ति विषयवैलक्षण्याधीनाया इच्छायाः कथं विधेयत्व?मित्यत्राह । 'इच्छाया'इति । ज्ञानस्य विधानार्हतामाह "इष्यमाणप्रधानत्वादि"ति सन्वाच्याया इच्छाया धात्वर्थः कर्म, कर्मणश्च क्रिया शेषभूता तत्सिद्ध्यर्थत्वात्तस्याः, यथा यागीयव्रीह्यादेः प्रोक्षणादिः । कर्त्तुः क्रियया आप्तुमिष्टतमत्वं हि कर्मत्वम् । अतः प्रकृत्यर्थभूतज्ञानकर्मिकेच्छा तत्सिद्ध्यर्था अत इच्छाया इष्यमाणज्ञानप्रधानत्वाद् इष्यमाणं ज्ञानं विधेयमित्यर्थः । जिज्ञासायाः कर्त्तव्यत्वे प्रतीयमाने ज्ञानस्य कथं विधेयत्वम्? । उच्यते । यथा स्नात्वा भुञ्जीत प्राङ्मुखोभुञ्जीतेत्यत्र भुजिधातोर्विधिप्रत्ययान्तत्वाद् भोजनस्य कर्तव्यत्वे प्रतीतेपि स्नानप्राङ्मुख्यनियमयोरेव विधेस्तात्पर्यमित्यर्थस्वभावादभ्युपगम्यते, तयोरप्राप्तत्वात् "अप्राप्ते हि शास्त्रमर्थवत्"तत्र भोजनं चान्यतः प्राप्तमनूद्यते एवमिच्छाया विधेयत्वासंभवात् तद्विषयभूतं विचारात्मकं ज्ञानमेव तात्पर्यतो विधीयते । "इष्यमाणं ज्ञानमिहाभिप्रेत"मिति हि सारे[१] ऽभिहितं । सनन्तनिर्देशश्च

---

१ श्रीरामानुजाचार्यैः श्रीभाष्यतः प्रथमं प्रणीतो वेदार्थसंग्रहोनाम शङ्करयादवभास्करमतपर्यनिराकरणपरो ग्रन्थः सारपदेनाभिमत इति भाति ।

Digitized by Google

“निदिध्यासितव्यः” “विजिज्ञासितव्यः” “तद्विजिज्ञासस्वे”त्यादिश्रुत्यनुसारेण क्रियते श्रुतिश्च उपायदशाप्रभृति भगवज्ज्ञानस्य प्रीतिरूपत्वेन इच्छाविषयत्वात्तथा निर्दिशति । यद्वा “ब्रह्मजिज्ञासे”ति सनन्तनिर्देशो विचारस्य रागप्राप्तत्वज्ञापनार्थः । एवमेव धर्मजिज्ञासेत्यत्रापि । अत्र तर्करूपं ज्ञानं विधेयं तर्कानुगृहीतवाक्यजन्यप्रमितिरूपज्ञानं तु फलत्वान्न विधेयं प्रमितिरूपं विधेयं तर्करूपं ज्ञानमार्थमित्यपि परेहृतम् । फलत्वोक्तं विचारमाक्षिपतीति ततोऽपि प्रागुक्तपक्षः साधीयान् वेदान्तार्थविचारात्मकन्यायनिबन्धरूपं हि शास्त्रं ब्रह्ममीमांसेति प्रसिद्धिः, प्रमितिश्च फलम् । अतएव हि ब्रह्मविचारः कर्तव्य इति भाष्ये वक्ष्यते । सनन्तस्यास्य ज्ञा—धातोः ज्ञानसामान्यवाचिनो विशेषाकाङ्क्षायां समुचितविशेषपर्यवसानं हि न्याय्यं ब्रह्मणो जिज्ञासा कर्तव्या न तु कपिलसुगताद्यभिमतानां प्रधानादितत्त्वानामिति ज्ञातव्यविशेषनिर्णयपरं सूत्रं व्याख्यातं यादवप्रकाशाचार्यैः, तद्व्यावृत्त्यर्थमिह—शब्दः, इह—अस्मिन्नुपक्रमसूत्र इत्यर्थः । ब्रह्मणो जिज्ञास्यत्वमात्रे सिद्धे हि तस्यैव जिज्ञास्यत्वसिद्धिः, न चोभयं सूत्रप्रतिपाद्यं ब्रह्म जिज्ञास्यमेव ब्रह्मैव जिज्ञास्यमिति वाक्यभेदप्रसङ्गात् ।

ननु ब्रह्मणो मुमुक्षुभिर्नियमेन जिज्ञास्यत्वं तन्त्रान्तरसिद्धानां प्रधानादीनाम् अजिज्ञास्यत्वेन विना न सिद्ध्यतीति, ब्रह्मजिज्ञास्यत्वसमर्थने प्रधानादेरजिज्ञास्यत्वसमर्थनमर्थादापततीति न वाक्यभेदप्रसङ्ग इति चेत् न । अधीतक्रमेण वेदार्थे निरूप्यमाणे पूर्वभागविचारानन्तरमुत्तरभागविचारस्य प्रधानादिनिरासनिरपेक्षत्वात्, न ह्येकस्य प्रबन्धस्यैकदेशे निरूपिते तदेकदेशान्तरनिरूपणस्य प्रबन्धान्तरप्रमेयनिराससापेक्षता भवति, न हि पूर्वषट्के निरूपिते उत्तरषट्कनिरूपणं कपिलसुगतादिमतव्युदासेन विना न संभवति, यदि वेदान्तार्थस्य अद्धा द्रढिम्ने तदितरपक्षनिरसनमपेक्षितमिह क्रियत इति मतं, तदनुपपन्नं कृतकरत्वप्रसङ्गात् । एतदुक्तं भवति इह प्रधानादीनामजिज्ञास्यत्वं किं वेदान्तानामतत्परत्वोपपादनेन समर्थ्यते ? उत कपिलसुगताद्यागमाप्रामाण्यतत्प्रमेयदोषस्यप्रतिपादनेन समर्थ्यते ? न प्रथमः, ईक्षत्यधि-

करणादिभिर्वेदान्तानामतत्परत्वस्य वक्ष्यमाणतयात्र वक्तव्यत्वाभावात् न द्वितीयः वेदविरुद्धस्मृतीनामप्रामाण्यस्य पूर्वमीमांसायामेव समर्थितत्वात् सांख्यसौगताद्यभिमतप्रमेयदोषस्य तर्कपादे प्रतिपादयिष्यमाणत्वात् । "विप्रतिषेधाच्चासमञ्जसम्"[1] "इतरेषां चानुपलब्धेः"[2] "एतेन योगः प्रत्युक्तः"[3] "उदासीनानामपि चैवं सिद्धिः"[4] "अन्त्यावस्थितेश्चोभयनित्यत्वादविशेषः"[5] इत्यादिभिः सूत्रैस्तदुक्तमोक्षतदुपायनिरासस्यापि करिष्यमाणतया चात्र वक्तव्यत्वाभावात् । किंच "एतेन सर्वे व्याख्याता व्याख्याता"-इत्यत्र । "अनावृत्तिः शब्दादनावृत्तिः शब्दा"दिति शास्त्रान्ते च सूत्राभ्यासफलमनुक्तांशज्ञापनम् । अनुक्तांशश्च सांख्ययोगावगमतइति वदतां मोक्षस्य सांख्ययोगसमुच्चयसापेक्षत्वं च प्रतिपादयतां सौगतादिवत् सांख्यादिनिरासेन शारीरकस्यैवारम्भणीयत्वप्रतिज्ञानमिति च व्याहतं सांख्ययोगयोर्विरुद्धांशाभिप्रायमनादरणीयत्वकथनमिति चेन्न । विरुद्धांशानादरणीयत्वस्य विरोधाधिकरणन्यायसिद्धत्वादेव, अतोऽयादवप्रकाशकृतं सूत्रतात्पर्यवर्णनमनुपपन्नमितीह—शब्दाभिप्रायः । "विधीयत"इति अज्ञातज्ञापनं विधिरिह विवक्षितम्, नत्वप्रवृत्तप्रवर्त्तनं रागतः प्रवृत्तेर्वक्ष्यमाणत्वात् । रागतःप्रवृत्तस्यापि पूर्वपक्षयुक्त्यानारम्भणीयताबुद्धौ सत्यामारम्भणीत्वज्ञापनमज्ञातज्ञापनम् अतोविधीयत—इत्यस्य स्वयमेव प्रवर्त्ततइति वक्ष्यमाणग्रन्थेनाविरोधः । इत्थं पदार्थोव्याख्याताः ।

सू० मीमांसापूर्वभागज्ञातस्य कर्मणोऽल्पास्थिरफलत्वादुपरितनभागावसेयस्य ब्रह्मज्ञानस्यानन्ताक्षयफलत्वाच्च, पूर्ववृत्तात्कर्मज्ञानादनन्तरं तत एव हेतोर्ब्रह्म ज्ञातव्यमित्युक्तं भवति । तदाह वृत्तिकारः—"वृत्तात्कर्माधिगमादनन्तरं ब्रह्मविविदिषे"ति ।

(शेषमग्रे)

---

१ २ अ० २ पा० १० सू०　२ २ अ० १ पा० २ सू०　३ २ अ० १ पा० ३ सू०
४ २ अ० २ पा० २७ सू०　५ २ अ० २ पा० ३६ सू०

॥ माधवीयधातुवृत्तिः ॥

(*Continued from page* 160. Vol. VII.)

कदि क्रदि क्लदि वैक्लव्ये ॥ अत्र क्षीरस्वाम्येवं पठित्वाह । वैक्लव्य इति चन्द्रः । कद क्रद क्लदेति नन्दी अनिदितमाह । मैत्रेयस्तु कदि क्रदी द्वाविदितौ पठित्वा क्लदक्लदेति द्वावनिदितावाह । तत्रेदितोन्त्यः सरेफः आद्यो नीरेफः अनिदितोरन्त्यादाद्यः सरेफः । अपरो लकारवान् । वर्द्धमानेऽपि मैत्रेयवल्लकारवन्तमिदितं चापठत् यदाह । प्रथिक्रन्दिक्लन्दिस्यन्दीनां घटादौ पाठः चिण्णमुलोर्वृद्ध्यर्थ इति । अत्र कदिक्रदिक्लदीनामाह्वानरोदनयोः परस्मैपदिषु गतानां पुनरिहापि पाठो न केवलमित्त्वार्थः किं त्वात्मनेपदिषु पाठसामर्थ्यात्तदर्थमपि । कन्दते । चकन्दे । कन्दिता । चिकन्दिषते । चाकन्द्यते । चाकन्ति । कन्दयति । अचकन्दत् । अकान्दि अकन्दि । कन्दं कन्दम् । कान्दंकान्दमित्यादि । ज्वलितवत् । मित्त्वसामर्थ्यादनुपधायामपि दीर्घविकल्पः । एवं क्रन्दते । क्रन्दतइत्यादि । अनिदित्पाठे कदयति । अकादीत्यादि । एवं क्लदते क्लदतइत्यादि । कदनं कन्दलः । बाहुलकादलः । कदली । गौरादित्वान्ङीष् ॥ ८३० ॥

ञित्वरा संभ्रमे ॥ त्वरते । तत्वरे । त्वरिता । तित्वरिषते । तात्वर्यते । तातूर्ति । तातूर्त्तः । तातरीषि । तातूर्षि । तातूर्थः । तात्वरीमि । तातूर्मि । ज्वरत्वरेत्युपधावकारयोः ऊठ् झलादावनुनासिकादौ च झलि क्ङिति ऊठ् । लोटि हेरपित्त्वान्ङित्त्वादूठि तातूर्हि । त्वरयति । अतत्वरत् अत् स्मृदृत्वरेत्यभ्यासस्यात्वम् । इत्त्वापवादः । अत्वारि । अत्वारि । त्वरंत्वरम् । त्वारंत्वारम् । तूर्णः । त्वरितः । रुष्यमत्वरेति निष्ठायामिड्विकल्पः । अस्यादित्त्वमात्मनेपदमात्रफलमिति मैत्रेयहरदत्तादयः । अन्ये त्वादित्त्वं यङ्लुकोडभावार्थमाहुः । नहि तत्र रुष्यमत्वरेतीड्विकल्पः । एकाच इति तत्रानुवर्त्तनादिति । तेषामयमभिप्रायः । 'आदितश्चे'त्यत्राव्यभिचारादेजकायहणं न संगच्छते । न चावयवे ऽचरितार्थमादित्त्वं यङ्लुगन्तार्थमपि स्यात् तस्यधात्वन्तरत्वात् । त्वरतेरादित्त्वं नावयवे चार-

तार्थमिति सामर्थ्याद्यङ्लुगन्तार्थमिति । मैवम् । प्रयोजनकल्पनायामय-
मेव प्रकार इति नियमाभावात् । यद्वादित्वसामर्थ्यादिड्विकल्पेनैकाजिति
संबध्यते तेन तत्र त्वयिदृशं यङ्लुगर्थे प्रकृतौ त्वादित्वात्प्रतिषेध
एवेति वक्तुं शक्यते । एवं हि आदित्वं प्रकृत्यर्थमेव भवति । तस्मान्मैत्रे-
याद्युक्तमेव न्यायः । तूः । तूरौ । ज्वरत्वरेत्यूठ् । घटादयः षितः उदात्ता
अनुदात्तेतः । षित्फलमङुदाहृतः ॥ ७३१ ॥

एवमात्मनेपदिनः समाप्य परस्मैपदिन आह । ज्वर रोगे ॥ एतदा-
दयः फणान्ता उदात्ता उदात्तेतः । ज्वरति । जज्वार । ज्वरिष्यति ।
ज्वरतु । अज्वरत् । ज्वरेत् । ज्वर्यात् । अज्वारीत् । 'अतो ल्रान्तस्ये'ति
वृद्धिः । जिज्वरिषति । जीज्वर्यते । जाजूर्त्ति । जाजूर्त्तः । ज्वरयति ।
अजिज्वरत् । अजज्वर् । अजज्वारि । इत्यादि । ज्वरितः । जूः । जूरौ ।
जूरः । ज्वरत्वरेत्यूठ् । संज्वारी । संपृचेति घिनुण् । रुजार्थानामित्यत्र अज्व-
रेरिति वचनात् कर्मणि षष्ठी न भवति । चौरं ज्वरयति रोगः ॥ ७३२ ॥

गड सेचने ॥ गडति । जगाड । गडिता । जिगडिषति । जागड्यते ।
जागड्डि । गडयति । अजीगडत् । अगाडीत्यादि । गडुरस्यास्तीति
गडुलः । 'सिध्मादिभ्यश्चे'ति लच् । अत्रैव पाठात् बाहुलकात् वा
उप्रत्ययः । गडुली । गौरादित्वात् ङीष् । कण्ठे गडुरस्य गडुकण्ठः ।
सप्तम्याः पूर्वनिपाते गड्वादेः परवचनमित्युक्तत्वात् सप्तम्यन्तस्य पूर्वप्र-
योगो न भवति । अत्र वृत्तिः । कथं वह्नेगडुरिति प्राप्तस्य चाबाधो ऽन्वाख्येय
इति । अमूर्द्धमस्तकादिति अलुक् । गण्डतीति वदनैकदेशे गतम् ॥ ७३३ ॥

हेड वेष्टने ॥ हेड् अनादरइति आत्मनेपदिषु गतः, तस्य परस्मै-
पदिषु अनुवादसामर्थ्यात् परस्मैपदमपि भवति । अन्यथा घटादयः
षित इत्यस्यानन्तरं परस्मैपदिभ्यो ज्वरादिभ्यः पूर्वमेवात्मनेपदिन एवानु-
वदेत् । इहायमनृदित् पठ्यते पूर्ववदिति धात्वन्तरं नाशङ्क्यम् । यतः
इदितोनुवादेपि मित्वात् ह्रस्वत्वेन भाव्यमिति उत्सृष्टानुबन्धोयमनुवादः ।
हेडति । जिहेड । हेडिता । जिहेडिषति । हिडयति । अजीहिडत् । अत्र

Digitized by Google

मितां ह्रस्वो भवन् 'एच इग्घ्रस्वादेशे' इति नियमात् आन्तरतम्यादिकार एव ह्रस्वो भवति । अत एव ह्रस्वविधानसामर्थ्यात्पुनर्गुणो न भवति । अहिडि । अहीडीत्यादि । चिण्णमुलोर्दीर्घविकल्पे ऽसिद्धवदत्रेति ह्रस्वत्वे नासिद्धत्वं व्याश्रयत्वाण्णिमात्राश्रयो दीर्घविकल्पः । एवमाद्यर्थं हि मत्ता-दिग्रहणमन्यथा ह्रस्व एव विकल्प्येत । अनादरार्थस्य हेडयति ॥ ७३४ ॥

वट भट परिभाषणे ॥ वठ वेष्टने ॥ भट भृताविति पठितयोः परि-भाषणे मित्त्वार्थोऽयमनुवादः । वटयति । भटयति । अवटि । अवाटि । अभटि । अभाटि । अत्र पुरुषकारे वठेत्यादिबहुषु दृश्यते इति ॥ ७३५ ॥

नट नृत्तौ । पूर्वत्र नृतिर्नाट्यमित्युक्तत्वात् इह नृत्तिशब्देन नता-न्योर्थो नृत्तनृत्यलक्षणः चलनादिलक्षणश्चोच्यते । अत्र मैत्रेयः । गता-वित्येके । नतावित्येके । स्वामी च नताविति पठित्वा नटयति शाखा-मित्युदाहृत्य नृत्तौ नाटयतीति । नटयति । अनटीत्यादि । अयं णोप-देश इति प्रागुक्तम् ॥ ७३६ ॥

ष्टक प्रतिघाते ॥ स्तकति । तस्ताक । स्तकिता । तिस्तकिषति । तास्तक्यते । तास्तक्ति । स्तकयति । अतिष्टकत् । अस्तकि । अस्ताकि । अत्र दन्त्यादिरपि क्वचित्पठ्यते । तत् षोपदेशलक्षणविरुद्धम् ॥ ७३७ ॥

चक तृप्तौ ॥ चकति । चचाक । चकिता । अचकीत् । अचाकी-त् । चकयति । अचीचकत् । अचकि । अचाकि । अस्यात्मनेपदिषु पठि-तस्यास्य परस्मैपदिष्वनुवादात्परस्मैपदं हेडतिवत् । अत्र स्वामी । अयं तृप्तिप्रतिघातयोः पूर्वं पठितः तृप्तिमाचरत्यर्थपाठं व्यत्यास्यत् । शाक-टायनस्तूभयत्रोभयार्थत्वमाह । धनपालस्तु पुनर्यथास्वामि पठित्वा पूर्वं पठितस्यायमनुवाद इति आत्मनेपदमुदाजहार । तन्मते परस्मैपदिष्व-नुवादो व्यर्थः स्यात् ॥ ७३८ ॥

कखे हसने ॥ कखति । चकाख । चकखतुः । कखिता । अक-खीत् । एदित्वाद्वृद्ध्यभावः । चिकखिषति । चाकख्यते । चाकक्ति । कखयति । अचीकखत् । अकखि । अकाखीत्यादि ॥ ७३९ ॥

रगे शङ्कायाम् ॥ लगे सङ्गे ॥ रगति । लगतीत्यादि कखिवत् । लग्नः । क्षुब्धस्वान्तेति अनिट्त्वं निष्ठायां निपात्यते । अन्यत्र लगितम् । रगतिलगती गत्यर्थेषु गतौ ॥ ७४१ ॥

ह्रगे ह्लगे षगे ष्ठगे संवरणे ॥ ह्रग चित्कोशे स्थगे इति दन्त्यादिरपि पठ्यते । तत् षोपदेशलक्षणविरुद्धम् । ह्रगति । जह्राग । अह्रगीत् । जिह्रगिषति । जाह्रग्यते । जाह्रक्ति । ह्रगयति । अजिह्रगत् । अह्रागि । अह्रगि । एवं ह्लगतीत्यादि । सगति । ससाग । सेगतुः । सेगुः । आदेशादित्वमनैमित्तिकं न तु लिण्निमित्तमिति एत्वाभ्यासलोपौ । असगीत् । सिसगिषति । सासग्यते । सासक्ति । सगयति ।असीसगत् । असगि । असागि, इति । स्थगति । तस्थाग । स्थगिता । अस्थागीत् । तिस्थगिषति । तास्थग्यते । तास्थक्ति । स्थगयति । अतिस्थगत् । अस्थागीत्यादि ॥ ७४५ ॥

कगे नोच्यते ॥ अत्र मैत्रेयः । अस्यायमर्थ इति नोच्यते । क्रियासामान्यमर्थ इत्यर्थः । इह शास्त्रे कगे नोच्यते इत्येके । इह स्वामी तु अस्यायमर्थ इति नोच्यते । अनेकार्थत्वात् इति नोच्यतइति योर्थस्तत्रार्थे कगे इत्येके । कगेत्युक्तत्वात्क्रियासामान्यमस्यार्थ इत्याहान्ते । कगतीत्यादि । कखादयो उष्टावेदितः ॥ ७४६ ॥

अक अग कुटिलायां गतौ ॥ अकति । आक । अकिता । मा भवानकीत् । अचिकिषति । अकयति । मा भवानचकत् । माभवानकि । माभवानाकीत्यादि । अङ्कतइति लक्षणार्थे गतः । अगतीत्यादि । अकिवत् । अङ्गतीति गतौ गतम् ॥ ७४८ ॥

कण रण गतौ ॥ कणयतीत्यादि ॥ ७५० ॥

चण शण श्रण दाने च । चणिश्रणोश्चोरादिकयोर्हेतुमण्णिचोभावात् स्वार्थे तु णौ नान्ये मितौ हेताविति मित्त्वनिषेधाच्च तयोरिमावनुवादाविति धात्वन्तरावेतौ । चणति । चचाण । चेणतुः । चणिता । अचणीत् । अचाणीत् । चिचणिषति । चञ्चण्यते । चञ्चण्ति । चञ्चणः । चणयति । अचीचणत् ।

अचखि । अचाखि । इत्यादि । एवं भखति । भखतीत्यादि । भख गता-
वित्यन्ये । अत्यो तालव्यादी ॥ ७५३ ॥

श्रथ क्रथ क्लथ हिंसार्थाः । श्रथति । शश्राथ । श्रथिता । शिश्रथि-
षति । शाश्रथ्यते । शाश्रत्ति । श्राथयति । अशिश्रथत् । अश्रथि । अश्राथि ।
एवं क्रथति । क्लथति । क्रथेस्तु जासिनिप्रहणनाटक्राथेतिनिर्देशान्मित्त्वेपि
वृद्धिरिति वृत्तितद्व्याख्यानेषु । तेन क्राथयति चोरस्येति भवति । मित्त्वफलं
तु अक्रथि अक्राथीत्यादौ चिण्णमुलोरिति दीर्घविकल्पः । तथा जासिनीत्यत्र
हरदत्तः । घटादिपाठस्तु घटादयः षित इत्यातिदेशिको ऽन्यथा स्यात्
चिण्णमुलोरिति दीर्घविकल्पश्च यथा स्यादिति । ननु घटादयः षित इति
मध्ये सूत्रणात्पूर्वेषामेव मित्त्वेन परेषामपि कथं षित्त्वमुक्तम् । सत्यम् । अत
एवाक्लिापरितुष्यन् स्वयमेव दीर्घविकल्पं प्रयोजनमाह । एवं च दीर्घ-
विकल्पश्चेति चशब्दो वार्थो व्याख्येयः । अत्र न्यासे क्राथीति विकृतनिर्देशस्य
प्रयोजनं मित्त्वेपि वृद्धिः । तत्रैव षष्ठीत्युक्त्वा वक्ष्यन्ते वृद्धभावाच्चोरमचि-
क्रथदित्युक्तम् । तत्र शेषाधिकारात्पुनः समासनिवृत्तये पुनः शेषे षष्ठीवि-
धानमिति शेषविवक्षायां षष्ठी कुर्वाणा कर्मविवक्षायां द्वितीया स्वतः
सिद्धेति नेदं प्रयोजनम् । क्रथहिंसायामिति युजादौ स्वरितेदिति देवः ।
अयमात्मनेपदीति शाकटायनः । जासिनीत्यत्र क्राथीति निपातनाद्वृद्धिरिति
वदतां वृत्तिकारादीनां नायं धातुरेवास्ति ॥ ७५७ ॥

चन च ॥ हिंसायामितिशेषः । चनति । चनयति । अचनि ।
अचानि ॥ ७५८ ॥

वनु च नोपलभ्यते । न केवलं कगे यावता वनु च नोच्यत इति
स्वामिनोच्यत इति गतौ व्याख्यातम् । उदित्करणसामर्थ्यादयमन्यो धातुः
न तानादिकस्यायमनुवादः, क्रियासामान्ये मित्त्वमात्रार्थे ह्यनुवादादिति
तानादिकएवानुवादः न पुनः शब्दार्थः संभक्त्यार्थो वा । गतौ वनतिरिति
कोयं नियमः । तेन क्रियासामान्येपि वनतीत्यादि भवति । अस्योदित्त्वा-
द्वात्त्ववगतिः वान्तमिति । इदं च मित्त्वं म्लाज्ञावनुवमां चेत्यनुपक्रष्टानां

विकल्पस्य वक्ष्यमाणत्वात्सोपसर्गार्थं, प्रवनयति । प्रावीवनत् । प्रावनि । प्रावानीत्यादि ॥ ७५९ ॥

ज्वल दीप्तौ ॥ ज्वलदीप्ताविति पठिष्यते तस्य मित्त्वार्थोऽयमनुवादः । इदमपि मित्त्वं सोपसर्गविषयं, 'ज्वलह्वलह्मलनमामनुपसर्गाद्वे'ति अनुपसृष्टानां विकल्पस्य वक्ष्यमाणत्वात् । प्रज्वलयति । प्राज्वालि । प्रज्वलीत्यादि ॥ ७६० ॥

ह्वल ह्मल चलने ॥ इमौ च सोपसर्गावेव नित्यं मित्त्वं प्रयोजयतः । ज्वलतिवदनुपसृष्टयोर्विकल्पस्य वक्ष्यमाणत्वात् । ह्वलति । जह्वाल । ह्वलिता । अह्वालीत् । अतो ल्रान्तस्येति नित्यं वृद्धिः । जिह्वलिषति । जाह्वल्यते । जाह्वल्ति । विह्वलयति । व्यह्वलि । व्यह्वालीत्यादि । एवं ह्मलतीत्यादि । किंह्वलयतीत्यत्र 'यवलपरे यवला वा' इति यवलपरे हकारे परे मकारस्य पक्षे यवलविधानात्सानुनासिको वकार उदाहार्यः । किंह्मलति । किंह्मलयतीत्यत्र 'हे मपरे वे'ति मकारपरे हकारे परे मकारस्य पक्षे मकारविधानान्मकारोऽप्युदाहार्यः ॥ ७६२ ॥

स्मृ आध्याने ॥ स्मृ चिन्तायामित्यस्याध्याने मित्त्वार्थोऽनुवादः । आध्यानमुत्कण्ठापूर्वकं स्मरणम् । मातुः स्मरति । मातुः स्मरयति । अस्मरि । अस्मारि । अनाध्याने स्मारयति । अधीगर्थेति कर्मणि षष्ठी । अधीगर्थाः स्मरणार्था इत्युक्तम् ॥ ७६३ ॥

दॄ भये । अत्र देवधनपालपूर्णचन्द्रा अमुं धात्वन्तरमाहुः । मैत्रेयस्तु दॄ विदारण इति क्र्यादिः, तस्य मित्त्वार्थं पाठः । वृणान्तं प्रयुङ्क्ते दरयति । भयादन्यत्र दारयति । धात्वन्तराभ्युपगमे दरतीत्येके इति क्षीरस्वामी । पुनर्दरतीत्यदाहृत्य क्र्यादिकस्यैव मित्त्वार्थमिहानुवाद इत्येकइत्याह । तत्राभरणकारो ऽमुं ह्रस्वान्तधात्वन्तरं पठित्वा ऋतश्चृहृस्वेत्यत्रापि ह्रस्वान्तं पठन् णौ चङि अददरदित्युदाजहार । तदसत् । तत्र दीर्घान्तपाठस्याविगीतत्वात् दॄ विदारण इति व्याख्यातृभिरुपादानाच्च । किं च ह्रस्वान्ताभ्युपगमे शॄदॄप्रां ह्रस्वो वेति दॄणातेर्विकल्पेन ह्रस्वविधानमनर्थकं स्यात्, यतः ह्रस्वान्तादस्मात् लिटि ह्रिदद्रतुरिति यणादेशे सिध्यति

विददरतुरिति च वृणातेर्ऋच्छत्यृतामिति गुणे। न च विदारणे रूपद्वयार्थं ह्रस्वविकल्पनं स्यादिति वाच्यम् । धातूनामनेकार्थत्वेन अस्यापि विदारणे वृत्तिसंभवात् । तथा च शृणातेः तत्र विशशरतुरिति भविष्यति विशश्रतुरिति श्रापाक इत्यस्य । न चार्थभेदो, धातूनामनेकार्थत्वादिति अवश्यं प्रत्याख्याय ह्रस्वार्थमुक्तम् ॥ ७६४ ॥

नॄ नये ॥ नरयति । अनरि । अनारीत्यादि । अन्यत्र नारयति । मैत्रेयस्तु नामुमिच्छति यदाह नॄ नय इत्यप्येके इति ॥ ७६५ ॥

श्रा पाके ॥ श्रै पाक इत्यस्य कृतात्वस्य तस्य श्रा इत्यादादिकस्य च सामान्येनेदमनुकरणं, लुग्विकरणालुग्विकरणयोरिति ज्ञायते, लक्षणप्रतिपदोक्तयोरिति आतेः । अत्र सर्वत्र पाको विक्लित्तिरिति कैयटकारादयः । श्रपयति । अश्रपि । अश्रापीत्यादि । विक्लेदयतीत्यर्थः । पाकादन्यत्र श्रापयति, स्वेदयतीत्यर्थः । धातूनामनेकार्थत्वात् स्वेदे वृत्तिः ॥ ७६६ ॥

मारणतोषणनिशामनेषु ज्ञा । एषु जानातिर्मिद्भवति । पशुं संज्ञपयति । मारयतीत्यर्थः । विष्णुं विज्ञपयति, संतोषयतीत्यर्थः । प्रज्ञपयति रूपं दर्शयतीत्यर्थः । कौमाराणां मतेनात्र सोपसर्गा प्रदर्शिताः । अन्यत्र ज्ञापयति बोधयतीत्यर्थः । नेह निशामनं ज्ञापनमात्रं किं तु चक्षुःसाधनं ज्ञानं, शमलक्ष आलोचन इत्यस्य हीदं रूपम्, आलोचनं चक्षुर्विज्ञाने प्रसिद्धम् । उक्तं चैवं वृत्तिकारादिभिः । 'त्यदादिषु दृशोनालोचने कञ्च' 'पश्यार्थैश्चानालोचने' इत्यादौ मैत्रेयपुरुषकारादिष्वपि निशामनं चक्षुर्विज्ञानमिति स्थितम् । अत एव न्यासे श्लाघह्नुङ्स्थेत्यत्र ज्ञीप्स्यमान इति मारणादिषु पठितस्य घटादेः हेतुमण्णिच् इत्युक्त्वा अथ वेत्यपरितोषात् ज्ञपमिच्चेति चौरादिकस्य स्वार्थे णाविति प्रक्रियान्तरमुक्तं,चौरादिकश्च ज्ञानज्ञापनयोर्वर्तत इति तत्रैव वक्ष्यते तेन ज्ञापने ज्ञपयति, यद्वज्ज्ञापयेदित्यपि स्यादिति । मैत्रेयोपि इहान्यत्र ज्ञापयतीति रूपद्वयं भवति । तथा च देवः जानातीति णिन सिद्धे ज्ञपयति तु पुनर्मारणादौ घटादौ णौ मित्त्वेपीदमेव ज्ञपनमिति पदं ज्ञापने मारणादौ । तेनार्थात् ज्ञापनेऽर्थे ज्ञपयतिपदवत् ज्ञापयेदित्यपि स्यादिति, तथा मैत्रेयोपि इहान्यत्र ज्ञापयति स्वामिनमि-

त्युदाहृत्य चुरादौ ज्ञपमिच्चेत्यत्र ज्ञपयतीति मितमुदाहृत्य ज्ञापने मारणादिषु चाभिधानमस्येत्याह । अत्र चन्द्रः । मारणतोषणनिशानेष्विति वर्द्धमानश्चैवं पठित्वा निशानं तीक्ष्णकरणमिति चाभिधाय निशामनइति केचित् निशामनं दर्शनमिति । स्वामिशाकटायनौ वर्द्धमानवदेव तत्र प्रज्ञपयति शरमित्युदाहरणं तीक्ष्णीकरोतीत्यर्थः । अत्र मित्त्वं बोधिन्यासकारो न सहते । यदाह प्राचीनास्तु निशानं नेच्छन्तीति । एवं काश्यपसम्मताकरादयोऽपि इति मैत्रेयाद्यङ्गीकृतो निशामनपाठ एव ज्यायान् । यत्तूक्तं शलाचन्दुङ्इत्यत्र ज्ञीप्स्यमानो ज्ञपयितुमिष्यमाणो बोधयितुमभिप्रेत इति वृत्तिग्रन्थमुपादाय हरदत्तेन निशामनं ज्ञानमात्रं न चक्षुर्विज्ञानमेव यदाह बोधयितुमभिप्रेत इति, कथं तर्हि प्रयुज्यते तज्ज्ञापयत्याचार्यः । विज्ञापना भर्तृषु सिद्धमेतीति । तस्मान्निशानेष्विति पाठः शोतनूकरणे ल्युट्, ज्ञीप्स्यमानो ज्ञपयितुमिष्यमाण इति प्रयोगः । ज्ञपमिच्चेति चुरादिणिजन्तस्येति नात्र ज्ञापयति प्रयोग उपोद्बलं निशानमिति पाठाङ्गीकारस्येति, यदस्माभिस्तत्सिद्धिरन्यथैवादौ साधिता । अपरे तु प्रतिपन्ना निशामनं ज्ञापनमात्रं ज्ञापयति प्रयोगो ज्ञा नियोगइति चौरादिकस्य धातूनामनेकार्थत्वात् इति अनेकार्थताङ्गीकारे ज्ञानइव मारणतोषणयोरपि ज्ञापयतीतिस्यात् ॥ ७६७ ॥

कम्पने चलिः ॥ चल कम्पनइति ज्वलादौ तस्य मित्त्वार्थ एवानुवादः । चलयति शाखाम् । कम्पयतीत्यर्थः । अन्यत्र शीलं चालयति, अन्यथा करोतीत्यर्थः । हरतीत्यर्थ इति स्वामी । सूत्रं चालयति, क्षिपतीत्यर्थ इति सुधाकरः ॥ ७६८ ॥

छदिरूर्जने ॥ ऊर्जनं प्राणनं बलनं वा, ऊर्जबलप्राणनयोरिति हि धातुः । छदि अपवारणे इति यौजादिकस्य स्वार्थे णिजभावे मित्त्वार्थोऽयमनुवादः । धातूनामनेकार्थत्वात् ऊर्जने वृत्तिः । छदन्तं प्रयुङ्क्ते । छदयति । बलवन्तं प्राणवन्तं करोतीत्यर्थः । अन्यत्र छादयति, अपवारयन्तं प्रयुङ्क्त इत्यर्थः । यदा च छदयति स्वार्थे णयन्तस्तदा बलीभवति प्राणीभवति अपवारयतीत्यर्थः । अत्र बलप्राणयोरपि नान्ये मितोहेता-

Digitized by Google

चित्यमित्त्वम् । अत्र स्वाम्यादयः छदि संवरण इति चौरादिकं छदेत्यनिदितं पठन्तः, तस्यायमूर्जने मित्त्वार्थो ऽनुवाद इत्याहुः । तदयुक्तम् । तस्यानिदित्पाठेऽपि नित्यण्यन्तत्वात् कर्तरि णिचोऽभावात् स्वार्थेऽपि चौ नान्ये मित इति मित्त्वं निषिद्धमेव । अत्र देवः । छदिं धात्वन्तरं मन्यते । यदाह यो वा णावपवारणे छदत इत्येवं द्वितीयं वदन् अन्यं छादयते पुनः छदयति स्यादूर्जनेऽर्थे मित इत्यादि चौरादिकस्यैव स्मरत्यादिवत् अनेकार्थत्वाऽङ्गीकरणात् ऊर्जनेऽपि छदतीति सिद्धे धात्वन्तराऽङ्गीकरणं परस्मैपदमेव यथा स्यादिति तन्मतम् । अनुवादे हि तस्य स्वरितेत्त्वात् छदत इत्यपि स्यात् । यद्यप्येतत्फलं भवति अथाप्यन्यत्र पठितानामिह पाठो मित्त्वमात्रफल इति वृत्तौ व्यवस्थापितत्वात् पृथक् धातुत्वं न सुलभम् । किं चेह धातुनिर्देशार्थमिकारनिर्देशादवश्यमनुवादत्वमेष्टव्यम्. यत्फलमुक्तं नित्यं परस्मैपदमेव यथा स्यादिति तच्छाकटायनमते नैव प्रयोजनं यतः चौरादिकः परस्मैपद्येव ॥ ८६९ ॥

जिह्वोन्मथने लडिः ॥ लड विलास इति पठितस्य मित्त्वार्थोऽयमनुवादः । उन्मथनं ज्ञापनम् । अत्र मैत्रेयस्य जिह्वाया उन्मथने इति मतम् । यदाह लडयति जिह्वामिति । अयमेव पक्षो गुप्तस्यापि । पुरुषकारे तु जिह्वया उन्मथने लडयति जिह्वयेत्युक्तम् । अपरे तु जिह्वा चोन्मथनमिति समाहारद्वन्द्वं व्याचक्षते जिह्वाशब्देन तद्विषयो व्यापार उच्यते । अत्र चोन्मथने चेति लडयति शत्रुं, लडयति दधि चेति भवति । धनपालस्त्वेवं पठित्वा आर्याणां जिह्वोन्मथनयोरिति पाठ इति । स्वामी तु जिह्वोन्मथनयोर्लडिति मन्थनमेव मथनम्, अन्यत्र लाडयति पुत्रम् । चल्यादीनां त्रयाणामिकारो धातुनिर्देशार्थः ॥ ८७० ॥

मदी हर्षग्लेपनयोः ॥ दैवादिकस्य मित्त्वार्थोऽयमनुवादः । मदयति । हर्षयति ग्लेपयति चेत्यर्थः । ग्लेपनं दैन्यमन्यत्र मादयति चित्तविकारमुत्पादयतीत्यर्थः । निमादयत्यक्षरव्यञ्जनानि स्पष्टमुच्चारयतीत्यर्थः । तथा च प्रातिशाख्यम् । उपलब्धिर्विमाद इति अक्षरव्यञ्जनानामिति शेषः ॥ ८७१ ॥

(शेषमग्रे)

Digitized by Google

॥ खण्डनखण्डखाद्यम् ॥

(*Continued from page* 200. Vol. VII.)

टी० ननु स्वप्रकाशज्ञानस्य धर्म्मा अपि यदि न स्वीक्रियन्ते तदा, "स्वप्रकाशं ज्ञानम्"—इति वाग्व्यवहारोऽपि तत्र कथं स्यात्, धर्मोपग्रहेणैव तत्प्रवृत्तेरित्यत आह—। [a] "अत एवे"ति । प्रकृत(१)वाग्व्यवहारस्तु लक्षणया कथञ्चित्समर्थनीय इत्यर्थः ॥ ननु यदि निर्द्धर्मकमेव तत्स्वप्रकाशं ज्ञानं, तदा "नित्यं विज्ञानमानन्दं ब्रह्म"इत्यादिबोधितं तत्र नित्यत्वमपि न स्यादित्यत आह—। [b] "कालानवच्छेदे"ति । कालतदवच्छेदयोः परमार्थसतोरभावात् कालविशेषोपरागनिबन्धनमनित्यत्वं ब्रह्मणो नास्ति इति तद्विरुद्धं नित्यत्वं तत्रोपचरितं ; यथा तवैव 'नीलं तमः'—इत्यत्र नीलविरोधिरक्तत्वाद्यभावनिबन्धनो नीलत्वोपचार इत्यर्थः ॥ ननु व्याप्नोतीति ब्रह्मेत्युच्यते, तथाच निरुक्तिबलाद्, उपनिषदि विभुत्वेन श्रवणाच्च, ब्रह्मणो वैभवमवश्यमङ्गीकर्त्तव्यमिति न तन्निर्धर्मकम्, अत एव च नाऽद्वैतम्? इत्यत आह—। [c] "देशे"ति । देशतदवच्छेदयोः परमार्थसतोरभावाद्देशविशेषोपरागनिबन्धनमूर्तत्वविरहनिबन्धनो वैभवोपचारः पूर्ववदेवेत्यर्थः ॥ तर्हि निर्धर्मके ब्रह्मणि कथं सर्वात्मकत्वव्यवहारः? कथं चाऽद्वैतव्यवहारः? तयोर्धर्मनिबन्धनत्वादत आह—। [d] "प्रकारे"ति । घटादौ प्रतिनियतघटत्वादिप्रकारसंसर्गाधीनोऽसर्वात्मकत्वव्यवहार इति तद्विरहाद्ब्रह्मणि सर्वात्मकत्वव्यवहार इत्यर्थः ॥ ननु द्वैताभावोऽद्वैतं, तस्य च ब्रह्माधिकरणं, नतु तदेव ब्रह्म, अभावस्याधिकरणाभिन्नत्वात्तथाच तमादाय द्वैतमेवेत्यत आह—। [e] "सौगते"ति । सौगतैः प्राभाकरैश्चाधिकरणस्वरूपमेवाऽभावोऽभ्युपगम्यते नैयायिकैरपि 'घटाभावे पटो नास्ति'इत्यादिप्रतीतेरधिकरणस्वरूपमात्रालम्बनत्वाभ्युपगमाच्च प्रकृते(२)ब्रह्मैव द्वैताभावोऽङ्गीक्रियते ॥

---

(१) ननु यदि ज्ञानं वाग्व्यवहाराऽविषयः, कथं तर्हि भवता वाचा व्यवह्रियते इत्यत आह- प्रकृतेति । लक्षणया, ज्ञानविषयतत्सम्बन्धिज्ञेये जहल्लक्षणयेत्यर्थः ।

(२) केषुचित्पुस्तकेषु "प्रकृतं ब्रह्मैव"—इति पाठः, तदपेक्षया 'प्रकृते'—इति साधुः, 'प्रकृते'—इति पदान्तरस्य तत्राऽकल्पनात् ।

Digitized by Google

मू० [a]भ्रमविषयनिषेधवच्च प्रतियोगिनः सर्वथैवासिद्धावपि न काचित् क्षतिः। [b]तदेतत्तु श्रुत्या प्रमाणेनोपलक्षणन्यायात् तात्पर्य्यतः प्रकाश्यते; [d]तेन परमार्थतोऽभिधानाभिधेयभावविरहे तात्पर्य्यतः, श्रुतिस्तस्मिन्नविद्यादशायां 'पराभ्युपगमरीत्या प्रमाणमित्युच्यते।

टी० ननु द्वैताभावश्चेदद्वैतं तदा प्रतियोगितया द्वैतमभ्युपगन्तव्यम्, तथाच कथमद्वैतं, द्वैतेनैव द्वैतादित्यतआह—। [a]"भ्रमे"ति। नहि निषेधे प्रमितप्रतियोगिकत्वं तन्त्रम्, किं तर्हि, प्रतीतप्रतियोगिकत्वं, लाघवादिति भावः। प्रमितप्रतियोगिकत्वमेव तन्त्रं निषेधे, भ्रमविषयोपि ज्ञानान्तरेण प्रमित एव—इत्यादिविस्तरः यद्यपि भेदप्रकाशे(१), तथापि ज्ञानान्तरमप्यप्रमेति हृदयम् ॥ ननु यदि ब्रह्मणो वाग्व्यवहाराऽविषयत्वं, तदा तत्र श्रुतिरपि न प्रमाणं भवेदित्यत आह—। [b]"तदेतदि"ति। उपनिषदां ब्रह्मणि तात्पर्य्याधीनमेव प्रामाण्यं, नतु ब्रह्म पदार्थः, वाक्यार्थो वा, धर्मोपग्रहं विना शक्तेर्योग्यतादेश्चाऽनिरूपणात्। "नित्यं विज्ञानमानन्दं ब्रह्म"—इति नित्यविज्ञानानन्दपदैरविद्यके एवार्थे प्रत्येकं गृहीतशक्तिभिः संभूयोच्चारणबलात् तात्पर्य्यबलाच्चाऽविद्यादशायां ब्रह्म बोध्यते इति तत्र श्रुतीनां प्रामाण्यमित्यर्थः ॥ [c]"उपलक्षणन्यायादि"ति। यथा तृणत्वादिकं काकादिपदैरवाच्यमपि बोध्यते तात्पर्य्यबलात्, यथाच "गच्छ गच्छसि चेत्कान्त! पन्थानः सन्तु ते शिवाः। ममापि जन्म तत्रैव भूयात् यत्र गतो भवान्"—इत्यादावपदार्थोऽपि गमनाभावः प्रतीयते(२)इति भावः॥ ननु सर्वथैवाऽवाच्ये तात्पर्य्यमपि दुर्घटमित्यत आह—। [d]"तेन परमार्थत" इति। पारमार्थिकं वाच्यवाचकभावं न मन्यामहे, नतु काल्पनिकमपि(३)इति भावः ॥ ननु तात्पर्य्यमपि तत्प्रतीतिप्रयोजकत्वं(४)वा मीमां-

(१) भेदप्रकाशे=भेदसिद्धौ, अत्र 'वक्तुं शक्यते'—इति शेषः।

(२) अत्र 'तथा'—इति शब्दोऽध्याहर्तव्यः, पूर्वं यथाशब्दस्य साचिध्यात्।

(३) अत्रापि "न मन्यामहे"—इत्यनुवर्त्तनीयम्।

(४) क्वचित्पुस्तके 'तत्प्रतीतिप्रयोजनकम्'—इति पाठः, क्वचित्तु 'तत्प्रतीतिप्रयोजनकत्वम्' इति।

सकानामिव, तत्प्रतिपिपादयिषा वा नैयायिकानामिव, स्यात्, तथाच तदादाय पुनर्द्वैतापत्तिरित्यत आह—। c"पराभ्युपगमे"ति ॥

सू० a"वस्तुतस्तु स्वात्मसिद्धमेव चिद्रूपम् । (1)

—

*b ननु च स्वप्रकाशत्वं ज्ञानस्येत्यनुपपन्नमिदं, क्रियाकर्मभावस्य भेदव्यतिरेकेणाऽनुपपत्तेः । c कार्या क्रिया हि कर्मणो भवति, कर्म च कारणं (2) क्रियायाः, नच स्वेनैव स्वनिष्पादनं शक्यं, d पूर्वापरभावविशेषस्य हेतुहेतुमद्भावरूपत्वात्, नच तस्मादेव तदेव पूर्वमपरं च संभवति 'तद(3)नवच्छिन्नकालविशेषस्य तत्पूर्वशब्दार्थत्वात्, तदा च तस्य सद्भावस्वीकारे स एव कालस्तदवच्छिन्नस्तदनवच्छिन्नश्चेति विरोधात् * । नैवम्,

टी० ननु त्वन्मते परमार्थतः किमत्र प्रमाणमत आह—। a"वस्तुतस्त्वि"ति । यद्यपि चिद्रूपस्यात्मनः सिद्धत्वं त्वया दुरुपपादं, (नहि प्रमाणमन्तरेण तदुपपादयितुं शक्यं, वैपरीत्यमेव तथासति किं न स्यात्, पारिशेष्यादिप्रमाणाभिधानं तव द्वैतापादकं,प्रमाणाभिधाने चापर्य्यवसानं समानं) तथापि तदितरखण्डनयुक्त्यवष्टम्भादिदमुक्तम् (4) ॥

—

(1) { प्रसाध्य स्वप्रकाशत्वं विज्ञानैकरसात्मनः । कर्तृकर्मविरोधोऽथ खण्ड्यते कर्मलक्ष्म च ॥ }

(2) क्वचित्पुस्तके 'कारकम्'—इति पाठः, सोऽपि नाऽयुक्तः क्रियां प्रति कारणस्यैव कारकत्वात् ।

(3) कार्यानवच्छिन्नकालविशेषस्य कार्य्यपूर्वशब्दार्थत्वात्, कार्य्यपूर्वकाले च कार्य्यस्य सद्भावस्वीकारे एक एव कालः कार्य्याऽवच्छिन्नोऽनवच्छिन्नश्चेति विरोधात्—इति निष्कृतोक्तं क्रमशः प्रत्युत्तरव्याख्यानम् ।

(4) 'ब्रह्म सिद्धम्'—इत्येतद् ब्रह्मभिन्नस्य जगतः खण्डनयुक्तिभिरसिद्धत्वप्रतिपादनेन स्वयमेव सिद्ध्यति, निरधिष्ठानकनिषेधायोगात्; न तु प्रमाणेन तत्प्रसाधनापेक्षेतिभावार्थः ।

Digitized by Google

ननु "स्वेन प्रकाश्यते" इति स्वप्रकाशपदं कर्मव्युत्पन्नं(१), तच्चानुपपन्नं, क्रियाकर्मभावस्य भेदघटितत्वादित्याशङ्कते—। [b] "ननु चे"ति ॥ ननु क्रियाकर्मभावस्याऽभेदे को विरोधः? इत्यत आह—। [c] "कार्य्ये"ति । अभेदे जन्यजनकभावो विरुद्ध इत्यर्थः ॥ एतदेव कथमत आह—। [d] "पूर्वापरे"ति । विशेषः—नियमगर्भत्वं, तथाच नियतपूर्ववर्तित्वं हेतुत्वं, तच्चिह्निततनियताऽऽनन्तर्य्यं हेतुमत्त्वं, तच्चाभेदे विरुद्धमित्यर्थः ॥ एतदेव कथमत आह । [e] "तदनवच्छिन्ने"ति । कार्य्यानवच्छिन्नो हि कालः कार्यपूर्वकालः, कार्यमेव च कारणं, तथाच स्वा(२)नवच्छिन्ने काले स्वमित्येको विरोधः, स्वकाल एव स्वाऽकाल इत्यपरः, तदवच्छिन्न(३)एव कालस्तत्प्रागभावावच्छिन्न इत्यर्थः ॥

मू० [a] क्रियायाः कर्मजन्यतानियमानङ्गीकारात्, [b] सर्वथैवानागतविषयविज्ञाने तदसम्भवात्; [c] क्वचिज्जनकतामादाय च कर्मणि कारकत्वव्यपदेशात् । [d] करण(४)व्यापारविषयत्वाद्वा परसमवेतक्रियाफलभागित्वाद्वा कर्मलक्षणाद् (विनापि क्रियाजनकत्वेन) कर्मव्यवहारोपपत्तेः । [e] किंच(५) तत् कर्मत्वं यत्स्वं प्रति विरुध्यते?। * परसमवेतक्रियाफलभागित्वम् * ?—इति चेन्न, [f] अपादानस्यापि व्याप्तेः(६)। * [g] अपादानं कर्मापि *?—इति चेन्न, [h] 'वृक्षात्पतति पर्णम्'—इति वत् 'वृक्षं पर्णं पतति'—इत्यपि स्यात्।

(१) कर्मव्युत्पन्नं=कर्मव्युत्पत्तिसिद्धम् ।

(२) स्वशब्देन सर्वत्र प्रकृते कार्य्यं ग्राह्यम् ।

(३) 'स्वकाल एव स्वाऽकालः'—अस्यैव विवरणं—तदवच्छिन्न इत्यादि ।

(४) क्रियाजनकत्वेन विनापि, करणव्यापारविषयत्वाद्वा परसमवेतक्रियाफलभागित्वाद्वा कर्मलक्षणात् कर्मव्यवहारोपपत्तेः—इत्यन्वयः । कर्मलक्षणात्=कर्मपदप्रवृत्तिनिमित्तात्, लक्षणं तु कर्मणोऽसङ्कीर्णं न भवत्येव ।

(५) पूर्वं क्रियायाः कर्मजन्यतां क्वचिदङ्गीकृत्य पर्य्यहार्षीदिदानीं कर्मत्वमेव न निरूपणगोचर इत्याह—किञ्चेति ।

(६) कर्मलक्षणस्याऽपादानव्यापकत्वादित्यर्थः (कर्मलक्षणस्याऽपादानेऽतिव्याप्तिरिति तु फलितम्) । 'अपादानस्यातिव्याप्तेरि'ति क्वाचित्कः पाठस्तु कथञ्चिल्लक्षणयोजनेऽपि दुरूहयोजनतयोपेक्षितः ।

टी० स्यादयं विरोधो यदि कर्म कारकं(१) भवेत्तदेव तु नास्तीत्याह—। [a] "क्रियाया" इति ॥ ननु नियतपूर्ववर्त्तित्वे सत्यपि कथमस्याऽकारणत्वमतआह—। [b] "सर्वत्रे"ति । भाविव्यक्तिविषयकज्ञानेच्छादौ व्यभिचारान्नियतपूर्ववर्तितैवास्य नास्तीत्यर्थः ॥ ननु यद्येवं, तदा पाणिनेः कारकमध्ये कर्मपरिगणनं किं निबन्धनमित्यत आह—। [c] "क्वचिदि"ति । 'आत्मानं जानामि'इत्यादौ कर्मणः क्रियाजनकत्वमपि सम्भवतीति तथा परिगणनमित्यर्थः ॥ ननु तथाप्यतीतादिसाधारणकर्मपदप्रवृत्तिनिमित्ताभावात्कथमनुगतः कर्मव्यवहारः? इत्यत आह—। [d] "करणे"ति । अनागतादिकर्मणि करणस्य चक्षुरादे(२)र्लिङ्गादेर्वा प्रत्यासत्त्यादि-लिङ्गपरामर्शादिलक्षणव्यापारविषयत्वात्तद्व्यवहार इत्यर्थः ॥ अपिच, त्वया निरुच्यमानं कर्मलक्षणं कथञ्चिदपि विचारं न सहिष्यते इत्याह—। [e] "किञ्चे"ति । परपदं कर्मभिन्नपरं, तथाच परसमवेतायाः क्रियाया यत्फलं तद्भागित्व(३)मित्यर्थः ॥ 'वृक्षात्पर्णं पतति'इत्यत्र वृक्षस्याऽपादानस्य (पर्णगतपतनक्रियाया यत्फलं विभागस्तच्छालिनः) कर्मत्वं स्यादित्याह—। [f] "अपादानस्ये"ति ॥ नन्वपादानस्य कर्मत्वमपि स्यात् को दोष इत्याह—। [g] "अपादानमि"ति ॥ अपादानस्य कर्मत्वे "कर्मणि द्वितीया"इत्यनुशासनबलात् 'वृक्षं पर्णं पतति' इत्यपि प्रयुज्येतेत्याह—। [h] "वृक्षादि"ति ॥

मू० [a] *विवक्षातः कारकाणि भवन्तीति तदविवक्षया नैवम्*?—इति चेन्न, [b] वस्तुतः सतस्तादृप्यस्य यदि विवक्षा स्यात्तदा तदपि(४) स्यात् । *[c] अपादानस्य कर्मत्वं न विवक्ष्यते इति शाब्दिकसंप्रदायोऽयम्*?—इति चेत्, [d] तर्हि तव निरु-

(१) कारकं, क्रियाकारणमित्यर्थः ।

(२) चक्षुरादेरलौकिकप्रत्यासत्त्यादिलक्षणव्यापारविषयत्वात्, लिङ्गादेर्वा लिङ्गपरामर्शादिलक्षणव्यापारविषयत्वादनागतकर्मणि कर्मत्वव्यवहार इति विभागः, एकदेशान्वयस्तु धरैः प्रातितपत्राणीत्यादिवत्त विरुद्धः ।

(३) 'काष्ठं छिनत्ति'-इत्यत्र काष्ठेतरकुठारादिसमवेतक्रियाया यत्फलं द्वैधीभावस्तद्भागित्वं भवति काष्ठस्य कर्मण इति लक्षणसमन्वयः ।

(४) तदित्यव्ययं, प्रयोगार्थे प्रयुक्तम्; स प्रयोग इत्यर्थः ।

Digitized by Google

त्त(१)सर्वकर्मव्यवहारेऽपि स्वकृतकर्मलक्षणानुरोधेन कर्मत्वमभ्युपगच्छता वस्तुमात्रं कर्मत्याद्यपि लक्षणं सावकाशितं स्यात्। कथं च लोकोत्तर(२)प्रज्ञेन निवृत्तसर्वकर्मव्यवहारेऽपि स्वकृतकर्मत्वमस्तीत्यधिगतम्? । * अपादानेतर 'दीदृशं कर्म *?–इति चेन्न, तत्रापि 'नदी वर्द्धते'–इत्यादौ तद्वृद्धेरप्राप्ततीरभागादिप्राप्तिफलायाः सकर्मकत्वापत्तेः।

टी० ननु वृक्षस्य सत्यपि कर्मत्वेऽपादानत्वमेव विवक्षितमिति पञ्चम्येव भवति न द्वितीयापीत्याह–। [a]"विवक्षात" इति॥ वास्तवं यदि कर्मत्वं तदा विवक्षायाः=इच्छायाः प्रयोक्तृमात्रतन्त्रत्वेन कदाचित्कर्मत्वविवक्षया प्रयोगोऽपि स्यादित्याह–। [b]"वस्तुत" इति॥ ननु भवेदेवं यदि प्रयोक्तृमात्राधीना विवक्षा स्यात्तत्त्वेवं, किंतु शाब्दिकसंप्रदायानुरुद्धा, तथाच ग्रामगमनादिवत्(३) 'वृक्षं पर्णं पतती'त्यपि न प्रयुज्यते इत्याशङ्कते–। [c]"अपादानस्ये"ति॥ अपादानात् सकलकर्मव्यवहारविरहाद्ध्रुव वृत्तेऽस्य कर्मत्वस्यापि निवृत्तिः, त्वया परं स्वलक्षणाऽनुरोधेन कर्मत्वं तत्रेष्यते तदा प्रमेयत्वमेव लक्षणं क्रियतां किं परसमवेतेत्यादिविशेषणवैयर्थ्यभारेणेत्याह–। [d]"तर्ही"ति। यद्यपि नेदं(४) कर्मलक्षणं, किंतु कर्मपद·

(१) निवृत्तः सर्वेषां कर्मव्यवहारो यस्मिन्नपादाने तस्मिन्नित्यर्थः।

(२) लोके उत्तरा=उद्गता प्रज्ञा यस्य स लोकोत्तरप्रज्ञस्तेन।

(३) अत्र "ग्रामाद्गमनमित्यादिवत्"–इति पाठ उचितस्तथैव दृष्टान्तसङ्गतिसम्भवात्, तथाच गतिपत्योः संयोगानुकूलव्यापारार्थकत्वाऽविशेषेऽपि यथा ग्रामं गच्छतीत्येतदर्थे ग्रामाद्गच्छतीति प्रयोगो न सांप्रदायिकस्तथा वृक्षात्पर्णं पततीत्यस्यार्थे वृक्षं पर्णं पततीत्यपि न प्रयुज्यते इत्यर्थः;–इत्यस्मद्गुरुचरणाः श्री०मद्वामनमिश्रास्त्रियाः। श्रीमन्तो भागवताचार्य्यास्तु–स्थालीपुलाकन्यायादिपाठवत् "ग्रामगमनादिवत्"–इत्यपि पाठो नायुक्तः, दृष्टान्तश्चायं व्यतिरेकी, तथाच यथा 'ग्रामं गच्छती'ति प्रयुज्यते, न तथा वृक्षं पर्णं पततीति प्राहुः। अहं तु 'इत्यपि न' इत्यपिशब्दस्वारस्यानुरोधेन यथाश्रुतपाठस्वारस्यानुरोधेन च–यथा 'ग्रामगमन'इति निर्विभक्तिकपदप्रयोगः सांप्रदायिको न प्रयुज्यते तथा 'वृक्षं पर्णं पतति' इत्यपि नेत्यनुमन्ये। क्वचित्पुस्तके'ग्रामगामादिवत्'–इति पाठः।

(४) इदं=परसमवेतक्रियाफलभागित्वम्।

Digitized by Google

प्रवृत्तिनिमित्तमात्रं, (लक्षणं तु कारकाणामन्योन्यव्यावृत्तं नास्त्येव, उपधेयसाङ्कर्यात्,) तथापि पदार्थान्तरलक्षणप्रणयनप्रयासोपि तवानर्थक एव स्यादिति हृदयम् ॥ [e]“ईदृशमि”ति । परसमवेतक्रियाफलभागीत्यर्थः ॥ [f]“तत्रापी”ति। “नदी वर्द्धते”इत्यत्र,तीरस्य जलसमवेतक्रियाफलतीरसंयोगभागिनः कर्मत्वात्([1]),तथाच “नदी तीरं वर्द्धते”–इति प्रयोगः स्यादित्यर्थः ॥

मू० [a]“अपादानेतरदितिस्थाने क्रियानाशकेतिकरणे[b]प्यस्य दोषस्य [c]तादवस्थ्यात्, विभागलक्षणायां वृत्तौ तदसम्भवाच्च, [d]‘वृक्षं त्यजति’इत्यादावकर्मत्वप्रसङ्गाच्च, [e]‘आत्मानं जानामि’इत्यत्र [f]परत्वाभावादव्याप्तेः।[g] *तत्राप्युपाधिभेदात्परत्वं, कर्तृत्वभोक्तृत्वाद्युपहितस्यैवात्मनो ज्ञेयत्वाभ्युपगमात्*?–इति चेन्न, यतोऽस्तु तावद्यथाकथञ्चिदेवं, [h]तथाप्यध्यात्मविदो निरुपाधिमात्मानं जानतो ज्ञानं मात्मकर्मकं स्यात्, [i]पच्यते फलं स्वयमेवेत्यादौ च कर्मकर्त्तरि का गतिः स्यात्?।

टी० ननु क्रियानाशकपरसमवेतक्रियाफलभागित्वं कर्मत्वं, नच वृक्षस्याऽपादानस्य यद्विभागलक्षणं पतनक्रियाफलं तत् क्रियानाशकं, किंत्वधः संयोगस्तत्र क्रियानाशकं फलं, तद्भागिभूम्यादेस्तत्र कर्मत्वमिष्यत एवेत्याशङ्क्य परिहरति–। [a]“‘अपादाने”ति ॥ [b]“अस्ये”ति । ‘नदी वर्द्धते’–इत्यत्रातिव्याप्तिलक्षणस्येत्यर्थः ॥ [c]“तादवस्थ्यादि”ति । तत्रापि तीरनीरसंयोगस्य क्रियानाशकत्वादित्यर्थः ॥ दोषान्तरमाह–। [d]“वृक्षमि”ति । तत्रापि वृक्षपर्णविभागस्य क्रियानाशकत्वाभावा([2])दित्यर्थः । मूललक्षणेऽपादानातिव्याप्तिं समर्थ्याव्याप्तिमाह–। [e]“आत्मानमि”ति ॥ [f]“परत्वाभावादि”ति । आत्मनः कर्मभिन्नत्वाभावादित्यर्थः ॥ योग्यविशे-

(१) ‘कर्मत्वम्’–इत्यपि पुस्तकान्तरे पाठः साधुरेव ।
(२) अधोदेशसंयोगस्यैव क्रियानाशकत्वेन विभागस्य तदभावादित्यर्थः ।

षगुणोपहितस्यात्मनः कर्मत्वं, केवलस्य च तद्भिन्नत्वात्परत्वमिति विशिष्टाऽविशिष्टभेदेन प्रकृतेपि लक्षणसत्त्वान्नाव्याप्तिरित्याह—। [g] "तत्रापी"ति। यथाकथञ्चिदित्यस्वरसात्। कर्मभिन्नत्वमुपाधीनां, नतूपहितस्यात्मनोपि इति तदवस्थैवाव्याप्तिः—इत्यस्वरसबीजम् ॥ अभ्युपेत्य दोषमाह—। [h] "तथापी"ति। युञ्जानस्य(१)केवल एवात्मा ज्ञाता, ज्ञेयश्च, निरञ्जनादिश्रुतिबलादित्यर्थः ॥ कर्मकर्तरि परसमवेतक्रिया नास्तीति तत्राव्याप्तिरित्याह—। [i] "पच्यते" इति ॥

मू० ॥ [a] "सर्वज्ञमीश्वरं मन्यमानेन च नित्यज्ञाने(२) तस्मिन् भगवति फलनाशकत्वस्यानभ्युपगमात्तं प्रत्येतल्लक्षणाऽसिद्धेः। [b] तस्माद्व्याकरणकारैः शब्दसिद्ध्यर्थं नदी(३)वृद्ध्यादिवत्कर्मापि पारिभाषितमित्यलं तदनुगतलक्षणगवेषणया। *करण(४)व्यापारविषयः कर्म*—इति चेन्न, हस्तेन रामेण शरेण—इत्यादावतिप्रसङ्गात्। लक्षणं विनापि, क्रियाजनकत्वे सति व्यापारोद्देश्यत्वेन कर्मव्यवहारोपपत्तेः। [c] शेषं चेश्वराभिसन्धौ(५)स्वप्रकाशवादे निर्वक्ष्यामः(६)।

—•—

(१) युञ्जानस्य=योगिनः।

(२) अत्र 'नित्यज्ञानाधारे तस्मिन्भगवति'—इत्यर्थकरणापेक्षया 'भगवति वर्त्तमाने नित्यज्ञाने'—इत्यर्थः श्रेयान्।

(३) यथा वस्तुतो नदीत्ववृद्धित्वयोरसतोरपि पाणिनिना "यूस्त्र्याख्यौ नदी" "वृद्धिरादैच्"—इत्यादिसञ्ज्ञा शब्दसिद्ध्यर्था कृता न सार्वत्रिकी तथा कर्मसञ्ज्ञापीत्यर्थः।

(४) बहुषु पुस्तकेषु करणेत्यादिकर्मव्यवहारोपपत्तेरित्यन्तो ग्रन्थो नास्ति मन्ये तद्युक्तमेव, "इत्यलं तदनुगतलक्षणगवेषणया" इत्युपसंहारानन्तरं पुनः "करणव्यापार"—इत्यादिना लक्षणान्तरोत्थापनस्याऽयुक्तत्वात्।

(५) खण्डनकारेणेश्वराभिसन्धिकेवल्याभिसन्ध्यादिनाम्ना चत्वारोऽभिसन्धयः प्रणायिषत, तमुमर्थमुपक्रम्य भूमिकायां भूय्युपन्यास्थमिति तत्रैवानुसन्धेयम्।

(६) क्रियायाः कर्मजन्यत्वावश्यम्भावो न भाविकः। किञ्च किञ्चन नो कर्मनम वक्तुं च शक्यते॥ तस्मात् क्रियाकर्मभावानुपपत्तिरुदाहृता। चिद्व्याप्तेः स्वप्रकाशत्वे नास्तीत्येतावतोदितम्। विषयीविषयाभावो भवत्येवेति दुर्ग्रहः। परप्रकारैरेवाथ खण्ड्यतेऽत्र प्रघट्टके।

[d]ननु चाऽभेदे विषयविषयिभावस्यैवासङ्गतत्वं, विषयित्वं हि विषयसंबन्धिता, [e]संबन्धस्य भेदमन्तरेणासम्भवद्वस्थितिः, [f]संबन्धमितेः संबन्धिस्वरूप(१)भेदमितिव्यतिरेके वैपरीत्यावधारणात्? । नैवम् ।

टी० ईश्वरज्ञानस्य हि विश्वमेव कर्म्म, नच सा ज्ञानक्रिया फलनाश्या, नित्यत्वादिति तत्राव्याप्तिरित्याह—। [a]"सर्वज्ञमि"ति । 'फलनाशकत्वस्य' इति बहुव्रीहिः ॥ ननु कर्म्मादिप्रसिद्धिः किंनिबन्धनेत्यत आह—। [b]"तस्मादि"ति ॥ ननु धात्वर्थतावच्छेदक(२)परसमवेतक्रियाफलभागित्वं कर्मत्वं, तेन गमनस्योत्तरसंयोगो धात्वर्थतावच्छेदक(३)स्तद्भागी ग्रामादिः कर्म; पतनस्याधः संयोगः फलं, नतु विभागः, तेन तद्भागिनोऽपादानस्य न कर्मत्वं; त्यजेश्च पूर्वदेशविभाग एव धात्वर्थतावच्छेदक इति तद्भागिनो वृक्षस्य कर्मत्वात् 'वृक्षं पर्णं त्यजती'ति भवत्येव; वृद्धेरवयवोपचयस्य नावच्छेदकं तादृशं फलं येन तद्भागितया तीरादेः कर्मत्वं स्यादित्यत आह—। [c]"शेषं चे"ति । ज्ञानादिक्रियाया अपि न तादृशं फलं, ज्ञाततादेर्निराकरिष्यमाणत्वात्, संस्कारस्य चाऽनावश्यकत्वादकर्मकत्वापत्ते(४)रिति भावः ॥

ननु माभूत् स्वप्रकाशे कर्मक्रियाविरोधः विषयविषयिभावविरोधस्तु स्यादित्याह—। [d]"नन्वि"ति ॥ विरोधमूलमाह—। [e]"संबन्धश्चे"ति ॥ तत्र हेतुमाह—। [f]"संबन्धमितेरि"ति । यत्र संबन्धिनोः स्वरूपभेदप्रमा तत्रैव संबन्धप्रमा, प्रकृते च संबन्धिभेदप्रमानिवृत्त्या संबन्धप्रमा-

---

(१) सम्बन्धिनोः स्वरूपं=सम्बन्धिस्वरूपं, तस्य भेदमितिः=भेदप्रमा, तस्या व्यतिरेके=ऽभावे, सम्बन्धमितेर्वैपरीत्यावधारणात्=अभावनिश्चयादित्यर्थः ।

(२) धात्वर्थतावच्छेदकस्य फलेऽन्वयः ।

(३) गमनं हि पूर्वदेशपरित्यागपुरःसरमुत्तरदेशसंयोगाऽनुकूलो व्यापारस्तत्र भवत्येवोत्तरसंयोगो धात्वर्थतावच्छेदक इत्यर्थः ।

(४) ज्ञानादिक्रियाया अकर्मकत्वापत्तेरित्यर्थः ।

Digitized by Google

निवर्तते (१)तन्निवृत्तौ च प्रमेयस्य(२)निवृत्तिरिति नाभेदे विषयविषयिभावः सम्बन्ध इत्यर्थः । यद्वा, भिन्नसम्बन्धिप्रमा सम्बन्धप्रमाकारणमतः कारणनिवृत्त्या कार्यनिवृत्तिरित्यर्थः ॥

मू० [a] विषयविषयिभावो हि सम्बन्धो न सम्बन्धिस्वरूपाद्भिन्नः, तथाभूतत्वेपि(३) चान्ततस्तत्सम्बन्धस्यापि स्वाश्रयात्मकत्वमभ्युपगम्यमनवस्थाभयात्, [b] तथा सति च सैव(४) यथासम्बन्धमितिः सम्बन्धस्वरूपात्सम्बन्धिनोर्भेदमनादायैव पर्यवस्यतीत्यभ्युपगन्तव्यम् [c] स्वभावसम्बन्धस्येतरसम्बन्धमर्यादातिशायित्वात् [d] तथा विनापि सम्बन्धिभेदं विषयविषयिभावात्माऽयं सम्बन्धः पर्य्यवसास्यति, तदवगमोपि तथावगमव्यतिरेकेणैव भविष्यति को विरोधः । * [e] नचैवं घटतज्ज्ञानयोर्य्याहग्विषयविषयिभावस्तो मात्रया(५)पि स्वप्रकाशे विषयविषयिभावाऽन्यत्वे बाध्यतैकत्र स्यात् * । अस्त्येव ह्यविद्याविद्यमाने घटतज्ज्ञाने बाध्यत्वं, परमार्थसति तु स्वप्रकाशे पारमार्थिकत्वमिति द्वयो[f]रननुगमेपि न दोषः ।

(१) व्यापकनिवृत्त्या व्याप्यनिवृत्तेरावश्यकत्वादिति भावः । यद्यपीदं वाक्यं साक्षाद् व्याप्यनिवृत्त्या व्यापकनिवृत्तिमभिधत्ते तथापि प्रकृते साध्यसाधनयोः समव्याप्तिकत्वाद्व्यापकनिवृत्त्या व्याप्यनिवृत्त्यभिप्रायकमेवेत्येके प्राहुः; परे तु कारणनिवृत्त्या कार्य्यनिवृत्त्यभिप्रायकोयं ग्रन्थ इत्येव व्याचक्षते ।

(२) प्रमेयस्य=सम्बन्धस्य ।

(३) तथाभूतत्वेपि=सम्बन्धिस्वरूपाद्भिन्नत्वेपि ।

(४) साऽन्तिमसम्बन्धमितिः सम्बन्धिस्वरूपाभेदमनादायैव पर्यवस्यतीत्यभ्युपगन्तव्यं यथा, तथा प्रथमसम्बन्धमितिरपि स्यादिति भावः ।

(५) मात्रया=लेशतोऽपि, वैलक्षण्ये विरुद्धयोरुभयोः पारमार्थिकत्वायोगादेकत्र बाध्यता स्यादित्यर्थः ।

टी० [a] "विषयविषयिभाव"इति । त्वयापि विषयविषयिभावः सम्बन्धः सम्बन्धिभिन्नो नाऽभ्युपगम्यते, अन्यथा, तस्यापि सम्बन्धस्य सम्बन्धान्तरमभ्युपेयमेवं पर्य्यवसानं न स्यादित्यर्थः ॥ भिन्नसम्बन्धिमितेः सम्बन्धमितिं प्रति न कारणत्वं, न वा व्यापकत्वं, व्यभिचारादित्याह—। [b] "तथासती"ति ॥ ननु सम्बन्धान्तरापेक्षया कथमिदं वैषम्यमत आह—। [c] "स्वभावे"ति ॥ परमते स्वरूपसम्बन्धस्य सम्बन्धिद्वयात्मकत्वमुपपाद्य तद्दृष्टान्तेन स्वमते एकसम्बन्धिमात्रात्मकत्वं स्वरूपसम्बन्धस्योपपादयति—। [d] "तथा विनापी"ति ॥ ननु सम्बन्धान्तरापेक्षया स्वरूपसम्बन्धस्य वैषम्यमस्तु त्वया तु स्वरूपसम्बन्धापेक्षयापि वैषम्यमुच्यते इत्येकस्याऽवास्तवत्वमत आह—। [e] "नचे"ति । भेदे सति योऽयं विषयविषयिभावः स एव लोकसिद्धोऽपि बाध्यते, बाधस्याभिधास्यमानत्वात्; यथा सर्वलोकसिद्धः शरीरादावात्मव्यवहारो, यथा वा तमसि नीलव्यवहार इत्यर्थः ॥ [f] "अननुगमेपी"ति । लोकसिद्धविषयविषयिभावस्य भेदघटितत्वं, स्वप्रकाशविषयविषयिभावस्य चाऽभेदघटितत्वम्,—इत्यननुगमो न दोषः, भेदघटितस्य बाध्यत्वेनैकरूपतामात्रपरिशेषादननुगमस्यैवापास्तत्वात् । यद्वा, स्वरूपसम्बन्धः क्वचित्पारमार्थिकः क्वचिदपारमार्थिक इत्यननुगमेपि न दोष इष्टत्वादित्यर्थः ॥

मू० [a] अथवा, स्वात्मना सह क्रियाकर्म्मभावो विषयविषयिभावो वा स्वप्रकाशार्थे इति नाभ्युपेयमेव, [b] यथा तु भवतां सत्तासम्बन्धादितरत्र सद्व्यवहारव्यवस्था (सत्ता तु स्वयमेव सद्रूपा नचैतावता स्वात्माश्रयता तस्याः) तथाज्ञानमपि स्वत एव सिद्धस्वरूपम् ।

(शेषमग्रे)

Digitized by Google

॥ श्रीः ॥

श्रौतपदार्थनिर्वचनम् ।

अथ पाशुकपदार्थानां नामान्युच्यन्ते ।

(*Continued from page* 192 Vol VII.)

१९२ ततः अग्नीदुत्तरं बर्हिरुपसादय प्रतिप्रस्थातः पशुषु संवदस्वेति प्रैषादि । त्रिषु पात्रेषु पृथक् यूषाणि निदधाति । सन्ते मनसा म०हाश्विभ्यां त्वा जुष्टमभिघारयामीति मन्त्रेण पृषदाज्येनाश्विनं हविरभिघार्यान्येन पृषदाज्येन सरस्वत्यै त्वेत्यूहितमन्त्रेण सारस्वतमभिघार्य पृषदाज्यान्तरेण इन्द्राय त्वेत्यूहितमन्त्रेण ऐन्द्रं हविरभिघारयति । स्वाहोष्मण इति तन्त्रेण करोति । यस्त आत्मेति तु पर्यायेण । ततो दृंह गा दृंह गोपतिमित्यादि पशुहोत्रोपसादनान्तं करोति । एकैकस्य स्वस्य स्वस्य शूलस्य पार्श्वभागे धारणं करोति । क्रमेण सन्नाभिमर्शनं करोति । चतसृषु जुह्वादिषूपस्तृणीते । मनोतायै हविषोवदीयमानस्येत्यादि । चयनपक्षे ऐन्द्रः प्राण इत्याद्यन्ते उदुम्बरमये पात्रे पूष्णो मृत्युगृहं प०विपश्चिते० । उत्तरवेद्यामासादयति । श्रीरसीत्यादि । ततः अश्विभ्यां छागस्य हविषोनुब्रूहि इति यथालिङ्गमूहेन हविर्भिः प्रचरन्ति । सरस्वत्यै मेषस्य हविषोनुब्रूहि । इन्द्राय ऋषभस्य हविषोनुब्रूहि । सान्नाय्यवद्यजमानस्यानुमन्त्रणम् । सूत्रे इडाभेदपक्षएवोक्तः । स्विष्टकृदादिभेदपक्षे तु वनस्पतिना चरित्वा स्रुचावग्नीधे प्रदायाग्रेणाहवनीयमुत्तरतो गत्वा चयाणां शङ्गशफकुष्ठिकैर्यूषभिश्चाष्टावष्टावुपहोमान् जुहोति । तद्यथा । अष्टसु पात्रेषु एकैकशफकुष्ठिके निधाय

Digitized by Google

प्रथमपशुयूपस्था पूरयति । एवमष्टौ पात्राणि । अष्टमे शङ्कुं अप्यनुव्रजति । उद्गायता पात्रपङ्क्तिः कार्या । एवं द्वितीयस्याष्टौ । इति चतुर्विंशति पात्राणि संस्थाप्य वक्ष्यमाणमन्त्रैर्हुत्वा सम्पातान् ग्रहेष्ववनीय शफकुष्टिक्रमानौ प्रहरति । अष्टमषोडशचतुर्विंशतितमाहुतौ हूयमानायां शफकुष्टिकशङ्कूनामनुप्रहरणम् । प्रतियूपाहुतौ सम्पातानाश्विनपात्रे आनयति । उत्तराहुत्यष्टकसम्पातान् सारस्वतग्रहे । तृतीयाहुत्यष्टकसम्पातानैन्द्रग्रहेऽवनयतीत्यभिषेचनार्थम् । तत्र होममन्त्राः । सीसेन तन्त्रं मनसा मनीषिण ऊर्णासूत्रेण कवयो वयन्ति । अश्विना यज्ञं सविता सरस्वतीन्द्रस्य रूपं वरुणो भिषज्यन् स्वाहा ॥ १ ॥ अश्विभ्यां सरस्वत्या इन्द्राय सुत्राम्ण इदं न ममेति यजमानस्य त्यागः । सम्पातमवनीय कुष्टिक्रशफाश्मनावनुप्रहरति । एवं सर्वत्र । तदस्य रूपममृतं शचीभिस्तिस्रो दधुर्देवताः संरराणाः । लोमानि शष्पैर्बहुधा नतोक्मभिस्त्वगस्य मांसमभवन्न लाजाः स्वाहा ॥ २ ॥ सर्वत्र यथालिङ्गत्यागः । तत्तत्पशुदेवतानाम्नेति केचित् । तदश्विनाभिषजारुद्रवर्तनी सरस्वती वयति पेशो अन्तरः । अस्थिमज्जानं मासरैः कारोतरेण दधतो गवां त्वचि स्वाहा ॥ ३ ॥ सरस्वती मनसा पेशलं वसु नासत्याभ्यां वयति दर्शतं वपुः । रसंपरिस्रुता न रोहितं नग्नहुर्धीरस्तसरं न वेम स्वाहा ॥ ४ ॥ पयसा शुक्रममृतं जनित्रं सुरया मूत्राज्जनयन्ति रेतः । अपामतिं दुर्मतिं बाधमाना ऊवध्यं वातं सब्वं तदारात् स्वाहा ॥ ५ ॥ इन्द्रः सुत्रामा हृदयेन सत्यं पुरोडाशेन सविता जजान । यकृल्लोमानं वरुणो भिषज्यन्मतस्ने वायव्यैर्न मिनाति पित्तं स्वाहा ॥ ६ ॥ आन्त्राणि स्थालीर्मधु पिन्वमाना गुदाः पात्राणि सुदुघा न धेनुः । श्येनस्य पत्रं

नग्नो होता शचीभिरासन्दीनाभिहृदरं न माता स्वाहा ॥ ७ ॥ कुम्भो वनिष्ठुर्जनिता शचीभिर्यस्मिन्नग्रे योन्यां गर्भो अन्तः । प्लाशो व्यक्तः शतधार उत्सो दुहे न कुम्भी स्वधां पितृभ्यः स्वाहा ॥ ८ ॥ एते मन्त्रा आश्विनकुष्ठिकशफहोममन्त्रा इत्युच्यन्ते ।

१९३ अथ द्वितीयस्य । मुखं सदस्य शिर इत्सदेन जिह्वा पवित्रमश्विनासंसरस्वती ॥ चप्यन्न पायुर्भिषगस्य वालो वस्तिर्न शेपो हरसा तपस्वी स्वाहा ॥ १ ॥ अश्विभ्यां चक्षुरमृतं ग्रहाभ्यां छागेन तेजो हविषा शृतेन । पक्ष्माणि गोधूमैः कुवलैरुतानि पेशो न शुक्रमसितं वसाते स्वाहा ॥ २ ॥ अविर्न मेषो नसि वीर्याय प्राणस्य पन्था अमृतो ग्रहाभ्याम् ॥ सरस्वत्युपवाकैर्व्यानं नस्यानि बर्हिर्बदरैर्जजान स्वाहा ॥ ३ ॥ इन्द्रस्य रूपमृषभो बलाय कर्णाभ्यां श्रोत्रममृतं ग्रहाभ्याम् । यवा न बर्हिर्भ्रुवि केसराणि कर्कन्धु जज्ञे मधु सारघं मुखात् स्वाहा ॥ ४ ॥ आत्मन्नुपस्थे वृकस्य लोम मुखे श्मश्रूणि न व्याघ्रलोमम् । केशा न शीर्षन् यशसे श्रियै शिखा सिंहस्य लोमत्विषिरिन्द्रियाणि स्वाहा ॥ ५ ॥ अङ्गान्यात्मन्भिषजा तदश्विनात्मानमङ्गैः समधात्सरस्वती । इन्द्रस्य रूपं शतमानमायुश्चन्द्रेण ज्योतिरमृतं दधाना स्वाहा ॥ ६ ॥ सरस्वती योन्यां गर्भमन्तरश्विभ्यां पत्नी सुकृतं बिभर्ति । अपां रसेन वरुणो न साम्नेन्द्रं श्रियै जनयन्नप्सु राजा स्वाहा ॥ ७ ॥ तेजः पशूनां हविरिन्द्रियावत्परिस्रुता पयसा सारघं मधु । अश्विभ्यां दुग्धं भिषजा सरस्वत्या सुतासुताभ्याममृतः सोम इन्दुः स्वाहा ॥ ८ ॥ एते सारस्वतकुष्ठिकशफहोममन्त्रा इत्युच्यन्ते ॥

१९४ अथ तृतीयस्य । तथ सीसेन तन्त्रं मनसा मनीषिण इत्यादीनां षोडशाना मृचां द्वाभ्यां द्वाभ्यामृग्भ्यां एकैकाहुतिर्भवति ।

तद्यथा । सीसेन तन्त्रं मनसा मनीषिण ऊर्णासूत्रेण कवयो वयन्ति । अश्विना यज्ञं सविता सरस्वतीन्द्रस्य रूपं वरुणो भिषज्यन् ॥ तदस्य रूपममृतं शचीभिस्तिस्रो दधुर्देवताः संरराणाः । लोमानि शष्पैर्बहुधा न तोक्मभिस्त्वगस्य मांसमभवन्न लाजाः स्वाहा ॥ १ ॥ अनया रीत्या ऽष्टौ होमान् करोति । एते ऋग्द्वयात्मका मन्त्राः ऐन्द्रकुम्भिकशफहोममन्त्रा इत्युच्यन्ते ॥

१६५ अथा ऽध्वर्युः । मित्रोसि वरुणोसि । समहं विश्वैर्देवैः । इति द्वाभ्यां वाक्यमन्त्राभ्यां पूर्वं संपादितामासन्दीं यजमानायतने प्रतिष्ठापयति एतत्कर्म आसन्दीप्रतिष्ठापनमित्युच्यते ॥

१६६ ततः क्षत्रस्य नाभिरसि । क्षत्रस्य योनिरसि । एतद्वाक्यद्वयात्मकमन्त्रेण तस्यामासन्द्यां वास आस्तृणाति । एतदासन्द्यास्तरणमित्युच्यते ॥

१६७ चत्वारोपि वाक्यमन्त्रा आसन्दीप्रतिष्ठापने विनियुक्ता इति केचित् । तन्मते वासआस्तरणं न भवति । यजमानः स्योनामासीद । सुषदामासीद । मा त्वा हिंसीत् । मा मा हिंसीत् । इति वाक्यचतुष्टयात्मकेन मन्त्रेण उपविशति । एतदासन्द्युपवेशनमित्युच्यते ॥

१६८ अध्वर्युः निषसाद धृतव्रतो वरुणः पस्त्यास्वा । साम्राज्याय सुक्रतुः । इत्यृचा आसन्द्यामासीनं यजमानमभिमन्त्रयते । एतदासन्द्यासीनयजमानाभिमन्त्रणमित्युच्यते ॥

१६९ अध्वर्युः प्रत्यङ्मुखस्तिष्ठन् आसन्द्यामासीनं यजमानं आश्विनपात्रस्थसंस्रावेणाभिषिञ्चति । देवस्य त्वा सवितुः प्रसवेश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्यामश्विनोर्भैषज्येन तेजसे ब्रह्मवर्चसाया-

Digitized by Google

भिषिञ्चामीति मन्त्रेण । ततः सारस्वतपात्रस्थसंस्रावेणाभिषिञ्चति । देवस्य त्वा सवितुः प्रसवेश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्यां सरस्वत्यै भैषज्येन वीर्यायान्नाद्यायाभिषिञ्चामीति मन्त्रेण । ततः ऐन्द्रपात्रस्थसंस्रावेणाभिषिञ्चति । देवस्यत्वा० हस्ताभ्यां । इन्द्रस्येन्द्रियेण श्रियै यशसे बलायाभिषिञ्चामीति मन्त्रेण । तदनन्तरं कोसि कतमोसि । कस्मै त्वा कतमाय त्वा । इति वाक्यद्वयेन यजमानस्य हस्तौ सम्मृशति । एतद्यजमानहस्तसम्मर्शनमित्युच्यते ।

२०० व्यस्ताभिर्व्याहृतिभिस्तिस्रः स्रुवाहुतीर्जुहोति । तद्यथा । भूः स्वाहा । भुवः स्वाहा । सुवः स्वाहा यथालिङ्गत्यागो यजमानस्य । अयं व्यस्तव्याहृतिहोम इत्युच्यते ॥

२०१ यजमानो राजसूयवन्मङ्गलनाम्ना ह्वयति । अन्तःस्रावयन् । सुश्लोकाँ३इति सङ्ग्रहीतारम् । सुमंगलाँ३ इति भागदुघम् । सत्यराजाँ३इति क्षत्तारं । एतत्कर्म मङ्गलनामाह्वानमित्युच्यते ।

२०२ ततो यथालिङ्गमङ्गानि सम्मृशति । शिरो मे श्रीः । इति शिरः । यशो मुखम् । मुखम् । त्विषिः केशाश्च श्मश्रूणि । इति केशश्मश्रूणि । राजा मे प्राणोऽमृतम् । इति नासिकाम् । सम्राट् चक्षुः । इति चक्षुषी । विराट् श्रोत्रम् । इति श्रोत्रे । जिह्वा मे भद्रम् । इति जिह्वाम् । वाङ्महः इति वाचम् । मनो मन्युः । इति मनः । स्वराड्भाजः । इति हृदयललाटे । मोदाः प्रमोदा अङ्गुलीरङ्गानि । इत्यङ्गुलीरङ्गानि च । चित्तं मे सहः । इति चित्तम् । अभिसन्धाय हृदयम् । बाहू मे बलमिन्द्रियम् । इति बाहू । हस्तौ मे कर्मवीर्यम् इति हस्तौ ।

Digitized by Google

आत्मा क्षत्रमुरो मम । इति मध्यशरीरमुरश्च । पृष्ठीर्मे राष्ट्रमुदरमंसौ । इति पृष्ठमुदरमंसौ च । ग्रीवाश्च श्रोण्यौ । इति ग्रीवाश्श्रोण्यौ । ऊरू अरत्नी जानुनी । इत्यूरू अरत्नी जानुनी विशोमेऽङ्गानि सर्वतः। इति सर्वाङ्गानि। नाभिर्मे चित्तं विज्ञानम् । इति नाभिम् । पायुर्मे ऽपचितिर्भसत् । इति पायुम् । आनन्दनन्दावाण्डौ मे । इति वृषणौ । भगः सौभाग्यं पसः । इति प्रजननं । असम्भवतामभिसन्धाय जपेत् । एवम् यथालिङ्गमङ्गानि संस्पृश्याप उपस्पृशति । इदमङ्गसंस्पर्शनमित्युच्यते ॥

२०३ अथासन्द्याः प्रत्यवरोहति । जङ्घाभ्यां पद्भ्यां धर्मोस्मि । विशि राजा प्रतिष्ठतीति वाक्यद्वयेन मन्त्रेण । अवरुह्य जपति । प्रतिक्षत्रे प्रतितिष्ठामि राष्ट्रे । प्रत्यश्वेषु प्रतितिष्ठामि गोषु । प्रत्यङ्गेषु प्रतितिष्ठामि पुष्टे । प्रतिद्यावापृथिव्योः प्रतितिष्ठामि यज्ञे । एतत्कर्म आसन्दीप्रत्यवरोहणमित्युच्यते ॥

२०४ अथाध्वर्युराज्याहुतिं जुहोति । त्रयो देवा एकादश । त्रयस्त्रिंशाः सुराधसः । बृहस्पतिपुरोहिताः । देवस्य त्वा सवितुः प्रसवेऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्यामाहुतयो मे कामान् समर्धयन्तु स्वाहा ॥ देवेभ्य इदम्० इति यजमानस्य त्यागः । अध्वर्युः पुनराज्याहुतिं जुहोति । भूः स्वाहा । यजमानः अग्नय इदं न ममेति, यजमानस्य त्यागः । अथ यजमानो यथालिङ्गमङ्गानि सम्मृशति । लोमानि प्रयतिर्मम । इति लोमानि । त्वङ्म आनतिरागतिः । इति त्वचम् । मांसं म उपनतिः । इति जिह्वाम् । वस्वस्थि । मज्जा म आनतिः । इति मज्जानम् । लोमादीनि मज्जान्तान्यङ्गानि सम्मृश्याप उपस्पृशति । इदं लोमादिसम्मर्शनमित्युच्यते ॥

२०५ ततः चयनपक्षे स्विष्टकृतः पुरस्तान्मृत्युग्रहहोमो भवति ।
विद्युदसि विद्य० । वृष्टिरसि वृश्च० । अग्नीध्रः स्रुचावादाय
स्विष्टकृत्प्रभृति इडान्तैः पशुभिः प्रचरति । मृत्युग्रहभक्षश्च ।
अथैनान्पुरोडाशान्याचयति । ऐन्द्रमेकादशकपालम् । सावित्रं
द्वादशकपालम् । वरुणं दशकपालं च । अग्नीत्पुरोडाशानाह-
रेति प्रेषित आग्नीध्रो दक्षिणेनाज्यस्थालीमित्यादिरीत्या व्याहृ-
तिमन्त्रेण हवींष्यन्तर्वेद्यासादयति । यजमानः यन्मे अग्ने
इत्यादिनाऽभिमन्त्रयते । अप्रैषः सप्रैषो वा प्रचारः । अप्रैष
इति तु युक्तम् । अतएव होतुरादेशोऽपि भवति । अश्विनो-
रहन्देवयज्ययेन्द्रियावी भूयासम् । सरस्वत्या अहं देवयज्यया
स्वस्तिमान् पशुमान्भूयासम् । इन्द्रस्य सुत्राम्णोऽहन्देवयज्यया
धर्मभाग्भूयासम् । एतानि क्रमेण आश्विनसारस्वतैन्द्रयागानां
यजमानस्यानुमन्त्रणानि । सर्वेषां यागानामन्नादइत्येव वानुम-
न्त्रणम् । इडामार्जनान्ते तन्त्रेण स्विष्टकृदिडान्तम् इत्यापस्त-
म्बोक्तपक्षे अथ मृत्युग्रहभक्षः । गर्भिणीं वडवामश्वं वा ददाति ।
ततो हविरुच्छिष्टमुद्वासयति । चयनपक्षे मैत्रावरुण्यामिक्षया प्र-
चर्य वाजिनेनेष्ट्वा अग्नीदौपयानङ्गारानित्यादि करोति । समुद्रि-
तेस्त्रयाणां पशूनां गुदकाण्डैरुपयाजप्रचारो भवति । दिवं वो
धूमो गच्छत्वन्तरिक्षम्० पृणध्वं स्वाहेत्यूहः । यद्यक्तस्तदा
प्रकृतिवत् । सूक्तवाके यथालिङ्गमूहः । आज्यभागदेवतानन्तरं
अश्विनोरहमुज्जितिमनूज्जेषम् । सरस्वत्या अहमुज्जितिमनू-
ज्जेषम् । देवानामाज्यपानमित्यादि प्रकृतिवत् । चीणि समि-
ष्टयजूंषि भवन्ति । यजमानो विष्णुक्रमान् क्रान्त्वा व्रतं विसृज्य

यज्ञविमोकान्तं करोति । अथाध्वर्युः स्फ्यमुदपात्रं हृदयं शूल-
मित्यादि शूलोद्वासनान्तं कर्म करोति इदम् शूलकर्मेत्युच्यते ॥

२०६ अथावभृथेन चरन्ति । सामचैव नाहदेवीराप एष वो गर्भ इति
चेति बौधायनचरकसौत्रामणीसूत्रात् सौमिको ऽवभृथ इति
चेयम् । परिभोजनीयान्वेदं च कृत्वा पाणौ सम्मृश्याग्नीन्
परिस्तीर्य गार्हपत्यस्योत्तरतस्तृणेषु पात्राण्यासाद्योत्तरवेदिसमीपे
ब्रह्माणमुपवेश्य पृष्ठ्यास्तरणादि करोति । उत्तरवेदिसमीपे प्रणी-
तासादनम् । प्रोक्षणीभिर्वा संयवनम् । पुराणगार्हपत्ये निर्वा-
पादि । वरुणमेककपालं पुरोडाशं निर्वपति । आप्यनिनय-
नान्ते । प्रोक्षणीरासाद्य स्रुवं च स्रुचं च संमृज्य पत्नीं सन्नह्या-
ज्येनोदेहि इत्यध्वर्युराग्नीध्रं प्रेष्यति । प्रत्युष्टं रक्षः प्रत्युष्टा
अरातयोऽग्नेर्वोऽतेजिष्ठेन तेजसा निष्टपामीत्यूहितमन्त्रेण स्रुवस्रु-
चोर्निष्टपनम् । पत्नीं सन्नह्याज्यमवेक्षयित्वा यजमानं चाज्यम-
वेक्षयित्वाऽऽज्यं प्रकृतिवदुत्पुनाति । विष्णवसि वैष्णवं धामासि
प्राजापत्यम् । इत्यनेन मन्त्रेणाज्यमभिमन्त्रयते । स्योनं ते
सदनमित्यादिमन्त्रेण एककपालमाविः पृष्ठं कृत्वा यन्मे अग्ने
इत्यादिनाभिमन्त्रयते । आज्यस्थालीं स्रुवं जुहूं स्फ्यं बर्हिर्मु-
ष्टिमेककपालं पुरोडाशं प्रतिवसनीये वाससी सुराविपाणिग्रहपा-
त्राणि वालानि शततृणां स्थालीं हृदयशूलादीन्यादाय अन्त-
रेण चात्वालोत्करावुदङ्ङुपनिष्क्रामन्ति । द्वे स्रुती अशृणवं
पितृणामहं देवानामुत मर्त्यानाम् । याभ्यामिदं विश्वमेजत्स-
मेति यदन्तरा पितरं मातरञ्चेति मन्त्रेण । उरुं हि राजा वरु-
णश्चकार सूर्याय पन्थामन्वेतवाउ । अपदे पादाप्रतिधातवेऽक-

Digitized by Google

हुतायनाका हृदया विधश्चित् । इत्यनेन यथापस्तव यन्ति । न सामानि गायन्ति । शतन्ते राजन् भिषजः सहस्रमुर्वी गम्भीरा सु मतिष्टे अस्तु । बाधस्व दूरे निर्ऋतिं पराचैः कृतं चिदेनः प्रमुमुग्ध्यस्मत् । इत्यृचमसौ दृष्ट्वा जपन्ति । अपामन्तमधितिष्ठन्ति । अथ प्रविष्टुं दृष्यमूलेश्चरित्वा स्फ्येनोद्धृत्यावोद्य शुष्कस्य चार्दस्य च सन्धावित्यादि० वरुण नो मुञ्चेत्यन्तम् मूलानां कर्म करोति । तत उदकसमीपे दक्षिणापवर्गाणि वायव्यानि सादयन्ति । षड् महापात्राणि द्वौ द्रोणकलशौ । एकं कुम्भम् । दशापविचादि एतानि पात्राणि वायव्यानीत्युच्यन्ते ॥

२०० यस्ते देव वरुण गायत्रीछन्दाः पाशः । ब्रह्मन्प्रतिष्ठितः । तं त एतेनावयजे । इत्यनेन मन्त्रेण पर्णमयं सादयति । यस्ते देव वरुण त्रिष्टुप् छन्दाः पाशः । क्षत्रे प्रतिष्ठितः । तं त एतेनावयजे । एतावन्मन्त्रेण नैयग्रोधम् । यस्ते देव वरुण जगती छन्दाः पाशः । विशु प्रतिष्ठितः । तं त एतेनावयजे इति मन्त्रेणाश्वत्थम् । यस्ते देव वरुणानुष्टुप्छन्दाः पाशः । पशुषु प्रतिष्ठितः । तं त एतेनावयजे । इत्यनेन मन्त्रेण एतानृणयां स्थालीं महायां दक्षिणतः । तद्दक्षिणतस्तूष्णीं एतन्द्रोणकलशौ वालानन्यच्च यत्सोमावलिप्तं तत्सर्वं निदधाति । एतदवभृथीयवायव्यासादनमित्युच्यते ॥

॥ श्रीः ॥

॥ परिभाषेन्दुशेखरव्याख्याकाशिकाताण्डवम् ॥

(Continued from page 144. Vol. VII.)

अत एव कय्यटोपाध्यायैः कर्मणि द्वितीयेत्यादौ तत्रतत्र कृत्रिमग्रहणे कर्त्तरि कर्मेत्यादावकृत्रिमग्रहणे च तेनतेन रूपेण विशेषत उपायाः प्रदर्शिताः([1]) ।

अन्यथोभयगतिरित्येतदनन्तरं तत्तत्प्रमाणप्रदर्शनं व्यर्थमेव स्यात् ।

किं च सामान्येनोभयगतिरित्यस्मिन् वचने ज्ञापितेऽपि तत्रतत्र कृत्रिमस्याकृत्रिमस्योभयोर्वा ग्रहणे व्याख्यानस्यैवावश्यं शरणीकरणीयतया तेनैव व्याख्यानेन तदुपपत्तावुभयगतिरित्येतस्य वचनस्याश्रयणे गौरवातिरिक्तं न किमपि फलम् ।

अत एव महामहोपाध्यायश्रीसीरदेवमहाशयैरपीदं वचनं न स्वकीये परिभाषावृत्त्याख्ये ग्रन्थरत्ने परिभाषात्वेनोपन्यस्तम् ।

भाष्यकारैरपि नेदं परिभाषारूपेणोपन्यस्तम् । अपि तु तत्तद्व्याख्यानसिद्धार्थानुवादरूपेणैव । अन्यथाऽथ वेत्याद्विना प्रदर्शितस्य तृतीयसमाधानस्यासङ्गतिरेव स्यात् । तद्भाष्यस्यैतद्वचनप्रमाणोपन्यासपरतया व्याख्याने तु भवत्येकादिकायाः संख्याया इत्यादिभाष्याद्वाक्यभङ्गप्रसङ्ग इति दिगिति केचित् ॥ ९ ॥

([2])इत्संज्ञाप्रकरणात् तद्विषयपरिभाषामवतारयति । नन्वध्येते([3])ति ।

([4])कृत्रिमाकृत्रिमन्यायस्तु प्रासङ्गिक इति केचित् ॥

(१) प्रथमाध्यायप्रथमपादचतुर्थाह्निकान्तःस्थक्ङिति चेतिसूत्रभाष्यव्याख्यानावसर इति शेषः ॥

(२) पूर्वपरिभाषयाऽग्रिमपरिभाषायाः संगतिमाह ।

(३) नन्वध्येता अधितेत्यादावक्ङिति चेति ङित्त्वाद् गुणप्रतिषेधः स्यादत आह (कार्यमनुभवन् हि कार्यी निमित्ततया नाश्रीयते) ॥ सू० ॥

(४) उक्तरीत्या संगतिप्रदर्शने कृत्रिमन्यायस्य मध्ये लेखोऽनुचित इत्याशङ्कां परिहरति । अन्ये तु प्रागुक्तसंगतिप्रदर्शनेऽपि न काचित् क्षतिः कृत्रिमाकृत्रिमन्यायस्यापि कथं चिदित्संज्ञाविषयकत्वस्योपपादयितुं शक्यत्वात् । एवं च कृत्रिमाकृत्रिमन्यायस्य प्रासङ्गिकत्वानुप्रदर्शनेऽपि न दोष इति प्राहुः ॥

[1]अन्ये तु चतुर्दशसूत्रीसंबद्धां ततस्संज्ञासंबद्धां ततः क्क्ङिति चेतिपरिभाषासंबद्धामवतारयन्ति तन्न्यायेति । इत्थं तु सकलमूलभूतसूत्रपाठापेक्षयैव प्रवर्ततेऽयं ग्रन्थ इति भातीत्याहुः ।

तत्रैतदवतरणं स्यात् सङ्गतं यदि क्क्ङितीत्यस्य क्क्ङिन्निमित्ते ये गुणवृद्धी इत्यर्थः स्यादिति प्रथमं निरुक्तार्थस्य[2] फलमेव चिन्त्यते ।

तथाहि क्क्ङितीत्यस्यौपश्लेषिकाधिकरणार्थकसप्तमीघटितत्वे[3] भिन्धिकिव इत्यादावकिः क्क्ङिदव्यवहितपूर्वत्वाभावाद् गुणनिषेधानापत्तिः ।

क्किदाद्यव्यवहितपूर्वत्वमङ्गे अङ्गं च घटकतया कार्यिभूत इकि विशेषणमिति चे[4]त्तर्हि भवत इत्यत्रत्योकारस्यापि निषेधापत्तिः । नेनिक्त इत्यत्राभ्यासस्य गुणनिषेधापत्तिश्च ।

गुणनिषेधमात्रफलकेन क्कोः क्कित्वेनेग्विशेषणत्वेऽपि क्किदादेरेकवर्णव्यवधानेऽपि प्रवृत्तिरिति चेत् तर्ह्यपि भवत इति पूर्वोक्त एव दोषः[5] ।

एकस्य हल एवान्तराये प्रवृत्तिर्नाच[6] इतिकल्पनेऽपि अचैष्टामित्यादौ वृद्धिनिषेधापत्तिः[7] ।

(१) प्रकारान्तरेण संगतिं प्रदर्शयति ॥

(२) क्क्ङिन्निमित्ते ये गुणवृद्धी प्राप्नुतस्ते न भवत इति वार्त्तिककारोक्तस्य क्क्ङिति चेतिसूत्रार्थस्येति भावः ॥

(३) क्क्ङिति चेत्यस्य क्किदाद्यव्यवहितपूर्वत्वविशिष्टस्येको गुणादिर्न भवतीत्यर्थोऽङ्गीकार इति भावः ॥

(४) कार्यकालपक्षे पुगन्तेतिसूत्रघटकाङ्गपदार्थस्य संभवति कथं चित् प्रकृतशास्त्रजन्यवाक्यार्थघटकतेति भावः । अत एव (ननु च यस्य गुण उच्यते तं क्क्ङित्परत्वेन विशेषयिष्याम) इति प्रकृतसूत्रस्थं भाष्यं संगच्छते । कय्यटेन तु क्क्ङितीति प्रत्ययस्य ग्रहणात् तेनाङ्गस्याक्षेपादुक्तार्थलाभ इत्युक्तम् । युक्तं तु पुगन्तेतिसूत्रजन्यवाक्यार्थबोधे प्रकृतपरिभाषोपस्थाप्यक्क्ङित्पदार्थस्यापि विषयतया तस्यैव गुणविधायकस्य तथात्वं इति भिन्धि इत्यादौ न दोष इति भाष्याशयः । अत्रत्यग्रन्थस्तु क्क्ङितीत्येतद्भाष्यस्य स्वातन्त्र्येणाङ्गविशेषणत्वं कय्यटोक्तरीत्याऽभ्युपगम्यैव प्रवृत्त इति ॥

(५) भवत इत्यत्र भूधात्ववयवस्यैकः शब्कारेणैकेनैव तस्य व्यवहितत्वादिति भावः ॥

(६) क्कोः क्कित्वस्य विशेषापेक्षज्ञापकतया तथैव कल्पनादिति भावः ॥

(७) अचैष्टामित्यत्र सिचः सकारस्य हल एवैकस्य व्यवधानादिति भावः ॥

गुणस्यैवैकहल्व्यवाये निषेध इत्याग्रहे[1]ऽपि कर्तृशब्दादाचारक्विबन्तात् कर्त्रेक्विपि निष्पन्नात् कर्तृच्छब्दाण्णिचि कर्तयतीत्यादौ वृद्धिनिमित्तकगुणस्यापि निषेधापत्तिः[2] ।

पूर्वं तु[3] न गुणप्रवृत्तिर्निषेधाश्च बलीयांस इत्यन्तान्तरङ्गादपि निषेधप्राबल्यस्य ग्रन्थकृद्भिरेव वक्ष्यमाणत्वात् ।

एतेन धात्ववयवैकहल्व्यवधाने निषेधः प्रवर्तेत इति कल्पनेना[4]वेष्टामित्यादौ न दोष इत्यपास्तम्[5] ।

गुता अगुषीदित्यादौ डातिन्निमित्तकस्य गुणस्यानिषेधाच्च[6] ।

क्विबादिनिमित्तेत्यर्थाभावे कविरिवाचरति कवयतीत्यादौ शब्निमित्तकस्यापि गुणस्य क्विपि निषेधः स्यादिति तु नाशङ्क्यम् ।

बहिरङ्गतया गुणस्यासिद्धत्वेन निषेध्याभावेन निषेधाप्रवृत्तेः ।

एतेन[7] गुता अगुषीदित्यादौ तास्सिचोरपि गाङ्कुटादिसूत्रेण ङित्त्वात् तदव्यवहितपूर्वत्वस्य चोकारेऽबाधाच्च दोष इत्यपास्तम् ।

तासादिनिमित्तकनिषेधापेक्षया डादिनिमित्तकगुणस्य बहिरङ्गतयाऽसिद्धत्वेन निषेधाप्रवृत्तेः ।

पुगन्तेतिगुण एव[8] निषेद्धव्ये एकवर्णाव्यवधाने प्रवृत्तिर्नान्यस्मिन् गुणे वृद्धौ वेति कल्पनेऽपि दण्डिशब्दादाचारक्विबन्ताद् वनिपि दण्डेवा लघूप-

(१) क्ङिति चेत्येकशास्त्रोद्देश्यदलप्रविष्टेक्पदार्थस्य गुणस्याभिभूतस्य वृद्धिस्याभिभूतस्य च वैरूप्यस्यायुक्ततयाऽऽग्रहत्वमिति भावः ॥

(२) क्विब्निमित्तकस्य निषेधस्यापत्तिरित्यर्थः । क्विपः ककारधात्ववयवस्य ऋकारस्य च तकारमात्रस्यैव व्यवायसत्त्वादिति भावः ॥

(३) क्विबुत्पत्तेः पूर्वं तृजुत्पत्त्यव्यवहितोत्तरमेवेत्यर्थः ॥

(४) क्नोः कित्त्वेन ज्ञापकसाजात्यात्तादृशार्थस्यैव कल्पनेनेत्यर्थः ॥

(५) कर्तयतीत्यत्रत्यतकारस्य धात्ववयवत्वेन तत्र निषेधस्य दुर्वारप्रवृत्तिकत्वादिति भावः ॥

(६) तासप्रत्ययावयवसकारस्य सिचः सकारस्य च धात्वनवयवत्वादिति भावः । तास्सिज्निमित्तकस्य निषेधस्य यथा न प्रवृत्तिस्तथोपपादयिष्यतेऽनुपदमेव ॥

(७) निषेध्यस्य बहिरङ्गत्वे निषेधप्रवृत्त्यभावस्य युक्त्या व्यवस्थापितत्वेन, गुतेत्यादौ निषेध्यनिषेधकयोर्बहिरङ्गान्तरङ्गभावस्य वक्ष्यमाणपङ्क्त्या संगमयिष्यमाणत्वेन चेत्यर्थः ॥

(८) असिद्धधीतिक्नोः कित्त्वस्य तद्विषय एव वैयर्थ्येन विशेषापेक्षज्ञापकत्वेनेत्यादिः ।

धगुणः, उपधात्वे कर्तव्ये नलोपस्यासिद्धत्वात्(१)। सार्वधातुकेतिगुणस्य तु न प्राप्तिरङ्गत्वे कर्तव्ये नलोपस्यासिद्धत्वेने(२)गन्तस्याङ्गत्वाभावात्। दण्डेवशब्दादाचाराणयन्तात् कर्तृक्विपि दण्डेव् इत्यादौ निषेधापत्तिः(३)।

निषेधे तु न नलोपस्यासिद्धता येन वर्णद्वयव्यवायः स्यात्, संज्ञाविधित्वाभावात्।

अत्र पूर्वमेव(४) गुणस्तु न निषेधानां बलवत्त्वात्।

णिलोपस्य स्थानिवत्त्वमपि न, क्वौ विधिं प्रति न स्थानिवदित्यस्य सार्वत्रिकतया क्विनिमित्तके निषेधे कर्तव्ये स्थानिवत्त्वाप्रवृत्तेः।

यदि तु लोपो व्योर्वलीत्यस्यापि क्वौ विधित्वात् तस्मिन्नपि णिलोपस्य स्थानिवद्भावाभावात् प्रकृते वलोपः स्यादित्युच्यते।

तदापि दण्डिशब्दादाचारक्विबन्तात् तृचि दण्डितृशब्दादाचाराणयन्तात् कर्तृक्विबन्ताद् दण्डेच्छब्दादाचारक्विपि तिङि दण्डेतनीत्यादावुक्तरीत्ये(५)व गुणनिषेधापत्तिः।

संयोगसंज्ञायां नलोपस्यासिद्धतया संयोगान्तलोपस्तु नाशङ्क्यः।

आचारक्विबादीनां प्रातिपदिकप्रकृतिकतया सुपः प्रागेव प्रवृत्त्या पदत्वाभावादिति दिक्(६)।

कार्यमनुभवन्निति। यद्यपि प्राचीनैर्न हि कार्यी निमित्ततयाऽऽश्रीयत इत्येव परिभाषा पठिता(७)। तथापि तत्रनिमित्त्वर्थीयोऽतिशयार्थोऽतिशयश्च कार्यानुभव एवेत्याशयेन फलितमुक्तं कार्यमनुभवन्निति।

(१) नलोपः सुप्स्वरेत्यनेन संज्ञाविधौ नलोपासिद्धत्वस्य परिसंख्यानादित्याशयः॥

(२) अङ्गत्वस्यापि संज्ञात्वेन तत्रापि कर्तव्ये नलोपःसुबितिपरिसंख्यातनलोपासिद्धत्वस्य दुर्वारत्वादिति भावः॥

(३) क्विनिमित्तकस्य निषेधस्यापत्तिरित्यर्थः॥

(४) क्विबुत्पत्तेः पूर्वं वनिप्प्रत्ययोत्पत्त्यव्यवहितोत्तरमेवेत्यर्थः॥

(५) क्वौ विधिं प्रतीत्यनेन णिलोपादेर्न स्थानिवद्भावः पूर्वं तु न गुणप्रवृत्तिर्निषेधानां बलवत्त्वादित्युक्तरीत्येत्यर्थः॥

(६) अत्रत्यदिगितिपदस्यार्थस्तु प्रकृतपरिभाषाव्याख्यावशेषेऽकार्यहस्तादव यत्र वस्तुत इत्यादिना ग्रन्थसंदर्भेण स्फुटीभविष्यतीति तत्रैव द्रष्टव्यम्॥

(७) महामहोपाध्यायश्रीसीरदेवादिनिर्मितपरिभाषावृत्त्यादिनामकेषु प्राचीनतरग्रन्थेष्विति शेषोऽत्र बोध्यः॥

हन्तेरतिशयितसम्बन्धार्थत्वे मानं तु यङि चेतिसूत्रस्थं भाष्यम्(१) । तत्र हि यङ्प्रकरणे हन्तेर्हिंसायामीड् वक्तव्य इत्युक्तावप्यभ्यासरूपं न सिध्यतीतीड् वक्तव्य इत्युक्त्वैवमप्युपधालोपो न प्राप्नोतीति घ्नीभावो वक्तव्य इत्युक्तम् ।

सामान्यतः(२) कार्यविधायकशास्त्रीयोद्देश्यताश्रयस्य निमित्तत्वेनाऽनाश्रयणे तु जेघ्नीयत इत्यादौ सन्यङोरित्येतच्छास्त्रीयोद्देश्यतायाः कथंचिद् यङ्यपि सत्त्वेन तस्य च द्वित्वनिमित्तत्वेनानाश्रयणादीट्पक्षेऽपि द्विर्वचनेऽचीत्यस्याप्रवृत्त्याऽभ्यासरूपासंपत्त्युक्तिरसंगतैव स्यात् । कार्यानुभवकर्तृत्वं तस्य(३) नास्तीति तु स्पष्टमेवेति केचित् ।

(४)अन्ये तु दुद्यूषतीत्यादावूठ्निष्पन्नौकारस्य द्वित्वनिमित्ततयाऽनाश्रयणाद्द्वारा द्विर्वचनेऽचीत्यस्याप्रवृत्तये प्रकृतपरिभाषायां कार्यानुभवकर्तृत्वं सांभावनिकमपि ग्राह्यम्, इत्थं च दुद्यूषतीत्यादावपि यद्यत्र यण् प्रवर्तेत तर्ह्यूठो द्वित्वकार्यानुभवः स्यादितिसंभावनायाः सत्त्वेन तस्य निमित्ततयाऽनाश्रयणे न दोषः ।

एवं जेघ्नीयत इत्यत्रापि सांभावनिककार्यानुभवकर्तृत्वस्य तत्रासत्येटो निमित्ततयानाश्रयणे द्विर्वचनेऽचीत्यस्याप्राप्त्या भाष्यासङ्गति(५)रत्रेनेर-

---

(१) एतच्च भाष्यं सप्तमाध्यायतुरीयपादप्रथमाह्निकान्तःस्थमिति बोध्यम् ॥

(२) कार्यानुभवकर्तृत्वत्वावच्छिन्नस्वरूपसंबन्धावच्छिन्नप्रकारतानिरूपितविशेष्यत्वानाश्रयस्य, तादात्म्यसंबन्धावच्छिन्नकार्यानुभवकर्तृत्वावच्छिन्नप्रकारतानिरूपितविशेष्यत्वानाश्रयस्य वा कार्यविधायकशास्त्रीयोद्देश्यताश्रयस्य प्रकृतपरिभाषाघटककार्यिपदजन्यबोधविषयत्वप्रकारकतात्पर्यविशेष्यत्व इति तात्पर्यम् ॥

(३) द्वित्वनिमित्तत्वेनाशिश्रीषितस्य यङवयवस्येट इत्यर्थः ॥

(४) प्रकृतपरिभाषायां कार्यानुभवकर्तृत्वनिवेशे बीजान्तरप्रदर्शनाय पूर्वोक्तबीजं दूषयितुं प्रथमं प्रकृतपरिभाषाया अर्थं परिष्कुरुते ॥

(५) यङ ईटि कृते द्विर्वचनेऽचीति निषेधाद् द्वित्वात् प्रागुपधालोपाऽप्रवृत्त्या हनग्रहणस्यैव द्वित्वे ईकारविशिष्टमभ्यासरूपं न सिध्येदित्याशयकस्य प्रागुदाहृतस्या"भ्यासरूपं न सिध्यती"तिभाष्यस्यासङ्गतिरित्यर्थः । यद्यपि कैयटोपाध्यायादिभिरकृतव्यूहपरिभाषाया अङ्गीकृतत्वात् तस्याः प्रवृत्तौ निमित्तविनाशसंभावनाया अपि निमित्तत्वस्य सत्त्वाद्दूरेव तत्परिभाषायामेवान्तरङ्गानपि विधीन् बहिरङ्गो लुग्बाधत इत्यादिसंवादाय आवश्यकतया दुद्यूषतीत्यादावपि यदि द्वित्वात् प्राग् यण् स्यात् तदौकारस्य द्वित्वकार्यानुभवेन द्वित्वनिमित्तत्वं व्याहन्येतेति द्विर्वचनेऽचीत्येतच्छास्त्रनिमित्तविनाशसंभावनायाः

Digitized by Google

तिशयार्थत्वेऽपि तदवस्थैवेति तद्भाष्यं[1] नेनेरतिशयार्थत्वे बीजं प्रत्युत तद्भाष्यं प्रकृतपरिभाषाया अनित्यत्वे बीजम् ।

[2]अत एव शाधि जहीत्यादौ कार्यानुभवकर्तुरपि कार्यिणो निमित्ततयाश्रयणेन शादेशधिभावयोर्जादेशहिलुकोश्च समानाश्रयतयाऽसिद्धवत्सूत्रप्रवृत्तिः ।

[3]इनेरतिशयार्थत्वे मानं तु द्विर्वचनेऽचीतिसूत्रस्थं भाष्य[4]मेव ।

तत्र हि अचीत्यस्य रूपातिदेशे ज्ञापकत्वमुक्त्वा "अचीत्यस्यैतत् प्रयोजनमिह माभूत् जेघ्रीयते देध्मीयते । कार्यातिदेशे नार्थोऽज्ग्रहणेन[5] भवत्येवात्र द्विर्वचन"मित्यादिना ।

सत्त्वेनाकृतव्यूहपरिभाषयैव दुद्यूषतीत्यादौ द्विर्वचनेऽचीत्यस्याप्रवृत्तौ न हि कार्यीत्यस्यां परिभाषायां सांभावनिककार्यानुभवकर्तृत्वाश्रयणस्य नोपयोगः, तथापि प्रकृतमूलग्रन्थस्य ग्रन्थकाररीत्यैव योजनप्रकारस्य युक्ततरतया शेखरकारेण चाकृतव्यूहपरिभाषायास्तिरस्कृततयोक्तोदाहरणे द्विर्वचनेऽचीत्येतत्प्रवृत्तिप्रतिबन्धे तत्परिभाषाप्रवृत्तिसाध्यत्वस्य वक्तुमशक्यत्वेन न हि कार्यीत्यत्र कार्यानुभवकर्तृत्वस्य सांभावनिकस्यापि ग्रहणमावश्यकमित्येवाशयः । प्राचीनरीत्याऽकृतव्यूहपरिभाषास्वीकारे तयैव परिभाषया जेघ्रीयत इत्यत्रेदंपक्षे द्विर्वचनेऽचीत्यस्याप्रवृत्तौ प्रागुक्तं भाष्यमसंगतमेवेति. वाशयः ॥

(१) अभ्यासरूपं न सिद्ध्यतीति प्रागुक्तं सप्तमाध्यायचतुर्थपादप्रथमाह्निकान्तःस्थं यङि चेतिसूत्रस्थं भाष्यमित्यर्थः । एवमग्रेपि तद्भाष्यमितिपदस्यार्थोऽवसेयः ॥

(२) न हि कार्यो निमित्ततयाऽऽश्रीयत इत्यस्याः परिभाषाया अनित्यत्वस्य फलं निरूपयितुमुपक्रमते ॥

(३) प्रकृतपरिभाषाघटककार्यिपदघटकस्येन्प्रत्ययस्यातिशयार्थत्वे प्रागुक्तं मानं दूषितमिति तत्र मानान्तरमुपन्यस्यति ॥

(४) प्रथमाध्यायप्रथमपादाष्टमाह्निकान्तःस्थमेतद् भाष्यम् ॥

(५) कार्यातिदेशे द्विर्वचनेऽचीत्यनेन क अतुस् इत्यवस्थायां कतयणः कशब्दस्यानचकत्वाद् द्वित्वाप्राप्तावतिदेशबलाद् द्वित्वप्रवृत्तावप्यभ्यासेऽचः अवणं चक्रतुरित्यत्र न स्यादितिदोषोद्धाराय रूपातिदेशोऽङ्गीकृतः । तत्पक्षे तु कृतेऽपि यणि कइत्याकारकस्थानिरूपस्यातिदेशात् कशब्दस्यैव द्वित्वमिति न दोषः । तत्र ज्ञापकं प्रकृतसूत्रस्थमचीति, तथाहि रूपातिदेशे ईघ्राध्मोरित्यस्य द्वित्वात् पूर्वं प्रवृत्तावपि घ्राध्मेत्याकाररूपस्यातिदेशेऽभ्यासे ईकारो न भवेत् प्रविष्ट इति तद्दोषपरिहाराय भवत्यचीति सार्थकम् । कार्यातिदेशपक्षे तु द्विर्वचनेऽचीत्यस्य द्वित्वप्रवर्त्तनमात्रफलकतया जेघ्रीयत इत्यादौ च कृतेऽपीकारादेशे साच्कतया द्वित्वप्रवृत्तेरप्रतिहततया तत्र द्विर्वचनेऽचीत्येतस्य प्रवृत्तावप्रवृत्तौ वा न किमपि वैलक्षण्यमित्यचीति व्यर्थमेव स्यादिति । तदेवाह भवत्येवात्र द्विर्वचनमिति ॥

([1])कार्यमननुभवतोऽपि कार्यिणो निमित्ततयानाश्रयणे तु यङो निमित्ततयाऽनाश्रयणादज्ग्रहणाभावेऽपि रूपातिदेशेऽपि द्विर्वचन इत्यस्याप्रवृत्त्याऽज्ग्रहणस्य रूपातिदेशज्ञापकताऽसङ्गतैव([2]) स्यात् ।

([3])यङ्घटकयकारस्य कार्याननुभवस्तु स्वरान्तरे व्यञ्जनान्युत्तरस्येति प्रातिशाख्योक्तरीत्या स्पष्ट एवेति स्पष्टं तत्रैव विवरणे ।

यद्यपीदं भाष्यं([4]) द्विर्वचन इत्यस्यैकशेषस्यार्थेऽभिधास्यमानतया तद्बुद्ध्या प्रवृत्तमित्येवापाततः प्रतीयते । एवं([5]) तु अचीत्यस्याभावे रूपातिदेशेऽङ्गीकृते जेघ्रीयत इत्यादौ रूपातिदेशप्राप्तेरुक्तत्या तद्वारणायाचीत्यस्य सार्थक्यं रूपातिदेशज्ञापकत्वं च भाष्योक्तं निर्बाधम् । प्रकृतपरिभाषायास्तु तत्र विषयाभावेना([6])नेनेरतिशयार्थत्वे तद्भाष्यप्रमाणकत्वं दूरापास्तमेव ।

([7])तथापि सिद्धान्ते([8]) द्विर्वचनपदे एकशेषस्वीकारे रूपातिदेशे

---

(१) प्रागुक्तभाष्यस्य प्रकृतपरिभाषाघटककार्यिपदघटकेनेरतिशयार्थत्वे प्रामाण्यं स्फुटयति ॥

(२) भाष्योक्तज्ञापकताऽसङ्गतैव स्यादित्यर्थः । ज्ञापितेऽपि रूपातिदेशे जेघ्रीयत इत्यादावनयैव परिभाषया द्विर्वचनेऽचीत्यस्याप्राप्तौ तत्र तच्छास्त्रप्रवृत्तिप्रतिबन्धकतया प्रकृतसूत्रस्याज्ग्रहणचारितार्थ्यस्य वक्तुमशक्यत्वेन भाष्योक्तज्ञापकत्वासङ्गतिरेवेति भावः ॥

(३) नन्वेतद् भाष्यं प्रकृतपरिभाषाघटकस्येनेरतिशयार्थत्वेऽप्यनुपपन्नमेव । घ्राधातोरेवाच्त्वेन द्वित्वकार्यानुभवकर्तृत्वेन तद्घटकयकारस्य कार्यानुभवकर्तृत्वाभावस्य वक्तुमशक्यतया प्रकृतपरिभाषाप्रवृत्तौ ज्ञापितेऽपि रूपातिदेशेऽज्ग्रहणवैयर्थ्यस्य दुष्परिहरत्वादित्यत आह ॥

(४) प्रकृतसूत्रस्याज्ग्रहणस्य रूपातिदेशज्ञापकत्वोपपादनपरं प्रकृतसूत्रव्याख्यानोपक्रमस्थं भाष्यम् ॥

(५) सूत्रस्थद्विर्वचनपदस्यावृत्त्याद्यनभ्युपगमे द्वित्वे कर्तव्येऽजादेशः स्थानिवत् स्यादित्येतावत्येव सूत्रस्यार्थेऽङ्गीकृत इत्यर्थः । द्विर्वचन इत्यस्यावृत्त्याद्यनभ्युपगमे द्विर्वचनेऽचीत्येतत्प्रवृत्तौ द्वित्वनिमित्तपरत्वस्याप्रयोजकतया प्रकृतपरिभाषायामिनेरतिशयार्थकत्वाभावे प्रकृतपरिभाषया जेघ्रीयत इत्यत्रत्ययङ्घटकयकारस्य द्वित्वनिमित्ततयाऽनाश्रयणेऽपि द्विर्वचनेऽचीतिसूत्रप्रवृत्तेरप्रतिहतत्वादिति भावः ॥

(६) द्विर्वचपदस्यावृत्त्याद्यनभ्युपगमे जेघ्रीयत इत्यत्र प्रकृतपरिभाषाप्रवृत्तेः प्रकृतसूत्रप्रवृत्तिप्रतिबन्धकत्वाभावात् फलाभावात् प्रकृतपरिभाषायाः प्रवृत्त्यभावेनेत्याशयः । यद्वा शास्त्रघटकं निमित्तत्वप्रकारकबोधजनकं पदं कार्यिभिन्नतात्पर्यकमिति प्रकृतपरिभाषाया अर्थः, एवं च शास्त्रघटकस्य प्रकृते कस्यापि पदस्याभावेन न प्रकृतपरिभाषाया विषय इत्याशयः ॥

(७) यद्यपीत्यादिना संदर्भेण निरस्तमपि प्रकृतभाष्यस्य प्रकृतपरिभाषाघटकस्येनेरतिशयार्थप्रामाण्यं पुनः स्थापयितुमुपक्रमते ॥

(८) सिद्धान्तिसंमत इत्यर्थः ॥

ज्ञापकान्तरानुक्त्याऽचीत्यस्य व्यावर्त्यान्तराप्रदर्शनेन च सिद्धान्ते[1]ऽप्यज्ग्रहणस्यैव रूपातिदेशज्ञापकत्वं जेघ्रीयत इत्यादेरेव चाज्ग्रहणव्यावर्त्यत्वमित्येवास्माद् भाष्यात् प्रतीयते ।

इत्थं चोक्तभाष्यप्रमाणकत्वमुक्तरीत्येनेरतिशयार्थकत्वे सुस्थिरमेव ।

[2]यदि तु एकाचो द्वे इति सूत्रभाष्यो[3]क्ते नटभार्यावद् व्यञ्जनानीति पक्षे यङवयवयकारस्यापि कार्यानुभवकर्तृतयाऽज्ग्रहणाभावेऽपि सिद्धान्त एकशेषस्वीकारे[4] तत्र रूपातिदेशाप्रवृत्त्या[5] जेघ्रीयत इत्यस्याज्ग्रहणव्यावर्त्यत्वमज्ग्रहणस्य रूपातिदेशज्ञापकत्वं चैतत् परिभाषास्वीकारेऽसङ्गत[6]मित्युच्यते । तर्हि ज्ञापकसाजात्यादेवेनेरतिशयार्थत्वम् ।

[7]नटभार्यावदितिकल्पेऽचीत्यस्य व्यावर्त्यं त्वधिजगे[8] इति । अत्र हि अचीत्यस्याभावे गाङ्लिटीत्यत्र द्विलकारकप्रश्लेषेण तस्य लावस्थायामेव प्रवृत्तावपि रूपातिदेशप्रवृत्तावुक्तरूपानिष्पत्तिः ।

[9]स्थानिवद्भावमात्रस्वीकारे तु अचीत्यस्याभावे तत्र स्थानिवत्त्वप्रवृत्तावप्युक्तरूपस्य सिद्धावचीति व्यर्थमेवे[10]ति तस्य रूपातिदेशज्ञापकतापि।

---

(१) सिद्धान्तिसंमते द्विर्वचनपदस्यैकशेषादिनाऽर्थद्वयबोधकत्वस्वीकार इत्यर्थः ॥

(२) प्रकृतपरिभाषाघटकस्यैनेरतिशयार्थत्वे प्रमाणान्तरं प्रदर्शयितुमुपक्रमते ॥

(३) षष्ठाध्यायप्रथमपादप्रथमाह्निकान्तःस्थमेतद् भाष्यम् ॥

(४) द्विर्वचनेऽचीतिसूत्रघटकद्विर्वचनपद इति शेषः ॥

(५) प्रकृतपरिभाषाघटकस्यैनेरतिशयार्थत्वे तदभावे वोभयथापि प्रकृतपरिभाषाप्रवृत्तौ सूत्रघटकद्विर्वचनपदेन यङवयवयकारस्याग्रहणेनेति भावः ॥

(६) एवं चेदं भाष्यं षाष्ठभाष्योक्तपक्षविरुद्धपक्षमवलम्ब्य प्रवृत्तमित्येकदेश्युक्तित्वं बोध्यम् । एतेनैतद्भाष्यविरोधात् प्रकृतपरिभाषाया लक्ष्यसिद्ध्युपयोगित्ववर्णनमयुक्तमेव ग्रन्थकाराणामित्यादि वदन्तः समाहिता इति केचित् ॥

(७) षाष्ठभाष्योक्तपक्षेऽप्यचीत्यस्य सार्थकत्वमुपपादयितुमुपक्रमते ॥

(८) अचीत्यस्याभावे द्वित्वनिमित्ते योऽजादेशः स स्थानिवत् स्यादित्येव सूत्रस्यार्थः स्यादिति गाङादेशस्यापि स्थानिवद्रूपं स्यात् । अज्ग्रहणसत्त्वे तु गाङ्लिटीत्यत्र द्विलकारकनिर्देशेन गाङो द्वित्वनिमित्तेऽजादेशत्वाभावाच्च स्थानिवद्रूपत्वमिति भावः ॥

(९) सूत्रस्यास्याचीत्यस्य रूपातिदेशपक्ष एवाधिजग इत्यादौ दोषवारकतया चारितार्थ्यं नान्यथा । एवं च तस्यैवाचीत्यस्य रूपातिदेशज्ञापकत्वमपि । ततश्च षाष्ठभाष्योक्तपक्षावलम्बेऽपि न प्रकृते कापि सिद्धान्तसिद्धवस्तुक्षतिरिति तात्पर्यं बोध्यम् ॥

(१०) ननु द्विर्वचनइतिसूत्रस्यास्याचीत्यस्याभावे भस्धातोः क्तुप्रत्यये घसिभसोर्हलि चेत्युपधालोपे कृते तस्य स्थानिवद्भावाद् द्वित्वं स्यादिति तद्वारणाय तत् सार्थक-

(१)अत्रीयत इति भाष्यं तु स्वरान्तर इति प्रातिशाख्योक्तमतमव-लम्ब्यैव प्रवृत्तमिति स्पष्टं तत्रैव विवरणे ।

(२)किं च चक्रतुरित्याद्यर्थमचस्स्थानिवत्कार्याद्(३) द्वित्वस्य पूर्वविप्रति-षेध आरब्धव्यो द्विर्वचनेऽचीति योगो वारम्भणीय इति विचारे, पूर्वविप्रति-षेधस्यान्तरङ्गापेक्षया प्राबल्यबोधकत्वेऽनौचित्येन(४) विभवनीयिषतीत्याद्य-सिद्ध्या च परापेक्षयैव प्राबल्यबोधकत्वमिति चुक्षावयिषतीत्याद्यसिद्धिरिति ओदौदादेशस्योद् भवति चुटुतुशारादेरभ्यासस्ये(५)ति भवता वक्तव्यमिति

मिति कथं तस्य भाष्योक्ता रूपातिदेशज्ञापकता संगच्छेतेति चेन्न । तत्र द्वित्वे कृतेऽकृते वा रूपे वैलक्षण्यात् । उपधालोपादीनां छान्दसतया छन्दसि चापाठमानरूपाभावेन दोषाभावाच्चेति स्पष्टं प्रकृतसूत्रस्थप्रदीपोद्द्योतयोः ॥

(१) प्रामाणिकयोरुभयोरपि व्यञ्जनविषयकयोः पक्षयोरचीत्यस्य सार्थकत्वेऽप्येकतरपक्षावलम्बनेन तस्य सार्थकत्वप्रदर्शनं नैकदेशयुक्तितामनुमापयितुमीष्ट इति प्रागुपपादितं प्रकृतभाष्यप्रमाणकत्वं प्रकृतपरिभाषाघटकस्यैनेरतिशयार्थत्वे युक्तमेवेत्याशयवानाह ॥

(२) प्रथमाध्यायप्रथमपादाष्टमाह्निकान्तर्गतद्विर्वचनेऽचीतिसूत्रस्थमेव भाष्यान्तरं प्रकृतपरिभाषाघटकस्यैनेरतिशयार्थत्वे प्रमाणमित्याशयेनाह ॥

(३) यद्यपि द्विर्वचनं यणयवायावादेशाल्लोपणिलोपकिकिनोरुत्त्वेभ्य इत्येव पूर्वविप्रतिषेधवार्त्तिकं पठितम् । तथापि पूर्वविप्रतिषेधारम्भकत्वे द्वित्वात् प्राग् निन्युरित्यत्रेयङो अल्लावित्यत्र वृद्धिरेचीति वृद्धेश्चाप्रवृत्तये पूर्वविप्रतिषेधबोधकवार्त्तिकघटकयणादिपदमचस्स्थानिवत्कार्यमात्रोपलक्षणमिति तत्रैवोद्द्योते स्पष्टमित्याशयः ।

(४) विप्रतिषेधपदस्य तुल्यबलविरोध एव प्रसिद्धेरन्तरङ्गबहिरङ्गयोस्तदसंभवादिति भावः । ननु प्रकृतभाष्योक्तविप्रतिषेधपदस्य न तुल्यबलविरोधपरत्वं किं तु सामान्येन विरोधमात्रतात्पर्यकत्वमेव, अन्यथा चक्रतुरित्यादौ यणादीनां नित्यतया द्वित्वेन सह प्रसिद्धविप्रतिषेधासंभवेन वार्त्तिककारोक्तेरसंगतिरेव स्यादित्यत आह । विभवनीति । अयं भावः । प्रकृतभाष्योक्तविप्रतिषेधपदस्य विरोधमात्रपरत्वेऽपि न्यूनबलस्य नित्यस्य बाधनबोधनेन वार्त्तिकस्य चारितार्थ्यात् तदधिकबलस्यान्तरङ्गस्य बाधबोधने वार्त्तिककारतात्पर्यकल्पनमप्रामाणिकम् । ततश्च विभवनीयिषतीत्यादि सिध्यति । अत एव चुक्षावयिषतीत्यादिसिद्धय उदादेशविधायकमुत्तरवार्त्तिकं सार्थकमन्यथान्तरङ्गत्वादपि द्वित्वस्य पूर्वं प्रवृत्तौ व्यर्थमेव तत् स्यादिति ॥

(५) ओदौतोरादेशो यस्मिन्नङ्गे तस्य योऽभ्यासश्चवर्गाद्यादिस्तदवयवस्यात उत्वमित्यर्थ इति प्रदीपकारविवरणकारौ । अन्ये तु चवर्गाद्यादेरभ्यासस्यावयवो य ओदौतोरादेशस्तस्योत्वमित्यर्थः, चुक्षावयिषतीत्यत्राभ्यासावयवाकारमात्रस्योकारादेशत्वं चापर्यालोचना बोध्यम्, पुस्फारयिषतीत्यत्र तु पर्यायस्याप्यभ्यासावयवाकारस्योकारनिरूपितादेशताभावात्, उभयविधोऽप्यादेशः प्रकृतवार्त्तिकस्थादेशशब्देन गृह्यते, वार्त्तिकमेतदन्यथा व्यर्थं स्यादित्याहुः । अस्य च वार्त्तिकस्य सत्त्वेव प्रवृत्तिः, द्विर्वचनेऽचीतिसूत्रारम्भपक्षेऽ

सूत्रारम्भवादिनोक्ते (¹)ऽस्मन्मते बिभावयिषतीत्यादावन्तरङ्गत्वाद् वृद्ध्यादौ कृते ततो द्वित्वे पवर्गाद्यभ्यासाभावाच्च द्वितीयवार्त्तिकस्येकारविधायकस्याप्रवृत्तौ सन्यत इतीत्त्वेनोक्तरूपसिद्धौ सौत्रस्य जुधातेर्जिजावयिषतीत्यस्य सिद्धये जोर्नेति द्वितीयवार्त्तिकापवादस्य वक्तव्यत्वे(²)ऽपि चोः प्वीति सूत्रं न कार्यमिति यथा सूत्रारम्भवादिना भवता पिपविषते यियविषतीत्यादौ द्विर्वचनेऽचीत्यनेन रूपातिदेशे सन्यत इत्यस्याप्राप्तौ प्वीत्यारभ्यते एवं ममापि ति चेत्यस्योत्तरमोदादादेशस्य चुटुतुशरादेरितियोगकरणेन द्वितीयवार्त्तिकविधेयकार्य(³)निर्वाहे पूर्वविप्रतिषेधेन(⁴) च द्विर्वचनेऽचीत्येतत्साध्यकार्यनिर्वाहे नाधिकवचनारम्भप्रयुक्तं गौरव(⁵)मित्यभिप्रायवता पूर्वविप्रतिषेधारम्भवादिना स्वमते गौरवाभावे प्रदर्शिते, सूत्रारम्भवादिना सिद्धान्तितम् "त्वयापीत्त्वं वक्तव्यम् यत् समानाश्रयं तदर्थं"मिति ।

तस्यायमाशयः । पिपविषते यियविषतीत्यादौ गुणादेरन्तरङ्गत्वाभावात् पूर्वविप्रतिषेधेन द्वित्वे तदर्थमवश्यमित्त्वं वक्तव्यमेवं च पूर्वविप्र-

---

सह फलैक्याय विशेषविषयत्वावश्यकत्वात् । तेन दिद्यवनीयिषतीत्यादावधिकव्यवधाने नाभ्यासस्योत्त्वम् । णिचो व्यवधाने तु वचनारम्भसामर्थ्यात् प्रवर्त्तते । चिच्छासतीत्यादौ तु नैतस्य प्रवृत्तिः, ओकारसाहचर्येणौकारस्यापि लाक्षणिकस्यैव ग्रहणात् । ओदादेशसाहचर्येणौदादेशस्यादेशस्यैव ग्रहणाद्वा । टवर्गसाहचर्येण तवर्गाद्याद्यवयवकाभ्यासावयवस्यादेशस्य प्रत्ययनिमित्तकस्यैव ग्रहणाद्वा । अत्र च पवर्गाद्यादित्वमभ्याससंज्ञाप्रवृत्तिकाले परिनिष्ठिते रूपे वाऽपेक्षितम् । तेन पुस्फारयिषति चुच्यावयिषतीत्युभयत्रोत्त्वप्रवृत्तिरिति बोध्यम् । स्पष्टं चैतत् तत्रैव प्रदीपोद्द्योतयोः ॥

(१) पूर्वविप्रतिषेधवाद्युक्तिमनुवदति ॥

(२) न चोत्त्वविधायके पवर्गा नोपादेयः चुटुतुशरादेरित्येव पाठ्यमिति वाच्यम् । गुङ्धातोरजूगवदित्यादावभ्यासस्योकारादेशानापत्तेरिति स्पष्टमुद्द्योते ॥

(३) चुच्यावयिषतीत्यादावभ्यास उकारभवनात्मकस्य कार्यस्य निर्वाह इत्यर्थः ॥

(४) द्विर्वचनस्य यणादिना विरोधे पूर्वशास्त्रविधेयस्यापि पूर्वं प्रवर्त्तनेनेत्यर्थः ॥

(५) न च जिजावयिषतीत्येतत्सिद्धये जोर्नेति तृतीयवचनस्याप्यारम्भावश्यकत्वात् पूर्वविप्रतिषेधपक्षे गौरवमिति वाच्यम् । द्विर्वचनेऽचीतिसूत्रारम्भपक्षेऽपि चुच्यावयिषतीत्यादिसिद्धये णावच आदेशो नेतिज्ञापकसिद्धवचनस्यावश्यमाश्रयणीयत्वेन वचनद्वयस्यैवोभयकल्पेऽप्याश्रयणेन सूत्रारम्भपक्षापेक्षया पूर्वविप्रतिषेधारम्भपक्षे गौरवाभावादित्याशयात् । अपि योऽजादेशः स स्थानिवदित्येतावन्मात्रमर्थं स्वीकृत्य द्विर्वचनेऽचीत्यनेनैव चुच्यावयिषतीत्यस्यापि सिद्धौ णावच आदेश इति वचनं न कार्यमिति तु न शक्यते सूत्रारम्भपक्षवादिना वक्तुम् । बिभवनीयिषतीत्यादौ द्विर्वचनेऽचीत्यस्याप्रवृत्तये द्वित्वनिमित्तेऽचीत्यर्थाश्रयणावश्यकतया णावच आदेश इत्यस्यावश्यकत्वात् ॥

Digitized by Google

तिषेधो१स्त्वविधायक२निषेधके३स्त्वविधायकानामारम्भे गौरवमिति सूत्रमेवारब्धव्यमिति ।

(१)एवं च प्रकृते इनेरतिशयार्थत्वाभावे पिपविषत इत्यादाविसेस्यस्यापि कार्यितया निमित्तत्वेनानाश्रयणेन द्विर्वचनेऽचीत्यस्याप्रवृत्त्या तदर्थमिस्त्वमारम्भणीयमित्यर्थकभाष्यासङ्गतिः स्फुटैवेति तद्भाष्य(२)मेवेनेरतिशयार्थत्वे मानमित्याहुः ।

(३)शयितरीति । के चित्तु दीधीवेव्योर्गुणादिनिषेधोऽस्या ज्ञापक इत्याहुः ।

तन्न साधु । भाष्यकृतये तत्प्रत्याख्यानात् । सूत्रकाररीत्याऽपि आदीध्यक इत्यादावनिग्लक्षणाश्वृद्धिनिषेधकतया तत्सार्थक्यात् ।

(४)अन्ये तु कुटादौ कुङ्धातोः पाठो, निष्ठा शीङिति सूत्रे शीङ्ग्रहणं, पूङः क्त्वा चेत्यत्रत्यं पूङ्ग्रहणं च प्रकृतपरिभाषाज्ञापकमिति वदन्ति ।

(५)स्यादेतत् । ज्ञापितायामप्यस्यां परिभाषायां शयितरीति निर्देशो नैवोपपद्यते । यतः प्रकृते ईकारस्यैव कार्य्यानुभवितृतया तस्य निमित्ततयानाश्रयणेपि शीतिसमुदायस्य निमित्ततयाऽऽश्रयणे प्रतिबन्धकाभावेन क्क्ङिति चेत्यस्य प्राप्तिरक्षतैवेति गुणनिषेधः स्यादेव ।

अत्र के चित् । अर्थवत्येव स्थान्यादेशभावस्य शब्दानित्यत्वपरिहारायावश्यमाश्रयणीयतया शीशब्दस्यापि कार्य्यानुभवकर्त्तृत्वमक्षतमेवेति न गुणनिषेधः (६) ।

---

(१) उपपादितस्य भाष्यस्य प्रकृतार्थसाधकत्वं कथमित्यत आह ॥

(२) एतच्च सर्वमपि भाष्यं प्रथमाध्यायप्रथमपादाष्टमाह्निकान्तःस्थद्विर्वचनेऽचीति सूत्रव्याख्यानपरं बोध्यम् । पूर्वविप्रतिषेधवार्त्तिकोदाहरणानि तु षष्ठाध्यायप्रथमपादप्रथमाह्निकान्तःस्थदाश्वानितिसूत्रव्याख्यानावसरे भाष्यकृतैव प्रदर्शितानीति नोक्तान्यत्र ग्रन्थगौरवभयात् स्फुटत्वाच्च ॥

(३) स्वपिहलाच्छयितरीति निर्देशोऽस्या ज्ञापकः ॥ मू० ॥

(४) निर्देशापेक्षयोत्कृष्टतां वक्ष्यमाणज्ञापकेषु मन्वान आह ॥

(५) उक्तानां सर्वेषां ज्ञापकानां ज्ञापितायामप्यस्यां चारितार्थ्याभावात् कथं परिभाषाज्ञापकत्वमित्याशयवानाह ॥

(६) ज्ञापितायामस्यां कार्यानुभवकर्त्तुर्निमित्तस्य गुणनिमित्ततया क्क्ङिति चेत्यत्र ङित्पदेनाश्रयितुमशक्यतया क्क्ङिति चेत्यस्याप्रवृत्तेरिति भावः ॥

यद्वा कार्यानुभविद्वघटितो निमित्ततया नाश्रीयत इत्यर्थः [1] ।

इत्थं च धीशब्दस्यापि कार्य्यानुभविधीकारघटितत्वान्न निमित्तत्वेनाऽऽश्रयणम् । ऊर्णुनविषतीत्यत्र तु सन्नन्तस्य तथात्वेऽपि तस्य निमित्ततया ग्रहणं चिकीर्षितमिसेत्यस्य, न तस्य कार्यानुभविद्वघटितत्वमिति न दोषः ।

अरिरिषतीत्यत्र तु इसेत्यस्य कार्यानुभविचित्सशब्दघटिततया तस्य निमित्ततयाऽनाश्रयणान्न द्विर्वचनेऽचीत्यस्य प्रवृत्तिः [2] ।

[3] प्रथमकल्पेऽपि इसेत्यस्य स्थानित्वकल्पनेन[4] न कथमपि[5] द्वित्वनिमित्तता ।

ऊर्णुनविषतीत्यत्र तु कार्यिघटितस्यापेक्षत ऊर्णुशब्दस्योर्णुशब्दस्य वा स्थानित्वकल्पनेऽपि[6] इसेत्यस्य स्थान्यघटिततया स्थानित्वकल्पने मानाभावात् तस्य निमित्ततयाऽऽश्रयणेन द्विर्वचनेऽचीत्यस्य प्रवृत्त्येष्टसिद्धि[7]रित्याहुः ।

[8]षष्ठीत्यादिरिति । अत एवाटिटिषति प्रतीषिषतीत्यादिसिद्धिः । स्पष्टं चेदं सन्यङोरित्यत्र भाष्ये[9] ।

---

(१) एतादृशार्थाश्रयणे मानं तु अयियतरीत्यादिनिर्देशानुपपत्तिः, कुडादिपठनेऽपि चेति बोध्यम् ॥

(२) इकारस्यापि कार्य्यानुभवकर्त्रिकारघटितत्वस्य व्यपदेशिवद्भावेनाक्षतत्वा न तन्मात्रनिमित्तिका शक्या संभावयितुं द्विर्वचनेचीत्यितच्छास्त्रप्रवृत्तिरिति तात्पर्य्यम् ।

(३) आनुमानिकस्थान्यादेशभावमङ्गीकृत्य अयियतरीत्यादिनिर्देशानां ज्ञापकत्वसंगमनेऽपि नारिरिषतीत्यादिलक्ष्येषु का चित् क्षतिरित्याह ॥

(४) अरिरिषतीत्यत्रेति शेषः । तावत एव शास्त्रबोधितार्थकत्वस्य सत्त्वादिति भावः ॥

(५) इसेतिसमुदायघटकतयेकारस्यापि कार्य्यानुभवकर्तृतया तस्यापि द्वित्वनिमित्ततयाऽऽश्रयणासम्भवादिति भावः ॥

(६) उभयोरपि समुदाययोः शास्त्रबोधितार्थकत्वसत्त्वादिति भावः ॥

(७) आनुमानिकस्थान्यादेशभावाङ्गीकारेण अयियतरीत्यादिनिर्देशोपपादनेऽपि न प्रकृतपरिभाषायां प्रीतकार्यिनिरूढत्वस्यानुमानिककार्यानुभवकर्तृत्वरूपतो ग्रहणम्, तेनोर्णुनविषतीत्यत्र नेषेत्यस्य तादृशे कार्यित्वमिति न प्रकृतपरिभाषाप्रवृत्तिरित्याशयः ॥

(८) ऊर्णुनविषतीत्यादिसिद्धये कार्यमनुभवन्निति । अत्र हि द्विर्वचनेऽचीति णुशब्दस्य द्वित्वम् । अन्यथा सन्यङोरित्यस्य षष्ठीत्वात् सन्नन्तस्य कार्यित्वेनेषो द्वित्वनिमित्तत्वाभावात् तत्पर्यासनं स्यात् ॥ सू० ॥

(९) इदं च भाष्यं षष्ठाध्यायप्रथमपादप्रथमाह्निकान्तःस्थमिति बोध्यम् ॥

Digitized by Google

(१) सकललोकतन्त्रेति । सकललोके कतिपयतन्त्रे च प्रसिद्धतये-त्यर्थः । न तु सर्वस्मिँल्लोके शास्त्रे चेति । तेन वेदान्तिनये ब्रह्मणो नि-मित्तत्वे समवायित्वे चाङ्गीकृतेऽपि न क्षतिः । एतेन तद् ग्रहस्यास्यायुक्त-त्वमुद्भावयन्तः समाहिताः ।

अत्र के चित् । अदिष्टकार्यिणः कार्यसमवायिन(२) एव निमित्त-त्वेन नाश्रयणं तेन आयसावित्यादावेकादेशस्य परनिमित्ततया स्थानि-वद्भावेन नुमः प्रतिबन्धः सिद्ध्यतीति वदन्ति ।

तत्रेदं वक्तव्यम् कार्यानुभवितृत्वपर्याप्त्यधिकरण(३)घटितस्य न निमित्ततयाश्रयणमित्यर्थे आयसावित्यादौ वृद्ध्यनुभवकर्तृतापर्याप्त्यधिकर-णत्वस्यैकः पूर्वपरयोरित्यत्र द्विवचननिर्देशेन पूर्वपरसमुदाये सत्त्वेन तस्य तद्घटितस्य च निमित्ततयाऽनाश्रयणेऽपि तद्घटकस्य परमात्रस्य निमित्त-तयाऽऽश्रयणे कः प्रतिबन्धः ।

अरिरिषतीत्यत्र तु कार्यानुभवितृत्वपर्याप्त्यधिकरणीसशब्दघटितस्ये-सेत्यस्य निमित्ततयाऽनाश्रयणेनेष्टसिद्धिरिति ।

(४)भाष्य ध्वनितैवेति । नटभार्य्यावदिति कल्पे यकारस्य कार्यानु-

---

(१) वस्तुतः समवायिकारणनिमित्तकारणयोर्भेदस्य सकललोकतन्त्रप्रसिद्धतया तस्य तत्त्वेनाश्रयणे मानाभावेन नैषा ज्ञापकसाध्या । अत एव हिः प्रयुक्तः । स हि तत्त्वे-नानाश्रयणे हेतोः प्रसिद्धत्वं द्योतयतीति तत्त्वम् ॥ मू० ॥

(२) वर्णानां नित्यत्वेऽप्यारोपितसमवायित्वादिकमङ्गीकृत्य ग्रन्थकाराणां तथा व्यवहारो न विरुध्यत इति तात्पर्य्यम् ॥

(३) नचैवमरिरिषतीत्यत्रेसेत्यस्य तादृशत्वेऽपि तदवयवस्येकारस्य कार्यानुभवकर्तृ-तापर्य्याप्त्यधिकरणत्वाभावात् तन्निमित्तकं प्रवर्त्ततैव द्विर्वचनेऽचीति शास्त्रमिति वाच्यम् । द्वित्वनिमित्ततामयाच्पर्य्याप्तविषयताप्रयोजकपदघटितशास्त्रविधेयस्यैवादेशस्य स्था-निवद्भावाङ्गीकारेणारिरिषतीत्यत्र गुणस्य तथात्वाभाव इत्याशयात् । स्फुटीभविष्यति चेदमनुपदमेवोपरिष्टात् । ऊर्णुनविषतीत्यत्र गुणस्य स्थानिवद्भावाभावेऽपि तदादेशस्य स्थानिवद्भावादिष्टसिद्धिरिति ॥

(४) द्विर्वचनेऽचीत्यत्र भाष्ये ध्वनितैषा ॥ १० ॥ मू० ॥

भवितृतया निमित्ततयानाश्रयणेनाऽज्ग्रहणाभावेऽपि रूपातिदेशाप्राप्त्याऽज्ग्रहणव्यावर्त्यप्रदर्शनपरजेघ्रीयतइत्येतद्भाष्यविरुद्धेत्यर्थ इति केचित्(1)।

तत्तु(2) स्वरान्तर इत्यनुसृत्येदमुक्तमित्यादितत्रत्यविवरणेनैव दूषितप्रायम्(3)।

अन्ये तु कार्यानुभवितृत्वांशविशिष्टैषा ध्वनिता कार्यानुभवितृत्वांशो ध्वनित(4) इति यावदित्यर्थ इति वदन्ति।

तदपि न साधु। तन्मात्रस्यांशस्य भाष्यध्वनितत्वस्य ग्रन्थकृतात्पर्यविषयत्वे एतल्लेखस्य परिभाषाऽव्यवहितोत्तरं, कार्यमनुभवतीत्येतदुत्तरं वस्तुत इत्येतत्पूर्वमेवौचित्येनान्त एतल्लेखस्यैवायोग्यत्वात्(5)।

परे तु अज्ग्रहणेन ज्ञापकेन रूपातिदेशे सिद्धान्तिते तत्राधिजग इत्यत्रेवर्णाभ्यासता प्राप्नोतीति दोषदानवदरिरिषतीत्यत्रारेफाभ्यासत्वस्यानापादनाद् गाङ् लिटीत्यत्र द्विलकारप्रश्लेषवदरिरिषतीत्यत्र समाधानान्तरानुक्तेश्चारिरिषतीत्यस्य रूपातिदेशेऽपि निगमयत्वस्य तद्भाष्यात् प्रतीत्येतद्रूपस्य चैतत्परिभाषामन्तराऽनुपपत्त्या(6) ध्वनितैषेत्याहुः।

इतरे तु जभ्मतुरित्युदाहरणदानपरभाष्य(7)प्रामाण्येन व्यवहिते-

(१) एतेषां मते चाध्वनितेति छेदो बोध्यः॥

(२) अध्वनितेति पदं विभज्य प्रकृतग्रन्थलापनं त्वित्यर्थः॥

(३) किं च भाष्यविरुद्धेत्येतत्तात्पर्यकतया भाष्येऽध्वनितेति लेखो लेखनकर्तुः परिहासायैव भवेदिति बोध्यम्॥

(४) सामान्यतः कार्यिणो निमित्ततयानाश्रयणे तु यङन्तस्य द्वित्वविधायके षष्ठ्यन्ततयाऽऽश्रीयमाणतया द्वित्वनिमित्ततयाऽऽश्रयणासंभवेन द्विर्वचन इत्यस्याचीत्यस्याभावेऽप्यप्रवृत्त्याऽपि किं जेघ्रीयत इत्यादि भाष्यमसंगतमेव स्यादिति भावः॥

(५) एवं कार्यानुभवकर्तृत्वांशो ध्वनित इत्येततात्पर्येणैषा ध्वनितेति लेखस्याप्यसमीचीनत्वमेवापद्येतेत्यपि बोध्यम्॥

(६) द्विर्वचनेऽचीत्यनेन द्वित्वे कर्तव्ये गुणस्य स्थानिरूपस्यातिदेशादिति भावः॥

(७) इदमपि भाष्यं प्रथमाध्यायप्रथमपादान्तर्गताष्टमाह्निकान्तःस्थद्विर्वचनेऽचीतिसूत्रव्याख्यानपरमेवेति बोध्यम्॥

ऽपि वृत्तिरितिवचनकल्पनापेक्षया द्विर्वचन इत्यत्राधिकरणल्युडर्थः(1) सप्तम्यर्थश्च निमित्तत्वमेव ।

एवं च द्वित्वनिमित्ततामयाज्निष्ठनिमित्तताकं कार्यं न प्रवर्त्तेत इति सूत्रार्थः ।

तच्च द्वित्वनिरूपितनिमित्ततामयत्वं यथाकथं चिद् न तु पर्य्याप्त्यैव । तेन चक्रतुरित्यत्रत्यातुसोऽकारस्यापि तदस्तम्(2) ।

अजादेशे तदज्निष्ठनिमित्तताकत्वं तु तदच्पर्य्याप्तविषयताप्रयोजकपदघटितशास्त्रविधेयत्वम् । तेनारिरिषतीत्यत्र गुणस्य यथाकथं चिद्द्वित्वनिमित्ततामयसनवयवाकारनिष्ठनिमित्तताकस्यापि(3) द्वित्वात् प्राक् प्रवृत्तने निषेधः(4) ।

ऊर्णुनविषतीत्यत्र तु गुणस्य द्वित्वात् प्रागनिषेधेऽपि(5) द्वित्वनिमित्ततामयेकारपर्य्याप्तावृत्त्यावच्छिन्नविषयताप्रयोजकाच्पदघटितेच्विति-शास्त्रविधेयस्यावादेशस्य द्वित्वात् प्राग् निषेधेनाभ्यासह्रस्वेन च रूपसिद्धिर्निर्बाधैव ।

(6)नुशब्दस्य द्वित्वमित्यस्य ग्रन्थस्य तु नुशब्दस्य द्वित्वे यद्रूपं तद्रू-

---

(1) करणाधिकरणयोरित्यत्राधिकरणपदेन सप्तम्यर्थो विवक्षितः, प्रकृतभाष्यप्रामाण्यादित्यभिमानः ॥

(2) द्वित्वनिमित्तत्वमक्षतमित्यर्थः । पर्य्याप्त्यैव द्वित्वनिमित्तत्वस्य विवक्षितत्वे तु लिटि धातोरितिसूत्रघटकलिटीत्येतत्पदप्रयोज्यविषयतापर्य्याप्तेरतुस्शब्द एव सत्त्वेनाकारस्य तदनापत्तिरेव स्यादिति तात्पर्य्यम् ॥

(3) द्वित्वनिमित्ततामयो यः सनवयवोऽकारस्तत्र यथाकथं चिद् वर्त्तमाना या निमित्तता तन्निरूपकस्यापीत्यर्थः ॥

(4) द्विर्वचनेऽचीत्यत्रादेशनिषेधपक्षस्यापि ग्रन्थकारैरभिधानादेवमुक्तम् । एवमन्यत्रापि बोध्यम् ॥

(5) गुणविधायकस्य सार्वधातुकार्द्धधातुकयोरित्यस्य यथाकथं चिद् द्वित्वनिमित्तताश्रयो योऽज्निकारादिस्तत्पर्य्याप्तविषयताप्रयोजकपदघटितत्वाभावादिति भावः ॥

(6) ननूर्णुनविषतीत्यस्य सिद्धावपि नुशब्दस्य द्वित्वमिति मूलग्रन्थस्य कथं संगतिरत आह ॥

Digitized by Google

पमित्यर्थेन, एकदेशविकृतन्यायेन नुशब्दत्वस्य नोक्तत्वेऽप्यक्षत्या तस्य द्वित्वमित्याशयकल्पनेन वोपपत्तिः ।

([1])इत्थं वा "चि किं देध्मीयते जेघ्रीयत" इति भाष्यस्य स्वरान्तर इतिप्रातिशाख्यमतानुसरणेऽपि नोपपत्तिः([2]) ।

([3])अजग्रहणसत्त्वेऽपीघ्राध्मोरित्यत्रालोन्त्यस्येत्यस्योपस्थित्या यथाकथं चिद्द्वित्वनिमित्ततापन्नघ्राद्यवयवाकारात्मकान्तपर्य्याप्तान्त्याल्त्वावच्छिन्नविषयताप्रयोजकान्त्यालपदघटितेऽघ्रतिशास्त्रविधेयत्वस्येत्वेऽक्षत्या द्वित्वात् प्राक् तस्याप्रवृत्तेस्तदभावे([4]) दोषदानानौचित्यात्([5]) ।

([6])एतत्परिभाषासत्त्वे तु घ्राशब्दाद्यवयवाकारस्य निमित्ततयानाश्रयणेन नाजग्रहणसत्त्वे दोष इत्येतद्भाष्यादेव ध्वनितैषा परिभाषा ।

([7])यद्वाऽधिजग इत्यत्र द्विलकारप्रश्लेषेऽपि यथाकथं चिद्द्वित्वनिमित्तताश्रयधात्विकारपर्य्याप्तेङ्त्वावच्छिन्नविषयताप्रयोजकेङ्पदघटितमाङ्लिटीत्यस्य निषेधापत्त्या भाष्यप्रतीतस्याधिजग इत्यस्याजग्रहणव्यावर्त्यत्वस्य बाष्ठभाष्यानुरोधिनः([8]) प्रकृतपरिभाषानङ्गीकारेऽनुपपत्ति([9])रिति तद्भाष्यादेव ध्वनितैषा परिभाषा ।

---

(१) द्विर्वचनेऽचीत्यस्य प्रागुक्तार्थकरणस्य प्रकृते उपयोगमाह ॥

(२) कार्यमनुभवन् हि कार्यी निमित्ततया नाश्रीयत इति परिभाषाया अनभ्युपगमे इति शेषः ॥

(३) उक्तामेवानुपपत्तिं विशदयति ॥

(४) अजग्रहणाभावे ॥

(५) "यश्चोभयोः समो दोषः परिहारस्तयोः सम" इति न्यायेनाजग्रहणसत्त्वेऽपि यो दोषस्तस्याजग्रहणनिवर्त्यत्वेन प्रदर्शनमनुचितमेवेति भावः ॥

(६) प्रकृतपरिभाषाङ्गीकारे जेघ्रीयत इत्यादौ यथा न दोषस्तदुपपादयति ॥

(७) द्विर्वचनेऽचीतिसूत्रस्थाद् भाष्यान्तरादपि ध्वनितैषा परिभाषेत्याह ॥

(८) इदमजग्रहणव्यावर्त्यत्वस्य विशेषणम् ॥

(९) द्विर्वचनेऽचीत्यत्राचीत्यस्य सत्त्वेऽप्यधिजग इत्यस्यासिद्ध्या यश्चोभयोः सम इति प्रागुक्तरीत्यैवेति भावः ॥

Digitized by Google

(१)सत्यां त्वेतस्यां धात्विकारस्य द्वित्वनिमित्ततयानाश्रयणेनाज्-हलसत्त्वे द्विलकारप्रश्लेषे द्विर्वचनेऽचीत्यस्याप्रवृत्त्या लक्ष्यासिद्ध्याप्त्यर्थ-त्वापत्तिरिति दिगिति प्राहुः ।

(२)अत्रेदं बोध्यम् । क्ङितीत्यस्य निमित्तसप्तमीत्वेऽपीग्लक्षणावृद्धेः प्रत्ययनिमित्ताया एव निषेध्यत्वसम्भवात् गुणस्यापि क्ङित्प्रत्ययनिमित्तकस्यैव निषेध इति न श्रयितेत्यादावनुपपत्तिः ।

अरिरिषती(३)त्यत्रापि द्विर्वचनेऽचीत्यस्य न प्रवृत्तिः । अजादेशनिमित्तताप्रत्यासन्नाया(४) अजादेशनिमित्ततासमानाधिकरण्यायाश्च(५) द्वित्वनिमित्ततायाः अजादेशनिमित्ततासदृश्याः(६) (७)कार्यानुभवितृत्वासमानाधिकरण्याया एव रूपातिदेशविधायकशास्त्रीयोद्देश्यतावच्छेदककोटिप्रविष्टतया तादृश्याश्च द्वित्वनिमित्ततायास्तत्रत्यैकारेऽसत्त्वा(८)दित्येषा नारब्धव्या ।

एतदारम्भे आधीत्यादावर्थमनित्यत्वकल्पने गौरवं चेति के चित्(९) ।

अत्रेदं वक्तव्यम् । प्रीङ्धातोः कर्तृक्विबन्तादाचारक्विबन्ताल्लुङि अपे-

---

(१) प्रकृतपरिभाषास्वीकारे भाष्यस्य नासङ्गतिरित्याह ॥

(२) प्रकृतपरिभाषाया ज्ञापकोदाहरणप्रत्युदाहरणादिकं व्याख्याय प्रयोजनानामन्यथासिद्धिं प्रदर्शयितुमुपक्रमते ॥

(३) एतदेव चैतस्याः परिभाषाया मूर्धाभिषिक्तं फलं ग्रन्थकारैर्व्यवस्थापितम् ॥

(४) अत्र च प्रत्यासत्तिः समानपदोपात्ततया विवक्षिता ॥

(५) एतद्विशेषणद्वयोपात्तं सामानाधिकरण्यं प्रत्यासत्तिश्च सदृशनिमित्ततायाः उद्देश्यतावच्छेदके प्रवेशे हेतुः ॥

(६) अस्य प्रविष्टपदार्थतावच्छेदके प्रवेशेऽन्वयः ॥

(७) सादृश्यमेव निरूपयति ॥

(८) अस्य न प्रवृत्तिरिति प्रागुक्तेन संबन्धः ॥

(९) आहुरिति शेषः ॥

Digitized by Google

धीवित्यत्र प्राप्ताया इग्लक्षणाया क्ङिद्धातुनिमित्ताया वृद्धेरपि निषेध्यत्वसम्भवेन श्वयितेत्याद्यर्थमेवाऽऽवश्यकी(१) ।

(२)अनुदात्तङित इत्यादीनां तु नौपदेशिकङित्त्वादिकमादायाचारक्विबन्ते प्रवृत्तिर्ब्राह्मणमाणवेतिसूत्रस्थभाष्य(३)प्रामाण्यादित्यन्यत्र(४) निरूपितम् ।

एवमूर्णुनुवुरित्यादौ सवर्णदीर्घाद्यजादेशनिमित्तताया अपि कार्यानुभवितृत्वसमानाधिकरणायाः प्रसिद्ध्या न तत्प्रत्यासत्त्या द्वित्वनिमित्तता कार्यानुभवितृत्वासमानाधिकरणैव तच्छास्त्रीयोद्देश्यतावच्छेदककोटिप्रविष्टेति शक्यते वक्तुमित्यरिरिषतीत्येतदर्थमप्यावश्यकी सा ।

(५)किं चासिद्धवत्सूत्रप्रवृत्तौ समानाश्रयत्वमेव निमित्तं न तु समाननिमित्तत्वं तच्च स्थानिसाधारणमिति को दोषः शाधीत्यादौ, यदर्थे गौरवाद्युद्भावन(६)मिति स्पष्टं दीधीवेवीति सूत्रे कौस्तुभ इति ।

(७)यत्तु गकारसाहचर्यात् ङकारोऽपि प्रत्ययावयवो धात्वनवयवो वेत्संज्ञको गुणादिप्रतिषेधं प्रयोजयतीति न श्वयितेत्यादौ दोष(८) इति ।

---

(१) क्ङिति चेत्यत्र गुणो क्ङित्प्रत्ययनिमित्तकत्वात्मकसाहचर्यस्याश्रयितुमशक्यत्वादिति भावः ॥

(२) मन्वप्रैषीदिति रूपमेव न संभवति प्रीङ औपदेशिकङित्त्वस्य नामधातावस्था तदादायानुदात्तङित इत्येतत्प्रवृत्तेरप्रतिबन्धादत आह ॥

(३) इदं च भाष्यं चतुर्थाध्यायद्वितीयपादप्रथमाह्निकान्तःस्थमिति बोध्यम् । तत्र हि केदाराद् यञ् चेत्यतो यञोऽनुवृत्त्या ब्राह्मण्यमित्यादौ वृद्ध्यादिकृतवैलक्षण्याभावेन ञ्नितोश्च स्वरेऽपि विशेषाभावेन, योगविभागेन च मध्ये पठितस्यापि ठञ् कवचिनश्चेति ठञो निवृत्त्युपपत्त्या च ब्राह्मणादिभ्यो यञ्विधानमन्यतोऽप्ययमिति ज्ञापनार्थम् । तेन पृष्ठादुपसंख्यानमित्यपूर्वं न कर्तव्यं भवतीत्याद्याशयकमुक्तम् । अनुदात्तङित इत्यादीनामुक्तविषये प्रवृत्तौ तु यञ्यनोर्वैलक्षण्यस्य स्पष्टतया तद् भाष्यमसंगतमेव स्यादिति भावः ॥

(४) घेर्ङितीतिसूत्रव्याख्यानपरशब्देन्दुशेखरादावद्रष्टव्ये ॥

(५) परिभाषामाश्रित्य तदनित्यत्वाश्रयणे गौरवमित्याद्युक्तं दूषणमपाकरोति ॥

(६) जज्ञावित्यत्र वृद्धेस्तु द्वित्वात् पूर्वं न प्रवृत्तिः, प्रकृतपरिभाषायामेकादेशकार्यिणः कार्यिपदेनाग्रहणादिति दिक् ॥

(७) श्वयितेत्यत्र केनाप्युक्तं दोषवारणोपायं दूषयितुमनुवदति ॥

(८) गुणनिषेधापत्तिरूपो दोष इत्यर्थः । एवं च मूलग्रन्थोक्तावतरणासंगतिरिति भावः ॥

Digitized by Google

तच्च शोभनतरम् । ऊङन्तवामोरुशब्दक्रुप्रत्ययान्तभीरुशब्दक्विप्प्रत्ययान्तनिर्धिशब्दादिभ्य आचारक्विपि शपि वामोरवतीत्यादावूङादिप्रत्ययावयवङकारादेर्गुणनिषेधप्रयोजकत्वभङ्गाय परिभाषावश्यकतया(१) प्रथमसाहचर्याश्रयणस्य व्यर्थत्वात्(२) ।

ग्लास्नुशब्दादिभ्य आचारक्विबन्तेभ्यः शपि ग्लास्नवतीत्यादौ गित्त्वस्यापि धात्ववयवे प्रसिद्ध्या द्वितीयस्याश्रयितुमशक्यत्वा(३)च्च ।

(४)कित्त्वं त्वौपदेशिकेक् स्मरणे ओहाक् त्याग इत्यत्रैव सुप्रसिद्ध-(५)मिति न तत्साहचर्यं कथमपि गुणनिषेधाप्रवृत्तिप्रयोजकम् ।

किं च दंशाव इत्यत्र नलोपस्य छान्दसत्वात् स्थास्नुरित्यत्रेत्त्वस्य च स्नुविधायके स्था आ इत्याकारप्रश्लेषेण स्नुप्रत्ययसमभिव्याहृतस्य स्थाधातोराकार एव नेकार इत्यर्थकरणेन वारणे(६) क्ङितीत्यत्र गकारप्रश्लेष एव न कार्यं(७) इति मते तत्साहचर्यस्य गगनकुसुमायमानत्वमेव ।

(१) वामोरवतीत्यादौ ङकारस्य प्रत्ययावयवत्वात्तत्या क्ङिति चेत्यत्र निरुक्तसाहचर्याश्रयणेऽपि तच्छास्त्रप्रवृत्तेरप्रतिहतत्वेन गुणनिषेधप्रवृत्तिप्रतिबन्धस्य प्रकृतपरिभाषाप्रवृत्तिमात्रसाध्यत्वादिति भावः ॥

(२) वामोरवतीत्यादौ परिभाषामन्तरा निर्वाहे तदर्थं च तस्या आवश्यकत्वे तयैव शयितेत्यादीनामप्युपपत्तिरुचिता न तु तदर्थं पृथक् साहचर्याश्रयणमप्यावश्यकम्, गौरवादिति भावः ॥

(३) सहोच्चारितपदोपात्तधर्मव्यापकधर्मवत्त्वेनैवान्यत्र साहचर्यस्य दृष्टतया गित्त्वस्य धात्ववयववृत्तित्वे धात्वनवयवत्वस्य गित्त्वाव्यापकत्वात् तेन धर्मेण साहचर्याश्रयणस्याशक्यत्वादिति भावः ॥

(४) ननु माभूदुक्तधर्मस्य गित्त्वव्यापकत्वं तथापि कित्त्वव्यापकत्वेनैव साहचर्यधर्मस्य साहचर्यनियामकतया शयितेत्यादावदोष इत्यत आह ॥

(५) एवं च निरुक्तधर्मस्य न कित्त्वव्यापकत्वमपीति भावः ॥

(६) स्नुप्रत्ययस्य गित्त्वस्यैवानाश्रयणे इति शेषः ॥

(७) इदमुपलक्षणम् । ग्लाजिस्थश्चेतिशास्त्रविधेयस्य गित्त्वानङ्गीकारे श्र्युक इति सूत्रेऽपि गकारप्रश्लेषो विफल एव भूष्णुरित्यत्रेणिनषेधस्य कित्त्वेनैव सिद्धत्वादित्यादेः । यद्यपि ग्लाजिस्थ इति सूत्रे भाष्ये प्रत्ययस्य गित्त्वं श्र्युक इति सूत्रे गुणादिनिषेधविधायके च गकारप्रश्लेषं चाश्रित्यैव स्थास्नुर्भूष्णुरित्यादावीत्त्वाभावेट्प्रतिषेधगुणप्रतिषेधानामुपपत्तिः प्रदर्शिता । तथापि तद्भाष्यस्योक्तप्रयोगनिर्वाहोपयोगिप्रकारप्रदर्शन एव तात्पर्यस्य सुव्यक्ततया संभवति च लघौ प्रकारे गौरवसहिष्णोस्तस्याश्रयणानौचित्येन भाष्यप्रदर्शितप्रकारापेक्षयात्र प्रकारे लाघवस्य स्पष्टतरत्वेन चात्रापि प्रकारेऽवश्यमस्ति भाष्यकारस्याभिप्राय इत्यभिमानः ॥

[१]केचित्तु क्क्ङितीत्यत्र सप्तम्या उपपदविभक्तेरिति न्यायेन तस्मिन्निति परिभाषाबाधे मानाभावेन चोपश्लेषिकाधिकरणत्वार्थकस्यौचित्येन न शयितेत्यादौ दोषलेशः ।

[२]द्विर्वचनेऽचीत्यत्रापि ल्युटस्सप्तम्याश्चौपश्लेषिकाधिकरणत्वार्थकत्वमेव ततश्च यदव्यवहितपूर्ववर्त्तिनो द्वित्वात्मककार्यानुभवस्तदनुपश्लिष्टस्याच आदेशो द्वित्वात् प्राङ् न प्रवर्त्तेत इत्यर्थः ।

एवं चारिरिषतीत्यत्र नेकाराव्यवहितपूर्ववर्त्तिनो द्वित्वं किं तु तस्येवेति न द्विर्वचनेऽचीत्यस्य प्रवृत्तिरित्येषाऽनावश्यकीति प्राहुः ।

[३]तत्रेदं स्मर्त्तव्यम् । निमित्तसप्तमीत्वानाश्रयणे दण्डेततीति दोषः । दुद्यूषतीत्यस्य परिभाषानङ्गीकारेऽसिद्धिश्चेति ।

[४]वस्तुतस्त्वत्रत्यो ग्रन्थो दीधीति सूत्रस्थकौस्तुभानुसार्येवेति परिभाषाऽस्वीकार एव साधीयान् ।

क्क्ङितीत्यत्र तन्निमित्तग्रहणस्यान्यथासिद्ध्या प्रत्याख्यानेन[५] दण्डेततीत्यादिदोषानुपन्यासेन तेषामनभिधानात्[६] ।

[७]तन्निमित्तग्रहणस्येग्लक्षणानिग्लक्षणसाधारणगुणनिषेधकत्वकल्पवादिनोक्ततया तस्यैकदेश्युक्तत्वाच्च ।

(शेषमग्रे)

काशीस्थराजकीयप्रधानपाठालयाध्यापकः श्रीद्विवेदहरिनाथमनीषी ।

---

(१) परिभाषाफलानामन्यथासिद्धिप्रकारं विशदयितुमिच्छति ॥

(२) फलान्तरमप्यन्यप्रकारेण सिद्ध्यतीत्याह ॥

(३) प्रागुक्तस्यापि दूषणस्य न जात उद्धार इत्याह ॥

(४) परिभाषाखण्डनोपयोगिप्रकारान्तरमाह ॥

(५) प्रथमाध्यायप्रथमपादचतुर्थाह्निकान्तस्थे क्क्ङिति चेति सूत्रव्याख्यानपरभाष्य इति शेषः ।

(६) ततश्च न दण्डेततीत्येतदर्थं तन्निमित्तग्रहणं भवेदावश्यकं येन संभाव्येत प्रकृतपरिभाषायाः सफलत्वमिति भावः ॥

(७) ननु तन्निमित्तग्रहणं तत्फलं च तत्रैव भाष्यकृता स्वयमेवोक्तमिति प्रत्याख्यानभाष्यस्यैव युक्तत्वमित्यत्रार्थे किं विनिगमकमित्यत आह ॥

Digitized by Google

॥ श्रीः ॥

॥ श्रीं नमः श्रीमते भगवते रामानुजाचार्याय ॥

अथ श्रीभाष्यं विशिष्टाद्वैतपरं रामानुजदर्शनम्

श्रुतप्रकाशिकासमेतं विषमपदटिप्पणीसहितम्

तत्र प्रथमाऽध्यायस्यावशेषः ।

(Continued from page 215. Vol. VII.)

टी० अथ सूत्रस्य वाक्यार्थमाह "मीमांसे"ति अत्र पूर्ववृत्तात् कर्मज्ञानाद् अनन्तरं तत एव हेतोरित्यथातः–शब्दार्थ उक्तः । ब्रह्म ज्ञातव्यमिति–ब्रह्मजिज्ञासापदार्थः "ज्ञातव्यम्" विचारयोग्यम् । "तत एवे"त्येवकारेण शास्त्रान्तराधिगमनैरपेक्ष्यमथ–शब्दफलितमभिप्रेतम् । "उक्तं भवती"ति शब्दतोऽर्थतश्चेति भावः । कथमस्य सूत्रस्यायमर्थ इति शङ्कायां? तदुपपादयति "मीमांसे"त्यादिना । अथातइत्यादिपदानां यथोक्त एवार्थः कर्मब्रह्मविचारयोरैकशास्त्र्यात्, [1]ऐकशास्त्र्यं च नियतपौर्वापर्यभागद्वयात्मकवेदाख्यप्रबन्धव्याख्यानरूपत्वादित्यर्थः । अत्र व्याख्येयस्य पूर्वापरभावेनावस्थितभागद्वयरूपत्वं तद्धेतुकं व्याख्यानस्य पौर्वापर्यविशेषविशिष्टभागद्वयरूपत्वं च पदयोजनायां वाक्ययोजनायां च वक्तव्यं तथापि ग्रन्थलाघवार्थं पदयोजनायाम"धीतसाङ्गसशिरस्कवेदस्ये"ति व्याख्येयस्य नियतपौर्वापर्यभागद्वयरूपत्वमुक्तम् । अत्र तु वाक्ययोजनायां व्याख्यानस्य नियतपौर्वापर्यभागद्वयरूपतयैकशास्त्र्यमुक्तम् । उभयत्रोभयमनुसंधेयम् । भाग–शब्दाभ्यां मीमांसाद्वयस्य एकावयवित्वं सूचितम् । पूर्वापरतन–शब्दाभ्यां क्रमनियम उक्तः । कर्मब्रह्म–शब्दाभ्यां वृत्तवर्तिष्यमाणकथनम् । अल्पास्थिरफलत्वानन्तस्थिरफलत्वाभ्यां तयोर्हेतुमद्भावोपपादनम् । मुक्त्युपायोपयोगितया कर्मणां स्वरूपेणोपादेयताप्रतीतिरनन्तस्थिरफलापातप्रतीत्यन्तर्भूता अतः एवमनुक्तिः । एवं क्रमविशेषविशिष्टैकव्याख्येयव्याख्यानरूपतया कर्मब्रह्मविचारयोरैकशास्त्र्यात् सूत्रस्य यथोक्तएवार्थ इत्यर्थः ।

---

१ ऐकशास्त्र्यमिति युक्तः पाठः ।

पूर्वं प्रतिज्ञातं वृत्तिकारमतानुसारं वृत्तिग्रन्थेन संवादयति "तथाहे"ति कर्माधिगमस्यैव पूर्ववृत्तत्वं केवलं कण्ठोक्तम् ऐकशास्त्र्यात्तथाविधं चेत्यभिप्रायेणाह । 'वक्ष्यति चे'ति

मू० वक्ष्यति च कर्मब्रह्ममीमांसयोरैकशास्त्र्यं "संहितमेतच्छारीरकं जैमिनीयेन षोडशलक्षणेनेति शास्त्रैकत्वसिद्धि"रिति, अतः प्रतिपिपादयिषितार्थभेदेन षट्कभेदवदध्यायभेदवच्च पूर्वोत्तरमीमांसयोर्भेदः ।

टी० वक्ष्यतीत्यादिः संहितमित्यादिश्च वृत्तिग्रन्थौ शारीरकं–ब्रह्ममीमांसा जगच्छरीरः परमात्मा–शारीरः 'तस्यैष एव शारीर आत्मे'ति श्रुतेः, तद्विषयं शास्त्रं शारीरकमित्युच्यते "षोडशलक्षणेन" षोडशाध्यायेन "संहितमि"ति नियतपौर्वापर्यैकव्याख्येयव्याख्यानरूपतया संगतमिति भावः "अर्थैकत्वादेकं वाक्य"मिति न्यायेन प्रधानप्रतिपाद्यैक्याद्व्याख्येयस्य वेदस्यैकप्रबन्धत्वं भवेत्, तच्चोपपद्यते पुरुषार्थपरत्वाद्वेदस्य ब्रह्मपरत्वाद्वा "सर्वे वेदा यत्पदमामनन्ति" "वेदैश्च सर्वैरहमेव वेद्य" इति हि श्रुतिस्मृती वेदार्थविचारस्यानुगतत्वान्मीमांसाया एकप्रबन्धत्वम्, अनेनैकशास्त्र्येण कर्माधिगमस्य पूर्ववृत्तत्वमाक्षिप्तम् ।

ननु यद्यैकशास्त्र्यं कर्मब्रह्मविचारयोस्तर्हि उपक्रमे साधारणोऽर्थः प्रतिज्ञायेत–'अथातो वेदार्थजिज्ञासे'ति, नचैवं प्रतिज्ञातं किन्तु पूर्वभागासाधारण एव प्रतिज्ञातः–'अथातो धर्मजिज्ञासे'ति । अत्र ब्रूमः अथातो ब्रह्मजिज्ञासेत्येवोभयभागसाधारणार्थप्रतिज्ञा कर्मविचारस्तु ब्रह्ममीमांसातृतीयलक्षणचतुर्थपादे सङ्गतः, ब्रह्मविचारान्तर्भावेऽपि पृथक्करणमुपपद्यते यथा निग्रहान्तर्भूतच्छलजात्योराह्निकभेदेन पृथगुक्तिः, यथा च निग्रहान्तर्भूतहेत्वाभासानामध्यायभेदेन पृथगुक्तिः, पृथक्करणं च बहुग्रन्थप्रतिपाद्यत्वात् तच्च पूर्वभावित्वमुपजीव्योपजीवकभावादिबहुप्रमाणहेतुनिबन्धनम् । एतदुक्तं भवति, अर्थक्रमाद् ब्रह्ममीमांसातृतीयलक्षणचतुर्थपादेन कर्मविचारः सङ्गतः प्रतिपत्तिसौकर्यं लक्षणक्रमात्तु कर्मविचारस्य पूर्वभाव इति । एवं वा साधर्म्य-

वैधर्म्यसमयोर्जात्योः कथनेन यथा प्रतिधर्मसमोभयानुयायिन्यर्थसिद्धा । एवं भागद्वयासाधारणार्थप्रतिज्ञाद्वये कृते साधारणार्थप्रतिज्ञानमार्थं स्यात् साधारणार्थे प्रतिज्ञातेप्यसाधारणार्थस्तु पृथगेव प्रतिज्ञातव्यः, धर्मजिज्ञासायां प्रतिज्ञातायामप्य“थातः शेषलक्षणम्”“अथातः क्रत्वर्थपुरुषार्थयोर्जिज्ञासे”त्यादौ ह्यसाधारणार्थप्रतिज्ञा कृता, अतो भागद्वयासाधारणार्थप्रतिज्ञानेन तदनुगतसाधारणार्थप्रतिज्ञानमार्थं स्यादिति प्रथममथातोधर्मजिज्ञासेति प्रतिज्ञातं न तु-वेदार्थजिज्ञासेति । अथवा, अथातोधर्मजिज्ञासेत्येव साधारणप्रतिज्ञा अलौकिकं श्रेयः साधनं हि धर्मः, तदनुयायिप्रतिपाद्यं धर्मश्च साध्यसिद्धभेदेन द्विविधः सिद्धरूपे वस्तुनि धर्मशब्दप्रयोगोमहाभारते दृष्टः, यथा–“ये च वेदविदो विप्रा ये चाध्यात्मविदो जनाः । ते वदन्ति महात्मानं कृष्णं धर्मं सनातन”मिति, तथाभियुक्तैश्चालौकिकत्वे सति श्रेयःसाधनत्वं धर्मशब्दप्रवृत्तिनिमित्तं मन्यमानैः सिद्धरूपेपि धर्मशब्दः प्रयुक्तः, द्रव्यक्रियागुणादीनां धर्मत्वं स्थापयिष्यते तेषामैन्द्रियकत्वेपि न तद्रूपेण बुद्धधर्मतेत्यादौ तत्र द्रव्यादिसद्भावेपि क्रियाप्राधान्यात् साध्य[1]धर्मपरः पूर्वभागः । उपासनतदङ्गसद्भावेपि ब्रह्मप्रधानत्वात् सिद्धधर्मपर ऊर्ध्वभागः । अत उभयभागविषयणी प्रथ[2]मप्रतिज्ञा, तत्र धर्मशब्दस्य साध्यधर्मविषयतया प्रसिद्धिप्राचुर्येण बुद्धिस्थत्वात् पूर्वभागप्रतिपद्यत्वेन प्राथम्याद्धर्मजिज्ञासापदेनैव तन्त्रेण वा अर्थतोवा प्रतिज्ञातत्वोपपत्तेश्च तल्लक्षणमुक्तं चोदनासूत्रे । सिद्धरूपधर्मविशेषस्य च साधारणप्रतिज्ञयैवार्थतः प्रतिज्ञातत्वेपि तस्य बहुयत्नव्यवधानाच्छब्दाबोधत्वशङ्कापरिजिहीर्षया च पुनः प्रतिज्ञा कृता, तस्य लक्षणमुक्तं जन्मादिसूत्रइति युक्तमैकशास्त्र्यम् ।

ननु पूर्वभागस्य साध्यधर्मप्रधानतोक्तिरुदाहृतवचनेन विरुध्यते तत्र पूर्वभागेपि सिद्धरूपस्य परस्य कर्माराध्यतया प्रधानप्रतिपाद्यत्वावगता

१ यागस्य तिलतण्डुलादिद्रव्यसाध्यत्वेपि न तेषां स्वरूपतो धर्मत्वं परन्तु शास्त्रोदितक्रियार्थाङ्गानामेवेति पूर्वमीमांसाशास्त्रं साध्यरूपधर्मपरमिति परमार्थः ।

२ “अथातो धर्मजिज्ञासे”त्येव प्राथमिकी प्रतिज्ञा सिद्धसाध्योभयभेदभिन्नद्विविधधर्मप्रतिपादकशास्त्रद्वयस्य प्रतिज्ञानरूपा ।

तस्मिन्प्रवचने वेदविच्छब्दो हि पूर्वभागाभिज्ञपरः, गोबलीवर्दन्यायात् "विष्णु-नामा स वेदेषु वेदान्तेषु च गीयते" इत्यनेनैकार्थ्याच्च ।

न च गुणभावेन कर्मणां प्रतिपाद्यत्वमित्यविरोधः, प्राधान्येन प्रति-पाद्यत्वस्य जैमिनेरभिमतत्वात्, भवद्भिरपि तथोक्तत्वाच्च, सत्यम् । वस्तुतः प्राधान्यं परमात्मन एव यथा राज्ञस्तात्पर्यगोचरतालक्षणं, शब्दप्राधान्यन्तु कर्मणएव यथा राजपुरुषस्य, तच्चातिरस्कृतं तच्च तस्य परमात्माराधनरूप-त्वानवगमात्

नच तदवगमोवश्यं संपाद्यः, अन्तवत्स्वर्गादिफलदत्वे कर्मणां परदेवताज्ञाननैरपेक्ष्यं हि श्रुतिस्मृतिभ्यामवगम्यते "यो ह वा एतदक्षरं गार्ग्यविदित्वाऽस्मिँल्लोके जुहोति यजते तपस्तप्यते बहूनि वर्षसहस्राण्य-न्तवदेवास्य तद्भवति" इति "अहं हि सर्वयज्ञानां भोक्ता च प्रभुरेव च न तु मामभिजानन्ति तत्त्वेनातश्च्यवन्ति ते" इति च अतस्तन्नैरपेक्ष्यलक्षणमपि प्राधान्यमस्ति कर्मणः, अतः पूर्वभागे कर्मणः प्रागवगतं प्राधान्यं पश्चादव-गन्तव्यं परमात्माराधनरूपत्वं चाविरुद्धम्, अतः प्रतिज्ञोपपत्तेः शास्त्रैक्यं युक्तं, यद्यपि कर्मब्रह्ममीमांसयोरैकशास्त्र्यमविवक्षितं जैमिनिना, तथापि तदङ्गीकृत्य तदेकशास्त्रतया बादरायणेन ब्रह्मसूत्रप्रणयनं युक्तं, यतः, अतदर्थतया क्लृप्तमपि योग्यमपेक्षितं तादर्थ्यमर्हति, ग्रामे कल्पे पूर्वतडाग-वत् विवक्षितत्वसंभवश्च दर्शितः । अतः शास्त्रैक्यं युक्तम् । नन्विदम-युक्तमैकशास्त्र्यं शारीरकशब्दसूचितात् प्रधानप्रतिपाद्यभेदाज्जैमिनीय-शब्दसूचितात् कर्तृभेदात् तदुभयफलितात् प्रयोजनभेदादर्थविरोधाच्चे-त्याशङ्कां, परिहरति "अतः प्रतिपिपादयिषिते"ति । अतः—वृत्तिकारोक्तादे-कव्याख्येयव्याख्यानरूपत्वसंबन्धादित्यर्थः। षट्कभेदः—पूर्वमीमांसायामध्या-यभेदस्तत्रोत्तरत्र च निदर्शनार्थमुक्तौ, अर्थभेदाभावेप्येकं षट्कमेकोऽध्या-यो वा स्यात्, अतएवावयवित्वे सिद्धे सत्यवान्तरार्थभेदो न महावाक्यै-कत्वविरोधी, यथा पदार्थभेदोवाक्यार्थैकत्वाविरोधीति भावः । अनेन प्रतिपाद्यभेदः परिहृतः । प्रयोजनभेदश्चार्थात्परिहृतः । षट्कद्वयचिन्तित-

Digitized by Google

प्रकृतिविलक्षणप्रयोजनभेदस्य शास्त्रभेदकत्वाभावात्, अनेन वृत्तिग्रन्थगतयोऽथातोब्रह्मजिज्ञासाशब्दतात्पर्यं च वर्णितं पूर्वोत्तरमीमांसाशब्देन जैमनीयशारीरकशब्दौ च विवृतौ प्रतिपिपादयिषितशब्देनार्थविरोधः परिहृतः प्रतिपादयितुमिष्टं हि प्रतिपिपादयिषितं स च तात्पर्यविषयोऽर्थः, विरुद्धतया प्रतीयमानेषु देवतानिरासादिषु न तात्पर्यमित्यभिप्रायः । नन्वेवं कथमभिधीयते? "आम्नायस्य क्रियार्थत्वादि"ति सिद्धपरवाक्यानां तच्छेषत्वं हि सूत्रकारेण कण्ठोक्तं तच्च विरुद्धमतएव, अतः शास्त्रभेद इति । नैवं "पदे जुहोति" "आहवनीये जुहोति" "न हिंस्यात् सर्वाभूतानि" "पशुमालभेते"ति वत् । शास्त्रान्तरे "कर्मण्यण्" "आतोनुपसर्गे क"इति वच्च उत्सर्गापवादन्यायेन शास्त्रैक्याविरोधात् सामान्येन सिद्धपरवाक्यानां क्रियाशेषत्वेऽभिहिते सिद्धपरवाक्यविशेषस्य किंविधिशेषित्वं नवेति विचार्य स्वयं पुरुषार्थविरहिणामेव सिद्धपराणां क्रियाशेषत्वं स्वयंपुरुषार्थपर्यवसायिनां तु सिद्धपरवाक्यानां न तच्छेषत्वमिति हि निर्णेतुं युक्तं, यथा होमस्य सामान्येनाहवनीये प्राप्तस्वेपि होमविशेषस्य पदे कर्त्तव्यत्वनिश्चयः, यथा च सामान्यतो हिंसानिषेधेपि हिंसाविशेषस्य कर्तव्यतोक्तिः, यथा च सामान्येन कर्मण्युपपदे धातोरणि प्राप्तेप्याकारान्ताद्धातोः कप्रत्ययविधिः ।

नच तत्र शास्त्रभेदः, तद्वद् देवतानिराकरणे च न तात्पर्यम् । अश्रुतवेदान्तानां कर्मण्यश्रद्धानिराकरणाय कर्मप्राधान्यपरत्वात्तस्य "न हि निन्दा निन्द्यं निन्दितुं प्रवर्त्तते, अपि तु निन्दितादितरत् प्रशंसितुमिति" हि नीतिविदः, यद्वा वेदप्रामाण्य–कर्मावश्यकर्त्तव्यता–तात्पर्यातिशयात् तत्प्रतिपत्तिनिराचिकार्षयान्वाहृशवादो देवतानिरासोक्तिः स्यात्, अभिमततरार्थानादरेणापि हि विपक्षव्युदासो दृश्यते यथा "अभीष्टार्थव्ययेनापि जयति क्षेत्रहारिणम् । लब्धक्षेत्रैर्न दुष्प्रापः स्यादर्थ इति निश्चयात्" एवमभिमततरेश्वरानादरेणापि वेदप्रामाण्यादिसमर्थने पश्चादभिमतसिद्धिरयत्नलभ्येति जैमिनेरभिप्रायः, तत्सिद्धिप्रकारश्च तदुत्तरात्रिसूत्रन्यायाव्याधीन इत्युपरत्र व्यक्तीभविष्यति ।

Digitized by Google

न च तत्सिद्धिमभ्युपगच्छतस्तस्यानादरत्वादव्याघातः तस्यान्वारुह्य-कृतत्वात् कथमान्वारुह्यवादत्वनिश्चयः ? उच्यते "संपत्तेरिति जैमिनिः" "अन्यार्थं तु जैमिनिः" "परं जैमिनिर्मुख्यत्वात्" । 'ब्राह्मेण जैमिनि'रि-त्यादिब्रह्मसूत्रैरेव जैमिनेर्ब्रह्मस्वरूपतद्गुणतदुपासनतत्फलाद्यभ्युपगमस्य प्रतिपन्नत्वात् । महाभारते च हयशिरउपाख्यानादिषु भगवद्व्यासोपदेश-लब्धपरमात्मतत्त्वज्ञानस्यावगमाच्चेति । अतो विरुद्धेऽर्थे तात्पर्याभावान्नार्थवि-रोधः । नन्वर्थविरोधो दुष्परिहरः, तथा हि विशेषातिदेशनिरूपणपरे अष्टमाध्याये विकृतिषु प्रकृतिधर्मातिदेशे कर्तव्ये सति कस्मिन् कर्मणि कस्य कर्मणो धर्मातिदेशः प्राप्त इत्यपेक्षायां यस्य कर्मणो येन कर्मणा द्रव्यसाम्यं देवतासाम्यं वा भवति तस्मिंस्तद्धर्मातिदेष्टव्य इति स्थितं तत्र यस्य केनचिद् द्रव्यसाम्यं केनचिद्देवतासाम्यं च भवति तस्मिन् द्रव्यसा-म्यवत एव कर्मणो धर्मातिदेशः कृतः, न तु देवतासाम्यवत इति द्रव्य-प्राधान्यमुक्तं जैमिनिना "द्रव्यदेवतासाम्ये द्रव्यं बलीय" इति ।

न च द्रव्यप्राधान्योक्तेरतिवादत्वमनुष्ठानविरोधात् द्रव्यप्राधान्येन ह्यनुष्ठानन्दृश्यते, अतो द्रव्यप्राधान्यं वदतो जैमिनेर्देवतानिरासे तात्पर्यम-स्तीति । अत्रोच्यते । नात्र द्रव्यदेवतयोः सद्भावासद्भावाभ्यां प्राधान्या-प्राधान्ये विवक्षिते अपि तु विलम्बिताविलम्बितवृत्तिप्रमाणविषयत्वाधीने द्रव्यं ह्यविलम्बितप्रत्ययगम्यं देवता तु विलम्बितशास्त्रगम्या विलम्बावि-लम्बावेव हि श्रुतिलिङ्गादिषु प्रत्यक्षादिषु च पूर्वोत्तरप्राबल्यदौर्बल्यहेतू ।

ननु हविष्ट्वं शास्त्रैकगम्यमिति न द्रव्यस्यापि प्राधान्यमिति चेत् नैवं चरुपुरोडाशादिकं द्रव्यं हि प्रत्यक्षं हविष्ट्वाख्यधर्ममात्रमेव तत्र शास्त्रगम्यं देवतायास्तु स्वरूपं, श्रेयःसाधनत्वादिधर्मश्चोभयमपि शास्त्र-गम्यम् । अतः स्वरूपतो धर्मतश्च विलम्बितमानगम्यत्वाद् देवताया अप्रा-धान्यं धर्ममात्रस्य शास्त्रगम्यत्वेपि धर्म्यंशेनाविलम्बितमानगम्यत्वाद्धविषः प्राधान्यमतः प्राधान्याप्राधान्ययोः प्रमाणद्वारकत्वेन स्वरूपासद्भावे तात्पर्यं नास्तीति देवतानिरासोक्तिरन्यपरा । एवमर्थान्तराण्यप्यविरोधेन नेतुं शक्यानीति नार्थविरोधः ।

ननु ब्रह्मसूत्रैरेव जैमिनिपक्षमनूद्य प्रतिक्षेपादर्थविरोधो दुष्परिहारः, तथाहि "फलमत उपपत्ते"रित्यत्रेश्वरस्य फलप्रदत्वोक्त्या "धर्मं जैमिनि"-रित धर्मस्य फलप्रदत्वमनूद्य प्रतिक्षिप्तं न श्रुतत्वोपपत्तिभ्यां कालान्तर-भाविफलसाधनमात्रे जैमिन्यभिहिते ताभ्यामेवात्र फलसाधनविशेषसिद्धे-रुक्तत्वात् ।

ननु शेषत्वात् पुरुषार्थवादो यथा "अन्येष्विति जैमिनि"रित्यत्र वेदान्तोदितात्मज्ञानस्य कर्मशेषतयात्मनां कर्मशेषत्वोक्तिरधिकोपदेशा-दिति सिद्धान्तेन विरुध्यते ।

न च विकल्पेन निर्वाहः संभवति, वस्तुनि विकल्पायोगात् ।

न च जैमिनिना परमतमुपन्यस्तमिति वाच्यं जैमिनिमतत्वेन सिद्धान्तिना प्रतिक्षेपायोगात् । नैवं । विपक्षनिरासार्थस्य जैमिनेरन्वा-रुह्यवादस्य तथोपन्यासप्रतिक्षेपोपपत्तेः । अन्यथा "परं जैमिनि"रित्यादि-सूत्राणां मिथोविरोधः, भारतोक्तिविरोधश्च, जैमिनेरन्वारुह्यवादमजान-तान्तदुक्ते तत्त्वबुद्धिः स्यादिति तन्निवारणाय ब्रह्मसूत्रे तदुपन्यासनिरासौ कृतौ । अतएव "परामर्शं जैमिनि"रित्यत्र नैष्ठिकाद्याश्रमप्रतिक्षेपोपि परिहृतः, 'तद्भूतस्ये'त्यत्र नैष्ठिकाद्याश्रमभ्रंशस्य जैमिन्यनभिमतत्वाभिधात्, नह्याश्रमानभिमतौ तद्भ्रंशानभिमतिसंभवः । अतो वीतरागव्यतिरिक्ताना-मग्निहोत्रादिष्वश्रद्धानिवारणार्थे आश्रमान्तरप्रतिक्षेपः पूर्ववदन्वारुह्यवादः, स च पूर्वमीमांसायामसूचितस्तथाप्यौडुलोम्यादिमतवदनूद्य निरस्तः ।

न च मधुविद्यायां वस्वाद्यनधिकारोक्ति रधिकारोक्त्या विरुध्य-तइति वाच्यम् अनधिकारोक्तेर्मध्वादिदेवताभ्युपगमचिह्नत्वेन शास्त्रैक्या-विरुद्धतया तदुद्घाटनवैयर्थ्याद् 'भावं जैमिनि"रित्यादिसूत्रोक्तपक्षाश्च शास्त्रैक्याविरुद्धाः कर्मविचारे तेषामसमर्थनादिति न तत्पर्यनुयोगाव-काशः, तस्मान्नार्थविरोधः, कर्तृभेदपरिहारस्तु प्रसिद्धत्वाच्च–

कण्ठोक्तः, अतएव शब्दसूचितो वा धूर्तस्वामिकपर्दिकर्तृकस्यापस्त-म्बसूत्रव्याख्यानस्य व्याख्येयैक्यादेकप्रबन्धकत्वं हि दृष्टम् । पाणिनीयसूत्र-

Digitized by Google

पूर्वोत्तरवृत्त्योश्च वामनजयादित्यकर्तृकयोर्व्याख्येयव्याख्यानत्वं दृष्टं तस्मादुपपन्नमैकशास्त्र्यम् ।

सू० मीमांसाशास्त्रम् "अथातो धर्मजिज्ञासे"त्यारभ्यानावृत्तिः शब्दादित्येवमन्तं सङ्गतिविशेषेण विशिष्टक्रमं तथाहि ।

टी० अस्त्वैकशास्त्र्यं कथं पौर्वापर्यनियमः—इति शङ्कां परिहरन् वृत्तिग्रन्थस्थं "संहित"मिति पदं विवृणोति ।

"मीमांसे"ति क्रमविशेषान्वितमैकशास्त्र्यं संहितमित्यभिप्रेतम् आरभ्यैवमन्तमिति पौर्वापर्यनियम उक्तः "सङ्गतिविशेषेणे"ति अत्रामी सङ्गतिविशेषा अभिप्रेताः पाठक्रमश्चेतनानां त्रिवर्गे प्रथमप्रावण्यस्य संभवद्रूपोर्थस्वभाव औपनिषदेष्वङ्गाङ्गिभावप्रतिपादकवाक्येषु यज्ञादिकर्मणः पदार्थत्वेन संबन्धः कासुचिद्विद्यासु यज्ञतदुपकरणादीनां दृष्टिविशेषविषयत्वोक्त्या कर्मब्रह्मविद्ययोर्दृष्टान्तदार्ष्टान्तिकभावो विद्याकर्मणोरुत्पाद्योत्पादकभावात् तच्छेषभूतविचारयोस्तु तत्क्र[1]मभावत्वोपपत्तिर्व्याख्यानभूतमीमांसायां च उत्तरभागस्य पूर्वभागोक्तन्यायसापेक्षत्वं चेति एवं पौर्वापर्यनियामकसङ्गतिविशेषेण विशिष्टक्रमं--क्रमविशेषवदित्यर्थः ।

ननु भवतु वेदप्रामाण्यसिद्धये प्रथमाध्यायस्य पूर्वभावित्वं द्वितीयाध्यायात् पूर्वं ब्रह्मविचारः किं न स्यादिति तत्र तत्रोक्तैः सङ्गतिविशेषैः षोडशलक्षणानुपूर्वीसिद्धेस्तदनन्तरप्राप्तत्वाद् ब्रह्मविचारस्येत्यभिप्रेत्य "सङ्गतिविशेषेण विशिष्टक्रम"मित्युक्तम् । एवमैकशास्त्र्यं पौर्वापर्यनियमः शास्त्रस्यारम्भणीयत्वं च त्रयं प्रतिज्ञातं पूर्वोक्तस्य साङ्गसशिरस्काध्ययनस्य प्रमाणं दर्शयन् साधनचतुष्टयसंपादनस्यानवसरग्रस्ततां च दर्शयन् प्रतिज्ञातार्थत्रयमुपपादयितुमाह "तथाही"ति ।

(शेषमग्रे)

१ तत्कर्मभावत्वोपपत्तिरिति (ख) पु० पा० ।

Digitized by Google

॥ माधवीयधातुवृत्तिः ॥

(*Continued from page* 224. Vol. VII.)

ध्वन शब्दे ॥ भाष्ययं मित्त्वार्थमनूद्यते । ध्वनयति घण्टाम् । अन्यत्र ध्वानयति । अस्पष्टाक्षरमुच्चारयतीत्यर्थः । तथा च प्रातिशाख्यम-क्षरव्यञ्जनानामुपलब्धिर्ध्वनिरिति । अत्र भोजः । दलिवलिस्खलिरणिध्व-निस्त्रपिक्षपयश्चेति पपाठ । तत्र ध्वनिर्वर्द्धमानानुसारेण पठितः, उदा-हृतश्च । तथा रणिरपि । दल विदारणे । वल संवरणे, स्खल संचलने, त्रपूष् लज्जाया,मिति गताः । तेषां णौ दलयति, वलयति, त्रपयतीति । क्षपयति क्षै क्षयइति वक्ष्यमाणस्य कृतात्त्वस्य पुकि निर्देशः । तथा च सुधा-करः । क्षै क्षये णिचि पुक्नि मित्त्वे क्षपयतीति । स्वन अवतंसने । स्वनयति । अयं शब्दार्थः पठिष्यते । अत्र मैत्रेयः । ध्वन शब्दे । स्वन अवतंसन-इत्येकइति । घटादयो मितः । मित्संज्ञका इत्यर्थः ॥ ७७२ ॥

जनीजृष्क्नसुरञ्जोऽमन्ताश्च ॥ चशब्दान्मित इत्यपकृष्यते । जनी प्रादुर्भावे । जृष् वयोहानौ । क्नसु ह्वरणदीप्त्योः । दिवादयः, रञ्ज रागे । भ्वादिश्च । अम् शब्दो ऽन्ते येषां ते अमन्ताः यथासंभवं सर्वेषु विकरणेषु ते च मितः । जनयति । जरयति । जृषिति षिन्निर्देशात् जृणातेरमित्त्वात् जारयतीति । बोधिन्यासादौ मैत्रेयो जृणातेः स्थाने झृ इत्येकइति चतुर्थेऽपि च वक्ष्यति । क्नसयति । रजयति मृगान् रमयतीत्यर्थः । रञ्जेर्णौ मृगरमणउप-संख्यानमिति नलोपः । मृगादन्यत्र नलोपो न भवति, रञ्जयति पक्षिणः । तथा रमणादन्यत्र न लोपः । रञ्जयति मृगान् वृषादिवानेन । नलोपाभावे मित्त्वफलमररञ्जत्, अराञ्जीत्यादौ णिच्यणमुलोरिति दीर्घः । अमन्ताः ग-त्वपि गमयति, नमयतीत्यादि । अत्र के चित् । जनीजृष्क्नसुरञ्जोऽमन्ताश्च ससकारं सूत्रं पठन्तः सकारमुत्तरधातोरादिं व्याचक्षाणाः दैवादिकस्य निर-सनार्थस्य क्नसतेः क्नसयतीति मित्त्वमाहुः । तथा च दिवादावात्रेयमै-त्रेयौ क्नसु निरसनइत्येके मिदिति ॥

ज्वलह्वलह्मलनमामनुपसर्गाद्वा ॥ ज्वलादीनां वा मित्त्वं भवति उपसर्गात् परेषां नायं विकल्प इत्यर्थः । क्व चित्तु पठ्यते । ज्वलह्वलनमो ऽनुपसर्गाद्वेति । तत्र न क्लेशो मित इति संबन्धः । ज्वलादीनां पूर्वपाठात् प्राप्तिः । नमेस्त्वमन्तत्वात् ज्वलयति ज्वालयति । ह्वलयति, ह्वालयति । ह्मलयति, ह्मालयति । नमयति, नामयतीति । उपसृष्टे तु नित्यं मित्त्वे प्रज्वलयतीत्यादि । उन्नामयतीति प्रयोगो घञन्तात् तत्करोतीति णौ । एवमन्येषामपीदृशां निर्वाहः । 'मितां ह्रस्व' इति सूत्रे 'वा चित्तविरागे' इत्यतो वेत्यनुवृत्तेर्व्यवस्थितविभाषाविज्ञानाच्च संक्रामयतीत्यादिसिद्धिरिति । यत्तु सुधाकरोक्तं तत्करोतीति णिचि उन्नामयतीति तदयुक्तं, नोदात्तोपदेशस्येति वृद्धिनिषेधात् उन्नामशब्दस्यैवाभावात् ॥

ग्लास्नावनुवमां च ॥ अनुपसर्गाद्वेति वर्तते । पूर्ववत् व्याख्यानमत्रापि । अत्रापि पूर्ववत् क्व चित् ग्लास्नावनुवमश्चेति प्रथमान्तं पठ्यते । ग्लै हर्षक्षये । ष्णा शौच इति ष्णै शौचवेष्टनयोरिति वक्ष्यमाणस्य ष्णा शौच इत्यादादिकस्य च ग्रा पाक इत्यत्रोक्तन्यायेन । वनु च नोच्यत इति इह पठितो वनतिः शब्दान्तरस्य विधिरिति न्यायादनूद्यते । न तु तानादिको वनोतिः । टुवम उद्गिरणे । अमन्तः । तदयं वनवमोः प्राप्ते ग्लास्नोरप्राप्ते इत्युभयत्र विभाषेयम् । ग्लपयति । ग्लापयति । स्नपयति । स्नापयति । वनयति । वानयति । वमयति । वामयति । ग्लास्नोरुपसृष्टयोर्मित्त्वाभावात् प्रग्लापयति, प्रस्नापयतीत्येव । वनुवमोस्तु नियमितत्वात् प्रवनयति । प्रवमयतीत्येव ॥

न कम्यमिचमाम् ॥ कमु कान्तौ, अम गत्यादौ, चमु अदने, एषाममन्तत्वात् मित्त्वे प्राप्ते निषिध्यते । कामयते । आमयति । आचामयति ।

शमो दर्शने ॥ शम उपशमने दिवादिः । अयं च दर्शने न मित् अमन्तोऽपि निशामयति रूपम् । अत्युत्कृष्टमिदं तीर्थं भरद्वाज निशामयेति, शम आलोचन इति चौरादिकः । अस्मादिति कारिते णावर्थे न संपद्यते । दर्शनादन्यत्र निशमयति वचः । अत्र स्वामी नेत्यनपेक्ष्य अदर्शने इति पदं दर्शनादन्यत्र मिदिति संव्याचष्ट एवमप्यत्र न फलभेदः ॥

यमो ऽपरिवेषणे ॥ यम उपरमे इत्यस्य, यमं परिवेषणमन्यत्र मोऽ- नाया यमयामन्तोऽपि न मित् । आयामयति । व्यापयति व्यापारयति नेत्यर्थः परिणमयति आश्लेषणात् । अत्र स्वाम्यादयो नेत्यनपेक्ष्य परिवेषणादन्यत्र मिदिति व्याचक्षते, तद्वृत्तिविरुद्धम् । तथा हि । न पादमीत्यत्र आयामयति इत्युदाहृत्य यमोऽपरिवेषणइति मित्संज्ञा प्रतिषिध्यते इति, तत्र न्यासे च । तत्र हि न कम्यमिचमामित्यतो नेति प्रतिषेधो वर्तते इति, तथा मैत्रेया- दयोऽपि नेत्यनुवृत्त्यैव व्याचक्षते । नियमयतीति प्रयोगोऽयं तत्करोतीति णौ द्रष्टव्यः ॥

स्खदिरवपरिभ्यां च ॥ न मिदिति शेषः । अवस्खादयति । परिस्खा- दयति । अपाव परिभ्य इति बोधिन्यासे । अत्रापि स्वाम्यादयो नेत्यनपेक्ष्य स्खादेः पूर्वपाठात् सामान्येन प्राप्तं मित्त्वमुपसृष्टादपि भवति अवादुपसृ- ष्टादेवेति व्याचक्षाणाः प्रस्खादयतीत्यादौ मित्त्वं नेच्छन्ति । इदं वृत्तिका- रादीनामनभिमतम् । यतस्तैः सर्वत्र नेत्यपेक्ष्यते, एवं हि निषेधानन्तरं पाठ उपपद्यते । अन्यथा स्खद स्खदनइत्यस्यानन्तरमेव अवपरिभ्यां चेति पठेत्, द्विः स्खदिग्रहणं न कर्त्तव्यं भवति ॥

फण गतौ ॥ नेति निवृत्तम्, असंभवादिति मैत्रेयः । निषेधात्पूर्वम- पाठः फणादिकार्यानुरोधात् इति च । फणति । पफाण । फेणतुः । फेणुः । पफणिथ । पफण । पफणिव । फेणिव । पफणिम । फेणिम । 'फणां च सप्ताना'- मिति किति लिटि थलि च सेटि एत्वाभ्यासलोपविकल्पः । फणितेत्यादि । अफणीत् । अतो हलादेरिति वृद्धिविकल्पः । पिफणिषति । पम्फण्यते । अनुनासिकत्वाच्चुक् पम्फणीति । पम्फण्टः ।'अनुनासिकस्य क्विझलोः क्ङिती'- ति दीर्घः । पम्फण्हीत्यत्र हेर्झलः परत्वाभावात् धिभावो न भवति । फणयति । अपीफणत् । अन्यत्र फाणयति सक्तून् खेदयतीत्यर्थ इति स्वा- मिकाश्यपकारौ । फाण्टः । क्षुब्धस्वान्तेत्यादिना अनायासेनिट्त्वं निपात्यते । फाण्टानायासशब्देनाल्पप्रयाससाध्यः कषायविशेष उच्यते । तथा हि । चोस- धस्य पञ्चकल्पना, रसः, कल्कः, शृतः, शीतः, फाण्टः, शीतो नाम तुषया कोषधात्

हस्ते प्रक्षिप्य रात्रावधिवासितं यदुदकं प्रातः पीयते सः, तदेवाप्योदके प्रक्षिप्य सकृदभिषुत्य पूत्वा पीयते स फाण्ट इति तद्विदः । वृत् । समाप्तौ घटादिर्वृत्त इत्यर्थः । अस्मात्पूर्वं वृदित्येक इति मैत्रेयः । ज्वरादय उदात्ता उदात्तेतः ॥ ७७१ ॥

राजृ दीप्तौ ॥ उदात्तः स्वरितेत् । राजति । रराज । रेजतुः । रराजतुः । रेजिथ । रराजिथ । राजितेत्यादि । तङि राजते । रराजे । इत्यादि पूर्ववत् । रिराजिषति । रिराजिषते । 'मो राजि समः क्वा'विति समो मकारस्य मकारः क्विबन्तेऽस्मिन् परे मोऽनुस्वारापवादः, सम्राजोऽपत्यं, साम्राज्यः । 'सम्राजः क्षत्रिय' इति कुर्वादिपाठात् क्षत्रियवचनादस्मादपत्ये ण्यः, अक्षत्रियादपि साम्राजः । राजत इति राट् । अन्येभ्योऽपि दृश्यत इति क्विप् । राष्ट्रम् । ष्ट्रन् । तितुत्रेतीण्निषेधः । षित्त्वात् स्त्रियां राष्ट्री, स्वामिनीत्यर्थः । राष्ट्रियः । 'राष्ट्रावारपाराद् घखा'विति भावादौ शैषिकच्छापवादो घः । राजा । कनिन्युवृषीत्यादिना कनिन् । दन्तानां राजा, 'राजदन्तादिषु परम्'इति षष्ठ्यन्तस्य परप्रयोगः । राजन्यः क्षत्रियः । 'राजश्वशुराद्यत्' इति अपत्येऽर्थे यति व्युत्पत्तिः, जातिवचनस्त्वयम् । तथा च तत्र वार्तिकं राज्ञोऽपत्ये जातिग्रहणमिति । जातिश्चेह क्षत्रियजातिरुच्यते । 'ये चाभावकर्मणो'रिति प्रकृतिभावात् 'नस्तद्धित' इति टिलोपाभावात् क्षत्रियजातेरन्यत्राणि राजनः । 'अनि'ति प्रकृतिभावः, राज्ञां समूहो राजकम् । नस्तद्धित इति टिलोपः । गोत्रोक्षोष्ट्रोरभ्रराजेति वुञ् । राजन्यकम् । 'आपत्यस्य च तद्धितेऽनाती'ति यकारस्य अनाति तद्धिते भसंज्ञानिमित्ते विधीयमानो लोपः 'प्रकृत्याके राजन्यमनुष्ययुवान' इति प्रकृतिभावान्न भवति । यद्वायं यकारो राज्ञोऽपत्ये जातिग्रहणमित्युक्तत्वादनापत्यः, राज्ञ इदं राजकीयम् । 'राज्ञः क च' इति छप्रत्ययः शैषिकः । कश्चान्तादेशः । राज्ञः कर्म भावो वा राज्यम् । पत्यन्तपुरोहितादिषु 'राजासे' इति पाठादसमासेयम् । यकारस्य भावकर्मविषयत्वात् प्रकृतिभावात् नस्तद्धित इति टिलोपः । समासे तु ष्यञ् । आधिराज्यम् । ब्राह्मणादिषु राजन्शब्दः पठ्यते स हि तदन्तस्यानर्थकः । केवलस्य यतो विधानात् राजास इति

इत्यनुवचनं ज्ञापकमत्र तदन्तात्वम्। अपरे तु ब्राह्मण्यादेराकृतिगणत्वात् राजन्शब्दान्तात् ष्यञि सिद्धे तत्र राजन्शब्दस्य पाठसामर्थ्यात् केवलात् ष्यञपि भवतीत्याहुः। तथा च शाबरभाष्यमते अधिकरणे राज्यं, तस्य कर्मणि ष्यञिति। अधिको राजा अधिराजः, 'कुगतिप्रादय' इति समासः। 'राजाहःसखिभ्यष्टजि'ति राजाद्यन्तात् तत्पुरुषाट्टचि टिलोपः। अत्र न स्वतरं पूर्वं निपततीति 'द्वन्द्वे घी'ति च लघ्वक्षरत्वात् घ्यन्तत्वात् सखिशब्दस्य पूर्वनिपाते कर्तव्ये राजन्शब्दं पूर्वं निपात्य सवर्णदीर्घस्य निर्देशात् यस्य राजन्शब्दस्य सवर्णदीर्घप्रसङ्गः तस्यैव टजिति ज्ञापनाल्लिङ्गविशिष्टपरिभाषया अधिराज्ञीत्यादौ टच् भवति। अयं समासान्त उत्तरपदादन्तएव समासे भवतीत्युक्तं, तेन पञ्चराजीत्यादौ अकारान्तोत्तरपदसमाहारद्विगुत्वेन स्त्रियां ङीप् भवति। शोभनो राजा, सुराजा। अतिराजेत्यत्र 'न पूजना'दिति समासनिषेधः। तत्र स्वती पूजायामिति परिगणितं, प्रतिराजेत्यत्र तु 'प्रतेरंश्वादयस्तत्पुरुषे' इति प्रतेः परेषामंश्वादीनामाद्युदात्तविधौ प्रतिराजेति पाठात् समासान्ताभावः। किंराजा अराजेत्यत्र 'किमः क्षेपे' 'नञस्तत्पुरुषा'दिति समासान्ताभावः। महाराजो देवता अस्य, माहाराजिकः। 'महाराजप्रोष्ठपदाट्ठञि'ति प्रथमान्तात् देवतोपाधिकात् अस्येत्यर्थे ठञ्। महाराजो भक्तिर्भजनीयो यस्य माहाराजिकः। 'महाराजाट्ठञिति' प्रथमान्तात् भक्त्युपाधिकात् अस्येत्यर्थे ठञ्। शोभनो राजा यस्यास्ति स राजन्वान्। 'राजन्वान् सौराज्य' इति मतुपि नलोपाभावो निपात्यते ॥ ७७४ ॥

टुभ्राजृ टुभ्राशृ, टुभ्लाशृ दीप्तौ ॥ उदात्ता अनुदात्तेतः। अत्र स्वामी भ्राश्वावधिकृत्य टुभयसङ्गोऽन्येके इत्याह। त्रयोऽपि ङित इति मैत्रेयः। वृत्तिकारोऽप्यत्रैवानुकूलः। यदाह वा भ्राशेत्यत्र टुभ्राशृ टुभ्लाशृ इति। तथा फणां च सप्तानामित्यत्र न्यासपदमञ्जर्योः त्रयोऽपि ङितः पठ्यन्ते। तस्माद्वयमेव पाठो बहूनां संमतः। भ्राजतेः पठितस्यापीह पाठः फणादित्वेन किति लिट्येत्वाभ्यासलोपविकल्पार्थः। ङित्त्वं तु न फलं तत्रापि टुशब्दस्यासङ्क्तुं शक्यत्वात्। अनेनैव सिद्धे तस्य पाठो व्यर्था-

छिषत्वमित्यर्थे इति तथैवोक्तं, भ्राजते । बभ्राजे । भ्रेजे । भ्राजितेत्यादि । अभ्राजिष्ट । विभ्राट् इत्यादौ व्रश्चादिषत्वम् । भ्राजथुः । द्वितोऽथुच् । न भ्राजत इति नभ्राट् । नभ्राण्नपादिति नञः प्रकृतिभावः । चङ्परे णौ भ्राजेत्यादिना उपधाह्रस्वविकल्पनात् अबिभ्रजत् । अबभ्राजत् । अस्यापि ऋदित्वं पूर्ववत् अनुदात्तत्वमात्रफलम् । भ्राष्ट्रम् । ष्ट्रन् । भ्राष्ट्रमिन्धयति भ्राष्ट्रमिन्धः । कर्मण्यण् । 'भ्राष्ट्राग्न्योरिन्धे' । इति मुम् । भ्राशते । बभ्राशे । भ्रेशे । भ्राशिता । भ्राशिष्यते । भ्राशताम् । अभ्राशत । भ्राशेत । आशिषि भ्राशिषीष्ट । अभ्राशिष्ट । सार्वधातुके वा भ्राशेत्यादिना पक्षे शपोऽपवादे श्यनि भ्राश्यते । भ्राश्यताम् । अभ्राश्यत । भ्राश्येतेति भवति । बिभ्राशिषते । बाभ्राश्यते । बाभ्राष्टि । भ्राशयति । अबभ्राशत् । ऋदित्वाच्चोपधाह्रस्वः । भ्लाशते । सर्वं भ्राशतिवत् । भ्राशथुः । भ्लाशथुः । ट्वित्वादथुच् ॥ ७७७ ॥

स्यमु स्वन ध्वन शब्दे ॥ स्यमादयः अलन्ता उदात्ता उदात्तेतः । स्यमति । सस्याम । सस्यमतुः । स्येमतुः । सस्यमिथ । सस्यमुः । स्येमुः । इत्यादि । अस्यमीदित्यत्र अतो हलादेरिति वृद्धिः ह्म्यन्तेति निषिध्यते । सिस्यमिषति । सेसिम्यते । 'स्वपिस्यमिव्येञां यङी'ति संप्रसारणे द्विर्वचने अभ्यासस्य गुणः । संस्यमीति । संस्यन्ति । यङो लुका लुप्तत्वात् तत्परत्वाभावाच्च संप्रसारणम् 'नुगतोऽनुनासिकान्तस्ये'ति अभ्यासस्य नुक् । संस्यन्तइत्यादौ अनुनासिकस्य क्विझलोरिति दीर्घः । संस्यान्मि । 'मो नो धातोः' 'म्वोश्चे'ति नत्वम् । संस्यांहीत्यत्र पूर्वमनुनासिकस्य दीर्घे पश्चात्तस्यापदान्तस्य झलीत्यनुस्वारः । असंस्यन्नित्यत्र पदान्तत्वात् 'मो नो धातो'रिति नः । स्यमयति । असिस्यमत् । अमन्तत्वान्मित्त्वम् । स्यमित्वा । स्यान्त्वा । उदित्वादिड्विकल्पः । अनिट्पक्षे अनुनासिकस्येति दीर्घः । स्यान्तम् । 'यस्य विभाषे'त्यनिट्त्वम् । स्यमन्तको मणिः । बाहुलकादन्तच् संज्ञायां कन् । अयं चुरादौ वितर्कार्थः । स्वनति । सस्वान । सस्वनतुः । स्वेनतुः । स्वनितेत्यादि । अस्वनीत् । अस्वानीत् । अतो हलादेरिति वा वृद्धिः । सिस्वनिषति । संस्वन्यते । संस्वन्ति । संस्वान्तः । स्वनयति । अवि-

स्वनम्। अर्थे घटादित्वान्मित्त्वम्। विष्वणति। अवष्वणति। वेश्च स्वनेति षत्वम्। अकारेऽवायादित्यनुवर्तते। विष्वणनं सशब्दभोजनम्। तथा च वृत्तौ अभ्यवहारक्रियाविशेषोऽभिधीयते। यत्र स्वननमस्तीति सशब्दं भुङ्क्ते इत्यर्थः। पिनाकी तु भुञ्जानः किं विष्वणं करोतीति। काश्यपस्तु भोजनमेवार्थमाह। बोधिन्यासेऽपि पक्षद्वयमपि दर्शितम्। विषष्वाण। विविष्वणिषतीत्यादौ स्थादिष्वभ्यासेनेत्युभयत्र षत्वम्। तच्चोपदेशार्थमभ्यासार्थं अपि प्रतिषेधार्थं चेत्युक्तम्। व्यष्वणत्। प्राक्सितादिति षत्वम्। अवषंष्वणतरित्यादौ नुम्विसर्जनीयेति वेश्च स्वन इति षत्वम्। उक्तं च अयोगवाहानामट्सु णत्वं शर्षु जश्भावषत्वे इति। अयोगवाहाश्चानुस्वारविसर्जनीयोपध्मानीयजिह्वामूलीययमा उक्ताः। षत्वे कृते रषाभ्यामिति णत्वे विष्वणतीत्यत्र णत्वं पूर्वत्रासिद्धत्वात् 'न श्चापदान्तस्य झली'त्यनुस्वारे परसवर्णो नकारः। तस्य पुनर्णत्वं न भवति। असिद्धत्वादेव। स्वनः स्वानः। 'स्वनहसोर्वे'ति वा अप्। तदभावे घञ्। उपसृष्टात्तु अप्रत्यय इत्येव। निस्वानः, निस्वनः। नौ गदनदेत्यादिना घञपौ। स्वान्तम्। क्षुब्धस्वान्तेत्यादिना निष्ठायामनिट्त्वं निपात्यते मनोभिधानं चेत्, अन्यत्र स्वनितो मृदङ्गः। आङ्पूर्वादस्मात् रुष्यमत्वरसंघुषेति निष्ठायामिड्विकल्पः। इयं चोभयत्र विभाषेति मतभेदान्यत्र च आस्वानितम्, आस्वनितमिति। फणादयो गताः। ध्वनति। दध्वान। ध्वनितेत्यादि स्वनिवत्। ध्वान्तम्। क्षुब्धस्वान्तेति तस्यानिट्त्वम्। अन्यत्र ध्वनितम्। ध्वनिः। अयं कषादिश्च। अत्र स्वनिध्वन्योर्मध्ये छनेति क्वचित् पठ्यते। छन षन सम्भक्ताविति पूर्वमेव गतत्वादयमपार्थः। ये कित्वोनरस्वरपरिहारादन्त्यादिं पठन्ति सोऽप्यनार्षः। [illegible]विरोधात्। अत एव फणां चेत्यत्र सप्तानामिति किमित्युक्त्वा कविः प्रत्युदाह्रियते, तथा च न्यासे फणादीन् ध्वन्यन्तानष्ट पठित्वा ध्वनिवर्जिताः शेषाः फणादयः सप्तेत्युक्तम्। पदमञ्जर्यां चैवमष्ट पठित्वा ऽन्त्यवर्जं फणादय इत्युक्तम्॥ ७८९॥

चल कम्पने॥ चलति। चचाल। चेलतुः। चेलिथ। चलि-

ता । सिसमिषति । संसम्यते । संसमीति । संसन्ति । समयति । असीसमत् । स्तमति । तस्ताम । तस्तमतुः । स्तमिता । तिस्तमिषति । तंस्तम्यते । तंस्तन्ति । स्तमयति । अतिष्टमत् । अत्र स्वाम्यादयः के चिदेतदन्ता घटादय इति । बोधिन्यासे तु ध्वन्यन्ता इति । अत्र फणतौ मित्त्वे विवादः । रञ्जादीनां त्वनन्तराणां चतुर्णां वृद्ध्युपधाह्रस्वनिषेधार्थादुच्चारणाल्लिङ्गाच्च मित्त्वं भविष्यति । स्यमेरमन्तत्वात्स्वनिध्वन्योश्च पूर्वत्र पाठान्मित्त्वं, सर्वैरपि सिद्धं शब्दार्थत्वएव मित्त्वं यथा स्यादिति पूर्वत्र पाठोऽङ्गीकृतः । षमिष्टम्योरप्यमन्तत्वादेव मित्त्वं सिद्धमिति चाहे।पुर्षाकामात्रमेवैतत्, ध्वनान्ता आघटादय इति मतद्वयम् । यत्तु तैरुक्तं षमिष्टम्योरमन्तयोः पुनः पाठेनामन्तलक्षणस्य मित्त्वस्यानित्यत्वज्ञापकादुत्स्तामयतीत्यादिसिद्धिरिति तदस्माभिरमन्ताच्चेति मित्त्वविधौ प्रकारान्तरेणोपपादितम् ॥ ८८१ ॥

ज्वल दीप्तौ ॥ ज्वलति । जज्वाल । जज्वलतुः । ज्वलिता । अज्वालीत् । 'अतो ल्रान्तस्ये'ति वृद्धिः । जिज्वलिषति । जाज्वल्यते । जाज्वलीति । 'ज्वलितिकसन्तेभ्यो णः' इति पाक्षिके णप्रत्यये ज्वाल इति यथा स्यादिति । ज्वलीतीतिशब्द आद्यर्थे । णाभावे पचाद्यचि ज्वलः । ज्वलनः । 'जुचङ्क्रम्य' इति तच्छीलादौ युच् कर्तरि ॥ ८८२ ॥

चल कम्पने ॥ चलति । चचाल । चेलतुः । चेलुः । चलितेत्यादि पूर्ववत् । कम्पने घटादिपाठात् चलयति । अन्यत्र चालयति । चलः । चालः । ज्वलतीति णविकल्पः । चलाचलः । चलइत्यर्थः । चरिचलिपतिवदीनामच्याक्चाभ्यासस्येति द्विर्वचनम् अभ्यासस्यागागमश्च । चाचलिः । सहिवहिचलिपतिभ्यो यङन्तेभ्यः किकिनाविति तयोरन्यतरः । 'अतो लोपः' 'यस्य हल' इति अल्लोपयलोपौ । चलनः । 'चलनशब्दार्थादकर्मकाद्युच्' इति युच् । चल विलसन इति तुदादौ, चल गताविति चुरादौ ॥ ८८३ ॥

जल घातने । घातनं तैक्ष्ण्यमिति स्वामी । जलतीत्यादि पूर्ववत् । जलः । जालः । डलयोरेकत्वस्मरणात् जडः ॥ (शेषमवे)

Digitized by Google

॥ खण्डनखण्डखाद्यम् ॥

(*Continued from page* 235. Vol. VII.)

टी० ननु, सिद्धत्वेन कर्मत्वमसिद्धत्वेन च क्रियात्वं, तदुभयं चैकदा विरुद्धम्; एवं 'विषयविषयिभावः संबन्धः संबन्धिद्वयादभिन्नः'–इति कथंचिदनवस्थादिभयेनाङ्गीकृतं (१); 'य एव संबन्धः स एव संबन्धी (२) स एव चापरः (३) संबन्धी'–इति तु सर्वथा दुर्घटं, केनानुरोधेनाभ्युपेयं? कथं वा स्वपरिभाषामात्रेण व्यवहारसमर्थनम्? (४)। यदि लोकसिद्धो विषयविषयिभावो माद्वैतं सहते तदा तदपि त्यज्यतामित्याशयेनाह(५)–। ᵃ "अथवे" ति ॥ ᵇ "यथा तु भवतामि" ति। * न च सत्ता न सद्व्यवहारहेतुः किंतु सत्तासमवायः, स च यथा घटादौ तथा सत्तायामपि, तस्य संबन्धत्वेन द्विष्ठत्वात्; सामान्यान्त्यविशेषेषु सत्तैकार्थसमवायात्; तदेकार्थे(६)समवायोपि हि तत्समवाय एवेति वाच्यम् *। तर्हि सत्तासमवायः स्वरूपत एव सन्निति वक्तव्यम्, तथा च यथा सत्तायां वा तत्समवाये वा स्वरूपतः सद्रूपत्वमास्थेयं तथा परसिद्धिर्ज्ञानात् ज्ञानसिद्धिस्तु स्वत एवेत्यर्थः ॥

मू० "अथवा, यथा बहुव्रीहिसमासे तद्गुणसंविज्ञाने गुणा(७)-मादायैव प्रधानस्यान्यपदार्थस्य बहुव्रीहिसिद्धपदप्रतिपाद्यता तथा विज्ञानस्याऽविषयमपि स्वात्मानमादायैव

(१) अत्रापि 'विरुद्धम्'–इत्यनुषञ्जनीयम्।

(२) सम्बन्धी=सम्बन्धप्रतियोगी।

(३) अपरः सम्बन्धी=सम्बन्धाऽनुयोगी।

(४) 'समर्थनम्'–इत्यन्तं पूर्वपक्षग्रन्थः; तदग्रे 'इति चेत्'–इत्यध्याहृत्य 'यदि लोकसिद्धः'–इत्यादिः सिद्धान्तग्रन्थो योजनीयः।

(५) केषुचित्पुस्तकेषु 'इत्याशयेनाहे'त्यस्य स्थाने 'इत्याशङ्क्याह'–इति पाठो दृश्यते सोयं 'समर्थनम्'–इत्यन्तपूर्वपक्षग्रन्थानवबोधेन कैश्चिदाधुनिकैः प्रक्षिप्त इत्याकलयते।

(६) ननु, एकार्थसमवायस्य विशेषेषु सद्व्यवहारोपपादकत्वेपि गुणसमवायस्य कथं तदुपपादकत्वमित्यत आह–तदेकार्थेति।

(७) गुणं=गौणं समस्यमानकर्णादिपदार्थम्।

स्वाविषयव्यवहारप्रवर्तनं समर्थ्यताम्। [b]सोऽयं गुरूणां सविषयकविज्ञानस्वप्रकाशतापक्षो न ब्रह्मस्वप्रकाशतापक्षः, तत्र विषयाभावात्। [c]एतावन्मात्रेण तु स्यात्,—यथा स्वाऽविषयेऽपि कुटादौ बहुव्रीहिवाक्यं व्यवहारं प्रवर्तयति—इति, तथा ज्ञानमविषयेऽप्यात्म[d]न्यविद्यादशाया(१)मिति।

टी० ननु, "ज्ञानं स्वत एव सिद्धमि"त्यनुपपन्नम्। "स्वत"—इति पञ्चम्या सिद्धिं प्रति स्वस्य हेतुत्वमभिधीयते, सिद्धिश्च द्वयी—ज्ञप्तिरुत्पत्तिर्वा न स्वस्माद्भवितुमर्हति, हेतुहेतुमद्भावस्य ज्ञाप्यज्ञापकभावस्य वा संबन्धस्य भेदघटितत्वात्। सत्ता तु सत्तया नोत्पाद्यते ज्ञाप्यते वा; किंतु विधिमुखप्रत्ययवेद्यत्वादिना सदन्तरगुणेन(२) 'सत्ता सती'—इति गौणो व्यपदेश इति महद्वैषम्यमित्याशये(३)नाह—। [a]"यथे"ति। यथा लम्बकर्णादिपदं स्वविषये शक्त्या(४), लक्षणया वाऽन्यपदार्थे व्यवहारं प्रवर्तयदेव स्वाविषयेऽपि समस्यमानपदार्थे व्यवहारं प्रवर्तयति तथा ज्ञानं स्वविषये घटादौ व्यवहारं प्रवर्तयत्स्वाविषयेऽपि स्वस्मिन् व्यवहारं प्रवर्तयतीति, व्यवहारस्य ज्ञानसाध्यत्वात्; स्वभिन्नज्ञानसाध्यत्वस्य गौरवेणापास्तत्वादित्यर्थः॥ ननु, 'स्वविषये ज्ञानं व्यवहारं प्रवर्तयत्स्वस्मिन्नपि व्यवहारं प्रवर्तयति'—इति वेदान्तिनामनभिमतं, विषयाऽनभ्युपगमादित्यत आह—। [b]"सोऽयमि"ति। गुरूणां=प्राभाकरगुरूणां, मान्यानां वा॥ स्वविषये व्यवहारप्रवर्तनं गुरूणामिव वेदान्तिनामपि तुल्यमिति तन्मात्रे तद्गुणसंविज्ञानबहुव्रीहिपदं दृष्टान्त इत्याह—। [c]"एतावन्मात्रेणे"ति। कुटः=घटः, "घटः कुटनिपावस्त्री"—

(१) 'अविद्यादशायाम्'=इत्यतोऽनन्तरं 'व्यवहारं प्रवर्तयति'—इत्यनुषञ्जनीयम्।

(२) सदन्तरगुणेन=द्रव्यगुणकर्मान्यतमगुणेन।

(३) इत्याशयेनाह, इति=पूर्वपक्षिण आशयं हृदि निधायाऽस्वरसेन पक्षान्तरमाहेत्यर्थः। अस्यैवार्थस्याऽनवबोधात् क्वचिच्च 'इत्याशङ्क्याह'—इत्येव पाठः क्लृप्तः, स चाऽसङ्गतः, बहूनामनुपहतस्य न्याय्यत्वाद्गतिसम्भवाच्च। एवमग्रेऽपि।

(४) स्वविषये ऽन्यपदार्थे शक्त्या, लक्षणया वा, व्यवहारं प्रवर्तयदिति सम्बन्धः। वैयाकरणानां मते शक्त्या व्यवहारं प्रवर्तयन्नैयायिकानां तु लक्षणयेति ध्येयम्।

इति कोशा(१)त् । "गोह्कुटादिभ्यः" इत्यादिसूत्रस्थकुटपदं वा दृष्टान्तः । कुटादौ=कुटादिस्थले, यद्बहुव्रीहिवाक्यं तत्स्वाविषयेऽपि व्यवहारं प्रयोजयतीति योजना; न तु(२)सप्तम्योः सामानाधिकरण्यम् ॥ ननु, स्वाविषये स्वस्मिन् ज्ञानं व्यवहारप्रवर्तकमित्यत्रापि तवाऽद्वैतवादिनो न दृष्टान्तोऽस्ति, दृष्टान्तस्य व्यवहारस्य च ब्रह्मगोचरस्याऽनभ्युपगमादित्यत आह—। [d]"अपिचे"ति ॥

मू० [a]"तदेवं यद्यदन्यत्र(३)दृष्टवैधर्म्यं स्वप्रकाशे पर्य्यवसास्यति तत्सर्वमन्यथानुपपत्तिरेव स्वप्रकाशसाधकतया प्रदर्शिता स्वीकारयिष्यति । [b]तद्यथा—अन्यो ज्ञाताऽन्यश्च ज्ञेय इत्यन्यत्र दृष्टमपरमिति व्यवहारान्यथानुपपत्त्या त्याज्यं; तथाऽन्यज्ज्ञानमन्यज्ज्ञेयमिति जानामीति व्यवहारान्यथानुपपत्त्या त्याज्यं; [c]सर्वतो बलवती ह्यन्यथानुपपत्तिस्तथाहष्टतामात्रबलमवलम्ब्य प्रवृत्तं तर्कशतमपिबाधते ।

टी० ननु, कुटादावपि तद्गुणसंविज्ञानबहुव्रीहेरनुशासनबलाल्लक्षणया, शक्त्या वा, कुटोऽपि विषय एव; तथाच व्यवहारानुरोधात्स्वप्रकाशेऽपि कर्मक्रियाभावो विषयविषयिभावो वाऽवश्यमङ्गीकर्त्तव्यः, स चाऽभेदे सर्वथानुपपन्न इति कथं स्वप्रकाशत्वम्?। न च दृष्टान्तमात्रादिष्टसिद्धिः, इति प्रमाणं किंचिदावश्यकमत आह—। [a]"तदेवमि"ति। ज्ञानस्य ज्ञानान्तरप्रकाश्यत्वेऽनवस्था, शेषासिद्ध्या सर्वासिद्धिरनिर्मोक्षापत्तिश्चेत्यन्यथानुपपत्त्या स्वप्रकाशताऽवश्यमङ्गीकर्त्तव्या, सा च यावता विना न सिद्ध्यति तावदवश्यमङ्गीकर्त्तव्यम्; अतो विषयविषयिभावं क्रियाकर्मभावं वा कथमद्वैतेऽप्यर्था-

(१) का० २। वैश्य व०। श्लो० ३४।

(२) अस्मिन्द्वितीयवर्णके "स्वाऽविषये" "कुटादावि"ति सप्तम्योः पूर्ववर्णके प्रदर्शितसामानाधिकरण्यवत्सामानाधिकरण्यं नेत्याह—नत्विति ।

(३) अन्यत्र=लोके कर्मक्रियाभावो विषयविषयिभावो वा भेदे दृष्टस्ततो वैधर्म्यं ज्ञानस्य स्वप्रकाशत्वेऽभेदे कर्मक्रियाभावादिः ।

Digitized by Google

पत्तिर्न साधयिष्यतीत्यर्थः ॥ ननु, यदन्यत्रादृष्टं तदप्यन्यथानुपपत्तिः साधयतीत्यप्यदृष्टमेवेत्यत आह–। [b] "तद्यथे"ति। ज्ञातुर्ज्ञेयत्वं, ज्ञानस्य च ज्ञेयत्वमन्यत्रादृष्टचरमप्यहमिति व्यवहारान्यथानुपपत्त्या, जानामीति व्यवहारान्यथानुपपत्त्या च, त्वयाऽभ्युपेयते तथा प्रकृतेपीत्यर्थः ॥ नन्वन्यथानुपपत्तेः कथमयं महिमा? कथं वाऽन्यथानुपपत्तिरेव दृष्टेन न बाध्यते? इत्यत आह–। [c] "सर्वत" इति। यदि तज्ज्ञानं क्रिया स्यात्तदा कर्म न स्यात्, यदि विषयः स्यात्तदा विषयि न स्यात्, यदि स्वं न विषयीकुर्यात्तदा स्वस्मिन् व्यवहारं न प्रवर्तयेत्–इत्यादितर्कशतमप्यन्यथानुपपत्तिबाध्यमेव, नतु तद्बाधकमित्यर्थः ॥

मू० [a] तदिदमाहुः,–"प्रमाणवन्त्यदृष्टानि कल्प्यानि सुबहून्यपि"(१) इति। [b] तस्मात्–

अन्यथानुपपत्तिश्चेदस्ति वस्तुप्रसाधिका
पिनष्टि दृष्टवैमत्यं(२) सैव सर्वबलाधिका ॥ ६ ॥
वाच्यान्यथोपपत्तिर्वा त्याज्यो वा दृष्टताऽऽग्रहः।
नह्येकत्र समावेशशङ्कायाऽऽतपवद्धतयोः ॥ ७ ॥ इति।

[c] तदित्थं त्वदङ्गीकृतसद्विचारलक्षणोपपन्नैरेवंविधैर्विचारैः स्वप्रकाशता भवता सुप्रतिपद्या; [d] अस्माभिस्तु संवेदनबलादेव स्वतःसिद्धरूपं विज्ञानमास्थीयते इति।

टी० ननु, तवैवं प्रौढिमात्रं, नतु प्रामाणिकानामिदमनुमतमत आह–। [a] "तदिदमि"ति। यत्रादृष्टे प्रमाणं प्रवर्तते तददृष्टमपि (नित्यं ज्ञानम्; अशरीरी कर्ता; सुखदुःखात्यन्ताभाववानात्मा; निःस्पर्शं मूर्त्तं, यथा मनः; जातमप्यविनाशि, यथा ध्वंसः; अनुत्पन्नमपि विनाशि, यथा प्रागभावः; स्वयमेव स्ववृत्ति, यथा प्रमेयत्वं) प्रामाणिकैरभ्युपगम्यते इत्यर्थः। अयो-

(१) "अदृष्टशतभागोपि न कल्प्यो निष्प्रमाणकः"–इत्युत्तरार्द्धम्।
(२) दृष्टवैमत्यं=प्रत्यक्षविरोधं, पिनष्टि=परिहरतीत्यर्थः।

पत्तेरन्यथोपपत्तिमात्रं बाधकं, प्रकृते तु सा नास्त्येवोक्तयुक्तेरित्यर्थः ॥ उक्त-मर्थं श्लोकद्वयेन संगृह्णाति—। [b] "तस्मादि"ति ॥ नन्वर्थापत्त्या स्वप्रकाश-तासिद्धावपि द्वैतं तदवस्थमेव, स्वप्रकाशज्ञानभिन्नाया अर्थापत्तेर्विचारस्य चैतादृशस्य त्वयाप्यभ्युपगमादित्यत आह—। [c] "तदित्थमि"ति । नेयमर्था-पत्तिर्न चायं विचारो मयाभ्युपेयते किंतु त्वदभ्युपगमेन त्वं बोध्यसे इति न द्वैतापत्तिरित्यर्थः ॥ तर्हि स्वप्रकाशज्ञानसिद्धिरपि कथं तवेत्यत आह—। [d] "अस्माभिरि"ति । यद्यपि तदेव ज्ञानं(1)प्रकाशकं, प्रकाश्यम्, अभ्युपग-न्तव्यम्, अभ्युपगमः, अभ्युपगन्तृ(2), स्वप्रकाशत्वेन परबोधनं, बोध्यश्च परः, बोधकं वचनं चेति संकलयतो महासाहसिकत्वमसंकलयतश्च द्वैता-पत्तिस्तथापि प्रपञ्चबाधाया वक्तव्यतया तथैव पर्यवसास्यतीति हृदयम् । यद्यपि यत्स्वप्रकाशं ज्ञानं त्वयाभ्युपगतं तस्य सर्वोऽयं प्रपञ्चः, त्वं च विषय इत्यस्तु, तथाच तद्विषयतया न प्रपञ्चमिथ्यात्वं, नाप्यद्वैतं, प्रपञ्च-स्यैव सत्त्वात्; नापि तादृशे(3)तत्र प्रमाणान्तरापेक्षा, स्वतः सिद्धत्वात्; नाप्यस्माकमपसिद्धान्तः, ईश्वरज्ञानस्य तादृशस्यास्माभिरभ्युपगमात्; नापि ज्ञानस्य ज्ञानान्तरवेद्यतापक्षोक्तदोषः, तेनैव सर्वविषयकेण सर्वदोषनि-रासात्; तथाच स्ववधाय कृत्योत्थापनमेतत्—स्वप्रकाशज्ञानसाधनम् । *तस्य प्रपञ्चो विषय इत्यत्र किं प्रमाणम्*?—इति चेत्, प्रपञ्चाविषयता-यामपि तस्यैव ज्ञानस्य प्रमाणत्वात्; त्वन्मते स्वप्रकाशतायामिव । अस्माकं तु तद्विधर्मपि धर्मिग्राहकं(4)प्रमाणमस्ति, न च तज्ज्ञानविषयीकृतं(5)प्रपञ्चं खण्डनयुक्तयोऽप्यपनेतुमीशते, सुदृढप्रमाणसिद्धत्वात् । तस्मात्,—"त्वया नि-र्माय दत्तेस्मिन् स्वप्रकाशैकमन्दिरे । न्यासीकृतः प्रपञ्चोयं नापह्नोतुं तवा-र्हति । प्रकाशपाशबद्धानां प्रपञ्चानां विमोचने । प्रभवन्तु स्वयं बाध्याः

(१) तदेव ज्ञानं प्रकाशकप्रकाश्याद्यष्टविधरूपेण व्यवस्थितं विचारयतो महा-साहसिकत्वमित्यन्वयः ।

(२) 'अभ्युपगन्ता चे'त्यपि क्वचित्पाठः । (३) तादृशे=स्वप्रकाशज्ञाने ।

(४) ईश्वरप्रवृत्तिर्ज्ञानप्रयोज्या प्रवृत्तित्वादस्मदादिप्रवृत्तिवदित्याकारकमीश्वर-ज्ञानरूपधर्मिसाधकमनुमानमेवेश्वरज्ञाने प्रपञ्चविषयकत्वमपि प्रसाधयिष्यतीत्यर्थः ।

(५) ईश्वरज्ञानविषयीकृतमित्यर्थ. ।

कथं खण्डनयुक्तयः" तथापि प्रपञ्चखण्डनयुक्तयस्त्वया बाधितुमशक्या इति हृदयम् ॥

मू० [a]"एवं च सति सौगतब्रह्मवादिनोरयं विशेषो यदादिमः सर्वमेवानिर्वचनीयं वर्णयति (तदुक्तं भगवता लङ्कावतारे(१)–[b]"बुद्ध्या विविच्यमानानां स्वभावो नावधार्यते। अतो निरभिलप्यास्ते निःस्वभावाश्च देशिताः(२)" इति) [c]विज्ञानव्यतिरिक्तं पुनरिदं विश्वं सदसद्भ्यां विलक्षणं ब्रह्मवादिनः संगिरन्ते। तथाहि–नेदं सद्भवितुमर्हति, वक्ष्यमाणदूषण(३)ग्रस्तत्वात्। नाप्यसदेव, तथा सति लौकिकविचारकाणां(४) सर्वव्यवहारव्याहत्यापत्तेः। यदपि 'निर्वक्तुमसामर्थ्ये गुरव उपास्यन्तां येभ्यो निरुक्तयः शिक्ष्यन्ते'–इत्युपालम्भवचनं तत्तदा शोभेत यदि मेयस्वभावाऽनुगामिनीयमनिर्वचनीयतेति न ब्रूयुः, वक्तृदोषादिति च वदेयुः। [d]यस्तु वादी निरुक्त्यभिमानं धत्ते स निर्वक्तुं नतु शक्ष्यति, वक्तव्यदोषात्(५)।

टी० ननु, यदि विचारोपि त्वया नाभ्युपेयते तदा माध्यमिकमतप्रवेशात्तवापि दर्शनमदर्शनमेवेत्यत आह–। [a]"एवं चे"ति। आदिमः=सौगतः, भगवता=बौद्धेन (६), समन्तभद्रो भगवान्मारजिल्लोकजिज्जि-

(१) विद्यासागरास्तु "अलङ्कारावतारे"–इति पाठं व्याचक्षते।

(२) देशिताः=उपदिष्टाः सन्तः। [प्रासादित्यर्थः।

(३) लक्षणाधीना हि लक्ष्यव्यवस्थितिर्लक्षणानि चाऽनुपपन्नानीत्यादिदूषणग्रस्त-

(४) लौकिकविचारकाणां, लौकिकानां परीक्षकाणां चेत्यर्थः।

(५) भेदप्रपञ्चस्य स्वतः परतो वा सिद्ध्यसम्भवरूपाद्वक्तव्यदोषात्, अद्वैतागमेन प्रतिपन्नोपाधौ बाधरूपाद्वा।

(६) अत्र 'बुद्धेन'–इति पाठस्समुचितः। 'बौद्धेन'–इति पाठे तु बुद्ध एव बौद्ध इति कथञ्चिद्व्याकरणीयम्।

Digitized by Google

म"—इति कोशात्; लङ्कावतारस्तदागमग्रन्थः ॥ [b]"बुद्ध्ये"ति । यथा बुद्ध्यतिरिक्तः पदार्थो बुद्ध्या विविच्यमानो विचारं न सहते तथा बुद्धिरपि विविच्यमाना विचाराऽसहत्वाचिरभिलप्या=अनिर्वचनीया, निःस्वभावा=असतीत्यर्थः ([1]) ॥ सौगतदर्शनात् स्वदर्शनं भिनत्ति—। [c]"विज्ञानव्यतिरिक्तमि"ति । 'भवितु([2])मर्हति'—इत्यधिकमपि लौकिकमनुरुद्ध्योक्तम् । मेयस्यायं स्वभावो यदस्य निर्वचनमशक्यं न तु निर्वक्तुः([3]); स च सदा स्याद्यदि कोपि शक्नुयान्निर्वक्तुं, येपि गुरव उपासनीयास्तेपि निर्वक्तुमकुशला एवेत्यर्थः ॥ त्वमपि गुरुर्भूत्वा मां शिक्षय यदि पारयसीत्याह—। [d]"यदिस्त्व"ति ॥

मू० *[a]"नच ते दोषाः स्वरूपमपि घ्नन्तो जातयः कथं न स्युरिति वाच्यम्*, [b]यतो निर्वचनीयत्वं बाध्यते तैर्दोषैः स्वयमप्यनिर्वचनीयैरेव, अनिर्वचनीयैरेव च तैर्व्यवह्रियते एवेति कुतोऽस्मान् प्रति व्याघातः स्यात्; [c]तज्जातित्वस्य च निरूप्य योजयितुमशक्यत्वात् । *[d]ननु "सदसत्पक्षयोर्दोषदर्शनादनिर्वचनीयता"—इति ब्रुवाणस्य किं सदसत्त्वसंशयः? किं वा सदसत्त्वपक्षबहिर्भावाभ्युपगमः? [e]आद्ये भवितव्यं तावत्सदसत्त्वयोरन्यतरेणेत्येकपक्षदोषस्याभासत्वं, [f]तच्च सत्त्वपक्षदोषस्यैवाऽभ्युपेयमावश्यकत्वात् ।

टी० ननु([4])"वक्ष्यमाणदूषणायस्तत्वात्"—इत्ययमपि हेतुर्वक्ष्यमाणदूषणग्रस्त एव, तथाच स्वव्याघातकतया जात्युत्तरमेतत्; यथा([5])'नेदं

(१) बुद्धेर्निःस्वभावस्वोपवर्णने भावार्थो नस्वतरार्थः ।

(२) ननु मूले"नेदं सद्भवितुमर्हति"—इत्यत्र"नेदं सत्"—इत्येव पर्य्याप्ते किं भवितुमर्हतीत्यधिकोक्त्या, अर्थाऽव्यतिरेकात्पुनरुक्तोऽयमिति तत्राह—भवितुमिति ॥ "लौकिकमि"ति, लोके धार्य्यं धारितं, ग्राह्यं गृहीतम्, इत्यादौ यथा पुनरुक्तिर्न दोषस्तद्वदिहापीति भावः ।

(३) 'न तु निर्वक्तुः'—इत्यत्र 'स्वभावः'—इत्यनुषज्यते, निर्वक्ता चात्र मध्योपपुरुषोन्न "यदि कोपि शक्नुयात्"—इत्यग्रिमग्रन्थासङ्गतिः ।

(४) न्यायाऽलङ्कारग्रन्थेऽनिर्वचनीयतादूषणं पठ्यमानं तदनुवदति—नन्विति ।

(५) जात्युत्तरमेवोदाहरति—'यथा नेदम्' इत्यादिना । पूर्वं=धूमवत्त्वं साधनं, न

साधकं, सर्वथाऽनुपलभ्यमानोपाधिशङ्कायस्तत्वात्'—इत्यादि; तद्वदि दोषाणामपि बाध्यत्वं, तदा प्रपञ्चः कथं बाध्यतां तैरित्याशङ्कते—। [a]"नचे" ति ॥ बाध्यैरेव दोषैर्जगद्बाध्यमित्यङ्गीकृत्य प्रवृत्तं मां प्रति न स्वव्याघातदोषावकाश इत्याह—। [b]"यत"इति ॥ ननु, स्वव्याघातकं दोषं प्रयुञ्जानस्त्वं जातिवादी निरनुयोज्यानुयोगेन निग्रहस्थानेन निगृहीत इति जितमस्माभिरित्यत आह—। [c]"तज्जातित्वस्ये"ति । वक्ष्यमाणदोषैर्जातित्वधर्मापि निर्वक्तुमशक्यमेवेति जातित्वमव्यवस्थाप्याहं निग्रहीतुमशक्य इत्यर्थः ॥ यथा, शब्दे नित्यत्वानित्यत्वयोर्द्वयोरपि दोषदर्शनादुभयकोटिकः संशयस्तथा प्रपञ्चे सत्त्वासत्त्वयोर्दोषदर्शनात्संशयो वा? कोट्यन्तराभ्युपगमो वा?—इति विकल्प्य सत्त्वपक्षोऽबाध्यं ([1]) शङ्कते—। [d]"नन्वि"ति॥ [e]"आद्ये"इति। परस्परविरहस्वभावकोटिकसंशयधर्मिण एककोट्यात्मकत्वावश्यकत्वात् तस्यां वास्तव्यां कोटौ दोषा नूनमाभासा इत्यर्थः ॥ [f]"तत्त्वे"ति । आभासत्वमित्यर्थः ॥

खू० [a]"यदि तावत्सत्त्वपक्षस्तदा सत्त्वपक्षे दोषः [b]कथं संगच्छेत, [c]अथाऽसत्त्वपक्षस्तदा सर्वासत्त्वे तद्दोषः कथं सद्भाववान् भवितुं प्रभवेत । [d]द्वितीयस्तु व्याघातादेवाऽसंभवी, "परस्पर([2])विरोधे हि न प्रकारान्तरस्थितिः" इति? *। तदेतदनाकलितपराभिसन्धेः प्रत्यवस्थानम् । 'यो हि सर्वमनिर्वचनीयसदसत्त्वं([3]) ब्रूते स कथमनिर्वचनीयतासत्त्वव्यवस्थितौ पर्य्यनुयुज्येत, सापि हि कृत्स्नप्रपञ्चपरसर्वम-

वह्निलक्षणसाध्यसाधकं, सर्वथाऽनुपलभ्यमानोपाधिशङ्कायस्तत्वादित्युक्ते भवति स्वोक्तस्यापि "सर्वथाऽनुपलभ्यमानोपाधिशङ्कायस्तत्वात्"—इत्यस्य हेतोर्व्याघातः, तस्यापि धूमलक्षणसाधनवत्सर्वथाऽनुपलभ्यमानोपाधिशङ्कायस्तत्वात्; अत एव च जात्युत्तरत्वं, "स्वव्याघातकमसदुत्तरं जातिरि"ति वचनात् ।

(१) 'सत्यक्षधोऽव्यम्'—इत्यपि क्वचित्पाठः ।

(२) कुसमाञ्जलावुदयनोक्तं व्याघातमेवोपपादयति—परस्परेति । "नैकतापि विरुद्धानामुक्तिमात्रविरोधतः"—इत्युत्तरार्धम् ।

(३) अनिर्वचनीये=निर्वचनानर्हे, सत्त्वासत्त्वे यस्य तदनिर्वचनीयसदसत्त्वम् ।

द्वाभिधेयमध्यनिविष्टैव । [f]परस्यैव व्यवस्थयैवं पर्य्यवस्यति—निर्वचनप्रतिक्षेपादनिर्वचनीयत्वं, विधिनिषेधयोरेकतरनिरासस्येतरपर्य्यवसायितायाः[g]स्तेनाभ्युपगमात् । [h]ततः परकीयरीत्येदमुच्यते,—'अनिर्वचनीयत्वं विश्वस्य पर्य्यवस्यति' इति । [i]वस्तुतस्तु, वयं सर्वप्रपञ्चसत्त्वाऽसत्त्वव्यवस्थापनविनिवृत्ताः स्वतःसिद्धे चिदात्मनि ब्रह्मतत्त्वे केवले भरमवलम्ब्य चरितार्थाः सुखमास्महे ।

ट० आवश्यकत्वमेवाह—। [a]"यदि तावदि"ति ॥ [b]"कथमि"ति । पारमार्थिकत्वदुष्टत्वयोरेकत्रासंभवादित्यर्थः ॥ असत्त्वपक्षेऽपि सत्त्वपक्षदोषस्याभासत्वमुपपादयति—। [c]"अथे"ति । तद्दोषः=सत्त्वपक्षदोषः ॥ [d]"द्वितीय"इति । सदसत्त्वपक्षबहिर्भाव इत्यर्थः ॥ मदभिमतायामनिर्वचनीयतायां विकल्प्य दोषाभिधानं प्रकारान्तरेण (१)निर्वचनीयतायाः सत्त्वव्यवस्थित्यै त्वया कृतं, सोयं दोषाभिधानलक्षणः पर्य्यनुयोगो न मयि घटते, यतोऽनिर्वचनीयताख्यस्यापि धर्मस्याऽनिर्वचनीयतैव मदभिमतेत्याह—। [e]"यो ही"ति ॥ ननु, यद्यनिर्वचनीयता न त्वया व्यवस्थापनीया तदा कथं व्यवतिष्ठेतेत्यत आह—। [f]"परस्ये"ति ॥ [g]"तेने"ति । परेणेत्यर्थः ॥ [h]"तत"इति । अनिर्वचनीयत्वं मया न साध्यते किंतु 'निर्वचनखण्डनेन पारिशेष्यादनिर्वचनीयत्वं सिद्ध्यति'—इति ब्रूमः ॥ नन्वनिर्वचनीयत्वं मा साध्यतां, परिशेषसिद्धानिर्वचनीयताभ्युपगमेनापि द्वैतापत्तिस्तदवस्थेत्यत आह—। [i]"वस्तुतस्त्वि"ति । परिशेषसिद्धेप्यनिर्वचनीयत्वे मम नाभ्युपगमः, अपि तु त्वं तथा बोध्यसे इत्यर्थः । भरम्=अध्यवसायम् ॥

खं० [a]"ये तु स्वपरिकल्पितसाधनदूषणव्यवस्थया विचारमवतार्य तत्त्वं निर्णेतुमिच्छन्ति तान् प्रति ब्रूमः—न साध्वीयं भवतां

(१) प्रकारान्तरेण=सत्त्वप्रकारेणैव, निर्वाच्यत्वस्य सत्त्वव्यवस्थित्यर्थमित्यर्थः । क्वचित्तु 'अनिर्वचनीयतायाः सत्त्वव्यवस्थित्यै'—इति पाठस्तत्र प्रकारान्तरेण=अनिर्वचनीयत्वप्रकारेणैवानिर्वचनीयतायाः सत्त्वव्यवस्थित्यर्थमित्यर्थः ।

विचारव्यवस्था, भवत्कल्पितव्यवस्थयैव व्यावृतत्वात् । [b]अत एवाऽस्मदुपन्यस्यमानदूषणस्थितिविषयाः पर्य्यनुयोगा निरवकाशाः, [c]त्वद्व्यवस्थयैव त्वद्व्यवस्थाया व्यावृत्युपन्यासात् । *[d]नचोपन्यास एव निर्बन्धकारणम्*, विचारोपन्यासस्य(१)सदसत्त्वोपगमाद्युदासीनैर्विचार्य्यमित्युपेत्यैव परं विचारप्रवर्तनायाः शक्यत्वमित्यावेदितत्वात् । [e]यदि तु "विचारस्य सत्त्वमनभ्युपेत्य न विचारयितुं शक्यम्"-इत्युच्यते, तदा प्रमाणमव्यापार्य्य(२)न तदीयसत्त्वाभ्युपगमोऽपि शक्यतेऽतिप्रसङ्गात्; इति विचारस्यापि विचार्यग्रहणेऽनवस्थया विचारारम्भ एवाऽशक्यः स्यात् । *[f]नच पूर्वपूर्वसिद्धत्वाद्विचारे विचारान्तरमिदानीमगवेषणीयम्(३)* । [g]विचारस्य पूर्वसिद्धत्वे विचार्य्यरूपस्वविषयव्यवस्थितत्वात् तस्य, विचार्य्यमपि पूर्वमेव विचारितमित्यनारम्भ एव विचारस्य ।

टी० ननु, तर्हि सदसत्त्वविचारेऽपि किमर्थं ते प्रवृत्तिरित्यत आह- [a]"ये त्वि"ति । ब्रह्मभिन्नतत्त्वद्वेषमात्रेण विचारे त्वदभ्युपगतविचारमर्यादया प्रवर्तामहे इत्यर्थः ॥ [b]"अत एवे"ति । यतः परपरिकल्पितसाधनदूषणव्यवस्थयैव प्रवर्तामहे नतु स्वयं साधनदूषणादिव्यवस्थामभ्युपगच्छामो येन

(१) विचारोपन्यासनिष्ठे ये सत्त्वाऽसत्त्वे तदुपगमाद्युदासीनैरित्यर्थः, एकदेशान्वयश्च "शरैः शातितपत्त्राणि" इति वत् दोषावहः। "विरोधोपन्यासस्य"-इति क्वाचित्कः पाठस्तु प्रामादिकः ।

(२) प्रमाणमव्यापार्य्याऽप्रवर्त्याऽनुपन्यस्येति यावत् । तदीयसत्त्वाभ्युपगमः=विचारसत्त्वाभ्युपगमोऽपि न, शशशृङ्गादेरपि सत्त्वाभ्युपगमप्रसङ्गात्; तथाच प्रमाणं व्यापार्य्य विचारसत्त्वाङ्गीकारे प्रमाणव्यापारेऽपि कथात्मकविचारान्तरे, तस्यापि च सत्त्वाभ्युपगमो विचारान्तरे, वक्तव्य इत्यनवस्थानात्प्रथममेव मतिकर्दमे विचारारम्भणमेवाशक्यमापद्येतेत्यर्थः ।

(३) "इदानीं न गवेषणीयम्"-इत्यपि पुस्तकान्तरे दृश्यमानः पाठः साधुरेव ।

तदाश्रिता अद्वैतव्याघातादयो दोषाः स्युरित्यर्थः ॥ "अत" इत्यस्याभिप्रायमाह—। [c]"त्वदुक्तस्यै"ति ॥ ननु, विचारे व्याघातोपन्यासस्त्वया कर्त्तव्य इति विचारस्य, व्याघातोपन्यासस्य च, सत्त्वमभ्युपगतमिति द्वैतापत्तिरेवेत्यत आह—। [d]"नचे"ति । 'प्रमाणादेरिव विचारव्याघातोपन्यासयोरपि सत्त्वमनभ्युपगम्यैव विचारे प्रवृत्तिः शक्या'—इत्युक्तत्वादित्यर्थः ॥ 'प्रथमं मतिकर्द्दमेन विचारप्रवृत्तिरेव न स्यात्'—इत्युक्तं स्मारयति—। [e]"यदित्वि"ति ॥ ननु, विचारस्यापि विचार्यं यद्यपि विचाराप्रवृत्तिः स्यात्,नत्वेवं, किं तर्हि पूर्वमेव विचारः सिद्धः? ([1])इत्यत आह—। [f]"नचे"ति ॥ विचारसिद्धिर्विचार्यसिद्धिनान्तरीयकी, ज्ञानस्येव विचारस्यापि सविषयकत्वात्; तथाच किं विचारेण, विचार्य्यसिद्धेस्तत्फलस्य संपन्नत्वादित्याह—। [g]"विचारस्ये"ति ॥

मू॰ [a]"अथ*विचार्य्यविशेषस्य पूर्वमसिद्धत्वात् तदर्थं विचारारम्भः? *, [b]तर्हि विचारविशेषस्यापि तद्विषयकस्य पूर्वमसिद्धिरेवेति इथा शुष्क([2])चर्व्वणम् । [c]यदि च त्वद्दर्शनरीत्याभिधीयमानमस्माभिर्बाधं बाधसे तदा स्वाभ्युपगतरीतिबाधाभिधायितैव ते स्यात् । [d]अस्माभिर्निर्वाह्यमानस्य त्वया खण्डनयुक्त्यैव बाधेऽस्माकमेव जेतृता, "[e]खण्डनयुक्तयो बाधिकाः, निर्वाह्यपक्षस्य बाध्यः"—इत्यस्याऽस्मदुक्तपक्षस्य त्वयैव निर्वाहात् ।

टी॰ ननु, विचारलक्षणस्य विचार्य्यस्य पूर्वसिद्धत्वेपि प्रपञ्चसत्त्वासत्त्वलक्षणस्य विचार्यविशेषस्य न पूर्वसिद्धत्वमिति तदर्थमयं विचारः स्यादेवेत्याह—। [a]"अथे"ति ॥ तर्हि स विचार्य्यविशेषो यस्य विचारस्य विषयः सोप्यसिद्ध एव, तत्सिद्धौ विचार्यविशेषस्यापि सिद्धत्वप्रसङ्गात्;

(१) पूर्वमेव विचारः सिद्धः, अनादिसिद्ध इत्यर्थः, तथा च बीजाङ्कुरवदनादित्वान्नानवस्थेति भावः ।

(२) शुनः शुष्कास्थिचर्वणं यथा वृथा तथेदमित्यर्थः ।

एवं 'ततः पूर्वपूर्वसिद्धत्वाद्विचारे विचारान्तरमिदानीमगवेषणी[1]यम्'-इति यदुक्तं तच्छुष्कचर्वणमित्याह—। [b]"तर्ही"ति ॥ ननु, प्रवर्त्यतां विचारः, तत्र विचारे त्वदुक्ता दोषा मया युक्त्यन्तरेण बाधनीया इत्यपर्य्यवसानं स्यादित्यत आह—। [c]"यदि चे"ति ॥ ननु, दोषा अपि हेत्वाभासादयस्त्वया खण्डिता एव, तदेव खण्डनमादाय त्वयोद्भाव्यमाना दोषा मयापि खण्डनीया, इत्यहमेव जेष्यामीत्यत आह—। [d]"अस्माभिरि"ति। यद्यपि तस्यां कथायां त्वदुपन्यस्तदोषाणां परेण खण्डनयुक्त्या बाधने परस्य जेतृता, न तव, उपन्यस्तदोषस्य त्वयाऽनिर्वाहात्; तथापि परेण खण्डनयुक्तीनां बलवत्त्वं तावदङ्गीकृतमित्येतावतैव मम जेतृतेति [2] हृदयम् ॥ कथं जेतृतेत्यत आह—। [e]"खण्डने"ति ॥

मू० [a]तस्मात्त्वया निर्वाह्यमस्माभिस्तु खण्डनीयमितीदृश्यामेव परं कथायां त्वन्निर्वाह्यनिर्वाहे तव जयो नान्यथेति। [b]तदेवं भेदप्रपञ्चोऽनिर्वचनीयः, ब्रह्मैव तु परमार्थसदद्वितीयमिति स्थितम्[3]।

—•—

[c]नन्वद्वैते किं प्रमाणम्? । [d]प्रश्न एव तावदद्वैतमनङ्गीकुर्वतो नोपपद्यते। [e]प्रमाणं यत्राद्वैते[4]पृच्छ्यते तस्याऽप्रतीतौ कथमेवंभूतः प्रश्नः संगच्छते। नहि प्रमाणमात्रं भवता पृच्छ्यते, किंनाम विषयविशेषनियतम्, तच्च[5]त-

(१) 'न गवेषणीयमि'त्यपि क्वाचित्कः पाठः साधुरेव।

(२) यथा निर्वाह्यार्थः खण्डनयुक्तिभिर्बाध्यस्तथा खण्डनयुक्तयोऽपि ताभिरेव बाध्या इत्येतावतैव मम जेतृतेति भावः।

(३) किमस्ति मानमद्वैते इतीष्टे प्रष्टुमेव न।
मतत्वे वाऽमतत्वे वेत्येतत्प्रस्तूयतेऽधुना ॥

(४) "यत्रामाद्वैते"-इत्यपि पाठः।

(५) तदिति सामान्ये नपुंसकं, स विषयविशेषनियतप्रमाणप्रश्न इत्यर्थः। तदेव पद्यते यदि तादृशं=विषयविशेषनियतं प्रमाणं, ते प्रतीतिमारोहेत् विषयश्चाद्वैतमेवेति भावः।

दोपपद्यते यदि तादृशं ते प्रतीतिमारोहेत्,[f] प्रश्नस्य वाग्व्यवहारविशेषत्वात्, व्यवहारस्य च स्वज(१)नकज्ञानविषयनियतत्वात् । अन्यथा व्यवहाराणां विषयनियमप्रयोजकस्यान्यस्यासंभवेन व्यवहारविषयपारिप्लवापत्तेः ।

टी० ननु. ब्रह्माद्वैतं त्वया निर्वाह्यं, तन्मया खण्डनीयं, प्रपञ्चखण्डनमप्यन्ततस्त्वया निर्वाह्यं, तत्र प्रतिखण्डनं मया कर्त्तव्यमित्यपर्यवसानं तदवस्थमेवेत्याशङ्क्य कथासन्दर्भमुपसंहरति–। [a] "तस्मादि"ति । यद्यपि "त्वया ब्रह्माद्वैतं स्थापनीयं, मया खण्डनीयम्, इतीदृश्यामेव कथायां मया वक्तव्यं, नान्यत्रे"ति परेणापि वक्तुं शक्यते * नचैवं कथैव न(२)स्यादिति वाच्यम् *, इष्टापत्तेः ; अनिष्टत्वे चास्योभयसमाधेयत्वात्(३) । * ब्रह्म स्वतःसिद्धमेव न तत्र साधनापेक्षा *?–इति चेत्, प्रपञ्चोऽपि सर्वजनसिद्ध एव न तत्र साधनापेक्षेति तुल्यम् । * सर्वजनसिद्धत्वमपि त्वयोपपादनी(४)यम् *?–इति यदि, तदा स्वतःसिद्धत्वमपि त्वयोपपादनीयमिति तुल्यम् । * तर्हि वितण्डा कथैव न स्यादुभयोरपि स्थापनाप्रसङ्गात् *?–इति चेत्, शक्ति(५)जिज्ञासया प्रपञ्चवादिनामप्यन्योन्यं तत्संभवात्) तथापि खण्डनयुक्तयो बलवत्य इत्यत्रैव हृदयम् ॥ स्वपक्षमुपसंहरति–। [b] "तदेवमि"ति ॥

---

(१) स्वस्य=व्यवहारस्य जनकं ज्ञानं स्वजनकज्ञानम्, तस्य यो विषयस्तेन नियतत्वान्नियमेन तद्गोचरत्वादित्यर्थः ।

(२) कथा हि समयबन्धपूर्विका, समयबन्धश्च माध्यमिकेन सद्वैतं ब्रह्म स्थापनीयमित्येव ; इदानीं खण्डने प्रवृत्तेन तेन स उपेक्षित इत्यतो कथैव न स्यादित्यर्थः । यद्वा, वैतण्डिकेनाप्यद्वैतव्यवस्थापने वितण्डा कथैव न स्यादित्यर्थः ।

(३) यथा माध्यमिकेन सद्वैतं ब्रह्म स्थापनीयमित्यस्ति समयबन्धस्तथा खाण्डनिकेन तत्खण्डनीयम् (अर्थादद्वैतं व्यवस्थापनीयम्) इत्यपीति तदनिर्वाहे कथाऽभावप्रसङ्गस्तस्यापि तुल्य इत्यवश्यं तेनापि समाधेयत्वादिति भावः ।

(४) त्वयोपपादनीयम्=त्वयैवोपपादनीयं, (स्वकपोलकल्पितमिति यावत्) ।

(५) शक्तिजिज्ञासया=परप्रतिपादनसामर्थ्यज्ञानेच्छया, प्रपञ्चवादिनां=स्थापनावादिनां, तत्संभवात्=वितण्डाकथासम्भवादित्यर्थः । अवैतण्डिका अपि वितण्डां कुर्वते इति भावः ।

Digitized by Google

ननु "ब्रह्मैव परमार्थसत्"—इति त्वयोच्यते, तथाच प्रतिज्ञैवेयं, तत्र प्रमाणमुपन्यस्तुमर्हतीत्याह—। [c] "नन्वि"ति ॥ उत्तरमाह—। [d] "प्रश्न एवे"ति । प्रश्न एव तावत् प्रमाणमिति विच्छिद्यापि(१)योजयन्ति । प्रश्नान्यथानुपपत्तिरेवाद्वैतसाधिकेत्यर्थः ॥ तामेवाह—। [e] "प्रमाणमि"ति । अद्वैतज्ञानमन्तरेण तन्नियत(२)विषयप्रमाणप्रश्न एवानुपपन्न इत्यर्थः ॥ नन्वद्वैतमजानानस्यापि तत्प्रमाणप्रश्नः स्यादित्यत आह—। [f] "प्रश्नस्ये"ति । 'अद्वैते किं प्रमाणम्' ?—इत्ययं वाग्व्यवहारस्तावज्ज्ञानजन्यः, तथाच तज्ज्ञानविषयविषयत्वध्रौव्यमेवास्य; अन्यथा स्वजनकज्ञानविषयाऽतिक्रमे व्यवहाराणां व्यवहर्त्तव्यनियमो न स्यादित्यर्थः ॥

मू० [a] यदि चाद्वैतं प्रश्नविषयः प्रतीतमुच्यते तदा तत्प्रतीतिस्ते प्रमा वा स्यात्? अप्रमा वा?। आद्ये यदेव तस्याः प्रमायाः करणं तदेवाद्वैते प्रमाणं तवापि संप्रतिपन्नमिति वृथा तस्य प्रश्नः। * [b] नच वाच्यं सामान्यतोऽद्वैतप्रमाणसिद्धौ (३)भूतायामपि विशेषतः प्रमाणप्रश्नः*, [c] यतः सामान्यसिद्धाविवाऽद्वैतसिद्धौ विशेषविचारः काकदन्तविचारवत्स्यात्; [d] सामान्यसिद्धिरेव च विशेषमप्याक्षिप्यानयन्ती विशेषमपि ते कथितवती किमन्य प्रश्नेन, [e] परिगणितेषु हि प्रमाणप्रकारेषु मध्ये यत्रैव दोषं न प्रमिणोषि तत्रैव विशेषे सामान्यस्य विश्रान्तेः। [f] यदि च परिचितचरेषु प्रमाणप्रकारेषु सर्वत्रैव दोषं प्रमिणोषि तदा प्रमाणान्तरमाक्षिप्यापि सामान्येन विश्रमणीयमेव(४)।

(१) अपिशब्देन 'प्रश्न एव नोपपद्यते'—इत्यन्वयस्तु प्रसिद्ध एवेति समुच्चीयते।
(२) तद्=अद्वैतं, नियतो विषयो यस्य प्रमाणस्य तद्विषयकः प्रश्न इत्यर्थः।
(३) अद्वैतप्रमाणसिद्धौ भूतायाम्=अद्वैतप्रमाणसिद्धौ सत्याम्।
(४) निर्विशेषसामान्याऽयोगादिति भावः।

टी० नन्वेतावताऽद्वैतप्रतिपत्तिरायाता, प्रमाणानुयोगस्तदवस्थ एवेत्यत आह—। [a]"यदि चे"ति। अद्वैतमनुमाय, श्रुत्वा, दृष्ट्वा वा, तवायं प्रश्नः; तथाचानुमानं, शब्दः, इन्द्रियं वा, तच्च प्रमाणमिति त्वयैव ज्ञायते किं प्रश्नेनेत्यर्थः ॥ ननु, प्रश्नान्यथानुपपत्तिः प्रमाणसामान्यसाक्षिणी भवतु प्रमाणविशेषजिज्ञासा तद्विशेषाभिधानमन्तरेण कथं निवर्ततामित्याशङ्क्याह—। [b]"नचे"ति ॥ अद्वैतसिद्धिरस्मदपेक्षिता, त्वया चाऽनुमता, किमत्र विशेषजिज्ञासयेत्याह—। [c]"यत"इति ॥ ननु, तथापि विशेषं पृच्छतः किमुत्तरमत आह—। [d]"सामान्ये"ति । नहि निर्विशेषं सामान्यमिति भावः ॥ नन्वेतावता विशेषत्वेनैव विशेषः सिद्धो नत्वनुमानादिभावेन, तादृशी च सिद्धिरपेक्षितेत्यत आह—। [e]"परिगणिते"ति ॥ ननु परिगणितेषु सर्वत्र दोषं पश्यत एव ममायं प्रश्नः? इत्यत आह—। [f]"यदि-चे"ति ॥

मू० [a]यदि च 'का प्रमाणव्यक्तिरसौ'?—इति प्रश्नार्थः परिशिष्यते, तदा न सर्वा व्यक्तिर्विशेषतो निर्देष्टुं शक्यते इति तदनिर्देशेपि न नः किंचिदपचीयते। [b]यदि च द्वितीयः, तदानीमद्वैतप्रतीतिमप्रमां मन्यमानस्य तव 'अप्रमाविषये किं प्रमाणम्?'—इति कथं न प्रश्नो व्याहन्यते। [c]अथ "अप्रमा सा मम मते, त्वन्मते तु प्रमैवेति तत्करणं प्रमाणं पृच्छ्यते?"—इति ब्रूषे, नैतदप्युपपद्यते, नवाद्वैते ज्ञानं यदुत्पद्यते तत्करणं मया प्रमाणरूपं वक्तव्यमित्यत्र ममाऽनियमात्। यदि नाम मया सदाऽद्वैतमभ्युपेयते तावता किं तावकीनस्य तज्ज्ञानस्य करणमवश्यं प्रमाणं स्यात्? [d]वस्तुतो वह्निमत्यपि पर्वते यदिकश्चिद्वाष्पं धूमं प्रतीत्य ततो वह्निमनुमिनोत्येतावता किं वाष्पविषयं धूमज्ञानं करणं प्रमाणमेष्टव्यम्?—इति।

टी० नन्वनुमानत्वादयोऽपि प्रमाणत्वविशेषाः सामान्यमेव, तेन तत्रापि विशेषजिज्ञासया प्रश्नः? इत्यत आह—। [a] "यदि चे"ति ॥ 'अद्वैतप्रतीतिरप्रमा'—इति पक्षं दूषयति—। [b] "यदि चे"ति । यद्यपि 'अप्रमाविषये किं प्रमाणम्?' इत्याकारो न मम प्रश्नो येन व्याघातः स्यात्, नच[१]तत्प्रकारप्रश्नेऽपि व्याघातः, नहि यदप्रमाविषयस्तत्कदापि न प्रमाणविषयः, तथाप्यापातस्फूर्तिको व्याघात इत्यर्थः ॥ त्वदभिमानमनुरुध्याऽयं प्रश्नो मम तु बाधितविषयतया सर्वत्राद्वैतज्ञानमप्रमैवेति न व्याघात इत्यत आह—। [c] "अथे"ति ॥ विषयाऽबाधेऽपि क्वचि[२]त्करणं दुष्टं दृष्टं, तथाच 'अद्वैतविषयं तत्रापि ज्ञानं प्रमैव[३]दुष्टकरणजन्या'—इति संभावनायां कथं तत्र मया प्रमाणं वक्तव्यमित्याह—। [d] "वस्तुत" इति । अत्र, यद्यपि 'कति ते पुत्राः'?—इति प्रश्नमात्रप्रत्याशया पुत्रान् संभावयतो दार[४]परिग्रहेऽप्युदासीनस्य, सर्वजनप्रसिद्धप्रपञ्चविद्वेषिणः शशशृङ्गकूर्मरोमगगनारविन्दादिप्रमाणप्रश्नबलायातमनन्तं प्रपञ्चं साधयतः, कस्ते प्रतिमल्लः; कथं वा 'ब्रह्म नास्तीत्यत्र किं प्रमाणम्'?—इत्यनेन प्रश्नेन ब्रह्मनास्तितैव न सिद्ध्येत् । कथायां यस्य यस्य पदार्थस्याभावस्त्वया साध्यस्तस्य तस्य प्रमाणप्रश्नबलात् तत्तत्सत्ता तदानीमेव वाक्यान्तरेण साधनीया इति दुरुत्तरं व्यसनम् वस्तुतो[५] 'ब्रह्माद्वैतं घटादिवृत्ति न वा'—इति मध्यस्थविप्रतिपत्तौ 'ब्रह्माद्वैतं घट[६]वृत्ती'ति विधिकोटिपरिग्रहे त्वया कृते तत्र प्रमाणप्रश्ने प्रमाणवचनमेवोचितं, कथासंप्रदायस्य तथापीष्टत्वात्; तद्विप्लवे पुनर्दुरुत्तरव्यसनमेव तथापि वक्ष्यमाण[७]प्रमाणावष्टम्भादेतदुक्तमिति हृदयम् ॥ (शेषमग्रे)

(१) अप्रमाविषये किं प्रमाणमित्याकारप्रश्नेऽपि न व्याघातो न हि यदप्रमाविषयस्तत्र कदाचित्प्रमाणविषयः, पूर्वं तया व्यवच्छेदेन रजतत्वेनाऽप्रमाज्ञानविषयस्यापि शुक्त्यादेः कालान्तरे शुक्तित्वेन प्रमाणज्ञानविषयत्वादित्याह—न चेति ।

(२) क्वचित्=वन्हिमत्पर्वतधर्मिकवाष्पलिङ्गकवन्ह्यनुमित्यादौ संवादिभ्रमे ।

(३) प्रमाऽत्राबाधितार्थगोचरं ज्ञानं, न तु प्रमाणकरणकं ग्राह्यम् ।

(४) दारपरिग्रहेऽप्युदासीनस्य कति ते पुत्राः?—इति प्रश्नमात्रप्रत्याशया पुत्रान्संभावयतस्ते कः प्रतिमल्लः (प्रतिभटः, वारयितेति तु फलितम्) इत्यन्वयः ।

(५) 'वस्तुत'—इत्यस्य प्रमाणवचनमेवोचितमित्यनेनान्वयः ।

(६) अत्र घटादिवृत्तीति पाठः समुचितः, प्रतिज्ञाया विप्रतिपत्त्यनुगुणत्वौचित्यादित्यनुमन्ये ।

(७) "श्रुतिरेव प्रमाणम्"—इति वक्ष्यमाणं प्रमाणप्रतिवचनमवष्टभ्यैव प्रश्नखण्डनाभिधानमित्याशयः ।

॥ श्रीः ॥

सटीकसंक्षेपशारीरकम् ।

॥ सटीकसंक्षेपशारीरकस्य द्वितीयोऽध्यायः ॥

(*Continued from page* 181. VOL. VII.)

मू० ॥ ननु मातृमानविषयावगती-
रपरस्परं प्रति विभागवतीः ॥
उपयन् भदन्तमुनिना सदृशः
कथमेष वैदिकमुनिर्भवति ॥ २० ॥

टी० ॥ विज्ञानवादिनो हि ज्ञेयं ज्ञाने प्रतिभासमानत्वाज् ज्ञानाभिन्नमेव ज्ञानवत्, अन्यथा ज्ञानज्ञेयसंबन्धासंभवेन ग्राह्यग्राहकतानुपपत्तेरिति ज्ञानमेव सत्यं तदतिरिक्तं ज्ञेयं त्वनादिवासनाप्रापितमलीकं ज्ञानात्मक-मिति वदन्ति । एवं भवद्भिरपि ज्ञानस्वभावात्मनि तदन्यत् सर्वमध्यस्तं तदभिन्नमित्युच्यते चेत् कथं नोभयोः साम्यमिति । ज्ञानात्मनि दृश्यस्य कल्पितत्वोक्तिमात्रेण ब्रह्मवादिसमयस्य बौद्धमतसाम्यं चेत् सर्वेषां मतानां तत्साम्यप्रसङ्गः । अस्ति हि सौत्रान्तिकवैभाषिकाभ्यां बाह्यार्थाभ्युपगमेन न्यायवैशेषिकादेः साम्यम्, विज्ञानस्याशुविनाशित्वाभ्युपगमेन विज्ञानवादिनापि, सर्वसाम्यं तु नास्माकमपि तेनास्ति तेन हि प्रदीपदृष्टान्तेन ग्राह्यग्राहकग्रहणानामभेदो वस्तुतोऽभ्युपेयते । ब्रह्मवादिना तु कर्तृकरणक्रियाकर्मणामन्योन्यविरुद्धस्वभावानामभेदासंभवादहं चक्षुषा रूपं पश्यामीति तद्भेदानुभवाच्चैकस्य ग्रहीतृग्राह्यक्रियाकरणत्वमनुपपन्नं प्रदीपस्यापि न दीपप्रकाश्यत्वं तस्यैव प्रकाशात्मकत्वात् प्रदीपसाध्यतमोनिवृत्तेस्तत्रासंभवाच्चेति मातृमानविषयादीनां परस्परं धर्मिसमानसत्ताको विभागोऽभ्युपगम्यते ज्ञानं चातुर्यमिति न कथमपि सर्वसाम्यमित्याशयेनाह । नन्विति । निश्चयेन माता अन्तःकरणविशिष्टः प्रमाता, मानं चक्षुरादि, विषयो रूपादिः, अवगती रूपाद्याकारा चक्षुरादिजन्यान्तःकरणवृत्तिस्ता इत्यर्थः ।

Digitized by Google

अपरस्परमन्योन्यमुपनयचङ्गीकुर्वन्भदन्तो बौद्धस्तन्मुनिना विज्ञानवादिनेति यावत् । वैदिकमुनिर्वैदिकसंन्यासी मोक्षशास्त्राचार्य इति यावत् ॥ २७ ॥

मू० ॥ परमात्मसंश्रयतमोजनितं
प्रविभक्तमेव तु परस्परतः ॥
स्थिरमभ्युपेतमिह नः समये
ननु मातृमानविषयप्रभृति ॥ २८ ॥

टी० ॥ ननु भवतापि परस्परं मातृमानादिप्रपञ्चोऽभ्युपगतश्चेत् कथमात्मनो निष्प्रपञ्चाद्वयत्वमित्याशङ्क्य तस्यात्मनि तदज्ञानकल्पितत्वाच द्वैतवर्तिनं वा विज्ञानवादाद्विशेष इत्याशयेनाह । परमात्मेति । तु शब्देन पराभिमतात्मादेश्च सूचितं विशेषमाह । प्रविभक्तमिति । स्थिरमिति च मात्रादेर्ज्ञानस्य च स्थायित्वमपि ततो विशेषान्तरं सूचितम् । अत्रापि नन्विति निश्चये, प्रभृतिशब्देन प्रमितिग्रहणम् ॥ २८ ॥

मू० ॥ तमसा विनिर्मितमिदं सकलं
चतुरः स पश्यति परः पुरुषः ॥
अविकारि बोधवपुरद्वयकः
करणैर्विना सकलसाक्षितया ॥ २९ ॥

टी० ॥ ननु यदि प्रमात्रादिचतुष्टयं परस्परं विभिन्नं व्यवहाराङ्गमभ्युपेयते तर्हि प्रमात्रादिव्यवहारार्थमपि तदभ्युपेयमित्यप्रामाणिकं तदानन्त्यं प्रसज्येत, न हि तेनैव प्रमात्रादिना तद्व्यवहारः संभवति, कर्तृकर्मादिभावविरोधादित्याशङ्क्य प्रमाणव्यापारेण यद् वस्त्ववभासते तत्रैव प्रमात्रादिचतुष्टयापेक्षा प्रमात्रादिकं तु सुखदुःखादिवदज्ञानकल्पितत्वादविद्याविनिर्मितत्वात् साक्षिमात्रभास्यं साक्षी चोदासीनबोधात्मस्वरूप एवेति न करणादि किं चिदपेक्षत इत्याशयेनाह । तमसेति । इदं सकलमित्यस्य विवरणं चतुर इति । प्रमात्रादिचतुष्टयात्मकं सर्वं जगत्कृत्स्नमेव । चतुर इति पुरुषविशेषणं वा । तदेव विवृणोति । अविकारीति । कः परः पुरुषो-

ऽविकारिबोधवपुरद्वयकः स करणैश्चक्षुरादिभिर्विनेदं सकलं पश्यतीति संबन्धः । अत्राविकारिबोधवपुरित्यनेनौदासीन्यबोधाभ्यां तस्य साक्षित्व-योग्यत्वमुक्तम् । ननु दर्शनक्रियायाः करणसाध्यत्वेन कथं तैर्विना पश्यतीत्युच्यते, कथं वा तत्कर्तुरौदासीन्यमिति तत्राह । सकलेति । उदासीन-स्यैव लोके साक्षित्वप्रसिद्धेर्निर्व्यापारनित्यचैतन्येनैव तस्य द्रष्टृत्वाचोक्त-दूषणद्वयमिति भावः ॥ २९ ॥

मू० ॥ निजमायया परिगतः पुरुषः
परतन्त्रया तु निजया प्रभया ॥
परिकल्पितं सकलमाकलयन्
स हि साक्षितामुपगतो भवति ॥ ३० ॥

टी० ॥ ननु लोके प्रमातुरेव साक्षित्वं दृश्यते प्रमातृत्वं च प्रमाण-व्यापारसाध्यमिति कथं करणैर्विना पश्यतीत्युक्तमित्याशङ्क्य, लोकेऽपि हि यत्र यः साक्षी व्यवह्रियते स तदसङ्गत्वेन तदकर्तृतया प्रसिद्धोऽन्यथा तत्क-र्तृत्वे तत्साक्षित्वव्यवहारायोगात्, एवमिहापि साक्ष्यमातृत्वादिप्रपञ्चशू-न्यस्यैव साक्षित्वं तच्च स्वरूपचैतन्येनाविद्यावृत्त्या वेक्षणेनेति न प्रमाण-व्यापारापेक्षेत्याशयेनाह । निजमाययेति । स्वविषयमाययेत्यर्थः । मायायाः स्वातन्त्र्ये तत्कार्यस्याप्यात्मातन्त्रत्वेनासंबन्धात् तत्साक्षित्वं न स्यादिति तद् वारयंस्तां विशिनष्टि । परतन्त्रयेति । निजया प्रभया स्वरूपप्रका-शेन प्रपञ्चाकाराविद्यावृत्तौ स्वीयचिदाभासेनेति वा, यः पुरुषः स हि स्वाध्यस्तमायया शबलतया स्वस्मिन् परिकल्पितं सकलं दृश्यं निजया प्रभ-याऽऽकलयन् साक्षितामुपगतो भवतीति संबन्धः । इदं चेश्वरस्य सर्वज्ञता-रूपं सर्वसाक्षित्वमुक्तम् । जीवस्य सुखादिसाक्षित्वं त्वविद्याशबलस्यैवान्तः-करणोपधानेनेति द्रष्टव्यम् । अन्यथातिप्रसङ्गात् ॥ ३० ॥

मू० ॥ ग्राह्यग्राहकयोः स्थिरत्वगमनी तत्प्रत्यभिज्ञा प्रमा
नोपापत्स्यत चेदसेत्स्यदपि नो सिद्धान्तयोस्तुल्यता ॥

सा निर्वक्ष्यति सिद्ध्यतीति जगत: स्थैर्यं स्वरूपात्मकं
चैतन्यस्य च भङ्गुरत्वमिव मे सर्वस्य ते दर्शने ॥ ३१ ॥

टी० ॥ ननु स्थिरमभ्युपेतमिह नः समय इति दृश्यस्थायित्वमुक्तं तदसतङ्गम्, तच्च तावत् प्रत्यक्षेण सिद्ध्यति, स्वसमये स्वविषयग्राहिणा तेनानेकक्षणावच्छिन्नत्वरूपस्थायित्वस्यासिद्धेः,नापि लिङ्गेन, तद्व्याप्तिग्रहस्यलाभावादात्मनोऽपि विप्रतिपन्नत्वात्, न च प्रत्यभिज्ञया तत्सिद्धिरिति वाच्यम्। स्वप्रकाशात्मनि तदसंभवाज्ज्वालाप्रत्यभिज्ञायाश्च स्थायित्वाविषयत्वादन्यत्रापि तस्यास्तदविषयत्वात् । न वा प्रत्यभिज्ञायाः कारणं किंचिदस्ति, चक्षुरादेर्वर्त्तमानस्वसन्निकृष्टमात्रज्ञाने कारणत्वेन तत्तांशेऽसमर्थत्वात्, संस्कारस्य स्मृतिमात्रजनकत्वादिदमोऽनुभवेऽसमर्थत्वात् । अभिज्ञास्मृतिजनने परस्परमनपेक्षयोस्तयोः चक्षुःसंस्कारयोर्मिलनायोगाच्च, नापि तद्विषयः संभवति । तत्तेदन्ताविशिष्टयोर्युगपद्यायोगेनाभेदासंभवात् । तत्स्वरूपं चैकं न संभवति । सः अयमित्याकारभेदे रूपरसादिज्ञानवदेकत्वायोगादिति प्रमाणाभावाच्च प्रमात्रादेः स्थायित्वमित्याशङ्क्याह । ग्राह्यग्राहकयोरिति । प्रमातृप्रमेययोरित्यर्थः । स्थिरत्वमनेककालस्थायित्वं गमयतीति स्थिरत्वगमनी तयोः प्रत्यभिज्ञा तत्प्रत्यभिज्ञा नोपापत्स्यत चेत् उपपन्ना न भविष्यति चेत्, असेत्स्यत् सिध्येत् । किं तदित्यत आह । नो आवयोः सिद्धान्तयोस्तुल्यता । यदि प्रमात्रादिस्थायित्वविषयिणी प्रत्यभिज्ञा त्वदुक्तप्रकारेण न स्यात्, सा यदि वाऽप्रमाणं स्यात् तदा सर्वस्य क्षणिकत्वादावयोः सिद्धान्तसाम्यं स्यात्, न च सा तस्याः प्रमात्वं वा न निर्वहतीति जगतः स्थायित्वमपि सिद्ध्यतीत्याह । सा निर्वक्ष्यतीति । प्रत्यभिज्ञारूपा प्रमा निर्व्यूढा भविष्यति, उपपन्ना भविष्यतीति यावत् । सा निर्वक्ष्यतीति मे मम जगतः स्थैर्यं सिध्यतीति संबन्धः । न च ज्वालादौ व्यभिचार इत्यन्यत्रापि सा तद्विषयिणी न भवतीति वाच्यम् । बाधाबाधाभ्यां विशेषात् । अन्यथा स्वजीवनानुपपत्तेः । तदुक्तम् । "उत्प्रेक्षते हि यो मोहादज्ञातमपि बाधनम् । स सर्वव्यवहारेषु संशयात्मा क्षयं

प्तवे"दिति । न च तत्कारणासंभव एव तद्बाधः । इन्द्रियसंस्कारयोरेव मिलितयोस्तद्धेतुत्वात् । अभिज्ञायां स्मृतौ चान्योन्यानपेक्षयोरपि कार्यविशेषे तदपेक्षोपपत्तेः । दृश्यते हीन्द्रियालोकयोर्यांश्चसंयोगे तमोनिवृत्तौ चान्योन्यनिरपेक्षयोरपि रूपज्ञानेऽपेक्षा, ततः कारणसंभवात् प्रत्यभिज्ञास्वरूपैक्यमपि संभवतीति भावः । यत्तु तत्तेदन्ताविशिष्टाभेदासंभवात् तदात्मकस्थैर्यं तद्विषयो न संभवतीति तत्राह । स्वरूपात्मकमिति । तत्तेदन्तोपलक्षितवस्तुस्वरूपात्मकस्थैर्यमित्यर्थः । यत्तु स्वप्रकाशचैतन्ये तदसंभवाच्च च स्थायित्वं सिद्ध्यतीति । तच्च । तस्य न जायते म्रियते वेत्यादिश्रुतिसिद्धत्वादित्याशयेनाह । चैतन्यस्य चेति । स्वरूपात्मकं स्थैर्यं सिद्ध्यतीत्यनुषङ्गः । स्थैर्यस्य वस्तुस्वरूपत्वे तत्संमतं दृष्टान्तमाह । भङ्गुरत्वमिति । क्षणिकत्वमित्यर्थः । न हि क्षणिकत्वं तव मते विज्ञानादतिरिक्तं विज्ञानमात्रस्वमतहानात् । अत एवाकारभेदात् प्रत्यभिज्ञाभेद इति निरस्तम् । ज्ञानं क्षणिकमिति ज्ञानाकारभेदेऽपि तव तदैक्यवत् तदुपपत्तेरिति । न चैवं क्षणिकत्वस्थायित्वयोर्वस्तुस्वरूपमात्रत्वे मतद्वयाविशेषापत्तिः । स्वरूपविशेषादेव तद्विशेषोपपत्तेः । स्थायित्ववादे हि कालद्वयोपलक्षितभेदाभावात्मकं वस्तुस्वरूपम् । क्षणिकत्ववादे तु तादृशभेदात्मकं वस्तुस्वरूपम् इति महान् विशेष इति भावः ॥ ३१ ॥

मू० ॥ ननु कल्पितं सदपि जागरितं
वद कीदृशी खलु विलक्षणता ॥
स्वपनादमुष्य भवतोऽभिमता
परिकल्पितत्वमुभयोस्तु समम् ॥ ३२ ॥

टी० ॥ एवं सर्वस्य कल्पितत्वेऽपि विज्ञानवादिमतसाम्यं परिहृतम्, इदानीं स्वप्नेऽपि दृष्टमिदमेवमिहापीत्यचोक्तं स्वप्नसाम्यमनुपपन्नं जाग्रत्स्वप्नयोः परस्परवैलक्षण्यानुभवात् । वैधर्म्याच्च न स्वप्नादिवदिति सूत्रकारेणापि जाग्रद्दृष्टघटादेस्ततो वैलक्षण्योक्तेश्चेति स्वप्नविलक्षणं तत् सत्यमेवेत्याशङ्कते । नन्विति । तद्विलक्षणत्वाभावे ननु कल्पितमित्यनुवादोक्तमेव हेतुमभिप्रेत्याह । परिकल्पितत्वमिति । उभयोर्जाग्रत्स्वप्नयोः ॥ ३२ ॥

मू० ॥ न प्रमातरि सति प्रबाध्यते
जागरः स्वपनदृष्टवस्तुवत् ॥
मातृमानविषयोपलब्धिभिः
साकमेव तमसो निराकृतेः ॥ ३३ ॥

टी० ॥ तयोर्मिथ्यात्वाविशेषेऽपि जागरप्रपञ्चस्याविद्यातिरिक्तदोषाजन्यतया व्यावहारिकत्वं स्वप्नस्य तु निद्रादिजन्यस्याविद्यातिरिक्तदोषजन्यत्वेन प्रातीतिकत्वमिति नानुभवादिविरोधः। तच्च यद्यपि व्यावहारिकत्वं न व्यवहारजनकत्वम्, तदवस्थायां स्वप्नेऽपि तद्दर्शनात्, अवस्थान्तरे जाग्रद्घटादेरपि तदभावात्। नाप्यविद्यातिरिक्तकारणाजन्यत्वम्, गगनादेरपि कर्मादिजन्यस्य तदभावात्। तथापि प्रमातरि सत्यबाध्यमानत्वं व्यावहारिकत्वम्, तस्मिन् सति बाध्यत्वं प्रातीतिकत्वमित्याशयेनाह। न प्रमातरीति। अन्तःकरणविशिष्ट इत्यर्थः। अत्र जडत्वे सतीति विशेषणं द्रष्टव्यम्। अतो नात्मन्यतिव्याप्तिः। स्वपनेति वैधर्म्यनिदर्शनम्। यथा स्वप्नो जाग्रति प्रमातरि सत्येव बाध्यते न तथा जाग्रद्घटादिः। कथं तर्हि तद्बाधस्तत्राह। मातृमानेति। माता च मानं च विषयश्चोपलब्धिश्च ताभिरित्यर्थः। ब्रह्मात्मैक्यसाक्षात्कारेण ह्यविद्यातत्कार्यमात्रादिभिः सहैव निवर्त्यते न तु स्वप्न इवान्तःकरणविशिष्टे सत्येवेत्येतदेव स्वप्नवैलक्षण्यं जाग्रद्दृष्टस्यानुभवसूत्राभ्यां सिद्ध्यति। ननु बाधो यदि निवृत्तिमात्रम्, तदा प्रमातरि सति स्वप्नवद्घटादेरपि तदस्त्येव। नापि ज्ञानान्निवृत्तिः स इति वाच्यम्, जाग्रद्घटादेरपीश्वरज्ञाननिवर्त्यत्वात्, स्वप्नस्यापि सुषुप्त्यवस्थायामिव जाग्रत्यप्यन्यतो नाशसंभवेन ज्ञानानाश्यत्वाच्च। नाप्यविद्यया सह ज्ञानान्निवृत्तिर्बाधः, स्वप्नेऽपि तदभावात्। ब्रह्मज्ञाने सत्येव जाग्रति स्वप्नस्य निवृत्तेः। न च ब्रह्मगोचरसमानकालीनज्ञानद्वय एकस्य प्रमाणमस्ति प्रयोजनं वा, न वा स्वप्नसाक्षिविषयमज्ञानं संभवति। नापि मिथ्यात्वनिश्चयो बाधः। घटादेरन्तःकरणमिथ्यात्वनिश्चयाभावेऽपि तन्निश्चयसंभवेन स्वप्नवत् प्रमातरि सति बाध्यमानत्वात्। तस्माद्यत्त किं चिदेतदिति चेत्। उच्यते। जाग्रत्काले प्रमातरि

सति स्वप्नो मिथ्येति ज्ञायत इति सर्वाविवादम्, तथा च प्रमातरि सति विरोधिज्ञानाधीनमिथ्यात्वनिश्चययोग्यत्वं स्वप्नशुक्तिकारजतादेः प्रातीतिकत्वम्, यत्र दैवाज्जायति श्रमानन्तरं निद्रा भवति तत्संग्रहार्थं योग्यत्वमित्युक्तम् । एतदभावो यत्र तत्प्रमातरि सत्यबाध्यम्, जाग्रद्घटादौ चैतदस्तीति स व्यावहारिक इति भावः ॥ ३३ ॥

मू० ॥ देशकालपुरुषैरवस्थया
जाग्रतस्य खलु कारणं तमः ॥
बाधमेव सहसा निरस्यते
वेदवाक्यजनितात्मसंविदा ॥ ३४ ॥

टी० ॥ एवं देशे कालादौ वा सति यद् बाध्यते तत् प्रातीतिकम्, यन्न बाध्यते तद् व्यावहारिकमिति लक्षणान्तरमभिप्रेत्याह । देशकालेति । अत्र देशकालमात्रं विवक्षितमिति स्वप्नदृष्टदेशादिबाधेऽपि न तत्रातिव्याप्तिः, पुरुषो जीवोऽवस्था जाग्रदाद्याः सहसा युगपत् कार्येण सहैवेत्यर्थः । एतच्चाविद्यातत्कार्ययोर्युगपदेव ज्ञानान्निरास इति मतेनोक्तम् । बाधपरिहाराय वेदवाक्येत्युक्तम् । तथा च मुख्याधिकारिणो वेदान्तजन्यात्मज्ञानात् समूलसंसारो निवर्तिष्यत इति नेदानीं बाध इति भावः ॥ ३४ ॥

मू० ॥ स्वप्नदृष्टमिह रज्जुसर्पवद्
देशकालपुरुषेषु बाध्यते ॥
जागरः पुनरयं तथाविधे
बाधकं न लभतेऽसमीक्षणात् ॥ ३५ ॥

टी० ॥ स्वप्नदृष्टवदित्युक्तं वैधर्म्यदृष्टान्तं व्यावहारिकलक्षणस्यातिव्याप्तिपरिहाराय विवृणोति । स्वप्नदृष्टमिति । पुरुषेषु प्रमातृषु सत्स्विति शेषः । एवं च मिथ्यात्वाविशेषे जाग्रत्प्रपञ्चस्य स्वप्नवैलक्षण्यं मुख्यमित्याशयेनाह । जागर इति । तथाविधदेशकालयोः सतोर्जायमानम् । असमीक्षणादिति । प्रत्यक्षेण तदन्येन वा प्रपञ्चस्य तथाविधबाधाननुभवादित्यर्थः ॥ ३५ ॥

मू० ॥ तेन सत्यमिह जागरं विदुः
स्वप्नविभ्रमविरुद्धधर्मकम् ॥
आपरात्मपरमार्थदर्शनात्
तेन बाधितवपुर्न सत् क्व चित् ॥ ३६ ॥

टी० ॥ मिथ्यात्वाविशेषेऽपि जाग्रत्स्वप्नयोरुक्तवैलक्षण्येन सत्यासत्यव्यवस्थितव्यवहार उपपन्न इति दृश्यस्य प्रपञ्चस्य सत्यत्वं ततः सिद्धमित्याशयेनोपसंहरति । तेनेति । उक्तव्यावहारिकलक्षणयोगेनेत्यर्थः । दर्शनावधौ निमित्तमाह । तेनेति । न सत् क्वचिदिति । यथा स्वप्नस्य बाधितस्यापि पुनर्दर्शनं प्रमातुर्विद्यमानत्वात्, नैवं तत्त्वज्ञानबाधितजागरस्य, सहैव प्रमात्रा बाधितत्वादित्यर्थः ॥ ३६ ॥

मू० ॥ तच्च सत्यमनृतं च भेदतः
प्रत्यगात्मनमसा विकल्पितम् ॥
प्रक्षिणोति परमात्मवस्तुगा
बुद्धिवृत्तिरविचालिनी सती ॥ ३७ ॥

टी० ॥ एवं व्यवस्थितव्यवहारोपपादनेन सर्वस्यापि दृश्यस्य मिथ्यात्वसमर्थनफलमाह । तच्चेति । जाग्रद्दृश्यस्य स्वप्नवैलक्षण्येऽपि मिथ्यात्वे सतीत्यर्थः । सत्यमनृतं चेति लोकदृष्टिमाश्रित्योक्तमुक्तवैलक्षण्यमाश्रित्य वा विकल्पितं परस्परविरुद्धतया कल्पितम् । प्रक्षिणोति प्रकर्षेण मूलाज्ञानेन सह नाशयति । अविद्यातत्कार्यदृश्यज्ञानमुक्तविभागेनात्मनि कल्पितं मिथ्यात्वाद् वाक्यजन्यात्मसाक्षात्कारो नाशयतीत्यर्थः ॥ ३७ ॥

मू० ॥ नित्यबोधपरिपीडितं जगद्विभ्रमं नुदति वाक्यजा मतिः ॥
वासुदेवनिहतं धनञ्जयो
हन्ति कौरवकुलं यथा पुनः ॥ ३८ ॥

टी० ॥ नन्वविद्याया अनादिकालमारभ्यात्मनि स्थितायास्तत्कार्यस्य च चिरकालाहितदृढवासनाभ्यो रूढमूलस्य कथं वाक्यमात्रस्याचिरा·

क्यजजडसाक्षात्कारेणाविद्याकार्येवा निवृत्तिः संभवतीत्याशङ्क्य न चिरकालाशुक्तित्वादि निवर्त्यत्वे निमित्तं परमते प्रागभावस्य निवर्त्यत्वात् । न वा चिरस्थत्वादि निवर्तकत्वे, किं तु सत्यत्वमनिवर्त्यत्वे निमित्तमात्मनस्तथादर्शनादज्ञातविषयत्वं च ज्ञानस्य निवर्तकत्वे अज्ञानस्य स्वविषयगोचरज्ञाननिवर्त्यत्वादविद्यातत्कार्ये चाद्वयबोधात्मनि वस्तुतोऽसंभवादध्यस्तमिति तद्गोचरज्ञानव्यक्तचैतन्येन निवर्तयितुं शक्यमेवेत्याशयेनाह । नित्यबोधेति । नित्योऽद्वयो यो बोधस्तेन परिपीडितमपहृतसत्त्वमित्यर्थः । स्वंभूतं जगद्विभ्रमं वाक्यजा मतिरहं ब्रह्मेति वाक्याज्जाताऽखण्डब्रह्माकारान्तःकरणवृत्तिर्जडापि तप्ताऽयोगोलकवत् तत्स्वभावमापन्ना नुदति नाशयति वाक्यजन्यं हि ज्ञानं स्वनिवर्त्यस्यानिर्वचनीयत्वमपेक्षते तच्च तस्य तदधिष्ठानचिदद्वयत्वकृतमित्याशयेनैवमुक्तमिति द्रष्टव्यम् । ईश्वरसामर्थ्येन पीडितस्यागन्तुकनिमित्तेन स्वकार्यणापि बाधे दृष्टान्तमाह । वासुदेवेति । कालात्मनेश्वरेण वस्तं धनञ्जयोऽर्जुनः कुरुवंश्योऽपि पुनर्यथा हन्ति तथाचापि । उक्तं च भगवता "मयैवैते निहताः पूर्वमेव निमित्तमात्रं भव सव्यसाचि" न्निति ॥ ३८ ॥

मू० ॥ सत्यमेवमनृतं च दुर्लभं
ब्रह्मवादिसमयाद् बहिः पुनः ॥
सत्यतो यदि मृषा पृथग भवेत्
सत्यमेव तदपि प्रसज्यते ॥ ३९ ॥

टी० ॥ एवं स्वमते सत्यं चानृतं च सत्यमभवदितिश्रुतेर्लोकप्रसिद्धसत्यासत्यविभागं तस्य ज्ञानाच्निवृत्तिं च दर्शयित्वा परमतेऽयं सत्यासत्यविभागो न सिद्ध्यतीत्याह । सत्यमेवेति । बहिरन्यत्र सत्यप्रपञ्चमत इति यावत् । कुतो दुर्लभमिति चेत् किं मृषा वस्तु शुक्तिरजतादि सत्याद् वस्तुतः पृथगुतापृथगाहो पृथगपृथगात्मकमनिर्वचनीयस्य परानङ्गीकारादिति विकल्प्याद्यं दूषयति । सत्यमेवेति । अन्यथा तात्त्विकसत्यभेदाश्रयत्वायोगादित्यर्थः ॥ ३९ ॥

मू० ॥ सत्यतो यदि मृषा न भिद्यते
सत्यमेव सुतरां तदिष्यताम् ॥
न द्वयात्मकतयाऽनृतं मतं
पक्षयोः कथितदूषणाद्द्वयात् ॥ ४० ॥

टी० ॥ द्वितीयतृतीयकल्पौ दूषयति । सत्यतो यदि मृषेति । सत्याभिन्नस्य मृषात्वायोगात् तदपि सत्यमेव स्यात् तदभिन्नस्येतरस्य वा मृषात्वापत्तेर्द्वितीयकल्पे सत्यासत्यविभागो न स्यात् । द्वयात्मकतया पृथगपृथगात्मतया पक्षयोः प्रत्येकं भिन्नाभिन्नत्वपक्षयोः एकैकपक्षोक्तदोषस्य समुच्चयेऽप्यंशतः प्राप्तेरित्यर्थः । एतच्चोपलक्षणम् । विरोधादयं पक्ष एवानुपपन्न इति भावः ॥ ४० ॥

मू० ॥ वेदवाक्यविषयस्य सत्यता
बुद्धवाक्यविषयो मृषा भवेत् ॥
इत्यतः कथयितुं न शक्नुयाद्
ब्रह्मवादिसमयाद् बहिर्मुखः ॥ ४१ ॥

टी० ॥ एवं शुक्तितद्रजतादेः सर्वप्रसिद्धसत्यासत्यविभागो लौकिकः परपक्षे न सिद्ध्यतीत्युक्त्वा एवमन्योऽपि तत्र तद्व्यवहारो न सिध्येदित्याह । वेदवाक्येति । अग्निहोत्रादेरिति शेषः । बुद्धेति चैत्यवन्दनादेरिति शेषः । इतीत्थमतः पूर्वोक्तविकल्पदूषणाद्धेतोर्ब्रह्मवादिसमयादद्वयब्रह्मणो बहिरन्यत्र मुखमभिनिवेशो यस्य सत्यप्रपञ्चाभिमानीत्यर्थः ॥ ४१ ॥

मू० ॥ सत्यमेवनृतं च भेदतः
कल्पितं भवतु वादिनोर्नयात् ॥
सम तद् घटयितुं हि शक्यते
नेतरस्य कथितोपपत्तिभिः ॥ ४२ ॥

टी० ॥ ब्रह्मवादिसमयाद् बहिर्मुख इत्यनेन सूचितमुक्तप्रकारेण सत्यासत्यविभागं कथयितुं ब्रह्मवादी शक्नुयादित्येतद् विवृणोति । सत्यमे-

ऽमनृतमिति । भवतु भवेत् । तत्र ब्रह्मवादे तद्भेदेन सत्यासत्यकल्पनं वर्णिताबयाद् घटयितुमिति संबन्धः । इतरत्र मतान्तरे । एवं नेति संबन्धः ॥ ४२ ॥

मू० ॥ व्यावहारिकमतोऽवगम्यतां
मानजातमखिलं न तात्त्विकम् ॥
बाह्यवस्तुविषयं विरोधतो-
ऽबुद्धबोधविधिशक्त्यसंभवात् ॥ ४३ ॥

टी० ॥ एवं प्रत्यक्षादिप्रमाणविषयस्य तत्तदुचितव्यवहारसमर्थस्यापि मिथ्यात्वात् तद्बोधकप्रत्यक्षादेर्व्यावहारिकप्रमाणत्वमेव न तु वेदान्तवत् तात्त्विकमबाधितानधिगतबोधनलक्षणं प्रमाण्यं वेदान्तैरेवाद्वयब्रह्मपरैरनवकाशैर्यतो बाधितविषयत्वादबुद्धबोधकत्वाभावाच्चेत्यवान्तरप्रमेयमुपसंहरति । व्यावहारिकमिति । व्यवहाराङ्गमित्यर्थः । यतो बाह्यवस्तुविषयमखिलं मानजातं न तात्त्विकमतो व्यावहारिकं गम्यतामिति संबन्धः । अतात्त्विकत्वे हेतुमाह । विरोधत इति । पराञ्चि खानीति श्रुतिविरोधादित्यर्थः । अबुद्धबोधेति छेदः ॥ ४३ ॥

मू० ॥ एवं न तत्त्वविनिवेदनशक्तियोगः
संभाव्यतेऽनधिगताधिगतेरयोगात् ॥
मानान्तरस्य सकलस्य ततश्च तेन
बाधस्त्रयीशिरसि वर्णयितुं न शक्यः ॥ ४४ ॥

टी० ॥ इदानीं साधितमर्थं हेतुत्वेन मनसि निधाय तदनुवादेन परमप्रकृतमुपसंहरति । एवमिति । सुबोधम् ॥ ४४ ॥

मू० ॥ आरम्भणादिवचसा खलु निर्विकल्प-
प्रत्यक्षबुद्धिमनुसृत्य विकल्पबुद्धेः ॥
आभासतां मुनिरुवाच तदाऽस्य भावो
विज्ञायते स्फुटतरो गुरुजिज्ञासायाम् ॥ ४५ ॥

टी० ॥ ननु निर्विकल्पकसविकल्पकसाधारगयेनानात्मविषयप्रमाणमात्रस्याप्रामाण्यं वक्तुमयुक्तम् । यतः सूत्रकृता तदनन्यत्वमारम्भणशब्दादिभ्य इति सूत्रेण विकारविषयविकल्पबुद्धेराभासत्वं प्रदर्श्य मृदादिकारणनिर्विकल्पकबुद्धेः प्रामाण्यमङ्गीकृतम् । अन्यथा घटादेर्मृदादिमात्रत्वोक्तिविरोधान्मृत्तिकेत्येव सत्यमित्यादिश्रुतिविरोधाच्चेत्याशङ्क्य तदाशयमाह । आरम्भणादीति । निर्विकल्पस्य कारणमात्रस्य प्रत्यक्षबुद्धिमनुसृत्य प्रामाण्यमङ्गीकृत्येत्यर्थः । विकल्पस्य घटादिविकारस्य बुद्धेराभासतां मिथ्यार्थविषयत्वमित्यर्थः । मुनिर्बादरायणः । भाव आशयः । जगन्मूलकारणनिरूपणाय प्रवृत्तोऽयं मुनिर्यदा घटादिबुद्धेरप्रामाण्यं सूचयन् मृदादिबुद्धेः प्रामाण्यमुवाच तदा गुडजिह्विकायामस्य स्फुटतरो भावो विज्ञायते । यथा माता बालहितैषिणी तमतितिक्तरसाख्यौषधं पाययन्ती पिबैतदौषधं तव जिह्वायां गुडं स्थापयिष्यामीति तं प्रलोभयत्येवं सूत्रादिभिरपि त्यक्तुं तावदयं घटादिविकल्पबुद्धिप्रामाण्यमङ्गीकृतं घटादिबुद्धेः कारणस्यानिर्वचनीयान्यथाभावमात्रालम्बनतयाऽन्यथासिद्धत्वप्रदर्शनमन्तरेण विकारबुद्ध्याभासत्वस्योपपादयितुमशक्यत्वादिति भावः ॥ ४५ ॥

मू० ॥ सत्संप्रयोग इति जैमिनिरप्युवाच
यल्लक्षणं तदुभयोः सममेव विद्यात् ॥
आपाततस्तदथ युक्तिनिपीडितं सत्
सन्मात्रसंविदि विषीदति निर्विशङ्कम् ॥ ४६ ॥

टी० ॥ ननु सत्संप्रयोगे पुरुषस्येन्द्रियाणां बुद्धिजन्म तत्प्रत्यक्षं विद्यमानोपलम्भनादिति सूत्रेण जैमिनिः सविकल्पनिर्विकल्पयोरात्मानात्मविषययोश्च प्रत्यक्षयोः साधारणमेव लक्षणमवोचत् तत्र च सदित्यर्थस्य सत्त्वाभिधानात् सर्वमेव प्रत्यक्षं तत्त्वावेदकमिति तन्मतमिति बादरायणस्यापि तदनुसारेणैवाशयो वर्ण्यतामित्याशङ्क्याह । सत्संप्रयोग इति । लक्षणं प्रत्यक्षस्येति शेषः । उभयोः सविकल्पकनिर्विकल्पकयोश्चात्मानात्मविषययोर्वा आपाततोऽविचारितमेव समं विद्यादिति संबन्धः । अविचारदशा-

Digitized by Google

यामेव घटादेः पृथक्सत्त्वानुभवात्। कुत एवं तत्राह। अर्थेति। अर्थान्तरे। युक्तिनिपीडितं युक्त्यालोचितं सत् तल्लक्षणं सन्मात्रस्य सत्सामान्यात्ममात्रस्य संविदि निर्वार्तिति पर्यवस्यति सर्वप्रपञ्चाधिष्ठानसत्त्वस्यैव घटादेः सद्बुद्ध्युपपत्तेस्तस्य न ततः पृथक्त्वं कल्पनीयमिति सदेवेत्यादिश्रुतिबलादात्मैव सञ्जैमिनीयप्रत्यक्षलक्षणसूत्रेऽपि विवक्षित इति प्रपञ्चसत्त्वमापातदृष्ट्यैव प्रतीयत इति न तद्बलाच्छ्रुतिन्यायमूलं बादरायणसूत्रमन्यथयितव्यमिति भावः ॥ ४६ ॥

मू० ॥ तथापि दुर्घटमवेति यदा तु तत्त्व-
बोधं विवक्षति विसृज्य विकल्पजालम् ॥
किं कारणं वदति येन स तत्त्वगामि-
विज्ञानमर्थमवबोधयदप्रबुद्धम् ॥ ४७ ॥

टी० ॥ किं च जैमिनीयसूत्रान्तरपर्यालोचनयाऽप्येवमेवेत्याह । तथापीति। अपिरवधारणे जैमिनिः स्वल्पापातदृष्ट्या प्रत्यक्षमात्रस्य सत्संप्रयोगजन्यत्वमभिधाय यदा तत्र प्रत्यक्षमात्र इदं लक्षणं दुर्घटमवेति तदा विकल्पजालमनात्मप्रत्यक्षं विसृज्य तत्त्वबोधमेव विवक्षतीति संबन्धः। नन्वेतत् किंबलाज्ज्ञातमिति पृच्छति । किं कारणमिति। कस्मात् कारणादित्यर्थः। उत्तरं वदतीति, स जैमिनिर्येन हेतुनाऽप्रबुद्धमर्थं बोधयद् विज्ञानं तत्त्वगामीति वदतीति संबन्धः । एवं चाज्ञातार्थविषयबोधस्यैव प्रमाणत्वं तत्संमतमिति प्रत्यक्षसूत्र आपातदृष्ट्यैवानात्मप्रत्यक्षलक्षणाभिधानमात्मनोऽन्यस्याज्ञातत्वासंभवस्योक्तत्वादिति भावः ॥ ४७ ॥

मू० ॥ औत्पत्तिके हि भगवानयमप्रबुद्ध-
मर्थं प्रमाणविषयं कथयांबभूव ॥
अथाह तथ ननु धर्मगतं प्रमाणं
तत्त्वार्थगामि कथितं न परात्मगामि ॥ ४८ ॥

टी० ॥ ननु जैमिनिनाऽप्रबुद्धार्थज्ञानं प्रमाणमिति कुत्रोक्तमित्याकाङ्क्षायामाह। औत्पत्तिक इति। अयं जैमिनिर्भगवानौत्पत्तिकसूत्रेऽर्थेऽनु-

पलब्धे तत्प्रमाणमिति भागेनाप्रबुद्धमर्थं प्रमाणविषयं कथयांबभूव इतीति संबन्धः। नन्वनेन सूत्रेण धर्मप्रमाणस्य चोदनाया इवात्मज्ञानोपबोधकतया तत्त्वावेदनप्रामाण्यमुक्तं धर्मस्येव जिज्ञास्यत्वेन प्रक्रान्तत्वात्। न तु स्वमात्मप्रमाणस्य तस्य तत्रानुपक्रमादिति शङ्कते। यत्राहेति। तत्र चोत्पत्तिकसूत्रे। नन्विति प्रसिद्धौ ॥ ४८ ॥

मू० ॥ सत्यं यथाह पितृमान् व्यवहारदृष्टि-
माश्रित्य तत् कथितवान् प्रकृतोपयोगात् ॥
दूरप्रसारितनिसृष्टनिगूढभाव-
स्तद्बादरायणमतानयनात् प्रतीमः ॥ ४९ ॥

टी० ॥ सत्यं तत्सूत्रं धर्मचोदनाविषयं न तु तावन्मात्रगोचरं तदपि व्यावहारिकदृष्ट्येव मुख्याऽज्ञाततायाः स्वप्रकाशात्मनोऽन्यत्रासंभवादेतदपि तत्र जैमिनिसंमतमेवार्थानुपलब्धे तत् प्रमाणं बादरायणस्येति तस्य बादरायणसंमतत्वप्रदर्शनात् तस्य चोक्तन्यायेनात्मप्रमाणस्यैवानुपलब्धार्थतया तत्त्वावेदकत्वसंमतेरित्याशयेन परिहरति। सत्यमिति। पितृमान् पित्रादिशिक्षितबुद्धिः प्रकृतोपयोगाद् प्रस्तुतधर्मविचारोपयोगाद् व्यवहारदृष्टिमाश्रित्य जैमिनिस्तत् कथितवानिति वयं प्रतीमः कुतस्तत्राह। तद्बादरायणेति। तत्र सूत्रे बादरायणमतस्यानयनादाकर्षणादिति संबन्धः। ननु बादरायणस्यापि चोदनायास्तत्त्वावेदनप्रामाण्यं संमतमेवेति सूचनाय तत्र तदुपन्यासः किं न स्यादित्याशङ्क्याह। दूरप्रसारित इति। दूरे उत्तरमीमांसायां प्रसारितः प्रकटीकृतो योऽर्थस्तस्मिन्विसृष्टो नितरां क्षिप्तो नैसर्गिको निगूढो भावोऽभिप्रायो यस्य जैमिनेः स तथा आरम्भणाधिकरणादौ निरूपितात्मतत्त्वस्य श्रुतिन्यायसंमततयान्यथाभावासंभवेन न बादरायणस्य चोदनातत्त्वावेदकत्वं संमतम्। अतो जैमिनेरपि तदुदाहरणेन तथैव भावो यद्यपि तथापि कर्मसु प्रवृत्त्यनुगुणतया सामान्येनैव तदभिधानमिति भावः ॥ ४९ ॥

मू० ॥ दग्धस्य वस्त्यपि विधिर्न विधिप्रमेय-
मात्मानमेव विनियच्छति तत् कुतस्त्वेत् ॥

कर्त्तात्मना च परमात्मन एव यस्माद्

यस्मात्तु कर्तृवशवर्ति न दर्शनं तत् ॥ ५० ॥

टी० ॥ नन्वात्मा वा अरे द्रष्टव्य इति वेदान्तेषु विधिश्रवणाज्जैमिनेरिव तदर्थनिरूपकव्यासस्यापि चोदनातात्त्विकप्रामाण्यमेव संमतमस्त्वित्याशङ्क्याह । द्रष्टव्य इति । एतद् वाक्यमपि न विधिरित्यर्थः । किंपरं तर्हीदं वाक्यमित्याशङ्क्याह । विधिप्रमेयमिति । विधीयते ज्ञाप्यतेऽज्ञातोऽर्थोऽनेनेति विधिः प्रमाणं तस्यात्मानमेव प्रमेयं तद् वाक्यं विनियच्छति विशेषेण नियमयतीत्यर्थः । तदेव शङ्कापूर्वकमुपपादयति । तत् कुतश्चेदित्यादिना । यदज्ञातं तदेव प्रमित्सापूर्वकं प्रमाणेन ज्ञायते सर्वविशेषतो मुमुक्षुणाऽज्ञातं चात्मतत्त्वमेवेति तदेव प्रमाणानां विषय इत्येतद् वाक्यं दर्शयतीत्यर्थः । ननु तव्यप्रत्ययाद् विध्यर्थतैव तस्यास्त्वित्याशङ्क्य तस्याः प्रथमाध्याय एव निरस्तत्वात् तद्वाक्यस्य न तदर्थत्वमित्याह । यस्माच्चेति । कर्तृवशवर्ति कर्त्रधीनं कर्तृव्यापारसाध्यमिति यावत् । चकार उक्तशङ्कानिवृत्तये ॥ ५० ॥

मू० ॥ अर्हे कृत्यतृचश्च पाणिनिवचः स्पष्टं विधत्ते यतस्तस्माद् दर्शनयोग्यतां वदति तत्तव्यो न तत्त्वान्तरम् ॥

तस्माद्धात्मपदार्थमात्रनियतं मेयत्वमेकान्ततो

द्रष्टव्यादिवचो वदत्यनुभवाद्वात आत्मा यतः ॥ ५१ ॥

टी० ॥ ननु कथं तस्य वाक्यस्यात्मप्रमेयतानियामकत्वम्, कृत्याश्चेति तव्यस्य विध्यर्थतासूत्रविरोधादित्यत आह । अर्हे इति । चकारात् पर इति शब्दो द्रष्टव्यः । विधत्ते । अर्हे कृत्यतृचश्चेति सूत्रमर्हार्थे कृत्यादिप्रत्ययमिति शेषः । यत एवं तस्मात् कृत्यात्मकतव्यप्रत्ययो नोऽस्मात् प्रत्यात्मनोऽज्ञातत्वपुरुषार्थत्वाभ्यां दर्शने योग्यतां वदति न तत्त्वान्तरं विधिरूपमर्थान्तरमित्यर्थः । तस्माच्च बादरायणस्य चोदनातात्त्विकप्रामाण्यं संमतम्, किं त्वात्ममात्रस्य प्रमेयत्वमिति तात्पर्येणाह । तस्माद्धात्मेति । द्रष्टव्यादिवचः आत्मा द्रष्टुं योग्य इत्यनया वचोभङ्ग्या मेयत्वमात्मपदार्थनि-

यतमिति निश्चित्य वदतीति संबन्धः । नन्वज्ञाततया घटादेरप्यनुभूयत इत्याशङ्क्य तदवच्छिन्नात्माज्ञाततैव तत्रानुभूयत इत्याशयेनाह । अनुभवादिति । यतो मामहं न जानामीत्यनुभवादात्मैवाज्ञातोऽत उक्तरीत्याऽन्यस्याज्ञातत्वे प्रमाणाभाव इत्यर्थः ॥ ५१ ॥

मू० ॥ रूप्यादिविभ्रममपेक्ष्य हि शुक्तिकादौ
सत्संप्रयोगजनितैव तु बुद्धिवृत्तिः ॥
तामप्यपेक्ष्य सति संहृतसर्वभेदे
सत्संप्रयोगजनिता मतिरभ्युपेया ॥ ५२ ॥

टी० ॥ किं च सत्संप्रयोगसूत्रपर्यालोचनयापि नानात्मप्रत्यक्षस्य तात्त्विकप्रामाण्यं लभ्यते, तत्र हि विद्यमानोपलम्भनादित्यर्थस्य विद्यमानतामात्रं हेतुः प्रतीयते, न तु परमार्थसत्त्वम् । यद्यपि शुक्तिरजतादेरपि विद्यमानतास्त्येव । तथाप्यर्थक्रियाविशेषयोग्यताविशिष्टं विद्यमानत्वं तत्र नास्तीति तदपेक्षया शुक्तिका सतीति तत्प्रत्यक्षं सत्संप्रयोगजन्यमित्युक्तमित्याशयेनाह । रूप्यादीति । शुक्तिकादौ हि बुद्धिवृत्ती रूप्यादिभ्रममपेक्ष्यैव सत्संप्रयोगजनितेति संबन्धः । तुशब्दोऽप्यमुमेव विशेषं शुक्तिकादिबुद्धिवृत्तेर्दर्शयति । ननु किमिति शुक्तिकादेरापेक्षिकमेव सत्यत्वमुच्यते परमार्थतैव किं न स्यात् तत्राह । तामपीति । शुक्तिकादेरपि श्रुत्यादिभिर्निषिध्यमानत्वेन सर्वप्रपञ्चनिषेधावधावात्मनि सति या मतिः सा तां शुक्तिकामप्यपेक्ष्य सत्ता निरतिशयता तेन संप्रयोगजनिताभ्युपेयेति संबन्धः । अत्रात्ममतेः सत्संप्रयोगजन्यत्वं परीत्योक्तमेवं च जैमिनीयप्रत्यक्षलक्षणबलादपि नानात्मप्रमाणस्य तात्त्विकत्वं सिद्ध्यतीति भावः ॥ ५२ ॥

मू० ॥ वेदान्तवाक्यजनितां परमात्मबुद्धिवृत्तिं व्यपेक्ष्य पुनरत्र न का चिदस्ति ॥
सत्संप्रयोगजनिता भुवनत्रयेऽपि
बुद्धिस्तमोविरचितं हि जगत् समस्तम् ॥ ५३ ॥ (शेषमग्रे)

पञ्चमः परिच्छेदः ।

(*Continued from page* 334. VOL. VI.)

इदानीमर्थापत्तिर्निरूप्यते ।

तत्रोपपाद्यज्ञानेनोपपादककल्पनमर्थापत्तिः । तत्रोपपाद्यज्ञानं करणमुपपादकज्ञानं फलम् । येन विना यदनुपपन्नं तत्तत्रोपपाद्यं यस्याभावे यस्यानुपपत्तिस्तत्तत्रोपपादकं यथा रात्रिभोजनेन विना दिवा अभुञ्जानस्य पीनत्वमनुपपन्नमिति तादृशं पीनत्वमुपपाद्यं यथा वा रात्रिभोजनस्याभावे तादृशपीनत्वस्यानुपपत्तिरिति रात्रिभोजनमुपपादकम् ।

रात्रिभोजनकल्पनारूपायां प्रमितौ अर्थस्यापत्तिः कल्पनेति षष्ठीसमासेनार्थापत्तिशब्दो वर्त्तते कल्पनाकरणे पीनत्वादिज्ञाने तु अर्थस्यापत्तिः कल्पना यस्मादिति बहुव्रीहि-

Presumptive evidence is now expounded. Presumption is the surmisal of a thing to account for something else by means of the knowledge of a something to be accounted for. The knowledge of what is to be accounted for is the instrument. The knowledge of what accounts for this something is the result. The thing that cannot be accounted for, save through something else, is called the upapádya. That something else, in whose absence the thing (i.e. upapádya) cannot be accounted for, is called the upapádaka. Thus, in the case of a fat man who does not eat by day, his fatness can not be explained except through the surmisal of his eating at night—such fatness is the upapádya. Again, in the absence of his eating at night, his fatness cannot be explained—here, his eating at night is the upapádaka.

With regard to the correct knowledge, viz, presumption of his eating at night, the word arthápattis is a shashṭhísamása, to be taken thus ;—*arthasya* (of something, sc. night-eating) *ápattis* (a surmisal). But with regard to the knowledge of the man's fatness, (which knowledge is) the instrument of the surmisal (of his night-eating), the word arthápattis is a bahuvríhisamása, to be taken thus :—*yasmát* (that from which, sc. fatness) *arthasya* (of something,

समासेन वर्त्तते इति फलकरणयोरुभयोस्तत्पदप्रयोगः ।

सा चार्थापत्तिर्द्विधा दृष्टार्थापत्तिः श्रुतार्थापत्तिश्चेति ।

तत्र दृष्टार्थापत्तिर्यथा इदं रजतमिति पुरोवर्त्तिनि प्रतिपन्नस्य रजतस्य नेदं रजतमिति तत्रैव निषिध्यमानत्वं सत्यत्वेऽनुपपन्नमिति रजतस्य सद्भिन्नत्वं सत्यत्वात्यन्ताभाववत्त्वं वा मिथ्यात्वं कल्पयति ।

श्रुतार्थापत्तिर्यथा श्रूयमाणवाक्यस्य स्वार्थानुपपत्तिमुखेनार्थान्तरकल्पनं यथा तरति शोकमात्मविदित्यत्र श्रुतस्य शोकशब्दवाच्यबन्धजातस्य ज्ञाननिवर्त्यत्वस्यानुपपत्त्या बन्धस्य मिथ्यात्वं कल्प्यते । यथा वा जीवी देवदत्तो गृहे नेति वाक्यश्रवणानन्तरं जीविनो गृहासत्त्वं बहिः सत्त्वं कल्पयति ।

sc. night-eating) *ápattis* (a surmisal). Thus the word arthápatti applies both to the result and to the instrument.

Presumption is two-fold, as referring to an object seen or heard.

The former kind is illustrated by the denial of the existence of silver in the object before our senses, (its existence being) expressed by "this is silver": the denial of silver in regard to the very object before us (tatraiva) as expressed in "this is not silver" cannot be valid if the silver is real, and, therefore, leads us to surmise the unreality of the silver, (the unreality being described as sadbhinnatva or satyatvâtyantábhávavâttva.)

Presumption, dealing with an object heard, is the surmisal of some further meaning, in a case where contradiction results in regard to the direct meaning of the sentence heard. Thus, in the case of the text. "The knower of Self passes beyond sorrow," since there is a contradiction in supposing that the group of human ties—which is what the word *sorrow* of the text denotes—can be annihilated by knowledge (if they are real), the unreality of these ties is surmised. Or again, when we have heard that the living Devadatta is not at home, his non-existence at home, while he is alive, leads us to surmise his existence elsewhere.

Digitized by Google

श्रुतार्थापत्तिश्च द्विविधा अभिधानानुपपत्तिरभिहितानुपपत्तिश्च ।

तत्र यत्र वाक्यैकदेशश्रवणेऽन्वयाभिधानानुपपत्त्यान्वयाभिधानोपयोगिपदान्तरं कल्प्यते तत्राभिधानानुपपत्तिः । यथा द्वारमित्यत्र पिधेहीति पदाध्याहारः । यथा वा विश्वजिता यजेतेत्यत्र स्वर्गकामपदाध्याहारः ।

ननु द्वारमित्यादावन्वयाभिधानात् पूर्व्वमिदमन्वयाभिधानं पिधानोपस्थापकपदं विनानुपपन्नमिति कथं ज्ञातमिति चेन्न । अभिधानपदेन करणव्युत्पत्त्या तात्पर्य्यस्य विवक्षि-

Presumption, dealing with an object heard, is of two kinds;—the one, where contradiction (otherwise results) as to the (intended meaning) of the sentence; the other, where contradiction (otherwise results) as to the expressed meaning of the sentence.

A case of the former kind is found where, on hearing part of a sentence, some other word is surmised to help out the intended meaning of the context, because (otherwise) the fact of the sentence having meaning would be contradicted. Thus the word *shut* is supplied (through presumption) to (the incomplete) *door*. Or again, the word *desirous-of-heaven* is supplied to the sentence "He should sacrifice with the viśvajit."

It may be doubted, by way of objection, how we, previous to a declaration of the context, can know, with reference to *door* and the like, that the declaration of the context cannot be saved from contradiction except through (the surmisal of) a word implying the *act of closing* This doubt we set aside, because some intention is implied by the word * *abhidhána,* which, etymologically, is an instrument. And thus, the knowledge, that the intention (of the speaker)

* Abhidhána being taken in the sense of *declaration* merely (kathana), it is argued that a context is unknown previous to a declaration of it. The text replies that abhidhána is to be taken in the sense of *intended meaning*—a sense it can bear, etymologically, as being the instrument by which the speaker's intention is made known (anena abhidhíyate iti abhidhánam).

तत्वात् तथा च द्वारकर्म्मकपिधानक्रियासंसर्गपरत्वं पिधानोपस्थापकपदं विनानुपपन्नमिति ज्ञानं तत्रापि सम्भाव्यते ।

अभिहितानुपपत्तिस्तु यत्र वाक्यावगतार्थोऽनुपपन्नत्वेन ज्ञातः सन्नर्थान्तरं कल्पयति तत्र द्रष्टव्या । यथा स्वर्गकामो ज्योतिष्टोमेन यजेतेत्यत्र स्वर्गसाधनत्वस्य क्षणिकतयावगतस्य ज्योतिष्टोमस्यानुपपत्त्या मध्यवर्त्यपूर्व्वं कल्प्यते ।

न चेयमर्थापत्तिरनुमानेऽन्तर्भवितुमर्हति अन्वयव्याप्त्यज्ञानेनान्वयित्वमन्तर्भावात् । व्यतिरेकिणश्चानुमा-

which consists in the relation between the act of closing and its object the door, cannot be saved from contradiction, except by (the surmisal of) a word signifying the act of closing, is possible even in the case objected to.

Presumption, dealing with the contradiction (that otherwise results) as to the expressed meaning of the sentence, may be shown in a case where the direct meaning of a sentence, being felt to involve a contradiction, leads us to surmise some further meaning. Thus, in "Let the man desirous of heaven sacrifice with the jyotishṭoma," a transcendental power (attaching to the sacrifice and) intermediate (between the sacrificial act and the reward) is surmised, because of the contradiction otherwise resulting with regard to the jyotishṭoma directly mentioned (in the text), in that this sacrifice, as a means to heaven, is transitory.

Presumption is not to be placed under the deductive process: for, since (in it) there is no (previous) knowledge of a universal affirmative concomitance,* it cannot fall under an affirmative deduction; and the (so-called) negative deduction† has already

* The surmisal of night-eating, for instance, cannot be based on a universal affirmative, e. g. "where fatness, there night-eating," for this induction itself is unestablished.

† See Pandit, Vol. V., pp. 624, note, et seq.

The Śástradípiká (Tarkapáda) distinguishes arthápatti, as a conditional form of reasoning, from the categorical anumána by show-

Digitized by Google

त्वं प्रागेव निरस्तम् । अत एवा-र्थापत्तिस्थलेऽनुमिनोमीति नानुव्यव-सायः किन्त्वनेनेदं कल्पयामीति ।

नन्वर्थापत्तिस्थले इदमनेन विना-नुपपन्नमिति ज्ञानं करणमित्युक्तं तत्र किमिदं तेन विनानुपपन्नत्वं तद-भावव्यापकाभावप्रतियोगित्वमिति ब्रूमः ।

एवमर्थापत्तेर्मानान्तरत्वसिद्धेः

been excluded by us from deduction. Moreover in a case of presumption the resulting consciousness* is not in the form, *I infer*, but in the form, *I surmise this* (idam) *by means of this* (anena).

An objector now raises a question:—you have declared that, in a case of presumption, the instrument is the knowledge that a something cannot be established except through something else. What is this *not being established save through something else?* We reply † that it consists in *having a counterentity whose absence invariably accompanies the absence of that* (sc. the upapádaka, night-eating.)

Thus, since presumption has been proved to be a distinct source of knowledge, the (so-called)

ing that in the former, the gamaka (probans. sc. night-eating) is sandigdha, and in the latter, niśchita (sc. smoke).

* The question as to processes of knowledge being identical or different *inter se* must be decided, finally, by an appeal to our resulting consciousness in regard to them. cf. Bhâṭṭachintâmaṇi (Pandit, Old Series, Vol. V., p. 299)—वस्तुतस्तु नानुमिनोमि नोपमिनोमि न शाब्दयामि किन्त्वर्थापत्त्या कल्पयामीत्यनुभवादेव मानान्तरत्वं युक्तम् । For anuvyavasáya, see Cowell's Kusumáñjali. p. 59 n. It may be worth while adding that the Vedánta proper explains anuvyavasáya as the illumination of the vṛitti (or mental modification in the form of the jar) by the impersonal, unmodified Self, Kúṭastha, which as subject, never as object, is present in personal consciousness. Anuvyavasáya of the other systems finds its technical equivalent in the Vedántic sákshirúpajñána (self-consciousness?). For a fuller view, see opening verses of the Kúṭasthadípa of Pañcadaśí.

† sc. Where there is absence of night-eating, there is absence of fatness.

व्यतिरेकि नानुमानान्तरं पृथिवीतरेभ्यो भिद्यते इत्यादौ गन्धवत्त्वमितरभेदं विनानुपपन्नमित्यादिज्ञानस्य करणत्वाद् अत एवानुव्यवसायः पृथिव्यामितरभेदं कल्पयामीति ।

इति परिभाषायामर्थापत्तिपरिच्छेदः ।

negative deduction (of the Nyáya) is not a distinct kind of inference; for the means of arriving at such a conclusion as "the element earth is distinct from the other elements" is the knowledge that the possession of the attribute, smell, cannot be established except through (a knowledge of) the difference (of earth) from the other elements. Moreover, our resulting consciousness is expressed by "we surmise in earth a difference from the other elements."

इदानीं षष्ठं प्रमाणं निरूप्यते ।

ज्ञानकरणाजन्याभावानुभवासाधारणकारणमनुपलब्धिरूपं प्रमाणम् ।

अनुमानादिजन्यातीन्द्रियाभावानुभवहेतावनुमानादावतिव्याप्तिवारणायाजन्यान्तम् ।

अदृष्टादौ साधारणकारणेऽतिव्याप्तिवारणायासाधारणेति ।

The sixth source of correct knowledge is now expounded. Non-perception as a source of evidence is the special (i. e. instrumental) cause of an immediate consciousness of non-existence, (which consciousness is) not effected through knowledge as its special cause.

"Not effected through knowledge" is inserted to prevent the too extensive application (of the definition) to the inferential process and to the other sources of evidence, which are causes of a knowledge of supersensuous non-existence (such knowledge being) effected through the inferential process and the rest.

"Special cause" is inserted to prevent the too extensive application (of the definition) to a general (i. e. non-special) cause such as the unseen power of works and the rest *

* The ádi embraces the eight, íśvara, íśvarecchá, íśvarajñána, íśvarakṛiti, deśa, kála, prágabháva, pratibandhakábháva, or general causes.

ऽभावस्मृत्यसाधारणहेतुसंस्कारेऽतिव्याप्तिवारणायानुभवेति विशेषणम् ।

न चातीन्द्रियाभावानुमितिस्थलेऽप्यनुपलब्धेरेवाभावो गृह्यतां विशेषाभावादिति वाच्यं धर्म्माधर्म्माद्यनुपलब्धिसत्त्वेऽपि तदभावानिश्चयेन योग्यानुपलब्धेरेवाभावग्राहकत्वात् ।

ननु केयं योग्यानुपलब्धिः किं योग्यस्य प्रतियोगिनोऽनुपलब्धिः उत योग्येऽधिकरणे प्रतियोगिनोऽनुपलब्धिः । नाद्यः स्तम्भे पिशाचभेद-

The qualification "immediate consciousness" is added to prevent the too extensive application of the definition to a mental retentum, which is the special cause of the recollection of a non-existence.

Nor must it be argued that because there is no difference (between non-existence known through the inferential process, &c., and non-existence known through non-perception), the non-existence, even in a case where supersensuous non-existence is inferred, must be known through non-perception all the same. For valid non-perception (we reply) is the only source of (our immediate consciousness of) non-existence; since, even though there is (for us) a non-perception of merit demerit, &c. * there is (for us) no immediate consciousness of their non-existence.

It may be asked—What is this valid non-perception? Is it the non-perception of a counterentity † (which is itself a) proper (object of immediate consciousness)? Or is it the non-perception of a counterentity in a substrate (which is a) proper (object of immediate consciousness)? Not the former; for it would then result, faultily, that the non-existence of a goblin in a post was not an object of immediate consciousness ‡ Nor

* The ádi stands for samskára.

† Ghaṭa, it will be remembered, is the pratiyogi (counterentity) of ghaṭábháva.

‡ The goblin is (admittedly) not a yogyapratiyogi, as he

स्याप्रत्यक्षत्वापत्तेः । नान्त्य आत्मनि धर्म्माद्यभावस्यापि प्रत्यक्षत्वापत्तेरिति चेन्न योग्या चासावनुपलब्धिश्चेति कर्म्मधारयाश्रयणात् ।

अनुपलब्धेर्योग्यता च तर्कितप्रतियोगिसत्त्वप्रसञ्जनप्रसञ्जितप्रतियोगिकत्वम् ।

the latter; for then it would result, faultily, that the non-existence of merit, &c., in the self was an object of immediate consciousness * The above objection we meet with a negative, because we regard *yogyánupalabdhis* as a karmadháraya compound, thus:—*yogyá cha asau anupalabdhiścha.*

And the validity of non-perception consists in (the non-perception) having as its counter-entity (a perception), which can be (legitimately) surmised through the surmisal of the existence of that counterentity (whose absence is perceived) †

cannot be immediately cognised. According to the first alternative, therefore, an immediate knowledge of his non-existence (through non-perception of him) is impossible. But as a matter of fact his non-existence is immediately perceived: therefore the first alternative must be set aside.

* Átmá is admittedly an object of immediate cognition and therefore answers to the yogyádhikaraṇa of the second alternative: This too must be set aside, because the opinion of all the darśanas is that merit, &c., (and the abháva of these) are not objects of immediate consciousness.

† The reader may be glad of an example to explain the Nyáya form of the definition in the text. For ordinary men the simple assurance—अस्मिन् स्फीतालोकवति भूतले यदि घटः स्यात् तर्हि घटोपलब्धिः स्यात्—suffices, but not for the Naiyáyika. Again, dissatisfied with our simple "we see no ghaṭa," he expresses the same fact in घटोपलब्ध्यभावोऽस्ति· And so in reference to the validity (yogyatá) of non-perception, the text declares that the validity consists in this घटोपलब्ध्यभाव having a particular kind of प्रतियोगि—sc. "* * * * * * प्रसञ्जितप्रतियोगिकत्वम्." In limine, therefore, we are bound to remember that of घटोपलब्ध्यभाव the प्रतियोगि is घटोपलब्धि. This घटोपलब्धि, the text continues, must be such that it can be rightly surmised as dependent on the surmisal of something else: and this, be it remarked, is precisely what the unsophisticated mean by their

यस्याभावो गृह्यते तस्य यः प्रतियोगी तस्य सत्त्वेनाधिकरणे तर्कितेन प्रसञ्जनयोग्यमापादनयोग्यं प्रतियोग्युपलब्धिस्वरूपं यस्यानुपलम्भस्य तत्त्वं तदनुपलब्धेर्योग्यत्वमित्यर्थः ।

तथाहि स्फीतालोकवति भूतले यदि घटः स्यात्तदा घटोपलम्भः स्यादित्यापादनसम्भवात् तादृशभूतले घटाभावोऽनुपलब्धिगम्यः । अन्धकारे तु तादृशापादनाभावान्नानुपलब्धिगम्यता ।

अत एव स्तम्भे तादात्म्येन पिशाच-

(The compound in the text) is to be explained thus :—*yasyá bhávo grihyate,* (of something the non-existence is cognised), *tasya yah pratiyogí,* (of this non-existence that something is the counterentity),—*tasya sattvena,* (through the existence of this counterentity),—*adhikarane tarkitena* (surmised in a substrate) ;—*prasañjanayogyam* (fit to be surmised),—*pratiyogi* (a counterentity),—*upalabdhisvarúpam* (consisting of a perception) ; *yasyánupalambhasya,* (of what non-perception),—*tattvam,* (this is the essential character),–*tadanupalabdheryogyatá,* (constitutes the validity of that non-perception).

That is to say, that since such a surmisal is possible as that if a jar were standing on a spot of ground well provided with light, it would be perceived, the non-existence of the jar in such a spot must be known through non-perception (of the jar) ; but that since we cannot thus surmise (regarding a jar standing) in the dark, the (non-existence of the jar) cannot be known through non-perception.

Moreover, the goblin's non-existence must be known through non-perception, for, if he were identical with the post, there would

"तर्हि घटोपलब्धिः स्यात्." This further surmisal is (the text says) the surmisal of a प्रतियोगि in a substrate. We here recall घट as the प्रतियोगि of the घटाभाव under consideration, and find that nothing more is meant than our original assurance—" "यदि घटः स्यात्" In the long compound "तर्कित * * * * प्रतियोगिकत्वम्", the first प्रतियोगि stands for घट, and the second for घटोपलब्धि of the example.

Digitized by Google

सत्त्वे सम्भवत् प्रत्यक्षत्वापत्त्या तदभावोऽनुपलब्धिगम्यः। आत्मनि धर्माधर्मादिसत्त्वेऽप्यस्यातीन्द्रियतया निरुक्तोपलम्भापादनासम्भवाच्च धर्माद्यभावस्यानुपलब्धिगम्यत्वम्।

ननूक्तरीत्याधिकरणेन्द्रियसन्निकर्षस्थलेऽभावस्यानुपलब्धिगम्यत्वं तवानुमतं तत्र क्लृप्तेन्द्रियमेवाभावाकारवृत्तावपि करणमिन्द्रियान्वयव्यतिरेकानुविधानादिति चेन्न।

प्रतियोग्यनुपलब्धेरप्यभावग्रहहेतुत्वेन क्लृप्तत्वेन करणत्वमात्रस्य कल्पनात्। इन्द्रियस्य चाभावेन समं सन्निकर्षाभावेनाभावग्रहाहेतुत्वात्

be an immediate cognition of him as of the post. And the non-existence of merit, demerit, &c., cannot be known through non-perception, since the surmisal of an immediate cognition of these as explained above is impossible; for even if merit, &c., exist in the Self they are supersensuous objects.

An objection is now stated in the form of a doubt :—according to the process described above, you (the Vedántin) hold that, in a case of contact of the sense-organ with the substrate (sc. locality from which an object is absent), the non-existence (of the object) is known through non-perception. But, in such a case, the instrumental cause of the mental modification (which has taken) the form of non-existence is the sense-organ surmised (above); for the presence or absence of the sense-organ is found to accompany (the presence or absence of the said mental modification).

To the above objection we say no. Because we assume non-perception of the counterentity (sc. of a jar) as the only instrumental cause, in that its causality in regard to a knowledge of non-existence is surmised (by you as by us Vedántins) * And because the fallacy of false cause obtains in regard to the presence and absence of the sense-organ, since these hold good only with reference to a knowledge of the locality &c; for a sense-organ cannot be the cause of a know-

* The Nyáya admits anupalabdhi as a concurrent cause.

इन्द्रियान्वयव्यतिरेकयोरधिकरणज्ञानाद्युपक्षीणत्वेनान्यथासिद्धेः ।

ननु भूतले घटो नेत्याद्यभावानुभवस्थले भूतलांशे प्रत्यक्षत्वमुभयवादिसिद्धमिति तत्र वृत्तिनिर्गमनस्यावश्यकत्वेन भूतलावच्छिन्नचैतन्यवत् तन्निष्ठघटाभावावच्छिन्नस्यापि प्रमात्रभिन्नतया घटाभावस्य प्रत्यक्षतैव सिद्धान्तेऽपीति चेत् ।

सत्यम् । अभावप्रतीतेः प्रत्यक्षत्वेऽपि तत्करणस्याऽनुपलब्धेर्म्मानान्तरत्वात् । नहि फलीभूतज्ञानस्य प्रत्यक्षत्वे तत्करणस्य प्रत्यक्षप्रमाणतानियतत्वमस्ति । दशमस्त्वमसीत्यादिवाक्यजन्यज्ञानस्य प्रत्यक्षत्वेऽपि तत्करणस्य वाक्यस्य प्रत्यक्षप्रमाणभिन्नप्रमाणत्वाभ्युपगमात् ।

ledge of non-existence, since there can be no contact of a sense-organ with non-existence.

It may be objected that in a case of immediate consiousness such as "a jar does not exist on this spot of ground" both disputants admit a perception of the locality: that, therefore, according to the Vedantic tenet also there must be an immediate consciousness of the non-existence of the jar, because the Intelligence also, confined to the non-existence of the jar (which non-existence) resides in the spot of ground (tat), becomes identical with the cogniser, as does the Intelligence confined to the spot of ground, because of the necessity (admitted by all) of a sally forth of a mental modification to the spot of ground.

Suppose it so, we reply; for even though the knowledge of (such) non-existence is immediate, the instrumental cause of this knowledge, i. e. non-perception, is a distinct source of evidence. Nor is there any restrictive rule that when the resultant knowledge is perceptional the instrumental cause of this knowledge must be the (special) source of evidence (known as) perception. For though the knowledge effected through such a sentence as "thou art the tenth man" is perceptional *, the sentence, which is the instrumental cause of this knowledge, is held to be a special source of evidence (sc. śábdapramáṇa) distinct from that known as perception (pratyakshapramáṇa).

* cf. Paudit, Vol. IV. p. 347 et seq.

ननु फलवैजात्यं विना कथं प्रमाणवैजात्यमिति चेन्न वृत्तिवैजात्यमात्रेण प्रमाणवैजात्योपपत्तेः। तथा च घटाभावाकारवृत्तिर्नेन्द्रियजन्या इन्द्रियस्य विषयेणासन्निकर्षात् किन्तु घटानुपलब्धिरूपमानान्तरजन्येति भवत्यनुपलब्धेर्मानान्तरत्वम्।

नन्वनुपलब्धिरूपमानान्तरपक्षेऽभावप्रतीतेः प्रत्यक्षत्वे घटवति घटाभावभ्रमस्यापि प्रत्यक्षत्वापत्तौ तत्राप्यनिर्वचनीयघटाभावोऽभ्युपगम्येत। न चेष्टापत्तिः तस्य मायोपादानकत्वेऽभावत्वानुपपत्तेः। मा-

Here it may be objected that diversity in the sources of evidence is impossible without diversity in the resultant knowledge. Not so, we reply, for diversity in the sources of evidence depends entirely on diversity of the mental modifications. And thus the mental modification in the form of the non-existence of the jar is not effected through a sense-organ, for (in this case) there is no contact of sense-organ and object; but through a distinct source of knowledge, viz. non-perception of the jar. Non-perception, therefore, is a distinct source of evidence.

The following objection is taken by an opponent. Since, according to your view of non-perception as a distinct source of knowledge, the knowledge of non-existence is perceptional, it turns out that the misapprehension regarding the non-existence of a jar in a locality where a jar really stands is also perceptional. In this case too the non-existence of the jar must be held to be (what you Vedantins term) an *apparently existent* (object). And this conclusion is against you. For, if that erroneously surmised non-existence of a jar (tasya) has Máyá as its material cause, then its non-entitative character (as being erroneous non-existence) cannot be maintained (since as a product of Máyá, it must be held to possess a *relatively real*, vyávahárika, character). If it has not Máyá as its material cause, then you cannot

योपादानकत्वाभावे मायायाः सकल-
कार्य्योपादानत्वानुपपत्तिरिति चेन्न ।

घटवति घटाभावभ्रमो न तत्का-
लोत्पन्नघटाभावविषयकः किन्तु भूत-
लरूपादौ विद्यमानो लौकिको घटा-
भावो भूतले आरोप्यते इति अन्य-
थाख्यातिरेव आरोप्यसन्निकर्षस्थले
सर्वत्रान्यथाख्यातेरेव व्यवस्थापनात् ।

अस्तु वा प्रतियोगिमति तदभा-
वभ्रमस्थले तदभावस्यानिर्व्वचनी-
यत्वं तथापि तदुपादानं मायैव
नह्युपादानोपादेययोरत्यन्तसाजात्यं

maintain (as you Vedántins do) that Máyá is the material cause of all products.

The above objection we meet with a negative. The misapprehension under notice is not concerned with the non-existence of a jar (the non-existence being "*apparent*," prátibhásikí and) produced at the time of misapprehension; but the non-existence of the jar (which non-existence is), observed in the colour and other qualities of the spot of ground and (which is) a "practically existent" (or "relatively real") thing, is falsely surmised to exist in the spot of ground. Thus this is merely a case of the misapprehension (technically known as) anyathákhyáti; * for this (technical) misapprehension is declared to occur in all cases where there is contact (of a sense-organ) with the thing which is mistaken for something else. †

Or, again, let us grant that, in the case of the misapprehension noted above, the non-existence is an "apparently existent" thing: still its material cause is indeed Máyá. For a material cause and its product are not absolutely homogeneous, since the thread and the canvass are heterogeneous, so far as the

* cf. Paudit, Vol. IV. pp. 560—61. n.

† No contact of sense-organ with an "abháva" is possible. Yet, in the present case, the use of the term "sannikarsha" (= vicinity) is admissible, since the "ghaṭábháva" exists in the colour and other qualities of the spot of ground, which are in real contact with a sense-organ.

तन्तुपटयोरपि तन्तुत्वपटत्वादिना वैजात्याद् यत्किञ्चित्साजात्यस्य मायाया अनिर्व्वचनीयघटाभावस्य च मिथ्यात्वधर्मस्य विद्यमानत्वात् । अन्यथा व्यावहारिकं घटाभावं प्रति कथं मायोपादानमिति कुतो नाशङ्कथाः ।

न च विजातीययोरप्युपादानोपादेयभावे ब्रह्मैव जगदुपादानं स्यादिति वाच्यं प्रपञ्चभ्रमाधिष्ठानत्वरूपस्य तस्येष्टत्वात् परिणामित्वरूपस्योपादानत्वस्य निरवयवब्रह्मण्यनुपपत्तेः । तथा च प्रपञ्चस्य परिणाम्युपादानं माया न ब्रह्मेति सिद्धान्त इत्यलमतिप्रपञ्चेन ।

स चाभावश्चतुर्विधः प्रागभावः प्रध्वंसोऽत्यन्ताभावोऽन्योन्याभावश्चेति ।

मृत्पिण्डादौ कारणे कार्यस्य घटादेरुत्पत्तेः पूर्व्वं योऽभावः स प्रागभावः स च भविष्यतीतिप्रतीतिविषयः ।

one possesses the nature of thread and the other that of canvass. And because we are conscious of a partial homogeneity (consisting in) the attribute of falsity which attaches to Máyá and to the non-existence of the jar, an "apparently existent" thing. Otherwise (that is, if you hold that cause and effect are absolutely homogeneous), why do you not take exception to Máyá being the material cause of a "practically existent" non-existence of a jar?

Nor must it be maintained that if of two heterogeneous things the one may be a material cause and the other a material effect, then Brahma itself may be the material cause of the phenomenal world. For Brahma, admittedly is the material cause, so far as it is the substrate of the misapprehension which has the world as its object; because the being a material cause, so far as this consists of the cause being materially modified into its effect, is not possible of Brahma, which is without parts. Thus the settled tenet of the Vedánta is that Máyá, not Brahma, is the material cause of the world and itself undergoes material modifications. And on this point we need say no more.

Non-existence is of four kinds: *antecedent*, *emergent*, *absolute* and *reciprocal*.

Antecedent is the non-existence in the cause sc. the lump of clay, of the effect sc. a jar, previous to its production. It is expressed in the knowledge *a thing will be.*

Digitized by Google

तत्रैव घटस्य मुद्गरप्रहारानन्तरं योऽभावः स प्रध्वंसो ध्वंसस्यापि स्वाधिकरणकपालनाशे नाश एव । न च घटोन्मज्जनापत्तिर्घटध्वंसध्वंसस्यापि घटप्रतियोगिकध्वंसत्वाद् अन्यथा प्रागभावध्वंसात्मकघटस्य विनाशे प्रागभावोन्मज्जनापत्तिः ।

नचैवमपि यत्र ध्वंसाधिकरणं नित्यं तत्र कथं ध्वंसनाश इति वाच्यं तादृशमधिकरणं यदि चैतन्यव्यतिरिक्तं तदा तस्य नित्यत्वमसिद्धं ब्रह्मव्यतिरिक्तस्य सर्वस्य ब्रह्मज्ञाननिवर्त्यताया वक्ष्यमाणत्वाद् । यदि च ध्वंसाधिकरणं चैतन्यं तदाऽसिद्धिः।

Emergent is the non-existence of the jar consequent on its destruction by a pestle. Of this non-existence also * there is an end in the destruction of the parts, which compose the jar. Nor does it follow from this that the jar will again come into existence; for the non-existence of the non-existence of the jar is indeed the non-existence which has the jar as its counterentity † Otherwise the "antecedent" non-existence of a jar would reappear on the destruction of the jar, which is the negation of that "antecedent" non-existence.

Nor can you ask by way of objection how there can be, even if this is so, an end to "emergent" non-existence, in a case where the substrate of the non-existence is eternal. For if such a substrate be something distinct from Intelligence, then its eternalness is not proven; since everything different from Brahma can be negated, as we shall show, by a knowledge of Brahma. And if Intelligence is the substrate of such non-existence, then your point as to the substrate is not proven; for the negation, which has an erroneously surmised object as its counterentity, and which

* The Nyáya maintains that "emergent" non-existence has no end.

† When the jar has been destroyed the ghaṭadhvamsa is expressed in the consciousness "the jar does not exist," and has the ghaṭa as its pratiyogí. Again, when the parts of the jar have been destroyed, i.e. in the case of ghaṭadhvamsadhvamsa, the consciousness, "the jar does not exist," remains unchanged. Therefore these two non-existences are identical as regards our consciousness of them.

Digitized by Google

आरोपितप्रतियोगिकध्वंसस्याधिष्ठाने प्रतीयमानस्याधिष्ठानमात्रत्वात् । तदुक्तम् । अधिष्ठानावशेषो हि नाशः कल्पितवस्तुन इति । एवं शुक्तिरूप्यविनाशोऽपि इदमवच्छिन्नचैतन्यमेव ।

यत्राधिकरणे यस्य कालत्रयेऽप्यभावः सोऽत्यन्ताभावः । यथा वायौ रूपात्यन्ताभावः सोऽपि वियदादिवद्ध्वंसप्रतियोग्येव ।

इदमिदं नेति प्रतीतिविषयोऽन्योन्याभावः । अयमेव विभागो भेदः पृथक्त्वं चेति व्यवह्रियते भेदातिरिक्तपृथक्त्वादौ प्रमाणाभावात् । अयं चान्योन्याभावोऽधिकरणस्य सादित्वे सादिः । यथा घटे पटभेदः । अधिकरणस्यानादित्वे अनादिरेव । यथा जीवे ब्रह्मभेदः ब्रह्मणि वा जीवभेदः । द्विविधोऽपि भेदो ध्वंसप्रति-

is perceived in the substrate, is merely the substrate itself. This has been declared thus:—"Negation of an erroneously surmised object leaves behind nothing but the substrate (of the erroneous surmisal)." Thus the negation of silver erroneously surmised in mother o'pearl is nothing but the Intelligence confined to (the object represented by) "this" (in "this is silver").

"Absolute" is the non-existence of something in a substrate through trinal time. Thus there is an "absolute" non-existence of colour in air. Such existence also is non-eternal, like ákáśa and other products.

"Reciprocal" non-existence is expressed in the consciousness "this is not that." This non-existence corresponds practically to "disjunction," "difference" and "individuality" (of the Nyáya). For there is no proof that individuality and disjunction are distinct from difference (i. e. reciprocal non-existence). * Reciprocal non-existence has a beginning when its substrate has a beginning. Thus the non-existence of a piece of canvass in a jar has a beginning. It is without a beginning when its substrate is without a beginning. Thus the non-existence of Brahma in the personal sentiency is without beginning, and so too the non-existence of the personal sentiency in Brahma. † Both

* For the Nyáya view, see Siddh-Muktáv, under káriká 113 et seq.

† The Vedánta maintains six beginning-less things. See

योग्येव ह्यविद्यानिवृत्तौ तत्परतन्त्राणां निवृत्त्यवश्यम्भावात् ।

kinds of reciprocal non-existence have an end ; for when Nescience has ceased all products dependent on it must of necessity cease.

पुनरपि भेदो द्विविधः सोपाधिको निरुपाधिकश्चेति । तत्रोपाधिसत्ताव्याप्यसत्ताकत्वं सोपाधिकत्वं तच्छून्यत्वं निरुपाधिकत्वम् । तत्राद्यो यथा एकस्यैवाकाशस्य घटाद्युपाधिभेदेन भेदः । यथा वा एकस्य सूर्यस्य जलभाजनभेदेन भेदः । तथा चैकस्यैव ब्रह्मणोऽन्तःकरणभेदाद्भेदः । निरुपाधिकभेदो यथा घटे पटभेदः ।

Again, reciprocal non-existence is twofold so far as it is dependent on a limiting condition or independent of such. The former kind is that whose existence is pervaded by the existence of a limiting condition.* The latter kind is that which is destitute of such an existence. Thus the differentiation of ákáśa, in its own nature undifferenced, through the differences of its limiting conditions, sc. jars and the like, is an example of the former kind: or of the sun through the water-vessels (which are its limiting conditions when the sun is reflected in their water). And so too is the differentiation of Brahma, in its own nature undifferenced, by means of the differences in the internal organs (which are its limiting conditions). The non-existence (difference) of a piece of canvass in a jar is an example of the second kind.

न च ब्रह्मण्यपि प्रपञ्चभेदाभ्युपगमेऽद्वैतविरोधः तात्त्विकभेदानभ्युपगमेन वियदादिवदद्वैताव्याघातात् प्रपञ्चस्याद्वैते ब्रह्मणि कल्पितत्वा-

Nor is Vedántic monism overthrown by admitting a differentiation of the phenomenal in Brahma ; for monism is not contradicted, as we do not hold that the differentiation is real in this case any more than in that of ákáśa and the rest (described above); for the phenomenal world, we main-

Hall's Rational Refutation, p. 35 note: and Gough's Philosophy of the Upanishads, p. 57.

* Thus, wherever there is differentiation of ákáśa there is existence of a limiting condition, sc, a jar.

ङ्गीकारात् । तदुक्तं सुरेश्वराचार्य्यैः । अहमा भवतः केयं साधकत्वप्रकल्पने । किं न पश्यसि संसारं तत्रैवाज्ञानकल्पितमिति ।

अत एव विवरणेऽविद्यानुमाने प्रागभावव्यतिरिक्तत्वविशेषणं तत्त्वप्रदीपिकायामविद्यालक्षणे भावत्वविशेषणं च सङ्गच्छते ।

एवं चतुर्विधानामभावानां योग्यानुपलब्ध्या प्रतीतिस्तेनानुपलब्धिर्मानान्तरम् ।

एवमुक्तानां प्रमाणानां प्रामाण्यं स्वत एव उत्पद्यते ज्ञायते च तथा

tain, is erroneously surmised in Brahma, one without a second. Thus Sureśváchárya has declared :—"What is this impatience of yours of the assumption of (Máyá as) a cause (of the world). Can you not see that the world is erroneously surmised through Nescience in Brahma (tatra)?"

Hence too * the qualification, in the deduction of Nescience (set forth) in the Vivaraṇa, to the effect that Nescience is something different from the antecedent non-existence (of knowledge), harmonises with the qualification in the definition of Nescience given in the Tattvapradípiká † to the effect that Nescience is something positive.

Thus there is a knowledge of four kinds of non-existence through valid non-perception: and for this reason non-perception is a distinct source of evidence.

The authoritativeness of the sources of evidence described above is self-produced and self-known. Authoritativeness is

* अत एव is thus explained in the Vedántaśikhámaṇi: ननु नृसिंहाश्रमपीचरणैः प्रागभावस्य निराकृतत्वात्तदङ्गीकरणं सिद्धान्तविरुद्धमित्याशङ्क्य तदङ्गीकार एव सिद्धान्तानुरोधी विवरणादौ तदभ्युपगमादित्याह अत एवेति । The Vivaraṇa of the text is the Pañcapádikávivaraṇa by Prakáśátma Yati. I extract the following from a MS. kindly lent by Dr. G. Thibaut—18, fol. vers. वृत्त्युपपत्तिसहितमज्ञानप्रत्यक्षं भावरूपमेवात्मन्यज्ञानं गमयतीति सिद्धम् । अनुमानमपि विवादगोचरापन्नं प्रमाणज्ञानं स्वप्रागभावव्यतिरिक्तस्वविषयावरणस्वनिवर्त्यस्वदेशगतवस्त्वन्तरपूर्व्वकं भवितुमर्हति अप्रकाशितार्थप्रकाशकत्वाद् अन्धकारे प्रथमोत्पन्नप्रदीपप्रभावदिति ततश्च ज्ञानेन समानाश्रयविषयं भावरूपमज्ञानं सिद्धम् ।

† See Citsukhí, Pandit, Vol. IV p 522. śl. 13 et seq.

हि स्मृत्यनुभवसाधारणं संवादिप्रवृत्त्यनुकूलं तद्वति तत्प्रकारकज्ञानत्वं प्रामाण्यं तच्च ज्ञानसामान्यसामग्रीप्रयोज्यं नत्वधिकं गुणमपेक्षते प्रमामात्रेऽनुगतगुणाभावात् ।

नापि प्रत्यक्षप्रमायां भूयोऽवयवेन्द्रियसन्निकर्षः रूपादिप्रत्यक्षे आत्मप्रत्यक्षे च तदभावात् सत्यपि तस्मिन् पीतः शङ्ख इति प्रत्यक्षस्य भ्रमत्वाच्च ।

found both in recollection * and in immediately presented knowledge; is productive of fruitful action † (and) is the knowledge, whose predicate is the something (that really occurs) in a subject possessed of this something. ‡ Authoritativeness is effected through the ordinary instruments of knowledge, but does not need any additional means; since no (such essential) attribute is found to pervade authoritative knowledge, *per se.*

Nor, in the case of authoritative knowledge through perception, (can you maintain that) contact of sense-organs with the parts (of the object perceived) is an additional requisite; for such contact does not occur when colour, § &c., and the self are perceived (these being without parts); and because even when such contact does occur the perception is (sometimes) erroneous, as in the case of the (white) shell perceived as yellow.

---

* "The Púrva Mímámsá denies that recollection is right knowledge." Sarvadarśanasangraha (Trübner's Oriental Series) p. 197. n. 3, Cowell.

† i. e. of such action as secures the desired object.

‡ Every judgment (jñána) consists of two portions:—(a) the viśeshaṇa, prakára or pratiyogi, i. e. the adjective, predicate or determinent portion: (b) the viśeshya or anuyogí, i. e. the subject or qualified portion. Bahuvrihi compounds ending in *prakáraka* and *viśeshyaka* always refer to *jñána* expressed or implied, and mean that the judgment has the preceding words of the compound either as its predicate or subject. Applying the definition in the text to the judgment, ghaṭavad bhútalam for example:—tadvati = ghaṭavati (sc. bhútale) tatprakára = ghaṭaprakára.

§ Adi = rasa, sparśa, gandha.

अत एव न सल्लिङ्गपरामर्शादिकमपि अनुमित्यादिप्रमायां गुणः असल्लिङ्गपरामर्शादिस्थलेऽपि विषयाबाधेनानुमित्यादेः प्रमात्वात् ।

न चैवमप्रमापि प्रमा स्यात् ज्ञानसामान्यसामग्र्यविशेषादिति वाच्यं दोषाभावस्यापि हेतुत्वाङ्गीकारात् ।

न चैवं परतस्त्वमागन्तुकभावकारणापेक्षायामेव परतस्त्वात् ।

ज्ञायते च प्रामाण्यं स्वतः स्वतोग्राह्यत्वञ्च दोषाभावे सति यावत्स्वाश्रयग्राहकसामग्रीग्राह्यत्वम् । स्वा-

Moreover, in the case of inferential authoritative knowledge, a valid "mediate judgment" is not an additional requisite *, for even in a case where the mediate judgment is invalid the inference is authoritative, when the object of (the inference) is not proved to be false. †

Nor must you object that, this being so, invalid knowledge would become valid, since in both cases, equally, the ordinary instruments of knowledge are present: for we admit absence of defect also as a cause (of authoritative knowledge).

Again, you must not argue that, if this is so, authoritative knowledge is dependent on something other than itself; for dependence on another, is, (we hold,) constituted by the necessity of an external, positive cause (and not by that of a mere negation, abháva).

Authoritativeness is self-known. And the being self-known consists in the being known by all those means, ‡ which are the cogniser of its own substrate, while at the same time defects are absent. Its own substrate is knowledge in the form of a mental modification. The cog-

* cf. Pandit, Vol. V. p. 620.

† The argument of the text is, apparently, that though the premises may be invalid a materially true conclusion will sometimes result. Hence the pramátva, as defined above, of the conclusion (anumiti) does not depend on the truth or falsity of the premises. An argument based on a confusion of formal and material truth.

‡ Gráhaka and Sámagrí are in apposition, and refer to the Sákshí.

अयो वृत्तिज्ञानं तद्ग्राहकं साक्षिज्ञानं तेनापि वृत्तिज्ञाने गृह्यमाणे तद्गतं प्रामाण्यमपि गृह्यते ।

न चैवं प्रामाण्यसंशयानुपपत्तिः तत्र संशयानुरोधेन दोषस्यापि सत्त्वेन दोषाभावघटितस्वाश्रयग्राहकाभावेन प्रामाण्यस्यैवाग्रहात् । यद्वा यावत्स्वाश्रयग्राहकग्राह्यत्वयोग्यत्वं स्वतस्त्वं संशयस्थले प्रामाण्यस्योक्तयोग्यतासत्त्वेऽपि दोषवशेनाग्रहात् न संशयानुपपत्तिः ।

अप्रामाण्यन्तु न ज्ञानसामान्यसामग्रीप्रयोज्यं प्रमायामप्यप्रामाण्यापत्तेः किन्तु दोषप्रयोज्यम् । नाप्यप्रामाण्यं

niser of this (substrate) is Intelligence regarded as the witness. *. Authoritativeness, residing in the mental modification, is also cognised by the witness as is the mental modification.

Nor must you argue that, if this is so, doubt as to the validity of knowledge could not arise. For, in the case of doubt having arisen (we reply), the validity itself of the knowledge is not cognised; since in this case there is no *svâśrayagráhaka* (as above), possessed of an absence of defect, for the presence of a defect is attendant on (the rise of) a doubt. Again, taking the being self-known as the fitness to be known by all the cognisers of the mental modifications,—doubt is not impossible; for on an occasion of doubt, the authoritativeness is not cognised through the force of some defect, although the fitness (of prámáṇya) described above exists.

Non-authoritativeness however is not effected by the ordinary instruments of knowledge, since, if this were so, it would attach also to valid knowledge: but it is effected by some defect. Nor can it be cognised by the cogniser of the mental modification, †,

* Vṛittijñánam and Sákshijñánam are not tatpurusha compounds. The vṛitti or mental modification in the form of the object known is termed jñána. In the latter compound, jñánam is used as the common Vedántic synonym of Brahma. The Sákshí or Witness is Brahma regarded as Kúṭastha.

† Both pramátva and apramátva reside as qualities in jñána, the vṛittijñána, which is, therefore, termed, svâśráya. Apramátva is

यावत्स्वाश्रयप्रकारकत्वाद्यप्रामाण्यघटकतदभाववत्त्वादेर्वृत्तिज्ञानानुपनीतत्वेन साक्षिणा ग्रहीतुमशक्यत्वात् किन्तु विसंवादिप्रवृत्त्यादिलिङ्गकानुमित्यादिविषय इति परत एवाप्रामाण्यमुत्पद्यते ज्ञायते चेति ।

इति परिभाषायामनुपलब्धिपरिच्छेदः । (शेषमग्रे)

for since the abhávavattva and the rest, which go to make up non-authoritativeness, are not made known by the mental modification, they cannot be cognised by the Witness. But non-authoritativeness is known through inference, &c., which has as its middle term the unfruitful action, &c., (of the deluded man) * Thus non-authoritativeness is produced and known only through something else, †

A. V.

defined as tadabhávavati tatprakárakatvam: or (to take an example) ghaṭábhávavati (sc. bhútale) ghaṭaprakárakam jńánam apramátvam.

The ádi of the text includes tadábháva and tadabhávasambandha. These three, as mere negations, cannot be objects of a vṛittijńána; and therefore cannot be cognised by the Sákshí.

* The former ádi refers to jńána, icchá: the latter to all the remaining pramáṇas except pratyaksha.

† cf. Sarvadaráanasaṅgraha, Cowell, p. 196 et seq.

॥ श्रीः ॥

श्रौतपदार्थनिर्वचनम् ।

अथ पाशुकपदार्थानां नामान्युच्यन्ते ।

(*Continued from page* 244 Vol VII.)

२०८ अथ बर्हिः प्रासनादि करोति । अपरस्तः संमृज्य बर्हिर्वेदोऽध्वर्युः प्रयाजानिष्ट्वा आज्यभागाभ्यां प्रचर्य वारुणमेककपालं पूर्वार्धादपरार्धाच्चावदाय ऊर्ध्वं जुहोति । अवत्ते स्विष्टकृति स्रुवेण पञ्चाहुतीर्जुहोति । यद्देवा देवहेडनं देवासश्चकृमा वयम् । अग्निर्मा तस्मादेनसो विश्वान्मुञ्चत्वंहसः स्वाहा । यदिद्दिवाय० कमेना व० । वायुर्मा तस्मादेनसो विश्वान्मुञ्चत्वंहसः स्वाहा ।

Digitized by Google

यदि जाग्रदादि स्वाहा० वयम् । सूर्यो मा तस्मादेनसो० स: स्वाहा । अत्र क्रमेण अग्नये वायवे सूर्यायेति यथालिङ्गं यजमानस्य त्यागा: । यद्ग्रामे यदरण्ये यत्सभे । यच्छूद्रे यदर्य एनश्चकृमा वयम् । यदेकस्याधिधर्मणि तस्यावयजनमसि स्वाहा । प्रजापतय इदं न ममेति त्याग: । यदापो अघ्न्या वरुणेति शपामहे ततो वरुण नो मुञ्च स्वाहा । वरुणायेदं न ममेति त्याग: । एता: पञ्चाहुतय: सोमावभृथाहुतय इत्युच्यन्ते ॥

२०९ तत: स्विष्टकृदादि । अप: सकृत्संमृज्यापबर्हिषौ द्वावनुयाजौ यजति । समुद्रे ते० स्रुवं प्रतिष्ठाप्य अभिपूर्वं हुत्वा ऽवभृथं यजमानो ऽनुमन्त्रयते । अवभृथनिचुम्पुण निचेरुरसि निचुम्पुण । अव देवैर्देवकृतमेनोयाट् । अव मर्त्यैर्मर्त्यकृतम् । उरोरानोदेवरिषस्पाहि । अयमवभृथानुमन्त्रणमन्त्र इत्युच्यते ॥

२१० तत: सुमित्रा न आप ओषधय: सन्तु । दुर्मित्रास्तस्मै भूयासु: । योऽस्मान् द्वेष्टि । यं च वयं द्विष्म: । द्रुपदादिवेन्मुमुचान: । स्विन्न: स्नात्वी मलादिव । पूतं पवित्रेणेवाज्यम् । आप: शुन्धन्तु मैनस: । इति द्वाभ्यां मन्त्राभ्यामाप्लुत्य शालीनप्सु सम्प्रकीर्य अञ्जलिनोपसिच्य इमं विष्यामीति मन्त्रेण योक्त्रं विसृज्य अन्योन्यं धावयन्ति । ततोऽभिषेकादि । स्नात्वा प्रतिवसनीये वाससी परिधाय उद्वयन्तमसस्परि पश्यन्तोज्योतिरुत्तरम् । देवन्देवत्रासूर्यमगन्म ज्योतिरुत्तमम् इत्यादित्यमुपतिष्ठते । प्रतियुतो वरुणस्य पाश: । प्रत्यस्तो वरुणस्य पाश: । इति मन्त्रेणोदक्रान्तं प्रत्यस्यति । तत: प्रतिप्रस्थातरुन्नो नय । तिस्रस्तिस्र: समिध: कुर्वीत इत्यादि । अग्नेरन्ववारिषं रसेन समसृक्ष्महि ।

पयस्वां अग्न आगमन्तं मा संसृज वर्चसा । प्रजया च धनेन च । समावर्वर्त्ति पृथिवी । समुषाः समु सूर्यः । समु विश्वमिदं जगत् । वैश्वानरज्योतिर्भूयासम् । विभुं कामं व्यश्नवै । यतेकोक्यमन्त्रैराहवनीयमुपतिष्ठते । अध्वर्युः स्रुवाहुतिं जुहोति । भूः स्वाहा । अग्नय इदम्० इति त्यागः । व्रतविसर्गादि पुनरालम्भब्राह्मणतर्पणान्तं कृत्वा औपयजिके औत्तरवेदिके वाऽग्नौ उत्तरवेदिदक्षिणार्धे बर्हिरुपोषति । यत्कुसीदमित्यादिहोम औत्तरवेदिके वा । वाय्वादित्ययूपोपस्थानसमारोपणाभ्याधानपूर्णाहुतिवरदानञ्चेति । व्रतविसर्गादि पुनरालम्भवर्जं ब्राह्मणतर्पणान्ता सन्तिष्ठते चिपशुसौत्रामणी । तदानीमेव असंभवे श्वो वा विहृत्य महापितृयज्ञवदनुष्ठानं भवति । याः पुरस्तादित्यादि । महापितृयज्ञहविर्भिर्यक्ष्ये इति सङ्कल्पः । प्रजापते न त्वदेतानि यदन्तरिक्षं पृथिवीमुत द्यामित्युपस्थानान्तं करोति । अयं सौत्रामणीसम्बन्धिमहापितृयज्ञ इत्युच्यते ॥

२११ अथ प्रतिपदि ऐन्द्रपशुवत्सङ्कल्पप्रभृति । इन्द्राय वायोधसे पशुमालभते । नात्र समारोपः । सौत्रामणीचिपशुवेदिमुद्धास्य यूपं चोद्धास्य आहवनीयस्याग्रे द्वादशपदां वेदिं विमायोत्तरवेदिं शम्यामात्रीं प्रादेशमात्रीं योनिं च करोति । नात्र सौमिकी वेदिर्न चयनम् । ऋषभो दक्षिणा । पूर्णाहुत्यन्तं पुनरालम्भवर्जं ऐन्द्रं पशुं समापयति । अयं सौत्रामण्युत्तरार्धैन्द्रपशुरित्युच्यते ॥

२१२ तदनन्तरं पुनर्विहृत्य पूर्ववदादित्येष्टिं करोति । समानरं गां दक्षिणां ददाति । पुनरालम्भवर्जं ब्राह्मणतर्पणान्तं करोति । इयं सौत्रामण्युत्तरादित्येष्टिरिति गीयते ।

२१३ तदनन्तरं अग्नीन् समारोप्य स्वान्यन्यायतनानि समाप्य मथित्वा ऽग्नीन् विहृत्याग्निहोत्रं जुहोति । एतावता ग्रन्थेन कोकिलसौत्रामण्यां सम्बन्धियजमानब्रह्माध्वर्य्वाग्नीध्रप्रतिप्रस्थातृणां कर्माणि प्रतिपादितानि ।

अथ होतृमैत्रावरुणयोः कर्माश्वलायनसूत्रानुसारेण प्रोच्यते ॥

ऐन्द्रस्य पशोः पश्विष्ट्यादि सर्वं निरूढवद्भवति । आवाहनकाले होता आज्यभागदेवतावाहनानन्तरं इन्द्रमा३वह । वनस्पतिमा३वह । देवां आज्यपां इत्यादि प्रकृतिवत् । अध्रिगुप्रैषे मेधपतये मेधमित्यूहः । अध्रिगुप्रैषात्पूर्वमेव प्रयाजाः । आश्वलायनानुक्तत्वात् यजुर्वेदोक्तप्रकारेण । तद्यथा ये३ यजामहे भूर्भुवःसुवः समिद्ध इन्द्र उषसामनीके पुरोरुचा पूर्वकृद्वावृधानः । गोभिर्वयावान् मधुना समञ्जन् त्रिभिर्देवैस्त्रिंशता वज्रबाहुर्जघान वृत्रं विदुरो ववाराड् वौ३० ॥ १ ॥ वाग्वषट्कार नमस्ते अस्तु मा मा हिंसीः । इति वषट्कारानन्तरं जपति । ये३ यजामहे नराशंसः प्रतिशूरो मिमानस्तनूनपात्प्रतियज्ञस्य धाम । गोभिर्वपावान्मधुना समंजन् हिरण्यैश्चन्द्री यजति प्रचेता३ वौ३० ॥ २ ॥ वाग्वष० । ये३य०सुव गीडितो देवैर्हरिवां अभिष्टिराजुह्वानो हविषा शर्धमानः । पुरन्दरो मघवान्वज्रबाहुरायातु यज्ञमुप नो जुषाणा३ वौ३० । वाग्वष० ॥ ३ ॥ ये३ य० सुवर्जेताणो बर्हिर्हरिवान्न इन्द्रः प्राचीनं सीदत्प्रदिशा पृथिव्याः । उरुव्यचाः प्रथमानं स्योनमादित्यैरक्तं वसुभिः सजोषाः स्वाहा ॥ ४ ॥ वाग्वष० । ये३ य०सुवरिन्द्रं दुरःकवष्यो धावमाना वृषाणं यन्तु जनयः सुपत्नीः । द्वारो देवीरभितो विश्रयन्तीं सुवीरा वीरं प्रथमानामहोभीर वौ३० ॥ ५ ॥ वाग्वष० । ये३

य० तुवत्तुषासानक्ता बृहती बृहन्तं पयस्वती सुदुघे शूरमिन्द्रम् । पेशस्वती तन्तुना संव्ययन्ती देवानां देवी यजतः सुरुक्मे३ वौ३० ॥ ६ ॥ याज्यष० । नचेद्वैतन्वत इति वचनात् । ये३ य० सुवर्द्दैव्यामिमाना प्रथमा पुरुषा होताराविन्द्रे प्रथमा सुवाचा० । मूर्धन्यज्ञस्य मधुना प्राचीनं ज्योतिर्हविषा वृधाना३ वौ३० । याज्यष० । अथ याज्यान्तविसर्गलोपः । इतरस्य रेफो नेति वचनात् । ये३ य० सुवस्तिस्रो देवीर्हविषा वर्धमाना इन्द्रं जुषाणा वृषणं न पत्नी । अच्छिन्नं तन्तुं पयसा सरस्वतीडादेवी भारती विश्वतूर्ती३ वौ३० ॥ ८ ॥ याज्यष० । ये३ य० सुवस्त्वष्टा दधदिन्द्राय शुष्ममपाकोचिष्टुर्यशसे पुरूणि । वृषा यजन्वृषणं भूरिरेता मूर्धन्यज्ञस्य समनक्तु देवा३न्वौ३० ॥ ६ ॥ याज्यष० । ये३ य० सुववनस्पतिरवसृष्टो न पाशैस्त्मन्यासमञ्जन् शमिता न देवः । इन्द्रस्य हव्यैर्जठरं पृणानः स्वदाति हव्यं मधुना घृतेना३ वौ३० ॥ १० ॥ याज्यष० । तत आश्वलायनसूत्रपठितमध्रिगुसूहेन पठति । अध्रिगुश्चापापश्चोभौ देवानां शमितारौ ताविमं पशुं श्रपयतां प्रविद्वांसौ यथा यथास्य श्रपणं तथा तथेति श्रुत्युक्तत्वादध्रिग्वपापनामको देवशमितारावुच्येते ॥

२१४ दशप्रयाजाः पूर्वमनुष्ठिताः । इदानीमेकादशेन यजति । स यथा । ये३ य०सुवस्तोकानामिन्दुं प्रतिशूर इन्द्रो वृषायमाणो वृषभस्तुराषाट् । घृतप्रुषा मधुना हव्यमुन्दन्मूर्धन्यज्ञस्य जुषतां स्वाहा३ वौ३० ॥ ११ ॥ याज्यष० । एते एकादश आपस्तम्बसूत्रपठिता मन्त्राः तेषामग्नीप्रयाजा इति गीयन्ते ॥

Digitized by Google

२११ अथैतेषां प्रैषा उच्यन्ते । ते च यथा । होता यक्षत्समिधेन्द्रमिडस्पदेनाभा पृथिव्या अधि । दिवो वर्ष्मन् त्समिध्यत ओजिष्ठश्चर्षणीसहान्वेत्वाज्यस्य होतर्यज ॥ १ ॥ होता यक्षत्तनूनपातमूतिभिर्जेतारमपराजितमिन्द्रं देवं स्वर्विदं पथिभिर्मधुमत्तमैर्नराशꣳसेन तेजसा वेत्वाज्यस्य होतर्यज ॥ २ ॥ होता यक्षदिडाभिरिन्द्रमीडितमाजुह्वानममर्त्यम् । देवो देवैः सवीर्यो वज्रहस्तः पुरन्दरो वेत्वाज्यस्य होतर्यज ॥ ३ ॥ होता यक्षद्बर्हिषीन्द्रं निषद्वरं वृषभं नर्यापसम् । वसुभी रुद्रैरादित्यैः सयुग्भिर्बर्हिरासदद्वेत्वाज्यस्य होतर्यज ॥ ४ ॥ होता यक्षदोजो न वीर्यꣳ सहो द्वार इन्द्रमवर्धयन् ॥ सुप्रायणा विश्रयन्तामृतावृधो द्वार इन्द्राय मीढुषे वियन्त्वाज्यस्य होतर्यज ॥ ५ ॥ होता यक्षदुषे इन्द्रस्य धेनू सुदुघे मातरा मही । सवातरौ न तेजसा वत्समिन्द्रमवर्धतां वीतामाज्यस्य होतर्यज ॥ ६ ॥ होता यक्षद्दैव्या होतारा भिषजा सखाया हविषेन्द्रं भिषज्यतः । कवी देवौ प्रचेतसाविन्द्राय धत्त इन्द्रियं वीतामाज्यस्य होतर्यज ॥ ७ ॥ होता यक्षत्तिस्रो देवीस्त्रयस्त्रिधातवोऽपसम् । इडा सरस्वती भारती मही इन्द्रपत्नीर्हविष्मतीर्वियन्त्वाज्यस्य होतर्यज ॥ ८ ॥ होता यक्षत्त्वष्टारमिन्द्रं भिषजं सुयजं घृतश्रियम् । पुरुरूपꣳ सुरेतसं मघोनिमिन्द्राय त्वष्टा दधदिन्द्रियाणि वेत्वाज्यस्य होतर्यज ॥ ९ ॥ होता यक्षद्वनस्पतिꣳ शमितारꣳ शतक्रतुं धियो जोष्टारमिन्द्रियम् । मध्वा समञ्जन्पथिभिः सुगेभिः स्वदाति हव्यं मधुना घृतेन वेत्वाज्यस्य होतर्यज ॥ १० ॥ ततोऽग्निर्होता नो अध्वर इत्यादि पर्यग्नये क्रियमाणायान्वाह निरूढवत् । तदनन्तरं होता यक्षदिन्द्रस्य स्वाहाऽऽज्यस्य स्वाहा मेदसः स्वाहा-

स्तोकानाꣳ स्वाहा स्वाहा कृतीनाꣳ स्वाहा हव्यसूक्तीनाꣳ स्वाहा देवाꣳ आज्यपान् स्वाहेन्द्रꣳ होत्राज्जुषाणा इन्द्र आज्यस्य वियन्तु होतर्यज ॥ ११ ॥ एते एकादश आपस्तम्बसूत्रपठिताः प्रैषाः सौत्रामणीप्रयाजप्रैषा इत्युच्यन्ते ॥

२१६ ततो निरूढवदाज्यभागप्रचारः । ततो वपायागे । आचर्षणिप्रा वृषभो जनानाꣳ राजा कृष्टीनां पुरुहूत इन्द्रः । स्तुतः श्रवस्यन्नवसोपमद्रिग्युक्त्वा हरी वृषणायाह्यर्वाङ्३म् । इत्यनुवाक्यामध्वर्युप्रेषितो मैत्रावरुणः पठति । होता यक्षदिन्द्रं छागस्य वपाया मेदसो जुषतां हविर्होतर्यज । अध्वर्युप्रेषितो मैत्रावरुणोऽनेन प्रैषेण होतारं प्रेष्यति । ये३ य० सुवर्विवेषयन्माधिषणा जजानस्तवै पुरापार्यादिन्द्रमह्नः । अꣳहसो यत्र पीपरद्यथा नो नावेव यान्तमुभये हवन्ता३इन्द्रो३ । ० । वाग्व० ॥ इत्यनया याज्यया होता यजति । होतृमैत्रावरुणयोर्निरूढवच्चात्वाले वपामार्जनं भवति । पुरोडाशयागे । तꣳसध्रीचीरूतयो वृष्ण्यानि पौꣳस्यानि नियुतः सश्चुरिन्द्रम् । समुद्रं न सिन्धव उक्थशुष्मा उरुव्यचसङ्गिर आविशन्तो३म् । इत्यनुवाक्या मैत्रावरुणस्य । होता यक्षदिन्द्रं पुरोडाशस्य जुषतां हविर्होतर्यज । इत्यनेन प्रैषेण होतारं प्रेष्यति । ये३ यजामहे भूर्भुवः सुवः सत्यमित्तन्नत्वावाꣳ अन्यो अस्तीन्द्रदेवो न मर्त्यो ज्यायान् । अहन्नहिं परिशयानमर्णो । वासृजो अपो अच्छा समुद्रां इन्द्रो३० । वाग्वष० । होताऽनया याज्यया यजति । अथ स्विष्टकृतः । त्वामीडते अजिरं दूत्याय हविष्मन्तः सदमिन्मानुषासः । यस्य देवैरासदो बर्हिरग्नेहान्यस्मै सुदिना भवन्तो३म् । इत्यनुवाक्या । होता यक्षदग्निं पुरोडाशस्य जुषतां हविर्होतर्यज ।

Digitized by Google

अनेन प्रैषेण होतारं प्रेष्यति । ये३ य० सुवरग्निं सुदीतिं सुदृशं गृणन्तो नमस्यामस्त्वेड्यं जातवेदः । त्वां दूतमरतिं हव्यवाहं देवा अकृण्वन्नमृतस्य नाभिं वौ३ष् । वा०व० । अङ्गयागे । मनोतायै हविषोऽवदीयमानस्यानुब्रूहीत्यध्वर्युप्रेषितो मैत्रावरुणोऽभिहिङ्कृत्य त्वं ह्यग्ने प्रथमो मनोतेति सूक्तमन्वाह । ततः प्रसवाहिषे पुरुहूत शत्रून् ज्येष्ठस्ते शुष्म इह रातिरस्तु । इन्द्राभर दक्षिणेना वसूनि पतिः सिन्धूनामसि रेवतीनाम् । इति पुरोनुवाक्यां मैत्रावरुणो वदति । होता यक्षदिन्द्रं छागस्य हविष आददद्य० गृभः । घस्तान्नूनं० करदेवेन्द्रो जुषतां हविर्होतर्यज । इत्यनेन होतारं प्रेष्यति । ये३ य० सुवः सशेवृधमधिधा द्युम्नमस्मे महिक्षत्रं जनाषाडिन्द्र तव्यम् । रक्षा च नो मघोनः पाहि सूरीन्राये च नः स्वपत्या इषे धा३ वौ३ष् । वा०व० । होताऽनया याज्यया यजति । ततो देवेभ्यो वनस्पते हवींषीत्यादि वनस्पतियागो निरूढवत् । देवं बर्हिरिन्द्रं सुदेवं देवैर्वीरवत्स्तीर्णं बर्हिर्वेद्यामवर्धयद्वस्तोर्वृतं प्राक्तोर्भृतं राया बर्हिष्मतोऽत्यगाद्वसुवने वसुधेयस्य वेतु यज ॥ १ ॥ देवीर्द्वार इन्द्रं संघाते विड्वीर्यामवर्धयन्नावत्सेन तरुणेन कुमारेण च मीविताऽपार्वाणं रेणुककाटं नुदन्तां वसुवने वसुधेयस्य वियन्तु यज ॥ २ ॥ देवी उषासा नक्तेन्द्रं यज्ञे प्रयत्यह्वेतान्देवीर्विशः प्रायासिष्टां सुप्रीते सुधीते अभूतां वसुवने वसुधेयस्य वीतां यज ॥ ३ ॥ देवी जोष्ट्री वसुधिती देवमिन्द्रमवर्धयतामयाव्यन्याघा द्वेषांस्यान्या वाक्षीद्वसु वार्याणि यजमानाय शिक्षिते वसुवने वसुधेयस्य वीतां यज ॥ ४ ॥ देवी ऊर्जाहुती

सुदुघे पयसेन्द्रमवर्द्धतामिषमूर्जमन्याबक्षीत्सग्धिं सपीतिमन्यानवेन पूर्वं दयमाने पुराणेन नवमधातामूर्जमूर्जाहुतीवसुवार्याणि यजमानाय शिक्षिते वसुवने वसुधेयस्य वीतां यज ॥ ५ ॥ देवा दैव्या होतारा देवमिन्द्रमवर्धताꣳ हताघशꣳसावाभाष्टां वसुवार्य्याणि यजमानाय शिक्षितौ वसु० यस्य वीतां यज ॥ ६ ॥ देवी स्तिस्रस्तिस्रो देवीः पतिमिन्द्रमवर्धयन्नस्पृक्षद्भारती दिवꣳरुद्रैर्यज्ञꣳसरस्वतीडावसुमती गृहान्वसुवने वसुधेयस्य वियन्तु यज ॥ ७ ॥ देव इन्द्रो नराशꣳसस्त्रिवरूथस्त्रिबन्धुरो देवमिन्द्रमवर्धयच्छतेन शितिपृष्ठानामाहितः सहस्रेण प्रवर्तते मित्रावरुणेदस्य होत्रमर्हतो बृहस्पतिस्तोत्रमश्विनाध्वर्यवं वसुवने वसुधेयस्य वीतां यज ॥ ८ ॥ देव इन्द्रो वनस्पतिर्हिरण्यपर्णो मधुशाखः सुपिप्पलो देवमिन्द्रमवर्धयद्दिवमग्रेणाप्राद्दान्तरिक्षं पृथिवीमदृꣳहीद्वसुवने वसुधेयस्य वेतु यज ॥ ९ ॥ देवं बर्हिर्वारितीनां देवमिन्द्रमवर्धयत्स्वासस्थमिन्द्रेणासन्नमन्याबर्हीꣳष्यभ्यभूद्वसुवने वसुधेयस्य वेतु यज ॥ १० ॥ देवो अग्निः स्विष्टकृद्देवमिन्द्रमवर्धयत्स्विष्टं कुर्वन्स्विष्टकृत्स्विष्टमद्य करोतु नो वसुवने वसुधेयस्य वेतु यज ॥ ११ ॥ एते एकादशानुयाजप्रैषाः । एषामेकैकेन मैत्रावरुणो होतारं प्रेष्यति । होता एतैरेव प्रैषैर्यजेत्यस्य स्थाने वषट्कारं कृत्वा यजति । एवं सति प्रैषा एव याज्या भवन्ति । अग्निमद्येत्यादिप्रैषे यथादैवतमूहो भवति । अन्यत्सर्वं निरूढवत् । एतावत्कर्म सौत्रामणीपूर्वाङ्गेन्द्रपशुरित्युच्यते ॥

(शेषमग्रे)

॥ श्रीः ॥

॥ ओं नमः श्रीमते भगवते रामानुजाचार्याय ॥

अथ श्रीभाष्यं विशिष्टाद्वैतपरं रामानुजदर्शनम्

श्रुतप्रकाशिकासमेतं विषमपदटिप्पणीसहितम्

तत्र प्रथमोऽध्यायस्यावशेषः ।

(*Continued from page* 272. Vol VII.)

टी० प्रतिज्ञातार्थत्रयोपपादनार्थमध्ययनविधिं निरूपयति "प्रथममि"ति ।

सू० प्रथमं ताव"त्स्वाध्यायोऽध्येतव्य"इत्य[1]ध्ययनेनैव स्वाध्यायशब्दवाच्यवेदाख्याक्षरराशेर्ग्रहणं विधीयते ।

ननु वेदप्रामाण्यसमर्थनमिव कर्मविचारसिद्धमध्ययनविधिनिरूपणं किंचोपजीव्यते? इति चेत् । न । अर्वाचीनव्याख्यातृभिरर्थज्ञानपर्य[2]न्तायास्तत्रतन्त्रो[3]क्तत्वात्, अक्षरराशिग्रहणपर्य[4]न्तत्वं हि भगवद्बादरायणाभिमतम् "अध्ययनमात्रवत" इति हि वक्ष्य[5]ते अतस्तत्र वक्ष्यमाणोऽर्थः शास्त्रारम्भणीयत्वायात्र प्रतिपाद्यते । अध्ययनविधेरक्षरग्रहणमात्रपर्यन्तत्वे निरूपिते शास्त्रस्यारम्भणीयत्वसिद्धिः। ब्रह्मविषयत्वनिरूपणेन ऐकशास्त्र्यपौर्वापर्यनियमसिद्धिः । कथमक्षरग्रहणमात्रपरत्व आरम्भणीयत्वम्? । इत्थम् । अध्ययनविधेरर्थज्ञानपर्यन्तत्वे सत्यर्थज्ञानस्य, "अधीत्य स्नायात्" "आचार्यकुलाद्वेदमधीत्याभिसमावृत्त्ये"ति यज्ञाद्यनुष्ठानशेषत्वेन विनियोगादुपनिषत्सिद्धस्य ब्रह्मज्ञानस्यापि कर्मशेषत्वापत्तेस्तस्य च ज्ञानस्य "आत्मा वा इदं" "ब्रह्म वा

---

१ इत्यध्ययनविधिनैव ।

२ "अर्थज्ञानपर्यन्ततायाः" इत्युचितः पाठः । अधिपूर्वकेङ्धातोर्गुरूच्चारणानूच्चारणअन्यार्थप्रतिपत्तिपर्यन्तार्थकतायाः इत्ययं तदर्थः ।

३ पूर्वमीमांसाग्रन्थेष्वित्यर्थः ।

४ गुरूच्चारणानूच्चारणमात्रमध्ययनपदार्थो नत्वर्थावगमस्तस्य धात्वर्थतावच्छेदककोटिनिक्षिप्त इतिभावः ।

५ भाष्यकारेणेति तदर्थः ।

Digitized by Google

इदम्" "अयमात्मा ब्रह्मे"ति त्रय्यन्तस्थब्रह्मशब्दस्यात्मपर्यायत्वेनात्मविषयत्वादात्मज्ञानस्य व्रीह्यादिद्वारा प्रोक्षणादेरिवात्मद्वारा कर्मशेषत्वे सति द्वारभूतव्रीह्यादेरिव द्वारभूतात्मन[1]श्च कर्मशेषत्वं स्यात् ।

न च समुद्रध्यानवदात्मज्ञानस्यादृष्टद्वारा कर्मशेषत्वात् समुद्रवदात्मा न कर्मशेष इति वाच्यम् । कर्मशेषतयावक्लृप्तस्यात्मनो द्वारभावे संभवत्यदृष्टकल्पनाऽयोगात् । समुद्रस्य तु क्रतूपकारकत्वासंभवेन ह्यदृष्टकल्पनम्। नन्वात्मनः फलप्रदतया शेषत्वमस्त्विति चेत्। न। संप्रतिपन्नेनात्मनात्मज्ञानस्य कर्मशेषत्वे निरूढेऽप्यसंप्रतिपन्नात्मकल्पनाऽयो[2]गात्। न हि जीवविलक्षण आत्मा संप्रतिपन्नः, अतोऽनुष्ठानशेषभूत आत्मा कर्मसु कर्तृभूतो जीव एवेति वेदान्तानां जीवपरत्वेन, तदतिरिक्तेश्वरे प्रमाणाभावादप्रामाणिकेश्वरविचाररूपं शास्त्रमनारम्भणीयं स्यादिति प्राप्नुयात्, अक्षरराशिग्रहणमात्रपर्यन्तत्वे त्वर्थज्ञानस्यानुष्ठानशेषत्वाभावेन कर्मसु कर्तृभूतजीवातिरिक्तात्मप्रतिपादनसंभवात् प्रामाणिकपरमात्मविचाररूपं शास्त्रमारम्भणीयं स्यादित्यतोऽध्ययनविधिर्निरूप्यते । तत्राध्ययनस्य सक्तुहोमवत् प्रधानकर्मत्वं स्वरूपेण विधेयत्वमध्यापनविधिप्रयुक्तत्वमुपनयनस्याध्यापनाङ्गत्वं च प्राभाकराभिमतमनादृत्याध्ययनस्यावघातवद् गुणकर्मत्वं नियमस्य विधेयत्वमध्ययनस्य स्वविधिप्रयुक्तत्वमुपनयनस्याध्ययनाङ्गत्वं चेति कौमारिलाभिमतमर्थचतुष्टयमुभयानभिमतमक्षरराशिग्रहणमात्रपर्यन्तत्वं च सङ्ग्रहेण प्रतिजानीते "प्रथमम्"ति। "प्रथमं तावत्"—प्रथमत एव, "यावत्तावच्च साकल्येऽवधौ मानेऽवधारणे" इति नैघण्टुकाः। प्राथम्यं शास्त्रान्तरश्रवणयोग्यावस्थापेक्षया पूर्वभावित्वम्। गर्भाष्टमेऽपनीतस्य ह्यध्ययनं ततः पूर्वं शास्त्रान्तरपरिश्रमानर्हत्वादध्ययनविधिपरतन्त्रस्य साङ्गाध्ययनानन्तरं कर्मविचारावश्यंभावस्य स्वरससिद्धत्वाच्च, साधनचतुष्टयादिपूर्ववृत्तान्तरनिष्पादनस्यानवसरग्रस्तत्वं "प्रथमं तावदि"त्यनेन फलितम् । लौकिकाक्षरग्रहणव्यावृत्त्यर्थोऽव-

१ चकारोऽप्यर्थकः ।

२ नित्यत्वादिना प्रतिपन्नस्यात्मतत्त्वा एवाधिकुर्वन्ति क्रियासु नातथाभूताश्चात्र संप्रतिपन्नपरात्मकल्पना न युक्तेति भावः ।

दाख्य–शब्दः, वेदाख्य–शब्देन कृत्स्नाध्ययनं च सूचितम् । न हि वेदान्त-भाग[1]मात्रं स्वाध्यायशब्दवाच्यम् । "अध्ययनेने"ति निर्देशेन गुणकर्मत्वं सूचितं, भावार्थस्यान्यनिष्ठत्वप्रतीतेः । यदि प्रधानकर्मत्वमविवक्षिष्यत् तदा हि स्वाध्यायेनाध्ययनं संपाद्यमितिवचनव्यक्तिरभविष्यत् । एवकारेण नियमविधित्वं द्योतितं, न तु पुस्तकनिरीक्षणादिनेत्यर्थः । "स्वाध्यायोऽध्येतव्य"इति अध्ययनविधिवाक्योपादानेन स्वविधिप्रयुक्तत्वं सूचितम् । तद्ध्यापयेदिति वाक्यमुपात्तं, प्राथम्यवचनादध्ययनस्योपनयनाङ्गत्वं च फलितं, शास्त्रान्तरपरिश्रमायोग्यगर्भाष्टमवर्षाभिप्रायेण हि प्राथम्यमुक्तम् । अध्ययनस्य च प्राथम्यम"ष्टवर्षं ब्राह्मणमुपनयीते"त्युपनयनविषयतयोक्तस्य कालस्य उपनयनद्वाराध्ययनशेषत्वे सत्येव ह्युपपद्यते । एवमर्थपञ्चकं संक्षेपेण प्रतिज्ञातं भवति–अस्मिन्नध्ययनविधिवाक्ये ऽध्ययनस्य प्राथम्यं साङ्गत्वमुपनयनाङ्गत्वं च न प्रतीतम् "उपनयीत तमध्यापयेदि"ति वाक्यान्तरेणाध्ययनस्याध्यापनविधिप्रयुक्तत्वमध्यापनस्योपनयनाङ्गकत्वं च प्रतीयतइति शङ्कायामाह ।

सू० तच्चाध्ययनं किं रूपं? कथं च कर्त्तव्यम्? इत्यपेक्षायाम्
"अष्टवर्षं ब्राह्मणमुपनयीत–

टी० "तच्चे"ति । चः–शङ्कानिवृत्तौ । तत्–"स्वाध्यायोऽध्येतव्य" इति वाक्यप्रतिपादितमित्यर्थः, "यावद्धि स्वध्ययनेनैव कदाचिदस्ति फलश्रुतिः, धारणे जपयज्ञे च या साप्येवं निवारिते"ति जपादेरप्यध्ययनशब्दवाच्यत्वात्तेषु प्रस्तुताध्ययनस्यायाध्ययनत्वनिश्चयायाह "किं रूपमि"ति । किं सकृदुच्चारणरूपमाहोस्विदसकृदुच्चारणरूपं किं वा स्वतन्त्रोच्चारणरूपमुत परतन्त्रोच्चारणरूपमित्यर्थः । परतन्त्राऽसकृदुच्चारणरूपत्वे ह्यास्याध्ययनत्वसिद्धिः । "कथं"–किमङ्गकमित्यर्थः । इत्यपेक्षायाम"पेक्षितानि विधीयन्ते" इत्यन्वयः । प्राथम्यं तन्त्रोच्चारणरूपत्वमुपनयनाङ्गकत्वं च दर्शयितुमाह–"ऽष्टवर्षमि"ति । "अष्टवर्षमि"त्यनेन प्राथम्यं सिद्धम् । उपनयनद्वाराऽ-

१ संहितामारभ्यारण्यकोपनिषदन्तः सर्वो वेदः स्वाध्यायपदवाच्य इत्यर्थः ।

ध्ययनशेषत्वात् बालस्य "ब्राह्मणमुपनयीते"ति द्वितीयाश्रुत्या माणवकशेषत्वावगमादुपनयनस्य तदङ्गताध्ययना¹ङ्गत्वसिद्धिः, उपनयनस्याकर्त्रभिप्रायपूर्वविहितत्वाच्च नाध्यापनाङ्गत्वसिद्धिः। "अध्यापयेदि"त्यनेन परतन्त्रोच्चारितानुवादत्वसिद्धिः।

सू० तमध्यापयेदित्यनेन "श्रावण्यां प्रौष्ठपद्यां वा उपाकृत्य यथाविधि, युक्तश्छन्दांस्यधीयीत मासान्विप्रोऽर्धपञ्चमानि"त्यादिव्रतनियमविशेषोपदेशैश्चापेक्षितानि विधीयन्ते।

टी० "द्वादशाहेन प्रजाकामं याजयेत्" "अन्नाद्यकामं याजयेत्" "निषादस्थपतिं याजयेदि"ति प्रतिपन्नस्य याजनस्येवार्थार्जनार्थतया रागप्राप्तस्याध्यापनस्याविधेयत्वादध्यापने ऽधिकारिविशेषाश्रवणाच्चाध्ययनस्याध्यापयितृपूर्वकत्वमुच्यते, इत्ययमध्ययनाङ्गविधिरिति भावः। उपाकर्मादिव्रतनियमाङ्गकत्वं साङ्गत्वं च दर्शयितुमाह "श्रावण्यामि"ति। "अर्द्धपञ्चमान्मासानित्यादौ"त्यत्रादिशब्दोपात्तैः "अत ऊर्ध्वं तु छन्दांसि शुक्लेषु नियतः पठेत्। वेदाङ्गानि च सर्वाणि कृष्णपक्षेषु संपठेदि"त्यादिवचनैरङ्गाध्ययनस्य कालो दर्शितः। "व्रत"मुपाकर्मकाण्डव्रतादि नियमः "एतद्ध वा एतच्छ्मशानं यच्छूद्रस्तस्माच्छूद्रसमीपे नाऽध्येतव्यमि"त्याद्युक्तदेशकालभक्ष्याभक्ष्यादिव्यवस्थारूपः। अध्यापयेदित्यनेन व्रतनियमविशेषोपदेशैश्चे"ति पृथङ्निर्देशः श्रुतित्वस्मृतित्वविभागाद्विप्रतिपन्नसंप्रतिपन्नत्वविभागाच्च कृतः। उपाकर्मादिव्रतनियमवदुपनयनमप्यध्ययनाङ्गमिति भावः। किं रूपं? कथं च कर्तव्यम्? इत्यपेक्षायामेभिरङ्गविधायकवाक्यैरपेक्षितानि विधीयन्त इत्यर्थः। ननु "अष्टवर्षं ब्राह्मणमि"त्यत्रोपनयनस्याऽध्ययनाङ्गत्वमवगम्यत इत्युक्तं, तदयुक्तं, तस्योपनेयासत्तिद्वाराऽध्येतृसाकाङ्क्षाध्यापनाङ्गत्वं ह्यवगम्यते "उपनीय तु यः शिष्यमि"त्यादिस्मृतिवचनाच्च तदवगम्यते। उच्यते। "ब्राह्मणमुपनयीते"त्यत्र द्वितीयाश्रुत्या उपनयनस्य माणवकशेषत्वमवगम्यते माणवकशेषमुपनयनम्, अध्ययनं च तदङ्गं तत्रान्तरङ्गबहिरङ्गन्यायादुपनय-

१ तदध्ययनाङ्गत्वसिद्धिरिति क पुस्तकपाठः।

नमध्ययनाङ्गमेव । ननु "उपनीय तु यः शिष्यं वेदमध्यापयेद्द्विजः । सकल्पं सरहस्यं च तमाचार्यं प्रचक्षते" इति वचने स्वाश्रुत्योपनयनस्याऽध्यापनाङ्गत्वं युक्तम् । अन्तरङ्गत्वं हि वस्तुसामर्थ्यरूपं लिङ्गं ततः स्वाश्रुतिर्बलीयसीति चेत् न । अन्तरङ्गत्वं हि प्रत्यक्षश्रुतिसिद्धं, स्वाश्रुतिस्तु स्मृतिगतानुवादरूपवचनस्था च, अतोऽस्याः स्मृतिवचनस्थत्वान्मूलश्रुतिसापेक्षत्वम्, अनुवादरूपवचनगतत्वाद्विध्यन्तरसापेक्षत्वमिति विलम्बद्वयमस्ति, श्रुतिलिङ्गादिषु विलम्बितधीहेतुत्वं हि पारदौर्बल्यहेतुः, अतो विलम्बद्वयोपहता स्वाश्रुतिर्न बलीयसी । किंच, आचार्योपाध्यायगुर्वादिनामविधानवत् तत्प्रकरणस्थमिदं वचनमुपनीयाध्यापयितुराचार्यनामविधानपरमिति न स्वाश्रुतिरुपनयनस्याध्यापनाङ्गत्वे प्रमाणं भवितुमर्हति । किंच, "स्वरितञितः कर्त्रभिप्राये क्रियाफल" इत्यात्मनेपदे प्राप्तेपि 'संमाननोत्सञ्जनाचार्यकरणज्ञानभृतिविगणनव्ययेषु निय" इति पुनर्विधानस्याकर्त्रभिप्रायार्थत्वादुपनयनस्य नाध्यापनाङ्गत्वं युक्तम् । "अकर्त्रभिप्रायार्थोयमारम्भ" इति हि तद्वृत्तिकारः।

ननु कर्त्रभिप्रायत्वं कर्त्तर्येव फलस्याभिप्रेतत्वं, तदवधारणनिषेधार्थं पुनर्विधानम्. अतः फलमुभयान्वयि, अतो माणवकद्वारेणाचार्यान्वय्युपनयनफलमित्यध्ययनाङ्गत्वं युक्तमिति चेत् । न । "अग्नीनादधीते"त्यत्र कर्त्रभिप्रायसूत्रविहितेप्यात्मनेपदे फलस्योभयान्वयितया पुनर्विधानस्य नियमनिषेधार्थत्वाभावेन कर्त्रभिप्रायत्वमात्रस्य निषेधार्थत्वात् । अतो नाध्यापनाङ्गत्वम् । कर्त्रभिप्रायशब्देन कर्तृव्यतिरिक्तचेतने फलानन्वयो विवक्षितः, अतो न "अग्नीनादधीते"ति व्यभिचारः, पुनर्विधानस्य तन्निवारणार्थत्वे फलस्याचार्येप्यन्वयोपपत्तेरध्यापनाङ्गत्वमिति चेत् । न । "ऋत्विजो वृणीत" इत्यत्र स्वरितेत्यादिसूत्रविहितेप्यात्मनेपदे फलस्य कर्तृव्यतिरिक्तचेतनान्वयदर्शनेन पुनर्विधानस्य नियमनिषेधार्थत्वाभावात्, अतः कर्त्रभिप्रायमात्रनिषेधार्थे पुनर्विधानमिति नाध्यापनाङ्गमुपनयनम् । क्रियाफलञ्चाम क्रियानन्तरभावि-फलं, तस्य कर्तर्यन्वितत्वं कर्त्रभिप्रायत्वम् । अत आचार्यकस्योपनयनक्रियानन्तरभावित्वाभावादव्यवहितफलस्य कर्तृगतत्वाभावाच्चात्मनेपदस्या-

१ श्रुतिलिङ्गवाक्यप्रकरणस्थानसमाख्यानां पारदौर्बल्यमर्थविप्रकर्षात् । इति जैमिनीयस्य युक्तिमूलपारदौर्बल्यबोधकत्वमिति भावः ।

प्राप्तौ अव्यवहितफलस्याकर्त्रभिप्रायत्वेप्यात्मनेपदं "संमाननेत्या"दिसूत्रेण विधीयते। अतोऽकर्त्रभिप्रायार्थत्वेपि व्यवहिताचार्य[1]करनिष्पत्त्यर्थतयाऽध्यापनाङ्गत्वमुपनयनस्याविरुद्धमिति चेत्। नैवम्। "अग्नीनादधीते"त्यत्र स्वरितेतिसूत्रविहितेप्यात्मनेपदे अग्निसंस्कारव्यवहिताग्निस्वापत्तिरूपफलस्य कर्त्रन्वयित्वदर्शनादतोकर्त्रभिप्रायार्थं संमाननेत्यादिसूत्रं फलमात्रस्य कर्त्रन्वयनिवारणार्थं संस्कारविशिष्टोग्निः फलमित्याधानकर्त्तरि न व्यवहितफलान्वय इति चेत् तर्ह्युपनयनसंस्कारविशिष्टमाणवकसिद्धिरेवाव्यवहितं फलमिति, कर्त्रभिप्रायसूत्रेणैवात्मनेपदसिद्धेरकर्त्रभिप्रायसूत्रवैयर्थ्यं स्यात्।

ननु यद्येवं व्यवहितमव्यवहितं वा फलमात्रमकर्त्रभिप्रायसूत्रेण निवार्यते तर्ह्युपनेतुः प्रवृत्तिर्नोपपद्यते यतः "प्रयोजनमनुद्दिश्य न मन्दोपि प्रवर्त्तते" इति। नैवम्। उपनयनफलस्य माणवकान्वयित्वेप्याचार्याय वरो देय इति विध्यन्तरप्राप्तदक्षिणाफललिप्सया प्रवृत्त्युपपत्तेः।

न च तेनाकर्त्रभिप्रायत्वविरोधः, असाधारणफलानन्वयविषयत्वादकर्त्रभिप्रायसूत्रस्य। अव्यवहितक्रियाफलस्य कर्त्तुरभिमतत्वं कर्त्रभिप्रायत्वं, तदनभिमतत्वमकर्त्रभिप्रायत्वमित्यप्ययुक्तं, क्रियाफलस्य कर्त्रनभिमतत्वव्याघातात्। आचार्यकनिष्पत्त्युपयोगिनो माणवकसंस्कारस्याचार्यानभिमतत्वानुपपत्तेः। अत उपनयनमध्येष्यमाणमाणवकासत्तिमुखेन नाध्यापनाङ्गम्, अपि त्वध्ययनाङ्गमेव। अध्ययनं च नाध्यापनविधिः प्रयुङ्क्ते, "अध्यापयेदि"ति तु "द्वादशाहेन प्रजाकामं याजये"दित्यादिवदित्युक्तम्। यद्यपि प्रजाकाममध्यक्काममितिवत् तत् प्रयोज्यव्यापारस्याध्ययनस्याधिकारिविशेषणं फलं न श्रूयते तथापि स्वाध्यायसिद्धिरधिकारिविशेषणं स्यात्, "स्वाध्यायोऽध्येतव्य" इति स्वाध्यायस्याध्ययनसाध्यत्वावगमात्। यथा "ऽग्नीनादधीते"त्यत्राग्नीनामाधानसाध्यत्वावगमादग्निसिद्धिरधिकारिविशेषणं, तद्वत्।

न च स्वविधिप्रयुक्तत्वेध्ययनविधेरनुष्ठातृभावः। सन्ति हि प्रवक्तारोध्येतारः। तथाह भगवानापस्तम्बः "तस्मिन्नभिजन[2]विद्यासमुदेतं समाहितं

१ अत्रभावे प्रत्ययस्तथा चाचार्यत्वनिष्पत्त्यर्थतयेत्यर्थः।

२ अविच्छिन्नवेदवेदिसम्बन्धे कुले जन्माभिजनः विद्या च वेदविद्या ताभ्यां समुदेतं संपन्नमित्यर्थः, इदमापस्तम्बधर्मसूत्रम्।

संस्कर्त्तारमीप्सेदि''ति तेषु परविधिप्रयुक्तत्वे सत्यध्ययनं नोपपद्यते । अप्रबुद्धविषये[1] तु स्वतन्त्रस्याध्ययनविधेर्माणवकविषयत्वं ज्ञात्वा हितैषिणो माणवकमध्ययनादि[2] कारयन्ति । अतः प्रबुद्धेष्वप्रबुद्धेषु च स्वविधिप्रयुक्तत्वमध्ययनस्य युक्तम् । परविधिप्रयुक्तत्वे नित्यस्याध्ययनस्य काम्यविधिप्रयुक्तत्वं स्यात्, ततश्चानुष्ठाननियमो न स्यात् । आचार्यककामो ह्यध्यापकः, तस्याचार्यककामनाया अभावेऽध्ययनासिद्धेः । अध्यापकबाहुल्यात्तत्सिद्धिरिति चेत्, अध्यापकेभ्योऽप्यध्येतृबाहुल्यदर्शनात् । आधानस्योत्तरक्रतुविधिप्रयुक्तत्वेऽपि न काम्यविधिमात्रप्रयुक्तत्वं "वसन्ते वसन्ते ज्योतिषा यजेत" "यावज्जीवमग्निहोत्रं जुहोती''ति नित्यविधिसद्भावादित्येवमाद्यनुसंधेयम् । अतो यथोक्त एवार्थः । अङ्गविध्युपेतेन प्रधानविधिनाङ्गस्वरूपमङ्गिस्वरूपं च कथं प्रतिपन्नमित्यत्राह ।

सू० एवं सत्सन्तानप्रसूतसदाचारनिष्ठात्मगुणोपेतवेदविदाचार्योपनीतस्य व्रतनियमविशेषयुक्तस्याचार्योच्चारणानूच्चारणमक्षरराशिग्रहणफलमध्ययनमित्यवगम्यते ।

"एवमि''ति । एवमङ्गविधिभिः सह प्रधानविधौ निरूपिते इत्यर्थः । सत्सन्तानेत्यादिना "तस्मिन्नभिजनविद्ये''त्यापस्तम्बवचनार्थोनुसंहितः । आत्मगुणा अक्रोधादयः । अनेन समाहित-शब्दार्थ उक्तः । वेदविच्छब्देन विद्यासमुदेत-शब्दार्थ उक्तः । वेदविदाचार्योपनीतस्येति आचार्यविशेषणमुपनयनद्वारा माणवकार्थं, यथा उपनयनस्याध्यापनाङ्गत्वे माणवकविशेषणमाचार्यार्थं तद्वदिति भावः । व्रतनियमविशेषयुक्तस्य व्रतनियमविशेषवदाचार्यविशेषणमपि माणवकार्थमिति भावः । आचार्योच्चारणानूच्चारणमिति परतन्त्रोच्चारणरूपता दर्शिता । अक्षरराशिग्रहणफलमितिपदमसकृदावृत्तिरूपत्वस्याक्षेपकं दर्शयति, यथा "व्रीहीनवहन्ती''त्यत्र दृष्टफलत्वस्याप्यपरित्याज्यत्वेनाऽवहननस्य वैतुष्यपर्यन्तत्वाद् अश्रुताप्यावृत्तिः सिद्धा, तद्वद-

[1] अप्रबुद्धविषयेषु इति पाठान्तरम् ।
[2] अध्यापनादि इति युक्तः पाठः ।

चापि सामर्थ्यादावृत्तिः सिद्धा। दृष्टप्रयोजनापरित्यागेनैव नियमस्य विधेयत्वात्। आचार्योच्चारणानूच्चारणमित्यनेन वेदविदाचार्योपनीतस्येत्यनेन चाध्ययनस्याध्यापयितृसापेक्षत्वेन परतन्त्रोच्चारणरूपत्वं स्वविधिप्रयुक्तत्वमुपनयनाङ्गकत्वं चोक्तम्। आचार्योच्चारणानूच्चारणमक्षरराशिग्रहणफलमित्यनेन 'किंरूप'मित्याकाङ्क्षा शामिता[1] वेदविदाचार्योपनीतस्य व्रतनियमविशेषयुक्तस्येत्यनेन कथं च कर्तव्यमित्यपेक्षा पूरितापाठः। अक्षरराशिग्रहणफलमित्यनेन स्वाध्यायग्रहणकामत्वमध्ययनाधिकारिविशेषणमित्यपि सूचितम्।

सू० अध्ययनं च स्वाध्यायसंस्कारः, "स्वाध्यायोऽध्येतव्य" इति स्वाध्यायस्य कर्मत्वावगमात्। संस्कारो हि नाम कार्यान्तरयोग्यताकरणम्, संस्कार्यत्वं च स्वाध्यायस्य युक्तम्।

टी० ॥ ननु "सक्तून् जुहोती"त्यत्र पुरुषस्य सक्तुहोमजन्यादृष्टभाक्त्वात् सक्तुहोमो यथा पुरुषसंस्कारः, तद्वदध्ययनस्य पुरुषसंस्कारत्वस्याक्षरराशिग्रहणफलत्वं न स्यात्, अपूर्वसिद्ध्यर्थतया स्वाध्यायसिद्ध्यर्थत्वाभावात्, ततश्चाक्षरराशिग्रहणफलत्वाभावेनावृत्त्यसिद्धेः सकृदुच्चारणरूपमेवाध्ययनं स्यादित्याशङ्क्याह "अध्ययनं चे"ति। उपनयनाङ्गकत्ववत् स्वविधिप्रयुक्तत्ववदिदं चोपपादनीयमिति चार्थः। स्वाध्यायसंस्कारः–, न तु सक्तुहोमवदपूर्वविषयतया पुरुषसंस्कार इत्यर्थः। कुत इत्यत्राह 'स्वाध्याय' इति। तव्यप्रत्ययात् कर्मत्वावगमः। स्वाध्यायस्य हि कर्मत्वावगमः, न पुरुषस्य कर्तुः। क्रिययाप्तुमिष्टतमत्वं हि कर्मत्वम् अतोऽध्ययनं स्वाध्यायसंस्कारः, न तु पुरुषस्येत्यर्थः। निर्वर्त्यादेरपि साधारणं कर्मत्वं कथं संस्कार्यत्वे हेतुतयोच्यते इत्यत्र निर्वर्त्यत्वविकार्यत्वानुपपत्तिमभिप्रेत्य स्वाध्यायस्येति पुनः कीर्तनं, वस्तुसामर्थ्यसचिवकर्मत्वावगमः संस्कार्यत्वे हेतुरिति भावः। फलान्तरे संभवति प्राप्यत्वमात्रपर्यवसानं चाऽयुक्तम्। ननु न कर्मत्वावगममात्रात् संस्कार्यत्वं "सक्तून् जुहोति" "सुवर्णं भार्यमि"त्यत्र सक्तुसुवर्णयोः

१ शमितेतियुक्तः पाठः।

संस्कार्यत्वाभावादिति शङ्कायां संस्कारस्वरूपं शोधयति "संस्कारो ही"ति । द्विनामाभ्यां[1] प्रसिद्धिः प्रतियोग्यभ्युपगम एव सूच्यते । अपिचेतिशब्दनेकाव्यवतुल्यरूप एकशब्दो वा । यद्यपि सत उत्कर्षाधानं संस्कार इति भूतभाव्युपयोगिसंस्कारानुगतलक्षणं, तथापि स्वाध्यायस्य भूतोपयोगित्वासंभवात् भाव्युपयोगिसंस्कारलक्षणमत्रोक्तं, संस्कारलक्षणानुपपत्त्या "सक्तून् जुहोती"त्यादिषु प्रत्ययस्वारस्यावगतमपि कर्मत्वं भग्नमिति भावः । अत्र तु न तथाऽनुपपन्नमित्याह "संस्कार्यत्वं चे"ति । चः शङ्कानिवृत्तौ । कुत इत्यत्राह-

सू० धर्मार्थकाममोक्षरूपपुरुषार्थचतुष्टयतत्साधनावबोधित्वात्, जपादिना स्वरूपेणापि तत्साधनाच्च ।

टी० "धर्मे"ति । पुरुषार्थचतुष्टयतत्साधनेत्यनेन पूर्वोक्तव्याख्येयैकत्वाय प्रयोजनवदर्थावबोधित्वमनुगतमिति दर्शितं भवति, पुरुषार्थपरत्वं वानुगतम्, धर्मादिषु हि पुरुषार्थत्वमनुगतं, दृष्टतत्साधनयोरुभयोरपि पुरुषार्थत्वात् । यद्यप्यर्थकामतदुपायेषु केचिल्लोकसिद्धाः, तथापि धनेशसुरेश्वरादिविभूतिरूपातिशयितार्थकामतत्साधनानां लोकसिद्धस्य पशुपुत्रादेः स्वर्गादिसाध्यत्वस्य च लौकिकप्रमाणागोचरत्वात् पुरुषार्थचतुष्टयस्य वेदवेद्यत्वोक्तिर्युक्ता । अवबोधित्वात्,-अनुष्ठानौपयिकबोधजनकत्वादिति भावः । अर्थावबोधकत्वस्य हु[2]मादावव्याप्तत्वादाह "जपादिने"ति । स्वरूपेणापि अर्थज्ञानानुष्ठानाभ्यामृते जप्यमानेनाक्षरमात्रेणापीत्यर्थः । आदिशब्दादध्यापनग्रहणम् । अनुष्ठानानुगुणं ज्ञानं, जपादि चाध्ययनसंस्कृतेन स्वाध्यायेनैवेत्युक्तं भवति । यद्वा पुरुषार्थतत्साधनावबोधित्वेन सह तत्साधनत्वं च-शब्देन समुच्चीयते । तत्साधनत्वं द्विधा-जपादिना ध्रियमाणेन स्वरूपेण चेति । अतोऽवान्तरसमुच्चेतव्यसमुच्चयपरोऽपि-शब्दः ।

सू० एवमध्ययनविधिर्मन्त्रवान्नियमवदक्षरराशिग्रहणमात्रे पर्यवस्यति ।

टी० एवं नियमविधित्वं चोपपादितं भवति । अर्थज्ञानपर्यन्तत्वं

१ द्विनामशब्दाभ्यामिति ख० पाठः ।
२ हुम्फडाद्यनर्थकपदेषु नार्थबोधकतेतिभावः ।

किं शब्दस्वारस्यादभ्युपगम्यते? उतार्थानुपपत्त्या? इति विकल्पमभिप्रेत्य तत्र शब्दस्वारस्यं प्रतिबद्ध्नन्नध्ययनविधिनिरूपणमुपसंहरति "एवमि"ति । "मन्त्रवदि"ति । पृथङ्निर्देशो व्रतान्तर्भावेन तदनन्तर्भावेन वाऽध्ययनोपकारकत्वाभिप्रायः । अस्ति हि शन्नोमित्रादिमन्त्राणां व्रताननुप्रवेशेनापि जपमात्रेणोपकारकत्वं, नियमाः पूर्वोक्ताः । यद्वा यथा बालस्य उपनयनकाले सन्ध्योपासनादिकाले च विधीयमानमुच्चारणं नियमवदक्षरपठनमेव नार्थधीसंपादनम् । नहि बालानां मन्त्रार्थावबोधसंभवः, तद्वदिति । "अक्षरराशिग्रहणे"ति, सनियामकोच्चारणमध्ययनशब्दस्य मुख्यार्थः, वेदानां किंचिदधीत्य ब्राह्मणः, एकां शाखामधीत्य श्रोत्रियः, अङ्गाध्याय्यनूचानः, कल्पाध्यायी ऋषिः, कल्पसूत्रप्रवचनाध्यायी भ्रूण इत्यादिप्रयोगात् । नहि स्वशाखैकदेशाध्यायिनोऽर्थज्ञानसंभवः, अङ्गाध्ययनस्य पृथगुपादानेन तद्विरहे अर्थज्ञानप्रसङ्गाभावात् । स्वाध्यायशब्दश्च नार्थज्ञानवाची, अपि तु स्वशाखामात्रवाचीति तत्कर्मत्वं स्वाध्यायस्यैव युक्तं, न त्वर्थज्ञानस्य । अध्ययनस्य प्रयोजनाकाङ्क्षायां दृष्टे संभवत्यदृष्टकल्पनाऽयोगात् । अक्षरग्रहणस्याऽऽसन्नत्वाद्धर्मादिष्वनुगतत्वाच्च तत्स्वीकारो युक्तः । व्यवहितत्वादसार्वत्रिकत्वाच्च नार्थज्ञानमित्यभिप्रायः । सकृदुच्चारणावधिकत्वव्यावृत्त्यर्थमक्षरग्रहणे पर्यवसानमुक्तम् । मात्रचा विधिव्यापारस्यार्थज्ञानपर्यन्तत्वव्युदासः पर्यवस्यतीति । यथा "ऽग्नीनादधीते"ति वाक्यमाधानमात्रपरं नतूत्तरक्रतुविनियोगपरं, यथा च "कारीर्या वृष्टिकामो यजेत" इति वाक्यं वृष्टिसिद्धिपर्यन्तकर्मपरं न तु वृष्ट्युपरितनोपयोगपरं, तथेति भावः । एवं शब्दस्वारस्यादर्थज्ञानपर्यन्तत्वं निरस्तम्, अथाऽर्थानुपपत्तिं परिहरति त्रिधा चाऽनुपपत्तिशङ्का—विधेरक्षरग्रहणमात्रपरत्वे ग्रहणशेषतया विनियुक्तस्य स्वाध्यायस्यार्थपरत्वे प्रमाणाभावादविवक्षितार्थत्वं स्यात्. मीमांसायाः प्रवर्तकाभावादनारम्भणीयत्वं स्यात्, अक्षरराशिग्रहणमात्रस्य दुःखरूपतया विधेः प्रयोजनपर्यवसानं न स्यादिति । एतच्छङ्कात्रयनिराकरणमुखेनाऽध्ययनविधेरर्थज्ञानपर्यन्ततां, तन्निमित्तां विचारानारम्भशङ्कां च व्युदस्यन् वेदाख्यैकप्रबन्धव्याख्यातरूपतया कर्मब्रह्मविचारयोरैकशास्त्र्यमपि दर्शयति । (शेषमग्रे)

Digitized by Google

॥ माधवीयधातुवृत्तिः ॥

(*Continued from page* 280. VOL. VII.)

गोधाशब्दाद्वकापि गोधार इति सिद्धे 'आरगुदीचामि'त्यारग्वचनं ढाडारः पाण्डार इति सिद्ध्यर्थमिति तत्र स्थितम् । जाड्यम् । जडिमा । 'वर्णदृढादिभ्यः ष्यञ्चे'ति ष्यञ् । दृढादित्वात् भावकर्मणोः ष्यञिमनिचौ । जल अपवारण इति चुरादौ ॥ ८८४ ॥

टल ट्वल वैक्लव्ये ॥ टलतीत्यादि चलतिवत् । टट्वाल । टट्वलतुः । ट्वलितेत्यादि । अट्वालीत् । ट्वालः ट्वलः ॥ ८८६ ॥

स्थल स्थाने ॥ स्थानं प्रतिष्ठा । स्थलति । तस्थाल । स्थलिता । अस्थालीदित्यादि । तिस्थलिषति । स्तौतिण्योरेवेति न षत्वम् । तास्थल्यते । तास्थल्ति । स्थालयति । अतिष्ठलत् । स्थलः । स्थालः । स्थलम् । स्थली । जानपदेत्यत्राकृत्रिमायां भूमौ ङीष् । अन्यथा स्थला । स्थाली गौरादित्वात् ङीष् 'विष्ठलम् । विकुशमिपरिभ्यः स्थल'मिति मूर्द्धन्यः । एवं कपिष्ठले गोत्रे 'कपिष्ठलो गोत्र'इति मूर्द्धन्यो निपात्यते । अन्यत्र कपीनां स्थलं कपिस्थलम् ॥ ८८७ ॥

हल विलेखने ॥ विलेखनं कर्षणम् । हलति । जहाल । हलिता । अहालीदित्यादि । हलः । हालः । हलिः । हन् । हलिं गृह्णाति हलयति । अजहलत् । मुण्डमिश्रेत्यादिना गृह्णात्यर्थे णिचि हलिकल्योरत्वनिपातनं सन्वद्भावप्रतिषेधार्थमितीकारस्यात्वे वृद्धौ कृतायामकृतायां वा लोपे ऽग्लोप्यकृमित्यभ्यासस्य सन्वदित्वं न भवति । हलानां समूहो हल्या । 'पाशादिभ्यो य'इति पाशादिपाठात् समूहे यः । हलस्येदं हालिकम् 'हलसीराट्ठगि'ति षष्ठ्यन्तात् इदमर्थे ठक् । हलं वहति हालिकः । बलीवर्दः । 'हलसीराट्ठगि'ति द्वितीयान्ताद्वहतीत्यर्थे ठक् । हलस्य कर्षः हल्यः कर्षणं कृष्यमाणं वा 'मतजनहलात्करणजल्पकर्षेष्वि'ति षष्ठ्यन्तात् कर्षार्थे यत् । द्विहल्या भूः । रथसीताहलेभ्यो यद्विधाविति तदन्तविधिः । न विद्यते हलिर्यस्य असौ अहलः । 'नञ्दुःसुभ्यो हलिसक्थ्योरन्यतरस्या'मिति

Digitized by Google

पक्षे समासान्तः । एवं दुःसुपूर्वादपि । अत्र हलिहलशब्दाभ्यां बहुव्रीहिभ्यां रूपद्वये सिद्धे पक्षे समासान्तविधानं 'शेषाद्विभाषे'ति हल्यन्तात् कन्मा भूदि-ति । यस्माद्बहुव्रीहेः समासान्तो नोक्तः स शेषः । न चात्र हलिशब्दगमर्थ-भेदनिबन्धनं मन्तव्यं, महत् हलं हलिः हलमात्रं त्वन्यदिति नायमर्थभेदः किंचित्करः, यस्मादकारान्तेनापि समासो न दण्डवारित इति प्रकरणा-दिवशेनेवार्थविशेषावगतिः ॥ ७८८ ॥

णल गन्धे ॥ बन्धनइति काश्यपः । प्रणलतीत्यादि नालः, नलः । नाली । प्रणाली । गौरादिः डलयोरेकत्वस्मरणात् । नडः । अव्युत्पन्नं प्राति-पदिकमिति हरदत्तः । नडानां समूहो नड्या । 'पाशादिभ्यो य'इति यः । नडा अस्मिन्देशे सन्तीति नड्वलः । नड्वान् । 'कुमुदनडवेतसेभ्यो ड्मतुप्' । 'नडशादाड्वलच्'इति चातुरर्थिको ड्मतुप् ड्वलच्च । नलिनन्ददधिभ्यामि-नचिति इनन् । बाहुलकादस्मादपि नलिनी । गौरादिषु दर्शनात् जाते-रस्त्रीविषयादिति वा ङीष् । यद्वा नलशब्दात् 'पुष्करादिभ्यो देश'इति मत्व-र्थीयइनो ङीपि द्रष्टव्यः । नलं गन्धं ददातीति नलदं त्वामज्जकम् ॥ ७८९ ॥

पल गतौ ॥ पलतीत्यादि । पलमुन्मानविशेषः । पललं मांसम् । कलत्रपश्चेत्यत्र प्राक्प्रत्ययनिर्देशादन्येभ्यो भवतीति कुण्डलादिवदस्मादपि कलप्रत्ययः । पलालं स्यालपतीत्यालच् बाहुलकादस्मादपि । महत् पलं पली । पिप्पल्यादित्वात् ङीष् । पलालमस्यास्तीति पलालिनः । शाक्रिपलालीदद्रु वा ह्रस्वत्वं चेति पामादिपाठाच्चप्रत्ययो ह्रस्वत्वं च । पाल रक्षण इति चुरादौ ॥ ७९० ॥

बल प्राणने धान्यावरोधे च ॥ प्राणनं जीवनं धान्यमवरुध्यते यत्र कुसूलादौ तद्वातूनामनेकार्थत्वाद्धान्यावरोधनव्यापार इत्यर्थः । बलती-त्यादि । बालं बलम् । करणस्य कर्तृत्वोपचाराच्च । बाला । अजादिपा-ठात् 'वयसि प्रथम'इति ङीपं बाधित्वा टाप् । बलवान् । बलूलः । वातदन्त-बलललाटानामूङ्चेति सिध्मादिपाठात्लच्प्रत्यय ऊङ् चागमः । बलः । पुरु-षः । 'अत इनिठना'विति मत्वर्थे ठन् । बाहुबली । ऊरुबली । 'बलाद्बाहूरु-पूर्वपदादि'ति पुष्करादिपाठादिनिर्मत्वर्थे । सर्वबली । तत्रैव सर्वादेश्चेति पठ्यते । बलिः । इन् बल्यर्थास्तण्डुला बालेयाः । 'छदिरुपधिबलेर्ढञि'ति

हविर्बलिभ्यां विकृतवाचिभ्यां विकृत्यर्थायां प्रकृतौ ठञिति ठञ् । उपधेस्तु स्वार्थेयं प्रत्ययः । कुबेराय बलिः । कुबेरबलिः । चतुर्थी तदर्थेति चतुर्थ्यन्तस्य तदर्थादिभिस्तत्पुरुषः । तदर्थेत्यर्थग्रहणं, तस्मादर्थ तदर्थम् । अन्यानि तु प्रातिपदिकानि । अयं चुरादिर्मित् ॥ ७९१ ॥

पुल महत्त्वे ॥ पोलति । पुपोल । पोलिता । पुपुलिषति । पुपोलिषति । पुलित्वा । पोलित्वा । रलो व्युपधादिति कित्त्वविकल्पः । पोपुल्यते । पोपुलीति । पोपोल्ति । पोलयति । अपूपुलत् । उदुपधादिति भावादिकर्मणोर्निष्ठायाः सेटः कित्त्वविकल्पनात् । पुलितमनेन, पोलितमनेनेत्यादि । पुलः । घयभावे इगुपधलक्षणः कः । पुलकः । संज्ञायां कुन् । पुलिनं बाहुलकादिने गुणाभावः । पुलाकः । बलाकादयश्चेत्याकनन्तो निपातितः । अयं चुरादावपि । तुदादावपीति क्षीरस्वामी ॥ ७९२ ॥

कुल संस्त्याने बन्धुषु च ॥ संस्त्यानं संघात इति स्वामी । क्वचित्तु संतान इति पठ्यते । संतानो विजातीयैरविच्छिन्नः प्रवाहः । बन्धुशब्देन तद्व्यापारः संबन्धोभिधीयते । कोलतीत्यादि, पोलतिवत् । कुलस्यापत्यं, कुलीनः । कुल्यः । कौलेयः । कुलशब्दो वृत्तौ तद्वति वर्तते । कुलात्खः । ‘अपूर्वपदादन्यतरस्यां यड्ढकञा’विति खयड्ढकञः । अत एवापूर्वपदग्रहणम् । खस्तदन्तादपि भवति । ब्राह्मणकुलीनः । महाकुलीनः । ‘महाकुलादञ्खञा’विति अञ्खञौ । अन्यतरस्यांग्रहणानुवृत्तेः खश्चेति माहाकुलः । माहाकुलीनः । महाकुलीन इति भवति । दुष्कुलशब्दात् ‘दुष्कुलाड्ढग्’ति ढक् । दौष्कुलेयः । अत्रान्यतरस्यांग्रहणानुवृत्तेः खे दुष्कुलीनः । कौलेयकः श्वा ‘कुलकुक्षिग्रीवाभ्यः श्वास्यलंकारेष्वि’ति यथासंख्याच्छुन्यभिधेये कुलाड्ढकञ् । अमुष्य कुलस्य भावः आमुष्यकुलिका । मनोज्ञादिपाठाद्वुञ् । ‘आमुष्यायणामुष्यपुत्रिकामुष्यकुलिके’त्युपसंख्यानमिति षष्ठ्या अलुक् । स्वभावात्स्त्रीलिङ्गः । कौलकम् । अयं मनोज्ञादिः । निष्कुलाकरोति पशुम् । ‘निष्कुलान्निष्कोषणे’ इति कृञो योगे निष्कोषणार्थान्निष्कुलशब्दाड्डाच् । निष्कोषणमन्तरवयवानां बहिर्निस्सारणम् । नास्ति कुलमस्य, नकुलः । नभ्राण्नपादिति नञ्प्रकृतिभावः । कुलकम् । श्लोकसंघातः । संज्ञायां वुन् । कुलशब्दात्कन्वा ॥ ७९३ ॥

Digitized by Google

शल हुल पत्लृ गतौ ॥ हुलहिंसा संवरणयोश्च । अत्र मैत्रेयः । चकारोऽत्रान्वाचये गतावस्य तात्पर्यप्रयोगः । क्वचित्तु हिंसासंवरणयोश्चेति । क्वचित्तु पठ्यते । शल हुल स्खल पत्लृ गतौ । हुल हिंसासंवरणयोश्चेति । अत्र पाठे चकाराद्गतौ चेति व्याख्येयम् । हूलतेस्खलतेश्च घटादिपठितस्यापीह पाठो न विकल्पार्थः घटादिपाठस्त्वर्थविशेषे मित्त्वार्थ इति बोद्धव्यम् । शलति । शशाल । शलितेत्यादि । शालः । शाला । हुल इति चलनसंवरणयोर्गतः । होलतीत्यादि । पोलतिवत् । पतति । पपात । पेततुः । पतिता । अपतत् । लृदित्त्वादङ् । 'पतः पुमि'त्यङि परे पुमागमः । पिपतिषति । तनिपतिदरिद्रातीनामुपसंख्यानमिति वा इडागमः । अनिट्पक्षे सनिमीमेत्यादिचतुःसूत्रीविषये अभ्यासलोपार्थमिति स्थितम् अभ्यासलोपोऽनर्थकत्वादन्त्यस्य न भवति । नानर्थकेऽलोन्त्यविधिरिति अन्ये त्वत्र ग्रहणं सर्वाभ्यासलोपार्थमाहुः । तत्र मतेऽभ्यासलोपस्य सनिमीमादिचतुःसूत्रीविषयत्वमधिकाराद्बोद्धव्यम् । पित्सति । पनीपत्यते । पनीपत्ति । नीक्वञ्चिति अभ्यासस्य नीक् प्रणिपतति । नेर्गदेति णत्वम् । अड्व्यवायेपीदमिष्यते । प्रण्यपप्तत् । पतापतः । 'चलिचरिपतिवदीनां द्वित्वमक् चाभ्यासस्ये'ति पचे द्विर्वचनमक् चाभ्यासस्य । उत्पतिष्णुः । अलंकृञित्यादिना इष्णुच् । पतनः । जुचङ्क्रम्येत्यादिना युच् । पातुकः । लषपतेत्यादिना उकञ् । पतत्यनेनेति पत्रम् । दाम्नीत्यादिना करणे ष्ट्रन् । सर्वपत्रं व्याप्नोतीति सर्वपत्रीणः । सार्वादिः, तत्सर्वादेरित्यादिना सर्वपत्रं व्याप्नोतीत्यर्थे खः । सपत्राकरोति सपत्रं शरं मृगकाये प्रवेशयतीत्यर्थः । निष्पत्राकरोति । सपत्रं शरमेपरभागे निष्क्रामयतीत्यर्थः । 'सपत्रनिष्पत्रादतिव्यथन'इति कृञो योगे डाच् । अतिव्यथनमतिपीडा । गेहानुप्रपातमास्ते । 'विशिपतिपदिस्कन्दां व्याप्यमानासेव्यमानयो'रिति कर्मण्युपपदे व्याप्यमानत्वे आसेव्यमानत्वे गम्यमाने णमुल् । तत्र व्याप्तिर्गुणेन च क्रियया वा द्रव्याणां संबन्धः । सा चेह विश्यादिक्रियादिभिर्गेहादिकर्मणः, आसेवा पौनःपुन्यं, तच्च स्वभावात्क्रियायाः । तदयमर्थः । गेहङ्गेहमनुप्रपत्य आस्ते गेहमनुप्रपत्यानुप्रपत्यास्ते इति वा । आसिप्रयोगो धातुसंबन्धे प्रत्ययविधानात् । तत्र व्याप्त्यासेव-

नयोः समासेनैवोक्तत्वान्नित्यवीप्सयोरिति द्विर्वचनं न भवतीति भाष्यादौ स्थितम् । यदा तृतीयाप्रभृतीनीति समासः तदा गेहं गेहमनुप्रपातमास्ते गेहमनुप्रपातमनुप्रपातमिति द्विर्वचनं भवत्येव । तत्र नित्यता पौनःपुन्यं, तच्च क्रियाविषयमिति तत्र क्रियावाचिनो द्विर्वचनम् । वीप्सा तु व्याप्तुमिच्छा, सा च द्रव्यविषयेति द्रव्यवचनस्य । अन्वासेवायामभीक्ष्ण्ये णमुल् चेति क्त्वाणमुलोर्विधानादेव णमुलि सिद्धे पुनर्विधानं तृतीयान्तस्योपपदत्वार्थं तेन पाक्षिकः समासो भवति । क्त्वा निवृत्त्यर्थं तु न भवति दृष्टत्वात्तस्येति हि स्थितम् । आपततीत्यापात्यः । भव्येति निपातनात्यचे कर्त्तरि ण्यत् । वावचनेन यथाप्राप्ताभ्यनुज्ञानादापात्यमनेनेति भावेपि ण्यद्भवति । पतितः । गत्यर्थत्वात्कर्त्तरि क्तः । नरकं पतितः, नरकपतितः । द्वितीयाश्रितेति समासः । स्वर्गात्पतितः । स्वर्गपतितः । अपेतापोढेति पञ्चमीतत्पुरुषः । अल्पश इति वचनात्क्वचित्समासो न भवति । प्रासादात्पतित इत्यादौ अत एव निपातनादिट् । अन्यथा तनिपतीति विकल्पेट्कत्वाद्यस्य विभाषेति इट्प्रतिषेधः स्यात् । अन्ये तु कृतिवृतीनां सेसिचीत्यादिना सकारादाविड्विकल्पनादेव निष्ठायामप्यनिट्त्वसिद्धावनिडर्थमिदित्करणाद्यस्य विभाषेत्यस्यानित्यत्वज्ञापनादित्याहुः । पापतिः । सहिवहिचलिपतिभ्यो यङन्तेभ्यः किकिनाविति किकिनोरन्यतरः । 'अतो लोपः' । 'यस्य हल' इति अल्लोपयलोपौ । अभ्यासस्य नीक् वञ्च्वित्यादिना नीक् न भवति सासह्यादीनां निपातनमिति वार्त्तिककारवचनात् । सन्निपातः । घञ् । तस्य शमनं कोपनं वा. सान्निपातिकम् । सन्निपाताच्चेति वक्तव्यमिति ठक् । पतङ्गः । पतेरङ्गच् पक्षिणीत्यङ्गच् । पतत्रम् । पतेरत्रनित्यत्रन् । पतत्रिः । पतेरक्वेति त्रिन्प्रत्ययः, । अगागमश्च । पतत्रिशब्दः पतत्रशब्दादिनो मत्वर्थे । पातालम् । पतिचण्डिभ्यामालञित्यालन्, बाहुलकाद् वृद्धिः । केचिद्वृद्ध्यर्थमालञिति पठन्ति । तद्युक्तादित्यत्राण्प्रकरणे कुलालवरुडकर्मारनिषादचण्डालमित्रामित्रेभ्यः छन्दसीति चण्डालात्स्वार्थेण्विधानादयुक्तम् । पताका पिनाकादिर्बलाकादिर्वा आकप्रत्ययान्तः । पताकी । मत्वर्थीय इनिः व्रीह्यादित्वात् पन्थाः । पतेस्थ चेतीन्प्रत्ययः तकारस्य

Digitized by Google

अकारः । ‘पथिमथ्यृभुक्षामात्’ इति आकारादेशोऽन्त्यस्य सौ परे ‘इतोऽत्सर्वनामस्थाने’ इति पथ्यादीनामिकारस्याकारे सवर्णदीर्घः । ‘थोन्थ’ इति पथिमथोस्थस्य न्थादेशः सर्वनामस्थाने । पन्थानौ । सर्वनामस्थाने दीर्घः । असावजादौ पथ इत्यादि । ‘भस्य टेर्लोपः’ भसंज्ञकानां पथ्यादीनां टेर्लोप इति लोपः हलादौ नलोपः पथिभ्याम् । विपथम् । कापथम् । ‘कुगतिप्रादय’ इति तत्पुरुषः । ‘का पथ्यक्षयो’ रिति पथ्यक्षयोरुत्तरपदयोः कुशब्दस्य कादेशः । त्रयाणां पन्थाः त्रिपथम् । ‘ऋक्पूरब्धूः’ रिति समासान्तोऽकारः । ‘नस्तद्धित’ इति टिलोपः । पथः संख्याव्ययादेरिति नपुंसकत्वम् । इदञ्च परवल्लिङ्गतापवाद इति विपथो देशः । विपथा नगरी । बहुव्रीहौ न भवति । यथा पन्थानमतिक्रान्तोऽतिपथ इत्यादौ । ‘अत्यादयः क्रान्ताद्यर्थे द्वितीयये’त्यादिना तत्पुरुषेपि न भवति । अत्र हि ‘द्विगुप्राप्तापन्नालंपूर्वगतिसमासेषु प्रतिषेध’ इति परवल्लिङ्गता प्रतिषिध्यते । ‘पथः संख्याव्ययात् पर’ इति यदमरसिंहेन नपुंसकत्वमुक्तं तदप्युत्तरपदार्थप्राधान्य एव तथा च तत्र व्याख्यातारः प्रधानलिङ्गापवादत्वात् क्लीबविधानप्रस्तावादिह न भवति । अपथो नगरी । उत्पथो देश इति । कथं तर्हि व्यध्वो दुरध्वो विपथः कदध्वा कापथः समा इति । विपथकापथयोः पुंस्त्वमुक्तम् तत्रैवं व्याख्येयम् । अस्त्यन्योऽकारान्तः । पथिपर्यायो पथशब्दोऽर्द्धर्चादिपाठादुभयलिङ्गः । तेन समासात् पुँस्त्वमिति विपथकापथौ पुन्नपुंसकाविति चाहुः सुभूतिचन्द्रादयः । पठितश्च [illegible] अकारान्तः पथशब्दः । पथः पन्थाश्च मार्गः स्यादिति शाक्यमुनिस्तु संख्याव्ययाभ्यां परस्य पथशब्दस्य पुंस्त्वमेवाह । तत्पथः संख्याव्ययात् पर इति वार्त्तिकविरोधात् तत्रत्यभाष्यकैयटवृत्त्यादिमहाग्रन्थविरोधादमरविरोधाच्च चिन्त्यम् । अत्र कृतसमासान्तस्य निर्देशा‘न पूजनात्’ ‘किमः क्षेपे’ ‘नञस्तत्पुरुषा’दि’ति यदा समासान्तो निषिध्यते तदा परवल्लिङ्गमिति पुंस्त्वमेव । सुपन्थाः । किंपन्था इति न पूजनादित्यत्र स्वत्योः परिगणनात् सत्पथ इत्यादौ समासान्तो भवति । अव्ययीभावश्चेत्यत्र सुपथमिति यदुदाहरणं तत्र सुशब्दस्य वैपुल्यमर्थो न पूजेति समासान्तलाभः अपथमित्यत्र

'नञस्तत्पुरुषादिति' निषेधस्य पथो विभाषेति विकल्पनात् समासान्तः 'अपथं नपुंसक'मिति नपुंसकत्वम् । 'पथः संख्याव्ययादे'रित्येव सिद्धे किं सूत्रेणेत्याशङ्कायां कैयटः पूर्वकालत्वान् सूत्रस्य नायं दोष इति यदुक्तं अस्त्यकारान्तः पथशब्द इति तत् 'पथो विभाषे'ति सूत्रविरुद्धम् सति हि तेनापथमिति सिद्ध्यति नञ्पूर्वो वा ऽपन्था इति तत्किं सूत्रेण । पथि जातः पन्थकः । पथः पन्थ चेति सप्तम्यन्ताज्जातेऽर्थे वुन् पथश्च पन्थादेशः । पथो ऽनपेतं पथ्यम् । 'धर्मपथ्यर्थन्यायादनपेत'इति पञ्चम्यान्तादनपेते ऽर्थे यत् । पथि साधु पाथेयम् । पथ्यतिथीति ढञ् । पन्थानं गच्छतीति पथिकः । पथिकी । 'पथः ष्कन्'चे'ति द्वितीयान्ताद्गच्छतीत्यर्थे ष्कन् षित्त्वात् स्त्रियां ङीष् । पन्थानं नित्यं गच्छतीति विवक्षायां 'पन्थो णनित्यमि'ति णप्रत्यये पान्थः । अत एव निर्देशात् सन्नियोगेन पन्थादेशः । शतपथमधीते वेद वा शतपथिकः । एवं षष्टिपथिकः । शतषष्टेः पथः षिकन्चेति द्वितीयान्तात् षिकन् अध्येतृवेदित्रोः षित्त्वात् स्त्रियां शतपथिकी । पन्थानं पन्थानं प्रति प्रतिपथम् । अव्ययं विभक्तीत्यादिना वीप्सायामव्ययीभावः । पथोऽभिमुखमिति वा प्रतिपथम् । 'लक्षणेनाभिप्रती आभिमुख्य'इति लक्षणं चिन्हं तद्वाचिना ऽभिप्रतीआभिमुख्ये गम्यमाने समस्येते स चाव्ययीभावसमास इति । प्रतिपथमेति प्रतिपथिकः प्रातिपथिको वा । 'प्रतिपथमेति ठंश्चे'ति द्वितीयान्तादेतीत्यर्थे ठन्ठञौ । पन्थानं प्रतिगच्छतीति समासेनाभिधानाभावेमौ प्रत्ययाविति व्याख्यातारः । सर्वपथं व्याप्नोति सर्वपथीनः पथिकः । तत् सर्वादेरिति खः । उत्तरपथेनाहृतं गच्छति वा औत्तरपथिकः । उत्तरपथेनाहृतं चेति तृतीयान्ताद्गच्छत्यर्थे ठञ् आहृतप्रकरणे वारिजङ्गलस्थलकान्तारपूर्वादुपसंख्यानाद्वार्यादिपूर्वपदादपि ठञ् भवति । वारिपथिकमित्यादि । आजिपथिकः शाङ्कुपथिकः । अजपथशङ्कुपथाभ्यां चेति तेनाहृतमित्यत्र विषये ठञ् । स्थलपथेनाहृतं मधुकं मरिचं वा स्थालपथम् । मधुकमरिचयोरण् स्थलादिभ्य इत्यण् । देवपथ इव प्रतिकृतिर्देवपथः । 'इवे प्रतिकृता'विति इवार्थे सादृश्ये वर्त्तमानात् प्रथमान्तात्कन् तस्य सदृशस्य प्रतिकृतित्वे सतीति सूत्रार्थः । तदेतदुक्तं भवति । प्रतिकृतिरूपे सदृशे वर्त्तमानात्

कथितिति कन् । देवपथइव कश्चिद् देवपथः । सत्संगइवेतीत्यर्थे वर्तमानात् कन् । उभयत्र देवपथादिभ्यश्चेति कनो लुक् । परिपन्थशब्दस्तु परिपथपर्यायो ऽव्युत्पन्नः । उक्तं च । परिपन्थं च तिष्ठतीत्यत्र वृत्तौ समर्थविभक्तिकरणे पुनर्द्वितीयोच्चारणं लौकिकवाक्यप्रदर्शनार्थं परिपथशब्दपर्यायः परिपन्थशब्दोऽप्यस्तीति ज्ञापयति स विषयान्तरे ऽपि प्रयोक्तव्य इति । एवं पथः पन्था इव मार्गः स्यादिति काशिकाशेषे पथिपर्यायो ऽयं पथशब्द उक्तः । स नास्तीति प्रतीयते । सति हि परिपथशब्दवत् परिपन्थशब्दस्यापि सिद्धेः किं ज्ञापकवर्णनेन । 'पन्थो ण नित्य'मित्यत्र प्रत्ययसन्नियोगेन पथः पन्थादेशकथनं प्रकृत्यन्तराभावएव घटते । अयं कथादावपि ॥ ७९६ ॥

क्वथे निष्पाके ॥ क्वथति । चक्वाथ । क्वथिता । अक्वथीत् । क्वाथः । क्वथयतीति घटादिपाठात् ॥ ७९७ ॥

पथे गतौ ॥ पथति । पपाथ । पेथतुः । अपथीत् । पथः । पाथः । पथि गताविति चुरादौ ॥ ७९८ ॥

मथे विलोडने ॥ मथति । ममाथ । मेथतुः । अमथीत् । माथो मथः । क्ष्ण्यादीनां चयसाममेदित्वात् ह्म्यन्तेति न वृद्धिः । दण्डमाथं धावति दाण्डमाथिकः । माथः । मन्थाः । दण्डइव रज्जुरित्यर्थः । 'माथोत्तरपदपदव्यनुपदं धावति' एभ्यो द्वितीयान्तेभ्यो धावतीत्यर्थे ठगिति ठक् ॥ ७९९ ॥

टुवम उद्गिरणे ॥ उद्गिरणमन्तर्गतस्य मुखान्निःसारणम् । अत्र सुधाकरः उद्गिरणइति पठन्निपातनात् तत्र इद्वृतेरित्याह । वमति । ववाम । ववमतुः । वादित्वाच्चेत्वाभ्यासलोपौ । भागवृत्तौ त्वनयोर्विकल्पेन वेमतुरित्युदाहृतं, तद्भाष्यादिषु चिरन्तनेषु ग्रन्थेषु कुत्रापि न दृष्टम् । वमिता । अवमीत् । ह्म्यन्तेति न वृद्धिः विवमिषति । वंवम्यते । वंवन्ति वंवान्तः । हेरपित्वात् ङित्वादनुनासिकस्येति दीर्घेऽनुस्वारे वंवांहि । अवंवन् । वमयति । वामयति 'ग्लास्नावनुवमामनुपसर्गाद्वे'ति मित्त्वनिषेधः । वामः । नोदात्तोपदेशस्येति वृद्धिनिषेधस्य आचमिकमिवमीनामिति निषेधः । वान्तः । वान्तवान् आदितश्चेति चकारस्यानुक्तसमुच्चयार्थतया निष्ठायामनिट्त्वमिति वृत्तौ । भाष्यवार्त्तिकयोरनुक्तमपीदं प्रयोगबाहुल्यादुक्तमिति हरदत्तः तदेवं काश्यपादीनामुदित्पाठः प्रत्युक्तः । वमथुः । ट्वित्वादथुच् ॥ ८०० ॥ (शेषमग्रे)

॥ खण्डनखण्डखाद्यम् ॥

(*Continued from page* 296. Vol. VII.)

मू॰ [a]"अस्तु वा प्रश्नोऽयं यथातथा, श्रुतिरेवाद्वैते प्रमाणमिति ब्रूमः । श्रूयते खलु "एकमेवाद्वितीयं नेह नानास्ति किंचन" इत्यादि । [b]श्रुतिप्रामाण्यं सिद्धार्थप्रामाण्यं चेश्वराभिसन्धौ साधयिष्यते । [c]सिद्धार्थानां(१)श्रुतीनामन्यपरत्वमपि यदि स्यात्तथापि पद(२)समन्वयबलेन तासु प्रतीयमानमर्थमबाधितमादायैव तासामन्यपरिभवनात्(३), [d]धियां स्वतःप्रामाण्यस्य बाधकैकापोद्यत्वात् ।

टी॰ एतेनैवानुशयेनाह—। [a]'अस्तु वे'ति ॥ नन्वनृत(४)व्याघातपुनरुक्तादिदोषेभ्यः श्रुतीनामेव न प्रामाण्यं, प्रामाण्ये वा सिद्धार्थश्रुतीनां न प्रामाण्यं, विधिप्रत्ययसमभिव्याहृतवाक्यस्यैव ज्ञानद्वारा व्यवहारजनकत्वेन प्रवर्तकज्ञानं प्रति सामर्थ्यावधारणात्; नच 'एकमेवाद्वितीयं ब्रह्म" इत्यादिश्रुतीनां कार्योपराग(५)स्तथाच न प्रामाण्यमित्यत आह—। [b]"श्रुती"ति ॥ ननु, यत्परः शब्दः स शब्दार्थः, न त्वासां श्रुतीनां ब्रह्माद्वैतपरत्वं,

(१) सिद्धार्थानाम्=अहेयानुपादेयार्थप्रतिपादिकानाम् ।

(२) पदानामेकमेवाद्वितीयमित्यादीनां य उपक्रमादिभिर्लिङ्गैरवगम्यमानं समन्वयस्तात्पर्यं तदभिधायित्वं तद्बलेनेत्यर्थः ।

(३) अन्यस्य द्वैतावगाहिप्रत्यक्षादेः परिभवनात् तिरस्करणादित्यर्थः । अनन्यपरिभवनादित्यपि क्वचित्पाठः, तत्राद्वैतैकमात्रपरत्वादित्यर्थः ।

(४) अनृतदोषो यथा पुत्रकामेष्टौ 'पुत्रकामः पुत्रेष्ट्या यजेते'ति, नेष्टौ संस्थितायां पुत्रजन्म दृश्यते । दृष्टार्थस्य वाक्यस्यानृतत्वाददृष्टार्थमपि वाक्यम् 'अग्निहोत्रं जुहुयात् स्वर्गकाम'इत्याद्यनृतमिति ज्ञायते । विहितव्याघातदोषस्तत्र 'उदिते होतव्यमनुदिते होतव्यमि'ति विधाय 'श्यावोऽस्याहुतिमभ्यवहरति य उदिते जुहोति, शबलोऽस्याहुतिमभ्यवहरति योऽनुदिते जुहोती'ति । पुनरुक्तदोषो यथा अभ्यासे दृश्यमाने 'त्रिः प्रथमामन्वाह त्रिरुत्तमाम्' इति ।

(५) कार्योपरागः=क्रियोपरागः, हेयोपादेयार्थप्रतिपादकत्वमिति यावत् ।

Digitized by Google

किं तर्हि, मुमुक्षुणा ब्रह्मैवैकमुपासनीयमित्यत्र तात्पर्यं, तथाचोपासनाया-मेवासां प्रमाणत्वं, नतु ब्रह्माद्वैतेपीत्यत आह–। "सिद्धार्थानामि"ति। विशेषणं(1)चैतत् प्रकृतश्रुत्यपेक्षया। "एकं, ब्रह्म" इतिपदसमन्वयबलेन प्रतीयमानोर्थः स चोपासनापरत्वेप्यबाधित एव वाच्य इत्यर्थः॥ ननु "आदित्यो यूपो यजमानः प्रस्तरः"–इत्यादौ पदसमन्वयबललभ्यसामानाधिकरण्य-श्रुतेरप्रामाण्यं यथा, तथाऽस्याः किं नेत्यत आह–। [d] "धियामि"ति। तत्र तत्र बाधकात् प्रतीयमानोर्थस्त्यज्यतेऽत्र न बाधकमित्यर्थः॥

मू॰ * [a] ननु, (2)नाऽद्वैतश्रुतीनामभूतार्थे(3)प्रामाण्यं संभवति, प्रत्यक्षादिबाधात्; ततस्ता [b] न्यथैव क्वचित्तात्पर्यं कल्प्य-म *?। मैवम्। यदद्वैतश्रुतेर्बाधकं प्रत्यक्षादि मन्यसे तदात्मीये विषये घटपटादेर्भेदे नियत एवोत्पद्यते, [c] ननु प्रत्यक्षादिकं भूतभाविवर्त्तमानसकलव्यक्तिभेदग्राहि जाय-मानमावयोः सम्प्रतिपन्नमस्ति, [d] तादृशेन ज्ञानेन चोत्प-द्यमानेन सर्वज्ञतां तदा तव श्रद्दध्यां यदि जानासि मम चेतसि किं वर्त्तत इति। [e] यदि च प्रत्यक्षादि किंचिन्मात्र-विषयं, तदा तद्विषयादन्यत्रापि प्रवर्त्तमानाऽद्वैतश्रुतिस्तेन न बाधितुं शक्यते, स्वविषयमात्रे प्रमया विपरीतविषयज्ञा-नबाधनात्; अन्यथाऽतिप्रसङ्गात्। [f] मा हि भूद्(4)अग्नी-षोमीयपशवालम्भनविधिना सर्वभूताहिंसाश्रुतेर्वैयर्थ्यम्।

(1) ननु, 'सिद्धार्थानामि'त्येतद्विशेषणं व्यर्थं, यावता क्रियाऽभिधायिनीनामपि श्रुतीनां तात्पर्यतो ब्रह्मण्येव समनुगतत्वेनाऽबाधितार्थमादायैवाऽन्यपरिभावकत्वं भवता प्रसाधनीयमित्यत आह–विशेषणं चैतत्प्रकृतश्रुत्यपेक्षयेति। प्रकृतश्रुतिस्तु–"एकमेवाऽद्वि-तीयमि"त्यादिरूपा।

(2) { अद्वैतश्रुतिबाधाय नाध्यक्षादि प्रकल्प्यते। }
{ अन्याऽन्यविषयत्वेनेत्येतत्प्रस्तावयत्यय ॥ }

(3) अभूतार्थे=सिद्धार्थे।

(4) अतिप्रसङ्गमेव स्फुटयति–मा हि भूदिति। माभूदिति तु शिक्षाक्षामता-

Digitized by Google

टी० ननु, प्रकृतेपि बाधकमस्तीति शङ्कते–। [a]"नन्वि"ति ॥ [b]"प्रत्यक्षे"ति । ईश्वरैकत्वं वा ब्रह्मनेकोपास्यत्वं वा प्रतिशरीरमेकैकात्मत्वं वा यद्ग्राह्यं तत्रैव च सामर्थ्यमित्यर्थः ॥ ननु, घटपटमात्रभेदविषयकं प्रत्यक्षं श्रुतिबाधकमिति नोच्यते, किंतु सामान्यलक्षणया प्रत्यासत्त्या सकलपदार्थभेदविषयकमेकं प्रत्यक्षमिष्यते, तत्कुक्षिस्थितानां[1] भेदाभेदानां न किंचिद्बयं श्रुतिहानिकृत्या इत्यत आह–। [c]"नतु प्रत्यक्षादिकमि"ति । स्वयेश्यमाणत्वमतन्त्रमित्यर्थः ॥ तादृशज्ञाने प्रमाणाभावमाह–। [d]"तादृशेने" ति ॥ ननु, घटपटादिनियतविषयमेव प्रत्यक्षं श्रुतिबाधकमस्तु किमत्याहित[2]मित्यत आह–। [e]"यदी"ति ॥ [f]"मा हि भूदि"ति । "न हिंस्यात्सर्वा भूतानि"–इत्येका श्रुतिः, "अग्नीषोमीयं पशुमालभेत"इत्यपरा, तत्र यथानयाऽग्नीषोमीयपशुविषयाऽहिंसाश्रुतिर्बाध्यते नत्वन्यत्रापि, विषयभेदादित्यर्थः ॥

मू० [a]"यदा चैवं, तदा बाधिकायाः प्रत्यक्षधियो बाध्यायास्त्वाऽद्वैतबोधने श्रुतिर्निराबाधा सती तयोरैक्यं बोधयतीति तत् प्रत्यक्षादि कथं स्वात्मान[3]मेव बाधेत। [b]घटेन[4], पटेन, तद्भेदेन च स्वविषयेण सह तस्या एव धियः श्रुत्या सर्वस्याद्वैतं गोचरयन्त्या कथं नाभेदे प्रामाण्यमासादयि-

भिमतः पाठः । विरुद्धार्थग्राहितामात्रेण बाधकत्वमेकविषयत्वाभावेपि चेदिष्टं तदा विषयत्वेन तदभावविषयत्वस्य विरोधात्पश्वालम्भनविधिना सर्वभूताऽहिंसाविधेर्वैयर्थ्यं=निर्विषयत्वमप्रामाण्यं स्यात्तन्माभूदित्यर्थः ।

(१) तत्कुक्षिस्थितानाम्=सामान्यलक्षणाप्रत्यासत्तिकुक्षिनिविष्टानाम् ।

(२) अत्याहितम्=भयम् "अत्याहितं महाभीति"रिति कोशात् । अस्यैवार्थस्याऽविज्ञानात्प्रायः पुस्तकेषु 'किमत्याहितमि'ति प्रकल्पितः पाठो दृश्यते ।

(३) बाध्यबाधकधियोरैक्ये बाध्यायाः श्रौतधियो बाधने प्रत्यक्षेण स्वात्मन एव बाधः कृतः स्यादिति भावः ।

(४) घटेनेति, सर्वस्याऽद्वैतं गोचरयन्त्या श्रुत्या घटेन, पटेन, तद्भेदेन च स्वविषयेण (घटपटौ भिन्नावित्येवंविधभेदग्राहिप्रत्यक्षविषयेण) सह तस्या धियः (भेदग्राहिप्रत्यक्षधियः) अभेदबोधने प्रामाण्यं कथं नासादयितव्यम्–इत्यन्वयः ।

तव्यम्, तत्राबाध्यमानत्वात् । [c] 'नहि(१)तस्या धियः स्वात्मा वा, स्वात्मना सह घटपटादेर्भेदोऽपि वा, विषयः। [d] 'घटपटौ(२) भिन्नावि'त्येवमाकारा हि सा जायते, नतु 'अहं घटात् पटाच्च भिन्ना, मत्तो वा तौ भिन्नौ'—इति। [e] 'स्वप्रकाशतापि स्वमात्रे साक्षिणी, नतु यतो यतः प्रकाशो भिद्यते ततस्ततस्तस्य भेदेऽपि। [f] 'अन्यथा तत्तदपि स्वप्रकाशकुक्षौ निक्षिपन्ती न कथमद्वैत एव पर्यवस्यन्ति ।

टी० ननु, समाने एव विषये बाध्यबाधकभावोऽस्तु किमेतावतेत्यत आह—। [a] "यदा चे"ति। बाध्यबाधकधियोरैक्ये बाध्यबाधकभावाऽभाव एवेत्यर्थः ॥ बाधकाभिमतप्रत्ययस्य विषयेण सहाऽभेदः श्रुतिविषय इत्याह—। [b] "घटेने"ति ॥ तदेवोपपादयति—। [c] "नही"ति ॥ कथमेवमत आह—। [d] "घटपटावि"ति ॥ मीमांसकशङ्का(३)मपनयति—। [e] "स्वप्रकाशते"ति ॥ ननु, यतो यतः प्रकाशो भिद्यते तत्सर्वं स्वप्रकाशज्ञानविषय एवेत्यत आह—। [f] "अन्यथे"ति ॥ स्वप्रकाशबलेन तत्सर्वं तदा भासेत यदि तदपि स्वं भवेत् तथा च स्वभिन्नस्यापि सर्वस्य स्वप्रकाशज्ञानात्मत्वे पुनरद्वैतमेव पर्यवस्येदित्यर्थः ॥

ख० * [a] नच तया धिया स्वस्य, स्वविषयस्य च, स्वरूपावगाहने स्वरूपलक्षणो भेदः प्रकाशित एव स्यादिति वाच्यम् *, "पुरोवर्त्ति रजतमि"ति भ्रान्तौ पुरोवर्त्यात्मनो रजतात्मनश्च प्रकाशे भेदग्रहापत्तेः । [b] धर्मविशेषमन्तर्भाव्य स्वरूपस्य भेदत्वे धियोऽपि तथा स्यादिति सैव धीर्न तत्प्र-

(१) नहीति, स्वविषयघटभेदग्रहणोऽयतः स्ववृत्त्यापातादित्यर्थः ।

(२) घटपटाविति. यदाकारा बुद्धिर्जायते तदाकारवानेवार्थस्तद्विषय इति नियमाद्बुद्धिधर्मिकबुद्धिप्रतियोगिकभेदाकारत्वाभावादनया तत्सर्वं भासत इत्यर्थः ।

(३) बुद्धेः स्वप्रकाशत्वात्स्वभेदग्राहकत्वमुपपद्यते इति मीमांसकशङ्का ।

कापस्तस्मिन्सन्निकर्षाद्यपेक्षायां धियः प्राक् तदसंभवा-त। [c] *आत्मवदात्मधर्मोऽपि सन्निकर्षानपेक्षा सा *?—इति चेन्न, [d] ग्रहणत्वस्मृतित्वप्रमात्वादावपि तथैव स्यादिति ।

टी० ननु, स्वप्रकाशज्ञानस्य स्वं विषय इति विषयाद्(१)घटपटादेः स्वस्य स्वरूपभेदः कथं न विषयो भवेदित्यत आह—। [a] "नचे"ति । स्वरूपभेदग्रहस्याऽभेदग्रहपरिपन्थित्वे भ्रमः क्वापि न स्यात्तस्य(२) ते आरोप्यारोपविषयग्रहपूर्वकत्वात्, तस्य चारोपपरिपन्थित्वादित्यर्थः ॥ ननु, स्वरूपमात्रं न स्वरूपभेदः, किंतु परस्परवैधर्म्यविशिष्टं स्वरूपं, तच्च शुक्ति-रजतयोर्न गृहीतमिति नारोपानुपपत्तिरित्यत आह—। [b] "धर्म्मे"ति । तर्हि धियोऽपि स्वरूपमात्रं न भेदः, किंतु वैधर्म्यालिङ्गितं स्वरूपं, वैधर्म्यं च स्वस्य(३) प्रकाशत्वेपि न स्वविषयः, किंतु संयुक्त(४)समवेतसमवायेन प्रत्या-सत्त्या मनसा तद्ग्रहो भवेत्, नच(५)स्वोत्पत्तेः पूर्वं स्वघटितसंयुक्तसमवेत-समवायः प्रत्यासत्तिः संभाव्यते इत्यर्थः ॥ ननु, यथा प्रत्यासत्तिमन्तरेण स्वग्रहस्तथा स्वधर्मग्रहः स्यात् को दोष इत्यत आह(६)—। [c] "आत्मवदि" ति ॥ [d] "ग्रहणत्वे"ति । तथाच ग्रहणत्वस्मरणत्वसंशयो न स्यान्न स्याच्च प्रामाण्याऽप्रामाण्यसंशय इति भावः ॥

मू० [a] तदेवं सा बुद्धिः श्रुत्या घटपटात्मतया व्यवस्थाप्यमाना

(१) घटपटादेर्विषयादित्यन्वयः ।

(२) तस्य=भ्रमस्य, आरोप्यारोपविषयग्रहपूर्वकत्वात्,=आरोप्यं रजतादिरारोप-विषयोऽधिष्ठानं शुक्त्यादिस्तदुभयस्मरणग्रहणपूर्वकत्वात्, तस्य च=आरोप्यारोपविष-यस्वरूपभेदग्रहणस्य च, आरोपपरिपन्थित्वात्=भ्रमपरिपन्थित्वेन त्वयाङ्गीकारादित्यर्थः ।

(३) स्वस्य=ज्ञानस्य, प्रकाशरूपत्वेऽपि न ज्ञानविषय इत्यर्थः ।

(४) मनःसंयुक्त आत्मा, तत्समवेतं ज्ञानं, तत्र समवायो ज्ञानत्वादेर्वैधर्म्यस्ये-त्यर्थः ।

(५) नच ज्ञानोत्पत्तेः पूर्वं ज्ञानघटितनिरुक्तप्रत्यासत्तिरित्यर्थः । अयं भावः—स-न्निकर्षस्य बुद्धिजन्मार्थत्वाद्बुद्धेः प्रागेवासौ वक्तव्या न च तत्संभवति बुद्ध्यभावे तत्समवे-तधर्मसन्निकर्षासंभवादन्यथाऽन्योन्याश्रयादित्यर्थः ।

(६) इत्यत आह, 'इति चेन्न'—इत्यन्तं सिद्धान्त्याहेत्यर्थः, अत आत्मवदित्यादेः पूर्वपक्षग्रन्थत्वेऽपि नाऽयुक्तिः । एवमग्रेऽप्येवंविधस्थलं ज्ञेयम् ।

Digitized by Google

कथमात्मनः(१)स्वस्मादेव भेदे प्रमाणीभवितुं प्रभवतीति b बाधिकायां बुद्धौ घटपटयोर्भेदे प्रमात्वाभावमासादयन्त्यां श्रुतिस्तत्र(२) तत्राप्रतिद्वन्द्वित्वाऽसङ्कुचितस्वतःप्रामाण्यबललब्धतत्तदर्थैक्यान्यथानुपपत्तिसहायसम्पदाऽजय्या तयोरप्यभेदं बोधयन्ती न प्रतिहन्तुं शक्येत न(३) क्वचिदपि प्रतिहतप्रसरा सती सर्वाद्वैतप्रमापिकेति। c भेदप्रमान्यथानुपपत्त्या च वैपरीत्यमशक्यम्।

टी० ननु, तया धिया स्वस्य स्वरूपभेदोऽपि मा गृह्यतां किमनिष्टमित्यत आह—। a "तदेवमि"ति। घटपटभेदग्राहकं यत्प्रत्यक्षं तद्यदि श्रुत्या घटपटाभिन्नं कृतं तदा घटपटभेदग्राहकतैव तस्य न निर्वहेदित्यर्थः। ननु, घटपटयोर्भेदे सा धीः प्रमाणमतस्तद्भयेन श्रुतिस्तत्र कथं प्रवर्तेत तथाच घटपटौ विहायाऽन्यत्राद्वैतं सिद्ध्यति न तु तयोरपीत्यत आह—। b "बाधिकायामि"ति। घटपटभेदग्राहिणी या बुद्धिस्तया सह घटपटयोरभेदं गृहीतवती श्रुतिः घटपटयोरभेदमन्तरेणानुपपद्यमाना तयोरप्यभेदमावेदयति। किंच, पटाभिन्नबुद्ध्यभिन्नत्वाद् घटोऽपि पटाऽभिन्नः साधयितुं पार्यते एवेति तदु(४)पष्टम्भोऽपि श्रुतेः। न चास्याः परग्राह्यं प्रामाण्यं, येन तदादायापि द्वैतं निर्वहेदिति न किंचिदस्याः श्रुतेः परिपन्थीत्यर्थः। ननु, घटपटभेदप्रमैव तद्भेदमन्तरेणानुपपद्यमाना सर्वत्र श्रुतिमपसारयिष्यतीत्यत आह—। c "भेदप्रमे"ति॥

---

(१) आत्मनः=स्वाभिन्नघटस्य, स्वस्मात्=स्वाभिन्नघटादित्यर्थः।

(२) बाध्यबाधकबुद्ध्योर्बाध्यबुद्धेरेव स्वविषये भेदबोधने ऽप्रतिद्वन्द्वित्वादसङ्कुचितत्वं तत्स्वतःप्रामाण्यं चेति तथोक्तम्, तस्य बलं=सामर्थ्यं, तेन लब्धमप्रतिद्वन्द्वितयाऽसङ्कुचितस्वतःप्रामाण्यबललब्धं, तच्च तत्तदर्थस्यैक्यं चेति तथोक्तं, तस्य यान्यथानुपपत्तिः सैव सहायस्तस्य संपत् तया ऽजय्या क्वचिदपि प्रतिहन्तुं न शक्येति सर्वाद्वैतप्रमापिकेत्यर्थः।

(३) श्रुतिः क्वचिदपि प्रतिहतप्रसरा न सती सर्वाऽद्वैतप्रमापिकेति सम्बन्धः।

(४) घटपटाभेदावगमोऽपि विषयतया श्रुतेरावश्यकमित्यर्थः।

मू० a"तत्राद्वैतश्रुत्या सन्दिह्यमानस्य प्रमात्वस्यैवासिद्धेः, b भेदधीमात्रस्य च द्विचन्द्रादिबोधवदन्यथाप्युपपत्तेः ।

टी० श्रुतिप्रामाण्यमुभयसिद्धं, प्रत्यक्षप्रामाण्यं चान्यतरमात्रसिद्धमिति परिपन्थिश्रुतिदर्शनात्तत्रापि तत्र(१)सन्देहः स्यादिति भेदप्रमान्यथानुपपत्तिर्दुर्बला न श्रुतिपरिपन्थिनीत्याह–। a"तत्रे"ति ॥ ननु सन्दिह्यतां प्रामाण्यं, भेदज्ञानमगृहीतप्रामाण्यमेव श्रुतिबाधकं स्यादित्यत आह–। b"भेदे"ति । अन्यथासिद्धिशङ्काकलङ्कितस्य न विरोधिज्ञानप्रतिबन्धकत्वमित्यर्थः । अत्र, यद्यपि (२) सर्वभूताहिंसाश्रुतिरग्नीषोमीयपश्वालम्भनबोधिकया श्रुत्या सङ्कोच्यते न तु बाध्यते, प्रत्यक्षेण तु प्रवृत्तमात्रेणाद्वैतश्रुतिर्बाध्यत एवातो न क्वाप्यस्याः प्रसरः, नहि 'घटपटौ भिन्नौ' 'एकमेवाद्वितीयं ब्रह्म'–इति ज्ञाने संभवतो विरोधात् । * देवः पशुर्हिंस्यः सर्वभूतमहिंस्यमित्यनुपपन्नम् *?–इति चेत्तत्र सर्वपदभूतपदयोर्विषयसङ्कोचेन देवपशुभिन्नं सर्वमहिंस्यमिति सामञ्जस्यसंभवात्, इह 'घटपटभिन्नं सर्वमेकमि'तिसमञ्जसे(३) क्रियमाणे महदसमञ्जसं, त्वदभ्युपगताद्वैत(४)भङ्गात् । * क्रमेण(५) तयोरप्यभेदोपपत्त्या पर्यवस्येत् *?–इति चेत्तर्हि न श्रुतिरद्वैते प्रमाणं, बाधविषये कुण्ठितत्वात् । किंच, तत्त(६)त्प्रत्यक्षशार्दूलमुखकुहरसंप्रविष्टं भेदमवलोक्य पलायमाना श्रुतिरियमबला प्रतीयमानं स्वार्थजातं संत्यजन्ती ब्रह्मानुचिन्तनमात्रपरैव स्यात् । किंच, "बाधव्याधभयोद्विग्नमाऽद्वैतश्रुतिमृगी, ब्रह्मारण्येऽपि विश्वासं कथमासादयिष्यति" सर्वमभिन्नमिति श्रुत्यर्थः स्वस्मात्सर्वमभिन्नमेवेत्येतावताप्युपपद्यते एव । 'नेह ना-

(१) तत्र=प्रत्यक्षे, प्रामाण्यसन्देहः स्यादित्यर्थः ।

(२) मा हि भूदग्नीषोमीयपश्वालम्भनविधिना सर्वभूताहिंसाश्रुतेर्वैयर्थ्यमित्याविनोक्तमर्थमाक्षिप्य समाधत्ते–यद्यपीत्यादिना । (३) सामञ्जस्ये इति तूचितम् ।

(४) घटपटयोर्भेदव्यवस्थितावच्छेदकावच्छेदेनाभ्युपगताद्वैतभङ्गादित्यर्थः ।

(५) घटपटभेदविषयकबुद्धेः स्वविषयादभेदव्यवस्थितौ तदन्यथानुपपत्त्या क्रमेण घटपटयोरप्यभेदो व्यवतिष्ठेतेत्यर्थः ।

(६) तत्तत्प्रत्यक्षं=घटपटादिभेदावगाहिप्रत्यक्षमेव शार्दूलस्तन्मुखकुहरे=तन्मुखविवरे, प्रविष्टं भेदं विलोक्येत्यर्थः ।

Digitized by Google

नास्ति किंचन"—इत्यपि किंचन वस्तु न नानेत्येवमप्युपपद्यते । नहि किमपि वस्तु नाना, सर्वस्य वस्तुनः प्रत्येकमेकत्वात् । किंच, ब्रह्माद्वितीयमिति सकलानुमतमेव । किंच, यदि ब्रह्ममात्रावशेषं जगदिति बोध्यं, तदा "ब्रह्मैवैकम्"—इति स्यान्न तु "एकमेव ब्रह्मे"ति । किंच, यथा 'एक एव नरपतिरत्र, नतु नाना' इति वाक्यं द्वितीयं नरपतिमेव निषेधति नतु पुरुषान्तरमपि नास्तीति(१) ततः प्रतीयते । किंच, तात्पर्याधीनं श्रुतिप्रामाण्यमतः कुत्रार्थे तात्पर्य्यमित्यनिश्चयाद् दुर्बलायाः श्रुतेरेव सर्वत्र प्रत्यक्षेण बलवता बाधः । किंच, चैत्रस्य घटपटभेदज्ञानं, मैत्रस्य कटकुट(२)भेदज्ञानं, देवदत्तस्य नटविटभेदज्ञानम्, इति तत्तदन्यसर्वाद्वैतार्थत्वे श्रुतेर्वाक्यभेदः(३) । किंच, अभेदज्ञानस्य 'तानेव(४) तित्तिरीन्' 'तानेव शालीन्'—इतिवदेकधर्मापहारेणाप्युपपत्तिः, भेदग्रहस्तथा नान्यथोपपादयितुं शक्य इति प्रत्यक्षमेव बलीयः । किंच, सर्वमभिन्नं, घटपटौ भिन्नाविति बुद्ध्योः प्रामाण्यं संभवति क्व बाध्यबाधकभावकल्पनापि, नहि(५) प्रमेयत्वादिनापि सर्वमभिन्नं न मन्यामहे, तथापि(६) "आपाततो यदिदमद्वयवादिनीनाम्" इत्यादावेव तात्पर्य्यम् ॥

(शेषमग्रे)

---

(१) इति=इत्थमेव, ततः=एकमेवाद्वितीयमितिवाक्यात् ब्रह्मसजातीयब्रह्मान्तरनिषेधः प्रतीयते—इति कथंचिद्व्याख्येयम् । वस्तुतस्त्वयं दृष्टान्तपरो ग्रन्थः, दार्ष्टान्तिकपरस्तु कश्चिद्गलितो वा व्याख्यातव्यो वेति प्रतिभाति ।

(२) कुटो घटः, "घटः कुटनिपावस्त्री"ति कोशात् ।

(३) वाक्यभेदस्तु एकस्यैव वाक्यस्य युगपद्विशिष्टार्थद्वयाभिधायकत्वम् ।

(४) पूर्वदृष्टसजातीयतित्तिर्य्यादिदर्शने यत्र तानेव तित्तिरीन् (विहगविशेषान्) पश्य, तानेव शालीन् (तण्डुलानि) पश्येत्यभेदावगाहिनी प्रत्यभिज्ञा, सा तित्तिरित्वशालित्वलक्षणैकधर्मापहारपूर्विका यथा, तथा प्रकृतेऽप्यभेदज्ञानस्योपपत्तिरित्यर्थः ।

(५) सर्वमभिन्नमित्युक्तमुपपादयति—नहीति । प्रमेयत्वादिनाऽभेदः, घटत्वपटत्वादिना तु भेद इति भावः ।

(६) तथापीत्येतत् व्यवहितेन पश्यामीत्यनेनाऽन्वेति । आपातत इति, अद्वैतप्रतिपादनमप्यापातत एवेति निर्गलितार्थः ।

Digitized by Google

सप्तमः परिच्छेदः ।

(*Continued from page* 334. VOL. VII.)

एवं निरूपितानां प्रमाणानां प्रामाण्यं द्विविधं व्यावहारिकतत्त्वावेदकत्वं पारमार्थिकतत्त्वावेदकत्वञ्चेति । तत्र ब्रह्मस्वरूपावगाहिप्रमाणव्यतिरिक्तानां सर्व्वप्रमाणानामाद्यं प्रामाण्यं तद्विषयाणां व्यवहारदशायां बाधाभावात् । द्वितीयन्तु जीवब्रह्मैक्यपराणां सदेव सोम्येदमग्र आसीदित्यादीनां तत्त्वमसीत्यन्तानां तद्विषयस्य जीवब्रह्मैक्यस्य कालत्रयाबाध्यत्वात् । तच्चैक्यज्ञानञ्च तत्त्वम्पदार्थज्ञानाधीनमिति प्रथमं तत्पदार्थौ लक्षणप्रमाणाभ्यां निरूप्यते ।

तत्र लक्षणं द्विविधं स्वरूपलक्षणं तटस्थलक्षणञ्चेति । तत्र स्वरूपमेव लक्षणं स्वरूपलक्षणं यथा सत्यं

The authoritativeness of the sources of evidence described above is two-fold, as declarative (a) of relative and (b) of absolute truth. Of the former kind is the authoritativeness attaching to all the sources of evidence except the one (sc. Revelation) that declares the real nature of Brahma, because the objects known through these sources of evidence (tat) are not proved to be false during practical life. The second kind belongs to sacred texts, devoted to teaching the identity of jíva (personal soul) and Brahma, beginning with "The Existent alone was this, in the beginning, my dear, &c.," and ending with "That thou art,"; since the identity of the jíva with Brahma, known through these texts, (tat) is not falsified in time, present, past or future. And that knowledge of identity depends on a knowledge of the meaning of the words *that* and *thou*. In the first place, therefore, the meaning of the word *that* is explained by means of a characteristic and by the source of evidence (for it, sc. Revelation).

A characteristic * is two-fold, (a) essential, (b) secondary. An essential characteristic is the very nature (of the thing defined). Thus, in the text "Brah-

* असाधारणधर्म्मो लक्षणम् ।

ज्ञानमनन्तं ब्रह्मेत्यत्र सत्यादिकं स्वरूपलक्षणम् । ननु स्वरूपस्य स्ववृत्तित्वाभावेन कथं लक्षणत्वमिति चेन्न स्वस्यैव स्वापेक्षया धर्म्मिधर्म्मभावकल्पनया लक्षणत्वसम्भवात् । तदुक्तम् । आनन्दो विषयानुभवो नित्यत्वञ्चेति सन्ति धर्म्माः अपृथक्त्वे ऽपि चैतन्यात् पृथगिवावभासन्ते इति ।

तटस्थलक्षणं नाम यावल्लक्ष्यकालमनवस्थितत्वे सति यद्व्यावर्त्तकं तदेव यथा गन्धवत्त्वं पृथिवीलक्षणं महाप्रलये परमाणुषु उत्पत्तिकाले घटादिषु च गन्धाभावात् ।

ma, the Reality, the Intelligence, the Endless," reality, &c., are essential characteristics * It may be asked by way of objection, how the nature (of the thing defined i. e. the thing itself), can be a characteristic, since it does not reside in itself. † This objection we set aside, because the nature (of the thing defined) can become a characteristic, if we surmise between the thing itself and its nature the relation of substrate and attribute. Thus this has been declared: "Bliss, knowledge of objects and eternal-ness are attributes Though these are not really distinct from Intelligence (Brahma), they appear as if they were distinct." ‡

A secondary characteristic is one that serves to distinguish the object characterized without being entirely co-temporaneous with it. Such a characteristic of earth is the attribute smell: for, at the final dissolution of the world, there is no smell in the ultimate atoms; nor is there any in jars and the like at the time of their production. §

---

* इतरानिरूप्यं यल्लक्षणं तत्स्वरूपलक्षणम् । The Śikhámaṇi continues:—ज्ञानानन्दौ आदिपदग्राह्यौ तथा च सत्यं ज्ञानमानन्दश्च प्रत्येकं ब्रह्मस्वरूपलक्षणं ननु सर्व्वज्ञत्वादिकं तस्य प्रपञ्चोपाधिकत्वेन इतरनिरूप्यादिति भावः । 145 fol. vers.

† The objector asks how svarúpa can be a dharma (attribute) of sva (the thing itself), as these are in reality identical.

‡ Pañchapádiká. 4. fol. rect:—ननु विषयिणश्चैतन्यैकरसस्य कुतो धर्मा ये विषयेऽध्यस्येरन् उच्यते आनन्दो * * * * * * अवभासन्त इति न दोषः । The vishayin, subject, ie. Brahma is really destitute of all attributes

§ The argument for the Nyáya view stated in the text would run thus,—पृथिव्यादीनां गुणक्रियादिकं प्रति स मवायिकारणत्वात्कारणस्य च कार्य्याऽव्यवहितनियतपूर्वभावित्वनियमाद्भवस्थिताः पृथिव्यादयः पूर्व्वं निर्गुणा निष्क्रियाश्च ।

प्रकृते च जगज्जन्मादिकारणत्वम् अत्र जगत्पदेन कार्य्यजातं विवक्षितम् । कारणत्वञ्च कर्तृत्वम् अतो ऽविद्यादौ नातिव्याप्तिः । कर्तृत्वञ्च तत्तदुपादानगोचरापरोक्षज्ञानचिकीर्षाकृतिमत्त्वम्

In the present case, (Brahma's) *being a cause of the production, continuance and dissolution of the world* (is a secondary characteristic of Brahma). By the word *world* is here implied the sum total of effects. And *the being a cause* means *agency*: hence the definition does not extend faultily to nescience, &c. * And agency means the possession of immediate knowledge of the material cause of all effects (tattad), and the possession of desire and activity.

ईश्वरस्य तावदुपादानगोचरापरोक्षज्ञानसद्भावे च यः सर्व्वज्ञः सर्व्वविद् यस्य ज्ञानमयं तपः तस्मादेतद्ब्रह्म नामरूपमन्नञ्च जायते इत्यादिश्रुतिर्म्मानम् । तादृशचिकीर्षासद्भावे च सोऽकामयत बहु स्यां प्रजायेयेतिश्रुतिर्म्मानम् । तादृशकृतौ च तन्मनोऽकुरुतेत्यादिवाक्यम् ।

And the following passage of Scripture, among others, is a proof that Ísvara possesses an immediate knowledge of the material cause (of the world):—"From him who perceives all and who knows all, whose brooding (penance) consists of knowledge, from him (the highest Brahman) is born that Brahman (Hiraṇyagarbha), name, form, and matter (food)." † That He possesses such desire is proved by the passage:—"He wished, may I be many, may I grow forth." ‡ Such passages as "He (Death or Hiraṇyagarbha) produced the manas (mind)" § prove that He possesses activity.

ज्ञानेच्छाकृतीनामन्यतमगर्भे लक्षणत्रितयं विवक्षितम् अन्यथा व्यर्थवि-

Three characteristics are implied, consisting of any one of the three, viz, knowledge, or desire, or activity. If this were not so (i. e. if the three together

* The ádi embraces jíva, śúnya and paramáṇu.

† Sacred Books of the East. Vol. xv. Part II p. 29.

‡ „ „ „ „ „ „ „ „ „ p. 58.

§ Brihadár: I, 2. 1.

शेषवैयर्थ्यापत्तेः । अत एव जन्मस्थितिध्वंसानामन्यतमस्यैव लक्षणे प्रवेशः । एवञ्च तटस्थलक्षणानि नव सम्पद्यन्ते ।

ब्रह्मणो जगज्जन्मादिकारणत्वे च यतो वा इमानि भूतानि जायन्ते येन जातानि जीवन्ति यत् प्रयन्त्यभिसंविशन्तीत्यादिश्रुतिर्म्मानम् ।

यद्वा निखिलजगदुपादानत्वं ब्रह्मणो लक्षणम् । उपादानत्वञ्च जगदध्यासाधिष्ठानत्वं जगदाकारेण परिणाम्यमानमायाधिष्ठानत्वं वा । एतादृशमेवोपादानत्वमभिप्रेत्य इदं सर्व्वं यदयमात्मा सच्च त्यच्चाभवत् बहु स्यां प्रजायेयेत्यादिश्रुतिषु ब्रह्मप्रपञ्चयोस्तादात्म्यव्यपदेशः ।

made up a single characteristic or definition), the specification (of any two of the three) would be unnecessary. Hence, also, each of the three, viz. production, continuance and final dissolution of the world enter into each characteristic. And thus there are nine secondary characteristics of Brahma.*

That Brahma is the cause of the production, continuance and dissolution of the world is proved by such texts as "That from whence these beings are born, that by which, when born, they live, that into which they enter at their death." †

Or to state another opinion, *the being a material cause of the whole world* is a secondary characteristic of Brahma. ‡ And the being a material cause consists in being the substrate in which the world is erroneouly surmised, or in being the substrate of Máyá, which is materially modified in the form of the world. With reference to such a material cause, the identity of Brahma and the world is declared in such passages as :—"All this here is the Self." "He became sat (what is manifest) and tyat (what is not manifest)": § "May I be many, may I grow forth."

* Thus, knowledge of janma, sthiti and dhvamsa.
and desire for do. do. do.
and activity with regard to do. do. do.
} = 3 + 3 + 3.

† S. Bks. Vol. xv. p. 64.

‡ This, according to the Siddhántaleśa, is the opinion of the Siddhántamuktávalí (Vedánta).

§ S. Bks. Vol. xv. p. 58.

घटः सन् घटो भाति घट इष्ट इत्यादिलौकिकव्यपदेशोऽपि सच्चिदानन्दरूपब्रह्मैक्याध्यासात् ।

नन्वानन्दात्मकचिदध्यासात् घटादेरिष्टत्वव्यवहारे दुःखस्यापि तत्राध्यासात् तत्रापीष्टत्वव्यवहारापत्तिरिति चेन्न ।

आरोपे सति निमित्तानुसरणं न तु निमित्तमस्तीत्यारोप इत्यभ्युपगमेन दुःखादौ सच्चिदंशाध्यासेऽप्यानन्दाध्यासाभावात् । जगति नामरूपांशद्वयव्यवहारस्तु अविद्याप-

Such every day declarations, also, as *a jar exists, a jar appears, a jar is wished for*, are due to an erroneous surmisal of the identity (of such objects) with Brahma, the Existence, Intelligence and Bliss.

An objection is stated:—If (as you Vedántins hold) our consciousness of jars and the like as desirable objects is due to the erroneous surmisal of these things in the Bliss-Brahma, then it follows (contrary to all experience) that we ought to be conscious of pain too (tatrápi) as something desirable, for pain also is erroneously surmised in the Bliss-Brahma (for Brahma you hold to be the substrate of all surmisal).

The above objection must be set aside. For, although in the case of pain &c.*, the Existence and Intelligence factors of Brahma are surmised (i. e. pain appears to us to exist and to be felt), the Bliss factor is not thus surmised; in accordance with the recognised maxim, which runs thus:—*The cause follows* (i. e. the cause of an erroneous surmisal is inferred) *when a surmisal has taken place,*"—and not thus:—*The cause exists, therefore a surmisal must take place* (sc. Bliss-Brahma exists, therefore it must be surmised in pain) †

* The ádi = duhkhasádhana.

† ननु इच्छाविषयत्वमिष्टत्वं तच्च घटस्य स्वाभाविकं तज्ज्ञानादेव तद्व्यवहारः । नत्वानन्दात्मकब्रह्मैक्याध्यासात् । अन्यथा दुःखे सदानन्दात्मकब्रह्माभेदव्यवहारात् दुःखस्यापीष्टत्वापत्तिरिति चोदयति नन्विति । दुःखे ब्रह्मगतसत्त्वचित्त्वाध्यासेऽप्यानन्दत्वाध्यासाभावाचेष्टत्वव्यवहारः । नहि अन्यगतकिञ्चिद्धर्माध्यासे तद्गतसर्वधर्मस्याध्यास इति नियमोऽस्ति तज्जनकदोषस्य कार्य्योन्नेयत्वादित्याह न आरोपे इति. Śikhá: 148. f. v.

रिद्यामात्मकनामरूपसम्बन्धात् । तदुक्तम् । अस्ति भाति प्रियं रूपं नाम चेत्यंशपञ्चकम् । आद्यं त्रयं ब्रह्मरूपं जगद्रूपं ततो द्वयमिति ।

अथ जगतो जन्मक्रमो निरूप्यते ।

तत्र सर्गाद्यकाले परमेश्वरः सृज्यमानप्रपञ्चवैचित्र्यहेतुप्राणिकर्मसहकृतापरिमितानिरूपितशक्तिविशेषविशिष्टमायासहितः सन्नामरूपात्मकं निखिलप्रपञ्चं प्रथमं बुद्धावाकलय्य इदं करिष्यामीति सङ्कल्पयति तदैक्षत बहु स्यां प्रजायेयेति श्रुतेः ।

तत आकाशादीनि पञ्चभूतानि अपञ्चीकृतानि तन्मात्रपदप्रतिपा-

And further, * we are conscious of two factors, viz. name and form, in the phenomenal world, through (its) connexion with these, which are modifications of Nescience. This has been declared :—"It is, it appears (in consciousness), it is pleasing, it has name and form :—here are five factors, the first three belong to Brahma, and the remaining two to the phenomenal world" †.

We now describe the order of the production of the world. Previous to creation, Parameśvara,—associated with a certain infinite and inexplicable power, Máyá, and aided by the (former) actions of living beings, which actions are the cause of the variety of the world about to be created,—first conceives in his mind the whole world as it consists of name and form, and then wills thus—*I will make this world.* Thus Scripture declares: "It thought, may I be many, may I grow forth" ‡.

Then § are produced the five non-quintupled elements, ákáśa and the rest, known as *tanmátras*. Of ákáśa, (ether), sound is the

* The force of the तु lies in the argument supplied by the Ṭíká. ननु घटादाविष्टत्वादेर्नाध्यासो युक्तः तत्र प्रतीयमानसर्वधर्मस्य ब्रह्मगतत्वेन तदीयस्वाभाविकधर्माभावात्सर्वत्र अंशान्तरवत्त्येव अंशान्तराध्यासस्य दृष्टत्वादित्याशङ्क्य प्रपञ्चस्य अस्ति व्यावहारिकमंशद्वयमित्याह जगतोति ॥

† For the reading मायारूपम् see Hall's Rational Refutation p. 182, note.

‡ S. Bks. Vol. I p. 93. and note.

§ तत इति । ईक्षणसङ्कल्पप्रयत्नानन्तरमित्यर्थः ।—Śikhá:. Vidyáságara reads तत आत्मनः ।

भूतानि उत्पद्यन्ते । तत्राकाशस्य शब्दो गुणो वायोस्तु शब्दस्पर्शौ तेजसस्तु शब्दस्पर्शरूपाणि अपान्तु शब्दस्पर्शरूपरसाः पृथिव्यास्तु शब्दस्पर्शरूपरसगन्धाः । न तु शब्दस्याकाशमात्रगुणत्वं वाय्वादावपि तदुपलम्भात् । नासौ भ्रमः बाधकाभावात् ।

इमानि भूतानि त्रिगुणमायाकार्याणि अतस्त्रिगुणात्मकानि ।

एतैश्च सत्त्वगुणोपेतैर्व्यस्तैः पञ्चभूतैः पृथक् पृथक् क्रमेण श्रोत्रत्वक्चक्षूरसनघ्राणानि पञ्चेन्द्रियाणि जायन्ते ।

एतेभ्यः पुनराकाशादिगतसात्त्विकांशेभ्यो मिलितेभ्यो मनोबुद्ध्यहङ्कारचित्तानि च जायन्ते ।

श्रोत्रादीनां पञ्चानां क्रमेणैव दिग्वातार्कवरुणाश्विनोऽधिष्ठातृदेवताः मन आदीनां चतुर्णां क्रमेण चन्द्रचतुर्मुखशङ्कराच्युताः अधिष्ठातृदेवताः ।

एतैरेव रजोगुणोपेतैः पञ्चभूतैर्यथाक्रमेण वाक्पाणिपादपायूपस्था-

quality; of air, sound and touch; of fire, sound, touch and colour; of water, sound, touch, colour and taste; of earth, sound, touch, colour, taste and smell are qualities. Sound is not exclusively the quality of ákáśa, * for it is also perceived in air and the other elements. Nor is (this perception) a case of misapprehension, for nothing is found to prove it false. * (a).

These elements are products of Máyá, which consists of three qualities: hence they are composed of three qualities.

The five sense-organs, viz, hearing, touch, seeing, taste and smell are produced from the sattva quality of each of these elements taken in succession. * (b).

From the sattva portions of the five elements taken together are produced manas, buddhi, ahaṅkára and chitta. †

Of the five sense organs, in order, the presiding deities are Sky, Wind, Sun, Varuṇa and the Aśvins. Of manas and the rest, in order, the presiding deities are Moon, Brahmá, Śiva and Vishṇu.

The five organs of action, viz, speech, hand, foot and organs of

* See Vaiśesh. Sú: II,1, 27.

* (a). cf. Pañchadaśí. Pandit Vol. V. p. 665.

* (b). cf. do. do. do. do.

† For a discussion of these terms see Hall's R: R; notes pp. 11, 44 et seq; Pañchadaśí Pandit Vol. V p. 609. and Deussen p. 356 et seq.

भ्यानि कर्म्मेन्द्रियाणि जायन्ते। तेषाञ्च क्रमेण वह्नीन्द्रोपेन्द्रमृत्युप्रजापतयोऽधिष्ठातृदेवताः ।

generation and excretion are produced from the rajas portions of each of the elements taken successively.

And their presiding deities are, in order, Fire, Indra, Upendra, Death and Prajápati.

रजोगुणोपेतैः पञ्चभूतैरेव पञ्चवायवः प्राणापानव्यानोदानसमानाख्या जायन्ते । तत्र प्रागगमनवान् वायुः प्राणो नासादिस्थानवर्त्ती । अर्वागगमनवानपानः पाय्वादिस्थानवर्त्ती । विष्वगगमनवान् व्यानः अखिलशरीरवर्त्ती । ऊर्द्ध्वगमनवानुदानः कण्ठस्थानवर्त्ती । अशितपीतान्नादिसमीकरणकरः समानो नाभिस्थानवर्त्ती ।

The five winds called prána, apána, vyána, udána and samána * are produced from the rajas portions of the five elements taken together. Práṇa is the wind that moves forwards and resides in the region of the nose. Apána is that which moves downwards and resides in the lower parts of the body. Vyána is that which moves everywhere and is distributed throughout the body. Udána is that which moves upwards and resides in the throat. Samána is that which distributes the food eaten and drunk and resides in the navel.

तैरेव तमोगुणोपेतैरपञ्चीकृतभूतैः पञ्चीकृतभूतानि जायन्ते तासां त्रिवृतं त्रिवृतमेकैकां करवाणीति त्रिवृत्करणश्रुतेः पञ्चीकरणोपलक्षणार्थत्वात् ।

पञ्चीकरणप्रकारश्चेत्थम् । आकाशमादौ द्विधा विभज्य तयोरेकं

The five quintupled elements are produced from the tamas portions of the five non-quintupled elements: for the text declaring tripartition, thus :—"Let me make each of these three (fire, water, earth) tripartite", † implies quintuplication. And this is the method of quintuplication :—The ether is first divided into two portions, one of which is further divided into four parts: these four parts are added to (one part to each of) the four remaining elements. Air is likewise divided into two

* cf. Maitri Upan: ed. Cowell. p. 247 n. and Deussen pp. 362-3.

† S. Bks. Vol. I. p. 95.

Digitized by Google

भागं पुनश्चतुर्द्धा विभज्य तेषां चतुर्णामंशानां वाय्वादिषु चतुर्भूतेषु संयोजनम्। एवं वायुं द्विधा विभज्य तयोरेकं भागं चतुर्धा विभज्य तेषां चतुर्णामंशानाम् आकाशादिषु संयोजनम्। एवं तेजोऽप्पृथिव्यंशानामपि। तदेवमेकैकभूतस्यार्द्धं स्वांशात्मकमर्द्धान्तरञ्च चतुर्विधभूतमयमिति पृथिव्यादौ स्वांशाधिक्यात् पृथिव्यादिव्यवहारः। तदुक्तम्। वैशेष्यात्तु तद्वादस्तद्वाद इति।

पूर्व्वोक्तैरपञ्चीकृतभूतैर्लिङ्गशरीरं परलोकयात्रानिर्व्वाहकं मोक्षपर्य्यन्तस्थायि मनोबुद्धिभ्यामुपेतं ज्ञानेन्द्रियपञ्चककर्म्मेन्द्रियपञ्चकप्राणादिपञ्चकसंयुक्तं जायते। तदुक्तम्। पञ्चप्राणमनोबुद्धिदशेन्द्रियसमन्वितम्। अपञ्चीकृतभूतोत्थं सूक्ष्माङ्गं भोगसाधनमिति।

तच्च द्विविधं परमपरञ्च। परं

portions, one of which is further divided into four parts; and of these four parts one is added to each of the other elements. And so on with the parts of fire, water and earth. Thus, therefore, the one half of a composite element consists of the element itself, and the other half consists of one-eighth of each of the remaining four elements. We thus regard the gross earth as earth, because the earthy portion preponderates in it; and the same holds good with regard to the other elements. This has been declared—"But as each predominates, there is a name for it." (Ved: Sú. II 4, 22).

From the five non-quintupled elements already described a subtile body*. is produced, which effects the journey to another world and lasts until final emancipation. It consists of manas and buddhi, the five organs of knowledge and of action, and the five vital winds. Thus (the Átmabodha śl.12) declares:—"The subtile body, produced from the non-quintupled elements, consisting of the five vital winds, manas and budddi, and the ten organs, is the means of knowledge (for the self)."

This subtile body is of two kinds, as it is of (a) greater

* Lingaśaríra is thus explained in the Vidvanmanorañjiní. लिङ्ग्यते ज्ञायते प्रत्यगात्मसद्भाव एभिरिति लिङ्गानि तानि शरीराणि च शरीरप्रतिष्ठितत्वाच्छरीरसाधनत्वाद्धर्म्मादिद्वारेण इति लिङ्गशरीराणि इत्यर्थः। तथा च प्रयोगो विमतानि इन्द्रियाणि प्राणाश्च स्वातिरिक्तस्वान्तर्गतचैतन्याधिष्ठानपूर्वकप्रवृत्तयः अचेतनत्वाद्रथादिवत्।

Digitized by Google

हिरण्यगर्भलिङ्गशरीरम् । अपरमस्मदादिलिङ्गशरीरम् । तत्र हिरण्यगर्भलिङ्गशरीरं महत्तत्त्वम् अस्मदादिलिङ्गशरीरञ्चाहङ्कारतत्त्वमित्याख्यायते ।

एवं तमोगुणयुक्तेभ्यः पञ्चीकृतभूतेभ्यो भूम्यन्तरिक्षस्वर्गमहर्जनस्तपःसत्यात्मकस्योर्द्ध्वलोकसप्तकस्य अतलपातालवितलसुतलतलातलरसातलमहातलाख्यस्याधोलोकसप्तकस्य ब्रह्माण्डस्य जरायुजाण्डजस्वेदजोद्भिज्जाख्यचतुर्विधस्थूलशरीराणाञ्चोत्पत्तिः । तत्र जरायुजानि जरायुभ्यो जातानि मनुष्यपश्वादिशरीराणि । अण्डजानि अण्डेभ्यो जातानि पक्षिपन्नगादिशरीराणि । स्वेदजानि स्वेदाज्जातानि यूकामशकादिशरीराणि । उद्भिज्जानि भूमिमुद्भिद्य जातानि वृक्षादिशरीराणि । वृक्षादीनामपि पापफलभोगायतनत्वेन शरीरत्वम् ।

तत्र परमेश्वरस्य पञ्चतन्मात्राद्युत्पत्तौ सप्तदशावयवोपेतलिङ्गश-

or (b) less extent. The subtile body of Hiraṇyagarbha is of the former kind. The subtile bodies of ourselves and like beings are of the latter kind. The subtile body of Hiraṇyagarbha is termed the Mahat principle. The subtile body of ourselves and like beings is termed the Ahaṅkára principle. *

From the tamas qualities of the quintuplicated elements are produced the egg of Brahmá, consisting of the seven worlds, above, viz, Earth, Sky, Svarga, Mahar, Janas, Tapas and Satya, and the seven worlds below, viz, Atala, Pátála, Vitala, Sutala Talátala, Rasátala and Mahátala ; and the four kinds of gross bodies termed womb-born, egg-born, moisture-born and sprout-born. Womb-born bodies are those of men, cattle &c. Egg-born are those of birds, reptiles &c. Moisture-born are those of lice, gnats &c. Sprout-born are those of trees &c. Trees, plants &c. are bodies, in that they are the conditions under which men suffer for their evil deeds in a former birth.†

The agency of Parameśvara is immediate as regards the production of the five subtile elements &c, and the production of the subtile body consisting of seventeen portions, and the production of the gross body of

* cf. Śárírakabháshya, I, 4,1.

† The Śikhámaṇi quotes Manu XII. 9 :—शरीरजैः कर्मदोषैर्याति स्थावरतां नरः इति वृक्षादेः केवलपापजन्यत्वावगमेन तज्जन्यदुःखभोगायतनत्वाच्छरीरत्वमिति भावः । 154. f. v.

रीरोत्पत्तौ हिरण्यगर्भस्थूलशरीरोत्पत्तौ च साक्षात्कर्तृत्वम् इतरनिखिलप्रपञ्चोत्पत्तौ च हिरण्यगर्भद्वारा हन्ताहमिमास्तिस्रो देवता अनेन जीवेनात्मनानुप्रविश्य नामरूपे व्याकरवाणीतिश्रुतेः ।

हिरण्यगर्भो नाम मूर्त्तित्रयादन्यः प्रथमो जीवः स वै शरीरी प्रथमः स वै पुरुष उच्यते । आदिकर्त्ता स भूतानां ब्रह्माग्रे समवर्त्तत । हिरण्यगर्भः समवर्त्तताग्रे इत्यादि श्रुतेः ।

एवं भूतभौतिकसृष्टिर्निरूपिता ।

इदानीं प्रलयो निरूप्यते ।

प्रलयो नाम त्रैलोक्यविनाशः ।

स च चतुर्व्विधः नित्यः प्राकृतो नैमित्तिक आत्यन्तिकश्चेति ।

Hiranyagarbha (as Virát). And it is mediate, through the instrumentality of Hiranyagarbha, as regards the rest of the phenomenal world: for this mediate agency is declared in the text. "(That Being (i.e. that which had produced fire, water and earth) thought), let me now enter those three beings (fire, water, earth) with this living Self (jíva átmá), and let me then reveal (develop) names and forms." *.

Hiranyagarbha, the first jíva, is distinct from the trinity (sc. Brahmá, Vishnu and Síva). "He, Hiranyagarbha, indeed possesses a body. He is termed the primal Person. In the beginning, he was evolved, the first producer of things." † "In the beginning (i.e. previous to the creation of the world) Hiranyagarbha was evolved" ‡ These and like passages of Scripture prove this point.

Thus has been described the creation of the subtile elements and of the gross productions therefrom.

Now *pralaya* is described. Pralaya means the destruction of the three worlds (sc. heaven, earth and the region below), and is of four kinds:—(a) constantly recurring; (b) elemental (sc. when all things are resolved into Prakriti, Máyá); (c) occasional; (d) absolute. §

* S. Bks. Vol. I. p. 94-5.

† Márk. Pur. 45. 64. (Deussen).

‡ Rigveda X. 121.p

§ cf. Vishnu Purána (Wilson) Vol. I. p. 113.

तत्र नित्यप्रलयः सुषुप्तिः तस्याः सकलकार्य्यप्रलयरूपत्वात् । धर्म्माधर्म्मपूर्व्वसंस्काराणाञ्च तदा कारणात्मनावस्थानं तेन सुप्तोत्थितस्य न सुखदुःखाद्यनुपपत्तिः न वा स्मरणानुपपत्तिः ।

न च सुषुप्तावन्तःकरणस्यापि विनाशे तदधीनप्राणनादिक्रियानुपपत्तिः वस्तुतः श्वासाद्यभावेऽपि तदुपलब्धेः पुरुषान्तरविभ्रममात्रत्वात् सुप्तशरीरोपलम्भवत् ।

Dreamless sleep is the constant pralaya, since it (occurs every day and) is a destruction of all products *. During dreamless sleep (tadá), merit and demerit, and former mental impressions (which are the source of memory) exist in the form of their cause (ie. in Nescience from which these are evolved). For this reason (tena) the consciousness of pleasure, pain &c. is not impossible for a man when he wakes from dreamless sleep; nor is recollection impossible.

Nor is it to be argued that, if the internal organ is destroyed during dreamless sleep, actions like breathing &c. dependent on this organ, † (and actually observed by us in the case of the deep sleeper) admit of no explanation. For, though in reality there are no such actions as breathing &c. (when a man is in dreamless sleep), the perception of these actions by the lookers on is merely a case of misapprehension, as is their perception of the body of the sleeper.

* ननु सुषुप्तिकाले सकलेन्द्रियव्यापारोपरमेऽपि न सर्व्वकार्य्यलयो मानाभावादित्यत आह । तस्या इति । सुषुप्तिकाले सकले विलीन इति कैवल्योपनिषदि तत्काले सकलकार्य्यविलयस्य श्रवणादिति भावः । Śikhá: 154 f. v.

† For the Sáṅkhya view that the vital airs, breathing &c. depend on the internal organ, see Sáṅ: ká. 29. Anupapatti implies a sense of the contradiction between the fact of breathing &c. (observed in the deep sleeper) and the statement that such actions are dependent on the internal organ, which, as such, does not exist during dreamless sleep. Erroneous surmisal, that sine quâ non of the Vedánta, is impressed once more to solve the contradiction. Briefly,—the actions observed are facts of our experience only, but are erroneously attributed to the "deep sleeper" who, in reality, has ceased to exist as a person and is free from the experiential world.

Digitized by Google

नचैवं सुषुप्तस्य परेतादविशेषः सुषुप्तस्य हि लिङ्गशरीरं संस्कारात्मना अत्रैव वर्त्तते परेतस्य तु लोकान्तरे इति वैलक्षण्यात् ।

Nor does it follow from this that there is no difference between a sleeping and a dead man, for the difference is this, that the subtile body of the sleeping man exists, in this world, in the form of an impression; * whereas that of the dead man exists in another world.

यद्वा अन्तःकरणस्य द्वे शक्ती ज्ञानशक्तिः क्रियाशक्तिश्चेति तत्र ज्ञानशक्तिविशिष्टान्तःकरणस्य सुषुप्तौ विनाशः न तु क्रियाशक्तिविशिष्टस्येति प्राणाद्यवस्थानमविरुद्धम् ।

Or to state another view, two powers belong to the internal organ, (a) the power of knowledge and (b) the power of action. During dreamless sleep the power of knowledge possessed by the internal organ is destroyed, but not its power of action. Thus the continuance of breathing &c. †, (during dreamless sleep) is not contradictory.

यदा सुप्तः स्वप्नं न कञ्चन पश्यति अथास्मिन् प्राण एवैकधा भवति अथैनं वाक् सर्व्वैर्नामभिः सहाप्येति सता सोम्य तदा सम्पन्नो भवति

The following sacred texts, among others, are evidence of the dreamless sleep described above. "When a man being thus asleep, sees no dream whatever, he becomes one with that práṇa alone. Then speech goes to him (when he is absorbed in práṇa) with all names &c." ‡

---

* The samskára is the subtle, material form in which the world of experience exists in Avidyá into which it is refunded during dreamless sleep :—नाशाख्यसंस्काराविद्यात्मनेत्यर्थः Śikhá : 155. Mental impression will serve as an equivalent of samskára, if it be remembered that, in the Vedánta, the mind is a subtle form of matter (avidyá). The existence of this impression or latent modification is inferred from the fact of memory when the sleeper awakes.

† प्राणादिपदेन सावयवलिङ्गशरीरधर्म्माधर्म्मसंस्काराणां परिग्रहः । Śikhá: 155 f. v.

‡ S. Bks. Vol. I. p. 295.

Digitized by Google

स्वमपीतो भवतीत्यादिश्रुतिरुक्तसुषुप्तौ मानम् ।

प्राकृतप्रलयस्तु कार्य्यब्रह्मविनाशनिमित्तकः सकलकार्य्यविनाशः । यदा तु प्रागेवोत्पन्नब्रह्मसाक्षात्कारस्य कार्य्यब्रह्मणो ब्रह्माण्डाधिकारलक्षणप्रारब्धकर्म्मसमाप्तौ विदेहकैवल्यात्मिका परा मुक्तिः तदा तल्लोकवासिनामप्युत्पन्नब्रह्मसाक्षात्काराणां ब्रह्मणा सह विदेहकैवल्यं ब्रह्मणा सह ते सर्व्वे सम्प्राप्ते प्रतिसञ्चरे । परस्यान्ते कृतात्मानः प्रविशन्ति परं पदमितिश्रुतेः ।

एवं स्वलोकवासिभिः सह कार्य्यब्रह्मणि मुच्यमाने तदधिष्ठितब्रह्माण्डतदन्तर्व्वर्त्तिनिखिललोकतदन्तर्व्वर्त्तिस्थावरादीनां भौतिकानां भू-

"(When a man sleeps here,) then, my dear son, he becomes united with the True, he is gone to his own (Self)" *.

The Prákṛitapralaya is the destruction of all products caused by the destruction of Hiranya-garbha (káryabrahma). When, in the first place, Hiranyagarbha, having gained intuition of the Absolute Brahma, on the complete working out of former actions which characterizes his authority over the universe (Brahmáṇḍa), obtains the highest emancipation, which consists in disembodied identity (with Brahma) then the inhabitants of his world (Satyaloka), who have gained intuition of the Absolute Brahma, obtain along with Hiraṇyagarbha disembodied identity with the Absolute. For thus it has been heard :— "When the final destruction of things is at hand (and) there is an end to Hiraṇyagarbha, all those who possess true knowledge enter the highest state a long with Hiraṇygarbha." †.

Thus, when Hiraṇyagarbha together with the inhabitants of his world is emancipated, Brahmá's egg, which is supported by him, and all the worlds within this egg, and all things immoveable&c. within these worlds all gross and subtile products are resolved into Prakṛiti i.e. Máyá, and not into Brahma. For what is technically known

* S. Bks. Vol. I. p. 99.

† See Śárír: bhásh: on IV, 3, 11. and Govinda's gloss, where the passage occurs as Smṛiti.

तानाञ्च प्रकृतौ मायायां लयः न तु ब्रह्मणि बाधरूपविनाशस्यैव ब्रह्मनिष्ठत्वादतः प्राकृत इत्युच्यते ।

as bádha * (sublation, where the effect and its material cause are both destroyed) is the only form of destruction that has Brahma as its substrate (sc. where nothing remains but Brahma). Hence the kind of destruction considered above is termed prák.ita (ie Prakṛiti is the substrate into which products are then resolved).

कार्य्यब्रह्मणो दिवसावसाननिमित्तकः त्रैलोक्यमात्रप्रलयो नैमित्तिकप्रलयः । ब्रह्मदिवसश्चतुर्युगसहस्रपरिमितकालः चतुर्युगसहस्राणि ब्रह्मणो दिनमुच्यते इत्यादिवचनात् । प्रलयकालो दिवसकालपरिमितः रात्रिकालस्य दिवकालतुल्यत्वात् ।

The *occasional* pralaya is the destruction of only the three worlds (bhúr, bhuvah, swar) which is caused by the termination of a day of Hiraṇyagarbha. And a day of Brahmá lasts for a thousand periods of the four yugas, as has been declared :—a thousand aggregates of the four yugas is termed a day of Brahmá. The duration of the pralaya is equal to that of (his) day, since (Brahmá's) night and day are equal in extent.

प्राकृतप्रलये नैमित्तिकप्रलये च पुराणवचनानि प्रमाणानि द्विपरार्द्धे त्वतिक्रान्ते ब्रह्मणः परमेष्ठिनः । तदा प्रकृतयः सप्त कल्पन्ते प्रलयाय हि । एष प्राकृतिको राजन् प्रलयोऽत्र विधीयते इति वचनं प्राकृत प्रलये मानम् । एष नैमित्तिकः प्रोक्तः प्रलयो यत्र विश्वसृक् । शेतेऽनन्तासने नित्यमात्मसात्कृत्य चा

The Puráṇas are authority for the "elemental" and "occasional" pralayas. The following passages are proofs of an "elemental" pralaya :—"When the two parárdhas (in the life) of Brahmá are completed, then the seven productive productions are ready for dissolution." †. "This elemental dissolution, Rájá, is here ordained" The following passage is evidence for an "occasional" dissolution :—"That is declared to be an occasional dissolution when Brahmá, the creator of all things,

* See Vedántaparibháshá Pandit Vol. IV. p. 557.

† Vishṇu Puráṇa. (Wilson) Vol. V. pp. 187, 199 and Hall's notes.

त्यभूरिति वचनं नैमित्तिकप्रलये मानम् ।

constantly withdrawing (the three worlds) within himself, reclines on the serpent Ananta as on a bed."

तुरीयप्रलयस्तु ब्रह्मसाक्षात्कार-निमित्तकः सर्व्वमोक्षः स चैकजीववादे युगपदेव नानाजीववादे तु क्रमेण सर्व्वे एकीभवन्ति इत्यादि श्रुतेः ।

The fourth kind of dissolution is complete emancipation, effected through intuition of the Absolute Brahma. And this kind of pralaya is instantaneous, if the theory that there is only one jíva be held; but gradual, if a plurality of jívas be maintained. For Scripture thus declares :—"All become one."

तत्राद्यास्त्रयो लयाः कर्म्मोपरम-निमित्ताः तुरीयस्तु ज्ञानोदयनिमित्तो लयोऽज्ञानेन सहैवेति विशेषः ।

The first three kinds of destruction are effected through the cessation of (the retributive power of) actions; but the fourth kind is effected through the rise of knowledge along with (the destruction of) Nescience. This is the difference.

एवं चतुर्विधः प्रलयो निरूपितः तस्येदानीं क्रमो निरूप्यते । भूतानां भौतिकानाञ्च न कारणलयक्रमेण लयः कारणलयसमये कार्य्याणामाश्रयमन्तरेणावस्थानानुपपत्तेः ।

Thus the four-fold pralaya has been described. Its order is now explained. The destruction of the subtile and gross elements does not follow the order of the destruction of their causes; for, at the time of destroyal of the (material) causes, a continuance of the products (therefrom) would be impossible, unless there were some substrate (for them).

किन्तु सृष्टिक्रमविपरीतक्रमेण तत्त-त्कार्य्यनाशे तत्तज्जनकादृष्टनाशस्यैव प्रयोजकतया उपादाननाशस्याप्रयोज-

But destruction follows the reverse order of creation. For, since the essential factor in the destruction of any product is the destroyal of the unseen power of works, which is the producer of all products, the destroyal of the material

कत्वाद् अन्यथा न्यायमतेऽपि महाप्रलये पृथिवीपरमाणुगतरूपरसादेर्विनाशापत्तेः ।

तथाच पृथिव्या अप्सु अपां तेजसि तेजसो वायौ वायोराकाशे आकाशस्य जीवाहङ्कारे तस्य हिरण्यगर्भाहङ्कारे तस्य चाविद्यायामित्येवंरूप एव प्रलयः । तदुक्तम् विष्णुपुराणे । जगत्प्रतिष्ठा देवर्षे पृथिव्यप्सु प्रलीयते । तेजस्यापः प्रलीयन्ते तेजो वायौ प्रलीयते । वायुश्च लीयते व्योम्नि तच्चाव्यक्ते प्रलीयते । अव्यक्तं पुरुषे ब्रह्मन्निष्कले सम्प्रलीयते ।

इत्येवंविधप्रलयकारणत्वं तत्पदार्थस्य ब्रह्मणस्तटस्थलक्षणम् ।

ननु वेदान्तैर्ब्रह्मणि जगत्कारणत्वेन प्रतिपाद्यमाने सति सप्रपञ्चं ब्रह्म स्याद् अन्यथा सृष्टिवाक्यानामप्रामाण्यापत्तिरिति चेन्न ।

न हि सृष्टिवाक्यानां सृष्टौ तात्पर्यं किन्तु अद्वये ब्रह्मण्येव ।

cause is not an essential factor. If the latter were an essential factor, it would follow that, in the Nyáya system also, the colour taste &c, which belong to the ultimate atoms of earth, would not be destroyed at a final dissolution of the world. *

Accordingly the pralaya is just in this manner:—earth is resolved into water, water into heat, heat into wind, wind into ether, ether into the self-consciousness of jíva, this into the self-consciousness of Hiranyagarbha, and this into Nescience. This has been declared in the Vishnu Puráṇa †:—Divine sage, the earth, the foundation of the universe, is resolved into water, water into fire, fire into wind, wind into ether, ether into the indiscrete principle, and this, O Bráhman, into the Self which is without parts.

Thus, this being the cause of the dissolution described above constitutes a secondary characteristic of Brahma, which is the meaning of the word *that* (in "that thou art.")

It may be objected that if Brahma is declared by the Upanishads to be the cause of the world, Brahma must be related to the world. If not, it follows that the texts declarative of creation are not authoritative.

This objection we set aside. For the passages declarative of creation are not intended to declare a (real) creation, but the Brahma, one without a second.

* Because, in the Nyáya, ultimate atoms are eternal.

† Mahábhárata. 12. 12893. (Deussen)

Digitized by Google

तत्प्रतिपत्तौ कथं सृष्टेरुपयोगः ।

इत्थम् । यदि सृष्टिमनुपन्यस्य प्रपञ्चस्य निषेधो ब्रह्मणि प्रतिपाद्येत तदा ब्रह्मणि प्रतिषिद्धस्य प्रपञ्चस्य वायौ प्रतिषिद्धस्य रूपस्येव ब्रह्मणोऽन्यत्रावस्थानशङ्कायां न निर्व्विचिकित्समद्वितीयत्वं प्रतिपादितं स्यात् ।

ततः सृष्टिवाक्याद् ब्रह्मोपादेयत्वज्ञाने सति उपादानं विना कार्य्यस्यान्यत्र सद्भावशङ्कायां निरस्तायां नेति नेतीत्यादिना ब्रह्मण्यपि तस्यासत्त्वोपपादनेन प्रपञ्चस्य तुच्छत्वावगमे निरस्तनिखिलद्वैतविभ्रममखण्डं सच्चिदानन्दैकरसं ब्रह्म सिध्यतीति परम्परया सृष्टिवाक्यानामप्यद्वितीये ब्रह्मण्येव तात्पर्य्यम् ।

उपासनाप्रकरणपठितसगुणब्रह्मवाक्यानान्तु उपासनाविध्यपेक्षितगु-

How then (you may ask) is a declaration of creation useful in making Brahma (tat) known to us? In this way: if the creation were not set forth, and a denial (of the existence) of the world in Brahma were declared, the doubt might arise that the world, denied to exist in Brahma, may exist elsewhere; just as colour, denied to exist in the air, (exists elsewhere):—and so the absolute nature of Brahma would not have been declared (by Scripture) beyond all doubt.

Hence, when from the texts dealing with creation a knowledge has been gained (of the world) as a material product of Brahma, the doubt as to the existence of the product (sc. the world) elsewhere than in its material cause (sc. Brahma) is set at rest: (and further) when through the knowledge of the non-existence of the world even in Brahma, conveyed in such texts as "No, No!" * the world is known to be sheer non-entity, (then) Brahma—concerning whom all mistaken notions of duality have been set aside—the Indivisible, the Existence, the Intelligence, the Bliss, in its nature one—is proved. Thus, the intention of even the passages dealing with creation is to declare, indirectly, Brahma, one without a second.

The intention of the passages, relating to the secondary Brahma (and) recited in the *upásaná* sections, is merely to attribute qualities, falsely, (to

* S. Bks. Vol. XV. p. 149.

वारोपमात्रपरत्वं न गुणपरत्वम् ।

निर्गुणप्रकरणपठितानां सगुणवाक्यानान्तु निषेधवाक्यापेक्षितनिषेध्यसमर्पकत्वेन विनियोग इति न किञ्चिदपि वाक्यमद्वितीयब्रह्मप्रतिपादनेन विरुध्यते ।

तदेवं स्वरूपतटस्थलक्षणलक्षितं तत्पदवाच्यमीश्वरचैतन्यं मायाप्रतिबिम्बरूपमिति केचित् । तेषामयमाशयः । जीवपरमेश्वरसाधारणचैतन्यमात्रं बिम्बं तस्यैव बिम्बस्याविद्यात्मिकायां मायायां प्रतिबिम्बितमीश्वरचैतन्यम् अन्तःकरणेषु प्रतिबिम्बितं जीवचैतन्यं कार्य्योपाधिरयं जीवः कारणोपाधिरीश्वर इति श्रुतेः ।

Brahma,—these qualities) being necessitated by the injunctions to upásaná; but it is not their intention to teach that Brahma is really possessed of qualities.

But the texts, dealing with the secondary Brahma (and) recited in the sections relating to the Absolute Brahma apply, in that they declare the object denied (sc. qualities, which object is) necessitated by the passages (that contain) a denial (of qualities in Brahma). Thus not a single text is inconsistent with the declaration of Brahma as one without a second.

Thus, therefore, some hold that the Ísvara-Intelligence, which is meant by the word *that* (in "that thou art") and which has been described above by means of essential and secondary characteristics, is a reflection (of absolute Intelligence, Brahma) in Máyá. This is what they mean :——absolute Intelligence only, common to (i.e. as constitutive of) the jíva and Ísvara is the object reflected. Ísvara-Intelligence (i.e. Ísvara) is the reflection of that same object (sc. absolute Intelligence) in Máyá which is Nescience. Jíva-Intelligence is the reflection (of Brahma) in the various internal organs. For thus Scripture declares "That which has the product (sc. the internal organ) as its limiting condition is the jíva. That which has the cause (sc. Nescience) as its limiting condition is Ísvara." *

* This occurs in the Anubhútiprakása. Ed. Cowell. Maitri Upan. p 228. śl: 61.

एतन्मते जलाशयगतशरावजलगतसूर्यप्रतिबिम्बयोरिव जीवपरमेश्वरयोर्भेदः । अविद्यात्मकोपाधेर्व्यापकतया तदुपाधिकेश्वरस्यापि व्यापकत्वम् अन्तःकरणस्य परिच्छिन्नतया तदुपाधिकजीवस्यापि परिच्छिन्नत्वम् ।

एतन्मतेऽविद्याकृतदोषाः जीव इव परमेश्वरेऽपि स्युः उपाधेः प्रतिबिम्बपक्षपातित्वादित्यस्वरसाद्बिम्बात्मकमीश्वरचैतन्यमित्यपरे । तेषामयमाशयः । एकमेव चैतन्यं बिम्बत्वाक्रान्तमीश्वरचैतन्यं प्रतिबिम्बत्वाक्रान्तं जीवचैतन्यम् । बिम्बप्रतिबिम्बकल्पनोपाधिश्च एकजीववादेऽविद्या अनेकजीववादे त्वन्तःकरणान्येव ।

अविद्यान्तःकरणरूपोपाधिप्रयुक्तो जीवपरमेश्वरयोर्भेदः । उपाधिकृतदोषाश्च प्रतिबिम्बे जीवे एव वर्तन्ते न तु बिम्बे परमेश्वरे उपाधेः प्रतिबि-

According to this view the difference between Jíva and Íśvara is like the difference between the reflection of the sun on a lake and on the water in a cup. And since the limiting condition, sc. Nescience, (in the one case) is pervasive, Íśvara, who is conditioned by it is also pervasive: and because the internal organ is of limited extent, the Jíva, which is limited by it is also of limited extent.

Further, according to this view the defects due to Nescience would attach to Íśvara as they do to Jíva, because a limiting condition gives its own tinge to the reflection it conditions. But since this view does not accord with Íśvara's true nature, another school have maintained that Íśvara is the object reflected. And this is what they mean. Intelligence is one alone. Íśvara-Intelligence is that which has become the reflected object. Jíva-Intelligence is the reflection. If the doctrine that there is only one Jíva be held, Nescience is the limiting condition through which the surmisal of reflected object and reflection is reflected; but, if a plurality of jívas be maintained, the internal organs are the limiting conditions.

The difference between Jíva and Íśvara is due to the limiting conditions sc. Nescience (if the single-jíva theory be held), or to the internal organs (if the plurality-jíva theory be held). And the defects due to the limiting condition exist only in Jíva, the reflection, and not

Digitized by Google

स्वपक्षपातित्वात् । एतन्मते च गगनसूर्य्यस्य जलादौ भासमानप्रतिबिम्बसूर्यस्येव जीवपरमेश्वरयोर्भेदः ।

ननु ग्रीवास्थमुखस्य दर्पणप्रदेश इव बिम्बचैतन्यस्य परमेश्वरस्य जीवप्रदेशेऽभावात् तस्य सर्वान्तर्यामित्वं न स्यात् इति चेन्न साभ्रनक्षत्रस्याकाशस्य जलादौ प्रतिबिम्बितत्वे बिम्बभूतमहाकाशस्यापि जलादिप्रदेशसम्बन्धदर्शनेन परिच्छिन्नबिम्बस्य प्रतिबिम्बदेशासम्बन्धित्वेऽपि अपरिच्छिन्नब्रह्मबिम्बस्य प्रतिबिम्बदेशसम्बन्धाविरोधात् ।

न च रूपहीनस्य ब्रह्मणो न प्रतिबिम्बसम्भवः रूपवत एव तथात्वदर्शनादिति वाच्यं नीरूपस्यापि रूपस्य प्रतिबिम्बदर्शनात् ।

in Íśvara, the thing reflected; for the prejudices of the limiting condition attach to the reflection. According to this theory, the difference between Jíva and Íśvara corresponds to the difference between the real sun in the sky and the sun, (which shines as a) reflection in water.

An objection may here be raised : since Íśvara the reflected Intelligence, is not present in the region of Jíva, just as one's real face is not actually present in the mirror, Íśvara's character as internal ruler of all things is impossible. Not so, we reply. For, although a finite, reflected object cannot be in relation with the space occupied by its reflection, there is nothing contradictory in the infinite (all pervasive) Brahma, the reflected object, being in contact with the spot where the reflection exists; since we know that when the ether along with the sky and stars is reflected in water, the reflected object, sc. the infinite expanse of ether (mahákáśa) is also in contact with the space occupied by the water.

Nor is it to be argued that a reflection of Brahma, which is colourless, is impossible, in that our experience of reflection holds only for a coloured object : for a reflection of colour, which is itself colourless, is (we reply) a common fact. *

* Rúpa is a guṇa; and guṇas are nirguṇa.

न च नीरूपस्य द्रव्यस्य प्रतिबिम्बाभावनियमः आत्मनो द्रव्यत्वाभावस्योक्तत्वात् ।

एक एव हि भूतात्मा भूते भूते व्यवस्थितः एकधा बहुधा चैव दृश्यते जलचन्द्रवत् । यथा ह्ययं ज्योतिरात्मा विवस्वानपो भिन्ना बहुधैकोऽनुगच्छन् उपाधिना क्रियते भेदरूपो देवः क्षेत्रेष्वेवमजोयमात्मा इत्यादिवाक्येन ब्रह्मप्रतिबिम्बाभावानुमानस्य बाधितत्वाच्च ।

तदेवं तत्पदार्थो निरूपितः ।

(शेषमग्रे)

Nor can you urge the rule that a colourless substance cannot be reflected, for we have (elsewhere) shown that the Self does not fall under your category of substance. *

And (we, finally, reject your position) because the inference by which you would deny a reflection of Brahma is invalidated by such passages as "One only is the elemental Self within all created things. One or many it appears, like the moon reflected in water," and "Just as the one sun, made up of light, entering many waters, becomes many; so the unborn Self, the bright one, entering bodies becomes manifold through its limiting condition (sc. Máyá)." †

Thus, therefore the meaning of the word *that* has been explained.

A. V.

---

* Dravya is defined in the Nyáya as the substrate of qualities (guṇa) and actions (kriyá). Átman, in Vedánta, is of course destitute of both guṇa and kriyá, and is, therefore, not a dravya.

† The inference is thus given by Śivadatta:—ब्रह्म न प्रतिबिम्बितुमर्हति अचाक्षुषत्वाद्रूपादिवत् Both the quotations occur in the Śárír: bhásh:—III, 2. 18. The former is introduced by तथा च वासिष्ठे योगशास्त्रे in the commentary on Śvetáśv. I. 8.; but see Deussen. For भूतात्मा see Maitri Upan. ed. Cowell. p. 41 and gloss.

॥ श्रीः ॥

सटीकसंक्षेपशारीरकम् ।

॥ सटीकसंक्षेपशारीरकस्य द्वितीयोऽध्यायः ॥

(*Continued from page* 312. Vol. VII.)

टी० ॥ ननु सद्रूपशुक्तिकादेरपि सापेक्षं चेत् सत्त्वं तर्ह्यात्मापि सत्त्वात् तद्वत् सापेक्षसत्त्व एव स्यादित्याशङ्क्याविद्यातत्कार्यान्यतरत्वं तत्रोपाधिरित्याशयेनाह । वेदान्तेति । तत्रास्तित्वे हेतुमाह । तमोविरचितमिति । तथा च सर्वस्यात्मज्ञाननिरस्यत्वादात्मैव सच ततोऽन्यत् सदस्तीत्यर्थः ॥ ५३ ॥

मू० ॥ धर्मेऽपि तत्त्वमतिरेव तु चोदनायाः
सत्त्वादिवस्तुनि यथाक्षनिबन्धना धीः ॥
अज्ञाततापि सदृशी व्यवहारकाले
तत्त्वावबोधसमये न तु तत्त्वबुद्धिः ॥ ५४ ॥

टी० ॥ एवं धर्मेऽपि चोदनाप्रामाण्यं व्यावहारिकमेव न तु तात्त्विकमित्याशयेनाह । धर्मेऽपीति । सतो भावस्य भावः सत्त्वं तदादिर्यस्याभावस्य तद्रूपं यद् वस्तु तस्मिन् सत्त्वमिति, भात्रो न विवक्षितः,भावाभाववस्तुन्यक्षादिजन्या धीर्यथा यादृशी स्वप्रमेयवस्तुतत्त्वशून्या तुशब्दस्तथार्थः तथा चोदनायाः सकाशाद्धर्मेऽपि तत्त्वमतिरेव धर्मं स्वरूपमतिरेव भवति न तु धर्मस्य तावता तत्त्वं सिद्ध्यतीत्यर्थः । ननु धर्मस्य ब्रह्मवदज्ञातत्वात् कथं तत्प्रामाण्यस्य घटादिप्रमाणसाम्यमित्यत आह । अज्ञाततापीति । ब्रह्मणोऽन्यस्यास्वप्रकाशतया तत्तुल्याज्ञातताऽयोगात् घटादितुल्यैव तस्य सापीति भावः । धर्मप्रमाणस्यापि घटादिप्रमाणतुल्यत्वे हेतुमाह । तत्त्वावबोधेति । तत्त्वबुद्धिः परमार्थत्वबुद्धिः, धर्मस्येति शेषः । तत्त्वविचारसमये धर्मस्यापि घटादिवत्र तत्त्वबुद्धिरिति तत्प्रमाणयोर्न कोऽपि विशेष इति भावः ॥ ५४ ॥

मू० ॥ आरम्भणादिवचनं सकलं प्रवृत्तं
प्रत्यक्षबुद्धिविषयादपहर्तुमुच्चैः ॥

तत्त्वं यथोदितनयेन विवर्तवाद-

माश्रित्य सत्यपरिणामनिवारणेन ॥ ५५ ॥

टी० ॥ ननु सच्च त्यच्चाभवदिति तावत् सत्परिणामः प्रपञ्चः श्रूयतेऽन्यथाभवदित्ययोगात्परिणामश्च परिणामिसमानसत्ताक इति प्रपञ्चो ब्रह्मवत्सत्यत्वेनेति कथं तत्प्रमाणं तत्त्वावेदकं न भवेदित्याशङ्क्यान्यथाभावमात्रं तत्र भवनशब्दार्थः। अन्यथाभावश्च विवर्तत्वेऽप्यस्त्यन्यथा सत्यं चानृतं च सत्यमभवदिति तद्वाक्यशेषेण सत्यस्यानृतभवनोक्त्यनुपपत्तेः । किं च वाचारम्भणं विकारो नामधेयमित्यादिश्रुतिरपि प्रागुक्तन्यायेन विवर्तवादमाश्रित्य सत्यपरिणामनिवारणेन प्रत्यक्षादिबुद्धिविषयात्तत्त्वं परमार्थत्वमुच्चैरपहर्तुं प्रवृत्ता तद्विरोधादपि न परिणामवादः श्रुतिसंमत इत्याशयेनाह । आरम्भणादिवचनमिति । वाचारम्भणं विकारो नामधेयमिति श्रुतिर्हि विकारस्य घटादेः शब्दालम्बनमात्रत्वमाह । मृत्तिकेत्येव सत्यमित्युत्तरवाक्यं चैवकारेण विकारं व्यावर्त्य कारणमात्रस्य मृदादेः सत्यत्वोक्त्या प्रत्यक्षादिविषयात्तत्त्वमपहरति । ततो घटादेः श्रुत्या विवर्तत्वमाश्रितं सत्यपरिणामित्वं च निवारितमिति तद्बलादक्षादेरपि विवर्तमात्रविषयत्वसिद्धेर्नाक्षादेस्तात्त्विकप्रामाण्यमित्याशयः ॥ ५५ ॥

मू० ॥ वाक्यप्रवृत्तिमनुसृत्य च सूत्रकारः

सिद्धान्ततामनयदेष विवर्तवादम् ।

तत्त्वप्रकाशनविधावपहृत्य शक्ति-

मारम्भणादिवचनादपरप्रमायाः ॥ ५६ ॥

टी० ॥ ननु तदनन्यत्वमिति सूत्रेण सूत्रकारः कार्यस्य कारणाभेदमाह कारणं च सत्यमिति तदभिन्नं कार्यमपि तथैवेति तात्त्विकान्यथाभावं दर्शयता तेन परिणाम एवाश्रितस्ततः सत्यपरिणामनिवारणेनेत्येतदसंगतमिति चेत्तत्राह । वाक्यप्रवृत्तिमिति । सूत्रकारो हि येनाश्रुतं श्रुतं भवतीत्यादिनैकविज्ञाने सर्वविज्ञानप्रतिज्ञया सर्वात्मत्वविषयवाक्योपक्रममनुसृत्यारम्भणादिवचनादनात्मप्रमायास्तत्प्रमाणस्य तत्त्वप्रका-

भनोत्पादनशक्तिमपहृत्य विवर्तवादं सिद्धान्ततामनयदिति संबन्धः । सूत्रकारो हि तदनन्यत्वे कार्यस्यारम्भणशब्दादिभ्य इति हेतुं वाचारम्भणादिश्रुत्यर्थमेवाह । तस्याश्च विकारमृषात्वमर्थ इत्युक्तं ततश्च तदनन्यत्वं न तदभिन्नत्वं किं तु ततः पृथक् सत्त्वाभाव एव स च परिणामवादेऽनुपपन्नस्तत्रैवदभेदेऽपि कार्यकारणयोः पृथक्सस्यापि सत्त्वाद्विवर्तस्य तु न ततः पृथक्सत्त्वमिति प्रतीयमानभेदस्य मृषात्वमेव सूत्रकारस्यापि संमतमिति विवर्तवाद एव सिद्धान्त इति भावः ॥ ५६ ॥

मू० ॥ आरम्भसंहतिविकारविवर्तवादा-
नाश्रित्य वादिजनता खलु वावदीति ॥
आरम्भसंहतिमते परिहृत्य वादौ
द्वावत्र संग्रहपदं नयते मुनीन्द्रः ॥ ५७ ॥

टी० ॥ ननु भोक्त्रापत्तेरिति पूर्वसूत्रे स्याल्लोकवदिति समुद्र इव वीचीतरङ्गबुद्बुदादिविकाररूपेण ब्रह्मान्योन्यविलक्षणचेतनाचेतनविचित्रप्रपञ्चात्मतानेकरसमिति दर्शितमिति तेन सममेवं सति विरोधः स्यादिति चेत्सत्यं विरोधः स्यादुभयस्यापि तत्संमतत्वेन चेतदपि तत्संमतं भवति विरुद्धयोस्तदयोगात् । अत एकमभ्युपगमवादेनेति वक्तव्यं तत्राप्यद्वैतविरोधिपरपक्षव्यावृत्तये स्वसिद्धान्तानुकूलतया च पूर्वं विकारवादोऽभ्युपगत इति न तेनास्य सिद्धान्तस्य विरोध इत्याशयेन वादिनां कार्यविषयाभ्युपगमप्रकारचातुर्विध्यमाह । आरम्भेत्यादिना । कारणात्तन्त्वादेः सकाशादत्यन्तभिन्नस्योत्पत्तेः प्रागसतः कार्यस्य समवाय्यसमवायिनिमित्तेनोत्पत्तिरित्यारम्भवादः, अणूनां समुदाय एव घटादिलक्षणं कार्यं न तु तदुत्पन्नं वस्त्वन्तरमिति संहतिवादः, मृदादेस्तात्त्विकोऽन्यथाभावो घटादिरिति विकारवादः, अतात्त्विकोऽन्यथाभावो रज्जाविव सर्पादिरिति विवर्तवादः, तानेतानाश्रित्य वादिजनता तत्समूहो वावदीत्यतिशयेन वदति मुखरीभवतीति यावत् खल्विति संबन्धः । एतन्मतभेदप्रदर्शनस्य प्रस्तुतमुपयोगमाह । आरम्भसंहतिमते इति । एतन्मतद्वयमुपेक्ष्या

द्वयब्रह्मणो जगत्कारणाादिसमन्वयस्यात्यन्तिकभेदाश्रयारम्भसंहतिपक्षो-
त्थितविरोधशङ्कां परिहर्तुं समुद्रतरङ्गादेरिवाभेदेऽपीषद्भेदेन कार्यकारण-
भाव उपपद्यते लोके तथादर्शनादिति नात्यन्तभेदस्तद्बलात्सिध्यतीति
पराश्रितपरिणामवादं सिद्धान्ततया विवर्तवादं च द्वयं सूत्रकृत्संग्रहपदं
नयते संगृह्णातीत्यर्थः ॥ ५७ ॥

मू० ॥ तत्रापि पूर्वमुपगम्य विकारवादं
भोक्त्रादिसूत्रमवतार्य विरोधनुत्त्यै ॥
प्रावर्तत व्यवहृतेः परिरक्षणाय
कर्मादिगोचरविधावुपयोगहेतोः ॥ ५८ ॥

टी० ॥ ननु परमतनिवृत्तये विकारवादोऽपि संगृहीतश्चेत्तर्हि
सोऽप्यावश्यक एवेति कथं तस्याभ्युपगमवादत्वमिति चेन्नैवम्, विवर्तेनापि
तत्परिहारसंभवात्, किमिति तर्हि तत्संग्रह इतिचेन्मन्दजनप्रतीतिविरोधं
परिहर्तुमित्युक्तमेव विवृणोति । तत्रापीति । तत्रापि विकारविवर्तयो-
र्मध्येपि विवर्तवादात्पूर्वमद्वये जगद्योनौ वेदान्तसमन्वयस्य भोक्तृभोग्या-
दिभेदग्राहिप्रमाणविरोधशङ्कापनुत्त्यै विकारवादं परकीयमभ्युपगम्य तद्वि-
षयं भोक्त्रापत्तेरविभागश्चेत्स्याल्लोकवदिति सूत्रमवतार्य मुनीन्द्रः सूत्र-
कारः प्रावर्तत विरोधपरिहारे प्रवृत्तवानिति संबन्धः । ननु किं विवर्त-
वादेन सा शङ्कापरिहर्तुमशक्येत्याशङ्क्य पक्कमतिं प्रति तेन सा सुपरिहरापि
भेदाभिनिविष्टचित्तं प्रति विकारवादेनैव तत्परिहारः सुकर इत्यशयेना-
ह । व्यवहृतेरिति । लोक उदकाहरणादितत्तदर्थिनो नियमेन घटादौ
प्रवृत्त्यादिव्यवहारस्य दृष्टस्य संरक्षणात्कर्मकाण्डावगताग्निहोत्राद्यनुष्ठा-
नस्य ब्रह्मवधादिनिवृत्तेश्च प्रापकविधिनिषेधोपयोगाच्च हेतोर्विकारवा-
दमुपगम्येत्यनेन संबन्धः । तत्र हि भेदाभेदसत्त्वाल्लोकप्रसिद्धभेदो न
निषिध्यते कारणाद्वयत्वं चोपपादितं भवतीति भगवता सोऽभ्युपगत
इति भावः ॥ ५८ ॥

मू० ॥ साक्षादिहाभिमतमेव विवर्तवाद-
माहृत्य सूचयति पूर्वमपेक्षमाणः ॥

आरम्भणादिवचनेन विवर्तवादं
शक्नोति वक्तुमुदिते परिणामवादे ॥ ५६ ॥

टी० ॥ ननु प्रथममुक्तत्वादपेक्षितत्वाच्च परिणामवाद एव सिद्धान्तोऽस्त्वन्यथा स्वाभिमतविवर्तस्यैव प्रथमाभिधानं किं न स्यादित्यत आह । साक्षादिति । इहास्मिञ्शास्त्रे विवर्तवादः साक्षादभिमतः स्वप्रतिज्ञातशुद्धाद्वैतसमन्वयोपपादकत्वात्, विकारस्तु नैवमिति विवर्तमेव सूत्रकार आहत्य मुखत एव सूचयति, तत्रापि परिणामवादमुखेन कार्यकारणयोरत्यन्तभेदं निराकृत्य तत्संमतमपि भेदं निराकुर्वन्विकारवादमप्युपेक्षते अन्यथा स्वस्यैवोभयत्र व्यापारे गौरवाद्विवर्तवादस्य विकारपूर्वकत्वाच्च प्राक्तनयुक्त्यैवायं वक्तव्य इति स प्रागभ्युपगतोऽतो न तस्य प्रागुक्तिमात्रेण सिद्धान्तत्वमित्याशयेनाह । पूर्वमपेक्षमाण इति । एतदेव विवृणोति । आरम्भणेति । प्रथमं परिणामवाद उदिते उक्ते सति आरम्भणादिवचनेन विवर्तवादं वक्तुं शक्नोति नान्यथा कार्यकारणस्वरूपस्याप्रतीतौ तस्य मिथ्यात्वप्रतीत्ययोगादित्यर्थः ॥ ५९ ॥

मू० ॥ आरुह्य भूमिमधरामितराधिरोढुं
शक्येति शास्त्रमपि कारणकार्यभावम् ॥
उक्त्वा पुरा परिणतिप्रतिपादनेन
संप्रत्यपोहति विकारमृषात्वसिद्ध्यै ॥ ६० ॥

टी० ॥ लौकिकदृष्टान्तेनाप्यमुमर्थमाह । आरुह्येति । यथा प्रासादमारुरुक्षुणा तदुपायसोपानस्याधरामधःस्थितां भूमिं पदन्यासस्थानमधस्तनसोपानपर्वेति यावत् तामारुह्येतरोपरितना भूमिरधिरोढुं शक्येति प्रसिद्धमिति शेषः । एवं शास्त्रमपीत्यादिना संबन्धः । परिणतिप्रतिपादनेन भोक्त्रादिसूत्रेणेति शेषः । संप्रत्यारम्भणाधिकरण इत्यर्थः । विवर्तत्वव्युत्पादनं हि कारणात्कार्यस्य भेदादिसत्यत्वनिषेध एव स्यात्स च ब्रह्मणि प्रपञ्चभेदप्रसक्तौ सत्येव भवतीति भेदप्रसञ्जकपरि-

Digitized by Google

णामवादस्य तन्निषेधकविवर्तवादस्य च क्रमो युज्यते श्रुतावपि सृष्टिवाक्येनारोपितप्रपञ्चस्य ब्रह्मणि नेतिनेतिवाक्येन निषेधादिति भावः ॥ ६० ॥

मू० ॥ विवर्तवादस्य हि पूर्वभूमि-
वेदान्तवादे परिणामवादः ॥
व्यवस्थितेऽस्मिन् परिणामवादे
स्वयं समायाति विवर्तवादः ॥ ६१ ॥

टी० ॥ परिणामविवर्तवादयोर्दृष्टान्तसाम्यं दर्शयन्नुक्तमर्थं विशदयति । विवर्तवादस्य हीति । वादे शास्त्रे परिणामवादे व्यवस्थिते प्रसक्ते सति विवर्तवादः स्वयं समायातीति भेदाभेदाश्रयणेनात्यन्तभेदाद्विमुखचित्तस्य वक्ष्यमाणन्यायेनानायासेनैव तदपि निराकर्तुं शक्यमित्यर्थः ॥ ६१ ॥

मू० ॥ उपायमातिष्ठति पूर्वमुच्चै-
रुपेयमाप्तुं जनता यथैव ॥
श्रुतिर्मुनीन्द्रश्च विवर्तसिद्ध्यै
विकारवादं वदतस्तथैव ॥ ६२ ॥

टी० ॥ ननु कथं नु भगवः स आदेशो भवतीति श्रुतिरेकविज्ञानात्सर्वविज्ञानमाक्षिपन्ती शुद्धाद्वैतमाक्षिप्य मृदादिदृष्टान्तोपादानेन परिणामं विवक्षति एकस्मिन् वाक्ये च पूर्वानुरोधेनैवोत्तरं नेतव्यमतस्तन्मूलं सूत्रमपि तदाशयं किं न स्यादित्याशङ्क्य कथं न्विति वाक्यस्य पूर्वपक्षतया शुद्धाद्वयस्य वाचारम्भणं विकारो नामधेयं मृत्तिकेत्येव सत्यमित्यादिना विकारमृषात्ववर्णनेनोपपद्यमानतया च न विकारवादस्य प्रथमं श्रवणेऽपि संमतत्वं किं तूक्तविधया विवर्तत्वव्युत्पादनहेतुतया पूर्वपक्षतया च श्रुतिसूत्रकाराभ्यां प्रथमं स आदृत इति दृष्टान्तान्तरेणाह । उपायमिति । आतिष्ठति अनुतिष्ठति करोतीति यावत् । उपेयं फलं जनता जनसमूहः ॥ ६२ ॥

Digitized by Google

मू० ॥ आरम्भवादः कणभक्षपक्षः

संघातवादस्तु भदन्तपक्षः ॥

सांख्यादिपक्षः परिणामवादो

वेदान्तपक्षस्तु विवर्तवादः ॥ ६३ ॥

टी० ॥ कस्य तर्हि विकारवादः संमतो य इहाभ्युपगत इत्युच्यत इत्याशङ्क्य प्रागुक्तारम्भादिमतानामभ्युपगन्तॄनाह । आरम्भवाद इति । कणभक्षो वैशेषिकस्तदिष्ट इत्यर्थः, भदन्तो बौद्धः, सांख्यः कपिलः, आदिपदात् पतञ्जलिः ॥ ६३ ॥

मू० ॥ विकारवादं कपिलादिपक्ष-

मुपेत्यवादेन तु सूत्रकारः ॥

श्रुतिश्च संजल्पति पूर्वभूमौ

स्थित्वा विवर्तप्रतिपादनाय ॥ ६४ ॥

टी० ॥ विकारवादस्य परकीयमतत्वकीर्तनफलमाह । विकारवादमिति । उपेत्यवादेन अभ्युपगमसिद्धान्तेनेत्यर्थः अन्यत् स्पष्टम् ॥ ६४ ॥

मू० ॥ अभेदिनः सावयवस्य सत्य-

विधिषद्रूपान्तरदर्शकत्वम् ॥

वदन्ति धीराः परिणाममस्या

वसुन्धरायाः इव सस्यसृष्टिम् ॥ ६५ ॥

टी० ॥ ननु कारणस्य रूपान्तरापत्तिः परिणामो यथा मृदो घटाद्यात्मता सा च विवर्तेऽप्यस्ति रज्ज्वादेः सर्पाद्यात्मतादर्शनात्तत्कथं तयोर्भेद इत्याशङ्क्य विवर्तविलक्षणं परिणामस्वरूपमाह । अभेदिन इति । एकस्येत्यर्थः । एतच्चारम्भवादवैलक्षण्यार्थमुक्तमेकस्यारम्भकत्वानङ्गीकारादारभ्यारम्भकयोर्भेदाच्च । सावयवस्येति ब्रह्मविवर्तवैलक्षण्याय । सत्त्वादयो हि गुणाः प्रधानावयवतया परस्परसंसृष्टा एकं सत्प्रधानमित्यभेदिनः सावयवस्येत्युक्तम् । एवं यथा कारणं तथा महदादेरपि परिणामिनः

स्वरूपं द्रष्टव्यम् । निरवयवस्य परिणामो न संभवति लोके तथा दर्शना-दिति नैतदसंभवि । सत्येति कार्यस्वरूपतोऽपि शुक्तिरजतव्यावृत्त्यय उक्तम् । विचित्रेति तत्स्वरूपकीर्तनम्, विवर्तपरिणामयोरुभयत्र समत्वात् । रूपान्त-रेति संघातव्यावृत्त्यर्थं संघातस्य संहन्तृभ्यो रूपान्तरत्वाभावात् । अथ वाऽ-भेदिन इत्यनेन संघातस्यापि व्यावृत्तिः संहन्तृणामनेकत्वात् । दर्शकत्वमिति तत्र प्रमाणाभिप्रायम् । कारणस्य तात्त्विककार्यात्मत्वं परिणामः, सावयवस्य सतः कार्यात्मत्वं वेति तल्लक्षणं द्रष्टव्यम् धीरा इति विरुद्धतत्त्वयोस्तत्त्वतो भेदाद्यसंभवापह्नवधाष्ट्यं सूचयति । तदुदाहरति । वसुन्धराया इति ॥ ६५ ॥

मू० ॥ अभेदिनो निर्विकृतेरनेक-
मृषास्वरूपान्तरदर्शकत्वम् ॥
विवर्तशब्दार्थ इह प्रसिद्ध-
स्तरङ्गभेदादिव चन्द्रभेदः ॥ ६६ ॥

टी० ॥ विवर्तस्य विकाराद्व्यावृत्तं स्वरूपमाह । अभेदिनो निर्वि-कृतेरिति । निर्विकृतेरित्यनेन पूर्वरूपपरित्यागलक्षणो विकारो निषिध्यते अनेकेति च ब्रह्मविवर्ताभिप्रायमन्यत्र तदनियमात् । इह सिद्धान्ते कार-णस्य पूर्वरूपापरित्यागेनाभवं रूपान्तरम् अतात्त्विकरूपान्तरभेदो वा विवर्तवाद इति विवक्षितम् । परिणामे आरम्भे च प्रसङ्गवारणाय पूर्वरूपे-त्यादि । उदाहरति तरङ्गेति ॥ ६६ ॥

मू० ॥ अहं प्रजायेय बहु स्वयं स्या-
मित्यादिनादौ परिणाममुक्त्वा ॥
विकारमिथ्यात्वमथ ब्रुवाणा
विवर्तवादं श्रुतिराननाय ॥ ६७ ॥

टी० ॥ एवं प्रसङ्गागतं विचारं समाप्य श्रुतिर्मुनीन्द्रश्च विवर्तसिद्धौ विकारवादं वदतस्तथैवेत्यनेन या श्रुतिरभ्युपगम्य परिणामवादं वदतीत्यु-क्तम् । तत्रापातदृष्ट्या सृष्टिविषया श्रुतिः सेत्यभिप्रेत्याह । अहं प्रजाये-

येति। बहु स्यां प्रजायेयेत्यादिश्रुतेरयमर्थतोऽनुवादः अहं स्वयं प्रपञ्चात्मना प्रजायेयातो बहु स्यामिति योजना, अहमिति च सतो मूलकारणस्योक्तिः। विकारमिथ्यात्वमथ ब्रुवाणेति। अथेत्यर्थान्तरे यदग्ने रोहितं रूपं तेजसस्तद्रूपं यच्छुक्लं तदपां यत्कृष्णं तदन्नस्यापागादग्नेरग्नित्वं वाचारम्भणं विकारो नामधेयं त्रीणि रूपाणीत्येव सत्यमित्यग्न्यादेर्मिथ्यात्वं ब्रुवाणा श्रुतिर्विवर्तवादमानिनायानीतवतीत्यत्र परिणामद्योतकाभावादियं परिणामश्रुतिरिति परस्य भ्रान्तिरेव। न च सत एवेक्षणपूर्वकं कार्यात्मना जनिश्रवणादियं परिणाम इति वाच्यम्, विवर्तत्वेऽपि तदुपपत्तेः, सत्यं चानृतं च सत्यमभवदथ रथान् रथयोगान् पथः सृजत इति विवर्तेऽपि तच्छ्रवणात्। तत उत्तरत्र विकारमिथ्यात्वप्रतिपादनात्संमुग्धाकारेण तस्यैवेयं सृष्टिश्रुतिरन्यथा तदेव एकवाक्यतायोगादिति ग्रन्थकारः परभ्रान्तिमाश्रित्य परिणाममुक्त्वेत्यवोचदत एव सिद्धान्तं निषेधन्ती कथं नु भगव इत्याद्या श्रुतिः पूर्वपक्षतया परिणामपरेत्यवोचाम तस्मात् सैवात्र द्रष्टव्या ॥ ६७ ॥

मू० ॥ मायाश्रुतिस्मृतिवचः सकलं तथा च
वस्तुत्वमर्दनपरं घटते विवर्ते ॥
सर्वस्य कारणविकारविभागभाजः
प्रागादृतस्य परमार्थतया प्रतीतेः ॥ ६८ ॥

टी० ॥ एवं छान्दोग्यसृष्टिश्रुतिपूर्वोत्तरवाक्यपर्यालोचनया विवर्तवाद एव प्रामाणिक इत्युक्तमिदानीमेतत्फलमेवं सति तत्पर्यायमायामयत्वादिप्रपञ्चस्य ब्रुवतः श्रुत्यादिवचनस्य प्रामाण्यमुपपन्नं भवतीत्याह। मायाश्रुतीति। "इन्द्रो मायाभिः पुरुरूप ईयते" "मायां तु प्रकृतिं विद्यात्" "ज्ञानस्वरूपमत्यन्तं निर्मलं परमार्थतः तदेवार्थस्वरूपेण भ्रान्तिदर्शनतस्थित"मित्यादि मायाश्रुतिस्मृतिवच इत्यर्थः। तथा च विवर्तवादे आश्रिते सति सङ्घट इत्यादिप्रतीतिबलात् प्रागविचारदशायां परमार्थतयादृतस्य कारणविकारविभागभाजः कार्यकारणात्मना विभक्तस्य सर्वप्रपञ्चस्य वस्तुतत्त्वमर्दनपरं सकलं मायाश्रुतिस्मृतिवचो घटत इति पदयोरित्याशयेन सर्वस्येत्याद्युक्तम् ॥ ६८ ॥

मू० ॥ संघातवादमुपगम्य तु तत्र पक्षे
संहन्त्रभाव इति सूत्रकृदाह दोषम् ॥
स्थायी भदन्तसमये न हि कश्चिदत्र
संघातसंजननशक्तिसमन्वितोऽस्ति ॥ ६६ ॥

टी० ॥ किं च तयोः संघातारम्भवादयोर्युक्त्यसहतया सूत्रकारेण निरस्तत्वादपि तत्त्वजिज्ञासुना तौ दूरतो वर्जनीयावित्यभिप्रेत्य सकलशिष्टैः परित्यक्तत्वात्संघातवादं प्रथमं दूषयति । संघातवादमिति । उपगम्यानूद्य संहन्तुः संहन्यमानानां मेलकस्याभावः । एतदुक्तं भवति । सौत्रान्तिकवैभाषिकाभ्यां हि बुद्धशिष्याभ्यां बाह्याभ्यन्तरपदार्थाः क्षणिकाः सन्तीत्यभ्युपगतम्, तत्र भूतं पृथिव्यादिचतुष्टयम्, भौतिकं रूपादि चक्षुरादि च, भूतभौतिके च खरस्नेहोष्णेरणस्वभावानां सकृदेव कार्यजनकतया क्षणिकानां चतुर्विधपरमाणूनां संघातरूपे न तु वैशेषिकाणामिव ततोऽन्ये तदारब्धे, तत्र खरः पृथिवीपरमाणुः, स्नेहोष्णौ प्रसिद्धौ, ईरणो वायुपरमाणुः, तथा रूपविज्ञानवेदनासंज्ञासंस्कारसंज्ञितानां च पञ्चस्कन्धानामपर आध्यात्मिकः संघातः सकललोकयात्रावहः, रूप्यन्त एभीरूप्यन्त इति च व्युत्पत्त्या सविषयाणीन्द्रियाणि रूपस्कन्धः, अहमित्याकारं रूपादिविषयं वा ज्ञानं विज्ञानस्कन्धः, चित्तस्य या प्रियाप्रियानुभयात्मकविषयवेदनेन सुखदुःखतद्रहितविशेषावस्था जायतेऽसौ वेदनास्कन्धः, सविकल्पकप्रत्ययः संज्ञास्कन्धः, रागादयः क्लेशा उपक्लेशाश्च मदमानादयो धर्माधर्मौ च संस्कारस्कन्ध, इति । तदिदमनुपपन्नं समुदायिनामचेतनत्वेन स्वतः समुदायायोगात्, लोके चेतनव्यापारं विनाऽचेतनेषु तददर्शनात् । ननु तन्मतेपि चित्तं चेतनमस्ति तज्ज्ञात्वा संयोजयिष्यतीति चेन्न । शरीरादिसंघातोत्पत्तेः पूर्वं तस्य ज्ञातृत्वायोगात् । नन्वालयविज्ञानमहंकारास्पदं तदेव सकलव्यवहारकारणमिति चेन्न । तस्यापि विषयविज्ञानादृते तदयोगाद्विषयविज्ञानं च न संघातं विनेत्युक्तम् । किं चालयविज्ञानं स्थायि चेन्नामान्तरेणात्मवादात्मैव स्यात्, क्षणिकश्चेत्तेनापि कथं संघातो जननीयः, ज्ञानपूर्वेच्छाधीनप्रयत्नवच्चेतना-

धिष्ठितकायव्यापारेण हि कुलालादय एकेनापरं संयोजयन्ति वियोजयन्ति च ज्ञानादीनां चैकाश्रयाणामेव कार्यकारणभावो लोके सिद्ध इति कथं क्षणिकात्मनि तदुत्पत्तिः स्यात्, एवं क्रियाविभागाद्याश्रयानेकक्षणस्थायिन एवैकस्यापरेण संयोगः संभवतीति न क्षणिकानामणूनामन्योन्यसंबन्धोऽपि सिध्येत्। यत्तु सकृदेव कार्यजनकत्वादणूनां क्षणिकत्वमिति। तन्न। प्रसिद्धैरेकस्यापि सहकारिसमवधानक्रमेणानेककार्यजनकत्वस्य लोकेऽनुभवादतोऽत्यन्तमयुक्त एवायं पक्ष इति समुदाय उभयहेतुकेऽपि तदप्राप्तिरिति सूत्रेण तत्र दोषं सूत्रकार आहेति संबन्धाभावमेवाह। स्थायीति। उक्तरीत्या ज्ञानाद्यनेकक्षणावस्थायी संघातजननशक्तिसमन्वितो भवतीति बौद्धमते स न सिद्ध्येदित्यर्थः ॥ ६९ ॥

मू० ॥ आरम्भवादमुपगम्य तदीययुक्ते-
स्तत्प्रक्रियामनुसरन् व्यभिचारमाह ॥
वैशेषिकं प्रति महद्वदिदं हि योऽण्वं
यद्वाऽपि दीर्घवदिदं ह्रस्वमित्यनेन ॥ ७० ॥

टी० ॥ वैशेषिकास्तु स्वमनीषाविलसितानणून् जगत्कारणान्याहुः। तन्तवो हि पटसमानजातीयानेकसंवलिता एव पटमारभन्ते एवंविधेभ्य एव सर्वत्र कार्यद्रव्यदर्शनात्कारणगतगुणाश्च सजातीयान् कार्ये गुणानारभन्ते। तन्तुरूपादौ तथा दर्शनात् कार्यगतमहत्त्वं च कारणगतबहुत्वमहत्परिमाणादृढसंयोगारब्धं न्यूनाधिकसंख्यतन्त्वारब्धयोः पटयोः समसंख्यादिमत्स्थूलसूक्ष्मतन्त्वारब्धयोः शिथिलाशिथिलसंयोगवत्तूलपिण्डारब्धपिण्डयोश्च महत्त्वविशेषस्योक्तहेतुकत्वादेवं कार्यपरिमाणान्न्यूनपरिमाणापकर्षपर्यवसानभूमयः परमाणवः सिध्यन्ति द्व्यणुककारणानि द्व्यणुकपरिमाणे च परमाणुद्वित्वमसमवायि कारणं त्र्यणुकपरिमाणे तु द्व्यणुकबहुत्वमिति तत्प्रक्रिया एवं च कथमद्वितीयात्परममहतश्चेतनाद्ब्रह्मणः परिच्छिन्नजडवियदादिकार्यद्रव्यस्योत्पत्तिरितीममाक्षेपं सूत्रसूचितयुक्त्या दूषयति। आरम्भवादमिति। तदीययुक्तेर्वैशेषिकस्य कारणगुणारम्भकत्वविषययुक्तेस्तत्प्रक्रियामनुसरन्नेव तत्प्रक्रिययैव वैशेषिकं प्रति सूत्रकारो

Digitized by Google

व्यभिचारमाहेत्यर्थः । तत्प्रक्रियायां व्यभिचारं दर्शयन्नेव स्वमतेऽविरोधपरं सूत्रमर्थतः पठति । महद्दीर्घवदिति । किं कारणगुणानामविशेषेण कार्ये समानजातीयगुणारम्भकत्वं किं वा तद्विशेषगुणानाम् । नाद्यः । चित्ररूपादिमद्वयव्यारम्भकावयवरूपादौ तदभावात् । विशेषगुणस्वानिरूपणस्य वृद्धैर्दर्शितत्वाच्च । नाप्याद्यः । द्व्यणुकेस्यणुकस्य महत आरम्भ इतिवैशेषिकैरभ्युपगमाच्च च तत्र समवायिगतं परिमाणं सजातीयं तदारभते तद्वदिदं चेतनं ब्रह्मापि जडं जगज्जनयतु न तु तच्चैतन्यान्तरमिति । योऽयमुपपादनीयम्, किं च तानि द्व्यणुकानि ह्रस्वानीति वैशेषिकसंमतं त्र्यणुकं च दीर्घमिति । एवं च यथा कारणगतं ह्रस्वपरिमाणं त्र्यणुके स्वसमानपरिमाणं न जनयति तद्वदपीदं ब्रह्म जडं जनयिष्यतीत्यपि योऽयमित्यनेनैतदर्थेन महद्दीर्घवद्वा ह्रस्वपरिमण्डलाभ्यामिति सूत्रेण व्यभिचारमाहेति संबन्धः । एतच्च चकारार्थेन सौत्रवाशब्देन सूचितम् परमाणुपारिमण्डल्यस्य द्व्यणुके सजातीयानारम्भकत्ववदित्येतामुपलक्षयतीति द्रष्टव्यम् ॥ ७० ॥

मू० ॥ ह्रस्वारब्धं त्र्यणुकमणुभिस्तद्वदारब्धमेतद्

ह्रस्वं नो तन्न च तदणुतासंमतं तद्वदेतत् ॥

सर्वं कार्यं गगनधरणीमध्यगं चेतनोत्थं

निश्चित्कं नो जडिमघटितं युक्तमित्याचचक्षे ॥ ७१ ॥

टी० ॥ महद्दीर्घवदित्यादि विवृणोति । ह्रस्वारब्धमिति । त्र्यणुकं हि दीर्घं ह्रस्वैर्द्व्यणुकैरारब्धं तद्वदेतदेव महदणुभिर्द्व्यणुकैरारब्धं तथापि तद्व्यणुकं नो ह्रस्वं ह्रस्वं न भवति न च तदणुवदणुसदृशमणुपरिमाणं न तु परमाणुद्व्यणुकयोः परिमाणं द्व्यणुकत्र्यणुकगतपरिमाणारम्भकसामर्थ्यं तत्संमतमेवमेतदसंमतमपि । एतदेव विवृणोति । सर्वमित्यादिना । ननु परमाणुद्व्यणुकयोर्द्व्यणुकत्र्यणुकगतपरिमाणारम्भकसामर्थ्यान्तरसत्त्वात्तत्तुल्यापारिमाण्डल्यादिद्व्यणुकादौ सजातीयं नारभत इति चेन्न वैपरीत्यस्यापि संभवात् । अणुत्वादिसामग्रीप्राबल्यकथनं तु तथात्वाद्भ्युपगमायत्तमिति भावः । नोऽस्माकं निश्चित्कम् अत एव जडिमघटितं जाड्यविशिष्टमित्यर्थः ॥ ७१ ॥ (शेषमग्रे)

Digitized by Google

॥ श्रीः ॥

श्रौतपदार्थनिर्वचनम् ।

अथ पाशुकपदार्थानां नामान्युच्यन्ते ।

(*Continued from page* 342 Vol VII.)

२१७ अथादित्येष्टिः । तत्रादितिर्देवता । चरुर्द्रव्यम् । सामिधेनी-प्रभृति सर्वं प्रकृतिवत् । अदितिर्न उरुष्यत्विति प्रधानस्यानु-वाक्या । महीमूषु मातरं सुव्रतानामिति याज्या । इति विशे-षः । इतीयं सोमामणीपूर्वाङ्गादित्येष्टिरिति गीयते ॥

२१८ अथ त्रिपशोः पश्चिष्ट्यग्निप्रणयनमन्थनानि पूर्ववत् । आवाह-नकाले । आज्यभागावाहनानन्तरम् । अश्विनावा३वह । सर-स्वतीमा३वह । इन्द्रमा३वह । वनस्पतिमा३वहेत्यादि पूर्ववत् एतत्सौत्रामण्यांदेवतावाहनमित्युच्यते ॥

२१९ यजशब्दान्तैः प्रैषैर्मैत्रावरुणो होतारं प्रेष्यति । वषट्कारान्ताभि-र्याज्याभिर्होता यजति । होता यक्षत्समिधाग्निमिडस्पदेऽश्वि-नेन्द्रं सरस्वतीमजोधूम्रोनगोधूमैः कुलेर्भेषजं मधु शष्पैर्न तेजइन्द्रियं पयः सोमः परिस्रुता घृतं मधु वियन्त्वाज्यस्य होतर्यज ॥ १ ॥ ये३य० सुवः समिद्धो अग्निरश्विना तप्तो-घर्मो विराट् सुतः । दुहे धेनुः सरस्वती सोमꣳ शुक्रमिहे-न्द्रिया३वो३० ॥ १ ॥ वा३ष० । होता यक्षत्तनूनपात्सरस्व-त्यविर्मेषो न भेषजं पन्था मधुमता भरन्नश्विनेन्द्राय वीर्यम् । बदरैरुपवाकाभिर्भेषजं तोक्मभिः पयः सोमः परिस्रुता०विय-न्त्वाज्यस्य होतर्यज ॥ २ ॥ ये०स्वश्वस्तनूनपाता भिषजा सुते-ऽश्विनोभासरस्वती मध्वारजाꣳसीन्द्रियमिन्द्राय पथिभिर्वहा३-

न्वो३० ॥ २ ॥ एते प्रैषयाज्ये वसिष्ठादिभिन्नानाम् । होता यक्ष-न्नराश॑ꣳसंन्ननग्नहुं पतिं सुरायै भेषजं मेषः सरस्वतीभिषग्रथोन चन्द्रिमश्विनोर्वपा इन्द्रस्य वीर्यम् । बदरैरुप०वियन्त्वाज्यस्य होतर्यज ॥ २ ॥ ये० सुषरिन्द्रायेन्दुꣳसरस्वती नराशꣳसेन नग्न-हुः । अथातामश्विनामधु भेषजं भिषजासुता ३वो३० ॥ २ । वाग्वष० । एते प्रैषयाज्ये वसिष्ठादीनाम् । होता यक्षदिडेडित आजुह्वाना सरस्वतीमिन्द्रं बलेन वर्धयन्नृषभेणगवेन्द्रियम-श्विनेन्द्राय वीर्यम् । यवैः कर्कन्धुभिर्मधुलाजैर्नमासरं पयः सोमः० वियन्त्वाज्यस्य होतर्यज ॥ ३ ॥ ये०सुवराजुह्वाना सरस्वतीन्द्रायेन्द्रियाणि वीर्यम् । इडाभिरश्विना विषꣳसमू-र्जꣳसꣳरयिं दधू३र्वो३० । वाग्वष० । होता यक्षद्बर्हिः सुष्टरीमो-र्णम्रदाभिषङ्नासत्याभिषजाश्विनाश्वाशिशुमती भिषक् धेनुः सर-स्वती भिषक् । दुहइन्द्राय भेषजं पयसोमः० वेत्वाज्यस्य हो-तर्यज ॥ ४ ॥ ये० सुवरश्विना नमुचेः सुतꣳसोमꣳशुक्रं परि-स्रुता । सरस्वती तमाभरद्बर्हिषेन्द्राय पातवा३वो३० ॥ वाग्वष० ॥ ४ ॥ होतायक्षद्दुरोदिशः कवष्यो नव्यचस्वतीरश्विभ्यां न दुरोदिश इन्द्रो न रोदसी दुघे दुहे कामान्सरस्वत्यश्विनेन्द्राय भे-षजम् । शुक्रं न ज्योतिरिन्द्रियं पयः सोमः० वियन्त्वाज्यस्य होत-र्यज ॥ ५ ॥ ये० सुवः कवष्यो नव्यचस्वतीरश्विभ्यां न दुरोदिशः । इन्द्रो न रोदसी दुघे दुहे कामान्त्सरस्वती३वो३० ॥ ५ ॥ वाग्व-ष० । होता यक्षत्सुपेशसोषे नक्तं दिवाश्विना सञ्जाजाने समञ्जाते सरस्वत्या त्विषिमिन्द्रेन भेषजम् । श्येनो न रमसा हृदा पय सोमः०वीतामा०र्यज ॥ ६ ॥ ये०सुवरुषासानक्तमश्विना दिवे-

न्द्र९ँसायमिन्द्रियैः । सञ्जानाने सुपेशसा समञ्जाते सर- स्वत्या३वी३० ॥ ६ ॥ वाग्वष० ॥ होता यक्षद्दैव्या होतारा भिषजाश्विनेन्द्रं न जागृवी दिवानक्तं न भेषजैः । सुष९ँसर- स्वती भिषक् सीसेन दुह इन्द्रियं पयः सोमः०वीताम०यज ॥ ७ ॥ ये०सुवः पातं नो अश्विना दिवा पाहि नक्तं सरस्वति । दैव्या होतारा भिषजा पातमिन्द्र९ँसचासुताहवी३० ॥ ७ ॥ वाग्वष० । होता यक्षत्तिस्रोदेवीर्नभेषजं त्रयस्त्रिधातवोपसोरूपमिन्द्रे हिर- ण्ययमश्विनेडा न भारती वाचा सरस्वती महइन्द्रायदधुरि- न्द्रियं पयः सोमः० वियन्त्वा०यज ॥ ८ ॥ ये०सुवस्तिस्रस्त्रेधा सरस्वत्यश्विना भारतीडा । तीव्रं परिस्रुता सोममिन्द्राय सुषवु- र्मदा३ वी३० ॥ ८ ॥ होता यक्षत्त्वष्टारमिन्द्रमश्विना भिषजं नसरस्वत्योजोनजूतिरिन्द्रियं वृको न रभसो भिषक् । यशः सुरय भेषज९ँश्रियानमासरं पयःसोम० वेत्वाज्य० यज ॥ ९ ॥ सुवर- श्विना भेषजं मधु भेषजं नः सरस्वती । इन्द्रे त्वष्टा यशः श्रिय९ँरूप९ँरूपमधुस्सुताहइ वी३० ॥ ९ ॥ वाग्वष० । होता यक्षद्व- नस्पतिं९ शमितार९ँ शतक्रतुं भीमं न मन्यु९ँ राजानं व्याघ्रं नम- साश्विनाभामम् । सरस्वती भिषगिन्द्राय दुह इन्द्रियं पयः सोम० वेत्वाज्य० यज ॥ १० ॥ ये० सुवक्रतुथेन्द्रो वनस्पतिः शश- मानः परिस्रुता कीलालमश्विभ्यां मधुदुहे धेनुः सरस्वती इवी३० ॥ १० ॥ वाग्वष० । एते पशोरनुयाजानां प्रैषा याज्या- सहिता उक्ताः एते मन्त्रा वक्ष्यमाणावेकादशो याज्यास्त्रिप्रया- जयाज्याप्रैषो च प्रैषाइत्युच्यन्ते ॥

२२० ततो मैत्रावरुणो ऽग्निर्होता नो अध्वर इत्यादिपर्यग्नये क्रिय- माणायान्वाह । ततो होता दैव्याः शमितार उत मनुष्या

इत्यादि वाक्यरूपमध्रिगुसंज्ञकं यथार्थमाश्वलायनसूत्रोक्तप्रकारेणोहेन पठति । होता अध्रिगुं पठित्वा अध्रिगुश्चापापश्चोभौ देवानाᳬ शमितारौ ताविमं पशुᳬ श्रपयतां प्रविद्वाᳬसौ यथायथास्य श्रपणं तथा तथा । इति विजेपति । ये०सुवर्णाभिर्ने सोममश्विनामावरेण पारष्कृता । समधाताᳬ सरस्वत्या स्वाहेन्द्रे सुतं मधू३ वो३० ॥ ११ ॥ वा०अ० । होता वक्ष्यमाणप्रैषेण प्रेषितोऽनया याज्यया यजति । स प्रैषो यथा । होता यक्षदग्निᳬ स्वाहाऽऽज्यस्य स्तोकानाᳬ स्वाहा मेदसां पृथक् स्वाहा छागमश्विभ्याᳬ स्वाहा मेषᳬ सरस्वत्यै स्वाहर्षभमिन्द्राय सिᳬहाय सहसेन्द्रियᳬ स्वाहाऽग्निं न भेषजᳬस्वाहा सोममिन्द्रियं स्वाहेन्द्रᳬसुत्रामाणᳬ सवितारं वरुणं भिषजां पतिं प्रियम्पाथो न भेषजम् । स्वाहा देवाᳬ आज्यपान् स्वाहा ग्निᳬ होत्राज्जुषाणो अग्निर्भेषजं पयः सोमः०वियन्त्वाज्यस्य होतर्यज ॥ ११ ॥ आज्यभागानन्तरं वपायागो भवति । अश्विना हविरिन्द्रियं नमुचेर्धिया सरस्वती । आशुक्रमासुराद्वसुमघमिन्द्राय जभ्रिरे३म् । इति सौत्रामण्याश्विनानुवाक्येति गीयते ॥

२२१ होता यक्षदश्विनौ छागस्य वपाया मेदसो जुषेतां हविर्होतर्यजेति प्रैषेण होतारं मैत्रावरुणः प्रेष्यति ये०सुवर्यमश्विना सरस्वती हविषेन्द्रमवर्धयन् । स बिभेद बलं मघं नमुचावासुरे सचा३ वो३० ॥ वा०अ० । अयं पुरोनुवाक्याप्रभृतिः सौत्रामण्याश्विनयाग इत्युच्यते ॥

२२२ यमश्विना सरस्वती हविषेन्द्रमवर्धयन् । स बिभेद बलं मघं नमुचा वासुरे सचो३ इति पुरोनुवाक्या । होता यक्षत्सरस्वती

मेषस्य वपाया मेदसो जुषतां᳖ हविर्होतर्यज । इति प्रैषः ।
ये०सुत्रर्यमश्विना० यत् । स बिभेद बलं मघम्०सचा३ वो३० ।
वा३व० । अयं सौत्रामणीसारस्वतयाग इति गीयते ॥

२२३ समिन्द्रं पशवः सचाश्विनोभा सरस्वती । दधाना अभ्यनूषत
हविषा यज्ञमिन्द्रियोम्३ । इत्यनुवाक्या । होता यक्षदिन्द्रं वृष्णो-
मेषस्य वपाया मेदसो जुषतां᳖हविर्होतर्यज । इति प्रैषः ।
ये०सुवरश्विना हविरिन्द्रियं नमुचेर्धिया सरस्वती । आशुक्रमा-
सुराद्वसुमघमिन्द्राय जभ्रिरा३ इवो३० । वा३वष । इति याज्या ।
अयं सौत्रामणीप्रधानेन्द्रवपायाग इत्युच्यते ॥

२२४ वपायागानन्तरं चात्वाले मार्जयित्वा ग्रहैः प्रचरन्ति । युव᳖
सुराममश्विना नमुचा वासुरे सचा । विपिपाना शुभस्पती इन्द्रं
कर्मे स्वावतोम्३ । इयमृक् आश्विनग्रहानुवाक्येति गीयते ॥

२२५ होता यक्षदश्विना सरस्वतीमिन्द्र᳖ सुत्रामाणमिमे सोमाः
सुरामाणश्छागैर्न मेषैर्ऋषभैः सुताः शष्पैर्न तोक्मभिर्लाजैर्महस्व-
न्तोमदामासरेण परिष्कृताः । शुक्राः पयस्वन्तोमृताः प्रस्थि-
तावो मधुश्चुतस्तानश्विना सरस्वतीन्द्रः सुत्रामा वृत्रहा जुष-
न्तां᳖ सोम्यं मधु पिबन्तुमदन्तु वियन्तु सोम᳖ होतर्यज । अय-
माश्विनग्रहप्रैष इत्युच्यते ॥

२२६ ये० पुत्रः पुत्रमिव पितरावश्विनोभेन्द्रावतं कर्मणाद᳖ सनाभिः ।
यत्सुरामं व्यपिबच्छचीभिः सरस्वती त्वामघवन्नभीष्णा३
द्वो३० । वा३वसुरासुतस्याग्ने वीहो३ वो३० । इत्यनुवषट्कारः ।
एतद्याज्यान्तं कर्म आश्विनसौत्रामणीग्रहप्रचार इत्युच्यते ॥

(शेषमग्रे)

Digitized by Google

॥ श्रीः ॥

॥ श्रीं नमः श्रीमते भगवते रामानुजाचार्याय ॥

अथ श्रीभाष्यं विशिष्टाद्वैतपरं रामानुजदर्शनम्

श्रुतप्रकाशिकासमेतं विषमपदटिप्पणीसहितम्

तत्र प्रथमाऽध्यायस्यावशेषः ।

(*Continued from page* 352. VOL VII.)

भू० अध्ययनगृहीतस्य स्वाध्यायस्य स्वभावत एव प्रयोजनवदर्थावबोधित्वदर्शनात् ।

टी० ॥ "अध्ययनगृहीतस्ये"ति । इह साङ्गाध्ययनं विवक्षितम् अधीतसाङ्गसशिरस्कवेदस्य ।

ननु च साङ्गवेदाध्ययनादिति पूर्वापरानुगुण्यात् तेन हि प्रयोजनवदर्थापातप्रतीतिसिद्धिः । अर्थाः—यज्ञोपासनादयः, ते स्वर्गमो[1]क्षादिप्रयोजनवन्तः, प्रयोजनवदर्थ—शब्देन काकदन्तवत्परीक्ष्य[2]त्वशङ्काव्युदासः । प्रयोजनवदर्थावबोधित्वदर्शनादित्यनेन विधेः परम्परया पुरुषार्थपर्यवसायित्वमुक्तं भवति । अध्ययनस्य साक्षात्प्रयोजनमक्षराशिग्रहणमित्युक्तम् अध्ययनगृहीतस्येति पदेन । अयमर्थः । किं साक्षात्पुरुषार्थपर्यवसायित्वं विधेर्विवक्षितम्? । उत परम्परया? । साक्षात्प्रयोजनपर्यवसायित्वं विधेरर्थज्ञानपर्यन्तत्वेऽपि नोपपद्यते, अनुष्ठानापूर्वद्वारा स्वर्गस्यैव प्रयोजनत्वात्, अध्ययनविधेः स्वर्गपर्यन्तत्वानभ्युपगमाच्च । परम्परया चेद् अस्मत्पक्षेऽपि संभवति, स्वभावत—इति, शब्दस्य बोधकत्वशक्तिस्वाभाव्यादित्यर्थः । व्युत्पन्नपदपदार्थं प्रति शब्दस्यार्थावबोधकत्वं स्वाभाविकमिति लोकसिद्धम् । एवकारो विधिनैरपेक्ष्यपरः, अन्यत्र विनियोगस्तु न स्वाभाविकं शब्दस्यार्थपरत्वं निरुपाधिजपविधिवत् "याजयित्वा प्रतिगृह्य वाऽनश्नन् त्रिःस्वाध्यायं वेदमधीयीत चिराचं

१ यज्ञस्यैवोपासनस्य सकामनिष्कामात्मकानुष्ठानवैचित्र्येण स्वर्गमोक्षादिविविधप्रयोजनजनकतेति भावः ।

२ काकदन्तवदपरीक्ष्यत्वशङ्काव्युदास इति पाठान्तरम् ।

वा सावित्रीं वेदमेव जपेन्नित्यमि"त्यादिविधानं हि न वेदस्यार्थपरत्वं निवारयति । स्वाध्यायः स्वतोऽर्थबोधकश्चेत् किं मीमांसयेत्यत्राह ॥

सू० गृहीतात्स्वाध्यायादवगम्यमानान् स्वप्रयोजनवतोऽर्थाना-पाततो दृष्ट्वा ।

टी० "गृहीतादि"ति । गृहीतात्–गृहीतमात्रात्, अध्ययनगृहीतस्येत्युक्तेः, तेन मीमांसाख्येतिकर्तव्यताराहित्यं विवक्षितम्, आपातप्रतीतेः संशयविपर्ययसहत्वात्तन्निराकरणाय मीमांसेति भावः । अध्ययनगृहीतस्येत्यादिना वेदस्य बोधकत्वस्वभावत्वमुक्तं, तत्र प्रयोजनवदर्थशब्दः परम्परया पुरुषार्थपर्यवसानज्ञापनाय, उपरि तन्निमित्तापातप्रतीतिजनकतायाः सहकारिवैकल्यनिबन्धनत्वम् इत्यपौनरुक्त्यम् । नहि वेदस्यापातप्रतीतिजनकत्वं स्वभावः, प्रमितिजनकत्वस्वभावत्वान्मीमांसाख्यपरिकरशून्यस्य तदभावो न श्रुतेः प्रमितिजनकत्वस्वभावविरोधी । यथा आलोकादिसहकारिविरहे रूपाद्यनुपलम्भश्चक्षुरादीनां रूपादिसाक्षात्कारजनकत्वस्य स्वाभाविकत्वं न विहन्ति तद्वत्, आपातप्रतीतावपि प्रयोजनवत्त्वेन प्रतीतिरस्तीति दर्शयितुं पुनः प्रयोजनवदर्थशब्दः, प्रयोजनवदर्थापातप्रतीतिर्हि तन्निर्णयरागजननी । नहि निष्प्रयोजनकाकदन्ताद्यापातप्रतीतिस्तन्निर्णयरागं जनयति । आपाततोऽवगम्यमानान् दृष्ट्वेत्यन्वयः । अर्थानामवगम्यमानत्वं दृष्ट्वेत्यर्थः । स्वात्मनो बुद्ध्युत्पत्तिं दृष्ट्वेतिवत् प्रयोजनवदर्थापातप्रतीतेः स्वानुभवसिद्धत्वाच्च तदपह्नवः शक्य इति भावः । व्याकरणादिफलस्वरूपविलक्षणे मीमांसाफलस्वरूपे दर्शयति ॥

सू० तत्स्वरूपप्रकारविशेषनिर्णयफलवेदवाक्यविचाररूपमीमांसाश्रवणेऽधीतवेदः पुरुषः स्वयमेव प्रवर्त्तते ।

टी० ॥ "तत्स्वरूपे"ति । स्वरूपविशेषाः–अङ्गिनः, प्रकारविशेषाः–अङ्गानि, पूर्वपक्षोक्तस्वरूपप्रकारतः सिद्धान्तितस्वरूपप्रकारयोर्वैषम्यं विशेष–शब्देन विवक्षितम् । प्रयोजनवदर्थ–स्वाध्याय–वेदमीमांसा–शब्दाः पूर्वोत्तरभागसाधारणाः स्वयमेव नतु विधिना तदुपपादकमधीतवेदः

पुरुष इति पदद्वयम् । अधीतवेद इत्यध्ययनविधिव्यापारस्यानुष्ठितांशे पर्यवसितत्वान्मीमांसायां तस्य प्रवर्तकत्वं द्योतितं, चेतनत्वात् फलवदर्थापातप्रतीत्या स्वयमेव प्रवर्तत इति पुरुष-शब्दस्याभिप्रायः । नन्वक्षरराशिग्रहणपर्यन्तत्वपक्षे रागतः प्रवृत्तिर्नोपपद्यते "वेदाङ्गानि समस्तानि कृष्णपक्षेषु संपठेत्" "निष्कारणः षडङ्गो वेदोऽध्येयः" "वेदमध्यापयेद्द्विजः"- "सकल्पं सरहस्यं चे"त्यादिविहिताङ्गाध्ययनस्याप्यक्षरग्रहणपर्यन्ततया व्याकरणादेरर्थावबोधाभावात् प्रकृतिप्रत्ययादिज्ञानाभावेनापातप्रतीत्यभावात् । मैवम् । व्याकरणादीनां वेदाङ्गत्वादकिंचित्करस्याङ्गत्वायोगात् । दृष्टकिंचित्कारे संभवति तत्परित्यागेन चादृष्टपरिकल्पनायोगात् पदाद्यवबोधरूपो दृष्टकिंचित्कार एव स्वीकार्य इत्यङ्गत्वान्यथानुपपत्त्यैव व्याकरणाद्यर्थावगमसिद्धेः प्रयोजनवदर्थापातप्रतीतिसिद्ध्या मीमांसारम्भोपपत्तेः । "अधीतवेदः पुरुषः स्वयमेव प्रवर्तत" इत्यनेन "अथातो धर्मजिज्ञासे"ति सूत्रमप्यर्थाद् व्याख्यातं भवति । विधेरक्षरग्रहणपर्यन्तत्वे प्रवर्तकाभावात् स्वाध्यायस्यार्थपरत्वे प्रमाणाभावाच्च मीमांसा नारम्भणीयेति पूर्वः पक्षः । साङ्गाध्ययनानन्तरं शब्दस्य स्वतोऽर्थावबोधित्वदर्शनात् प्रवर्तकान्तराभावेपि रागात्प्रवृत्त्युपपत्तेरारम्भणीयेति सिद्धान्त इति ।

ननु कर्मविचारस्य रागप्राप्तत्वे "ऽधीत्य स्नाया"दिति समावर्तनस्मृतिर्बाधिका स्यात्, वैधत्वे स्मृतेरपि श्रुतेर्बलीयस्त्वात् स्मृतिरवकाशप्रदा स्यात् । नैवम् । अध्ययनविधेरक्षरग्रहणपर्यन्तत्वार्थज्ञानपर्यन्तत्वयोः किमभिप्रेत्यैतदुक्तं? यद्यर्थज्ञानपरत्वं तर्ह्यधीत्य स्नायादिति स्मृतिमताध्ययनशब्दस्य तत्तुल्यार्थत्वाच्च विरोधः । यद्यक्षरग्रहणपर्यन्तत्वं, ततोपि तुल्यार्थत्वान्न विरोधः । किंच, विरोधे सत्यपि प्रत्यक्षश्रुतिरप्यस्ति यथा छान्दोग्ये "आचार्यकुलाद्वेदमधीत्य यथाविधानं गुरोः कर्मातिशेषेणाभिसमावृत्य कुटुम्बे शुचौ देशे" इत्यादि, ततश्च स्मृतिवचनोपेता स्नानश्रुतिर्बलीयसी तस्माद् श्रुतिस्मृतिवचनयोः प्राबल्यदौर्बल्यकथनं निरर्थम् । नन्वेवं श्रुत्यापि रागतः प्रवृत्तिर्बाध्यत इति चेत् । न । समावृत्तस्यापि रागतः श्रवणोपपत्तेः । नन्वध्ययनानन्तरभावित्वे समावर्तनस्य तत्पूर्वकगृहस्थकर्मानुष्ठानावश्य-

श्रवणावसरालाभान्मीमांसाऽनारम्भः प्रसज्यते। नैवम्। समावृत्तस्यापि श्रोतुः श्रावयितुरिवावसरसंभवात्। आचार्यस्य ह्यध्यापनं विहितं नतु गृहस्थस्य श्रवणमिति। चेत्। न। अध्यापनस्य याजनप्रतिग्रहवद्रागप्राप्तत्वात्, रागप्राप्तं "प्रतिग्रहादिना धनमर्जयेदि"त्यादिशास्त्रानुमतमध्यापनमिति चेत् श्रवणमपि शास्त्रानुमतम् अनिषिद्धत्वादनुष्ठा[1]नोपयुक्तत्वाच्च।

ननु "संवत्सरे संवत्सरे द्वौ द्वौ मासौ समाहित आचार्यकुले वसेत् भूयः श्रुतिमन्विच्छन्नि"ति श्वेतकेतुरित्यारभ्य तच्छास्त्रैर्विप्रतिषिद्धं निवेशे हि वृत्ते नैयमिकानि श्रूयन्ते "अग्निहोत्रमतिथय"इत्यादिना श्रवणं गृहस्थस्य निषिद्धमिति चेत्। न। साकल्येन मासद्वयं गुरुकुलवासस्यानुष्ठानोपरोधित्वेन तस्यैव निषिद्धत्वात्। निवेशे हि वृ[2]त्ते नैयमिकानि श्रूयन्ते "अग्निहोत्रमतिथय" इति ह्युच्यते आचार्यस्याप्यनुष्ठानानु[3]रोधिनः श्रावणस्य शास्त्रानुमतत्वम् अतोऽनुष्ठानानुपरोधोपरोधप्रयुक्तानुमत्यननुमतिविषयत्वं श्रावणस्य श्रवणस्य च तुल्यम्, अत एव हि युधिष्ठिरादीनां गार्हस्थ्यनिष्ठानामपि भीष्मादिभ्यः श्रवणं भारतादिषु प्रतिपाद्यते। यद्यपि श्रावणकाल एव श्रवणकालः, तथापि श्रोतुरुदकाहरणकाष्ठसंपादनादिभिरनुष्ठानोपरोध इति चेन्न। अध्ययनविधिप्रयुक्तस्योदकाहरणादेस्तच्छिष्यवृत्त्या निवृत्तत्वात्। वित्तख्यात्यादिप्रयोजनान्तरस्पृहया शिष्यस्नेहेन च गुरोः श्रावणमुपपद्यते श्रावयितुर्ज्ञातार्थत्वादनुष्ठानमुपपद्यते। श्रोतुरज्ञातार्थत्वाच्चेति चेन्न। उपनयनप्रभृत्यनुष्ठानप्रवृत्तिहितैषिवचनादनुष्ठानोपपत्तेः। तर्हि हितैषिवाक्यमेव स्यात् किमर्थं मीमांसाश्रवणमिति चेत्, हितैषिवचनस्य प्रमाणमूलत्वनिश्चयार्थं प्रष्टॄणां परेषां स्वयमुपपादनार्थं च हितैषिवचनादनुष्ठानसंभवे शूद्रादीमनुष्ठानप्रसङ्ग इति चेन्न। "न शूद्राय मतिं दद्यात्" "न चास्योपदिशेद्धर्मं नचास्य व्रतमादिशेदि"त्यादिनिषेधवचनसद्भावात्। नहि यज्ञादिकं ब्राह्मणाः शूद्रायोपदिशन्ति। न च शुश्रूषादिरहित शूद्रविशेषविष-

१ यज्ञानुष्ठानोपयोगित्वादिति ख॰ पु॰ पाठः।
२ प्रवृत्ते इति ख॰ पु॰ पाठः।
३ नानुपरोधि न इति ख॰ पु॰ पाठः।

यत्वेनेदृशनिषेधवचनानां संकोचः कार्यः, संकोचकाभावात् । नहि शूद्रस्य यज्ञाद्यर्हत्वविषयं वचनान्तरं दृश्यते । किंच यजमानेन कृत्स्नवेदस्य मन्त्रविशेषाणां च जप्यतावचनात्तेषामध्ययनलभ्यत्वादध्ययनस्य चोपनयनसापेक्षत्वादुपनयस्य च त्रैवर्णिकाऽधिकारत्वाच्च शूद्राद्यधिकारप्रसङ्गः । ननूपनयनविधिस्त्रैवर्णिकाध्ययनविषयतया नेतुं शक्यते, अतः शूद्रस्याध्ययनमुपनयननिरपेक्षमिति तस्य याजमानाद्युच्चारणसंभव इति चेत् । न । "तस्माच्छूद्रसमीपे नाध्येतव्यमि"ति "अथ हास्य वेदमुपशृण्वतस्त्रपुजतुभ्यां श्रोत्रप्रतिपूरणमुदाहरणे जिह्वाच्छेदो धारणे शरीरभेद" इत्यादिना शूद्रस्य वेदश्रवणादेर्निषिद्धत्वात्, अध्ययनं चेदुपनयनाङ्गकं तत् त्रैवर्णिकाधिकारमेवेति न तत्र शूद्राद्यधिकार इति मन्त्रविशेषोच्चारणानुपपत्तेः । न हितैषिवचनाच्छूद्रादेः क्रत्वनुष्ठानप्रसङ्ग इति नापशूद्राधिकरणविरोधः । किंच यथा "यावज्जीवमग्निहोत्रं जुहोती"त्यादिविधिः "न स्वाङ्गं स्वव्यवधायकमि"ति न्यायात् स्वोपयोगिनोप्यर्थार्जनादेरागप्राप्तस्याप्यवसरप्रदः, तथाऽनुष्ठानोपयोगिमीमांसाश्रवणस्य समावर्तनविधिरवकाशप्रदः स्यात् क्त्वाप्रत्ययस्य च समानकर्तृकत्वपूर्वकालीनत्वमात्रमर्थः, नत्वानन्तर्यम् । नन्वानन्तर्यमेव विधेयञ्च चेद्विधिवैयर्थ्यं दुःखात्मकगुरुकुलवासनिवृत्तेः स्वतः प्राप्तत्वादिति चेत् । न । आनन्तर्यपरत्वेपि विधिवैयर्थ्यात् तच्च गुरुकुलवासस्य दुःखात्मकत्वादेव । अतः सनियमसंस्कारविशेष एव स्नानमिति तद्विधेयं नत्वानन्तर्यं तस्मादधीत्येति क्त्वाश्रुतेर्न विरोधः । तस्मात्स्वयमेव प्रवर्तते ।

ननु "यो ह वा अविदितार्षेयच्छन्दोदैवतेन मन्त्रेण यजति याजयति वा स्थाणुं वर्च्छति गर्तं वाऽऽपद्यते प्रवामीयते पापीयान् भवति यातयामान्यस्य छन्दांसि भवन्ति । अथ यो मन्त्रे मन्त्रे वेद स सर्वमायुरेति श्रेयाँश्च भवति अयातयामान्यस्य छन्दांसि भवन्ति तस्मादेतानि मन्त्रे मन्त्रे विद्यादि"ति श्रुत्या "अविदित्वा ऋषिं छन्दो दैवतं योगमेव च योऽध्यापयेज्जपेद्वापि पापीयान् जायते तु स" इति स्मृत्युपबृंहितयाऽर्थज्ञानविधानं फलितम् । मन्त्रप्रतिपाद्यदेवताज्ञानस्यात्र विहितत्वात्तुल्यन्यायतया दैवतशब्दस्य मन्त्रप्रकाश्यानुष्ठेयार्थप्रकाशनार्थतया च विद्यादि-

Digitized by Google

भागार्थज्ञानस्यापि विधेयत्वापत्तेः। येोगो मन्त्राणां विनियोगः तज्ज्ञानस्य ब्राह्मणभागार्थज्ञानसापेक्षत्वाच्चेति चेत् । न । प्रतिग्रहतुसंवेशनादेरिव रागप्राप्तत्वान्निवृत्तेः। नहि "ब्राह्मणः प्रतिग्रहादिना धनमार्जयेत्[१]" "ऋता-वुपेयादि"ति वचनं रागतः प्राप्तिं प्रतिग्रहादेर्निरुणद्धि ।

किंचानेनैव वाक्येनार्थज्ञानं विहितमित्यध्ययनविधेरर्थज्ञानपर्य-न्तत्वं नाश्रयणीयं, यथा क्रतूनां विध्यन्तरसिद्धत्वादाधानविधेरुत्तरक्रतुविधि-पर्यन्तत्वं नाऽऽश्रीयते तद्वत् । न चेदं वेदवाक्यमध्ययनस्यार्थधीपर्यन्तत्वम-वगमयति, नच स्वयमर्थज्ञानं विधत्ते, अर्थज्ञानस्याऽन्यतः सिद्धत्वात् । अत्र मन्त्रमात्रस्य ऋष्यादिविज्ञानविधानप्रतीतेश्च । ततश्च वेदस्य साङ्गतयाऽ-ध्येतव्यत्वं सिध्येत् नत्वर्थज्ञानं, छन्दोदैवतादिज्ञानस्य छन्दःकल्पव्याकरण-निरुक्तादिसापेक्षत्वान्मीमांसानपेक्षत्वाच्च । विनियोगविषयसन्देहे सति मीमांसापेक्षा स्यादिति चेत् तर्हि सन्देहापाकरणाय रागतः प्रवृत्तिः स्यात् "यदधीतमविज्ञातं निगदेनैव शब्द्यते। अनग्नाविव शुष्कैधो न तज्ज्वलति कर्हिचित्" इतीदमपि वचनं नार्थज्ञानपर्यन्तत्वमध्ययनविधेरवगमयति। "अ-धीतमविज्ञात" मित्यत्रैवाध्ययनार्थज्ञानयोः पृथङ्निर्देशात् । रागप्राप्तस्य वि-धातुमशक्यत्वाच्च। वेदानां "किंचिदधीत्य ब्राह्मणः, एकां शाखामधीत्य श्रो-त्रियः, अङ्गाध्याय्यनूचान" इत्यादयः कल्पसूत्रप्रयोगाश्च अध्ययनादर्थज्ञानं पृ-थग्भूतमवगमयन्ति । अतः श्रवणस्य दुःखरूपत्वेन तन्द्रालुतया वा अर्थार्जना-द्यन्यपरतया वा यो न शृणोति तत्प्ररोचनार्थमिदं "यदधीतमि" त्यादिवच-नम् । यथा "अक्षैर्मा दीव्य कृषिमित्कृषस्व वित्ते रमस्व बहु मन्यमान" इति वाक्यं तन्द्रालुप्ररोचनार्थं, प्ररोचनया हि प्रवृत्तिरुत्कटा स्यात् नह्येतावता कृषे-रर्थार्जनस्य च रागप्राप्तत्वभङ्गेन सर्वत्र वैधत्वमेव स्यात्तद्वदिदमपि वचनं श्रवणस्य रागप्राप्तत्वं न विहन्ति । तस्माद्रागत एव प्रवर्त्तते । एवमन्यतः प्रवृत्तौ संभवन्त्यां शब्दशक्त्युल्लङ्घनेन मीमांसाश्रवणस्य विधेयत्वकल्पनमयु-क्तम् । ऐकशास्त्र्यं रागतः प्रवृत्तिश्चास्तु कथं पौर्वापर्यनियमस्तत्राह "तत्रे" ति ।

१ पुस्तकद्वयेपि 'धनमार्जयेदि' त्येव पाठ उपलभ्यते धनमर्जयेदिति तु युक्तं प्रतीमः।

सू० तत्र कर्मविधिस्वरूपे निरूपिते कर्मणामल्पास्थिरफलत्वं दृष्ट्वा ।

टी० ॥ तत्र—वेदे कर्मविधिस्वरूपे निरूपिते—इति कर्मभागस्य वेदोपक्रमत्वादधीतक्रमेणैव निरूपणं प्राप्तमिति कर्मविचारस्य पूर्वभावित्वमिति भावः ।

ननु नहि कर्मणामल्पास्थिरफलत्वमनन्तस्थिरफलत्वं च पूर्वपक्षे सिद्धान्तरूपेण क्वचिन्निरूपितम्, तत्कथमल्पाऽस्थिरफलत्वावगतिरित्यत्राह "स्वरूपे निरूपिते" इति । केवलं कर्मविधिस्वरूपमेव निरूपितम् अल्पास्थिरफलत्वज्ञानं वाऽऽवृत्तिविधानादिना फलितमिति भावः । यद्वा कर्मविधिस्वरूपविरूपितं तत्त्वाराध्यपरदेवतेति भावः । तदाराधनत्वेन कृते ह्यनन्तस्थिरफलत्वसिद्धिः ।

सू० अध्ययनगृहीतस्वाध्यायैकदेशोपनिषद्वाक्येषु चामृतत्वरूपानन्तस्थिरफलापातप्रतीतेस्तन्निर्णयफलवेदान्तवाक्यविचाररूपशारीरकमीमांसायामधिकरोति, तथाच वेदान्तवाक्यानि केवलकर्मफलस्य क्षयित्वं, ब्रह्मज्ञानस्य चाऽक्षयफलत्वं दर्शयन्ति ।

टी० "अध्ययनगृहीतस्वाध्याये" ति । अध्ययनस्य कृत्स्नस्वाध्यायविषयत्वादुपनिषदश्च स्वाध्यायशब्दान्तर्गतत्वादिति भावः । एकदेश—शब्देनैकप्रबन्धांशत्वं सूचितम् । साधारणवेदशब्दनिर्दिष्टशब्दराशावनन्यपरं प्रदेशं पृथङ्निर्दिशत्युपनिषच्छब्देन.वेदान्त -शब्देन विचारपौर्वापर्यनियमहेतुर्दर्शितः । मीमांसा—शब्दोक्ते व्याख्याने प्रदेशभेदं विशिनष्टि "शारीरकशब्देन- "अन्नवानन्नादो भवति महान् भवति प्रजया पशुभिर्ब्रह्मवर्चसेने" त्याद्युक्तानुषङ्गिकाल्पास्थिरफलव्यावृत्त्यर्थममृतत्वरूप—शब्दः । आनुषङ्गिकाणामल्पास्थिरफलत्वेऽपि प्रधानफलस्यानन्तस्थिरफलत्वेनापातप्रतीतिरस्तीत्यर्थः । कर्ममीमांसासंस्कृतमनस्कत्वादचाप्यानुषङ्गिकं प्रधानफलं च संभवतीति श्रोतुः प्रतीयते एव ।

Digitized by Google

ननु फलत्वादिदमप्यनित्यमिति बुद्धिः स्यात् नैवं विपक्षे बाधकाभावात्, यथा भौमसुखात् स्वर्गादिसुखं विलक्षणं प्रतिपन्नं तत्रापि परस्परवैलक्षण्यं देशकालस्वरूपभेदात् प्रतिपन्नं तथैव तस्मादपि विलक्षणं सुखं संभवतीत्यतीव रागजननायास्यापि प्रतीतिः स्यात् अधिकारीति—अधिकारी भवति एवं कर्मविचारकोऽप्यधिकारी भवति न तु साधनचतुष्टयवानित्यभिप्रायः । एवमेकशास्त्य क्रम--नियमारम्भणीयत्वान्युपपादितानि । कैर्वेदान्तवाक्यैरारम्भणीयत्वोपयिकापातप्रतीति? रित्यत्राह तथाचेति यथा सूत्रं व्याख्यातं तथेत्यर्थः, चशङ्कानिवृत्तौ प्रसिद्धौ वा केवल—शब्देन ज्ञानाद्कर्मव्यावृत्तिः ।

मू० "तद्यथेह कर्मचितो लोकः क्षीयते एवमेवाऽमुत्र पुण्यचितो लोकः क्षीयते" "अन्तवदेवास्य तद्भवति" "नह्यध्रुवैः प्राप्यते ध्रुवं कर्मभिः" "प्लवा ह्येते अदृढा यज्ञरूपाः" "परीक्ष्य लोकान्कर्मचितान् ब्राह्मणो निर्वेदमायात् नास्त्यकृतः कृतेन तद्विज्ञानार्थं स गुरुमेवाभिगच्छेत्समित्पाणिः—

टी० ॥ ननु कर्मविचारेण निर्णीतेपि कर्मफलक्षयिष्णुत्वे पुनश्चाल्पास्थिरफलत्वप्रतीतिजनकवाक्यानि किमर्थमुदाह्रियन्ते? अनन्तस्थिरफलापातप्रतीतिजनकान्येव हि वाक्यान्युदाहर्त्तव्यानि । उच्यते । अधिगतकर्मणः पुरुषस्य हि निर्णीतार्थसंवादिवाक्यदर्शनात् कर्मफलास्थिरत्ववद् ब्रह्मज्ञानफलाक्षय्यत्वस्य प्रामाणिकत्वं संभवतीति श्रद्धास्थिरीकरणार्थं "तद्यथे"ति । लोक्यतइति -लोकः फलम । "अन्तवदेवास्य तद्भवतीत्य"नेन ज्ञानविधुरकर्मणानेककालानुष्ठितस्य बहुविधस्यापि क्षयित्वमुक्तं भवति "यो ह वा एतदक्षरं गार्ग्यविदित्वास्मिँल्लोके जुहोति यजते तपस्तप्यते बहूनि वर्षसहस्राणी"त्येतद्वाक्यपूर्वकत्वात्तस्य वाक्यस्य अन्तवदित्युक्ते क्रियास्वरूपस्यान्तवत्त्वं लोकसिद्धतयाऽनुपदेश्यमिति फलस्यैवान्तवत्त्वमर्थसिद्धं स्फुटीकर्तुं 'तद्यथे'ति वाक्योपादान, सांसारिकफलस्याऽध्रुवत्वं स्यात् कर्मभिरेव

ध्रुवं फलं संपाद्यतामिति शङ्काव्युदासाय उपादत्ते "नह्यध्रुवैः प्राप्यते" इति ध्रुवं तदिति वाक्यखण्डः। तदुपपादकत्वेन प्रतीयमानं वाक्यान्तरमुदाहरति "प्लवा ह्येते अदृढा यज्ञरूपा" इति। संसारपारं तारयितुमलं मध्ये भङ्गुरत्वादित्यर्थः। सूत्रयोजनानुगुणतरं कर्मणामल्पास्थिरफलत्वं ब्रह्मोपासनस्यानन्ताक्षयफलत्वं च दर्शयद्वाक्यमुपादत्ते "परीक्ष्य लोकानि"ति। अस्मिन्वाक्ये न्यायसिद्धार्थानुवादेन गुरूपसत्तिर्विधीयते। कर्मचितान्—कर्मसञ्चितान् कर्मसंपाद्यान् परीक्ष्य—मीमांसान्यायैर्निरूप्य। ब्राह्मणः—अधीतसाङ्गसशिरस्कवेदः, यदित्यध्याहार्यं, स इत्युत्तरत्र श्रवणात्। अकृतः—नित्यः। अत्र पुरुषो विशेष्यः, लिङ्गवशाद् अक्षरं पुरुषमित्यनन्तरोक्तेश्च। कृतेन—कर्मणा नास्ति—न सिध्यति न लभ्यते इतिकरणं[1] द्रष्टव्यम् इति यो निर्वेदमायात् सः, तद्विज्ञानार्थं गुरुमेवाभिगच्छेत्। एवकारेण नियमविधित्वं गम्यते। समित्पाणिः—न रिक्तपाणिः। "रिक्तपाणिस्तु नोपेयाद्राजानं दैवतं गुरुमि"ति हि स्मर्यते।

मू० श्रोत्रियं ब्रह्मनिष्ठं, तस्मै स विद्वानुपसन्नाय सम्यक्प्रशान्तचित्ताय शमान्विताय येनाक्षरं पुरुषं वेद सत्यं प्रोवाच तां तत्त्वतो ब्रह्मविद्याम्"—

टी० ॥ श्रोत्रियं—श्रुतवेदान्तं, ब्रह्मनिष्ठं—ब्रह्मसाक्षात्कारवन्तं, श्रुतवेदान्तोऽपि रुचिभेदादब्रह्मनिष्ठो नोपगन्तव्य इति भावः। अभिगच्छेदित्यन्वयः। शमो बाह्येन्द्रियनियमनरूपः प्रशान्तचित्तायेत्यन्तःकरणनियमनस्योक्ततया पारिशेष्यात्। एतेन श्रवणोपयुक्तमवधानं विवक्षितं नतूपासनोपयुक्तात्यन्तेन्द्रियजयादि। तस्मै स विद्वान् प्रोवाचेत्यन्वयः। "येने"ति। निर्देशो विज्ञानाभिप्रायः। तद्विज्ञानार्थमिति हि प्रकृतं सामान्यतः कारणाभिप्रायो वा लिङ्गव्यत्ययो वा अक्षरं स्वरूपेणाविकारं सत्यं—गुणतोऽप्यविकारम्, आभ्यामचिज्जीवव्यावृत्तिः। तां ब्रह्मविद्यां प्रोवाच प्रब्रूयादित्यर्थ इति वेदान्तसारे व्याख्यातम्। "छन्दसि लुङ्लङ्लिट" इति लिट्। (शेषमग्रे)

१ इतिपदमध्याहर्तव्यमर्थवशादिति भावः।

Digitized by Google

॥ खण्डनखण्डखाद्यम् ॥

(*Continued from page* 368 Vol VII.)

मू० [a] 'एकम्'–इत्युपादाय यद् एवकारमप्युपादत्ते श्रुतिः "एकमेवेदम्"–इतिरूपा, तदैकान्तिकमैक्यं बोधयतीति भेदाभेदेनाप्यशक्यसमर्थनं–घटपटादिभेदग्राहिप्रत्यक्षादिप्रामाण्यमिति।

टी० ननु श्रुत्याऽभेदः, प्रत्यक्षेण च भेदो बोध्यते, द्वयं च प्रमाणमनुरोध्यं, ततो भेदाभेद एवास्त्वित्यत आह–। [a] "एकमि"ति। यद्यपि ब्रह्मण एकत्वं प्रपञ्चाभावे प्रपञ्चाभेदे चोपपद्यते इति कथमियं श्रुतिरेकताऽवधारिका(1), यद्यपि च प्रपञ्चमिथ्यात्वं शङ्कराचार्याद्यनुमतं ननु प्रपञ्चब्रह्मणोरभेद इत्यभेदबोधकतया श्रुतिव्याख्याने ऽपसिद्धान्तः, यद्यपि च घटाद्यभेदे ब्रह्मणोपि जडत्वमिति स्वप्रकाशानन्दरूपत्वविरोध,स्तथापि "आपाततो यदिदमि"त्यादौ वक्ष्यमाणेऽर्थे एव तात्पर्य्यम् ॥

मू० * [a] बुद्धेर्विरम्यव्यापाराभावात् कथमित्यम् * ?–इति चेन्न, [b] श्रुतितो द्रागेव जातायाः सर्वविषयाया अद्वैतधियो (2)ऽस्मद्बुद्धय एवंविधविचारसोपानपरम्परामारोहन्त्यो नानाविषयेषु तत्प्रामाण्यविषयाः क्रमेण परिनितिष्ठन्तीत्युच्यमानत्वात्। * [c] ननु, यदि नाम प्रत्यक्षवित्त्या तया घटपटभेदोल्लेखिन्या स्वात्मना सह घटपटयोर्भेदो न गोचरीक्रियते तावता कथं तस्याः स्वविषयेण सहाऽद्वैते श्रुतिः

(1) 'विधायिका'–इत्यपि क्वचित्पाठः।

(2) अद्वैतधिय एवंविधविचारसोपानपरम्पराम् (क्रमिकाऽभेदविषयकप्रतिपत्तिपरम्पराम्) आरोहन्त्योऽस्मद्बुद्धयो नानाविषयेषु तत्प्रामाण्यविषयाः (अभेदबुद्धिप्रामाण्यविषयाः) क्रमेण परिनितिष्ठन्तीत्यन्वयः।

Digitized by Google

प्रामाण्यमासादयितुमीष्टे, बुद्ध्यन्तरेण तया सार्द्धं घटपटयोरपि भेदमुल्लिखता तत्राद्वैतश्रुतेर्बाधादेव?*। मैवम्।

ननु प्रत्यक्षविरोधादापाततः श्रुतिजबुद्धिः स्वस्मादेवाभेदं विषयाणां विषयीकृत्य क्रमेणार्थापत्त्यादिबलात् विषयाणामन्योन्यमभेदं विषयीकरिष्यतीत्यनुपपन्नं, शब्द(१ बुद्धिकर्मणां विरम्यव्यापाराभावादित्याह—। [a] "बुद्धे"रिति॥ श्रुतित एकदैव ज्ञातायाः सर्वाभेदबुद्धेः सर्वविषये प्रामाण्यं प्रत्यक्षबाधेन प्रतिबन्धात् झटिति दुर्ग्रहमिति तत्तद्विषयप्रत्यक्षबाधनिरासक्रमनिबन्धनः प्रामाण्यग्रहक्रमो, नतु बुद्धेर्विरम्यव्यापारतेत्याह—। [b] "श्रुतित"इति। यद्यपि बाधो(२)बुद्धिमेव प्रतिबध्नाति नतु तत्प्रामाण्यग्रहमिति कथं न बुद्धेः, श्रुतिलक्षणस्य शब्दस्य वा, विरम्यव्यापारता, तथापि "अत्यन्ताऽसत्यपि(३) ज्ञानमर्थे शब्दः करोती"त्यभिप्रेत्यैतदुक्तम्॥ घटपटभेदग्राहिप्रत्यक्षेण स्वात्मना सह घटपटयोर्भेदो न गृहीत इति तत्र श्रुतिर्लब्धपदा तयोरप्यभेदं विषयीकरिष्यति—इति यदुक्तं तत्र शङ्कते—। [c] "नन्वि"ति। 'घटपटभेदग्राहिप्रत्यक्षं घटपटौ न भवत'-इति ज्ञानान्तरेण तद्भेदोऽपि सुग्रह एवेति तत्रापि श्रुतिर्न प्रभवतीति शङ्कार्थः॥

मू० [a]"नर्हि तस्या अपि विषयमापाततः परित्यज्य ययैवापरया बुद्ध्या घटपटभेदबुद्धेर्घटाच्च पटाच्च भेदो विषयीक्रियते तस्याः स्वविषयेण सहाऽद्वैते श्रुतिः प्रामाण्यमवलम्ब्य लब्धपदा घटपटतद्भेदबुद्धिभिः सह द्वितीयाया बुद्धेरभेदे पर्य्यवस्यन्ती सर्वेषामेव तेषामभेदे विश्राम्यति। [b]एवं च सति यत्रैव गत्वा बाधबुद्धिपरम्पराविच्छेदो विषयान्तरसंचा-

(१) शब्द एकं बोधं जनयित्वा विरतव्यापारो न शाब्दबोधान्तरं जनयति, तथा बुद्धिरप्येकस्मिन्नर्थे ज्ञाततां संस्कारं वा जनयित्वा न ज्ञाततान्तरं संस्कारान्तरं वा, एवं कर्माप्येकत्र विभागमुत्पाद्य न विभागान्तरमित्यर्थः।

(२) "घटपटौ भिन्नौ—"इत्याकारको बाधः, बुद्धिं=श्रुतिजाऽभेदबुद्धिमित्यर्थः।

(३) अत्यन्तासदर्थः—शशशृङ्गादिस्तत्रापि चेच्छब्दो ज्ञानं जनयति किमुत सद्भूते अद्वैते इति भावः।

रोच्छेदभयादनवस्थाभयाच्चाभ्युपेयस्तस्यामेव बुद्धौ पदमारोप्याऽद्वैतश्रुतिः सर्वं तद्विषयविषयिप्रवाहमद्वैते स्थापयन्ती न केनापि प्रमाणेन क्वचिदपि विषये बाधितुं शक्या । तस्मात्—

'सुदूरधावनश्रान्ता (१) बाधबुद्धिपरम्परा ।
निवृत्तावद्वयाम्नायैः पार्ष्णिग्राहैर्विजीयते ॥ ८ ॥

टी॰ यावद्दूरं बाधबुद्धिपरम्परोदयस्तत्रापाततः कुण्ठापि श्रुतिर्बाधबुद्धिपरम्परानिवृत्तौ चरमबुद्धौ पदमारोप्य तद्विषयविषयिप्रवाहाद्वैतं बोधयिष्यतीति परिहरति—। [a]"तर्हि तस्या अपी"ति । प्रामाण्यावलम्बनम्=अबाध्यत्वेन व्यवस्थितत्वं; पदलाभः=सहकारिसाचिव्यं; पर्य्यवसानमभेदबोधनं; विश्रामः=स्वजनितसकलाऽद्वैतधीप्रामाण्यासादनम् ॥ ननु भवेदेवं यदि भेदबुद्धिधाराविश्रामः स्याच्च त्वेवमत आह—। [b]"एवं चे"ति । विषयान्तरसंचारदर्शनेनाऽनिर्मोक्षप्रसङ्गभयेन च विश्रामसिद्धिरित्यर्थः ॥ [c]"सुदूरे"ति । अद्वयाम्नायैः=अद्वैतश्रुतिभिः । पार्ष्णिग्राहैः=पृष्ठतोवर्त्तिभिर्विपक्षैरित्यर्थः । यद्यपि चरमबुद्धिज्ञाने चरमत्वव्याघातः, तदज्ञाने च कुत्र श्रुतेः पादारोपणं, श्रुतिप्रवृत्त्यर्थं त्वयैव तदुपस्थापने पुनश्चरमत्वव्याघातः, तदेव तयापि समं भेदग्रहश्च; अनुपस्थापने श्रुतिप्रवृत्त्यव्युत्पादनम्, तथाच "सुदूरधावनाऽश्रान्ता बाधबुद्धिपरम्परा-

(१) सुदूरधावनश्रान्ता, भूरिकक्षानुसरणाऽलसेति यावत् । इदमत्राकूतम्—"अरिर्मित्रमरेर्मित्रं मित्रमित्रं ततः परम् । तथाऽरिमित्रमित्रं च विजिगीषोः पुरःसराः ॥ पार्ष्णिग्राहस्ततः पश्चादाक्रन्दस्तदनन्तरम् । आसारावनयोश्चैव विजिगीषोस्तु पृष्ठतः ॥ अरेश्च विजिगीषोश्च मध्यमो भूम्यनन्तरः । अनुग्रहे संहतानां व्यस्तानां च वधे प्रभुः ॥ मण्डलाद्बहिरेतेषामुदासीनो व्यवस्थितः" इति विजिगीषो राज्ञो द्वादश राजमण्डलम्, तत्र खलु यथा लोके कश्चिद्विजिगीषुर्दूरे प्रस्थितः परवाहिनीं विजित्य निवृत्तो पार्ष्णिग्राहैर्विजीयते तथा बाधबुद्धिपरम्पराऽद्वैतपरम्पराजयाय दूरं प्रस्थिताऽनवस्थामाक्रम्य निवृत्ता पार्ष्णिग्राहैरद्वयाम्नायैर्विजीयते इति । क्वचिद् "विनिवृत्ताऽद्वयाम्नायैः"—इति पाठः ।

ऽविनिश्वासाऽद्वयाम्नायैः पार्ष्णिग्राहैर्न जीयते"—इति परेणापि पठितुमुचितं(१), तथापि स्वप्रकाशसिद्धमेव ब्रह्माद्वैतमिति भावः ॥

मू० [a] *नच यत्र तस्य प्रतिपत्तृबुद्धिधाराविश्रान्तिस्तत्र पुरुषान्तरबुद्धिभेदे प्रमाणं स्यात् *। [b] तथापि पुरुषान्तरेण भिन्नतया सा(२) प्रतीयते इत्यत्र प्रमाणं त्वया वाच्यम्। [c] नहि तदपि पुरुषान्तरेणैव, [d] न च संभाव्यमानम्, श्रौतेन निश्चयेन तन्निवर्तनात्; [e] तथाप्यनवस्थानादिति। [f] अथ ब्रूषे—*यदा कियद्दूरं बुद्धिपरम्परया सा बाधिता भवत्यद्वैतश्रुति(३)स्तदा तन्न्यायाद् यापि बुद्धिः शेषं गत्वा नाऽनुव्यवसीयते तत्रापि तद्बाधोऽवगम्यते, यत्र सा बाध्यते तत्तुल्यन्यायत्वादन्तिमबुद्धेरपि*—इति। नैवम्। किं कियतीषु बुद्धिषु व्याप्यव्यापकौ कावप्यवलम्ब्य व्याप्तिग्रहरूपयैव धिया शेषबुद्धौ बाधं व्युत्पादयसीत्यमद्वैतश्रुतेः? किं वा बुद्ध्यन्तरदृष्टव्याप्तिसनाथया पक्षधर्म(४)हेतुमुल्लिखन्त्या बुद्ध्यान्तिमबुद्धिविषयया ?।

(१) अत्र यत्खण्डनभूषामणिकृतो रघुनाथस्य शङ्करमिश्रमतमनूद्य "तव तत्पुरुषीयबाधबुद्धिमपेक्ष्य तस्याचरमत्वात्। मया तदुपस्थापने त्वया तदैव भेदो ग्राह्यः—इत्यपि न, मयाऽभेदं गृहीत्वैव तदुपस्थापनात्। यथा तव भेदपक्षस्तद्विरोधी तथा ममाऽद्वैतपक्षस्यापि भेदपक्षविरोधित्वादित्यलं काव्यरचनाकुशलानां तेनैव स्वशिष्यानामोदयतां खण्डनकथया"—इति खण्डनं, तत्र; खण्डनकोटेः सर्वतो बलवत्त्वेन पुनरा विचार्यमाणेऽस्याप्यर्थस्याऽप्रतिष्ठितत्वात्स्वप्रकाशसिद्धमेव ब्रह्म, न तु श्रुतियुक्तिभिस्तत्प्रसाधनापेक्षेत्यत्रैव तात्पर्य्यात्।

(२) सा=अन्तिमबुद्धिः, स्वविषयाद्भिन्नतया प्रतीयते—इत्यत्र प्रमाणं त्वया वाच्यं, नच तद् वक्तुं शक्यमनवस्थानादिति भावः। क्वचित्तु "सा प्रमीयते"—इति पाठः।

(३) अद्वैतश्रुतिर्बुद्धिपरम्परया कियद्दूरं बाधिता भवति यदा, तदा या बुद्धिः शेषे गत्वा (शेषमर्यादिष्टां कक्षां गत्वा) नानुव्यवसीयते (ज्ञानान्तरवेद्या न भवति) समानन्यायात्तत्राप्यद्वैतश्रुतेर्बाधो गम्यते इत्यर्थः। तन्न्यायादित्येतद्व्याचष्टे—यत्रेति, यत्र=कतिपयबुद्धिपरम्परायां, साऽद्वैतश्रुतिर्बाध्यते तत्तुल्यन्यायत्वाद्=अन्तिमबुद्धेरपि बुद्धित्वाऽविशेषादित्यर्थः।

(४) पक्षस्य यो धर्मो हेतुर्बुद्धित्वादिस्तमुल्लिखन्त्याऽनुमानरूपया धियेत्यर्थः।

टी० ननु विषयान्तरसंचारदर्शनादनवस्थाभयाच्च बुद्धिधाराप्रवाहविच्छेदसिद्धावपि पुरुषान्तरबुद्ध्या तद्बुद्धिधाराविषयविषयिपर्य्यन्तभेदग्राहिण्या श्रुतेर्बाधोऽस्त्वित्यत आह—। [a] "नचे"ति ॥ [b] "तथापी"ति । पुरुषान्तरेण चरमबुद्धेर्भेदो गृह्यते—इति यदि त्वया कथायामेव प्रमापणीयं तदा तत्रैव प्रमाणे श्रुतिप्रवृत्तिः, एवं(१) तत्रतत्रेति पुनरनवस्था, प्रमाणानुपदर्शने च तव पराजय एवेत्यर्थः ॥ ननु न मया तत्र प्रमाणं वाच्यं, किं तर्हि, पुरुषान्तरेणैव वाच्यमतो नानवस्थेत्यत आह—। [c] "नही"ति । पूर्वदोषतादवस्थ्यादिति(२) भावः ॥ ननु यद्यपि मदीयान्त्यबुद्धेः स्वविषयाद्भेदो मया न गृह्यते, यद्यपि च 'पुरुषान्तरेण गृह्यते'—इति मया प्रमाणयितुं न शक्यते, तथापि संभाव्यते तावत्, संभावनापि च विरोधिन्येव विपरीतनिश्चयस्येति कथं तत्राप्यद्वयश्रुतिप्रवृत्तिरित्यत आह—। [d] "नचे"ति । संभावनया प्रमाणाऽप्रवृत्तावनुमानादिकमपि न प्रवर्ततेत्यर्थः ॥ ननु तर्कादिना विपरीतशङ्कानिवृत्तावनुमानादि प्रवर्तते, नतु तस्यां सत्यामेव, प्रकृते तु तथाविधतर्को नास्ति यः संभावनां विहन्यादत आह—। [e] "तथाप्यनवस्थानादि"ति । यद्यपीयमनवस्था तुल्यैव, संभावना(३)मनुपनयत(४)स्तवापि श्रुतिविषयाऽनुपन्यासात्; तथा "व्याघाततो यदिव"मित्यादावेव तात्पर्यम् ॥ या या बुद्धिः सा सा स्वविषयाद्भिन्ना, घटपटौ भिन्नाविति बुद्धिवदिति त्रिचतुःकक्षायां बुद्धिधाराया व्याप्यवधारणादन्तिमबुद्धावपि तद्बलात्स्वविषयभेदसिद्धौ क्व श्रुतेरवकाश इत्याशङ्कते—। [f] "अथे"ति ॥

(१) एवं तत्रतत्र प्रमाणे प्रमाणान्तरप्रदर्शने त्वयाऽनवस्थेत्यर्थः ।

(२) पुरुषान्तरेणापि प्रमाणप्रदर्शने तत्प्रदर्शितप्रमाणे प्रमाणान्तरं, पुनस्तत्प्रमाणे प्रमाणान्तरमन्येन प्रदर्शनीयमिति पुनरप्यनवस्थानाद्, अप्रदर्शने च तत्रैव लब्धपदायाः श्रुतेस्त्वदभेदे पर्यवसानादित्यर्थः ।

(३) सर्वथापि भेदस्याऽसंभाव्यमानत्वे ऽभेदोऽपि श्रुत्याऽवबोधभावनः स्यादिति भेदसंभावनापूर्वकस्यैव तस्य वक्तव्यत्वेन यथायथा भेदसम्भावनायामनवस्था तथातथा तदभेदबोधनेऽपि, पर्यन्ततो यत्रैवाऽभेदो न बोधनीयस्तदारभ्याऽऽमूलमभेदलोप इत्यभिप्रेत्याह—संभावनेति ।

(४) "अपनयतः"—इत्यपि क्वचित्पाठः ।

खं० [a] नाद्यः व्याप्तिबुद्धिर्यदि विषयविशेषेपि स्वातन्त्र्येण बा-धात्मिकोपेयते तदा सैव विशेषबुद्धिरपि स्यादिति गत-मनुमानकथया। अथानुमितिमभ्युपैषि, [b] तदा सा ना-त्मानमपि धर्मीकृत्य प्रवर्त्तते इति तचैव दत्तपदा(१)सर्वा-मद्वैतश्रुतिः परम्परामालम्बते—इत्युक्तमावर्त्तते। [c] अथ *सर्वा विवादाध्यासिता बुद्धयः स्वविषयेभ्यो भिन्ना, बुद्धि-त्वाद्, घटपटबुद्धिवदिति सामान्याकारेणात्मानमपि धर्मी-कृत्यात्मनोपि स्वविषयाद्भेदं साधयिष्यत्यनुमा?*—इति मन्यसे, मैवम्, [d] एवमपि विषयिणो विषयस्याऽभेदं बोध-यन्ती श्रुतिरनुमानमप्यनवकाशयति।

टी० व्याप्तिधीरेव तत्र प्रमाणम्? तदुपलम्भादनुमानं वा प्रमाणम्? —इति विकल्प्य दूषयति(२)—। [a] "नाद्य" इति। व्याप्तिग्राहकप्रमाणस्यैव विशेषोपस्थितौ सामर्थ्येनुमानं प्रमाणमनवकाशमेव(३) स्यादित्यर्थः॥ अन्तिमबुद्धिः स्वविषयाद्भिन्ना बुद्धित्वादाद्यादिबुद्धिवदित्यनुमानं तदुप-स्थापकमिति द्वितीयमाशङ्क्य निराकरोति—। [b] "तद" ति। अनुमितावेव पद-मारोप्याऽद्वैतश्रुतिः सर्वाभेदबोधिका तर्हि स्यादित्यर्थः॥ नन्वनुमितिमपि पक्षेन्तर्भाव्य विषयाद्भेदः साधनीय इति तत्र श्रुतिप्रवृत्तिरनुपपन्नेत्याशङ्क-ते—। [c] "अथे" ति॥ एतावता च विषयाद्बुद्धेर्भेदः सिद्धो नतु बुद्धेरपि वि-षयस्य, अप्रतिज्ञानात्, तथा च बुद्धितो विषयस्याभेदबोधने निष्पर्यवसायिनी श्रुतिः सर्वाभेदबोधने पर्यवस्यतीति परिहरति—। [d] "एवमपी" ति॥

(१) तत्रैव दत्तपदाऽद्वैतश्रुतिः सर्वामद्वैतपरम्परामालम्बते—इति सम्बन्धः।

(२) आद्यं पक्षं दूषयतीत्यर्थः।

(३) पक्षधर्मताबलेनाऽनुमानेनैव हि वन्ह्यादेः पर्वतीयत्वादितत्तद्विशेषसिद्धिः, व्याप्त्यैव च तत्सिद्धावनुमानं निरर्थकमेव स्यादित्यर्थः।

मू० [a] विषयिविषययोर्मिथो भेदेऽपि साध्ये अस्तु हेत्वनुयोगः(१) । [b] परबुद्धीस्तद्विषयाँश्च प्रति निराबाधा सती श्रुतिरेकस्या बुद्धेर्विषयाद्परामपरस्याश्च विषयात्परामभेद्बोधाय धावन्ती सर्वाद्वैते एव पर्य्यवस्यतीति । *[c] नच शक्यमनुमातुं—सर्वस्या बुद्धेर्विषयात्सर्वा बुद्धिर्भिन्नेति *, [d] मा भूदन्यबुद्धिविषयादात्मनोऽपि (२) बुद्धिर्भिन्नेति । * नचात्मव्यतिरिक्तादित्युक्ते निस्तारः स्यात् *, अद्वैतवादिनः सर्वाभेदमिच्छतः क्वचिदपि तदसिद्धा(३)विशेषणाऽप्रसिद्धेरिति । [e] एतेन "सर्वं भिन्नम्"—इति वाक्येन, विना बाधं स्वतःप्रमाणेन, सत्प्रतिशब्दा(४)सेयमद्वैतश्रुतिरित्यप्यनवकाशं प्रत्यवस्थानं मन्तव्यं, [f] यस्मात्कस्माद्पि भेदे मिथ्यातः(५)सत्यभेदोपगमेन [g] सिद्धसाधनात् ;

टी० ननु 'बुद्धिविषयौ मिथो भिन्नावि'त्येव प्रतिज्ञेयमिति न तत्रापि श्रुतिप्रवृत्तिरित्याशङ्क्य निराकरोति—। [a] "विषयी"ति । अत्र बुद्धित्वं न हेतुः, विषयभागेऽसिद्धेः ; विषयत्वं न हेतुः, बुद्धिभागेऽसिद्धेः ; उभयगतं प्रमेयत्वादिकं व्यभिचारीत्यर्थः ॥ अभ्युपेत्य दूषयति—। [b] "परे"ति । स्वस्वविषयान्मिथो भेदासिद्धावपि परविषयेण सह भेदापहात्तत्रैव श्रुतिप्रवृत्तिः सर्वाद्वैतपर्यवसायिनीत्यर्थः ॥ ननु सर्वा बुद्धयः सर्वबुद्धिविषयेभ्यो भिन्ना, बुद्धि-

(१) हेत्वनुयोगः, हेत्वाभासत्वमित्यर्थः । यद्वा, हेतुविषयकः पर्य्यनुयोगः (विचारः)-किं बुद्धित्वं हेतुः? विषयत्वं वा?—इत्यादिरूप इत्यर्थः ।

(२) अन्यबुद्धिविषयादात्मनोऽपि (सकाशाद्) बुद्धिर्भिन्ना मा भूदिति (हेतोः) सर्वस्या बुद्धेर्विषयात्सर्वा बुद्धिर्भिन्नेति नच शक्यमनुमातुमिति सम्बन्धः ।

(३) आत्मव्यतिरिक्तत्वाऽसिद्धेरित्यर्थः ।

(४) प्रतिद्वन्द्विहेतुना सत्प्रतिपक्षितत्ववदस्ति—"सर्वं भिन्नम्"इति प्रतिद्वन्द्विशब्दो यस्याः श्रुतेः सा तथा ।

(५) ब्रह्म मिथ्या न—इति मिथ्याभूताद्घटपटादेः सत्यस्य ब्रह्मणो भेदोपगमेन सिद्धसाधनादित्यर्थः ।

स्वात्; सर्वे विषयाः सर्वबुद्धिभ्यो भिन्ना, विषयत्वादिति परस्परं बुद्धि-विषययोर्भेदसिद्धौ न श्रुतेरवकाश इत्यत आह–। c "नचे"ति ॥ तत्र किं स्वव्यतिरिक्तादिविषयाद्भिन्नेति साध्यते? विषयमात्राद्वा?–इति विकल्प्य द्वितीयं दूषयति–। d "मा भूदि"ति ॥ बाधं व्युदस्य सत्प्रतिपक्षं व्युदस्यति–। e "एतेने"ति। यद्यपि लौकिकवाक्यात् श्रुतेरेव बलवत्त्वमिति न तेन प्रतिरोधः तथापि वाक्यार्थे श्रुतितात्पर्यग्रहे सति तथा, नतु तात्पर्याग्रहदशायामपि तद्बलवत्तेति भावः ॥ f "यस्मादि"ति । यद्यपि मिथ्यात(१) इत्यलीकं, तच्च न भेदप्रतियोगि, तथापि मिथ्यासत्यभेदव्यवहारस्तथाप्यनुरुध्यते इति भावः ॥ g "सिद्धसाधनादि"ति । मिथ्याप्रतियोगिभेदबोधकलौकिकवाक्येन सत्यसकलाऽभेदबोधकश्रुतेः सामञ्जस्यादित्यर्थः ।

मू० a सर्वस्मादिति स्वतोप्यापत्तेः; स्वव्यतिरिक्तादिति चाद्वैतवादिन्यव्यवच्छेदकम् । तदेवम्–

b हेत्वाद्यभावसार्वत्र्ये सर्वं पक्षयताऽऽस्थिते ।
किञ्चित्तु त्यजता दत्ता सैव द्वाराऽद्वयश्रुतेः ॥ ९ ॥

अत एव च–

c आद्यधीविद्यभेदीयाऽप्यन्यथानुपपन्नता ।
स्वमानापेक्षणादन्ते बाधते नाद्वयश्रुतिम् ॥ १० ॥

d न च संस्कारारूढदृढान्वयव्यतिरेकान्वयव्यतिरेकान्वयप्रतिपत्त्युत्पत्तिप्रतिबन्धः शक्यशङ्कः ।

टी० ननु 'सर्वस्मात्सर्वं भिन्नमि'त्युक्ते क्व सामञ्जस्यमित्यत आह–। a "सर्वस्मादि"ति । तस्यापि (२) सर्वपदार्थान्तर्गतत्वादित्यर्थः । यद्यपि ब्रह्मणो यतःकुतश्चिदद्वैतसाधने स्वस्मादेव तत्सिद्धौ सिद्धसाधनं, सर्वस्मादद्वैतसाधने मिथ्यातोप्यद्वैतसिद्धिप्रसङ्गः, तथापि स्वसाक्षिक(३)मेव

(१) "मिथ्यात"–इत्यत्र मिथ्यापदप्रतिपाद्यं यद्यप्यलीकमित्यर्थः। यद्यपि वेदान्तिकसिद्धान्ते मिथ्याऽलीकयोर्भेदः, तथापि पारमार्थिकत्वेन नित्यालीकत्वं भेदाऽप्रतियोगित्वं चाऽभिप्रेत्येतदुक्तम् । (२) स्वस्यापीत्यर्थः ।
(३) स्वसाक्षिकं=स्वतःसिद्धं, न तु तत्र साधनान्तरापेक्षेति भावः ।

ब्रह्मेत्येव हृदयम् ॥ [b]“इत्यादी”ति । आदिपदेन दृष्टान्तोपग्रहः । सर्वे-पक्षीकरणं सार्वज्ञ्यमन्तरेणानुपपन्नमित्यर्थः । आस्थिते=स्वीकृते । एतद्दोषद्वयभयेन यदि पक्षात्किंचिद्बहिर्भाव्यं तदा श्रुतिप्रवेशे तदेव द्वारं स्यात्तत्रैव सावकाशा श्रुतिः सर्वाद्वैतं बोधयिष्यतीत्यर्थः ॥ [c]“आद्ये”ति । आद्या धीः=‘घटपटौ भिन्नावि’ति भेदधीः, तद्ग्राह्यो यो भेदो=घटपटभेदः, तदीयान्यथानुपपन्नता=तदन्यथानुपपत्तिः, सापि शेषं गत्वा नाद्वयश्रुतिं बाधते, कुतः? स्वज्ञानापेक्षणात्(१),तथाचानुपपत्तिज्ञाने(२)सावकाशा श्रुतिः सर्वाद्वैतपर्यवसन्ना स्यादित्यर्थः । यद्यप्यन्यथानुपपत्तिज्ञाने त्वयोपानीय दत्ते तदैव(३) तद्भेदग्रह इति न श्रुतेरवकाशः, यदि सर्वं भिन्नं स्यात्तदा ‘घटपटौ भिन्नावि’ति प्रत्यक्षेण गृहीतो घटपटयोरपि भेदो न स्यादित्यनुपपत्तिज्ञानेन सकृद्बाधिता श्रुतिस्तत्रापि न सावकाशा, तथापि “तत्स्वप्रकाशपरमार्थचिदेव भूत्वे”त्यत्र तात्पर्य्यम् ॥ उत्पन्नश्रौताद्वैतधीबाधं निरस्याऽयोग्यताज्ञानात्तदुत्पत्तिप्रतिबन्धं निरस्यति—। [d]“नचे”ति । भूयोदर्शनप्रभवसंस्काराद्रूढोऽन्वयः=सत्त्वं, यस्य व्यतिरेकस्य=भेदस्य, तस्य यावन्वयव्यतिरेकौ, ताभ्यां योऽन्वयः=संबन्धो व्याप्तिलक्षणो—यो घटादिः स पटादेर्भिन्नो यः पटादिर्नासौ घटादिरित्येवमाकारः, तेन व्याप्तिप्रत्ययेन प्रतिपत्तेरद्वैतबुद्धेरुत्पत्तिप्रतिबन्धो न शक्यशङ्क इत्यर्थः । यद्वा, संस्काराद्रूढोऽत एव दृढान्वयो=दृढपदो, यो व्यतिरेको=भेदस्तस्यान्वयो ‘भिन्नमिदमि’ति ज्ञानं, व्यतिरेकश्चाऽ‘भिन्नमि’ति निश्चयस्ताभ्यामन्वयप्रतीतेः श्रौतसंसर्गप्रतीतेरुत्पत्तिप्रतिबन्धो न शक्यशङ्क इत्यर्थः। सर्वलोकप्रसिद्धभेदप्रमा(४)बलादद्वैत-

(१) अयमर्थः—प्रतीयमानैवाऽनुपपन्नता भेदं साधयतीति वाच्यम्, अर्थानुपपत्तिदर्शनादुपपादके बुद्धिरर्थापत्तिः इति स्वीकारात्; तथा चानुपपत्तेः स्वगोचरज्ञानात्स्वभेदाप्रसाधकत्वेन तत्रैव दत्तपदा श्रुतिः सर्वाऽद्वैते पर्यवस्यतीति ।

(२) अनुपपत्तिविषयकज्ञाने इत्यर्थः ।

(३) अनुपपत्तिविषयकज्ञानसमकालमेव तयैव ज्ञातयानुपपत्त्या स्वविषयकज्ञानादपि स्वस्य भेदो गृहीतः, अभेदे हि प्रत्यक्षसिद्धो घटपटयोरपि भेदो न सिध्येदित्यर्थः ।

(४) भेदज्ञानं यदि प्रमा स्यात्तदाऽयोग्यताज्ञानाच्छ्रुत्या संसर्गबोधो नोत्पाद्येत, नत्वेतदस्ति, भेदस्य कल्पितत्वादित्यर्थः । अत एव ‘यद्यपी’त्यनेन भेदप्रत्यक्षमेव श्रुतिबाधकमित्युक्तमपि साधु संगच्छते । वस्तुतस्तु, भेदप्रमैव यदि स्यात्तदा श्रुत्या संसर्गबोधो न

श्रुत्या संसर्गबोध एव न संभवत्ययोग्यतानिश्चयादिति भावः । यद्यपि यत्रक्वचिदुत्पन्नं भेदप्रत्यक्षमेव सर्वाद्वैतप्रतिपादकश्रुतिबाधकमतो च श्रोतप्रतिपत्त्युत्पत्तिप्रतिबन्धः शक्यशङ्क एव, तथाप्युत्पत्तिप्रतिरोधेऽपि स्वप्रकाशप्रामाण्यावष्टम्भादिदमुक्तम् ॥

मू० यतः—

[a] अत्यन्तासत्यपि ज्ञानमर्थे शब्दः करोति हि ।
अबाधात्तु प्रमामत्र स्वतःप्रामाण्यनिश्चलाम् ॥ ११ ॥
असंसर्गाग्रहस्यापि मन्ता ग्रंसत्यबाधिते ।
अत्यन्ताऽसदसंसर्गाग्रहं संसर्गलग्नकम् ॥ १२ ॥

टी० "अङ्गुल्यग्रे करिशतं विहरति" "मम कर्णकुहरं प्रविश्य सिंहः क्रीडती"त्यादिशब्दादुत्पद्यमानस्य ज्ञानस्यानुभवसिद्धतया शाब्दज्ञाने योग्यताज्ञानस्यायोग्यताज्ञानविरहस्य वा न जनकत्वं, किंतु, ज्ञानमुत्पद्यमानं विषयबाधादप्रमाणतया, तदबाधात् प्रमाणतया, व्यवहर्तुमुचितं; प्रकृते च विषयबाधो नास्त्येवेत्याशयवानाह—। [a] "अत्यन्ते"ति । प्रमामत्र, करोतीत्यनुषज्यते । प्रत्यक्षादिबाधस्त्वाशङ्क्य निरस्त एवेति भावः ॥ ननु अयोग्यतास्थले संसर्गज्ञानं नोत्पद्यते, व्यवहारस्त्वसंसर्गाग्रहमात्राधीन इत्यत आह—। [b] "असंसर्गाग्रहस्ये"ति । असंसर्गाग्रहस्य मन्ता मीमांसकः, स चात्यन्तमसत्त्वऽसंसर्गः सत्यस्थले, तस्याऽग्रहो यत्र तत्र तु संसर्गप्रमामेव मन्यते, तथाच तन्मतेऽप्यद्वैतश्रुत्या संसर्गप्रमेव जननीया, विषयाऽबाधादित्यर्थः । सदसंसर्गाग्रहस्तत्र नास्त्येव, विषयबाधस्य निरस्तत्वादिति भावः ।

मू० [a] अनौचित्या(१)पि तर्केण दुर्बाधैवाद्वयश्रुतिः ।
अनारोपितमूलत्वादलवत्त्वादताहशा ॥ १३ ॥

स्यात्, मत्वेतदस्ति, भेदाऽभेदप्रमयोरुभयोरपि लोकसिद्धत्वात्; तथाच यत्रैवाऽभेदप्रमा तत्रैव दत्तपदा श्रुतिः सर्वाऽभेदे पर्यवसास्यति, नातस्तया संसर्गाऽबोधः—एतादृशार्थकरणे यद्यपीत्यनेन 'यत्रक्वचिदि'ति, 'सर्वाऽद्वैते'ति च प्रतिपादनं साधूपपादितं स्यात् ।

(१) सकललोकसिद्धो भेदस्तिरस्कर्तुमनुचितः—इत्यनौचितीतर्कः, उचितस्य भाव औचिती, न औचित्यनौचितीत्यक्षरार्थः । अनौचित्यमित्यदन्तापि तत्समाख्या ज्ञेया ।

Digitized by Google

[b] प्रवृत्तेना(१)प्यनौचित्यमूलं येन न लूयते ।
तच्चाऽनौचित्यसाम्राज्यं वैपरीत्यात्तु नात्र तत् ॥ १४ ॥

टी० नन्वनौचित्यऽविनिगमककल्पनालाघवकल्पनागौरवाणां तर्काणां, तर्कप्रतिरूपकाणां(२) वा, प्रमाणसहकारित्वमुभयवादिसिद्धं, तथाचाऽनौचितीतर्कस्य सकललोकसिद्धभेदतिरस्काराऽनर्हत्वलक्षणस्य प्रकृते सत्त्वाद्भेदग्राहिप्रत्यक्षमेव बलीयो, नत्वभेदविषया श्रुतिरित्यत आह—। [a] "अनौचित्ये"ति । तर्कस्याहार्यारोपरूपतया तदपेक्षया श्रुतेरनारोपितमूलाया बलवत्त्वमिति तर्कोपष्टब्धप्रमाणापेक्षयापि तथेत्यर्थः । अतादृशा, अनारोपितमूलेनेत्यर्थः । केचित्तूद्भावितनिग्रहस्थानेनैवोद्भावितनिग्रहस्थानपरिहारोऽनौचितीतर्कः(३)श्रुतेर्बाधकः स्यादित्याशङ्काभाग इत्याहुः । तच्चिन्त्यम्(४) ॥ नन्वेवमनौचित्यतर्को नास्त्येव, तथाच "दोषं व्यक्तिविवेकेऽमुं कविलोकविलोचने"(५)इत्याद्यग्रे(६)यदुक्तं तदनुपपन्नं स्यादित्यतः सदसदनौचि-

---

(१) प्रवृत्तेनापि येन प्रमाणेनाऽनौचित्यस्य मूलं न लूयते=न खण्ड्यते, तत्रैवाऽनौचित्यस्य साम्राज्यं=स्वार्थसाधनसामर्थ्यं भवति, अत्र तु तद्वैपरीत्यात्=अद्वैतश्रुत्याऽनौचित्यमूलस्य पारमार्थिकभेदनिष्ठसर्वजनसिद्धत्वस्य लवनात्, न तद्=अनौचित्यस्य साम्राज्यमित्यर्थः ।

(२) तर्कप्रतिरूपकाणां,=तर्कसदृशानां, न तु तर्काऽऽभासानामित्यर्थः, तेषां प्रमाणविरोधित्वेन प्रमाणसहकारित्वस्याऽसम्भवात् ।

(३) पूर्वपक्षिणोद्भावितं श्रुतिबाधलक्षणं निग्रहस्थानमपरिहृत्य बाधत्वेन तदभिन्नं मत्वा प्रत्यक्षबाधलक्षणेन निग्रहस्थानेन यस्तस्य परिहारः (प्रतिबन्दी) वेदान्तिकस्य, सोऽनुचितेत्यनौचितीतर्क इत्यर्थः । यद्वा, येनैव घटपटादिभेदावगाहिप्रत्यक्षबाधलक्षणेन निग्रहस्थानेन श्रुतिर्बाध्यते तेनैव प्रत्यक्षप्रतियोगिकविषयानुयोगिकाभेदाबाधनादभेदत्वावच्छिन्नाऽभेदावगाहिश्रुतिबाधोऽपि बाध्यते इत्युद्भावितनिग्रहस्थानेनैवोद्भावितनिग्रहस्थानपरिहारो वेदान्तिकस्यानुचितः, घटपटाद्यभेदांशे श्रुतिबाधस्यापि सद्भावाद्—इत्यनौचितीतर्कः । अथवा, उद्भावितं निग्रहस्थानं बाधादिरूपं यत्रेति बहुव्रीहिः, तथा च स्वयं बाधितेन तर्कादिना बाधपरिहारोऽनुचित—इत्यनौचितीतर्क इत्यर्थः ।

(४) चिन्ताबीजं तु स्वमते दोषमनुद्धृत्यापि प्रतिबन्द्यादेर्दानस्य युक्तत्वम् ।

(५) "काव्यमीमांसिषु प्राप्तमहिमा महिमाऽऽहृत"—इत्युत्तरार्द्धम् । अस्यार्थः—महिमानामकः कश्चिदालङ्कारिकः काव्यमीमांसाऽभिज्ञेषु प्राप्तमहत्त्वः स्वीयव्यक्तिविवेकनामके ग्रन्थेऽमुं दोषमनौचित्याख्यम् आहृत=पुरस्कृतवान् । किंभूते ग्रन्थे? कविलोकविलोचने, कविलोकानां चक्षुर्भूते, अनया कारिकया खण्डनकारेणाऽनौचित्ये सम्मतिः प्रदर्श्यते ।

(६) चतुर्थपरिच्छेदस्याऽवसाने ।

Digitized by Google

त्ययोर्विषयं विवेचयति–। [b] प्रवृत्तेनापी"ति । अनौचित्यमूलं हि–भेदस्य सर्वजनसिद्धत्वं, तच्च(१)श्रुत्या पारमार्थिकमद्वैतं बोधयन्त्या मूलं व्यावहारिकभेदपरं कृतं, तथाचापारमार्थिकभेदमादाय सर्वलोकसिद्धव्यवहारोपपत्तौ नाऽनौचित्यमिति भावः । "अनौचित्यमूलं व्याप्यव्यापकभावः, तस्य खण्डनमद्वैतश्रुत्ये"त्यपव्याख्यानम्(२), अनौचित्यस्य व्याप्यव्यापकभावमादायाऽप्रवृत्तेः, तत्प्रवृत्तौ वा तत्परत्वे सर्वत्रानौचित्यखण्डने खण्डनकारस्यैव–"विषवृक्षोपि संवर्ध्य स्वयं छेत्तुमसाम्प्रत"मित्यादेरनवकाशापत्तेः । "उद्भावितनिग्रहस्थानेने"त्यादिस्वोक्तविरोधाच्च(३) ।

मू० [a] *ननु यद्यदेवोदाह्रियते त्वया–नेन(४)इतोऽस्य भेदो गृहीत इति ततोऽस्याद्वैताम्नायैरभेदबोधने तद्द्वारा सर्वाभेदे पर्य्यवसातव्यम्–इति, ततस्ततस्तस्य भेदस्तदैव गृह्यते मया, तस्मादुदाह्रियमाणतायामनुदाह्रियमाणतायां च कस्यचिदेतत्प्रत्यवस्थानमस्थाने इति*?। मैवम्। [b] अन्तिमबुद्धेरद्वैतश्रुतिजबुद्ध्यादितो भेदो न त्वया प्रमित–इति मयोच्यमाने यस्तदीयस्ततो भेदः प्रमातव्यः स न तावत् प्रत्यक्षेण, तत्कालमन्तिमबुद्धेरनुपस्थितेः। [c] यदि च केनचिद्धेतुना वा कयाचिदनुपपत्त्या वा तथा स्यात् तदानीमद्वैतवादिनं प्रति हेतोः साध्याऽविशिष्टतया(५), अनुपप-

(१) तच्च मूलमिति सम्बन्धः ।

(२) केचित्त्वित्यनेन पूर्वमुक्तस्यैवेदमपव्याख्यानं द्रष्टव्यम् ।

(३) नहि उद्भावितनिग्रहस्थानतत्परिहारयोर्व्याप्यव्यापकभावोस्ति येन तमादायानौचित्यप्रवृत्तिः स्यादिति भावः ।

(४) इतइतः=अन्त्यबुद्ध्यादितः, अस्य=उपान्त्यबुद्ध्यादेः । सर्वाऽभेदे पर्य्यवसातव्यमिति यद्यदेव त्वयोदाह्रियते–इति सम्बन्धः । ततस्ततः=अन्त्यबुद्ध्यादितः, तस्य=उपान्त्यबुद्ध्यादेर्भेदस्तदैव=कथाकाले एव मया गृह्यते इत्यर्थः ।

(५) हेतोः साध्याऽविशिष्टतया (साध्याऽभिन्नतया) तत आभासात्कथं प्रमोदयः स्यात् अनुपपत्तेश्च येन (उपपादकेन) विना सा=(अनुपपत्तिर्भवति) तदविशिष्टतया तत आभासात्कथं प्रमोदयः स्यादित्यन्वयः ।

त्सश्च येन विना सा नद्विशिष्टतया, ततः कथमाभासात् प्रमोदयः स्यात् ।

टी० सिंहावलोकितन्यायेन शङ्कते—। [a] "नन्वि"ति । कस्यचिद्वस्तुनोऽनुदाह्रियमाणतायां श्रुतिव्यवस्थापनानवकाशः, उदाह्रियमाणतायां च भेदग्रहापत्तिरिति([1])प्रत्यवस्थानं खण्डनमस्थाने ऽयुक्तमित्यर्थः ॥ मयोदाह्रियमाणाया अन्तिमबुद्धेः प्रत्यक्षादिना केनापि प्रमाणेन कथायां भेदः साधयितुमशक्य इति परिहरति—। [b] "अन्तिमे"ति । यद्यप्यन्तिमबुद्धेरुदाहरणेऽन्तिमत्वव्याघातो, ऽनुदाहरणे श्रुत्यव्यवस्थापनं, मानसप्रत्यक्षेण ततो भेदग्रहश्च तदुदाहरणे, वाक्यजज्ञानसहकृतस्य मनसो बहिरपि प्रवृत्तेः, कविवाक्यवत्([2]),तथापि तस्य([3])प्रमाणान्तरत्वापत्तिः; न वा तादृशप्रत्यक्षे([4])प्रमाणं, तादृश([5])मानसप्रत्यक्षेण सह भेदाग्रहात्तत्रैव श्रुतिप्रवृत्तिरिति भावः ॥ ननु प्रत्यक्षाभावेऽप्यनुमानमर्थापत्तिर्वा स्यादित्यत आह—। [c] "यदि चे"ति । हेतुना=बुद्धित्वादिना । अनुपपत्त्या=प्रथमगृहीतभेदान्यथानुपपत्त्या । अनुमानपक्षे—'हेतोरि'ति; अर्थापत्तिपक्षे—'येन विने'ति । अनुमानस्यार्थापत्तेर्वा भेदमादाय प्रवृत्तेरद्वैतवादिनं प्रति तदुपन्यासानवकाशादिति भावः ॥

मू० [a] *नच वाच्यं स्वयं मया स भेदो ज्ञायते इति नास्ति पाचिकोऽपि([6]) मां प्रत्यसिद्ध्यादिरिति *, यतो [b] ऽस्य त्वद्वचनस्य वैयर्थ्यापत्तिः, [c] वचनस्य परार्थत्वात् । मौनमवल-

(१) इतिशब्दो हेतौ; इति हेतोः कस्यचिदपि वस्तुनः प्रत्यवस्थानं=खण्डनमयुक्तमित्यर्थः ।

(२) यथा कवीनां=क्रान्तदर्शिनां, मानसज्ञानसहकृतं वचोऽतीताऽनागतविप्रकृष्टव्यवहितसूक्ष्मवस्तुषु प्रतिपादकत्वेन सर्वत्रैव प्रवर्तते तद्वदित्यर्थः ।

(३) मानसप्रत्यक्षस्येत्यर्थः ।

(४) बाह्यार्थगोचरमानसप्रत्यक्ष इत्यर्थः ।

(५) किञ्च, मनसाऽन्त्यबुद्ध्यादित उपान्त्यबुद्ध्यादेर्भेदग्रहेऽपि स्वप्रतियोगिको भेदो न गृहीत इति तत्रैव लब्धपदा श्रुतिः सर्वाऽभेदे पर्यवस्येदित्याह—तादृशेति ।

(६) परार्थाऽनुमानपक्ष एवाऽसिद्ध्यादिर्दोषो न स्वार्थानुमानपक्षेऽपीति भावः ।

स्थ्यावतिष्ठमानस्य भवानऽप्रतिभातो न मुच्यते। * नच स्वयं मया प्रमितो भेदः परं प्रति वचसा केवलं बोध्यते इति वाच्यम् *, त्वद्वचसि परस्याप्रत्ययात्। विजिगीषुं परं प्रति विजिगीष्वन्तरवचनं हि तदार्थे तज्जिज्ञासोत्पादनद्वारेण तस्य स्वतस्तदर्थप्रमित्युत्पादनपर्य्यवसायितयोपयुक्तम्, नचाद्वैतवादिनं प्रति तथा कर्त्तुं शक्यते, तं प्रत्यन्यतरासिद्धे(१)रुक्तत्वात्। * [d] नच वाच्यं मम वचनात्सन्देहेनापि श्रुत्या तच सन्दिग्धबाधितभावया नाभेदप्रतिपादनं ते घटते इति *, यस्माद्द्वैतं मन्यमानेन भेदासिद्ध्या सर्वच साध्याऽविशेषादिदोषप्रतिसंधायिना संशयस्याप्यनवकाशीकरणमेव स्यात्।

टी० अनुमानमर्थापत्तिर्वा नाद्वैतवादिनं प्रत्युपन्यस्यते, किं तर्हि, स्वत एवान्तिमबुद्ध्या सह भेदोऽनुमीयते इति ब्रूम इत्याशङ्क्य परिहरति— [a] "नच वाच्यमि"ति॥ [b] "अस्ये"ति। स्वयं मया स भेदो ज्ञेय इत्यस्येत्यर्थः॥ वैयर्थ्ये हेतुमाह—। [c] "वचनस्ये"ति। परस्य चाद्वैतवादिनये ऽभावादिति भावः। यद्यपि यथाऽद्वैतवादिनं प्रत्यनुमानमनवकाशं तथा भेदवादिनं प्रति शतशः पठ्यमानाप्यद्वैतश्रुतिरनवकाशा, तेन सर्वत्र भेदग्रहात्। क्वचित्प्रत्यक्षतः, क्वचिदनुमानात्, क्वचिदागमाद्, अर्थापत्तेर्वा तस्य यथायथं भेदग्रहसंभवात्। मया तावदद्वैतश्रुतिभिरद्वैतं प्रतिपाद्यते— इत्यपि त्वद्वचनं भेदवादिनं प्रत्यनवकाशमेव। नहि यस्य तादृशश्रुत्यर्थेऽश्रद्धा, तस्य त्वद्वचसि श्रद्धा। भेदप्रतिपादकप्रत्यक्षाद्याभासीकरणमपि तं प्रत्यतन्त्रं, तेन स्वनयेन सर्वसामञ्जस्यकरणात्; तथापि स्वप्रकाशे ऽद्वैते तात्पर्यम्॥ ननु मद्वचनेन निर्णयस्तव मा भूत संशयोपि स्यादेव, तावतैव

(१) अन्यथाऽनुपपत्त्या भेदसाधने उपपाद्योपपादकयोर्भेदस्याऽसिद्धेः, अनुमित्या तत्साधने च साध्यसाधनयोर्भेदस्याऽसिद्धेरित्यर्थः।

श्रुतिरनवकाशेत्यत आह—। [d] "नच बाध्यमि"ति । प्रत्यक्षादौ बाधकमाने(१) खण्डिते श्रुतिलक्षणसाधकप्रमाणे च सति बाधक(२)साधकमानाभावलक्षणायां संशययोग्यतायां निरस्तायां संशय एव नास्ति, भवन्वा न स प्रमाणपरिपन्थीति भावः । यद्वा, श्रुतिपरिपन्थिना केनचित्प्रमाणाभासेनापि यदि द्वैतमुपस्थाप्येत तदा संशयः स्यात्, तच्च नास्त्येव, प्रत्यक्षस्य निरस्तत्वात्; अनुमानादेः साध्याऽविशेषादिदोषग्रस्तत्वात्; अन्ततो भेदाभावेन तद्घटितविरोधाभावेन विरुद्धनानाकोटिकस्य संशयस्याप्यद्वैतवादिनं प्रत्यनवकाशादित्यर्थः ॥

खू० [a] "तस्मात्—

एकं ब्रह्मास्त्रमादाय नान्यं गणयतः क्वचित् । आस्ते न धीरवीरस्य भङ्गः सङ्गरकेलिषु ॥ १५ ॥ [b] अपि च(३),प्रतीयते तावदिदं सामान्यतो, यन्नाम किंचित्परश्चेतसा चिन्तयन्नस्तीति, किंचिद्वा विवक्षुरित्यादि; तच परस्य बुद्धिविषयो विवक्षाविषयो वा विशेषतो विनिगमनं विना नैव प्रतीयते, ततोऽन्तिमबुद्ध्यादिभेदो न भवता शक्यग्रहः, परेण(४) तच्चिन्तनादेरपि संभवात् । स्वस्मात्स्वस्य भेदस्याभावात् । ततस्तत्र लब्धपदा कथमद्वैतश्रुतिर्विश्वाभेदे पर्य्यवस्यन्ती त्वया शक्यबाधा स्यात् । तस्मात्—

(१) अत्र बाधकमानं श्रुतेर्बाधकं ग्राह्यं, न तु संशययोग्यताकुक्षिनिविष्टं, तथा चाऽबाधिताऽद्वैतश्रुतिसद्भावे बाधकमानाभावः कथमिति भावः ।

(२) बाधकेन जनितं मानं बाधकमानं (बाधः) साधकेन जनितं मानं साधकमानं (सिद्धिः) तदुभयाभावलक्षणायामित्यर्थः ।

(३) परकीयबुद्धिविषयस्य विशेषरूपेण साक्षात्कारासम्भवे बुद्धिविषययोर्भेदः परेण ग्रहेत, भेदज्ञाने विशेषरूपेण धर्म्याटिज्ञानस्य हेतुत्वात्,नत्वेतदस्तीत्याह—अपिचेति ।

(४) परेण=भेदप्रमात्रा, तच्चिन्तनादेः=धर्मिप्रतियोगिचिन्तनादेरप्यावश्यकत्वात्तस्य च विशेषरूपेण प्रकृतेऽभावादिति भावः ।

ᶜकथं सामान्यतो(¹)ज्ञाते नैव ज्ञाते विशेषतः ।
पदरोधस्त्वया कर्त्तुं शक्यः स्याद्द्वयश्रुतेः ॥ १६ ॥

टी० सर्वप्रमाणापेक्षया श्रुतेर्बलवत्त्वेन तद्विषयस्य बलवत्त्वात्तद्वतो वादिनोपि बलवत्त्वमित्युपसंहरति-। ᵃ"तस्मादि"ति ॥ यत्र विषये प्रत्यक्षादिना भेदो दुर्ग्रहस्तत्र श्रुतेः प्रवृत्तिमाह–। ᵇ"अपि चे"ति। परेण चिन्त्यमानस्य वस्तुनः (यतो भेदो ग्राह्यः) 'तदेव परेणेदानीं चिन्त्यते'–इति विशिष्यानवधारणाद्भेदो दुर्ग्रह इति तदेव(²)श्रुतिविषय इत्यर्थः । यद्यप्यापाततस्ततो भेदाग्रहेपि अत्र क्रमेण भेदं गृहीत्वा श्रुतिरपसारणीया, नहि यदेकदा न गृह्यते तत्र कदापि गृह्यते, प्रवृत्तं वा प्रमाणं पश्चात्प्रवृत्तेन बलवता प्रमाणेन नाऽपसार्य्यते, परिचिन्त्यमानत्वावच्छेदेन(³) तत्रापि वा भेदः सुग्रह एव, वस्तुतस्तस्यान्त्यबुद्धित्वादित्यन्यदेतत्, तथापि श्रुतेरापाततस्तत्रावकाश इतिहृदयम् ॥ उक्तमर्थं संकलयति–। ᶜ"कथमि"ति ॥

मू० *ᵃननु भेदमनङ्गीकुर्वतो भवतः कथं तत्तत्पदपदार्थवैचित्रीव्यवहारो न व्याहन्यते? *। ᵇकथं व्याहन्यते, प्रतिवक्ष्यते हि तत् । ᶜकिंच, योऽयं त्वया व्याघात आपादनीयः सोऽपि कस्माच्चिदापादकात्, नचापाद्यापादकमभिद्यमानमापत्त्यै प्रभवेदिति । तस्मात्–

ᵈनानात्व(⁴)मवलम्ब्यापि वदत्यद्वैतवादिनि ।
असिद्धभेदाद्व्याघातः पतेदापादकात्कुतः ॥ १७ ॥ (⁵)

(शेषमग्रे)

(१) सामान्यतो ज्ञाते विशेषतश्च न ज्ञाने कथमद्वयश्रुतेः पदरोधः कर्त्तुं शक्यः–इत्यन्वयः । क्वचित्तु "नैव सामान्यतो ज्ञाते"–इति पाठः ।

(२) अभि र्वास्वित्यर्थः ।

(३) परिचिन्तनस्य परिचिन्त्यमानाद्भेदे साध्ये परिचिन्त्यमानत्वावच्छेदेन तत्रापि=परकीयबुद्धिविषयेपि, बुद्धिभेदः सुग्रह एवेत्यर्थः ।

(४) नानात्वं व्यावहारिकं, काल्पनिकं वा ; नतु पारमार्थिकम्, अद्वैतवादिनं प्रति तदसिद्धेः ।

(५) { स्वरूपान्योन्यवैधर्म्यपृथक्त्वे तिसृतुविधो । भेदो न घटतेऽद्वैते वदत्येतत्तु साम्प्रतम् ॥ }

॥ माधवीयधातुवृत्तिः ॥

(*Continued from page* 360. VOL. VII.)

भ्रमु चलने ॥ भ्रमति । बभ्राम । बभ्रमतुः । भ्रेमतुः । भ्रेमुः । बभ्रमुः । बभ्रमिथ । भ्रेमिथ । 'वा जॄभ्रमुत्रसा'मिति किति लिटि थलि च सेटि वा एत्वाभ्यासलोपौ । भ्रमिता । भ्रमिष्यति । भ्रमतु । अभ्रमत् । भ्रमेत् । भ्रम्यात् । अभ्रमीत् । शब्विषये वा भ्राशेति पक्षे श्यनि । भ्रम्यति । भ्रम्यतु । अभ्रम्यत् । भ्रम्येत् । भ्राम्यतीति दिवादौ शमादिपठितस्यानवस्थानार्थस्य शमामष्टानामिति दीर्घे । बिभ्रमिषति । बम्भ्रम्यते । अनुनासिकान्तत्वान्नुक् बम्भ्रन्ति । बम्भ्रान्तः । लोटि हौ बम्भ्रांहि । अबम्भन् । 'मो नो धातो'रिति मकारस्य नकारः । भ्रमयति । अमन्तत्वान्मित्त्वम् । घञि भ्रमः । नोदात्तेति वृद्धिनिषेधः । प्रयोजनं तु भ्रमितुं न शक्ताः अभ्रम इत्यत्र 'अचक्तःवशक्ता वि'ति अजन्तस्य क्तान्तस्य च नञः परस्योत्तरपदस्य तत्पुरुषे अशक्तौ गम्यमानायां विधीयमानस्यान्तोदात्तत्वस्याभावः । तेन 'तत्पुरुषे तुल्यार्थतृतीयासप्तम्युपमानाव्ययद्वितीया कृत्याः' इति तत्पुरुषे तुल्यादिपूर्वपदस्य विधीयमानः प्रकृतिस्वरो भवति स च निपातत्वादाद्युदात्त एव । अचि तु अच्कावित्यन्तोदात्तमेव । भ्रमित्वा । भ्रान्त्वा । भ्रान्तः । भ्रान्तं देशमनेकदुर्गविषममित्यत्र देशश्चाकर्मणामिति देशस्य कर्मत्वेनानभिधानं तु भवतावेवोपपादितम् । भ्रमणः ॥ चलनार्थत्वाद्युच् । भ्रमीति शमादिपठितस्य घिनुण् । भ्रमरः ॥ 'अर्त्तिचमिकमिभ्रमिदेविवाशिभ्यश्चे'त्य'रप्रत्ययः । भ्रुमलः । अक्षिरोगः ॥ भ्रमेरुच्चोपधाया इति कलप्रत्ययः उपधायाश्चोकारः । भ्रूः । भ्रमेर्डूरिति डूः । डित्त्वाट्टिलोपः ॥ भ्रुवौ । भ्रुवः । अजादौ अचि श्नुधातुभ्रुवामित्युवङ् । हे भ्रूरित्यत्र 'नेयङुवङ्स्थानावस्त्री'ति नदीसंज्ञानिषेधः । 'अम्बार्थनद्योर्ह्रस्व' इति ह्रस्वाभावः । ङिद्वचनेषु 'ङिति ह्रस्वश्चे'ति नदीविकल्पः । ङिद्वचनेषु इयङुवङ्स्थानेष्वीदन्तमूदन्तमिकारोकारान्तं च स्त्र्याख्यं वा नदी स्त्रीशब्दं वर्जयित्वेति सूत्रार्थः । तेन नदीसंज्ञाया'माण् नद्याः' इत्यादिवृद्धावुवङि भ्रुवै इत्यादि । अन्यदा केवलमुवङि

Digitized by Google

भ्रुवे इत्यादि । आमि स्त्रीशब्दव्यतिरिक्तयोरियङुवङ्स्थानयो‘र्वामी’ति नदीनिषेधविकल्पनात् भ्रूणां भ्रुवामिति । भ्रूर्नामा का चित्तस्या अपत्यं भ्रौवेयः । ‘भ्रुवो वुक् चे’ति ढक् तत्सन्नियोगेन वुगागमः । लेखाभ्रेयः । ‘शुभ्रादिभ्यश्च’त्यपत्ये ढक् ‘ढे लोपो कद्र्वा’ इति ढे परे कद्रुवर्जितस्योवर्णान्तस्याङ्गस्योकारस्य लोप इत्यूकारलोपः । अक्षिणी च भ्रुवौ च अक्षिभ्रुवम् । अचतुरेत्यादिनाऽचि समासान्तो निपातितः । भ्रूकुलं भ्रूभङ्ग इत्यादौ ‘इको ह्रस्वोऽङ्यो गालवस्ये’ति इगन्तस्याङ्यन्तस्य उत्तरपदे विधीयमानो ह्रस्वः ॥ तत्रानुवृत्तस्यान्यतरस्याङ्ग्रहणस्य व्यवस्थितविभाषात्वाच्च भवति । भ्रूकुंसः । भ्रूकुटिः । भ्रुकुटिरित्यत्र पक्षे ह्रस्वो भवति । अत्र भाष्ये अपर आह अकारो भ्रुकुंसादीनां वक्तव्यः ॥ भ्रकुटिः ॥ भ्रकुंस इति ॥ ८०१ ॥

चर संचलने ॥ चरति । चचार । चरिता । अचारीत् । ‘अतो ल्रान्तस्ये’ति वृद्धिः । चिचरिषति । चाचर्यते । चाचर्ति । चाचर्हि । अचाचः । हल्ङ्यादिलोपः । चारः । चरः । चरेजः । ‘विभाषा वर्षक्षरशरवरादि’ति अजन्ते उत्तरपदे विभाषा सप्तम्या अलुक् । अत्र चल संचलनइति क चित्पठ्यते । तदपि चरिवत् । शम्यादय उदात्ता उदात्तेतः ॥ ८०२ ॥

षह मर्षणे ॥ उदात्तोऽनुदात्तेत् । सहते । सेहे । सहिता । सोढा । तीषसहेतीड्विकल्पः ॥ इडभावे ढत्वधत्वष्टुत्वढलोपाः ‘सहिवहोरोदवर्णस्ये’ति ढलोपे अवर्णस्योकारः । सिसहिषते । स्तौतिण्योरेवेत्यषत्वम् । सिसाहयिषतीत्यत्र स्तौतीति नियमं बाधित्वा सः स्विदिस्वदिसहीनामिति सत्त्वं भवति । सासह्यते । सासोढि । सासोढः । पूर्ववड्ढत्वादि, सासढि । ‘षढोः कः सी’ति कत्वं लोटि हेर्धिभावे ढत्वष्टुत्वढलोपाः, तेषु सासोढीति भवति । साहयति । असीषहत् । परिषहते । विषहते । परिनिविभ्य इति षत्वम् । इदं च ‘सिवादीनां वाड्व्यवायेपी’ति अड्व्यवाये विकल्प इति । पर्यषहत । पर्यसहतेति स्थादिष्वभ्यासेन चेत्यत्र प्राक्सितादित्यनुवर्त्तनात्परिषिसहिषतइति । अत्रोत्तरखण्डस्य षत्वे प्रतिषेध एव भवति । अत एव प्राक्सितादित्यनुवर्त्तनात्तत्राभ्यासस्येति योगभेदेन

स्यादिष्वेवाभ्यासस्य षत्वमिति क्रियमाणो नियमोऽस्मिन्प्राक्सितिये नेति षत्वमभ्यासस्य भवत्येव तथा च तत्र वृत्तौ । प्राक्सितीयः सुनोत्यादिरेव प्रत्युदाहृतः । आत्रेयस्तु सामान्येन नियममिच्छन् षत्वमाह । तत्र स्तम्भुसिवुसहां चेति अभ्यासे षत्वनिषेधे वैयर्थ्यप्रसङ्गात् । वृत्त्यसामञ्जस्याच्च हेयम् । परिसोढेत्यादौ सहेः षोढरूपत्वात् 'स्तोढ' इति षत्वं निषिध्यते । परिषासोढीत्यत्राभ्यासस्यासोढरूपत्वात्नायं निषेधः । पर्यसीसहदित्यादौ 'स्तम्भुसिवुसहां चङी'ति परिनिविभ्य इति षत्वं निषिध्यते । परस्य तु 'इण्कोरि'ति भवत्येव । दाश्वान्साह्वानित्यत्र वृत्तौ साह्वानिति निपातनमस्येत्युक्तम् । यदाह परस्मैपदमुपधादीर्घत्वमनिट्त्वं च निपात्यत इति । कैयटे तु 'आधृषाद्वेति' विभाषितणिच इत्युक्तम् । एवं पदमञ्जर्यामपि । अत्र मते तस्य सहेः षादेशः क्वनिनश्च लुक् परस्मैपदित्वात्क्वसुन् निपात्यः । सह्यम् । 'शकिसहोश्चे'ति कर्मणि यत् । साहयतीति साहयः । अनुपसर्गाल्लिम्पेत्यादिना शप्रत्ययः शपि गुणायो । साहः । सहः । णाभावे ऽच् । सर्वसहा वसुमती । संज्ञायां भृतृवृजीत्यादिना खच् । अरुर्द्विषदिति मुम् । सर्वं सहतइति सर्वसहः । पूःसर्वयोरिति यथासंख्यादस्य सर्वशब्दे कर्मण्युपपदे खच् । सहिष्णुः ॥ अलङ्कृञित्यादिनेष्णुच् । सहनः । अनुदात्तेत इति युच् । सासहिः । सहिपतिपदिभ्यो यङन्तेभ्यः किकिनाविति किकिनोरन्यतरः । सहित्रम् । 'अर्तिलूधूसूखनसहचरइत्र' इति करणइत्रप्रत्ययः । षट् । सहेः षष् लुक् चेति सहेः षषादेशः क्वनिनश्च लुक् । 'ष्णान्ता षडि'ति षट्संज्ञायां 'षड्भ्यो लुगि'ति जश्शसोर्लुक् । षण्णामित्यत्र 'षट्चतुर्भ्यश्चे'ति षट्संज्ञकत्वादामो नुट् । षण्णां पूरणः षष्ठः । 'तस्य पूरणे डट्' इति षष्ठ्यन्तात्पूरणे संख्यान्तस्योत्पादके डटि षट्कतिकतिपयचतुरामिति थुक् । टित्वात् स्त्रियां षष्ठी । यदा तु पूरणो भागो भवति तदा 'षष्ठाष्टमाभ्यां ञ चे'ति स्वार्थे ञप्रत्ययः । चकारादञ् च षाष्ठः । षष्ठः । यदा तु पूरणो भागो माने भवति । तदा 'मानपश्वङ्गयोः कन्लुकौ चे'ति यथासंख्यात् षष्ठस्य माने कन् । अष्टमस्य लुक् 'षष्ठाष्टमाभ्यां ञ चे'ति विहितयोर्ञाञोः चकाराद् यथाप्राप्तौ ञाञौ । तेन षष्ठकं मानं षाष्ठं षष्ठ-

मिति त्रीणि रूपाणि भवन्ति । पूरणगुणेति पूरणात्समासनिषेधात्वान्युक्त्कषष्ठेत्यादिप्रयोगश्चिन्त्यः । षट् दन्ता अस्य षोडन् 'वयसि दन्तस्य दतृ' इति दन्तान्तस्य बहुव्रीहौ वयसि गम्यमाने दत्रादेशः । उगित्त्वान्नुम् । षट् दश च षोडशाः 'चार्थे द्वन्द्व' इति द्वन्द्वः । समुच्चयादयश्चार्थाः तत्रासामर्थ्यात् समुच्चयान्वाचययोर्न समास इति स्थितः । षोढा । 'संख्याया विधार्थे धा' । 'अधिकरणविचाले चे'ति धाप्रत्ययः । तत्र षष उत्वमिति उत्वषत्वे धासु वेति वचनाद् धाप्रत्यये पक्षे न भवत इति षड्धेत्यपि भवति । अत्र षकारस्य धाप्रत्यये स्वादिष्वितिपदत्वाज्जश्त्वं डकारः । धकारस्य ष्टुत्वं न पदान्तादिति निषेधान्न भवति । पदान्ताट्टवर्गात् परस्य नाम्वर्जितस्य स्तोः ष्टुत्वं नेति सूत्रार्थः ॥ ८०३ ॥

रमु क्रीडायाम् ॥ अनुदात्तोऽनुदात्तेत् । रमते । रेमे । रेमिषे । रेमिध्वे । क्रादिनियमादिट् । रन्ता । रंस्यते । रमताम् । अरमत । रमेत । रंसीष्ट । अरंस्त । रिरंसते । रंरम्यते । रंरन्ति । रंरतः । प्रवृत्तिग्रहणन्यायेन अनुदात्तोपदेशेत्यनुनासिकलोपः । रंरंसि । रंरण्मि । रंरण्मः । 'म्वोश्चे'ति नत्वे णत्वम् । रंरहीत्यत्र अनुनासिकलोपस्यासिद्धत्वात् 'अतो हे'रिति लुङ् न भवति । अरंरन् । 'मो नो धातो'रिति नत्वम् । रमयति । अरीरमत् । विरमति । आरमति । परिरमति । 'व्याङ्परिभ्यो रम'इति परस्मैपदम् । उपरमति । 'उपाच्चे'ति परस्मैपदम्, इदं सकर्मकविषयमकर्मकत्वम् । उपरमते । विरमते । विभाषा कर्मकादि'ति विकल्पस्योक्तत्वात् । अन्तर्भावितण्यर्थोऽयं सकर्मकः । विरराम । विरेमतुः । विरेमिथ । विररन्थ । थलि 'उपदेशेत्वत'इति उपदेशेत्वतस्तासौ नित्यानिटस्थलीण्निषेधेपि इह भारद्वाजनियमादिट् पक्षे भवति । लुङि 'यमरमनमातां सक् चे'ति परस्मैपदपरे सक् । सिचश्चेट्, 'इट ईटी'ति सिज्लोपः । व्यरंसीत् । व्यरंसिष्टाम् । रामः । 'ज्वलितिकसन्तेभ्यो ण'इति णः । मातन्त्वेप्यनुदात्तोपदेशत्वात् वृद्धिनिषेधाभावः । रमणः । नन्द्यादित्वात् ल्युः ण्यन्ताल्ल्युः । स्तम्बेरमः । 'स्तम्बकर्णयोरमिजपो'रिति स्तम्बउपपदेच् प्रत्ययः । हस्तिसूचकयोरिति वचनात् हस्तिविषयश्चायम् । तत्पु-

रुषे क्रतीति सप्तम्या अलुक् । रन्तिः । 'न क्तिचिदीर्घश्चे'ति दीर्घानुनासिक-लोपनिषेधः । अयमुत्रिदिति केचित् । त्क्वायामिड्विकल्पमुदाहरन्ति । तन्म-हान्तो न सहन्ते । रवम् । रमेस्तश्चेति नप्रत्ययस्तकारश्चान्तादेशः । रमतिः स्वर्गः । रमेर्नित्यतिप्रत्ययः । सुरतः । कामः । सो रमे क्त इति क्तः । सूरतः । कृपावान् । रमेः पूर्वपदस्य च दीर्घ इति क्ते पूर्वपदस्य दीर्घः । रथः । हनिकुषीत्यादीना थन् । रथकट्या 'खलगोरथात्' । 'इनित्रकट्य-चश्चे'ति यत्कट्यचौ 'तस्य समूह' इति विषये । स्वभावात् स्त्रीलिङ्गता । रथस्येदं रथ्यम् । 'रथाद्यत्' 'तस्येदं' विषये यत् । अत्र वृत्ता रथाङ्गएवेष्यते इति रथसीताहलेभ्यो यद्विधौ तदन्तविधिरित्युक्तत्वात् परमरथ्यमित्याद्य-पि भवति । आश्वरथम् । पत्रपूर्वादञिति वाहनवाचिपूर्वपदात् रथान्तात् अञ् यतोपवादः । अयमपि रथाङ्गएवेष्यते । रथं वहति रथ्यः । 'तद्वहति रथयुगप्रासङ्ग'मिति द्वितीयान्तात् वहतीत्यर्थे यत् । रथाय हिता रथ्याः । 'खलयवमाषतिलवृषब्रह्मणश्चे'ति चकारस्यानुक्तसमुच्चयार्थत्वात् चतुर्थ्य-न्ताद्धितार्थे यत् । वामरथस्यापत्यं वामरथ्यम् । 'कुर्वादिभ्यो ण्य'इति ण्यः तत्र वामरथस्य कण्वादिवत् स्वरवर्जमिति पठ्यते । तस्यायमर्थः । वामरथ्यशब्दस्य गर्गाद्यन्तर्गतस्य यञन्तस्य काण्वादेर्यत् कार्यं तद्भवति स्वरं वर्जयित्वेति तेन 'यञञोश्चे'ति गोत्रबहुत्वे विधीयमानो लुगस्यापि भव-ति । वामरथाइति । तथात्रायं 'प्राचां ष्फ तद्धित'इति स्त्रियां विधीयमानो ङीष्फश्चास्यापि भवतः । वामरथः । वामरथ्यायनी । ष्फस्य षित्त्वान् ङीष् । 'हलस्तद्धितस्ये'ति यलोपः ॥ 'यस्येति चे'त्यल्लोपः । तथा यूनि'यञञो-श्चे'ति विधीयमानष्फगत्रापि भवति । वामरथ्यायन इति । आपत्यस्येति यलोपः तत्रैव अनातीति निषेधाच भवतीति । तथा 'सङ्घाङ्कलक्षणेष्वञ्यञि-ञामण्'इति यञान्तात् सङ्घाङ्कलक्षणेषु विधीयमानोऽण् अस्मादपि भवति । वामरथानि संङ्घाङ्ककरणानीति । तत्र घोषग्रहणं चोदितं, तेन वामरथो घोष इत्यपि भवति । आपत्यस्येति यलोपः । तथा 'कण्वादिभ्यो गोत्र'-इति गोत्रापत्यवाचिभ्यः कण्वादिभ्यो विधीयमानोण् अस्मादपि भवति ।

व्रामरयाः छन्नाः । स्वरवर्जमित्युक्तत्वात् 'ञिनत्यादिर्नित्य'मिति प्रकृतेराद्यु-दात्तत्वं न भवति प्रत्ययस्वर एव भवति ॥ ८०४ ॥

षद्लृ विशरणगत्यवसादनेषु ॥ अयं शदिश्चास्य चानुदात्ता उदात्तेतः। सीदति । 'पाघ्राध्मास्थाम्नादाण्दृश्यर्त्तिसर्त्तिशदसदां पिबजिघ्रधमतिष्ठम-नयच्छपश्यर्च्छधौशीयसीदा' इति शिति प्रत्यये परे यथासंख्यात् सदेः सीदादे-शः । ससाद । सेदतुः । ससत्थ । सेदिथ । थलि भारद्वाजनियमादिट्पक्षे 'थलि च सेटी'त्येत्वाभ्यासलोपौ । सेदिव । सेदिम । क्रादिनियमाचित्यमिट् । सत्ता । सत्स्यति । असीदत् । सीदेत् । सद्यात् । असदत् । लृदित्वादङ् । सिषत्सति । सासद्यते । भावगर्हायां लुपसदेति यङ् । सासत्ति । लङि सिपि 'दश्चे'ति वा रुत्वम् असासः । सादयति । असीषदत् । निषीदति । 'सदिरप्रते'रिति अप्रतेरिणन्तादुपसर्गात् परस्य षत्वे न्यषीदत् । 'प्राक्-सितादड्व्यवायेपी'ति षत्वम् । निषिषत्सति । न्यषीषददित्यत्र स्यादिव्य-भ्यासेन चेत्युभयत्र षत्वम् । यद्वाभ्यासस्य 'सदिरप्रतेः' । 'प्राक्सितादड्व्य-वायेपी'ति षत्वम् । उत्तरस्य त्विणकोरिति । निषसादेत्यत्र तु 'सन्दिस्व-ञ्जयोः परस्य लिटी'ति उत्तरखण्डस्य षत्वनिषेधः । निषेदतुरित्यादौ अभ्यासस्य लोपे सति अभ्यासात् परत्वाभावाचायं निषेधः । सेदिवान् । 'भाषायां सदवसश्रुव'इति भूतसामान्ये वा लिट् तस्य च क्वसुः । अस्मादेव वचनात् भूतसामान्ये सदादिभ्यो लिडनुमीयते । इदं च अनुमानं विक-ल्पेन अस्य च लिटो नित्यं क्वसुरिति न तिङां श्रवणं नापि लुङो धातुसा-मान्यविहितस्य सदादिविशेषविहितेनानेन बाधः । न च सदादौ भूतसामान्ये सावकाशस्यास्य लिटः 'अनद्यतने लङ्' 'परोक्षे लिडि'ति भूतविशेषवि-हिताभ्यां बाधः, तद्विधानेप्यस्यानुवर्त्तनादिति भाष्यादौ स्थितम् । क्रादि-नियमादिट् उगित्वान्नुम् । सान्तमहत इति असंबुद्धौ सर्वनामस्थाने दीर्घ सोर्हल्ङ्याब्भ्य इति लोपः । सकारस्य संयोगान्तत्वात् लोपः । 'भसंज्ञायां वसोः संप्रसारणे 'संप्रसारणाच्चे'ति पूर्वत्वे परस्य आसेदुषइत्यादि, संप्रसारण-विषये नेडागमः प्रवर्त्तते । पश्चात् निमित्तविघातो भविष्यतीति हलादौ वसुस्रंसुध्वंस्वित्यादिना दत्वे आसेदिवद्भ्यामिति । परिषत् । सत्सूद्विषेति क्विप् ।

पर्षच्छब्दस्तु पृषोदरादित्वात् परेः इकारलोपे पर्षदा कृतं परिषदा कृतं, पारिषदकम् । 'कुलालादिभ्यो वुञि'ति तेन कृतमिति विषये वुञ् । परिषद इदं पारिषदम् । 'पत्राध्वर्युपरिषदश्चे'ति तस्येदमर्थे । परिषद्वलः । 'रजःकृष्यासुतिपरिषदो वलच्'इति मत्वर्थे वलच् । परिषदं समवैति, तत्र साधुर्वा पारिषद्यः । 'परिषदो ण्य'इति योगाभ्यां समवैति तत्र साधुविषयो ण्यः । एकदेशविकृतस्यानन्यत्वात् कृतेकारलोपस्याप्येते प्रत्यया भवन्ति । तथा च भाष्ये एङ्प्रोङित्यत्र पार्षदकृतिरेषा तत्र भवतामिति तथा संपति पर्षद्वलोत्कमिति भारते वलच् । भट्टिकाव्ये पर्षद्वल इति वलच् दृश्यते । दिविषत् । पूर्ववत् क्विप् 'तत्पुरुषे कृति बहुल'मिति अलुक् । सुषामादिपाठात् षत्वम् । बहुलग्रहणात्, लुकि द्युसत् । 'दिव उदि'ति पदत्वे उत्वम् । सदः । सादः । निषीदत्यस्मिन् पापमिति निषादः । 'हलश्चे'ति अधिकरणे घञ् । उपसर्गस्य घञीति दीर्घः तत्रैव अमनुष्य इति प्रतिषेधान्न भवति । निषादस्यापत्यं, नैषादकिः । 'अत इञ्' । सुधातृव्यासवरुडनिषादेति अकङादेशः । सद्रुः । दाधेट्सिशदसदो रुः । तच्छीलादौ रुः । निषद्या । संज्ञायां समजेत्यादिना स्त्रियामकर्त्तरि क्यप् । सदः । असुन् । सत्रं, हुयामाश्रुभसिभ्यस्त्रन्निति, त्रप्रत्ययः । पापं चिकीर्षति, सत्रायते । सत्रकक्षेत्यादिना कण्वचिकीर्षायां क्यङ् । कण्वं पापं, सत्रादयो वृत्तिविषये पापार्था इत्युक्तम् । निषद्वरः कामकर्दमे नो सदेति वरच् । सद्म । मनिन् । सूकरसद्मन इमे सौकरसद्माः । नान्तस्य टिलोप इत्यादिना अन्निति प्रकृतिभावापवादः टिलोपः । सादिः । वपिवदिराजिधृभिसहिनिवाशिषदिवृजभ्य इतीञ् प्रत्ययः । अयं तुदादावपि । उभयत्र पाठे प्रयोजनं उत्कृतिवक्ष्येयम् । चुरादौ चायम् ॥ ८०५ ॥

शद्लृ शातने ॥ अत्र मैत्रेयः ॥ शद्लृ विशातने । विशीर्णतायां वर्त्तते शातनं विषयभावेन निर्दिश्यते प्रसिद्धत्वादिति । शीयते । पाघ्रादिसूत्रादिना शीयादेशः । 'शदेः शित' इति शिद्भाविनोऽस्मात्तङ् । शशाद । शेदतुः । शशत्थ । शेदिथ । शेदिव । क्रादिनियमादिट् । थलि भारद्वाजनियमादिड्विकल्पः । शत्ता । शत्स्यति । शीयताम् । अशीयत ।

शीयेत । आशिषि शद्यात् । अशदत् । लृदित्वादङ् । शिशत्सति । शिद्भावे च शादिरात्मनेपदनिमित्तं केवल इति प्रकृतेरतङ्निमित्तत्वात् 'पूर्ववत्सन' इति न भवति। शाशद्यते । शाशत्ति । शातयति 'शदेरगतौ त' इति यो तत्वं गतौ तु शादयते गोपालक इति तत्वं न भवति । अयमेव गतौ तत्वप्रतिषेधो गत्यर्थत्वे प्रमाणम् । सादः । शादः । शाद्वलम् । 'नडशादाड्ड्वलजि'ति वलच् चातुरर्थिकः, डित्वाट्टिलोपः ॥ शद्रुः । दाधेट्सिशदसदो रुः । शातयतीति शत्रुः । शृशदिभ्यां चुविति चुन् । बाहुलकात् णेर्लोपो वृद्ध्यभावश्चेति प्रत्ययलक्षणेन णिजिनमित्तं तत्वम् ॥ ८०६ ॥

क्रुश आह्वाने रोदने च ॥ सदादयस्त्रयोऽनुदात्ता उदात्तेतः । तथा च व्याघ्रभूतिः । शदिं हदिं स्कन्दिमिदिच्छिदिंतुदीः शदिं सदिं स्वद्यतिपद्यती स्विदिं नुदिं विद्यति विदइत्यपि प्रतीहि दान्तान् दशपञ्च चानिटः । दिशिं दृशिं दंशिमथो स्पृशिं मृशिं रुशिं रिशं क्रोशतिमष्टमं विशिं लिशं च शान्ताननिटः पुराणगाः पठन्ति पाठेषु दशैव नेतरान् ॥ क्रोशति । चुक्रोश । चुक्रुशतुः । चुक्रोशिथ । चुक्रुशिव । चुक्रुशिम । क्रादिनियमादिट् । क्रोष्टा । क्रोक्ष्यति । क्रोशेत् । आशिषि क्रुश्यात् । अक्रुक्षत् । शल इगुपधेति क्सः । चुक्रुक्षति । 'हलन्ताच्चे'ति किन्त्वं चोक्रुश्यते । चोक्रोष्टि । द्वौ चोक्रुष्टः । धित्वषत्वठत्वजश्त्वानि । लङि तिप्सिपोः अचोक्रोट् । क्रोशयति । अचुक्रुशत् । आक्रोशकः । 'देविक्रुशोश्चोपसर्ग'-इति तच्छीलादौ वुञ् । हे क्रोष्टो । सितनिगमीत्यादिना तुन् । अस्य 'तृज्वत् क्रोष्टु'रिति असंबुद्धौ सर्वनामस्थाने तृजन्तरूपातिदेशात् क्रोष्टा क्रोष्टारावित्यादि । शसि क्रोष्टून् । अन्यत्र 'विभाषा तृतीयादिष्वची'ति तृज्वद्भावविकल्पनात् क्रोष्ट्रा । क्रोष्टुनेत्यादि । आमि नुमचिरतृज्वद्भावेभ्यो नुट् पूर्वविप्रतिषेधेनेति नुटि अनजादित्वात् तृज्वद्भावाभावे क्रोष्टूनामिति भवति । क्रोष्ट्री । 'स्त्रियां चे'ति तृज्वद्भावः । मतिबुद्धीत्यत्र चकारस्य अनुक्तसमुच्चयार्थत्वादाक्रुष्टः । वर्तमाने क्तः । क्रोशः । क्रुशः । भावे इगुपधत्वात्कः ॥ ८०७ ॥ (शेषमये)

॥ श्रीः ॥

॥ श्रीं नमः श्रीमते भगवते रामानुजाचार्याय ॥

अथ श्रीभाष्यं विशिष्टाद्वैतपरं रामानुजदर्शनम्

श्रुतप्रकाशिकासमेतं विषमपदटिप्पणीसहितम्

तत्र प्रथमाऽध्यायस्यावशेषः ।

(*Continued from page* 416. VOL VII.)

ननु 'प्रशान्तचित्ताय शमान्विताये''ति शमादेः पूर्ववृत्तत्वं प्रतीयते। न। श्रवणोपयोग्यवधानमात्रस्य विवक्षितत्वात्। नात्रोपासनाङ्गभूतात्यन्तविषयवैतृष्ण्यं विवक्षितं, तद्धि शमदमाद्युपेतः स्यादिति निरूपयिष्यते। अतो निरूप्यसंपाद्यैस्तैर्निरूपणात् प्रागेव विशिष्टत्वमनुपपन्नं, श्रुतिश्च शास्त्रजन्यज्ञानवतः पुरुषस्य तदुत्तरभाविशमाद्यङ्गकमुपासनं दर्शयति। "तस्मादेवंविच्छान्तो दान्त उपरतस्तितिक्षुः समाहितो भूत्वाऽऽत्मन्येवाऽऽत्मानं पश्येदि''ति अत्र ह्येवंविदिति शास्त्रजन्यज्ञान[1]त्वमुक्तं भूत्वा पश्येदित्युपासनस्य शमाद्यङ्गकत्वं ज्ञापितम्। केवलानन्तस्थिरफलपरवाक्यान्युदाहरति ॥ "ब्रह्मविदि''ति।

भू० "ब्रह्मविदाप्नोति परं, न पुनर्मृत्यवे, तदेकं पश्यति, न पश्यो मृत्युं पश्यति, स स्वराड्भवति, तमेव विद्वानमृत इह भवति, तमेव विदित्वाऽतिमृत्युमेति, नान्यः पन्था विद्यते अयनाय पृथगात्मानं प्रेरितारं च मत्वा जुष्टस्ततस्तेनामृतत्वमेती''त्यादीनि ।

टी० ॥ अत्रानुवाके यतो वाचो निवर्तन्त इति श्रवणादनन्तस्थिरफलत्वसिद्धिः । प्राप्यस्य ब्रह्मणोऽनन्तस्थिरत्वेपि प्राप्तेः कादा-

१ शास्त्रजन्यज्ञानवत्त्वमित्यर्थः ।

चित्कत्वशङ्काव्यावृत्त्यर्थमपुनर्निवृत्तिमाह "न पुनरि"ति । यद्वा विद्यया-ऽनन्तास्थिरफलरूपब्रह्मप्राप्तिमाह "ब्रह्मविदि"ति । विद्यया ब्रह्मप्राप्तेः प्रतिबन्धनिवृत्तिपूर्वकत्वमाह "न पुनरि"ति । मृत्युः—प्रमादः, मोहो वा "मोहो मृत्युः संमतो यः कवीनां प्रमादं वै मृत्युमहं ब्रवीमी"त्युभयत्र मृत्युशब्दव्यपदेशात् । प्रमादो यथाऽवस्थितात्मस्वरूपाऽज्ञानं, मोहो-भ्रान्तिज्ञानं, दिङ्मोह इत्यादिव्यपदेशात् । न मृत्युनिवृत्तिमात्रमेव तत्कार्यमपि[1] निवर्त्ततमित्याह "न पश्यो मृत्युं पश्यती"ति । अस्य वाक्य-स्योपरि "न रोगं नोत दुःखताामि"ति हि श्रूयते । न पुनरित्यादिवाक्यं ब्रह्मणि दृष्टे मृत्युप्रमुखनिवृत्तिरिति ज्ञापनार्थं न पश्यो मृत्युमित्यत्रापि पश्य—शब्दस्य ब्रह्मदर्शीत्यर्थः । तदेकं[2] पश्यतीत्यनन्तरोदाहृतवाक्ये विष-यस्य दर्शितत्वात् "स स्वराड् भवती"ति कर्मवश्यो न भवतीत्यर्थः । स्वराट् स्वतन्त्रो विज्ञेय इति नैघण्टुकाः । तमेव[3] विद्वानिति वाक्येन निर्विशेषचि-न्मात्रज्ञान—देवतान्तरोपासनाद्युपायान्तरव्यावृत्तिसिद्धिः । पुरुषोत्तमोपास-नस्यैवोपायतयोक्तत्वात् तदुपासनरूपज्ञानं च नात्मैक्यविषयमपि तु पृथ-क्त्वविषयमिति दर्शयति "पृथगात्मानमि"ति । ततः—पृथक्त्वज्ञानात् तेन जुष्टः—प्रीतिविषयीकृतः अनुगृहीतो ऽमृतत्वमेतीत्यर्थः । इत्यादीनि वेदान्त-वाक्यानीति पूर्वेणान्वयः । उदाहृतस्पष्टार्थवाक्यमात्रतृप्तः कश्चिच्चोदयति "ननुचे"ति ।

मू० ननु च साङ्गवेदाध्ययनादेव कर्मणां[4] स्वर्गादिफलत्वं स्वर्गादीनां च क्षयित्वं ब्रह्मोपासनस्याऽमृतत्वफलत्वं च

---

१ तत्कार्यमपि निवर्तत इत्याहेति युक्तः पाठः ।

२ तदेव पश्यतीति पुस्तकान्तरपाठः ।

३ निर्विशेषचिन्मात्रज्ञानस्य मोक्षोपायत्वे "तमेव विद्वानि"ति कर्तृकर्मभावप्रदर्श-नानुपपत्तिरित्याशयः ।

४ नारायणपदस्य श्रुतिस्वस्य चिदचिच्छरीरकदेवतासार्वभौमपरतया देवतान्तर-परपदान्तराणां च नारायणसमर्पकतायाः सौष्ठवेनैव संभवा'त्त'मिति पदेन नारायण-परेण देवतान्तरव्यावृत्तिरर्थतः फलतीति भावः ।

ज्ञायते एव, अनन्तरं मुमुक्षुर्ब्रह्मजिज्ञासायामेव प्रवर्त्ततां किमर्था धर्मविचारापेक्षा ।

टी० ॥ पूर्वत्र चोद्यान्तराणां कण्ठोक्त्यभावेपि परिहारकण्ठोक्त्या तान्यभिप्रेतानि, अतश्च-शब्देन तैरर्थसिद्धैः सह समुच्चयो युक्तः । 'साङ्गे'ति कर्मज्ञानपूर्वप्रवृत्तत्ववादिनापि साङ्गाध्ययनस्यापेक्षितत्वं स्वीकृतमिति तदधिकव्युदासार्थं एवकारः । अध्ययनस्य साङ्गत्वादङ्गानां चार्थज्ञानहेतुत्वान्मीमांसानिरपेक्षं स्वर्गादेरेव केवलकर्मफलत्वं स्वर्गादेश्च क्षयिष्णुत्वं ब्रह्मोपासनस्याक्षयफलत्वं च ज्ञायते इत्यर्थः । ब्रह्मोपासनस्येत्यादि ग्रन्थो दृष्टान्ताभिप्रायः । ज्ञायत एवेत्येवकारो ज्ञातत्वसंप्रतिपत्तिसूचकः । ज्ञानसामग्री हि सिद्धेति भावः । ततः किमित्यत्राह "अनन्तरमि"ति । कर्मणोऽल्पास्थिरफ[1]लत्वज्ञानेन मुमुक्षासिद्ध्यर्थो हि कर्मविचारः तन्निरपेक्षमेवाल्पास्थिरफलत्वज्ञानान्मुमुक्षासिद्धे ब्रह्मजिज्ञासैव कर्त्तव्या धर्मविचारे प्रयोजनाभावादित्यर्थः । परिहरति-

सू० एवं तर्हि शारीरकमीमांसायामपि न प्रवर्त्ततां, साङ्गाध्ययनादेव कृत्स्नस्य ज्ञातत्वात् । सत्यम् । आपाततः प्रतीतिर्विद्यते एव, तथापि न्यायानुगृहीतस्य वाक्यस्यार्थनिश्चायकत्वादापाततः-

टी० ॥ "एवमि"ति । एवं तर्हि उदाहृतवाक्यमात्रतृप्तोसि चेत् । कृत्स्नस्येति-ब्रह्मणोपीति भावः । वेदान्तवाक्यान्यपि स्फुटार्थानि ह्यस्माभिरुदाहृतानि तेषामर्थोपि मीमांसानपेक्षं ज्ञायते अतोऽनन्तस्थिरफलज्ञानाय न ब्रह्मविचारः कर्त्तव्य इत्यर्थः । सत्यमित्यर्द्धाङ्गीकारे । आपातप्रतीताबभ्युपगमः, ब्रह्मविचारे नैरपेक्ष्येऽनभ्युपगमः "आपाते"ति । आपातप्रतीतिरज्ञाननिवृत्तिमात्रेण संशयविपर्ययसहं ज्ञानम् । संशयविपर्ययौ च कारणवाक्यगतसद्ब्रह्मात्माकाशप्राणवैश्वानरादिशब्दैरर्थतत्त्वस्य दुर्निश्चयत्वात् "विज्ञा-

[1] कर्मणोऽल्पास्थिरफलत्वाज्ञानेनेति पुस्तकान्तरपाठो युक्तः ।

नघन एवैतेभ्यो भूतेभ्यः समुत्थाय तान्येवानु विनश्यति" "असद्वा इदमग्र आसीदि"त्यादिभिरात्मानित्यत्वादिप्रतीतेः "अन्नवानन्नादो भवति महान् भवति प्रजया पशुभिर्ब्रह्मवर्चसेने"त्यादिनाऽल्पास्थिरफलत्वावगमाच्चे स्याताम्। अतः साङ्गाध्ययनमात्रेण तयोरनतिवृत्तेस्तन्निरासस्य न्यायानुगृहीतवाक्यफलत्वाच्च ब्रह्मविचारः कर्त्तव्य इति चेदित्यर्थः। भवान्—अनुदाहृतवाक्यान्तरपर्यालोचनायामपि प्रवृत्तस्त्वमिति भावः। तथैव एतया दृष्ट्याऽत्रापि संशयविपर्ययनिरासस्यापेक्षितत्वं जानन्ननुदाहृतवाक्यानि पश्येदित्यर्थः। "अक्षय्यं ह वै चातुर्मास्ययाजिनः सुकृतं भवति" "पूर्णाहुत्या सर्वान् कामानवाप्नोति सर्वान् लोकान् पशुबन्धयाज्यभिजयति" "अपाम सोममृता अभूम "अनन्तं ह वा अपारमक्षय्यं लोकं जयति योऽग्निर्नाचिकेतं चिनुते नास्येष्टापूर्तं क्षीयते योऽग्निर्नाचिकेतं चिनुत" इत्यादीनि हि अमृतत्वं भजन्ते, सोऽश्नुते सर्वान् कामान्, इमान् लोकान् कामान्नी कामरूप्यनुसंचरन्नित्यादिभिर्ब्रह्मवेदनफलवाक्यैस्तुल्यानि वाक्यानि दृश्यन्ते अत औपनिषदवाक्येष्विवानुदाहृतवाक्येषु संशयविपर्ययबाहुल्यात्तन्निरासाय कर्मविचारः कर्त्तव्य इत्यर्थः।

मू० प्रतीतोप्यर्थः संशयविपर्ययौ नातिवर्त्तते। अतस्तन्निर्णयाय वेदान्तवाक्यविचारः कर्त्तव्य इति चेत्, तथैव धर्मविचारोऽपि कर्त्तव्य इति पश्यतु भवान्।

ननु च ब्रह्मजिज्ञासा यदेव नियमेनापेक्षते, तदेव पूर्ववृत्तं किंचिद् वक्तव्यम्, न धर्मविचारापेक्षा ब्रह्मजिज्ञासायाः, अधीतवेदान्तस्यानधिगतकर्मणोऽपि वेदान्तवाक्यार्थविचारोपपत्तेः।

टी० ॥ एवं फलद्वारा ज्ञानाय कर्मज्ञानापेक्षा दर्शिता। अथ स्वरूपेणोपादानाय च नियमेन कर्मज्ञानापेक्षास्तीति दर्शयितुं मुमुक्षोः कर्मणो नियमेनानपेक्षितत्वलक्षणं परपक्षमुपक्षिपति"ननु चे"ति। नियमेनापेक्षित-

त्वस्य विवक्षितेतरगामित्वव्युदासार्थः प्रथम एवकारः द्वितीयस्तु नियमेनानपेक्षितस्य पूर्ववृत्तत्वनिवृत्त्यर्थः, ततः किमित्यत्राह "न धर्मे"ति । कुत इत्यत्राह "अधीते"ति । ये ब्रह्मविद्याधिकारिणस्तेषां सर्वेषामवश्यापेक्षितं हि नियमेनापेक्षितं वेदान्तमात्राध्यायिनस्तु तत्रैवापातप्रतीतिर्बुभुत्सा च स्यात् तस्य कर्मविषयापातप्रतीत्यभावात् न कर्मविचारस्य नियमेनापेक्षेत्यर्थः । यद्वा अधीतकृत्स्नवेदस्यापि जन्मान्तरसुकृतवशाद्वेदान्तवाक्य एव बुभुत्सा जायते चेत्तस्य न कर्मविचारापेक्षेति तदा "अधीतवेदान्तस्ये"ति पदमयोगव्यवच्छेदपरं नत्वन्ययोगव्यवच्छेदपरं कृत्स्नवेदाध्ययनादपेक्षितवेदान्तभागोप्यधीत एवेत्यर्थः । (शेषमग्रे)

॥ श्रीः ॥

॥ परिभाषेन्दुशेखरस्याकाण्डताण्डवम् ॥

(Continued from page 264. Vol. VII.)

किं च "यदयं क्ङिसनौ क्ङितौ करोति तेन ज्ञायते भवत्युपधालक्षणस्य प्रतिषेध" इति भाष्यस्या(१)यं भावः । पर्युदासरीत्यान्वयस्यैव लाघवादिनौचित्येन तत्कल्पे क्ङिति चेत्यस्य कारकविभक्तित्वस्वीकारे क्ङिदव्यहितपूर्वत्वविशिष्टवर्णावृत्तीक्पदप्रये,ज्यदृश्यतानिरूपितगुणादिनिष्ठविधेयताप्रयोजकपदघटिते शास्त्रे क्ङिन्निव इत्युपतिष्ठत इत्यर्थो वाच्यः, एवं च पुगन्तेत्यस्य तथाविधशास्त्रत्वाभावात्तदनुपस्थितौ क्षिप्रुरित्यादौ गुणप्रवृत्तौ क्ङः कित्त्वं व्यर्थमिति तत्सामर्थ्यात् पुगन्तेत्यस्य तथाविधशास्त्रत्वाभावेऽपि तत्र तत्पदोपस्थितिरिति कल्पनीयमिति ।

तथा च तत्पदोपस्थितावपि क्ङिन्निवसार्वधातुकार्धधातुकपरत्वविशिष्टस्येक इत्यादिक्रमेणैव पुगन्तेत्यस्यार्थस्संपद्येत, ततश्च न दण्डतीत्यत्र निषेधप्रत्याशा, किदादिभेदस्य तृजादिप्रत्ययेऽक्षतत्वात् ।

---

(१) इदमपि भाष्यं प्रथमाध्यायप्रथमपादतुरीयाह्निकान्तर्गतक्क्ङिति चेति सूत्रव्याख्यानपरमेवेति बोध्यम् ॥

किं च तन्निमित्तग्रहणेऽपि शयितेत्यादौ निषेधस्य प्रकृतिमात्रापेक्षतया गुणस्य प्रकृतिप्रत्ययोभयापेक्षतयाऽन्तरङ्गनिषेधदृष्ट्या निषेधस्य बहिरङ्गस्याभावेन कथं निषेधः प्रवर्त्तेत ।

अरिरिषतीत्यत्र दोषाभावस्त्वनुपदोक्ते केचित्स्वित्यादिग्रन्थे उक्त एव दिव्धातोः सनि दिद्यूषतीत्येव[1] रूपम् ।

प्रकृतपरिभाषासत्त्वेऽपि तत्र सांभावनिककार्यानुभवकर्त्तृत्वनिवेशे मानाभावात् ।

यङि चेतिसूत्रस्थभाष्यविरोधाच्च[2] ।

अत एवद्विर्वचनेऽचीतिसूत्रे पूर्वविप्रतिषेधस्य सूत्रारम्भवादिना दोषवादि प्रदर्श्य तिरस्कारः कृतः, उक्तरूपस्यानिष्टत्वे तु तदनिष्टं प्रदर्श्यैव सिद्धान्ती पूर्वविप्रतिषेधं निराकरिष्यत्[3] ।

न च पूर्वविप्रतिषेधस्य नान्तरङ्गबाधकत्वमत एव बिभवनीयिषतीत्यादौ न दोष इति प्रकृतेऽप्यन्तरङ्गत्वाग्रहणः प्रवृत्तौ नास्ति दोष इति सिद्धान्त्याशय इति वाच्यम् ।

सर्वविधान्तरङ्गाबाधकत्वे चक्रतुरित्यादौ यणोऽपि बाधापत्तौ प्राक्कालप्रवृत्तिकत्वरूपान्तरङ्गत्ववतोऽबाधस्यैव भाष्यकृत्तात्पर्य्यगोचरतया प्रकृते समकालप्राप्तिकान्तरङ्गस्य यणो द्वित्वेन बाधस्याप्रतिबद्धतया तदनिष्टाप्रदर्शनस्य तदिष्टत्वमात्रशरणत्वात् ।

(१) यद्यपि द्विर्वचनेऽचीत्यत्र भाष्यकारेणैव कृत्येजन्तदिवादिनामधातुष्वभ्यासरूपं न सिध्यतीति वार्त्तिकमुपक्रम्य दुद्यूषतीत्येव रूपमिति स्पष्टमेवाभिहितम् । तथापि प्रकृतभाष्यमनेकभाष्यविरोधाद्वाचराथतात्पर्य्यकमिति बोधनाय शिष्यबुद्धिवैशद्यायैवमुक्तिः । किं च प्रकृतपरिभाषाया अनाश्रयणेऽपि दुद्यूषतीत्यत्रोठ ऊकारं द्वित्वनिमित्ततयाऽऽश्रित्य न द्विर्वचनेऽचीत्यस्य प्रवृत्तिः । प्रत्ययावयवस्यैवाचः प्रकृतसूत्रस्याचपदेन ग्रहणादिति स्पष्टं तत्रैव भाष्य इति दिक् ॥

(२) एतत्सूत्रस्थं भाष्यं तद्विरोधश्च प्रकृतपरिभाषाविवरणपरेणैव प्रागुपपादितेन ग्रन्थेनावसेयः ॥

(३) पूर्वविप्रतिषेधकल्पे यणः पूर्वमेव द्वित्वस्य प्रवृत्तौ दिद्यूषतीत्येव रूपं प्राप्नोति सूत्रारम्भपक्षे तु द्वित्वनिमित्ततयोठोऽग्रहणात् स्थानिवद्भावाप्रवृत्तावन्तरङ्गत्वाद् यणि कृते द्वित्वे दुद्यूषतीत्येव प्राप्नोतीति लक्ष्यस्यैव महद् वैलक्षण्यमिति भावः ॥

Digitized by Google

साम्भावनिककार्यानुभवकर्तृत्वस्य परिभाषाप्रवृत्त्यप्रयोजकत्वादेव "सन्यङोरित्यस्य षष्ठ्यन्तत्वस्वीकर्तृणापि हन्तेर्यङ इटपत्ते इटो द्विर्वचनं वक्तव्यं यस्मिन्नपि द्विर्वचनं यस्यापि द्विर्वचनं सर्वोऽसौ द्विर्वचननिमित्तमि"-त्यादि षाष्ठप्रथमपादप्रथमाह्निकान्तःस्यसन्यङोरितिसूत्रस्थं भाष्यं संगच्छते।

(१)अपि च द्विर्वचन इत्यत्रत्यल्युडादेर्विवरणोक्तद्वित्वनिमित्ताजादि-प्रत्ययनिमित्ताच आदेशो द्वित्वात् प्राङ्न प्रवर्त्तेत इत्यर्थसंपत्तये निमित्तत्वा-र्थकत्वे द्विर्वचनपद एकशेषे चुत्तावयिषतीत्यत्र दोषदानपरभाष्यस्य तदर्थे स्वातन्त्र्येण णौ स्थानिवद्वचनस्यौःप्वितितज्ज्ञापकस्य च प्रदर्शनपरभाष्यस्य चासङ्गतिः । उक्तरीत्या णेरपि द्वित्वनिमित्ततया तन्निमित्तस्य वृद्ध्यादेर्द्वि-त्वात् प्राग् द्विर्वचनेऽचीत्यनेनैव निषेधात् ।

अपि चाचिकीर्त्तदित्यत्र द्विर्वचनेऽचीत्यस्य प्रवृत्तेरुक्तत्या द्वित्वात् प्रागुपधाकार्यानुपपत्तिः ।

(२) किं च दधित्रपुसं प्रत्यक्षो ज्वर इत्यादिभाष्यपर्यालोचनया ल्युटो निमित्तत्वार्थकत्वस्य कथं चित् प्रतीतावपि सप्तम्या निमित्तत्वार्थकत्वे-मानाभावेन विवरणोक्तोऽप्यर्थो भाष्यस्योपलक्षणतयैव लभ्य इति तद्दृ-ष्टान्तपरं भाष्यं फलसिद्धिमात्रतात्पर्यकमिति निर्दोष उक्त एव सूत्रार्थः किमिति नाङ्गीक्रियते ।

यद्यपि द्वित्वनिमित्तत्वं द्वित्वविधायकशास्त्रघटकपदप्रयोज्यविष-यतापर्याप्त्यधिकरणत्वम्, तादृशप्रत्ययनिमित्तत्वं च तादृशप्रत्ययाव्यवहित-पूर्ववृत्तिपर्याप्तोद्देश्यताप्रयोजकपदघटितशास्त्रविधेयत्वं प्रतिषेध्येऽजादेश इतिविवरणकाराशयोऽवयन ऊर्णुनविषतीत्यत्र द्वित्वविधायकसन्यङोरित्ये-तद्घटकसन्पदप्रयोज्यसन्त्वावच्छिन्नविषयतापर्य्याप्त्यधिकरणेसशब्दाव्यवहित पूर्ववृत्त्यूर्णुशब्दपर्य्याप्ताङ्गत्वावच्छिन्नोद्देश्यत्वप्रयोजकाङ्गादिपदघटित-सार्वधातुकेतिशास्त्रविधेयस्य गुणस्य, जग्मतुरित्यत्र तादृशगमादिपदघटित-

(१) द्विर्वचनेऽचीत्यस्य विवरणोक्तार्थेऽङ्गीक्रियमाणेऽरिरिषत्याद्यर्थं परिभाषाऽप्या-श्रयणी स्यादिति विवरणोक्तं प्रकृतसूत्रस्यार्थमेव दूषयितुमुपक्रमते ॥

(२) केचित्त्वित्यादिनान्योक्तं द्विर्वचनेऽचीतिसूत्रस्यार्थे भाष्यविरोधं परिहरति ॥

Digitized by Google

शास्त्रविधेयस्योपधालोपस्य, चक्रतुरित्यत्र तथाविधैकपदघटितशास्त्रविधेयस्य यणश्च प्रवृत्तिः प्रतिषिद्धा भविष्यति, चुक्षावयिषतीत्यत्र तु द्वित्वविधायकसन्यङोरित्येतद्घटकसन्पदप्रयोज्यविषयतापर्य्याप्त्यधिकरणेसशब्दाव्यवहितपूर्ववृत्तिपर्य्याप्तोद्देश्यत्वप्रयोजकत्वस्याचो ञ्णितीति शास्त्रघटके कस्मिन्नपि पदेऽसत्त्वात्तद्घटितविधेयवृद्धेः प्रतिषेधो न प्राप्नोतीत्युक्तभाष्य[1]मपि संलग्नम्। अरिरिषतीत्येतदर्थं परिभाषाप्यावश्यकीति न कोऽपि दोषः।

तथापि मणिमन्त्रन्यायेनैव विवरणाशयस्य कल्पनीयत्वे लाघवसहकृतस्य परिभाषाऽकरणविषयकतात्पर्यस्यैव कल्पनमुचितं न तु परिभाषारम्भतस्मिंश्चेतिपरिभाषाबाधादिगौरवसहिष्णुतात्पर्यस्य।

किं च परिभाषास्वीकारे जेघ्रीयतइतिभाष्यस्य[2]एकदेशिप्रातिशाख्यमतानुसारित्वं वाच्यं तदनङ्गीकारे त्ववीत्यस्याभावे षाष्ठभाष्य[3]रीत्या घ्रायशब्दस्य द्वित्वकार्यानुभवेऽपि यदव्यवहितपूर्वस्य द्वित्वकार्यानुभवस्तदुपश्लिष्टस्याच आदेशो द्वित्वात् प्राक् प्रवर्त्तेत इत्यर्थकस्य प्रवृत्तेर्न वतिर्यकारस्य द्वित्वेऽपि तदुपश्लिष्टस्य घ्राशब्दस्यापि द्वित्वकार्य्यानुभवात्।

अरिरिषतीत्यत्र तु न ऋशब्दस्य द्वित्वकार्यानुभवोऽपि त्विष्शब्दस्यैवेति न तत्र प्रवृत्तिः।

एतेन कार्यानुभवितृत्ववच्छ्रूयमाणत्वस्यापि कार्यिविशेषणतया जेघ्रीयत इत्यत्रत्ययकारस्याभ्यासेऽश्रूयमाणतयाऽरिरिषतीत्यत्र चेकारस्याभ्यासे श्रूयमाणतया परिभाषास्वीकारे षाष्ठरीत्य[4]वलम्बनेऽपि तद्भाष्यं[5] सुयोजमिति वदन्तः समाहिताः।

उक्तविशेषणस्य गौरवातिरिक्तफलस्यानुपलम्भादप्रामाणिकत्वाच्च।

अत्र यत्प्रत्ययाव्यवहितस्य द्वित्वकार्य्यानुभवः स द्वित्वविधायक-

(१) प्रथमाध्याय प्रथमपादाष्टमाह्निकान्तर्गतद्विर्वचनेऽचीतिसूत्रस्थं णौ स्थानिवदित्यस्य ज्ञापकफलादिप्रदर्शनपरं भाष्यमित्यर्थः॥

(२) द्विर्वचनेऽचीति सूत्रस्यस्य प्रकृतसूत्रस्याव्यापकत्वप्रत्युदाहरणप्रदर्शनपरस्येत्यर्थः॥

(३) प्रथमसूत्रव्याख्यानपरभाष्येत्यर्थः॥

(४) नटभार्यावद् व्यञ्जनानीति प्रागुक्तरीतीत्यर्थः॥

(५) जेघ्रीयतइत्यस्याव्याप्तिप्रत्युदाहरणत्वप्रदर्शनपरं प्रथमाध्यायप्रथमपादाष्टमाह्निकान्तर्गतं द्विर्वचनेऽचीतिसूत्रस्थं भाष्यमित्यर्थः॥

Digitized by Google

शास्त्रघटकपदप्रयोज्यविषयतापर्य्याप्त्याश्रय एव विवक्षितः प्रत्यासत्तेस्तेन न चुक्षावयिषतीत्यत्रत्यभाष्येण(1) विरोधः ।

इत्थं च द्विर्वचनेऽचीत्यस्य द्वित्वविधायकशास्त्रघटकपदप्रयोज्यविषयतापर्य्याप्त्यधिकरणाजादिप्रत्ययाव्यवहितपूर्ववृत्तिद्वित्वात्मककार्य्यानुभवितृत्वाश्रयघटकस्याचो द्वित्वात् प्रागादेशो नेत्यर्थस्तेन न क्वापि दोषो न वा कस्यापि भाष्यस्यासङ्गतिः ।

अत्र च द्वित्वकार्यानुभवितृत्वाश्रयत्वं पर्य्याप्त्याऽपर्य्याप्त्या च तेन जेघ्रीयत इत्यस्याग्रहणप्रत्युदाहरणत्वोक्तिसंगतिरिति केचित् ।

तन्न । द्वित्वात्मककार्य्यानुभवितृघटितस्यापि णयन्तस्य तत्त्वापत्तौ चुक्षावयिषतीत्यत्रत्यभाष्यस्यासंगत्यापत्तेः ।

तस्मात् प्रकृते द्वित्वकार्यानुभवितृत्वाश्रयत्वं द्वित्वकार्यानुभवितृत्वाभाववदघटितत्वं विवक्षितमिति दिक्(2) ॥ १० ॥ (शेषमग्रे)

काशीस्थराजकीयप्रधानपाठालयाध्यापकः श्रीद्विवेदहरिनाथमनीषी ।

(१) णौ स्थानिवदित्यस्य प्रामाणिकत्वफलवत्त्वप्रदर्शनपरेणेत्यर्थः ॥

(२) तथा च जग्मतुरित्यत्र द्वित्वविधायकं लिटि धातोरिति शास्त्रं तद्घटकं लिटीति पदं तत्प्रयोज्या या विषयता तस्याः पर्याप्त्याऽधिकरणीभूतो योऽजादिः प्रत्ययोऽतुसिति तदव्यवहिते पूर्वस्मिन् काले वर्त्तमानो द्वित्वात्मककार्यानुभवितृत्वाभाववदुदासीनककारादिवर्णाघटितो यो गम् इत्याकारकः समुदायस्तद्घटकस्य गकारोत्तराकारस्य लोपरूप आदेशो द्वित्वात् प्राक् प्रतिषिध्यते । एवं चक्रतुरित्यत्रापि तादृशः समुदायः क इति, ऊर्णुनविषतीत्यत्र च तादृशः समुदायो नु इति तद्घटककारादिरूपाच्स्थानिककार्यत्वं चाक्षाकृतं यणादीनामिति भवति तेषां प्रतिषेधः । चुक्षावयिषतीत्यत्र तु द्वित्वविधायकं सन्यङोरिति शास्त्रं तद्घटकसन्पदप्रयोज्यविषयतापर्याप्त्यधिकरणं यदिषेति न तदव्यवहितपूर्ववृत्तित्वं क्षु इति समुदाये णिचा व्यवधानात् । यश्च क्षुव इति समुदायस्तथाविधाजादिप्रत्ययाव्यवहितपूर्ववृत्तिर्नासौ द्वित्वकार्यानुभवितृत्वाभाववदघटितः, तस्य द्वित्वकार्यानुभवितृत्वाभाववान् यो णिच इकारस्तद्घटितत्वादिति न द्विर्वचनेऽचीत्यस्य प्रवृत्तिः । एवं च तदर्थं णावच आदेशो नेति वचनस्य कर्त्तव्यत्वपरं भाष्यमपि संलग्नम् । एवमचीकीर्त्तदित्यत्रापि न द्विर्वचनेऽचीत्यस्य प्रवृत्तिः । अत्र च णावच आदेशो नेति वचनस्यापि न प्रवृत्तिस्तस्य विशेषविषयत्वादिति त्वन्यत् । द्विर्वचनेऽचीत्यत्राजग्रहणाभावे तु द्वित्वविधायकशास्त्रघटकपदप्रयोज्यविषयतापर्याप्त्यधिकरणप्रत्ययाव्यवहितपूर्ववृत्तिद्वित्वात्मककार्यानुभवितृत्वाभाववदघटितसमुदायघटकाच्स्थानिक आदेशो द्वित्वात् प्राङ्न प्रवर्त्तत इत्येव सूत्रस्यार्थः स्यादिति तादृशसमुदायत्वस्य घ्राशब्देऽसत्त्वात् तद्घटकाच्स्थानिके प्रतिषिध्येतैवेत्याघ्राध्मोरिति शास्त्रमिति तत्रत्यभाष्यमपि संलग्नमेवेति दिगेषा प्रकृतावरलापनस्य ॥

सप्तमः परिच्छेदः ।

(*Continued from page* 334. Vol. VII.)

इदानीं त्वम्पदार्थो निरूप्यते ।

एकजीववादेऽविद्याप्रतिबिम्बो जीवः अनेकजीववादे तु अन्तःकरणप्रतिबिम्बः स च जाग्रत्स्वप्नसुषुप्तिरूपावस्थात्रयवान् । तत्र जाग्रदवस्था नाम इन्द्रियजन्यज्ञानावस्था । अवस्थान्तरे इन्द्रियाभावान्नातिव्याप्तिः । इन्द्रियजन्यज्ञानञ्चान्तःकरणवृत्तिः स्वरूपज्ञानस्यानादित्वात् ।

सा चान्तःकरणवृत्तिरावरणाभिभवार्थेत्येकं मतम् । तथाहि अविद्योपहितचैतन्यस्य जीवत्वपक्षे घटा-

We now explain the word *thou.* According to the single-jíva theory, the jíva is a reflection of (Intelligence), in Nescience; but on the plurality theory it is a reflection (of Intelligence) in the internal organs. And the jíva exists in the three states of waking, dreaming and dreamless sleep. The waking state is that of knowledge effected through sense-organs. Since sense-organs are not present in the other states,* our definition is not faultily extensive. *Knowledge effected through sense-organs* is a modification (vṛitti) of the internal organ; for knowledge in its own nature (i. e. the absolute Intelligence, Brahma) is without any beginning.

One view is that the modification of the internal organ is necessary for the destroyal of the nescience that conceals (the object). To explain: since, according to the theory that the jíva is Intelligence as conditioned † by Nescience, the Intel-

* अवस्थान्तर इति सुषुप्त्यादावित्यर्थः । न चैवमपि स्वप्ने ऽतिव्याप्तिः । तत्रेन्द्रियसत्त्वेऽपि तद्व्यापारोपरमादितिभावः । Śikhá: 161. f. r.

† Though often used inadvertently as synonyms, in our text and other works, the terms *upahita* and *avachchhinna,* strictly taken, point to a recognised division in the schools of the Vedánta. The usual definitions are:—वर्त्तमानत्वे सति कार्य्यान्वयित्वे च सति व्यावर्त्तकोऽवच्छेदकः । वर्त्तमानत्वे सति कार्य्यानन्वयित्वे च सति व्यावर्त्तक उपाधिः । An avachchhedaka (or viśeshaṇa) is a distinguishing attribute, which must be present and must inhere in (as forming a constituent part of) the object de-

Digitized by Google

अधिष्ठानचैतन्यस्य जीवरूपतया जीवस्य सर्वदा घटादिभानप्रसक्तौ घटाद्यवच्छिन्नचैतन्यावरकमज्ञानं मूलाविद्यापरतन्त्रमवस्थापदवाच्यमभ्युपगन्तव्यम् ।

ligence underlying jars and like (products of Nescience) is jíva, it follows that there ought to be at all times a manifestation of jars, &c., to the jíva (—which is not the case—and) therefore (to remove this difficulty the above school hold it) necessary to maintain a certain condition of Nescience, technically known by the term *avasthá* * (i.e. *avasthá-jńána*), which *conceals* the Intelligence underlying jars, &c., and is subordinate to the primary or causal Nescience (múlávidyá).

एवं सति न सर्वदा घटादेर्भान-

The existence of such concealing nescience being granted(evam sati), the manifestation of jars, &c.,

fined. An upádhi is a distinguishing attribute, which must be present, but which is not an essential part of the thing defined. Thus ghaṭa is (strictly speaking) an upádhi to ákáśa; and rúpa is an avachchhedaka to ghaṭa. (cf. Ved : Parib : Pandit, Vol. IV. p. 399.) It may be added that vartamánatva in the above definitions excludes an upalakshaṇa, which is kádáchitka. That is, the crow (to keep to stock examples) perched on Chaitra's house yesterday, though not there now serves to point out the house, and is, therefore, only an upalakshaṇa. How far the Vedantic usage of these terms is to be understood in a strictly material sense is not easy to decide. Throughout the Vedánta metaphor glides smoothly into material truth; and the mere unfolding of a metaphor often seems to stand in the place of logical demonstration. However, the avachchheda-vádins, the more materialistic school headed by Váchaspati, are clearly enough those who insist on the antahkaraṇa (or avidyá) as an essential part of jíva, without which jíva as such cannot exist. The pratibimba-vádins, on the other hand, regard the antahkaraṇa as an upádhi merely, which in no way enters into the constitution of jíva.

A more materialistic explanation of things spiritual I am not at present prepared to hazard. Nor can I offer good English equivalents for avachchhina,–pratibimba-vádin, and cognate terms. Hall uses "appropriationists" and reflexionists" (R. Refn. p. 244).

* cf. Bhámatí (ed. Bála Śástrí) p. 28.

प्रसङ्गः अनावृतचैतन्यसम्बन्धस्यैव भानप्रयोजकत्वात्। तस्य चावरणस्य सदातनत्वे कदाचिदपि घटभानं न स्यादिति तद्भङ्गे वक्तव्ये तद्भङ्गजनकं न चैतन्यमात्रं तद्भासकस्य तदनिवर्त्तकत्वात् ।

नापि वृत्त्युपहितं चैतन्यं परोक्षस्थलेऽपि तन्निवृत्त्यापत्तेरिति परो-

(i.e. our being conscious of them) at all times is not a necessary consequence; for the essential factor in the manifestation of an object is just this connexion of unconcealed (i.e. of the underlying Intelligence, whose cloak of nescience has been removed) Intelligence (with the object). And if this concealing nescience were present at all times, the manifestation of a jar would be altogether impossible: therefore, a destroyal of this concealing nescience must be maintained. (But) the cause of this destroyal is not pure Intelligence, for that which illumines this concealing nescience (tat) cannot be its destroyer.*

Nor is Intelligence, limited to a modification of the internal organ, the cause: for then it would follow that there is a destroyal of the concealing nescience (tad) even in a case of non-immediate knowledge.†

* The Vedántin chooses to express the ordinary consciousness—"I do not perceive a jar"—by "the nescience, which conceals the jar (or the Intelligence underlying the jar), is illumined by Intelligence."

यद्यपि तृणादिप्रकाशकस्याप्यग्नेः तत्नाशकत्वदर्शनाच्च भासकत्वनिवर्त्तकत्वयोर्विरोधस्तथापि घटस्फुरणात्पूर्वं तत्सत्त्वेऽपि तदावरणभानस्यैव दर्शनेन अन्वयव्यभिचाराच्च निवर्त्तकमिति। Śikhá: 161 f. v. स्फुरण=the coming forth of the object into consciousness. तद्भासकस्य=सत्तास्फूर्त्तिप्रदस्य । अन्वयव्यभिचार=non sequence of cause and effect.

† Mediate or non-perceptional, it will be remembered, is the knowledge gained through all pramáṇas except pratyaksha. In an inference there is a vṛitti in the form of the inferred object, sc. the fire. If this vṛitti were able to destroy the nescience, which conceals the fire that actually exists in the mountain, we ought to have an immediate, perceptional knowledge of the fire—which is not the case. The inferential vritti, therefore, does not destroy the "concealing" nescience. And this

Digitized by Google

व्यावृत्तवृत्तिविशेषस्य तदुपहितचैतन्यस्य वा आवरणाभिभावकत्वमित्यावरणाभिभवार्था वृत्तिरुच्यते ।

Therefore the cause of the destroyal of the concealing nescience is either a special modification (of the internal organ), distinct from the modification which arises when the object is not present to the senses; or is the Intelligence limited by this special modification (tad). Thus the modification of the internal organ is maintained as having its function in destroying the concealing nescience.

सम्बन्धार्थो वृत्तिरित्यपरं मतम् । तत्राविद्योपाधिको जीवोऽपरिच्छिन्नः स च घटादिप्रदेशे विद्यमानोऽपि घटाद्याकारापरोक्षवृत्तिविरहदशायां न घटादिकमवभासयति घटादिना समं सम्बन्धाभावात् तत्तदाकारवृत्तिदशायां तु भासयति तदा सम्बन्धसत्त्वात् ।

Another opinion is that the modification is of use as a connecting link. In this regard, (some hold that) jíva has Nescience as its limiting condition, (and is) pervasive. And jíva, though (thus) existing in the space occupied by jars and like objects, does not illumine them, when there is no vritti (of the internal organ) in the form of jars, &c., since there is no connexion between the jars (and the jíva). But, when there is a vritti in the form of any object, the jíva illumines the object, since at such a time a connexion between the two does exist.

ननु अविद्योपाधिकस्य जीवस्यापरिच्छिन्नस्य स्वत एव समस्तवस्तुसम्बद्धस्य वृत्तिविरहदशायां सम्बन्धाभावाभिधानमसङ्गतम् । असङ्ग-

It may be objected that the declaration to the effect that, when there is no vritti, there is no connexion (between jíva and object), is improper; because jíva, which has Nescience as its limiting condition and is pervasive, is through its very nature related with all material things. Again, if this declaration of absence of connexion be made in deference

leads to the distinction (made in the text) between a *parokshavritti* and an *aparokshavritti*.

त्वदृष्ट्या सम्बन्धाभावाभिधाने च वृत्त्यनन्तरमपि सम्बन्धो न स्यादिति चेत् ।

उच्यते । न हि वृत्तिविरहदशायां जीवस्य घटादिना सह सम्बन्धसामान्यं निषेधामः किन्तर्हि घटादिभानप्रयोजकं सम्बन्धविशेषम् ।

स च सम्बन्धविशेषो विषयस्य जीवचैतन्यस्य च व्यङ्ग्यव्यञ्जकतालक्षणः कादाचित्कस्तत्तदाकारवृत्तिनिबन्धनः ।

तथा हि तैजसमन्तःकरणं स्वच्छद्रव्यत्वात् स्वत एव जीवचैतन्याभिव्यञ्जनसमर्थं घटादिकन्तु न तथा अस्वच्छद्रव्यत्वात् । स्वाकारवृत्तिसंयोगदशायान्तु वृत्त्यभिभूतजाड्यधर्म्मकतया वृत्त्युत्पादितचैतन्याभिव्यञ्जनयोग्यताश्रयतया च वृत्त्युदयानन्तरं चैतन्यमभिव्यनक्ति ।

to the unrelated-ness of jíva (as revealed in Scripture), then even after the vṛitti has arisen, no connexion is possible (as contradictory to Scripture).

Our reply to the above objection is that we do not indeed deny a general connexion between jíva and the object at a time when a vṛitti (in the form of the object) is absent. What then? We deny that special kind of connexion, which is the essential factor in the manifestation (sc. our perception) of jars and like objects.

And this special connexion characterizes the object as that which manifests, and the jíva-Intelligence as that which is manifested; it is contingent, and is dependent on a vṛitti having taken the form of some object (tattat).

We explain: the bright * internal organ is of itself able to manifest the jíva—Intelligence, for it is a reflecting substance; but jars and like objects cannot do so, for they are not reflecting substances. When, however, there is contact of a vṛitti, which has taken the form of such an object as a jar, with the object itself, the object has its non-sensitive nature over-come by the vṛitti; and is the recipient of a certain capacity for the manifestation of Intelligence (—this capacity being) due to the vṛitti; and, therefore, after the vṛitti has arisen, an object like a jar manifests Intelligence.

* For Taijasam cf. Ved: Parib Pandit Vol. IV. p. 342 and note

तदुक्तं विवरणे । अन्तःकरणं हि स्वस्मिन्निव स्वसंसर्गिण्यपि घटादौ चैतन्याभिव्यक्तियोग्यतामापादयतीति । दृष्टस्यास्वच्छद्रव्यस्यापि स्वच्छद्रव्यसम्बन्धदशायां प्रतिबिम्बग्राहित्वं यथा कुड्यादेर्जलादिसंयोगदशायां मुखादिप्रतिबिम्बग्राहिता । घटादेरभिव्यञ्जकत्वञ्च तत्प्रतिबिम्बग्राहित्वं चैतन्यस्याभिव्यक्तत्वञ्च तत्र प्रतिबिम्बितत्वम् ।

एवंविधाभिव्यञ्जकत्वसिद्ध्यर्थमेव वृत्तेरपरोक्षस्थले बहिर्निर्गमनाङ्गीकारः । परोक्षस्थले तु वह्न्यादेर्वृत्तिसंयोगाभावेन चैतन्यानभिव्यञ्जकतया नापरोक्षत्वम् । एतन्मते च विषयाणामपरोक्षत्वं चैतन्याभिव्यञ्ज-

This view has been stated in the Vivaraṇa. Thus:—"The internal organ produces in jars and like objects, which are in contact with it, as if indeed in itself, the capacity for the manifestation of Intelligence." * And it is a matter of observation that even a non-reflecting substance can, when there is a connexion between it and some reflecting substance, take a reflection: a wall, for instance, can take a reflection of a face or other object when water or some like reflecting substance is in contact with the wall. And the power of manifesting (Intelligence), possessed by jars and like objects, consists in their being able to take a reflection of Intelligence (*tat*). And the capacity for being manifested, belonging to Intelligence, consists in Intelligence being reflected in such objects (tatra).

In a case of immediate (or perceptional) knowledge, the departure of the vṛitti outwards (from the body to the object) is admitted only to establish the capacity for manifesting (Intelligence) described above (as residing in the object). But, since in a case of mediate knowledge (sc. where fire, the object, is inferred), fire and the like do not possess the capacity for manifesting (Intelligence), in that there is no contact of a vṛitti with the fire (—the fire not being in contact with a sense-organ), the know-

* Pañchapádikávivaraṇa. 96 f. v. घटादौ does not occur in the MS.

त्वमिति द्रष्टव्यम् । एवं जीवस्यापरिच्छिन्नत्वेऽपि वृत्तेः सम्बन्धार्थत्वं निरूपितम् ।

इदानीं परिच्छिन्नत्वपक्षे सम्बन्धार्थत्वं प्रतिपाद्यते । तथाहि अन्तःकरणोपाधिको जीवस्तस्य च न घटाद्युपादानता घटादिदेशासम्बन्धात् किन्तु ब्रह्मैव घटाद्युपादानं तस्य मायोपहितस्य चैतन्यस्य सकलघटाद्यन्वयित्वात् । अत एव ब्रह्मणः सर्व्वज्ञता ।

तथा च जीवस्य घटाद्यधिष्ठानब्रह्मचैतन्याभेदमन्तरेण घटाद्यवभासासम्भवे प्राप्ते तदवभासाय घटाद्यधिष्ठानब्रह्मचैतन्याभेदसिद्ध्यर्थं घटाद्याकारवृत्तिरिष्यते ।

ननु वृत्त्यापि कथं प्रमातृविषयचैतन्ययोरभेदः सम्पाद्यते घटान्तःकर-

ledge of fire, &c., is not perceptional. And perceptional knowledge of objects must be understood, according to this view, to consist in the capacity for manifesting Intelligence possessed by objects. Thus the use of the vṛitti as a connecting link has been explained even on the assumption that jíva is pervasive.

The use of the vṛitti as a connecting link is next explained, in regard to the view of jíva as finite in extent. According to this view, the jíva has the internal organ as its limiting condition, and is not the substrate of jars and like objects; for it has no connexion with the space in which these objects exist. But Brahma is the substrate of these objects, since Intelligence conditioned by Máyá pervades all products like jars, &c. Hence indeed the omniscience of Brahma (Íśvara).

And thus, since it is clear that the manifestation (in consciousness) of objects like jars, &c., is impossible save through the identity of jíva with Intelligence, i.e. Brahma, which is the substrate of such objects, a vṛitti in the form of the object is held necessary for the manifestation of the object; that is, for the bringing about of the identity of jíva with Intelligence, sc. Brahma, the substrate of jars and like objects.

Here, it may be asked, however even by means of a vṛitti the identity of the Intelligence (underlying) the object and the

रूपोपाधिभेदेन तदवच्छिन्नचैतन्ययोरभेदासम्भवादिति चेन्न।

वृत्तेर्विषयदेशनिर्गमनाङ्गीकारेण वृत्त्यन्तःकरणविषयाणामेकदेशस्थत्वेन तदुपाधेयभेदाभावस्योक्तत्वात्। एवमपरोक्षस्थले वृत्तेर्म्मतभेदेन विनियोग उपपादितः।

इन्द्रियाजन्यविषयगोचरापरोक्षान्तःकरणवृत्त्यवस्था स्वप्नावस्था। जाग्रदवस्थाव्यावृत्त्यर्थमिन्द्रियाजन्येति। अविद्यावृत्तिमत्यां सुषुप्तावतिव्याप्तिवारणाय अन्तःकरणेति।

सुषुप्तिर्नाम अविद्यागोचराविद्यावृत्त्यवस्था। जाग्रत्स्वप्नयोरवि-

Intelligence (underlying) the knowing subject is brought about; for, since the two limiting adjuncts in this case, sc. the jar and the internal organ, are distinct, the identity of the two Intelligences conditioned by these adjuncts is impossible.

Not so, we reply, for absence of difference in the things conditioned (sc. Intelligence) has been declared by us, since the vṛitti, internal organ and object exist in the same spot; for we admit an outward movement of the vṛitti to the spot where the object exists. Thus the application of the vṛitti, in a case of perception, has been explained in accordance with the various theories (regarding it).

The dreaming state is that in which there is a vṛitti of the internal organ in the form of an object * immediately perceived (—while the vṛitti is) not effected through a sense-organ. *Not effected through a sense-organ* is inserted to exclude the waking state. *Internal organ* is inserted to prevent the too extensive application of the definition to the state of dreamless sleep in which there is a vṛitti of Nescience (but no internal organ).

Dreamless sleep is the state in which there is a vṛitti of Nescience in the form of Nescience (as an object). † The definition does not apply too extensively

* इन्द्रियाजन्य and अपरोक्ष qualify वृत्ति.

† साक्षादविद्योपादाना वृत्तिरविद्यावृत्तिः सा च नित्यसुखगोचरा अविद्यागोचरा च। अत एव सुप्तोत्थितानुभवः सुखमहमस्वाप्सं न किञ्चिदवेदिषमिति। Śikhá: 164. f.r.

द्याकारवृत्तेरन्तःकरणवृत्तित्वाच्च तत्रातिव्याप्तिः ।

to the waking and dreaming states, since during these states the vṛitti in the form of Nescience is a vṛitti of the internal organ.

अत्र केचित् मरणमूर्च्छयोरवस्थान्तरतामाहुः । अपरे तु सुषुप्तावेव तयोरन्तर्भावमाहुः । तत्र तयोरवस्थात्रयान्तर्भावबहिर्भावयोः त्वम्पदार्थनिरूपणे उपयोगाभावाच्च तत्र प्रयत्यते ।

Some maintain that death and a fainting fit are distinct states: while others place these states under that of dreamless sleep. But since the exclusion of these two states from or their inclusion in the other three states (of waking, dreaming and dreamless sleep) is of no use in an explanation of the meaning of the word *thou*, we have not addressed ourselves to the point.

तस्य च मायोपाध्यपेक्षयैकत्वम् अन्तःकरणोपाध्यपेक्षया च नानात्वं व्यवह्रियते । एतेन जीवस्याणुत्वं प्रत्युक्तं बुद्धेर्गुणेनात्मगुणेन चैव ह्याराग्रमात्रो ह्यवरोऽपि दृष्ट इत्यादौ जीवस्य बुद्धिशब्दवाच्यान्तःकरणपरिमाणोपाधिकपरिमाणत्वश्रवणात् ।

And the unity of jíva (tasya) is regarded from the standpoint of Máyá as its limiting condition: its plurality from the standpoint of the internal organs (when considered) as its limiting conditions. By thus regarding the difference between jíva and Iśvara as due to the limiting condition, i.e. not as a real difference, (etena), * the view that jíva is atomic is refuted. For in such texts as "That lower one also, who is endowed with the quality of mind and the quality of body, is seen small even like the point of a good," † the size of jíva is revealed as conditioned by the size of the internal organ, which is meant by the word buddhi (mind) of the text.

स च जीवः स्वयंप्रकाशः स्वप्ना-

And the jíva is its own light, for the text referring to the dream-

* एतेन । जीवस्य विभुत्वादिप्रदर्शनेन—Śivadatta. The Śikhámaṇi does not explain एतेन, merely adding—रामानुजाभिमतं दूषयति. For the Rámánuja view see Sarvadarś: saṅg: (Gough) p. 77.

† S. Bks. Vol. XV. p. 257.

Digitized by Google

वस्थामधिकृत्यात्रायं पुरुषः स्वयंज्योतिरिति श्रुतेः । अनुभवस्वरूपश्च प्रज्ञानघन इत्यादिश्रुतेः । अनुभवामीति व्यवहारस्तु वृत्तिप्रतिबिम्बितचैतन्यमादायोपपद्यते ।

एवं त्वम्पदार्थो निरूपितः । अथ तत्त्वम्पदार्थयोरैक्यं महावाक्यप्रतिपाद्यमभिधीयते ।

ननु नाहमीश्वर इत्यादिप्रत्यक्षेण किञ्चिज्ज्ञत्वसर्व्वज्ञत्वादिविरुद्धधर्म्माश्रयत्वादिलिङ्गेन द्वा सुपर्णेत्यादिश्रुत्या द्वाविमौ पुरुषौ लोके क्षरश्चाक्षर एव च इत्यादिस्मृत्या च जीवपरभेदस्यावगतत्वेन तत्त्वमस्यादिवाक्यमादित्यो यूपः यजमानः

ingstate declares:—"In that state the person is self-illuminated." * The jíva consists of knowledge as declared in such texts as "(that self is altogether) a mass of knowledge." † But the experience expressed in "I know" is gained through Intelligence reflected in a vṛitti (of the internal organ).

Thus the meaning of the word *thou* has been explained. We now declare the identity of *that* and *thou* as set forth in the Mahávákyas. ‡

Here it may be objected against us that "that thou art" and the other mahávákyas have only a metaphorical meaning, as is the case with such sentences as "the sacrificial post is the sun; the sacrificer is the stone," &c; § since the difference between jíva and Brahma (para) is made known through perception as expressed in "I am not Íśvara" and the like; and through (inference, in which) the middle term (probans, liṅga) is—*they (sc. jíva and Íśvara) are substrates of contradictory attributes, sc. purviscience and omniscience respectively*—(and, therefore, are not identical); and through such Śruti texts as "Two birds, (inseparable friends, cling to the same tree)" ||; and

* do. do. do. do. p. 164.

† do. do. do. do. p. 184.

‡ cf. Mahávákyaviveka, Pañchadaśí, Pandit Vol. VI. p. 271.

§ Mímám: Sú. I, 4, 25.

|| S. Bks. Vol. XV. p. 251.

Digitized by Google

क्षरश्च इत्यादिवाक्यवदुपचरितार्थमेवेति चेन्न।

भेदप्रत्यक्षस्य सम्भावितकरणदोषजन्यस्यासम्भावितदोषवेदजन्यज्ञानेन बाध्यमानत्वात्।

अन्यथा चन्द्रगताधिकपरिमाणग्राहकज्योतिःशास्त्रस्य चन्द्रप्रादेशग्राहिप्रत्यक्षेण बाधापत्तेः। पाकरक्ते घटे रक्तोऽयं न तु श्याम इतिवत् सविशेषणे हीतिन्यायेन जीवपरभेदग्राहिप्रत्यक्षस्य विशेषणीभूतधर्म्मभेदविषयत्वाच्च।

through such Smṛiti texts as "In the world these are the two beings, the destructible and the in destructible." *

The above objection we set aside, because the perception of difference (between jíva and Ísvara), effected through possible defects in the organs of knowledge, can be proved false by means of knowledge gained through the Veda, in regard to which defects are impossible.

If this were not so, the Jyotihśástra, which teaches that the moon is of great size, would be proved false by our (visual) perception of the moon as a span in extent. And because, in accordance with the maxim that "An affirmation or a negation, when made of a subject together with its predicate, applies to the predicate,—if a bar exists to the affirmation or negation being attached to the subject", † the perception, which makes known to us a difference between jíva and Brahma, refers to a difference in the attributes (falsely surmised by us) as predicates (of the two): as, in the case of an earthen vessel turned red (from grey) on baking, the negation, expressed in "this vessel is red, not grey," (being debarred from the subject sc. the vessel, which continues to exist) applies to the predicate grey.

* Bhag: Gít. XV, 16.

† cf. Hall's R. Ref p. 232.

Digitized by Google

अत एव च नानुमानमपि प्रमाणम् आगमबाधात् मेरुपाषाणमयत्वानुमानवत् ।

Hence also* inference is not a source of correct knowledge, for it is proved false by Scripture, as is the inference† that attempts to prove the rocky nature of Mt. Meru (—which Scripture declares to be made of gold).

नाप्यागमान्तरविरोधः तत्परातत्परवाक्ययोस्तत्परवाक्यस्य बलवत्त्वेन लोकसिद्धभेदानुवादिद्वा सुपर्णादिवाक्यापेक्षया उपक्रमोपसंहारावगताद्वैततात्पर्य्यविशिष्टस्य तत्त्वमस्यादिवाक्यस्य प्रबलत्वात् ।

Nor are other passages of Scripture contradictory (of the identity of jíva and Brahma), for such a text as "that thou art," whose aim, sc. the teaching of non-duality, has been clearly determined (by the six methods known as) upakrama (i.e. mention of the aim at the beginning of a section), upasamhára (i.e. repetition of the same at the end of the section) &c.,‡ is cogent in comparison with such a passage as "Two birds, &c.," which illustrates the common worldly view of a difference (between jíva and Brahma): because of two texts,—the one devoted to teaching the identity of Brahma and jíva (tatpara), and the other not thus devoted—the former text is cogent. §

* यतः सर्वप्रमाणोपजीव्यस्य ज्येष्ठस्य प्रत्यक्षस्य बाध्यत्वाद् भेदेऽप्रमाणता अत एवानुमानस्यापि । Śivadatta.

† Such an inference as:—मेरुः पाषाणमयः पर्वतत्वाद् विन्ध्यादिवत् ।

‡ For these see next chapter.

§ The Veda teaches what cannot be known through any other source of evidence—vedasya ajńátajńápakatvam—and is the sole evidence of the identity of jiva and Brahma; for the other pramáṇas make known the non-identity of these two. Vedic texts, therefore, which declare the identity are more cogent than texts, which declare the non-identity of jíva and Brahma; The latter texts are merely illustrative of ordinary sense-experience.

न च जीवपरैक्ये विरुद्धधर्म्माश्रयत्वानुपपत्तिः शीतस्यैव जलस्योपाधिकौष्ण्याश्रयत्ववत् स्वभावतो निर्गुणस्यैव जीवस्यान्तःकरणाद्युपाधिवशात् कर्त्तृत्वाद्याश्रयत्वप्रतिभासोपपत्तेः। यदि जलादावौष्ण्यमारोपितं तदा प्रकृतेऽपि तुल्यम्।

न च सिद्धान्ते कर्त्तृत्वस्य क्वचिदप्यभावाद् आरोप्यप्रमाहितसंस्काराभावे कथमारोप इति वाच्यं लाघवेनारोप्यविषयसंस्कारत्वेनैव तस्य हेतुत्वात्। न च प्राथमिकारोपे का गतिः कर्त्तृत्वाद्यध्यासप्रवाहस्यानादित्वात्।

Nor is it to be argued that, if jíva and Brahma are identical, it is impossible for one and the same thing to be the substrate of contradictory attributes. For just as water, which is really cold, becomes the substrate of the heat that really belongs to its limiting conditions; so the jíva, which is in its own nature devoid of attributes, can falsely appear to be the substrate of agency and other attributes, through the influence of its limiting condition, sc. the internal organ. If heat is erroneously surmised in water, then a similar erroneous surmisal (of agency, &c.) in the case under discussion (sc. that of the jíva) must be admitted.

Nor can you ask how, in accordance with the settled tenet of the Vedántá that agency is altogether absent (i.e. is wholly unreal), an erroneous surmisal is possible, if there is no veritable impression (saṃskára) of the erroneously surmised thing (i.e. if there is no certain evidence, pramá, of the real existence of the surmised thing). For it is simpler (we reply) to hold that the impression is a cause (of the erroneous surmisal) merely as an impression of the (previously known) surmised object (i.e. without considering whether the evidence for the existence of the surmised thing is beyond doubt, pramá, or not). Nor must you ask what was the determining movement of the first erroneous surmisal; for there has been a flow without beginning of erroneous surmisals of agency and the like.

तत्र तत्त्वम्पदवाच्ययोर्विशिष्टयोरैक्यायोगेऽपि लक्ष्यस्वरूपयोरैक्यमुपपादितमेव । अत एव तत्प्रतिपादकतत्त्वमस्यादिवाक्यानामखण्डार्थत्वं सोऽयमित्यादिवाक्यवत् ।

Thus, though the identity of the two individuals denoted by the words *that* and *thou* is impossible, the identity of the real nature of the two things* (intended by the words) is clearly established. Hence too, such texts as 'that thou art,' which declare the real nature of the things (tat), possess *akhaṇḍárthatva* †, as is the case with sentences like 'That (Devadatta of the past) is this (D. of the present time)'.

न च कार्य्यपराणामेव प्रामाण्यं चैत्र पुत्रस्ते जात इत्यादौ सिद्धेऽपि तत्सङ्गतिग्रहात् ।

Nor is it to be maintained that authoritativeness belongs only to sentences that declare that something is to be done; ‡ for even where the object denoted by the sentence is something already existing (siddhe), as in the sentence 'a son is born to you, Chaitra,' we observe that the words convey authoritativeness. §

एवं सर्व्वप्रमाणाविरुद्धं श्रुतिस्मृतीतिहासपुराणप्रतिपाद्यं जीवपरैक्यं वेदान्तशास्त्रस्य विषय इति सिद्धम् ।

इति परिभाषायां विषयपरिच्छेदः ।

Thus has been proved the identity of jíva and Brahma, which is the object-matter of the Vedánta system, and which is not contradicted by any of the sources of knowledge, and is taught in Śruti, Smṛiti, Itihásas and Puráṇas.

* The "real nature" of both is chit, (Brahma).

† अखण्डार्थत्वम्=अपर्य्यायानेकशब्दप्रकाश्यत्वे सति अविशिष्टत्वम् or सजातीयविजातीयस्वगतभेदशून्यत्वम् । . That is, such sentences convey a simple notion of identity when all contradictory attributes are left out of view. cf. the quotation from the Chitsukhí in the Ved. Parib.: (Pandit, Vol. IV. p. 398.), and Pañchadaśí (Pandit, Vol. p. 667. śl. 20).

‡ ननु वेदान्ता न ब्रह्मपराः पदानां कार्य्यान्वितशक्त्यनुरोधेन कार्य्यपरत्वेनैव. प्रामाण्यावधारणात्तया च आदित्यो यूप इतिवत् तत्त्वमसीति अभेदोपासनापरमित्याशङ्क्य सिद्धेऽपि सङ्गतिग्रहस्योक्तत्वादिति दूषयति । Śikhá: 166 f. r. For the Prábhákara opinion here rejected see Sarv. darś. saṅg. p. 202 Cowell.

§ As seen in Chaitra's beaming face.

इदानीं प्रयोजनं निरूप्यते ।

यदवगतं सत् स्ववृत्तितयेष्यते तत् प्रयोजनं तच्च द्विविधं मुख्यं गौणञ्चेति । तत्र सुखदुःखाभावौ मुख्ये प्रयोजने तदन्यतरसाधनं गौणं प्रयोजनम् ।

सुखञ्च द्विविधं सातिशयं निरतिशयञ्चेति । तत्र सातिशयं सुखं विषयानुषङ्गजनितान्तःकरणवृत्तितारतम्यकृतानन्दलेशाविर्भावविशेषः एतस्यैवानन्दस्यान्यानि भूतानि मात्रामुपजीवन्तीत्यादिश्रुतेः । निरतिशयं सुखञ्च ब्रह्मैव आनन्दो ब्रह्मेति व्यजानादित्यादिश्रुतेः ।

आनन्दात्मकब्रह्मावाप्तिश्च मोक्षः शोकनिवृत्तिश्च ब्रह्मविद् ब्रह्मैव भवति तरति शोकमात्मविदितिश्रुतेः न तु लोकान्तरावाप्तिः तज्जन्यवैषयि-

Now motive is explained. That which, when known, is desired as bearing on oneself * is a motive. It is of two kinds; primary and secondary. Pleasure and the absence of pain are the two primary motives. The means of gaining either of these is a secondary motive.

Pleasure is of two kinds; finite and infinite. Finite pleasure is a special manifestation of a portion of the Bliss-Brahma (ánanda), (the manifestation being) effected by the mediation of a mental modification (which is) brought about through contact with an object. For Scripture thus declares:—"All other creatures live on a small portion of that bliss." † And infinite pleasure is indeed Brahma, according to the text "He perceived that Bliss is Brahman." ‡

Final emancipation is the attainment of the Bliss-Brahma, and the cessation of sorrow; in accordance with the texts "He who knows that highest Brahman becomes even Brahman," § and "He who knows the Self overcomes grief." || But final emancipation is not the gaining of other worlds, ¶ nor is it the object-dependent happiness, effected through the attainment of other worlds (tat): for since such

* स्ववृत्तितया = ममेदं स्यादिति स्वसम्बन्धितया । Śivadatta.

† S. Bks. Vol. XV. p. 171.

‡ do. do. „ „ p. 66.

do. do. „ „ p. 41.

do. do. „ „ p. 110.

¶ तस्येति उभयविधमोक्षस्य । Śivadatta.

Digitized by Google

आनन्दो वा मोक्षः तस्य कृतकत्वे-नानित्यत्वे मुक्तस्य पुनरावृत्त्यापत्तेः ।

नन्‌ त्वन्मतेऽप्यानन्दावाप्तेरनर्थ-निवृत्तेश्च सादित्वे तुल्योऽयं दोषः अनादित्वे मोक्षमुद्दिश्य श्रवणादौ प्रवृत्त्यनुपपत्तिरिति चेन्न सिद्धस्यैव ब्रह्मस्वरूपस्य मोक्षस्यासिद्धत्वभ्रमेण तत्साधने प्रवृत्त्युपपत्तेः । अनर्थनिवृ-त्तिरपि अधिष्ठानभूतब्रह्मस्वरूपतया सिद्धैव ।

लोकेऽपि प्राप्तप्राप्तिपरिहृतप-रिहारयोः प्रयोजनत्वं दृष्टमेव यथा हस्तगतविस्मृतसुवर्णादौ तव हस्ते

emancipation * is an effect, it must have an end, and thence will follow the re-birth of the emancipated one (—which is contradictory to Scripture).

Here an opponent may urge as follows:—† the same fault will attach to your (Vedantic) theory, if the attainment of the Bliss-Brahma and the cessation of pain have a beginning in time ‡; and, if these are without any such beginning, then activity relative to emancipation, implied in hearing and the other means, would be vain § The above objection is set aside. For, owing to our erroneous surmisal that final emancipation, which is indeed the already existent Brahma itself, is non-existent in the present, activity in regard to the means of gaining emancipation (tat) is of service. The cessation of evil (pain) also is already existent, since this cessation is Brahma itself, which remains as the substrate (when all the phenomenal world is destroyed).

Indeed, we observe that the attempt to gain what has already been gained, and to get rid of what has already been set aside, are motives also in every-day life. Thus, in the case of a coin lying in one's hand unheeded, one gains what before

* तान्त्रिकमतनिरासाय आह नत्विति । Śivadatta.

† ननु इति तान्त्रिकः शङ्कते Śivadatta.

‡ आद्ये (सादित्वे) कृतकत्वेन अनित्यत्वापत्तौ अपुनरावृत्तिश्रुतिविरोधः Śikhá: 168. f. v.

§ द्वितीये (अनादित्वे) श्रवणादिवैयर्थ्यमिति । Śivadatta.

For Śravaṇa, &c., see infra p.

सुवर्णमित्याप्तोपदेशात् अप्राप्तमिव प्राप्नोति । यथा वा वलयितचरणायां स्रजि सर्पत्वभ्रमवतो नायं सर्प इत्याप्तवाक्यात् परिहृतस्यैव सर्पस्य परिहारः । एवं प्राप्तस्याप्यानन्दस्य प्राप्तिः ।

परिहृतस्याप्यनर्थस्य निवृत्तिर्मोक्षः प्रयोजनम् । स च ज्ञानैकसाध्यः तमेव विदित्वातिमृत्युमेति नान्यः पन्था विद्यतेऽयनायेत्यादि श्रुतेः अज्ञाननिवृत्तेर्ज्ञानैकसाध्यत्वनियमाच्च । तच्च ज्ञानं ब्रह्मात्मैकत्वगोचरम् अभयं वै जनक प्राप्तोऽसि तदात्मानमेवावेत् अहं ब्रह्मास्मीत्यादिश्रुतेः तत्त्वमस्यादिवाक्योत्थं ज्ञानं मोक्षस्य साधनमिति नारदीयवचनाच्च । तच्च ज्ञानमपरोक्षरूपं परोक्षत्वेऽपरोक्षभ्रमनिवर्त्तकत्वानुपपत्तेः ।

seemed lost, when one learns on good authority that the coin is in the hand. Or again, when a man, mistaking a garland twining round his foot for a serpent, learns from reliable source that no serpent is there, he gets rid of a serpent which had already been set aside (for it never was round his foot.) Similarly, there is a gaining of Bliss already gained.

The cessation of evil, although this is really non-existent, is final emancipation and is a motive. And final emancipation can be effected only through knowledge; in accordance with the text "A man who knows him truly, passes over death ; there is no other path to go," * and with the restrictive rule that the cessation of ignorance can be effected only through knowledge. And this knowledge is relative to the identity of Brahma and the self (jíva), as is declared in such texts as "O Janaka, you have indeed reached fearlessness ;" † "that Brahman knew (its) Self only, saying, 'I am Brahman' ;" ‡ and in the utterance of Nárada,—"knowledge, arising from texts like 'that thou art," is the means of final emancipation." This knowledge is immediate; for, if it were mediate, it could not destroy immediate erroneous knowledge. §

* S. Bks. Vol. XV. p. 245.
† do. do. „ „ p. 160.
‡ do. do. „ „ p. 88.
§ तज्ज्ञानं किं वाक्याजन्यमुत अन्तःकरणादिति संशये पक्षपाताभावगदितमाह तच्चेति । Śivadatta.

तच्चापरोक्षज्ञानं तत्त्वमस्यादिवाक्यादिति केचित् । मनननिदिध्यासनसंस्कृतान्तःकरणादित्यपरे । तत्र पूर्व्वाचार्य्याणामयमाशयः । संविदापरोक्ष्यं न करणविशेषोत्पत्तिनिबन्धनं किन्तु प्रमेयविशेषनिबन्धनमित्युपपादितम् । तथा च ब्रह्मणः प्रमातृजीवाभिन्नतया तद्गोचरं शब्दजन्यमपि ज्ञानमपरोक्षम् ।

अत एव प्रतर्द्दनाधिकरणे प्रतर्द्दनं प्रति प्राणोऽस्मि प्रज्ञात्मा तं मामायुरमृतमुपास्स्वेति इन्द्रप्रोक्तवाक्ये प्राणशब्दस्य ब्रह्मपरत्वे निश्चिते सति मामुपास्स्वेत्यस्मच्छब्दानुपपत्तिमाशङ्क्य तदुत्तरत्वेन प्रवृत्ते शास्त्र-

Some hold that this immediate knowledge results from such texts as 'that thou art.' Others hold that it is effected through the internal organ which has been purified by the means known as manana, &c.* What the earlier teachers mean is this:—the immediacy of knowledge is not dependent on the rise (existence) of a particular organ of knowledge; but is dependent on a special kind of object (or thing) to be known. And this point we have already proved.† And thus, since Brahma is identical with jíva the cogniser, the knowledge relative to this identity, although effected through words (sc. 'that thou art') is immediate.‡

In the chapter relating Pratardana's visit to Indra, where Indra's speech to Pratardana runs as follows:—"I am práṇa, meditate on me as the conscious self (prajnátman), as life, as immortality"—§ the word práṇa was clearly proved (by the Sútra-writer) to mean Brahma. To meet the objection that the first personal pronoun in "meditate on me" would be contradicted (by giving the sense of Brahma to the word práṇa), the following sútra (Ved. Sú. I, 1, 30) is given by way of reply:—"No! (Indra's) declaration (of himself as Brahma) is due to (his) Veda

* वाचस्पतिमिश्रमतमाह मननेति Śivadatta, cf. Bhámatí, p. 41.

† See Ved: Parib. Pandit Vol. IV. pp. 396 et seq.

‡ do. do. do. do. „ „ p. 397.

§ S. Bks. Vol I. p. 294.

दृष्ट्या तूपदेशो वामदेववदित्यत्र सूत्रे शास्त्रीया दृष्टिः शास्त्रदृष्टिः तत्त्वमस्यादिवाक्यजन्यमहं ब्रह्मेति ज्ञानं शास्त्रदृष्टिशब्देनोक्तमिति ।

अन्येषामयमाशयः करणविशेषनिबन्धनमेव ज्ञानानां प्रत्यक्षत्वं न विषयविशेषनिबन्धनम् एकस्मिन्नेव सूक्ष्मवस्तुनि पटुकरणापटुकरणयोः प्रत्यक्षत्वाप्रत्यक्षत्वव्यवहारदर्शनात् ।

तथाच संवित्साक्षात्त्वे इन्द्रियजन्यत्वस्यैव प्रयोजकतया न शब्दजन्यज्ञानस्यापरोक्षत्वम् । ब्रह्मसाक्षात्कारेऽपि मनननिदिध्यासनसंस्कृतं मन एव करणं मनसैवानुद्रष्टव्यमिति श्रुतेः ।

(—derived) vision, as was the case with Vámadeva" * And it is because verbal knowledge is immediate (ata eva) † that in the above sútra the word *śástra-dṛishṭi*, to be taken as śástríyá dṛishṭih, occurs; by which word is meant the knowledge "I am Brahma" which is effected through Vedic sentences such as "that thou art."

What other (later) teachers mean is that the perceptional (immediate) character of knowledge is dependent on a special kind of organ and not on a special kind of object: for it is a common fact of experience that of a single, unchanged, subtle object there is perceptional or non-perceptional knowledge according as the organ of knowledge is keen or the reverse. ‡

And thus, since in immediate knowledge the essential factor is that it should be effected through an organ, the knowledge gained through words is not immediate. The mind (manas), purified by manana, &c., is the instrument § even in intuition of Brahma, in accordance with the text "By the mind alone it is to be per-

* cf. S. Bks. Vol. XV. p. 88. "The Ṛishi Vámadeva saw and understood it (Brahma), singing 'I was Manu (moon), I was the sun'."

† अत एवेति शब्दजन्यज्ञानस्य अपरोक्षत्वादेव । Śivadatta.

‡ अस्ति सूक्ष्मवस्तुनि लिपिलेखादौ पश्याम्यहं लिपिमिति पटुकरणस्य पुंसः स्थविरस्य तु करणापाटववतो न पश्यामीति व्यवहार इत्याह एकस्मिन्निति । Śikhá: p., 71. f. r.

§ According to the Śikhá:, Váchaspati maintained against the earlier Vedántins that manas is an indriya: एतन्मते च मनस इन्द्रियत्वाभ्युपगमात् ॥ cf. Ved. Parib. Pandit, Vol. IV. pp. 111, 340 et. seq.

मनोऽगम्यत्वश्रुतिश्चासंस्कृतमनोविषया ।

नचैवं ब्रह्मण औपनिषदत्वानुपपत्तिः अस्मदुक्तमनसो वेदजन्यज्ञानानन्तरमेव प्रवृत्ततया वेदोपजीवित्वात् वेदानुपजीविमानान्तरगम्यत्वस्यैव वेदगम्यत्वविरोधित्वात् ।

शास्त्रदृष्टिसूत्रमपि ब्रह्मविषयकमानसप्रत्यक्षस्य शास्त्रप्रयोज्यत्वादुपपद्यते । तदुक्तम् । अपि संराधने सूत्रात् शास्त्रार्थध्यानजा प्रमा । शा-

ceived."* And the text, which declares that Brahma cannot be perceived by the mind; † refers to a mind not thus purified.

Nor must it be argued that, if Brahma can thus be perceived by the mind (evam), the fact that Brahma is known only through (being revealed in) the Upanishads is overthrown ‡ For it is only (Brahma's) being known through some other source of knowledge, not subordinate to the Veda, that is contradictory of the fact that Brahma is known (only) through the Veda; since the mind (purified) as we have described it is subordinate to the Veda, in that it is operant only after a knowledge (of Brahma) has been gained through the Veda.

The sútra, beginning with Śástradrishṭyá, is also consistent; for the perception of Brahma (therein described), effected through the mind, is due to the Veda. This has been declared:— "True knowledge gained through pondering the meaning of the Veda is held to be the 'Veda-derived vision,' as set forth in the Sútra beginning with the

* S. Bks. Vol. XV. p. 179.

† "From whence (sc. Brahman) all speech, with the mind, turns away unable to reach it." S. Bks. Vol. XV. p. 56.

‡ ननु तं त्वौपनिषदं पुरुषं पृच्छामि इतिश्रुतिबोधितमुपनिषन्मात्रगम्यत्वं विरुद्धमित्याशङ्क्य परिहरति न चेति । Śivadatta. Further, if Brahma can be known by the mind, the essential character of Revelation, as making known that which cannot otherwise be known (apúrvasya vedavedyatvam), is lost.

स्वदृष्टिर्म्मता तां तु वेत्ति वाचस्पतिः परमिति ।

तच्च ज्ञानं पापक्षयात् स च कर्म्मानुष्ठानादिति परम्परया कर्मणां विनियोगः । अत एव तमेतं वेदानुवचनेन ब्राह्मणा विविदिषन्ति यज्ञेन दानेन तपसाऽनाशकेनेत्यादिश्रुतिः कषाये कर्मभिः पक्वे ततो ज्ञानं प्रवर्त्तते इत्यादिस्मृतिश्च सङ्गच्छते ।

एवं श्रवणमनननिदिध्यासनान्यपि ज्ञानसाधनानि मैत्रेयीब्राह्मणे आत्मा वा अरे द्रष्टव्य इति दर्शनमनूद्य तत्साधनत्वेन श्रोतव्यो मन्तव्यो निदिध्यासितव्य इति श्रवणमनननिदिध्यासनानां विधानात् ।

words *api samrádhane* (Ved: Sú. III. 2. 24).* This Váchaspati knew best of all."†

And this knowledge comes from the falling away of one's sins, and this in turn from the performance of prescribed acts: such, indirectly, is the application of the Vedic) ceremonial acts (in the scheme of final emancipation). Hence too, such a passage of Scripture as "Brahmaṇas seek to know him by the study of the Veda, by sacrifice, by gifts, by penance, by fasting, &c."‡ and such a smṛiti passage as "when passion has been consumed by ceremonial acts, then knowledge arises" § are in harmony.

Thus, too, śravaṇa, manana, and nididhyáśana are means of the knowledge (of Brahma); for, in the Maitreyí bráhmaṇa, after "seeing" has been declared, thus, "Verily, the Self is to be seen," śravaṇa, &c., are enjoined as means to that "seeing" (tat), thus, "(the self) is to be heard, to be pondered, to be deeply thought on." ||

---

* The quotation is referred by the ṭíkás to the Kalpataru.

† The sense of the Sútra, as given by Śaṅkara, is that during profound contemplation Yogís see the pure Self within: their vision is declared in Sruti and in Smṛiti, as in the sacred text:—"Some wise man, however, with his eyes closed and wishing for immortality, saw the Self within."

‡ S. Bks: Vol. XV. p. 179.

§ For the quotation in full see Śaṅkara, Ved. Sú. III, 4, 26.

|| Bṛihadár. II, 4, 6.

श्रवणं नाम वेदान्तानामद्वैते ब्रह्मणि तात्पर्य्यावधारणानुकूला मानसी क्रिया ।

मननं नाम शब्दावधारितेऽर्थे मानान्तरविरोधशङ्कायां तन्निराकरणानुकूलतर्कात्मकज्ञानजनको मानसो व्यापारः ।

निदिध्यासनं नाम अनादिदुर्व्वासनया विषयेष्वाकृष्यमाणस्य चित्तस्य विषयेभ्योऽपकृष्यात्मविषयकस्थैर्य्यानुकूलो मानसो व्यापारः ।

तत्र निदिध्यासनं ब्रह्मसाक्षात्कारे साक्षात्कारणं ते ध्यानयोगानुगता अपश्यन् देवात्मशक्तिं स्वगुणैर्निगूढामित्यादिश्रुतेः । निदिध्यासने च मननं हेतुः अकृतमननस्यार्थदार्ढ्याभावेन तद्विषये निदिध्यासनायोगात् । मनने च श्रवणं हेतुः श्रवणा-

Śravaṇa (hearing) is a mental act leading to the ascertainment of the meaning of the Upanishads in regard to Brahma, the One without a second.

Manana (pondering) is a mental process, productive of knowledge in the form of argument which leads to the overthrow of doubt as to the contradiction that arises, through sources of knowledge other (than Revelation), with regard to the ascertained meaning of Scripture.

Nididhyásana (deep meditation) is a mental process productive of the concentration on the Self of the thinking principle, when the latter, which is drawn towards objects by reason of a series of false impressions without beginning (made by these on it), has been withdrawn from objects.

Of these three nididhyásana is the immediate cause of an intuition of Brahma; as declared in the text "the sages, devoted to meditation and concentration, have seen the power belonging to God himself, hidden in its own qualities (guṇa)." * And manana is the cause of nididhyásana; for the meaning (of Scripture) is not firmly grounded for the man who has not pondered, (and therefore) deep meditation (concentration) on what is meant thereby (tadvishaye, sc. Brahma) is impossible. And śravaṇa is the cause of manana; for when

* S. Bks: Vol. XV. p. 232.

भावे तात्पर्य्यानिश्चये शाब्दज्ञानायोगेन श्रुतार्थविषयकयुक्तत्वायुक्तत्वनिश्चयानुकूलमननायोगात् ।

(शेषमग्रे)

there is no hearing there is no certain knowledge of the meaning of Scripture, and therefore knowledge (derived) from Scripture is impossible: (hence also) pondering, which leads to conviction regarding the right or wrong meaning of Scripture, is impossible.

A.V.

॥ माधवीयधातुवृत्तिः ॥

(*Continued from page* 440. VOL. VII.)

कुच संपर्चनप्रतिष्टम्भविलेखनेषु ॥ एतदादयः कसन्ता उदात्ता अनुदात्तेतः । कोचति । कुच शब्दे तारइति पठितस्यापीह पाठः संपर्चनादावेव कोचइति ज्वलादिसंबन्धेन णो यथा स्यादिति ॥ ८०८ ॥

बुध अवगमने ॥ बोधति । बुबोध । बोधिता इत्यादि । बुबुधिषति । बोधित्वा । बुधित्वा । रलो व्युपधेति किस्वविकल्पः । इधिः सराधियुधिबन्धिसाधयः । क्रुधिनुधी युद्ध्यतिबुध्यती विधिरित्यत्र श्यना निर्देशात् दैवादिकस्य ग्रहणं नान्यस्य नापि बुधिर् बोधनइति वक्ष्यमाणस्य । बोबुध्यते । बोबोद्धि । झषस्तथोरिति धत्वे जश्त्वे बोभोत्सि । 'एकाचो बशो भष् झषन्तस्य स्ध्वो'रिति भष्त्वे 'खरि चे'ति चर्त्वं, लोटि हेर्द्धिभावे जश्त्वे च बोबुद्धि । बोबुधानि । नाभ्यस्तस्येति गुणनिषेधः । लङि तिपि अबोभोत् । पदत्वात् भष्भावो जश्त्वं च । सिपि तु 'दश्चे'ति वा रुत्वे अबोभोरित्यपि भवति । बोधयति देवदत्तः । अबूबुधत् । अणावकर्म्मकादिति परस्मैपदं, यदायमणावचित्तवत्कर्तृकस्तदापि बुधयुधेति परस्मैपदमेव, न च तत्र युधादिसाहचर्यात् बुध्यतेरेव ग्रहणमिति वाच्यम् । एवं बुधिग्रहणं व्यर्थं स्यात् । यतो बोधने बोधयते इति दुर्वारम्, न च बोधतिबुध्यत्योरर्थभेदः, एवं दीपजनेति लुङि तशब्दे वा चिण्विधावपि श्यन्विकरणैरात्मनेपदिभिश्च साहचर्यैर्बुध्यतिबोधत्योर्द्वयोर्ग्रहणमिति व्यत्यबोधि, व्यत्यबोधिष्टेति भवति, असत्यपि वाग्रहणे न विशेषः, यतो दैवादिकेन व्यत्यबोधि व्यत्यबोधिष्टेति रूपद्वयं दुर्वारं, भावादिकर्मणोर्बुधितमनेन बोधितमनेनेत्यादि ॥ ८०९ ॥

रुह बीजजन्मप्रादुर्भावे ॥ अनुदात्ता उदात्तेतः । रोहति । रुरोह । रुरोहिथ । रुरुहिव । क्रादिनियमादिट् । रोढा । गुणढत्वधत्वष्टुत्वढलोपाः । रोक्ष्यति । 'षढोः कः सी'ति कत्वं, रोहतु । अरोहत् । रोहेत् । आशिषि रुह्यात् । अरुक्षत् । 'शल इगुपधादनिटः क्सः' रुरुक्षति । रोरुह्यते । रोरोढि ।

Digitized by Google

रोरूढः । ढ्रलोपइति दीर्घः । रोरोढि । लोटि सेर्ह्यिपिच्चत्वष्टुत्वढलोपदीर्घेषु रोरूढि । लङि । अरोरोट् । अरोरूढाम् । रोहयति । अरूरुहत् । रोपयति । अरूरुपत् । 'रुहः पोऽन्यतरस्या'मिति पक्षे हकारस्य पकारः, आरूढो वृक्षम् । आरूढो वृक्षः । गत्यर्थाकर्मकेत्यादिना कर्त्तृकर्मणोः क्तः । रोहितः । रुहरुहिपुषिभ्य इतिरितीतिः । रोहितः । लोहितः । रुहेरितश्च लो वेति इतः । पक्षे रेफस्य लत्वे । अलोहितो लोहितो भवति, लोहितायते । लोहितायति । 'लोहितादिडाज्भ्यः क्यष्'च्व्यर्थविषयादच्व्यन्तात् भवत्यर्थे क्यष् । 'वा क्यष' इति पक्षे तङ् । लोहित एव लोहितको मणिः । 'लोहितान्मणा'विति मणौ वर्त्तमानात् लोहिशब्दात् स्वार्थे कन् । लोहितकं मुखं कोपेन । मुखे वर्णे चानित्यइति अनित्यवर्णे वर्त्तमानात् लोहितशब्दात् स्वार्थे कन् स्त्रियां, लोहितात्लिङ्गबाधनं वेत्युक्तत्वात् वर्णादनुदात्तादिति पक्षे कनो न ङीब्विधिरिति लोहितिकेति भवति । अन्यदा तु ङीन्नकारयोर्लिङ्गविशिष्टपरिभाषया कनि ह्रस्वे च लोहिनिकेति । लोहितेन रक्तो लोहितकः पटः । 'रक्त' इति लाक्षादिना रक्तेर्थे वर्त्तमानात् लोहितशब्दात्स्वार्थे कन् अत्रापि स्त्रियां लोहिताल्लिङ्गबाधनं वेत्यस्यानुवर्तनात् लोहितिका पटी । लोहिनिका पटीत्युभयं भवति । रौहिषो मृगभेदः ॥ रुहेर्वृद्धिश्चेति टिषचि वृद्धिः । स्त्रियां रौहिषी ॥ ८१० ॥

कस गतौ ॥ कसति । चकास । कसिता ॥ अकसीत् । अकासीत् । चिकसिषति । चनीकस्यते । चनीकसीति । चनीकधीत्यत्र 'धिचे'ति सलोपः । तस्यासिद्धत्वा'दतोह्ले'रिति लुङ्नभवति । लङि तिपि 'तिप्यनस्ते'रिति सकारस्य पदान्तत्वात् दत्वेअचनीकत् । 'सिपि धातोरुर्वे'ति रुत्वं नीग्वञ्च्वित्यभ्यासस्य नीक् ॥ कासयति । अचीकसत् । कस्वरः । स्येशभासेति वरच् । शब्दकुत्सायां कसत इति गतम् । कुस्वादय उदात्ता उदात्तेतः । हसिस्त्वनुदात्तः । वृत् । ज्वलादयो वृत्ता इत्यर्थः ॥ ८११ ॥

अथोभयपदिनः । हिक्क अव्यक्तशब्दे ॥ एतदादयो गूहत्यन्ता उदात्ताः स्वरितेतः । हिक्कति । जिहिक्क । हिक्किता । हिक्किष्यति । हिक्कतु । अहिक्कत् । हिक्केत् । हिक्क्यात् । अहिक्कीत् । जिहिक्किषति । जेहि-

क्कयते । जेहिक्कि । स्कोरिति कलोपस्य असिद्धत्वात् अलघूपधत्वाच्च गुणः । हिक्कयति । अजिहिक्कत् । हिक्कते । जिहिक्के । हिक्किता । हिक्किष्यते । हिक्कताम् । अहिक्कत । हिक्किषीष्ट । अहिक्किष्ट । जिहिक्किषते । 'पूर्ववत्सन'इति तङ् ॥ ८१२ ॥

अञ्चु गतौ याचने च ॥ अञ्चतीत्यादि अञ्चु गतिपूजनयोरि॰त्यत्रैवोदाहृतम् । अञ्चते । आनञ्चे । अञ्चितासे । अञ्चिचिषते । पूर्वत्र गताविति पाठः क्रियाफलस्य कर्तृगामित्वे परस्मैपदार्थः । अचु इत्येकइति मैत्रेयः । क्षीरस्वामी अञ्चु गतौ, अञ्चि गतौ,विति द्वौ धातू पपाठ ॥ तत्र इदित्वप्रयोजनमञ्चित इत्यादौ नलोपाभावमाहुः । काश्यपमैत्रेयसंमताकारस्त्वस्य इदित्वं नानुमन्यन्ते, अञ्चुइति पठन् शाकटायनोपि उदित्पक्षएवानुकूलः तेन त्विदित्स्थानएव उदित्पठ्यते ॥ ८१३ ॥

टुयाचृ याञ्चायाम् ॥ याचति । ययाच । याचिता । याचते । ययाचे । यियाचिषते । यायाच्यते । यायक्ति । याचयते । अययाचत् । नाग्लोपीति ह्रस्वनिषेधः । न याचतइत्ययाची । यहादिषु याचृव्यंवहूप्रजवद्दसां प्रतिषिद्धानामिति पाठादिनिः । प्रतिषिद्धानां नञ्पूर्वाणामित्यर्थः । याचकः । द्वितो ऽथुच् । केचित् ड्वितं पठन्ति । तदपि प्रमाणं, तेन याचित्रमित्यपि भवति । याचितेन निर्वृत्तं याचितकम् । 'अपमित्य॰याचिताभ्यां कक्कना'विति तृतीयान्तात् निर्वृत्तमित्यत्यर्थे यथासंख्यात् कन् अपमित्यशब्दस्य अव्ययत्वात् न तृतीयास्तीति । याच्ञा । यजयाचित्यादिना नङ्, श्चुत्वम् । याच्यम् । 'यजयाचरुचप्रवचर्चश्चे'ति ण्यति कुत्वनिषेधः । निष्ठायामनिट्त्वम् । कुत्ववचनमितिवार्त्तिकमते कुत्वस्य नैव प्रसङ्गः ॥ ८१४ ॥

रेटृ परिभाषणे ॥ रेटति । रिरेट । रेटिता । रिरेटिषते । रेरेट्यते । रेरेट्टि । रेटयति । अरिरेटत् । ऋदित्त्वाच्चोपधाह्रस्वः ॥ रेटते । रिरेटे । इत्यादि । रेटित्वा । रेटितः ॥ ८१५ ॥

चते चदे याचने च ॥ चचात । चेततुः ॥ चतिता । अचतीत् । एदित्त्वाच्च वृद्धिः । चिचतिषति । चाचत्यते । चाचत्ति । चातयति ।

अचीचतत् । चतते । चेते । चिचतिषते । इत्यादि । चतित्वा । चतितः । चत्यम् । चकितर्कशसि इति यत् । चतुरः । मन्दिवाशीत्यादिनोरच् । न चतुरः, अविद्यमाना वा चतुरा यस्य अचतुरः । तस्य भावः । आचातुर्यम् । ब्राह्मणादिपाठात् ष्यञ् । न नञ्पूर्वात् तत्पुरुषात् इति निषेधोऽत्रैव अचतुरेति पर्युदासात् न भवति । चत्वारः । 'चतेरुरन्' इत्युरन् । 'चतुरनडुहोरामुदात्त' इति सर्वनामस्थाने आमागमः । तदन्तविधेरचेष्टत्वात् प्रियचत्वाः । प्रियचत्वाराविस्यादावाम् भवति । हे प्रियचत्वः । 'अम् संबुद्धा'वित्यमागमः । अयं समासएव । केवलस्य नित्यबहुवचनान्तत्वात् संबुद्ध्यभावात् । आमि 'षट्चतुर्भ्यश्चे'ति नुटि चतुर्णाम् । अत्रापि तदन्तविधिना परमचतुर्णामित्यत्रापि नुट् भवति । षट्चतुर्भ्य इति बहुवचननिर्देशात् यत्र संख्यायाः प्राधान्यं तत्रैवायमिति प्रियचतुरामित्यादौ अप्रधाने नुट् न भवति । चतुर्षु इत्यत्र 'रोः सुपी'ति नियमाच्च विसर्जनीयः । स्त्रियां 'त्रिचतुरोः स्त्रियां तिसृचतसृ' इति विभक्तौ चतस्रादेशे 'अचि र ऋत' इति अजादावृकारस्य पूर्वसवर्णदीर्घापवादे च रेफे चतस्रः इत्यादि । 'ऋन्नेभ्यो ङीप्' स्वस्रादिपाठात् 'न षट्स्वस्रादिभ्य' इति निषिध्यते । चतसृणामित्यत्र नुमचिरतृज्वद्भावेभ्यो नुट् पूर्वविप्रतिषेधेनेति नुट् । अजादिविभक्त्यभावे न रेफादेशः । नामि दीर्घो 'न तिसृचतसृ' इति प्रतिषेधाच्च भवति । चतस्रादेशस्तदन्तेऽपि भवति परमचतस्र इत्यादि । यत्र बहुव्रीह्यादिना समासस्यान्यलिङ्गत्वं तत्रापि चतुरर्थस्त्रीत्वाश्रयोऽयमादेशो भवति । प्रियाश्चतस्रो यस्य प्रियचतसा ब्राह्मणः । प्रियचतस्रावित्यादि । सावानङादेशः । अत्र 'अचि र ऋत' अयं परत्वात् पूर्वसवर्णत्वं बाधते । 'ऋतो ङिसर्वनामस्थानयो' र्गुणं बाधित्वा पूर्वविप्रतिषेधेन तेनाजादौ सर्वत्र रेफ एव भवति । अत्र 'नद्यृतश्चे'ति कप् सन्निपातपरिभाषया न भवति । कपि हि प्रकृतिविभक्त्योरानन्तर्यं विहन्यते । प्रियाश्चत्वारोऽस्याः प्रियचत्वा स्त्री । प्रियचत्वारावित्यत्र अङ्गस्य स्त्रीत्वेऽपि चतुरर्थस्यास्त्रीत्वात् चतस्रादेशो न भवति । चतुर्णां पूरणश्चतुर्थः । 'तस्य पूरणे डडि'ति 'डटि षट्कतिकतिपयचतुरां थुक्' तुर्यः तुरीयः 'चतुरः छयतावाद्यक्षरलोपश्चेति' पूरणार्थे छयतौ चाद्यक्षरलोप-

श्चेति चशब्दस्य लोपः । तुरीयं भिक्षायाः तुरीयभिक्षा । चतुर्थं भिक्षाया-श्चतुर्थभिक्षा । 'द्वितीयतृतीयचतुर्थतुर्याण्यन्यतरस्या'मिति द्वितीयादी-न्येकदेशवाचिना षष्ठ्यन्तेन सह वा समस्यन्ते इति तत्पुरुषः । एकदेशिस-मासः । अन्यदा षष्ठीसमासे भिक्षातुरीयं,भिक्षाचतुर्थमिति भवति । पूर्वनि-पातभेदः । चतुष्टयम् । 'संख्याया अवयवे तयबि'ति अवयवे वर्त्तमानायाः संख्याया अवयविनि तयप् । खरवसानयोः रेफस्य विसर्जनीये 'ह्रस्वात्तादौ तद्धित'इति तस्य षत्वं ष्टुत्वं तकारस्य जसि प्रथमचरमतयेति वा सर्वना-मत्वात् चतुष्टये, चतुष्टयाः । स्त्रियां टिड्ढाणञित्यादिना ङीप् । चतुष्टयी । चतुर्भुक्तं, चतुरो वारान् भुक्तमित्यर्थः । 'द्वित्रिचतुर्भ्यः सुजि'ति क्रियाभ्यावृत्ति-गणने कृत्वसुच् । 'रात्सस्ये'ति सकारलोपः । एककर्तृकाणां तुल्यजातीयानां क्रियाणां जन्मसंख्यानं क्रियाभ्यावृत्तिगणनम् । स्वाद्युत्पत्तिः । स्वरादिषु सुजितिपाठात् अव्ययत्वात् सुब्लुक् । चतुः करोति । चतुष्करोति । 'द्विस्त्रिश्चतुरिति कृत्वोर्थे'इति कृत्वोर्थे वर्त्तमानानामेषां विसर्जनीयस्य कुप्वोर्वा षत्वम् । अन्यदा 'कुप्वोः ≍क≍पौ चेति' विसर्जनीयजिह्वामूलीयौ । चतुष्कपालम् । चतुष्पात् । 'इदुदुपधस्य चाप्रत्ययस्य' इकारोकारोपधयोर्वि-सर्जनीययोः प्रत्ययसंबन्धितस्य तस्य कुप्वोः षत्वमिति षत्वम् । अविद्यमा-नानि विशिष्टानि शोभनानि चत्वारि यस्य सः अचतुरः। विचतुरः । सुचतुरः । अचतुरेत्यादीना बहुव्रीहौ अचि निपात्यन्ते । त्रयश्चत्वारो वार्था ऽन्य-पदार्थः । त्रिचतुराः। वृत्तिस्वाभाव्यात् संदिग्धेस्य वृत्तिः। चतुर्णा समीपे उपचतुराः। 'संख्ययाव्ययासन्नादूराधिकसंख्याः संख्येये' । अव्ययादीनि पूर्वप-दानि संख्येयवाचीनि संख्यया समस्यन्तइति बहुव्रीहिः । चतुरोचप्रकरणे त्र्युपाभ्यामुपसंख्यानमित्यच् समासान्तः । चात्वालः यत उत्तरवेद्यर्थाः पांसवो ह्रियन्ते तदुच्यते। स्याचतिमृजेरालञ्वालञालीयच इति यथासंख्यात् वालञ् । चत्वरम् । छित्वरचत्वरेति ष्वरचि निपात्यते । उणादिवृत्तौ छद अपवारण-इत्यस्य निपातनमुक्तम् । द्वितीयादिश्च पठ्यते । चदति । चदते इत्यादि ॥ ८१७ ॥

प्रोथृ पर्याप्तौ ॥ प्रोथति । पुप्रोथ । प्रोथिता । प्रोथते । इत्यादि । पुप्रोथिषति । पुप्रोथिषते । पोप्रोथ्यते । पोप्रोत्ति । प्रोथयति । अपुप्रोथत् । ऋदित्त्वाच्चोपधाह्रस्वः । प्रोथदश्वोऽतयवस इत्यत्र प्रोथति सूरति शब्द-द्श्वइवायमग्निरिति भट्टभास्करः । अयमेवाऽपप्रोथदुन्दुभेः दुच्छुनादित्यत्र प्रोथत् । यमारभ्यदुच्छुनात् दुरवलिप्तात् उपसर्गाद्धि तत्कारः प्रोथु पर्याप्तिग-तावित्याह । तदे अपुप्रोथनं कारणमिति । प्रोथः । 'हलश्चे'ति करणे घञ् ॥ ८१८ ॥

मिदृ मेदृ मेधाहिंसयोः ॥ अयं पाठो दिवादीनाम् । मेदति । मिमेद । मेदिता । मेदिष्यति । मिमिदिषति । मिमेदिषति । मिदित्वा । मेदित्वा । मेमिद्यते । मेमेत्ति । मेदयति । अमिमेदत् । मेदतइत्यादि द्वितीयस्य तु मिमेदतुरित्यादौ क्ङितोरेकारश्रवणं विशेषः । क्षीरस्वामी धान्तावेतौ । भिदादिसूत्रे मेधाशब्दं व्युत्पादयन् न्यासकारो धान्तावाह । भोजराजस्तु मेधिं नानुमन्यते । यदाह । अङ्विधौ रक्षिलिखिसिधिमिधि-गृहिभ्यो गुणश्चेति । कौमारश्चात्रैवानुकूलः । मेदत इतिवृत्तादौ खेदने गतः ॥ ८२० ॥

मेधृ संगमे च ॥ मेधति । मिमेध । मेधिता । मेधिष्यते इत्यादि । मेधृ सेचने । दिवादित्वादङ् । गृहमेधो देवतास्य गृहमेध्यम् । गृहमेधीयम् । द्यावापृथिवीत्यादिना छयतौ ॥ ८२१ ॥

णिदृ णेदृ कुत्सासंनिकर्षयोः ॥ नेदतीत्यादि, मिदृमेदृवत् । प्रणेद-ति । उपसर्गादिति णत्वम् । निन्दतीति कुत्सायां गतम् ॥ ८२३ ॥

शृधु मृधु उन्दने ॥ उन्दनं क्लेदनम् । शर्द्धति । शशर्द्ध । शशृधतुः । शर्द्धिता । शर्द्धते । शशृधे । इत्यादि । शिशर्द्धिषति । शरीशृध्यते । शरी-शर्द्धि । हौ हेर्द्धिः । झषस्तथोरिति धत्वे जश्त्वे, लोटि हौ शरीशृद्धि । लङि तिपि अशरीशर्त् । 'रात्सस्ये'ति नियमात् न संयोगान्तलोपः । सिपि तु जश्त्वे 'दश्चे'ति वा रुत्वे 'रो रि'लोपे ढ्रलोपइति दीर्घे अशरीशा इत्यपि भवति । एवं रुपिक्रोऽपि । शर्द्धयति । अशशर्द्धत् । अशीशृधत् । उदित्त्वाद्विट् । शर्द्धित्वा । शृद्ध्वा । शृद्धः । एवं मर्द्धतीत्यादि । मृधेश्च-

तादौ पाठः शब्दकुत्सायां क्रियाफलस्य चाकर्तृगामित्वेपि आत्मनेपदार्थः । तथा 'वृद्भ्यः स्यसनो'रिति स्यसनोर्लुटि च क्रियाफलस्य कर्तृगामित्वेपि परस्मैपदार्थः । तथा पुषादिद्युताद्लृदित्यङर्थश्च । वृतादिश्च द्युताद्यन्तर्गणः । तथा 'न वृद्भ्यश्चतुर्भ्य'श्चे'ति स्यसनोः परस्मैपदइण्निषेधार्थश्च ॥ ८२५ ॥

बुधिर् बोधने ॥ बोधति । बुबोध । बोधिता । अबुधत् । अबोधीत् । 'इरितो वे'त्यङ् विकल्पेन । बोधते । बुबुधे । इत्यादि । क्षीरस्वामी तु बुधेत्यनिरितं पपाठ । बोधतीति ज्वलादिः परस्मैपदी अवगमने गतः । अस्य तशब्दे दीपजनेति चिण्वेति अबोधिष्टेत्येव भवति । अत्र दैवादिकैर्निःत्यात्मनेपदिभिरकर्मकैः साहचर्यात् तादृश एव बुधिर्गृह्यते । तथा बुधयुधेत्यत्र युधनशजनैरकर्मकैः साहचर्याच्चास्य संग्रहः । स्पष्टं चैतदेव तत्र वृत्तौ । तेन बोधयति बोधयते इति भवति ॥ ८२६ ॥

उबुन्दिर् निशामने ॥ निशामनं चक्षुर्विज्ञानम् । बुन्दति । बुबुन्द । बुन्दिता । अबुन्दत् । अबुन्दीत् । बुबुन्दिषति । बोबुन्द्यते । बोबुन्ति । हौ ङित्त्वादनुनासिकलोपे बोबुद्धि । बुन्दते । बुबुन्दे इत्यादि । उदित्त्वात् क्त्वायामिड्विकल्पनात् । बुन्दित्वा । बुन्त्वा । निष्ठायां बुन्नम् । नलोपे रदाभ्यामिति निष्ठानत्त्वम् । बुद्बुदः । घञर्थे क्रुञादीनां के द्वे भवत इति द्विर्वचनम् । पृषोदरादित्वात् न हलादिशेषः ॥ ८२७ ॥

वेणृ गतिज्ञानचिन्तानिशामनवादित्रग्रहणेषु ॥ वादित्रग्रहणं नाम वादित्रस्य वाद्यभाण्डस्य वादनार्थं ग्रहणमिति क्षीरस्वामी । वेणति । विवेण । वेणिता । विवेणिषति । वेवेण्यते । वेवेण्टि । वेणयति । अविवेणत् । वेणते । विवेणे इत्यादि । वेणिः । वेणी । इन् । कृदिकारादक्तिन इति ङीष्वा । उत माता महिषमन्ववेनम् इत्यत्र भाष्यकारास्तवर्गपञ्चमान्तममुं पेठुः ॥ ८२८ ॥

खनु अवदारणे ॥ खनति । चखान । चख्नतुः । गमहनेत्यजादावुपधालोपः । तस्य 'द्विर्वचनेऽची'ति स्थानिवत्त्वात् द्विर्वचनम् । खनिता । खनिष्यति । अखनत् । खनेत् । खन्यात् । खायात् । 'जनसनखनां सञ्झलोः' 'ये विभाषे'त्यात्वम् । धातुपारायणे तु लोपो यीतिवत् ये वि-

भाषेति वर्णमात्रे निर्दिष्टव्ये य इत्यत्वतो निर्देशाद्दिमात्त्वं यण्यङ्कारेव न तु यासुटीत्युक्तम् । अखनीत् । अखानीत् । चिखनिषति । चङ्खन्यते । चाखायते । चङ्खन्ति । चङ्खातः । अनुनासिकस्येति दीर्घं परत्वात् बाधित्वा जनसनखनामित्यात्त्वं भवति । तत्र झल्ग्रहणं सनोत्यर्थं तस्यैव झलादेः सनः संभवात् तेन चिखनिषतीत्यत्रात्त्वाभावः । खानयति । अचीखनत् । खनते । चख्ने इत्यादि । खेयम् । 'ई च खन' इति क्यपि तत्संनियोगेन ईकारेऽन्तादेशे आद्गुणः । इइ इति प्रश्लेषेणेकारद्वयं विधीयते । एकस्मिन्विधीयमाने ये विभाषेत्यात्त्वाभावपक्षे सावकाशोऽसौ परेणान्तरङ्गेण चात्वेन बाध्येत यदि यकारादौ बुद्धिस्थ एव विधानादन्तरङ्ग ईकारः क्यप्संनियोगेन विधात् बहिरङ्गः । यदा तु 'ये विभाषे'ति परसप्तमी तदात्वमेव बहिरङ्ग,मीत्वं तु क्यप्संनियोगेन त्वनार्षमिति नार्थः प्रश्लेषेणात्वबाधनार्थेन, एवं च सूत्रेपि ह्रस्व एव पठितव्यः । नन्वेवमेकादेशस्य 'षत्वतुकोरसिद्ध' इत्यसिद्धत्वात् ह्रस्वाश्रयस्तुक् स्यात्, नैतत् । पदान्तपदाद्योरेकादेशोऽसिद्ध इत्येवं तत्र व्यवस्थापनात् । खनकः । खनकी । शिल्पिनि ष्वुन् । तत्र च नृतिखनिरञ्जिभ्य इति परिगण्यते । परितः खाता, परिखा । 'अन्येष्वपि दृश्यत' इति डः । खायते अनेनेति खनित्रम् । अर्तीत्यादिना करणे इत्रः । खात्वा । खनित्वा । उदित्त्वादनिट्पक्षे वलादिकित्परत्वात् पूर्ववदात्वम् । निखाय । 'ये विभे'ति आत्वं वा । खातः 'यस्य विभाषे'त्यनिट्त्वम् । खन्यतेनेन अत्रेति वा खनः । 'खनो घ चे'ति करणाधिकरणयोर्घः । चकारात् घञि आखानः । आखः । डो वक्तव्य इति डः । आखरः । डरो वक्तव्य इति डरः । इको वक्तव्य इतीकः । आखनिकः ॥ आखनिकबकः । इकबको वक्तव्य इति इकवकः । आखादयः खनित्रवचनाः । परिखा भवेदस्मिन्नस्य वा पारिखेयं स्थलम् । 'परिखाया ढञि'ति प्रथमान्तात् संभावनोपाधिकात् अस्यास्मिन्नित्यर्थे ढञ् । आखनती,त्याखुः । आङ्परयोःखनिशृभ्यां डिदिति उप्रत्यये डित्त्वाट्टिलोपः । मुखं डित् खनो मुट् चोदात्त इत्यच्प्रत्यये डित्त्वाट्टिलोपः । धातोर्मुडागमश्च । मुखे भवं, मुख्यम् 'दिगादिभ्यो यदि'ति यत्प्रत्ययः । इह पाठोऽशरीरावयवार्थः । शरीरावयवस्य तु

शरीरावयवत्वाद्यदित्येव सिद्धः । मुखमिव मुख्या । 'शाखादिभ्यो य' इति भवार्थे यः । मुखतो भवं मुखतीयम् । 'मुखपार्श्वतसोर्लोप' इति गहादिपाठाच्छप्रत्यये सलोपो यस्येति लोपः । परिमुखं भवं पारिमुख्यम् । 'अव्ययीभावाच्चे'ति । तत्र हि परिमुखादिभ्य उपसंख्यानमिति वार्त्तिकं तेन परिमुखादेरेवाव्ययीभावादयं प्रत्ययः । परिमुखं वर्त्तते पारिमुखिकः सेवकः । परिमुखं चेति द्वितीयान्तात् अस्माद्वर्त्तते इत्यस्मिन्नित्यर्थे ठक् । मुखस्य सदृश्यं यथामुखं, प्रतिबिम्बम् । समं मुखं संमुखम् । समशब्दः सर्वपर्यायः । यथामुखं दर्शनः यथामुखीनः । आदर्शादि । एवं संमुखस्य दर्शनः संमुखीनः । दर्शनइत्यधिकरणे ल्युट् । यथामुखसंमुखस्य दर्शनइति षष्ठ्यन्ताभ्यामाभ्यां दर्शनइत्यर्थे खः । अत एव सादृश्येपि निर्देशात् यथामुखमित्यव्ययीभावः । तथा समोन्त्यलोपश्च । अयं च लोपः प्रत्ययसंनियोगेनेति केवलो न प्रयोगार्ह इति व्याख्यातारः । यथामुखीना सीतायाइति भट्टिप्रयोगश्चिन्त्यः । गौरमुखा नाम काचित् 'नखमुखात् संज्ञाया'मिति स्वाङ्गलक्षणस्य पाक्षिकस्य ङीषो निषेधात् टाबेव । असंज्ञायां तु सुमुखी सुमुखा इत्युभयं भवति ॥ ८२९ ॥ (शेषमग्रे)

॥ श्रीः ॥

श्रौतपदार्थनिर्वचनम् ।

अथ पाशुकपदार्थानां नामान्युच्यन्ते ।

(*Continued from page* 407 Vol VII.)

२२७ होता अग्निष्वात्ताः पितर एह गच्छतेति तिसृभिर्ऋग्भिः प्रत्यङ्मुखः प्रवर्त्तीं स्थालीमुपतिष्ठते । एतत् स्थाल्युपस्थानमित्युच्यते ॥

२२८ अथाङ्गयागः । तत्र त्वंह्यग्ने प्रथमो मनोतेति सूक्तं सामिधेनीवन्मैत्रावरुणोन्वाह । अश्विना गोभिरिन्द्रियमश्वेभिर्वीर्यं बलम् । हविषेन्द्रꣳ सरस्वती यजमानमवर्धयोम्३ । इत्यनुवाक्या ।

होता यक्षदश्विनौ छागस्य हविष आत्ताम्०गृभः । घस्ता-नूनं० करत एवाश्विनौ जुषेतां० हविर्होतर्यज । इति प्रैषः । ये० सुवस्ता नासत्या सुपेशसा हिरण्यवर्तनी नरा । मध्य वसा-होमार्थमवसायोत्तरार्धं पठति । सरस्वती हविष्मतीन्द्रकर्मसु-नोवता३ वौ३० । वा०वष० । अयमाश्विनहविःप्रचार इत्युच्यते ।

२२६ ता भिषजा सुकर्मणा सा सुदुघा सरस्वती स वृत्रहा शतक्रतु-रिन्द्राय दधुरिन्द्रियोम्३ । इत्यनुवाक्या । होता यक्षन्मेषस्य हविषआद०गृभः । घस्तान्नूनम्० करदेवेन्द्रःसरस्वती सरस्वती जुषतां हविर्होतर्यज । इति प्रैषः । ये०सुवस्ताभिषजा सुकर्मणासा सुदुघा सरस्वती । स वृत्रहा शतक्रतुरिन्द्राय दधुरिन्द्रियं ३ वौ३० । वा०वष । अयं सारस्वतहविःप्रचार इत्युच्यते ।

२३० ता भिषजा सुकर्मणा सा सुदुघा सरस्वती । स वृत्रहा शतक्रतु-रिन्द्राय दधुरिन्द्रियोम्३ । होता यक्षदिन्द्रं वृष्णोमेषस्य हविष आद०गृभः । घस्तान्नूनं०करदेवेन्द्रो जुषतां० हविर्होतर्यज । इति प्रैषः । ये३० सुवरश्विना गोभिरिन्द्रियमश्वेभिर्वीर्यं बलम् । हविषेन्द्रं० सरस्वती यजमानमवर्धया३ न्वौ३० । वा०वष । इति याज्या । अयमैन्द्रहविःप्रचार इत्युच्यते ॥

२३१ वनस्पतियागे स्विष्टकृत्कारे देवतानिगमे यथार्थमूहः । पुरोडा-शानां प्रैषाभावात् अप्रैषित एव होता यजति । य इन्द्र इन्द्रियं दधुः सविता वरुणो भगः । स सुत्रामा हविष्पति-र्यजमानाय सश्चतोम्३ । होतैवेमामनुवाक्यां पठति । ये०सु-वरिन्द्रं सविता वरुणो दधद्यजमानाय दाशुषे । आदत्त नमुचे-र्वसु सुत्रामा बलमिन्द्रियां३ वौ३० । वा०व० । इति याज्या । अयं सौत्रामण्यङ्गेन्द्रपुरोडाशयाग उच्यते ॥

२३२ सविता वरुणो दधत्सुत्रामा बलमिन्द्रियोम्३ । इत्यनुवाक्या । ये०सुव: सवितारं वरुणः क्षत्रमिन्द्रियं दधुः स० यदधाना यजमानायतार वो ३० । वा॰वष० । इति याज्या । अयं सौत्राम-ण्यङ्गसावित्रपुरोडाशयाग उच्यते ॥

२३३ वरुणः क्षत्रमिन्द्रियं भगेन सविता श्रियम् । सुत्रामा यशसा बलं दधाना यज्ञमाशतोम्३ । इत्यनुवाक्या ये०सुववरुणं य इन्द्र इन्द्रियं दधु० यजमानायसश्चतार वो ३० । वा॰व० । इति याज्या अयं सौत्रामण्यङ्गवारुणपुरोडाशयाग उच्यते ॥

२३४ पशुभिः प्रचर्य पुरोडाशेन प्रचरन्तीति वचनाद्धविःप्रचारानन्तरं पुरोडाशप्रचारः । अथानुयाजाः । देवं बर्हिः सरस्वती सुदेवमिन्द्रे अश्विना तेजो न चक्षुरक्ष्योर्बर्हिषा दधुरिन्द्रियं वसुवने वसुधेयस्य वियन्तु यज ॥ १ ॥ देवीर्द्वारो अश्विना भिषजेन्द्रे-सरस्वतीप्राणं न वीर्यं न सिद्वारो दधुरिन्द्रियं वसु०वियन्तु यज ॥ २ ॥ देवी उषासावश्विना भिषजेन्द्रेसरस्वती बलं न वाचमास्य उषाभ्यां दधुरिन्द्रियं वसु०वियन्तु यज ॥ ३ ॥ देवी जोष्ट्री अश्विना सुत्रामेन्द्रेसरस्वती श्रोत्रं न कर्णयोर्यशो जोष्ट्रीभ्यां दधुरिन्द्रियं वसुव०वियन्तु यज ॥ ४ ॥ देवी ऊर्जाहुती दुघे सुदुघे पयसेन्द्रꣳसरस्वत्यश्विना भिषजा वतशुक्रं न ज्योतिः स्तनयोराहुती धत्त इन्द्रियं वसु०वीतां यज ॥ ५ ॥ देवा देवानां भिषजा होताराविन्द्रमश्विना वषट्कारैः सरस्वतीत्विषिं न हृदयेमतिꣳहोतृभ्यां दधुरिन्द्रियं वसु०वीतां यज ॥ ६ ॥ देवीस्तिस्रस्तिस्रोदेवीः सरस्वत्यश्विना भारतीडा शूषं न मध्ये नाभ्यामिन्द्रायदधुरिन्द्रियं वसुवने०वियन्तु यज ॥ ७ ॥ देव इन्द्रो नराशꣳसस्त्रिवरूथः सरस्वत्याश्विभ्यामीयतेरथोरेतो न

रूपममृतं जनिषमिन्द्राय त्वष्टा दधदिन्द्रियाणि वसुवने वसुधेयस्य वियन्तु यज ॥ ८ ॥ देव इन्द्रो वनस्पतिर्हिरण्यपर्णो अश्विभ्याᳪ सरस्वत्याः सुपिप्पल इन्द्राय पच्यते मधुना। न भूतिमृषभो न भामं वनस्पतिर्नो दधदिन्द्रियाणि वसुवने वसुधेयस्य वियन्तु यज ॥ ९ ॥ देवं बर्हिर्वारितीनामध्वरे स्तीर्णमश्विभ्यामूर्णम्रदाः सरस्वत्या स्योनमिन्द्र ते सदईशायै मन्युᳪ राजानं बर्हिषा दधुरिन्द्रियं वसुवने वसुधेयस्य वियंतु यज ॥ १० ॥ देवो अग्निः स्विष्टकृद्देवान्यक्षद्यथा यथᳪ होताराविन्द्रमश्विना वाचा वाचᳪ सरस्वतीमग्निᳪ सोमᳪ स्विष्टकृत्स्विष्ट इन्द्रः सुत्रामा सविता वरुणो भिषगिष्टो देवो वनस्पतिः स्विष्टा देवा आज्यपा इष्टो अग्निरग्निना होता होत्रे स्विष्टकृद्यशो न दधदिन्द्रियमूर्जमपचितिᳪ स्वधां वसुवने वसुधेयस्य वियन्तु यज ॥ ११ ॥ एते एकादश पिशवनुयाजप्रैषा उच्यन्ते ॥

२३५ एतेषामेकैकेन क्रमेण मैत्रावरुणो होतारम्प्रेष्यति । होता तु एतैरेव यजेत्यस्य स्थाने वषट्कारं कृत्वा क्रमेण यजति । अग्निमद्य होतारमवृणीतायᳪ सुतासुती यजमानः पचन्पक्तीः पचन्पुरोडाशान् गृह्णन् ग्रहान् गृह्णन्नग्नय आज्यं गृह्णन्सोमायाज्यं बध्नन्नश्विभ्यां छागᳪ सरस्वत्या इन्द्राय बध्नन्त्सरस्वत्यै मेषमिन्द्रायाश्विभ्याᳪ बध्नन्निन्द्रायर्षभमश्विभ्याᳪ सरस्वत्यै सूपस्था अद्य देवो वनस्पतिरभवदग्नय आज्येन सोमायाज्येनाश्विभ्यां छागेन सरस्वत्या इन्द्राय सरस्वत्यै मेषेणेन्द्रायाश्विभ्यामिन्द्रायर्षभमश्विभ्याᳪ सरस्वत्या अघᳪस्तामेदस्तः प्रतिपचताग्रभीषुरवीवृधन्त ग्रहैरपातामश्विना सरस्वतीन्द्रः सुत्रामा वृत्रहा सोमान्सुराम्ण उपो क्थामदाश्नेद्गीमदा अदन्नवीवृधन्ताऋुवेस्त्वामद्य ऋषभार्षेयर्षीणां न पादवृणीतायᳪ सुतासुती यजमानो बहु-

भ्यश्चावहृथेभ्यः । एषमेदे०सूक्ता३ ब्रू३हि । अनेन मैत्रावरुणो होतारं प्रेष्यति । अयं सौत्रामणीसूक्तवाकप्रैष उच्यते ॥

२३६ अनेन प्रैषेण प्रेषितो होता सूक्तवाकं पठति । तत्र विशेषः । आज्यभागदेवतावाहनानन्तरम् । अश्विनाविदं हविरजुषेता-मवीवृधेतां महो ज्यायोऽक्राताम् । सरस्वतीदंहविरजुषतावी-वृधतमहो ज्यायोकृत । इन्द्र इदं हविरजुषता०कृत । वनस्पतिरिदमित्यादि निरूढवत् । अथ सौत्रामण्यङ्गपितृयज्ञः । तत्प्रकारः सर्वे आश्वलायनोक्तः लुप्तजपेत्याश्वलायनवचना-न्मयि गृह्णामीत्यादिजपानां लोपः नेह प्रादेश इत्यादिना प्रादेशकरणादिनिषेधश्च । दक्षिणामुखास्तिष्ठन् अभिहिङ्कृत्य-उशन्तस्त्वानिधीमहीत्यृचं त्रिरनवानमन्वाहता: सामिधेन्यो-भवन्ति । तृतीयप्रणवेन सह आ३वह देवान्पितॄन्यजमानायेत्य-स्यानुषङ्गः । आज्यभागदेवतावाहनानन्तरं सोमं पितृमन्तमा३-वह । पितॄन्बर्हिषदआ३वह । पितॄनग्निष्वात्ताना३वह । देवा२ आज्यपा२ आ३वह । अग्निं कव्यवाहनमा३वह । इत्यावाहने विशेषः । सीदहोतरित्यध्वर्युणोक्ते तूष्णीं निरस-नोपवेशने करोति । सुगादापने विशेषः । ईळामहे देवान्पितॄ-नीळेन्यानित्यादि । बर्हिर्वर्जं चत्वारः प्रयाजा भवन्ति । उत्त-मप्रयाजे विशेषः । ये०सुत्रः स्वाहाऽग्निं स्वाहा सोमं स्वाहा सोमं पितृमन्तं स्वाहा पितॄन्बर्हिषदः स्वाहा पितॄनग्निष्वात्तान् स्वाहाग्निं कव्यवाहनं स्वाहा देवान् पितॄनाज्यपानित्यादि । आनो अग्ने सुकेतुनेत्याग्नेयाज्यभागस्यानुवाक्या । त्व२ सोममह-हेभगमिति सौम्यस्यानुवाक्या । जुषाण इत्यादिरुभयोः पूर्व-

वद्याज्ये । अनयोरनुवाक्ययोर्जीवपदसत्वात् इमावाज्यभागौ जीववन्ताविति्युच्येते ।

२३७ त्वꣳ सोम प्रचिकितो मनीषेति त्वया हि नः पितरः सोम- पूर्वे इति च द्वे ऋचो एकानुवाक्या भवति अध्यर्धामनवानम् । ये० सुवः सोमं पितृमन्तं त्वꣳ सोमपितृभिः संविदानो० रयीꣳ स्वाऽधानमः । इति सोमस्य पितृमतो याज्यानुवाक्ये । बर्हिषदः पितर ऊत्यर्वागिति आहं पितृन्त्सुविदत्राꣳ अवित्सीति च पूर्ववदनुवाक्या । उपहूताः पितरः सोम्यास इति याज्या । इति पितृणां बर्हिषदम् । अग्निष्वात्ताः पितर एह गच्छतेति ये अग्निष्वात्ता येऽनग्निष्वात्ता इति च मिलित्वाऽनुवाक्या । वन्याये दुग्ध इत्यादिर्याज्या । इति पितृणामग्निष्वात्तानाम् । याज्याया आदौ ये स्वधामह इति ये यजामह इत्यस्य स्थाने प्रयुज्यते । अवघ्राणभक्षणम् । सुसन्दृशं त्वा वयमित्यादिनोपस्थानादि सर्वं चातुर्मास्यान्तर्गतपितृमेधवद्भवति । इन्द्राय वयोधसे पशिवषष्ठ्यादि सर्वं निरूढवत् । आज्यभागावाहनानन्तरं इन्द्रं वयोधसमाऽवह । वनस्पतिमित्यादि निरूढवत् । प्रयाजेषु विशेषः । होतायक्षदिडस्पदे समिधानं महद्यशः सुषमिद्धं वरेण्यमग्निमिन्द्रं वयोधसम् । गायत्रीं छन्द इन्द्रियं त्र्यविं गां वयोदधद्वेत्वाज्यस्य होतर्यज ॥ १ ॥ ये० सुवःसमिद्धो अग्निः समिधासुषमिद्धो वरेण्यः । गायत्रीं छन्दइन्द्रियं त्र्यविर्गौर्वयोदधूऽर्वौ३० । वाम्ब० । होतायक्षच्छुचिव्रतं तनूनपातमुद्भिदं यं गर्भमदितिर्दधे शुचिमिन्द्रं वयोधसम् । उष्णिहं छन्द इन्द्रियं दित्यवाहं गां वयोदधद्वे०- यज ॥ २ ॥ ये०सुवस्तनूनपाच्छुचिव्रतस्तनूपाच्च सरस्वती ।

उष्णिहं छन्द इन्द्रियं दित्यवाहं गां वयो दधू३वौ३ । वा०य० । द्वितीयप्रयाजप्रैषयाज्ययोर्वसिष्ठादिषु तदितरेषु च प्रवृत्तिः । अन्यस्यानुक्तत्वात् । होतायक्षदीडेऽन्यमीडितं वृत्रहं तममिडाभिरीड्य९ सहः सोममिन्द्रं वयोधसम् । अनुष्टुभं छन्द इन्द्रियं त्रिवत्सो गौर्वयो दधद्वे०यज ॥ २ ॥ ये०सुवरिडाभिरग्निरीड्यः सोमोदेवो अमर्त्यः । अनुष्टुप् छन्द इन्द्रियं त्रिवत्सो गौर्वयोदधू३वौ३० । वा०व० ॥ २ ॥ होतायक्षत्सुबर्हिषदं पूषण्वन्तममर्त्य९ सीदन्तं बर्हिषि प्रियेऽमृतेन्द्रं वयोधसम् । बृहतीछन्द इन्द्रियं पञ्चाविं गां वयोदधद्वे० यज ॥ ४ ॥ ये० सुव: सुबर्हिरग्निः पूषण्वा९ स्तीर्णं बर्हिरमर्त्यः । बृहतीछन्द इन्द्रियं पञ्चाविर्गौर्वयोदधू३वौ३० । वा०य३० ॥ ४ ॥ होतायक्षद्व्यचस्वतीः सुप्रायणा ऋतावृधो द्वारो देवीर्हिरण्ययीर्ब्रह्माण इन्द्रं वयोधसम् । पंक्तिश्छन्द इहेन्द्रियं तुर्यवाहं गां वयोदधद्वे०यज ॥ ५ ॥ ये०सुवर्द्वुरो देवीर्दिशो महीः ब्रह्मा देवो बृहस्पतिः । पंक्तिश्छन्द इहेन्द्रियं तुर्यवाड्गौर्वयोदधू३वौ३० । वा०व० ॥ ५ ॥ वायक्षत्० वाहं गां वदध०यज ॥ ६ ॥ ये०सुवदुषेपह्वा सुपेशसा विश्वे देवा अमर्त्याः । त्रिष्टुप् छन्द इन्द्रियं पष्ठवाड्गौर्वयोदधू३वौ३० । वा०य० ॥ ६ ॥ होतायक्षत्प्रचेसा देवानामुत्तमं यशो होतारा दैव्या कवी सयुजेन्द्रं वयोधसम् । विराजं छन्द इहेन्द्रियमनड्वाहं गां वयोदधद्वे०यज ॥ ७ ॥ ये०दैव्या होतारा भिषजेन्द्रेण सयुजायुजा । जगतीछन्द इहेन्द्रियमनड्वान् गौर्वयोदधू३वौ३० ॥ ७ ॥ वा०व० ॥ होतायक्षत्पेशस्वतीस्तिस्रो देवीर्हिरण्ययीर्भारतीर्बृहतीर्महीः पतिमिन्द्रं वयोधसम् । विराजं छन्द इन्द्रियं धेनुं गां वयो दधद्वेत्वाज्यस्य हो-

तर्यज ॥ ८ ॥ ये३०सुवस्तिस्र इडा सरस्वती भारती मरुतो विशः । विराट् छन्द इहेन्द्रियं धेनुर्गौ र्वयोदधू३र्वौ३० ॥ ८ ॥ वाग्व०होतायक्षत्सुरेतसं त्वष्टारं पुष्टिवर्धनꣳ रूपाणि बिभ्रतं पृथक् पुष्टिमिन्द्रं वयोधसम् । द्विपदं छन्दइन्द्रियमुक्षाणं गां वयो दधद्वे० ॥ ६ ॥ ये३०सुवस्त्वष्टा तुरीयो अद्भुत इन्द्राग्नी पुष्टिवर्धना । द्विपाच्छन्द इहेन्द्रियमुक्षा गो न वयोदधू३र्वौ३० ॥ ६ ॥ वाग्वष० ॥ होतायक्षन्क्रतुꣳ हिरण्यपर्णमुक्थिनꣳ रशनां बिभ्रतं वशिं भगमिन्द्रं वयोधसम् । ककुभं छन्द इहेन्द्रियं वशां वेहतं गां न वयोदधद्वे० ॥१०॥ ये०सुवः शमितानोवनस्पतिः सवितः प्रसुवन् भगम् । ककुप्छन्द इहेन्द्रियमुक्षागोर्नवयोदधू३र्वौ३० ॥ १० ॥ वाग्वष० ॥ ततो मैत्रावरुणस्याग्निर्होता नो अध्वर इत्यादि पर्यग्निकरणानुवचनं निरूढवत् । होतुर्दैव्याः शमितार आरभध्वमित्यादि ऐन्द्रपशुवत् । ततो मैत्रावरुण एकादशं प्रयाजप्रैषं पठति । स यथा । होतायक्षत्स्वाहाकृतीरग्निं गृहपतिं पृथग्वरुणं भेषजं कविं क्षत्रमिन्द्रं वयोधसम् । अतिच्छन्दसं छन्द इहेन्द्रियं बृहदृषभं गां वयो दधद्वे० ॥ ११ ॥ ये३य०सुवः स्वाहा यज्ञं वरुणः सुक्षत्रो भेषजं करत् । अतिच्छन्दाश्छन्द इन्द्रियं बृहदृषभो गो वयोदधू३र्वौ३० ॥ ११ ॥ वाग्वष० ॥ आज्यभागप्रचारो निरूढवत् । अथ वपायागः । वसन्तेनर्तुना देवा वसवस्त्रिवृतास्तुतम् । रथंतरेण तेजसा हविरिन्द्रे वयोदधोम्३ । इयमनुवाक्या । होतायक्षदिन्द्रं वयोधसं छागस्य वपाया मेदसो जुषताꣳ हविर्होतर्यज ॥ अयं प्रैषः । ये३य०सुवर्ग्रीष्मेण देवा ऋतुना रुद्राः पञ्चदशेस्तुतम् । बृहता यशसा बलꣳ हविरिन्द्रे वयोदधू३र्वौ३० ॥ वाग्वष० ॥

इयं याज्या । वपामार्जनं पूर्ववत् । अथ पुरोडाशयागः । वपाभिर्ऋतुनादित्यास्तोमे सप्तदशे स्तुतम् । वैरूपेण विशौजसा हविरिन्द्रे वयोदधोम्३ । इयमनुवाक्या । होतायक्षदिन्द्रं वयोधसं पुरोडाशस्य जुषताᳪं हविर्होत यज ॥ अयं प्रैषः । शारदेनर्तुना देवा एकविᳪंशऋभवस्तुतम् । वैराजेन श्रियाश्रियᳪं हविरिन्द्रे वयोदधू३वौ३० । ये३ सुवर्गिनᳪं सुदीतिᳪं सुदृशं गृणन्तो नमस्यामस्त्वेडं जातवेदः । त्वां दूतमरतिᳪं हव्यवाहं देवा अकृण्वन्नमृतस्य नाभी३ वौ३ । इयं पुरोडाशस्विष्टकृतो याज्या । वाग्वष० ॥ अथाज्ययागः । हेमन्तेनर्तुना देवा मरुतस्त्रिणवे स्तुतम् । बलेन शक्करीः सहो हविरिन्द्रेवयोदधोम्३ । इयमनुवाक्या । होतायक्षदिन्द्रं वयोधसं छागस्य हविष आददद्यमध्यतो मेदउद्भृतम्० घस्ताम्० करदेवेन्द्रो वयोधा जुषतां यज । अयं प्रैषः । ये३० सुवःशैशिरेणर्तुना देवास्त्रयस्त्रिᳪंशऋभवस्तुतम् । अथैवं वसाहोमार्थमारभेत् रैवतेन श्रियाश्रियᳪं हविरिन्द्रेवयोदधू३ वौ३० ॥ वाग्वष० । वनस्पतियागादि पूर्ववत् । अथानुयाजाः । देवं बर्हिरिन्द्रं वयोधसं देवमिन्द्रमवर्धयद्गायत्रिया छन्दसेन्द्रियं तेज इन्द्रे वयोदधद्व० वेतु० ॥ १ ॥ देवीर्द्वारो देवमिन्द्रं वयोधसं देवीर्देवमवर्धयन्नुष्णिहाछन्दसेन्द्रियं प्राणमिन्द्रे वयोदधद्व०व्यन्तु० ॥ २ ॥ देवीदेवं वयोधसमुषे इन्द्रमवर्धतामनुष्टुभा छन्दसेन्द्रियं वाचमिन्द्रे वयोदधद्व० वीताम्० ॥ ३ ॥ देवी जोष्ट्री देवमिन्द्रं वयोधसं देवीदेवमवर्धतां बृहत्याछन्दसेन्द्रियᳪं श्रोत्रमिन्द्रे वयोदधद्व० वीताम्० ॥ ४ ॥ देवी ऊर्जाहुती देवमिन्द्रं वयोधसं देवी देवमवर्धतां पङ्क्त्याच्छन्दसेन्द्रियᳪं शुक्र-

मिन्द्रे वयोदधद्व० वीताम्० ॥ ५ ॥ देवा दैव्या होतारा देव-मिन्द्रं वयोधसमवर्धतां त्रिष्टुभाछन्दसेन्द्रियं बलमिन्द्रे वयोद-धद्व० वीताम्० ॥ ६ ॥ देवीस्तिस्रस्तिस्रो देवी देवर्वयोधसं पतिमिन्द्रमवर्धयन् जगत्याछन्दसेन्द्रियं बलमिन्द्रे वयोदध-द्व०व्यन्तु० ॥ ७ ॥ देवो नराशंसो देवमिन्द्रं वयोधसन्देवो देवमवर्धयद्विराजा छन्दसेन्द्रियꣳ रेतइन्द्रेवयोदधद्व० वेतु० ॥ ८ ॥ देवो वनस्पतिर्देवमिन्द्रं वयोधसं देवो देवमवर्धद्वि-राजा छन्दसेन्द्रियं भगमिन्द्रेवयो दधद्व० वेतु ॥ ९ ॥ देवं बर्हिर्वारितीनां देवमिन्द्रं वयोधसं देवं देवमवर्धत्ककुभा छन्द-सेन्द्रियं यश इन्द्रे वयोदधद्व० वेतु० ॥ १० ॥ देवो अग्निः स्विष्टकृद्देवमिन्द्रं वयोधसं देवोदेवमवर्धयदतिच्छन्दसा छन्द-सेन्द्रियं क्षत्रमिन्द्रे वयोदध०द्व०वेतु० ॥ ११ ॥ एते एकाद-शानुयाजप्रैषाः' एषामेकैकेन मैत्रावरुणो होतारं प्रेष्यति । होता च एतैः प्रैषै र्यजशब्दस्थाने वषट्कारयुतैर्याज्याभूतैः क्रमेण यज-ति । सूक्तवाके आज्यभागानन्तरं इन्द्रो वयोधा इदꣳ हवि-रजुषतावीवृधतमहो ज्यायोकृत । इति विशेषः । अन्यत्सर्वं निरूढवत् । अथादित्येष्टिः । तत्रादितिर्देवता । चरुर्द्रव्यम् । अदितिर्न उरुष्यतीत्यनुवाक्या । महीमूषुमातरं सुव्रतानामिति याज्या । उपदेशादितराणीति वचनात्सर्वं याजुषवत् । शेषं प्रकृतिवत् ॥ इदं कोकिलसौत्रामणीहोतृमैत्रावरुणकर्मेत्युच्यते ॥

॥ शुभं भूयात् ॥

॥ श्रीः ॥

॥ श्रीं नमः श्रीमते भगवते रामानुजाचार्याय ॥

अथ श्रीभाष्यं विशिष्टाद्वैतपरं रामानुजदर्शनम्

श्रुतप्रकाशिकासमेतं विषमपदटिप्पणीसहितम्

तत्र प्रथमाऽध्यायस्यावशेषः ।

(*Continued from page* 445. Vol VII.)

मू० कर्माङ्गाश्रयाण्युद्गीथाद्युपासनान्यत्रैव चिन्त्यन्ते, तदन-धिगतकर्मणो न शक्यं कर्त्तुमिति चेत्, अनभिज्ञो हि भवाञ्छारीरकशास्त्रविज्ञानस्य,

टी० ॥ एवं हानार्थमपि कर्मणो ज्ञातव्यत्वं निषिद्धम् उपादानार्थ-मपि न ज्ञातव्यमित्युपपादयितुं वेदान्तमात्रबुभुत्सोरपि कर्मविचारापेक्षां शङ्कते "कर्माङ्गे" ति । एकस्य साम्नः पञ्च भागाः सन्ति ते प्रस्तावोद्गीथप्रति-हारोपद्रवनिधनाख्याः । एते भागा भक्तिशब्दाभिधेयाः । तासु पञ्चसु भक्तिषु प्रस्तावो हिङ्कारपूर्वङ्गीयते, उद्गीथः प्रणवपूर्वङ्गीयते, तत्र पञ्चविधसामोपा-सनं क्वचिद्विधीयते "लोकेषु पञ्चविधं सामोपासीते" ति, क्वचित्सामावयवेषु पञ्चस्वेकैकावयवोपासनं विधीयते, क्वचिच्चावयवावयवभूतप्रणवाद्युपासनं विधीयते, तत्रोद्गीथावयवभूतप्रणवोपासनं विधीयते "ओमित्येतदक्षरमुद्गीथ-मुपासीते" ति । कर्माङ्गाश्रयाणि—कर्माङ्गभूतोद्गीथादिविषयाणि, अनधिगत-कर्मणा उद्गीथाद्युपासनं चिन्तनं न शक्यं कर्तुमिति प्रतिज्ञा । कर्माङ्गाश्रया-णीति हेतुगर्भविशेषणम् । कर्माङ्गोद्गीथाद्याश्रयाण्युपासनानीत्युक्ते सति हेता-वुद्गीथशब्दस्य वैयर्थ्यं स्यात्, उपासनमात्रस्य च पक्षीकारः प्रतीयेत, अतोय-थोक्तैव वचनव्यक्तिर्युक्ता । अनधिगते कर्मण्युद्गीथादिविषयोपासनचिन्ताया-अशक्यत्वात् कर्मविचारापेक्षितइति चेदित्यर्थः । सोपालम्भं परिहरति "अन-भिज्ञ" इति । शास्त्रे प्रधानतया प्रतिपाद्यं ज्ञानमिति त्वया न ज्ञातमित्यर्थः ।

मू० अस्मिन् शास्त्रे ऽनाद्यविद्याकृतविविधभेददर्शननिमित्त-

जन्मजरामरणादिसांसारिकदुःखसागरनिमग्नस्य निखिलदुःखमूलभूतमिथ्याज्ञाननिवर्हणायात्मैकत्वविज्ञानं प्रतिपिपादयिषितम् । अस्य हि भेदावलम्बिकर्मज्ञानं क्वोपयुज्यते, प्रत्युत विरुद्धमेव ॥

टी० ॥ अत्र किं प्रधानप्रतिपाद्यं ज्ञान?मित्यत्राह "अस्मिन्निति । भेदो ज्ञातृज्ञेयज्ञानरूपः, वैविध्यन्तदवान्तरभिदाबाहुल्यम्, एवंविधभेददर्शनस्य हेतुरविद्या । तस्याः कोहेतु?रित्यनवस्थापरिहारार्थमनादि–शब्दः । एवमविद्याकृतभेददर्शननिमित्तकं जन्मजरामरणादिकमेव सांसारिकं दुःखम् । आदि–शब्देन नरकगर्भवासादिग्रहणम् । संसारः प्रकृतिसंबन्धः, तत्प्रभवं सांसारिकम् । निरसनीयत्वाय दुःखस्वरूपत्वोक्तिः । सागर—शब्दस्तदानन्त्यपरः, "निमग्नस्ये"ति दुःखनिवृत्त्युपायापेक्षाहेतुतयोक्तमधिकारिस्वरूपमुक्तम् । प्रयोजनमाह "निखिले"ति मिथ्याज्ञानं–भ्रान्तिज्ञानं "दुःखजन्मप्रवृत्तिदोषमिथ्याज्ञानानामुत्तरोत्तरापाये तदनन्तरापाया"दिति प्रयोगात् भ्रान्तिज्ञानं च भेददर्शनम् । यद्वा मिथ्याभूतमज्ञानं मिथ्याज्ञानम्, ज्ञाननिवर्त्यत्वाय मिथ्या–शब्दः, "तस्य निवर्हणाय" तन्निवर्हणमेव मोक्ष इत्यभिप्रायः, तत्साधनं कि?मित्यत्राह "आत्मैकत्वविज्ञान"मिति सर्पभ्रमस्य रज्जुयाथात्म्यज्ञानं हि निवर्त्तकम् न तु कर्मविशेषः, एवं भेददर्शनस्याविद्याकृतत्वादैक्यज्ञानमेव तन्निवर्त्तकमिति तत्रैव तात्पर्यं वेदान्तवाक्यानामित्यर्थः, ततः किमित्यत्राह "अस्य ही"ति "क्वोपयुज्यते" न कुत्रचित् ज्ञानस्वरूपोत्पत्तौ तत्फलोत्पत्तौ ज्ञानोत्पत्तिसाधनानुग्रहे वा नोपयुज्यत इत्यर्थः, न केवलमुपयोगाभावः प्रतिकूलत्वमपीत्याह "प्रत्युते"ति द्वैतवासनाजनकत्वादित्यभिप्रायः ।

मू० उद्गीथादिविचारस्तु कर्मशेषभूत एव ज्ञानस्वरूपस्याविशेषादिहैव क्रियते, स तु न साक्षात्सङ्गतः, अतो यत्प्रधानं शास्त्रं तदपेक्षितमेव पूर्ववृत्तं किमपि वक्तव्यं, बाढं

तदपेक्षितं च कर्मज्ञानमेव कर्मसमुच्चिताज्ज्ञानादपवर्गश्रुतेः ।

टी० ॥ तथाप्युपनिषत्स्वधीतत्वाद् ब्रह्ममीमांसायां निरूप्यमाणत्वाच्चोद्गीथाद्युपासनं ब्रह्मविद्यापेक्षितमित्युद्गीथादिविचारः साक्षात्सङ्गत इत्यत्राह "उद्गीथादी"ति तर्हि कथमुपनिषत्स्वध्ययनं ब्रह्मविचारे तद्विचारश्चेत्यत्राह "ज्ञानस्वरूपत्वाविशेषादि"ति ज्ञानस्वरूपत्वसाम्यात् बुद्धिस्थतया कृतः, न तु प्रधानार्थोपयोगित्वादिति भावः । ततः किं? मित्यत्राह "सत्त्वि"ति तु-शब्दद्वयं शङ्काद्वयव्यावर्त्तकम् । प्रधानप्रतिपाद्योपयुक्तस्यैव पूर्ववृत्तत्वं निगमयति "अत"इति "किमपि" कर्मविचाराद्न्यदिति भावः प्रधानार्थोपयोगित्वेन सङ्गतिः साक्षात्सङ्गतिः । येन केनाप्याकारेण साम्याद्बुद्धिस्थत्वं प्रसङ्गात्सङ्गतिः, अतः प्रासङ्गिकोद्गीथाद्युपासनचिन्तापेक्षितस्य प्रधानार्थविरुद्धस्य कर्मविचारस्य न पूर्ववृत्तता युक्ता अपि तु प्रधानप्रतिपाद्यात्मैकत्वविज्ञानापेक्षितमेव किमपि वृत्तं वक्तुं युक्तमित्युक्तं भवति । अत्र भास्करीयाः प्रत्यवतिष्ठन्ते "बाढ"मिति बाढमित्यर्द्धाङ्गीकारे यत्प्रधानं शास्त्रं तदपेक्षितमेव पूर्ववृत्तमित्येतावन्मात्रविषयोऽङ्गीकारः,"तदपेक्षितं चे"ति प्रतिज्ञा त्वया यदनपेक्षितमित्युक्तं तदेवापेक्षितमित्येवकाराभिप्रायः, कुतइत्यत्राह "कर्मसमुच्चितादि"ति समुच्चित-शब्दः साहित्यमात्रपरः, न समसमुच्चयपरः । अस्मद्विद्या आत्मविद्या चेति समुच्चित्योपदेशादित्यत्र समुच्चित्यशब्दवत् कर्मज्ञानाभ्यामिति न निर्दिष्टम्, अपि तु कर्मसमुच्चिताज्ज्ञानादिति विशेषणविशेष्यभावेन निर्दिष्टम्, अतोज्ञाने प्राधान्यमवगम्यते कर्माङ्गकाज्ज्ञानादित्यर्थः, श्रुतिश्च "यज्ञेन दानेन"इत्यादिर्विवक्षिता ।

भू० वक्ष्यति च "सर्वापेक्षा च यज्ञादिश्रुतेरश्ववदि"ति अपेक्षिते च कर्मण्यज्ञाते केन समुच्चयः ? केन ने?ति विभागो न शक्यते ज्ञातुम्, अतस्तदेवपूर्ववृत्तम् ।

टी० ॥ कर्मणोविद्याङ्गत्वे सूत्रकाराभिमतिं दर्शयति "वक्ष्यति-

चे"ति चः प्रतिपादकसमुच्चये अङ्गतया कर्मणोनुष्ठानमपेक्षितमस्तु तज्ज्ञानस्य कथं पूर्वभावित्वं कर्मज्ञानं ब्रह्मविचारपाश्चात्यं किं न स्यात् ? इत्यत्राह "अपेक्षितेचे"ति प्रयाजादिवच्चिष्यत्वस्य करणस्य फलोत्पत्तिदशायामनुग्राहकत्वेनाङ्गतयापेक्षा विवक्षिता तृतीयस्य चतुर्थे पादे समावृत्ताकृतदारमृतदारादीनामाश्रमविशेषवर्त्तिनां च ब्रह्मविद्यानिष्ठानां कर्मस्वनुष्ठेयाननुष्ठेयविभागस्य निरूपयिष्यमाणत्वमभिप्रेत्योक्तं "केन समुच्चयः केन नेती"ति यद्वा नित्यनैमित्तिकयोः समुच्चयः, न तु काम्यनिषिद्धयोरिति विभागो न ज्ञायतइत्यर्थः, अयमर्थः । पदार्थज्ञानपूर्वकं हि वाक्यार्थज्ञानम्, "यज्ञेन दानेने"त्यादिवाक्ये यज्ञादिकर्मणां पदार्थीभूतत्वाद्वाक्यार्थज्ञानस्य च पदार्थज्ञानपूर्वकत्वाद्यज्ञादिकर्मविचारस्य पूर्वभावित्वम्, नहि "व्रीहीनवहन्ती"त्यादिवाक्यार्थज्ञानं व्रीह्यादिपदार्थज्ञानेन विनोपपद्यते पदार्थसंसर्गरूपत्वाद्वाक्यार्थस्य ।

ननु गामानयेत्यादिवाक्याद्व्युत्पत्तौ गवानयनादिरूपं वाक्यार्थं पूर्वं प्रतिपाद्यावापोद्वापमुखेन पश्चात्पदार्थप्रतिपत्तेर्न पदार्थधीपूर्वकत्वनियमो वाक्यार्थज्ञानस्य । उच्यते । व्युत्पन्नाच्छब्दादर्थप्रतिपत्तौ सर्वत्र पदार्थज्ञानपूर्वकमेव वाक्यार्थज्ञानं व्युत्पत्तिदशायां तु प्रमाणान्तरेण शब्दान्तरेण वा वाक्यार्थावगमः पूर्वं स्यात् न तु तस्मादेव शब्दात्, तस्यागृहीतसंबन्धत्वेन बोधकत्वायोगात्, व्युत्पत्तावपि न वाक्यार्थधियः पूर्वभावनियमः, अम्बातातमातुलादिपदानां पदान्तरासंसृष्टानामेव प्रथमव्युत्पत्तिदर्शनात् अस्य शब्दस्यायमर्थ इति व्युत्पत्तौ वाक्यार्थज्ञानस्य पूर्वभावाभावाच्च । नचास्मिन्नेव वाक्ये यज्ञादिशब्दव्युत्पत्तिसंभवः, विविदिषानिष्पत्तिरूपवाक्यार्थस्याप्रत्यक्षत्वेन गवानयनादाविव व्युत्पत्त्यनुपपत्तेः । अतः पदार्थज्ञानपूर्वकं वाक्यार्थज्ञानमित्युक्तम् । वाढमित्यादिकं सिद्धान्तिनश्चोद्यपरमिति च व्याख्यातृभिर्व्याख्यातं तदानीमपि पदार्थवाक्यार्थभावः क्रमविशेषहेतुतया विवक्षितः । किंचापेक्षिते चेत्यङ्गतयापेक्षितत्वस्य विवक्षितत्वात् कर्मणां च ज्ञानोत्पादकतया तदङ्गत्वादुत्पाद्योत्पादकयोः पौर्वापर्यनियमाद्विचारविषययोः कर्मज्ञानयोः पूर्वापरभावेन तच्छेषभूतयोर्विचारयोरपि तत्क्रम-

भाक्त्वं न्याय्यमिति चाभिप्रायः, शेषभूतस्य शेषिक्रमानुरोधित्वं हि न्यायसिद्धम्, यथा "सारस्वतौ होमौ भवत इति युगपदुत्पन्नयोरपि सारस्वतहोमयोर्थान्यापुरोनुवाक्यामन्त्रानुसारेण सरस्वतीयागस्य पूर्वभावे सरस्वद्यागस्य पश्चाद्भावे च प्राप्ते तदङ्गानामपि तेनैव क्रमेणानुष्ठानं निर्णीतम् दृष्टान्ते, दार्ष्टान्तिके च शेषिणोः क्रमनियामकहेतुवैषम्यमेव तयोः क्रमे निश्चिते शेषस्य शेषिक्रमानुरोधित्वं तत्र चात्र च तुल्यम् । एवंचोपासनस्यैव विचारं प्रति शेषित्वात् तृतीय[1]लक्षणे कृतस्योपासनचिन्तनस्यैव कर्मविचारापेक्षया पश्चाद्भाव इति न वाच्यं विद्याविषयतत्फलचिन्तनस्यापि तदपेक्षितत्वेन कृत्स्नाया अपि ब्रह्ममीमांसायाः कर्मविचारपश्चाद्भावप्राप्तेः । निगमयति "अत" इति बाढमित्यादेः सिद्धान्तिवाक्यपरत्वादपि भास्करमतपरत्वं नूचितम् । "कर्मसमुच्चिताज्ज्ञानादपवर्गश्रुते"रित्यस्य ग्रन्थस्य भास्करीयभाष्ये श्रूयमाणत्वात्, अङ्गभावस्य तदभ्युपगतत्वेन तद्विषयसूत्रोपादानविरोधाच्च शब्दतोर्थतश्च भास्करमतप्रत्यभिज्ञानात् सिद्धान्तिवाक्यस्यापि तदन्तरभावि[2]भावाच्च भास्करपक्षं यादवप्रकाशपक्षं चोपजीव्य "बाढ"मित्यादिना पार्श्वस्थश्चोदयतीति च निर्वाहः साम्प्रदायिकः । तत्रैवं योजना "कर्मसमुच्चिता"दि"ति समस[3]मुच्चये विवक्षितः कर्मसमुच्चिताज्ज्ञानादिति विशेषणविशेष्यभावेन निर्देशो ज्ञानस्य मोक्षोपायत्वप्रसिद्धिप्राचुर्यनिबन्धनः श्रुतिश्च "विद्यां चे"त्यादिः, अस्मिन्वाक्ये मृत्युशब्द उपेयप्राप्तिविरोधिकर्मवाची प्रतिबन्धनिवृत्ति ब्रह्मप्राप्तिश्चेति साध्यद्वयं क्रमेण कर्म, ज्ञानं चेति साधनद्वयमपि हि यादवप्रकाशीयैरभ्युपगतम् अतो "विद्यां चाविद्यां चे"ति वाक्ये पूर्वखण्डः साधनद्वित्वपरः, उत्तरखण्डस्तु साध्यद्वित्वपर इति तेषां निर्वाहः "वक्ष्यतिचे"ति च-शब्दः प्रतिपाद्यसमुच्चये अङ्गभावं च वक्ष्यतीत्यर्थः, ज्ञानोत्पत्तेः पश्चात्कर्मणो ब्रह्मप्राप्तिप्रतिबन्धनिवर्त्तकत्वं ज्ञानोत्पत्तेः पूर्वकर्मणो ज्ञानोत्पादकतया तदङ्गत्वमपि हि तदभ्युपगतम्, अङ्गभावपरं सूत्रमुपादत्ते "सर्वापेक्षे"ति सर्वापेक्षेत्यादिसूत्रमङ्गाङ्गिभावपरं "सहकारित्वेन चे"ति सूत्रं समसमुच्चयप्रतिपादकमिति हि तेषां प्रक्रिया

१ एतच्छास्त्रीयतृतीयाध्याये । २ तदन्तर्भावाच्चेति ख· पु· पाठः ।

अङ्गभावे समुच्चये च श्रुतिवाक्ये सूत्रे चोदाहर्तव्ये अपि ग्रन्थलाघवार्थं समुच्चये श्रुतिरङ्गभावे सूत्रं चोदाहृतम्, अङ्गभावप्रतिपादकवाक्यविषयसूत्रोपादानेन भास्करमतं चावलम्बितं भवति, एवमुभयथा कर्मणोपेक्षा दर्शिता ततः किम्? इत्यत्राह "अपेक्षितेवे"ति समप्रधानतयाङ्गतया चापेक्षित इत्यर्थः । अन्यत्सर्वं पूर्ववत् । यद्यपि यादवप्रकाशमते कर्मविचारस्य पूर्ववृत्तत्वमनभिमतं तथापि समुच्चयेनाङ्गतया च कर्मणोपेक्षितत्वस्य तदुपपादितत्वात्तावन्मात्रमुपजीव्य पार्श्वस्थेन मतद्वयावलम्बिना चोदयित्रा पूर्ववृत्तत्वापादनमुखेन चोदितमिति न निगमनग्रन्थविरोधः । समुच्चय—शब्दस्य प्रधानतयान्वये स्वारस्यादङ्गत्वपरसूत्रोपादानात्तदनन्तरं साध्यद्वित्वस्य साधनद्वित्वस्य च निराकरिष्यमाणत्वाच्च मतद्वयावलम्बनमुखेन चोदितमिति निर्वाहः पूर्वाचार्यैः कृतः ।

सू० नैतद्युक्तम्, सकलविशेषप्रत्यनीकचिन्मात्रब्रह्मविज्ञानादेवाविद्यानिवृत्तेः ।

टी० ॥ अत्र प्रतिवदति "नैतद्युक्त"मिति ज्ञानार्थं कर्मणो ज्ञातव्यत्वं प्रागेव प्रतिक्षिप्तम्, वेदान्तमात्राध्यायिनः कर्मविषयापातप्रतीत्यभावेन कर्मविचारनैरपेक्ष्यवचनात् सुकृतवशाद्वेदान्तमात्रबुभुत्सावतः कर्मज्ञानानपेक्षावचनाच्च अत्रोपादानार्थं कर्मणो ज्ञातव्यत्वं निराचिकीर्षुः समसमुच्चयेनाङ्गभावेन च द्विविधेऽप्युपादाने समसमुच्चयार्थमुपादानं प्रथममपाकर्तुं साधनद्वित्वं साध्यद्वित्वं च वाक्यद्वयेन प्रतिक्षिपति "सकलविशेषे"त्यादिना यद्वा वाढमित्यादिग्रन्थो भास्करमतेन "सिद्धान्तिमतेन वा चोद्यपरः, तदानीं पूर्वपक्षी संभावितसमस्तप्रकारेण कर्मणोऽपेक्षां प्रतिवक्तुकामः किं त्वया समसमुच्चयो विवक्षितः, उताङ्गभाव? इति विकल्पमभिप्रेत्य प्रथमं समुच्चयपक्षं प्रतिक्षिपतीति निर्वाह्यम् । सकलविशेषाः सजातीयविजातीयस्वगतव्यावृत्त्यन्वयरूपविशेषाः, तेषां प्रत्यनीकं सर्पाद्याकाराणां रज्जुत्वमिव तेषाविवर्तकमिति भावः "चिन्मात्रमि"ति मात्रचा ज्ञातृत्वज्ञेयत्वव्यावृत्तिः । यद्वा सकलविशेषप्रत्यनीक—शब्देन सजातीयवि-

जातीयभेदप्रत्यनीकत्वं, चिन्मात्रमिति मात्रचा स्वगतभेदशून्यत्वं विवक्षितं प्रत्यनीक—शब्देन नित्यानर्हत्वं विवक्षितं न हि शुक्तिशकलं कदाचिद्रजतत्वसंबन्धार्हं नित्यानर्हत्वादेव हि शुक्तिज्ञानस्य रजतत्वनिवर्त्तकत्वम् "ब्रह्मविज्ञानादेवाविद्यानिवृत्ते"रिति रज्जुत्वज्ञानादेव हि सर्पत्वनिवृत्तिर्न तु कर्मणेति भावः। एवं साधनद्वित्वं निरस्तं कथं साधनद्वित्वव्युदासः?

सू० अविद्यानिवृत्तिरेव हि मोक्षः, वर्णाश्रमविशेषसाध्यसाधनेतिकर्त्तव्यताद्यनन्तविकल्पास्पदं कर्म सकलभेददर्शननिवृत्तिरूपाज्ञाननिवृत्तेः कथमिव साधनं भवेत् ॥

टी० ॥ साध्यद्वित्वं हि विद्यत इति शङ्कायां साध्यद्वित्वं व्युदस्यति "अविद्यानिवृत्तिरेव हि मोक्ष"इति ब्रह्मणो नित्यप्राप्तत्वात् प्रतिबन्धनिवृत्तिरेव साध्या न तत्प्राप्तिः। हि—शब्दस्यायमभिप्रायः, या प्रतिबन्धनिवृत्तिः कर्मसाध्यत्वेन त्वयोक्ता सैव ज्ञानसाध्या श्रुतिस्मृतिसूत्रैरभिहिता "तमेव विदित्वातिमृत्युमेति" "ज्ञात्वा देवं मुच्यते सर्वपाशैः" "निचाय्य तं मृत्युमुखात् प्रमुच्यते" "क्षीयन्ते चास्य कर्माणि तस्मिन् दृष्टे परावरे" एवमेवं "विदि पापं कर्म न श्लिष्यते" "ज्ञानाग्निः सर्वकर्माणि भस्मसात्कुरुते तथा" "तदधिगम उत्तरपूर्वाघयो"रित्यादिभिः, तस्माद्वाक्यद्वयेन न साध्यसाधनद्वित्वमस्तीत्युक्तं भवति। अविद्यानिवृत्तिरेव मोक्षोऽस्तु ततः किं कर्मनैरपेक्ष्यस्येत्यत्राह "वर्णाश्रमे"ति अनेन पदेन पूर्वोक्तं कर्मणोभेदावलम्बित्वं विवृतं भवति, आदि—शब्देन निषिद्धानि प्रायश्चित्तानि कर्माणि च विवक्ष्यन्ते अनन्त—शब्देन वर्णादीनां बाहुल्यम्। विकल्पो भेदः "सकलभेददर्शननिवृत्तिरूपाज्ञाननिवृत्ते"रिति मूलाज्ञाननिवृत्तेः फलं हि भेददर्शननिवृत्तिः। अतो भेददर्शननिवृत्तिरज्ञानानिवृत्यन्तर्गतेत्यर्थः कथमिव साधनं न कथंचिदपीति यावत्। "न हि वचनविरोधे न्यायः प्रभवतीति"नियमात्।

सू० अतएव कर्मणामनित्यफलत्वेन मोक्षविरोधित्वं ज्ञानस्यैव मोक्षसाधनत्वं च दर्शयन्ति "अन्तवदेवास्य तद्भवति"

"तद्यथेह कर्मचितो लोकः क्षीयते एवमेवामुत्र पुण्यचितो लोकः क्षीयते" "ब्रह्मविदाप्नोति परं" "ब्रह्म वेद ब्रह्मैव भवति" "तमेव विदित्वातिमृत्युमेती"त्याद्याः ।

टी० ॥ श्रुतिसिद्धं कर्मणोपेक्षितत्वं न बाध्यमिति शङ्कायामुक्तोपपत्तये श्रुत्यानुकूल्यं दर्शयति "श्रुतयश्चे"ति न केवलोपपत्तिः तदनुग्राह्यमप्यस्तीति च-शब्दस्य भावः । पूर्वं भेदावलम्बितया विरोध उक्तः, अत्र तु फलानित्यतया विरोधश्च युक्त्यन्तरत्वेन दर्शितः । "अनित्यफलत्वेने"ति नित्यफलस्य मोक्षस्य कथमनित्यफलदं कर्म साधनमित्यर्थः । श्रुतय इत्येकस्मादनेकवाक्यानां प्राबल्यं विवक्षितम् । दर्शयन्तीत्यनेनास्पष्टार्थात् स्फुटार्थानाम् "अन्तवदेवास्ये"ति कर्मसाध्यत्वे मोक्षस्यानित्यत्वं नित्यत्वे कर्मणोऽतत्साधनत्वं वा स्यात् कर्मणोऽन्तवत्फलत्वनियमादिति भावः । अनेन वाक्येन कर्मणामनित्यत्वमुक्तम् । "तद्यथेत्य"नेन कर्मचयस्य फलद्वारकत्वमुक्तम् । पूर्ववाक्यमनेककालानुष्ठितसकलकर्मणामन्तवत्त्वज्ञापनार्थम् । "अस्मिन् लोके जुहोति यजते तपस्तप्यते बहूनि वर्षसहस्राण्यन्तवदेवास्य तद्भवती"ति हि श्रूयते तत एव कर्मनैरपेक्ष्यवादे अस्य वाक्यस्य प्रथमत उपादानम्, ब्रह्मविदाप्नोतीति ज्ञानस्य मोक्षसाधनत्वमुक्तम् । प्राप्यप्राप्तृभेदनिषेधार्थं "ब्रह्म वेद ब्रह्मैव भवती"त्युपात्तम् । "तमेवे"ति प्रतिबन्धनिवृत्तेर्ज्ञानफलत्वं ज्ञापितम् । ज्ञानव्यतिरिक्तस्य कर्मादेरुपायत्वनिषेधश्चानेन सिद्धः, "नान्यःपन्था" इति ह्यनन्तरवाक्यम् । एवं ज्ञानस्यैव मोक्षोपायत्वपरतर्कानुगृहीतस्पष्टार्थानेकवाक्योप[1]पादनेन "विद्यां चाविद्यां चे"ति समुच्चयपरत्वेन परोक्ता श्रुतिश्चातदर्थेत्युक्तं भवति तस्या एकत्वादस्फुटार्थत्वादतर्कोपेतत्वाच्च श्रुत्यन्तराविरोधेन वर्णनीयत्वात् । एवं ज्ञानस्यैव मोक्षोपायत्वे प्रमाणतया श्रुतयउपपत्तयश्च दर्शिताः ।

मू० यदपि चेदमुक्तम्, यज्ञादिकर्मापेक्षाविद्येति तद्वस्तुविरोधाच्छ्रुत्यक्षरपर्यालोचनया चान्तःकरणनैर्मल्यद्वारेण वि-

---

१ वाक्योपादानेनेति स्व० पु० पा० ।

विविदिषोत्पत्तावुपयुज्यते न फलोत्पत्तौ "विविदिषन्ती"ति श्रवणादिर्विविदिषायां जातायां ज्ञानोत्पत्तौ शमादीनामेवान्तरङ्गापायतां श्रुतिरेवाह ॥

टी० ॥ अथ यज्ञादिश्रुतेः कर्मापेक्षितत्वपरतां व्युदस्यति "यद्यपिचे"त्यादिना सिद्धान्तिभास्करयादवप्रकाशानां त्रयाणामपि कर्माभिमतमितीदृशं प्राधान्यं सूचयत्यपि-शब्दः । समुच्चयपरवाक्यस्य श्रुत्यन्तरानुगुण्येन निर्वाहे सति यज्ञादिश्रुतिश्च निर्वाह्येति समुच्चयाभिप्रायश्च-शब्दः, अपिचेत्यखण्डशब्दो वा तदानीमप्युक्तप्रकारेण समुच्चयपरः । "यज्ञादिकर्मापेक्षाविद्ये"ति अनया वचनव्यक्त्या समुच्चयेन विद्यापेक्षितं यत्कर्मोक्तमित्यर्थः, वस्तुविरोधाद्द्वैतवासनाजनकत्त्वमनित्यफलदत्त्वं च श्रुत्यक्षरपर्यालोचना-सन्प्रत्ययार्थनिरूपणम् । चः समुच्चये विविदिषोत्पत्तावुपयोगप्रकारमाह "अन्तःकरणे"ति न फलोत्पत्तौ न मोक्षोत्पत्तौ "यज्ञेन दानेन तपसा नाशकेन ब्राह्मणा विविदिषन्ती"ति हि श्रुतिः न तु मुच्यन्त इति भावः। अक्षरपर्यालोचना कथमित्यत्राह "विविदिषन्ती"ति "श्रवणादि"ति एवं च यज्ञादिश्रुतिपर्यालोचनया च ज्ञानकर्मणोः समुच्चयः प्रत्युक्तः "न फलोत्पत्ता"विति फल-शब्दस्य मोक्षे स्वारस्यादेवं योजना कृता । यद्वा यज्ञादिकर्मापेक्षाविद्येतिवचोभङ्ग्याङ्गतयापेक्षितं यत्कर्मोक्तमित्यर्थः "न फलोत्पत्तौ" न वेदनोत्पत्तावित्यर्थः, विविदिषापेक्षया फलं हि वेदनम्, अन्यत्सर्वं पूर्ववत् । अस्यां योजनायां यज्ञादिकर्मापेक्षाविद्येति निर्देशस्वारस्यमस्ति-अङ्गाङ्गिभावसूत्रस्मारकत्वादस्य निर्देशस्य । अथवा यज्ञादीति प्रयाजादिवन्निष्प्रयस्य करणस्य फलोत्पत्तिदशायामनुग्राहकतयाङ्गं यत्कर्मोक्तं तन्नोपयुक्तमित्यर्थः । न फलोत्पत्तौ मोक्षोत्पत्तौ करणभूतविद्यानुग्राहकत्त्वेन नोपयुक्तमित्यर्थः । अस्यां योजनायामङ्गाङ्गिभावसूत्रस्मारकनिर्देशस्य फलोत्पत्ताविति निर्देशस्य च स्वारस्यमस्ति विविदिषन्तीत्युक्तिरसिना जिघांसतीतिवदिति यज्ञादेर्वेदनोपयोगित्वं स्यादिति शङ्कायां वेदनोत्पत्तौ हेतुत्त्वे कर्मणाम् इतिकर्त्तव्यतात्वङ्करणत्वं चानुपपन्नाहमित्याह 'विविदिषायामित्यादिना वाक्यद्वयेन, तत्र शमादिभिः सह समुच्चयेन विकल्पेन चेति

कर्तव्यतात्वं प्रथमं व्युदस्यति विविदिषायामित्यादिवाक्येन । एवकारद्वयेन कर्मणः समुच्चयो विकल्पश्च व्युदस्यते शमादीनामिन्द्रियव्यापारोपरतिरूपत्वेन यज्ञादिकर्मणस्तत्प्रवृत्तिरूपत्वेनान्योन्यविरोधित्वात्समुच्चयउपपद्यत इत्यभिप्रायेण शमादीनामेवेत्युक्तम् । तुल्यबलयोर्हि विकल्पः, "भूत्वात्मानं पश्येदि"ति शमादीनामात्मदर्शनं प्रति साक्षात्साधनत्वस्य न्यायनैरपेक्ष्येण शीघ्रप्रतिपन्नतया बलीयस्त्वात् । विविदिषन्तीति यज्ञादेरिच्छासाधनत्वे स्वरसतः प्रतिपन्नेपि स्वारस्यभङ्गेनासिना जिघांसतीत्यादि दृष्टान्तपर्यालोचनरूपन्यायसापेक्षतया कर्मणो विद्यासाधनत्वस्य विलम्बेन प्रतिपन्नतया दुर्बलत्वाच्च न विकल्प इत्यभिप्रायेणाह "श्रुतिरेवाहे"ति ।

(शेषमग्रे)

॥ ओं नमो भगवते मीमांसाद्वयगुरवे श्रीरामानुजाचार्याय ॥

॥ शास्त्रदीपिका ॥

भट्टकुमारिलमतानुगा पूर्वमीमांसासूत्रव्याख्या विषमपदटिप्पणीसमेता ।

ओं श्रीगणेशाय नमः ।

(*Continued from page* 153 Vol VII.)

ननु विकल्पनिमित्तं संबन्धग्रहणम्, तत्कथं प्रत्यक्षपूर्वकत्वं, सविकल्पकमप्यनुपरतेन्द्रियव्यापारस्य जायमानमपरोक्षावभासत्वात्प्रत्यक्षमेवेत्यदोषः । विकल्पश्चापरोक्षावभासश्चेति चित्रम्, अपरोक्षमिति हि स्वलक्षणमुच्यते । तद्विषयोऽवभासोऽपरोक्षावभासः । विकल्पस्त्वभिलापसंसर्गयोग्यप्रतिभासत्वान्न स्वलक्षणं स्पृशति, न ह्यभिलापः स्वलक्षणं स्पृशति । यदि स्पृशेदभिलापमात्रेणापि विनाऽक्षव्यापारमपरोक्षावभासः स्यात् । न चासावस्ति । तदुक्तम् । "अन्यथैवाग्निसंयोगाद्दाहं दग्धो हि मन्यते । अन्यथा दाहशब्देन दाहार्थः संप्रकाशते" इति । तस्मादभिलापास्तावन्न विशदाकारमवभासयन्ति । तत्समानविषया विकल्पा अपि । यस्त्वयं विस्फारिताक्षस्य 'गौरयमिति' विकल्पो विशदावभासः, स समा-

न्कालविशदावभासनिर्विकल्पकसंसर्गकृतः । तदभावे ह्यभिलापमात्रे, अनुमाने च विकल्पाकारप्रतिभासे वैशद्याभावात् । तस्मान्निर्विकल्पकमेव प्रत्यक्षम् । तत्रैव हि विशदस्य स्वलक्षणस्यावभासः । मैवम् । उन्मीलितनेत्रस्य विकल्पोऽपि गौरयमित्यपरोक्षावभासएव प्रतीयते । न चासावन्यसंसर्गकृतः, प्रमाणाभावात् । अभिलापसंसर्गयोग्यस्यापि सामान्याकारस्याभिलापलिङ्गादिभिरवैशद्यमिन्द्रियैश्च वैशद्यमुपपद्यतएव । न ह्ययं परोक्षापरोक्षविभागो विषयकृतः, यदि हि तथा स्यात्सर्वदैव सामान्यं परोक्षं स्यात् । स्वलक्षणं चापरोक्षं स्यात् । नचैवमस्ति, सामान्याकारस्यापि परोक्षापरोक्षविभागदर्शनात् । तथा हि दूराच्छ्रुतं स्वलक्षणं पश्यन्निर्द्धारितगवाश्वजातिविशेषो ह्रेषाशब्दश्रवणादश्वत्वं, तस्मिन्नेव स्वलक्षणेऽनुमिमानोऽपि परोक्षं बुध्यते । वदन्ति हि अश्वोऽप्ययं न चक्षुषा तथावभासतइति । प्रत्यासन्नस्तु वदति—संप्रत्यश्वत्वमप्यस्य चक्षुषा पश्यामीति, न पूर्वमिति । स्वलक्षणं तु प्रागपि विशदमेवेति सामान्यांशगत एवायं दूरसमीपवर्त्तिनः परोक्षापरोक्षविभागः । तस्मात्कारणकृतोऽयं विभागः । एकस्मिन्नपि हि विषये अक्षैर्जायमानं विज्ञानमापरोक्ष्यं जनयति । लिङ्गादिजन्तु नेति किं नोपपद्यते ज्ञानजन्यो विषयगतः फलविशेषोऽयमापरोक्ष्यं नाम सर्वस्य संवेद्यः । यद्भावाभावाभ्यां लिङ्गाभ्यामक्षैः पश्यामि न पश्यामीति विस्फारिताक्षाणामेव व्यवहारः प्रवर्त्तते । अतोऽस्ति विकल्पस्यापि विशदावभासित्वमिति प्रत्यक्षत्वोपपत्तिः । केचित्तु सविकल्पकमेव सर्वं ज्ञानं न निर्विकल्पकं नाम किंचिदस्तीति मन्यन्ते । तत्तु प्रतीतिविरुद्धं प्रतीमो हि वयमक्षसंनिपातानन्तरमविविक्तसामान्यविशेषविभागं संमुग्धवस्तुमात्रगोचरमालोचनज्ञानम् । तदभावे तु विकल्पएव न जायेत, विकल्पयता हि पूर्वानुभूतं जातिविशेषं संज्ञाविशेषं चानुस्मृत्य तेन पुरःस्थितं वस्तु विकल्पयितव्यम्, न चार्थमदृष्टवतस्तत्स्मरणमाकस्मिकमेवो(२)पपद्यते । तस्मादस्ति निर्विकल्पकमपि ज्ञानम् । तच्च सन्मात्रविषयमिति केचित् । भेदस्य विकल्पवेद्यत्वादगृहीते च भेदे विशेषाणामग्रहणात् । किंचेतरेतराभावा-

(१) संप्रतीयत इति (ख) पु॰ पा॰ । (२) मेवोत्पद्यते इति (ख) पु॰ पा॰ ।

भेदः। न चासौ प्रत्यक्षेण ग्रहीतुं शक्यते। नतरां निर्विकल्पेन। अतश्च "नेह नानास्ति किंचने"त्यादिनिषेधानां प्रत्यक्षादिविरोधाभावाद्"एकमेवाद्वितीय"मित्यादिश्रुतिभिरद्वितीयं ब्रह्म सिद्धम्। तदिदमतिसाहसम्। किं भवतो नीलपीतयोस्तिक्तमधुरयोः शीतोष्णयोः सुखदुःखयोश्चाविलक्षणा बुद्धिः? यद्येवं, नात्रोत्तरं वक्तव्यम्।

नच सत्स्वरूपे सविकल्पकेन विशेषग्रहणमिति वाच्यम्। अविकल्पकेन विकल्पस्यापि विलक्षणस्योत्पत्त्यसंभवात्। यच्चावश्यमिदमस्माद्भिन्नमित्येवं विकल्पेनैव भेदो ग्रहीतव्यो नाविकल्पेन तस्य ग्रहणं संभवतीति। न ब्रूमोभेदस्य ग्रहणं किन्तु भिन्नानाम्। तेषामपि न भिन्नतया किन्तु स्वरूपेण, यदन्यस्माद्भिन्नं नीलं पीतं वा तद्गृह्यत इति ब्रूमः, न हि नीलं पीतं वा भेदः। तयोर्हि धर्मोभेदः, तदग्रहेपि धर्मिणां ग्रहणं नानुपपन्नम्। यदि च सन्मात्रं प्रत्यक्षेण गृह्येत न नीलं पीतं वा ततो विकल्पेनापीदमस्माद्भिन्नमिति कथं भेदो गृह्येत। न हि सदेव सतोभिन्नमिति संभवति। तस्मान्नीलादिगुणानां पृथिव्यादिद्रव्याणां च प्रत्यक्षेण ग्रहणात्प्रपञ्चापलापः प्रत्यक्षविरुद्ध एव। यदि तु पृथिव्यादिप्रपञ्चं नापह्नुमहे तद्धर्मं तु भेदमेवेति ब्रूयात्, तदप्यशक्यं नीलपीतयोरितरेतराभावस्य प्रत्यक्षानुपलब्धिसिद्धस्यापह्नवासंभवात् प्रत्यक्षाभावोपि हि प्रत्यक्षवदेव प्रमाणान्तरेभ्यो बलीयान् इतरथा शशे चक्षुष्मत्त्वाद्विषाणित्वमनुमीयेत, अतो भेदापलापो न संभवति। यदि त्वितरेतराश्रयतया इतरेतराभावग्रहणस्यानवक्लृप्तेरविद्यामात्रनिमित्तं तदित्युच्यते। तदपि यदि भिन्नतया प्रतियोगिनमाश्रयं च गृहीत्वा ततइतरेतराभावो गृह्येत ततः स्यात्, नीलपीतयोस्त्वितरेतराभावानादरेण स्वरूपेण गृहीतयोः पश्चादितरेतराभावग्रहणे किमितरेतराश्रयम्[1]?। यदि तु द्वित्वमपह्नूयते न पृथिव्यादयस्तेषां च मिथोभेदस्तदपि प्रत्यक्षविरुद्धम्। संख्यायाः प्रत्यक्षत्वात्। सत्यपि प्रत्यक्षविरोधे तदुपमर्देन प्रवर्त्तमानस्तद्बाधेनैवागमोऽद्वैतमवगमयतीति चेत्। न। प्रवृत्त्यसंभवात्। प्रत्यक्षं हि निरपेक्षं शीघ्रं जायमानं स्वविरुद्धस्यागमस्य

१ कथमितरेतराश्रय इति युक्तः पाठः।

ज्ञानस्य पदपदार्थसंनिध्यपेक्षायोग्यत्वन्यायालोचनसापेक्षतया विलम्बित-प्रवृत्तेः प्रवृत्तिमेव निरुणद्धि । किंचाशक्यमेव श्रुत्या प्रपञ्चस्यासत्यत्वं बोद्धुम् । बुध्यमाने हि श्रुतिरपि प्रपञ्चान्तर्गतत्वादसती बोद्धव्या स्यात् । कथं च श्रुत्यैव श्रुतेरसत्त्वं बुध्येत. असत्त्वे हि प्रतीयमाना न प्रमाणं स्यात् । प्रमाणत्वे व्यवस्थिते सत्तया प्रतीयमानायाः श्रुतेर्न मिथ्यात्वं शक्यं वक्तुं, नह्येकस्यैव वस्तुनोयुगपदेव सत्त्वमसत्त्वं च समुच्चित्य बोद्धुं शक्यम् । अन्यतरोपमर्देन ह्यन्यतरद् बुद्धावारोहति, ततश्च श्रुतिरेवास्तीति चेत् । न । प्रपञ्चस्याभावः संभवति । श्रुतेरपि प्रपञ्चत्वात् । नास्ति चेच्छ्रुतिः, प्रमाणाभावादेव न प्रपञ्चापलापः संभवति । ननु स्वयंप्रकाशं ब्रह्म किमस्यान्येन प्रमाणेन ? भवतु ब्रह्म स्वयंप्रकाशं प्रपञ्चाभावस्य किमायातं, ? स हि प्रमाणमपेक्षतएव । कथं चाविद्यमानस्य प्रपञ्चस्य प्रति-भासः ? । अविद्ययेति चेत् । कस्य पुनरियमविद्या ? जीवानामिति चेत् । न । तेषामभावात् । भावे वा द्वैतप्रसङ्गः, ब्रह्मणि तु विशुद्धविद्यात्मके निरवकाशैवाविद्या विद्यात्मकमपि अविद्याशबलमिव भ्रान्त्यावगम्यत-इति चेत् । कस्येयं भ्रान्तिः ? यदि न कस्यचित्सूक्तम् । यदि जीवानाम् । न, तदभावात् । यदि ब्रह्मणो, नास्य भ्रान्तिः संभवति इत्युक्तम् । यदि च विद्यारूपेप्यविद्या स्यात् केनासावुच्छिद्येत, ध्यानादिभिरिति चेच्च । तेषा-मप्यभावात्, भावे तु द्वैतापत्तिः, ब्रह्मणि तु सहावस्थानादविरुद्धा अविद्या न तेनोच्छेत्तुं सा शक्या । ततश्चानिर्मोक्षप्रसङ्गः । तस्माद्ब्रह्मणः प्रशंसार्थैर-स्थायित्वेन प्रपञ्चस्यासत्त्वमुपचरद्भिरौपनिषदैर्वादैस्तदनुसारिभिश्चेतिहा-सपुराणैर्भ्रान्तानां वाक्यतात्पर्यमजानानां न्यायाभियोगशून्यानां प्रलापोय-मद्वैतवाद इत्युपेक्षणीयः । तत्सिद्धमविकल्पस्य प्रत्यक्षस्य विशेषविषयत्वम् । अपरे तु स्वलक्षणमात्रगोचरं निर्विकल्पकमिच्छन्ति । तदपि प्रतीतिविरुद्धम् प्रतीयते हि संमुग्धाकारं वस्तु सहसैव पश्चाज्जातिद्रव्यगुणक्रियानामभिः पञ्चधा सविकल्पकेन विकल्प्यते । गौरयम् । दण्ड्ययम् । शुक्लोयम् । गच्छ-त्ययम् । डित्थोयमिति । तत्र निर्विकल्पकमनेकाकारं वस्तु संमुग्धं गृह्णाति । सविकल्पकं त्वेकैकाकारं जात्यादिकं विविच्य विषयीकरोति ।

Digitized by Google

ननु षष्ठोपि विकल्पोस्ति तदेवेदमिति । तत्कथं पञ्चधा विक-ल्पत्वमुच्यते । न(१)त्वयं जातिविकल्पः व्यक्तिप्रत्यभिज्ञा ह्वीयम्, न संज्ञा-विकल्पः । अनवगतसंज्ञानामपि भावात्, तिर्यञ्चोपि ह्वग्न जाताः स्वमातरं प्रथममुपलभ्य दशान्तरे पुनरुपलभमानाः सैवेयमिति शब्दानु-वेधशून्यमेव प्रत्यभिजानन्ति तस्मादियं षष्ठी कल्पनेति पञ्चविधत्वानु-पपत्तिः । उच्यते । इयमेवास्माभिर्नाम कल्पनेत्युच्यते । तथाहि डित्थो-यमिति तावद्गौरयमिति गवात्मना डित्थात्मना वस्तु विकल्प्यते । न दण्डीतिवत्तत्संबन्धितया मत्वर्थानुपादानात् । तत्र न डित्थशब्दो जातिवदर्थस्यात्मा । अत्यन्तभिन्नत्वात् । यतस्तेनैवार्थोनुरज्यते । तदे-तदेवं विज्ञेयम्, डित्थशब्देन तद्वाच्यं पूर्वावगतं डित्थमुपस्थाप्य तदात्मना पुरःस्थितोर्थो विकल्पते । डित्थोयमिति । किमुक्तं भवति? । योसावस्माकं डित्थः सोयं पुरःस्थितो नान्यइति सेयं व्यक्तिप्रत्यभिज्ञेव पञ्चमी कल्पना । सा च शब्दविदां नामरूपतैव भवतीति नामविक-ल्पनेति व्यवह्रियते । एतेन यदाहुः, डित्थोयमित्यशब्दाकारस्यार्थस्य शब्दाकारेण विकल्पनादप्रमाणं सविकल्पकमिति तदपि निरस्तम् । नह्यत्र शब्दाकारेणार्थः प्रतीयते । किं तु पूर्वावगतार्थस्मरणमात्रे शब्दस्य व्यापारात् । तेन च स्मृतेनार्थेन तादात्म्येन पुरःस्थितार्थविकल्पनात् । आह च "यदा तु यादृशः पिण्डः पूर्वं शब्दात्प्रतीयते । तादृक्स्मरणे हेतुः शब्दस्तत्र यथार्थते"ति । तस्मान्नामविकल्पेपि जात्यादिवन्नास्त्यत-द्रूपारोपः । किं पुनर्जात्यादिभिर्विकल्प्यते द्रव्यं, किं पुनरिदं द्रव्यं नाम? । पृथिव्युदकतेजोवायुप्रभृति ।

ननु रूपादिव्यतिरिक्तं द्रव्यं नाम न किंचिदुपलभामहे न च तस्योपलम्भकमस्ति । चक्षुरादीनां पञ्चानां रूपादिष्वेवोपक्षीणत्वात् । गन्धरूपरसस्पर्शसंघातः पृथिवी । रसरूपस्पर्शसंघात आपः, रूपस्पर्शसं-घातस्तेजः । शब्दस्पर्शसंघातो वायुः । एवं रूपादिसंघातभेदादेव पृथि-व्यादिविभागो न द्रव्यं नाम किंचिदस्तीति सौगताः । तदयुक्तम् आगमापा-

(१) नह्यवम् इति (ख) पु॰ पा॰ ।

षिषु रूपादिषु यदनुयायिप्रत्यभिज्ञा जायते तद्द्रव्यम् । दर्शनस्पर्शनाभ्यां
चास्य ग्रहणं प्रत्यभिज्ञा च यथा बदरफलं श्यामावस्थायां रक्तावस्थायां च तथा
घटपिण्डकपालावस्थासु मृद्द्रव्यम् । अस्ति हि तत्र पिण्डाद्यवस्थाभेदे
श्यामरक्तरूपभेदेपि द्रव्यप्रत्यभिज्ञा । मृदियं पिण्डावस्थामपहाय घटाव-
स्था संजाता श्यामिमानं च त्यक्त्वा पक्का सत्यरुणिमानं गृहीतवती अनन्तरं
घटावस्थामप्यपहाय कपालिका जातेति । एवं तन्तुपटाद्यवस्थास्वपि
द्रष्टव्यम् ।

ननु तन्तुपटादिषु द्रव्यान्तरोत्पत्तिरेवाभिमता, अन्यथा ह्यवयव्यप-
लापः स्यात् । नाप्यवयविनमपन्हुमहे द्रव्यान्तरोत्पत्तिं तु नेच्छामः, प्रतिप-
त्त्यभावात् । तन्तवएव हि संयोगविशेषादेकद्रव्यतामापद्यन्ते अवयवी च
भवन्ति तादृशाश्च पटजातिं स्थौल्यं च बिभ्रत एकपटद्रव्यस्थूलबुद्धिभिर्गृ-
ह्यन्त इति लौकिकी प्रतिपत्तिः । अतो न द्रव्यस्य कदाचिदागमोपायो-
वा घटपटगवाश्वशुक्लरक्ताद्यवस्थानामेवागमापायौ । आह च । "आवि-
र्भावतिरोभावधर्मकेष्वनुयायि यत् । तद्धर्मि यत्र च ज्ञानं प्राग्धर्मग्रहणाद्भवे-
दि"ति । तथा यादृशमस्माभिरभिहितं द्रव्यं तादृशस्यैव हि सर्वस्य
गुणएव भिद्यते न स्वरूपमिति । तत्सिद्धं द्रव्यम् । तच्च जात्यादिभिः
पञ्चधा सविकल्पकेन विभज्यते । अतः सविकल्पकमपि प्रत्यक्षं तत्पूर्वकं
चानुमानादीति सिद्धं तेषामप्यनिमित्तत्वमिति प्रत्यक्षसूत्रम् ।

औत्पत्तिकस्तु शब्दस्यार्थेन संबन्धस्तस्य ज्ञानमुपदेशो ऽव्यतिरेकश्चार्थेनुपलब्धे तत्प्रमाणं बादरायणस्यानपेक्षत्वात् ॥ ५ ॥

उक्तं प्रत्यक्षादीनामनिमित्तत्वम्, तत एव तन्मूलपुरुषवचन-
स्याप्यनिमित्तत्वम् ॥ एवं तर्हि शब्दस्य सर्वत्र प्रमाणान्तरापेक्षयैव
प्रामाण्यदर्शनात्तदभावे तस्याप्यप्रामाण्यादभावगम्यत्वमेवायातं धर्मस्ये-
त्याशङ्कानिराकरणाय चोदनायाः प्रामाण्यमुच्यते । सत्यम् । लोके प्रमाणा-
न्तरमूलानां प्रामाण्यमतन्मूलानां चाप्रामाण्यं दृश्यते । नत्वेवमपि
सापेक्षं प्रामाण्यं किंतु स्वत एव । अनाप्तवाक्यस्य त्वप्रामाण्यं न
मूलविरहात्, किं तु दुष्टमूलतया, शब्दस्य दुष्टत्वात्स्वाभाविकस्य

Digitized by Google

प्रामाण्यस्यापवादात् । अपौरुषेये तु वेदे यद्यप्याप्तप्रणीतत्वं नास्ति तथापि प्रामाण्यस्य तदपेक्षाभावादनाप्तस्पर्शनिमित्तदोषाभावाच्चानपोदितं प्रामाण्यं भवति । त्रेधा ह्यत्र पुरुषानुप्रवेशः । पदपदार्थसंबन्धद्वारेण वाक्यवाक्यार्थसंबन्धद्वारेण ग्रन्थस्यैव वा भारतादिवत्पौरुषेयत्वात् । नत्वेतत्त्रयमप्यस्ति । पदपदार्थसंबन्धस्य नित्यत्वमत्रैात्पत्तिकशब्देनोक्तं वाक्यार्थस्य च पदार्थमूलत्वं वेदस्य चापौरुषेयत्वमुपरिष्टाद्वक्ष्यते । नच साक्षाद्बाधकमस्तीत्यव्यतिरेक-शब्देनोच्यते । अनुपलब्धार्थत्वाच्च नानुवादलक्षणमप्रामाण्यमस्तीत्यर्थेऽनुपलब्धइत्यनेनोक्तम् । एतच्च विशेषणत्रयमुपाददानेन सूत्रकारेण कारणदोषबाधकज्ञानरहितमगृहीतग्राहिज्ञानं प्रमाणमिति प्रमाणलक्षणं सूचितं भवति । नन्वेवं धारावाहिकेषूत्तरेषां पूर्वगृहीतार्थविषयकत्वादप्रामाण्यं स्यात् । तस्मादनुभूतिः प्रमाणमिति प्रमाणलक्षणम् । स्मृतिव्यतिरिक्ता च प्रतीतिरनुभूतिः । स्मृतिश्च संस्कारमात्रजज्ञानमभिधीयते । मात्रग्रहणं च संस्कारसध्रीचीनेन्द्रियजस्य प्रत्यभिज्ञानस्य स्मृतित्वप्रसङ्गेनाप्रामाण्यं मा प्रसाङ्क्षीदित्येवमर्थम् । तदेवं संस्कारातिरिक्तकारणजन्यं ज्ञानं प्रमाणमित्युक्तं भवति । तदिदं स्वप्नदर्शने तावदव्यापकम् । संस्कारमात्रजस्यापि ज्ञानस्य स्वरूपे कर्तरि च प्रामाण्यमिष्टं भवताम् । अथ स्मर्तव्यापेक्षयैव स्मृतेः स्मृतित्वं तद्विषयसंस्कारजत्वात् । स्वरूपकर्त्रपेक्षया त्वनुभूतिरेव । अतः सिद्ध्यति प्रामाण्यमित्युच्यते । एवं तर्हि मात्रग्रहणमनर्थकम् । प्रत्यभिज्ञानस्यापि पूर्वानुभूतांशापेक्षयैव स्मृतित्वात् तत्र चाप्रामाण्यमिष्टमेव । यत्र त्वंशे प्रामाण्यं तत्रानुभूतिरेव सा । किञ्चानुवादानां "य एवं विद्वान्पौर्णमासीमि"त्यादीनामपि संस्कारमात्रजत्वाभावात्प्रामाण्यं स्यात् । भवत्विति चेत् । न । लोकविरोधात् । तथा लौकिकमपि वाक्यं वक्तृज्ञानानुमितेऽर्थे ऽनुवादकतया प्रवर्त्तमानं प्रमाणं स्यात् । नचैतदिष्टं भवताम् । असंनिकृष्टग्रहणमनुवादानामशास्त्रत्वार्थमित्यङ्गीकरणात् । अथानपेक्षं प्रमाणम् यत्स्वविषये प्रमाणान्तरं नापेक्षते तत्प्रमाणम् । अनुवादानान्तु पुरोवादसापेक्षत्वादप्रामाण्यमिति । एवं तर्हि लौकिकं वाक्यमप्यनुमितेऽर्थे प्रवर्त्तमानमनुमा-

नस्य शङ्कानिराकरणमात्रोपयिकत्वादर्थप्रतिपादने तदपेक्षाभावात् प्रमाणं स्यात् । तथानुमानस्य प्रामाण्यम् न स्यात् । तद्धि नियत[2]ग्रहणमपेक्षते । नच गृहीतमर्थं मात्रयाप्यधिकं गृह्णातीति भवतां दर्शनम् । पीतशङ्खज्ञानमप्यनुभूतित्वात्प्रमाणं स्यात् । इष्टमेवेति वदतो लोकविरोधः । तस्माद्यथार्थमगृहीतग्राहिज्ञानं प्रमाणमिति वक्तव्यम् । धारावाहिकेष्वप्युत्तरोत्तरेषां कालान्तरसंबन्धस्यागृहीतस्य ग्रहणाद्युक्तं प्रामाण्यं । सत्यपि कालभेदोऽतिसूक्ष्मत्वाच्च परामृष्यत इतिचेत्, अहो सूक्ष्मदर्शी देवानांप्रियः, यो हि समानविषयया विज्ञानधारया चिरमवस्थायोऽपरतः सोऽनन्तरक्षणसंबन्धितयार्थं स्मरति किमत्र घटोवस्थित? इति पृष्टः कथयति अस्मिन् क्षणे मयोपलब्धइति । तथा प्रातरारभ्य एतावत्कालं मयोपलब्ध इति । कालभेदे त्वगृहीते कथमेवं वदेत् । तस्मादस्ति कालभेदपरामर्शः तदाधिक्याच्च सिद्धमुत्तरेषां प्रामाण्यम् ।

ननु यथार्थतापि चेत्प्रमाणलक्षणम् । उष्णजलज्ञानमप्रमाणं स्यात् इष्टमेवैतत् ।

ननु लोकविरोधः स्यात् । यद्ययथार्थतां जानन्त एव लौकिकाः प्रामाण्यं मन्वीरन् । ते तु यथार्थतामेव मन्वानाः प्रामाण्यमभ्रान्तत्वं च मन्यन्ते । ये त्वयथार्थतां जानन्ति ते नैव प्रामाण्यं मन्यन्ते नाप्यभ्रान्ततां तस्मान्नास्ति विरोधः पीतशङ्खज्ञानस्यापि स्मृतित्वाभिमानादनुभूतित्वापरिज्ञानादप्रामाण्यं मन्यन्ते । अतो ऽस्माकमपि नास्ति विरोध इति चेत् । तदयुक्तम् नहि लौकिकाः शुक्तिरजतज्ञानेपि स्मृतित्वं मन्यन्ते न तरां पीतशङ्खज्ञाने । तस्मात्सूक्तमर्थे ऽनुपलब्ध इति । वृत्तिकारस्त्वन्यथेदं वर्णयाञ्चकारेत्येवमादिनोपवर्षमतेन "तस्य निमित्तपरीष्टि"रित्येवमादिसूत्रत्रयमन्यथा[1] कृत्वा व्याचष्टे भाष्यकारः । तत्र निमित्तसूत्रेण तावत्प्रतिज्ञातस्य चोदनाप्रामाण्यस्यापरीक्षापदेशेन स्वतः प्रामाण्यं हेतुरित्युच्यते । प्रसिद्धानि हि प्रत्यक्षादीनि प्रमाणानि । तदन्तर्गतं च शास्त्रमतस्तदपि प्रसिद्धमेव । (शेषमग्रे)

१ सूत्रत्रयमष्टधा कृत्वेति पाठान्तरम् । २ नियमग्रहणमिति पु॰ पा॰ ।

॥ खण्डनखण्डखाद्यम् ॥

(*Continued from page* 432. Vol. VII.)

इदमपि च विचारमर्हति,—यदद्वैतश्रुतीनां बाधकमुपन्यस्यते प्रत्यक्षादि, घटपटप्रभृतिभेदग्राहि, तदपि कीदृश्यर्थे पर्यवस्यति?। तथाहि—प्रत्यक्षेण योऽसौ भेदो गृह्यते स किं स्वरूपभेदः?—१ (१) किमन्योन्याभावः?—२ किं वैधर्म्यं?—३ किमन्यदेव वा?—४। यदि तावत् स्वरूपं भेदः, स नाम घटपटयोर्हि स्वरूपं(२) यत्परस्परस्मा(३)द्भेदः तत्परस्परमनन्तर्भाव्य न संभवति, (भेदो हि भवन् कस्मादपि(४)-भवति, अन्यथा 'स्वरूपं भेद'—इति पारिभाषिकं(५)नाम स्यात्) यदा च घटाद्भेदः पटस्येत्येतावानेवार्थः (६) पटादेः स्वरूपं प्रत्यक्षेण गृह्यते तदा घटोऽपि पटात्मन्येव प्रविष्ट इति पटघटयोरैक्यात्म्यमेव भेदग्राहिणा प्रत्यक्षेणावगाहितमिति विपरीतमापद्यते।

टी० ननु यथानुमानादेः साध्यसाधनादिभेदाधीना प्रवृत्तिरित्यद्वैतवादिनं प्रति तदनवकाशस्तथा श्रुतेरपि पदपदार्थवैचित्र्यमुपजीव्यमिति तं प्रति तदनवकाशोऽपि, प्रत्युत तया व्यवहरतो व्याघात एव तव,

(१) 'स्वरूपभेद'—इति प्रभाकरमतोपन्यासः, 'अन्योन्याभाव'—इति नैयायिकैकदेशिनाम्, भट्टैकदेशिनां मतं—'वैधर्म्यमि'ति, वैशेषिकस्य—'अन्यदेवे'ति, पृथक्त्वं गुण इत्यर्थः।

(२) बहुषु पुस्तकेषु "स न घटपटयोर्हि स्वरूपम्"—इति पाठः; तत्र स न (स पक्षो नोपपद्यते) इत्येतावत्पर्यन्तं विरामः कर्तव्यः।

(३) यत्र तत्परस्परं च यत्परस्परं, यत्परस्परस्माद्भेदस्तत्परस्परमनन्तर्भाव्य तद्विशिष्टो भेद एव न सम्भवति, विशेषणादिव्यतिरिक्तविशिष्टपदार्थानङ्गीकारादित्यर्थः।

(४) कस्मादपि, किञ्चित्प्रतियोगिक एवेत्यर्थः।

(५) पारिभाषिकं=स्वसङ्केतमात्रसिद्धम्।

(६) पटाऽनुयोगिकत्वे सति घटप्रतियोगिकत्वविशिष्टोऽर्थ इत्यर्थः।

Digitized by Google

भेदव्यवहारान्यथानुपपत्त्या भेदसिद्धिरेवास्तु इत्याशङ्कते—। [a] "नन्वि"ति ॥ परिहरति—। [b] "कथं व्याहन्यते" इति ॥ आपाद्यापादकयोरभेदाद् व्याघातापादनं मां प्रत्यनवकाशमित्याह—। [c] "किंचे"ति ॥ पदपदार्थनानात्वमवलम्ब्यापि श्रुतिं प्रमाणयतो मम व्याघातो नास्तीत्याह—। [d] "नानात्वमि"ति । असद्भेदादापादकाद्व्याघातः कुतः पतेदित्यन्वयः ॥

—∘∘∘—

यं भेदं विषयीकुर्वत् प्रत्यक्षादि श्रुतिबाधकं स्यात् स एव नास्ति कुतो बाधः? इत्याह—। [e] "इदमि"ति ॥ [f] "यदि तावदि"ति । घटाद्भेदः स्वरूपं पटस्य,† तत्र घटो † विशेषणम्? उपलक्षणं वा? । आद्ये, घट†भेदः पट†स्वरूपं प्रत्यक्षेण गृहीतमिति घटा†भेद एव प्रत्यक्षेण गृहीत इति वैपरीत्यमित्यर्थः ॥

मू॰ *[a] ननु यथेयं प्रतीतिरभेदोल्लेखितया व्याख्यायते (१) तथा भेदोल्लेखित्वेपि दीयतामस्यां दृष्टिः, अभेदे हि 'घट' इत्येव, 'पट' इत्येव वा, बुद्धिः स्यात्, न तु 'घटाद्भिन्नः पट'*?—इति चेत्, [b] स्यादप्येष पर्य्यनुयोगो यद्यविद्याविद्यमानभावं(२) भेदं पारमार्थिकमभेदमिच्छन्तोपि प्रत्यादिशामः । तस्मात्—

[c] अभेदं नोल्लिखन्ती धीर्न भेदोल्लेखनक्षमा ।
तथाचाद्ये प्रमा सा स्यान्नान्त्ये स्वापेक्ष्यवैशसात् ॥ १८ ॥

*[d] अथ 'भेदः'—इत्येतावन्मात्रं पटस्य स्वरूपं,'घटादि'ति

---

† अत्र प्रायः पुस्तकेषु घटपटयोर्मौलिकप्रतियोग्यनुयोगिभावक्रमवैपरीत्येन व्याख्यायां मूले चोपलब्धं प्रतियोग्यनुयोगिभावमुपेक्षापि, उपन्यास्यं च यथोचितक्रमेण, उपन्यासचिन्हं च † एतत् सर्वत्र व्यवार्तिष्ठपम् ।

(१) व्याख्यायते=व्युत्पाद्यते ।

(२) अविद्यया विद्यमानो भावः सत्त्वं यस्य स तथोक्तस्तम् । अविद्याविद्यमानभावं भेदं यदि प्रत्यादिशामः—इति सम्बन्धः ।

च तद् घटेनप्रतियोगिनाऽन्ये(१)नैवनिरूप्यते * ?—तदपि नोपपद्यते ।

टी० ननु घटाद्भिदः स्वरूपं पटस्येत्युक्ते घटपटयोर्नाभेदः प्रतीयते, तथा सति 'घटादि'ति न स्यात्, किंतु 'घटः पट'—इति सामानाधिकरण्यं स्यादिति शङ्कते—। "[a]नन्वि"ति ॥ अविद्याविद्यमानं भेदमादाय तथाप्रतीतिरिति परिहरति—। [b]"स्यादि"ति ॥ ननु भेदो न पारमार्थिकः, किंत्वभेदः,—इत्यत्र किं विनिगमकमत आह—।[c]"अभेदमि"ति । घटपटस्वरूपमनुल्लिख्य तदुभयभेदोल्लेखो न संभवति, तदुभयभेदमनुल्लिख्यापि तदुभयस्वरूपोल्लेखः संभवतीत्यभेदग्रह उपजीव्यो भेदग्रहस्येत्यभेद एव पारमार्थिक इत्यर्थः । आद्ये=अभेदे, सा धीः प्रमा, नान्त्ये=भेदे, स्वस्य=भेदग्रहस्यापेक्ष्य=उपजीव्योऽभेदग्रहस्तद्विरोधादित्यर्थः । यद्यपि भेदाभेदपदाभ्यामुभयोपस्थितौ विपरीत(२) एवोपजीव्योपजीवकभावः, स्वरूपस्यापि भेदत्वे सर्वधियां भेदोल्लेखित्वस्याऽऽवश्यकत्वे वैपरीत्यमेव, तथापि अत्यवष्टम्भादिदमुक्तम् ॥ उपलक्षणपक्षं कक्षीकृत्याशङ्कते—। [d]"अथे"ति । यदि प्रतियोग्यपि भेदस्वरूपं स्यात्तदा तन्निरूपकमेव न स्यादिति भावः(३) ॥

मू० [a]निष्प्रतियोगिकस्य भेदस्य प्रमाणागोचरत्वात् । नित्यं प्रतियोगिघटिते एव तस्मिन् प्रमाणप्रसरात् । [b]का चेयं वाचोयुक्तिर्यदन्याऽसाकाङ्क्षं पटस्य स्वरूपमन्येन प्रतियोगिना निरूप्यमाणं ततो भेदो भवतीति ? । नहि यत्स्वरूपेणैव नीलं, तत् पीतेन निरूप्यमाणं नीलं भवति । [c]यदपि चोक्तं प्रतियोगिना घटेन निरूप्यमाणं पटस्य स्वरूपं

(१) अन्येन=भेदस्वरूपाऽप्रविष्टेनोपलक्षणीभूतेनेति यावत् ।
(२) भेदोपस्थितिपूर्वक एवाऽभेदग्रहः, अभेदस्य भेदाभावरूपत्वादित्यर्थः ।
(३) पूर्वपक्षिण आशय इत्यर्थः ।

Digitized by Google

भेद–इति, तत्रापि पटं(१)प्रति प्रतियोगित्वं घटस्य किं स्वरूपं? किं वा धर्मः कश्चित्?। यदि प्रथमः, तदा पटं प्रति प्रतियोगित्वमित्येतावानेवार्थो(२)घटस्य स्वरूपं भवदात्मन्येव पटमपि प्रक्षिपतीति कथं नाद्वैतमेव पर्य्यवस्यति।

[d]तत्रापि यदि प्रतियोगित्वमात्रं घटस्यात्मा 'पटं प्रती'ति च पटापेक्षित्वमन्यदेव, तदप्यनुपपन्नम् ।

टी० नियमतो यावति(३) यन्निरूपणं पर्याप्तं तावत्तत्स्वरूपान्तर्गतमेवेति प्रतियोग्यपि भेदस्वरूपं स्यादित्याह–। [a]"निष्प्रतियोगिकस्ये"ति ॥ ननु संयोगादिस्वरूपं प्रतियोगिनिरूपणीयमपि न तद्घटितमूर्त्तिकमित्यनुशयेनाह(४)–। [b]"का चेयमि"ति । अन्याऽसाकाङ्क्षम्=अन्याऽनिरूपणमित्यर्थः। यद्यपि पटः † स्वरूपतः पटः,† प्रतियोगिना निरूप्यमाणो भेद, इति न दोषः, नीलमपि स्वरूपतो नीलं, पीतेन निरूप्यमाणं भेद एव, भेदत्वेन निरूप्यमाणोपि तत्र पटात्वमित्यन्यदेतत्, प्रकारयोस्तु भेद एव, तथापि स्वरूपभेदे निरूपकभेद(५) एवानुपपन्न इति हृदयम् ॥ भेदस्वरूपे(६) प्रतियोगिनमन्तर्निवेश्य प्रतियोगिस्वरूपे भेदमन्तर्निवेशयति–। [c]"यदपी"ति। भेदवत् प्रतियोगित्वमप्यन्यसाकाङ्क्षमेवेति तदप्यन्यघटितमूर्ति स्यादित्यभेदे पर्य्यवसानमित्यर्थः ॥ प्रतियोगिनो(७) भेदस्य विशेषणतायां दोषमुक्त्वोपलक्षणतामाशङ्क्याह–। [d]"तत्रापी"ति ॥

---

(१) पटं प्रति=पटनिरूपितं, घटस्य=घटनिष्ठं, प्रतियोगित्वं प्रतियोगिनो घटस्य स्वरूपं धर्म्मो वेत्यर्थः ।

(२) पटनिरूपितत्वविशिष्टप्रतियोगित्वलक्षणः संपिण्डितोऽर्थ इत्यर्थः ।

(३) यावति=प्रतियोग्यादौ, यस्य=भेदादेर्निरूपणमिति, यावति भेदादौ यस्य=प्रतियोग्यादेर्निरूपणमिति वा,ऽर्थः; उभयथाप्यत्र "तावति"त्यनेन प्रतियोग्येव ग्राह्यम् ।

(४) इति पूर्वपक्षिणा अनुशयं हृदि निधाय प्रकारान्तरेण सिद्धान्त्याहेत्यर्थः।

(५) "स्वरूपभेदनिरूपकभेद"–इत्यपि पाठः ।

(६) घटत्वावच्छिन्नप्रतियोगिताकभेदस्य पटरूपत्वाद् भेदः=पटः, तथा च पटस्वरूपे घटमन्तर्निवेश्य घटस्वरूपे पटमन्तर्निवेशयतीत्यर्थः ।

(७) पटनिरूपितत्वविशिष्टप्रतियोगित्वस्य प्रतियोगिरूपत्वात् प्रतियोगी=प्रति-

मू० [a] "अकिञ्चिदपेक्षस्य प्रतियोगित्वस्य प्रमाणाऽविषयत्वात् । [b] 'पटं प्रती'त्यत्रापि च स्वरूपतदन्यविकल्पे (१) दोष एव । [c] नापि द्वितीयः । [d] योऽसौ धर्मः पटं प्रति प्रतियोगित्वं तस्यात्मनि पटोऽपि प्रविशतीति तेन (२) सह पटस्याद्वैतं स्यात्, [e] यदा च पटो घटस्य धर्मतामापन्नस्तदा घटोऽपि पटस्य धर्मतामनेनैव न्यायेन (३) गच्छेत् । [f] नहि पट (४) प्रतियोगित्वस्य घटेन प्रतियोगिना निरूप्यमाणत्वे घटस्याऽन्या गतिरस्तीति [g] परस्परमाश्रितत्वमाश्रयत्वं च स्यात्; नच कस्यचित्प्रमाणस्य विषयो घटारूढः पटस्तत्पटारूढश्च स एव घट इति । [h] किंच, धर्मस्य तस्य धर्मिणा सममसंबन्धेऽतिप्रसङ्गः (५), संबन्धानन्त्येऽनवस्था, प्रथमतोऽन्ततो गत्वा वा स्वभावसंबन्धाभ्युपगमे संबन्ध्यन्तरस्यापि तत्स्वभावप्रवेशाद्भेदे एव पर्य्यवसानं स्यादिति ।

टी० ॥ [a] "अकिञ्चिदि"ति । प्रतियोगित्वनिरूपणं नियमतो यावति परिसमाप्यते तावत्स्वरूपान्तर्गतमेवेत्यर्थः ॥ 'पटं प्रति प्रतियोगित्वं घटस्ये'त्यनयोक्त्या घटाभेदं पटस्याभिधाय 'पटं प्रती'ति तदेकदेशे (६) नापि

योगित्वं, तन्निष्ठविशेष्यतानिरूपितपटरूपभेदनिष्ठविशेषणतायामित्यर्थः । यद्वा, प्रतियोगित्वं प्रकृते निरूपकत्वं, तथा च निरूपकस्य पटरूपस्य भेदस्य, विशेषणतायाम्=घटप्रतियोगित्वांशे विशेषणतायामित्यर्थः ।

(१) घटनिष्ठप्रतियोगिताया घटस्वरूपत्वे पटनिरूपितत्वं घटेऽबाधितं, तथा सति पटनिरूपितत्वं घटस्य स्वरूपं? धर्मो वा ?; आद्ये पटस्यापि घटस्वरूपत्वापत्तिः, द्वितीये तु पटस्यापि घटधर्मत्वप्रसङ्गाद्धर्मधर्मिणोश्चाऽभेदात्पुनरद्वैतमेवेति दोष एवेत्यर्थः ।

(२) तेन=प्रतियोगित्वेन, सह=सहितस्य, पटस्याऽद्वैतं स्यात्, "घटेन सहे"ति शेषः ।

(३) "अकिञ्चिदपेक्षस्य प्रतियोगित्वस्य प्रमाणाऽविषयत्वादि"त्यादिनोक्तेनेत्यर्थः ।

(४) यथा घटनिष्ठप्रतियोगित्वस्य पटघटितमूर्तिकत्वेन पटस्य घटधर्मत्वं तथा पटनिष्ठप्रतियोगित्वस्यापि घटघटितमूर्तिकत्वेन घटस्यापि पटधर्मत्वं स्यादिति भावः ।

(५) अत्यन्तासम्बद्धयोर्हिमवद्विन्ध्ययोरपि धर्मधर्मिभावप्रसङ्ग इत्यर्थः ।

(६) "पटं प्रति"-इत्यनेन वाक्यैकदेशेनापि घटपटाऽभेदसिद्धिरित्याहेत्यर्थः ।

तदभेदसिद्धिरित्याह—। [b]"पटं प्रती"ति ॥ [c]"नापी"ति । प्रतियोगित्वं धर्मः कश्चिदिति द्वितीयपक्ष इत्यर्थः ॥ घटप्रतियोगित्वस्य(१) घटधर्मत्वे पट†स्यापि घट†धर्मत्वं, प्रतियोगित्वस्य पट†घटितमूर्त्तिकत्वादित्याह—। [d]"योसावि"ति । यथा घटप्रतियोगित्वे पटो धर्मस्तद्वत्पटप्रतियोगित्वेपि घटो धर्मो वाच्यः, युक्तेस्तुल्यत्वादित्याह—। [e]"यदा चे"ति ॥ कुत एवमत आह—। [f]"नही"ति ॥ ततः किमित्यत आह—। [g]"परस्परमाश्रितत्व-मि"ति ॥ अस्तूभयोरपि धर्मधर्मिभावः, एतावतापि भेद एवेत्यत आह—। [h]"किंचे"ति । घटप्रतियोगित्वस्य(१) घट†धर्मत्वे येन संबन्धेन तद्धर्मत्वं तस्यापि तदीयत्वे संबन्धान्तराङ्गीकारेऽनवस्था, स्वरूपसंबन्धस्यैव तत्राभ्युपगमे धर्मिस्वरूपसंबन्धो धर्मो, धर्मस्वरूपसंबन्धो धर्मीत्युभयमेकमेव पर्य्यवस्येदित्यर्थः ॥

मू० [a]एवमन्यस्मिन्नपि धर्मविकल्पे इति । [b]तस्मात्स्वरूपभेदे प्रमाणं भवत्प्रत्यक्षमद्वैते एव प्रमाणं भवति । *[c]ननु, घटादिकमेव यदाऽन्यानपेक्षं वीक्ष्यते तदा घटादिकमित्येव प्रतीयते यदा पुनः पटादिना निरूप्यते तदा ततो(२) भेद इति प्रतीयते*? । मैवम् । [d]घटादिकमित्येवंभूतप्रतीतेस्तावद्भेदप्रतीतिर्विलक्षणा, सा च न घटादिमात्रेण स्वविषयेणाऽन्यथाकारा भवितुमर्हति, *[e]नच पटादिकमधिकं तदा प्रकाशते इति विशेषः स्यात्*, घटपटविषयप्रतीतितोपि वैलक्षण्यात् । [f]नहि 'घटः पटश्चे'ति'घटात् पटो‡ भिन्न' इतिप्रतीत्योरेकार्थकत्वं कश्चित्प्रत्येति ।

(१) पटनिरूपितघटनिष्ठप्रतियोगित्वस्येत्यर्थः ।

(२) ततः=पटादितः, भेदरूपेण प्रतीयते घट इत्यर्थः;"तत"—इत्यस्य पटादिनिरूपणादिति वा ऽर्थः ।

‡ एतच्चिह्नस्थले पटाद्घट इति वक्तव्येपि घटात्पट इति घटपटयोः प्रतियोग्यनुयोगिभाववैपरीत्येन वचनं प्रतीत्योर्वैलक्षण्यमात्राभिप्रायकत्वादौत्सर्गिकं पूर्वापरपन्यासारूप्यार्थं तथैव कल्पनीयं वा ।

Digitized by Google

तत्कस्य हेतोः? पञ्चम्या प्रथमया च वैकल्पिकं निर्दिश्यमसह्यमानयैव प्रतीतिकलहनिरासात्।

टी० एवं घटत्वादिनापि धर्मेण सह घटाद्यभेदो वाच्य इत्याह—। [a]"एवमि"ति। धर्मविकल्पे=धर्मभेदे॥ स्वरूपभेदग्राहिप्रत्यक्षमभेदविषयं पर्यवस्यतीत्युपसंहरति—। [b]"तस्मादि"ति॥ यदन्याऽसाकाङ्क्षं तदन्यसाकाङ्क्षमपि भविष्यति निरूपकभेदादिति शङ्कते—। [c]"नन्वि"ति। एक एव घटोऽन्येन निरूप्यमाणो भेद इति उच्यते, अन्यथा तु घट एवेत्यर्थः॥ भेदप्रतीतिघटप्रतीत्योर्वैलक्षण्यं विषयवैलक्षण्यपरतन्त्रमिति तदभावात् प्रतीतिवैलक्षण्यमेव न स्यादिति परिहारमाह—। [d]"घटादिकमि"ति॥ ननु प्रतियोगिप्रवेशाऽप्रवेशकृतमेव प्रतीतिवैलक्षण्यमित्यत आह—। [e]"नचे"ति॥ 'घटाद्भिन्नः पट'‡ इतिप्रतीति'घटः पटश्चे'तिप्रतीतेर्विलक्षणा प्रतियोग्यनुप्रवेशमात्रेणानुपपन्नेति ततोऽपि विषयान्तरमनुसरणीयमित्याह—। [f]"नही"ति॥

मू० [a]नहि घटः पटश्चेति प्रत्येतव्ये कश्चिद् घटात्पटो‡ भिन्न इति प्रत्येति। तस्माद् घटस्य न स्वरूपनिरूपणे पटप्रतीत्यपेक्षा। * [b]नच यत्प्रतीतिर्यत्प्रतीतेः कारणं स्यात् तच तस्याः कारणभूतायाः प्रतीतेर्योर्थः तस्माद् "अर्थमि"ति कृत्वा कार्यभूतायाः प्रतीतेरर्थः प्रतीयते*, [c]मा भून्निर्विकल्पकार्थादेवं(१) सविकल्पकार्थस्य प्रतीतिः, मा च सादृश्यादेरेवं(२)स्मर्यमाणादेः स्यात्। [d]तस्मात् 'पटो घटाद्भिन्न'‡—इत्याद्याकारेण घटा†देर्भेद एव भेदावधिभूतपटा†दिसंघटितः स्फुटं सर्वलोकसाक्षिकः प्रतीयमानो नैकप्रतीते(३)रन्यप्रतीत्यपेक्षामात्रेण समर्थयितुं शक्योऽतिप्रसङ्गा-

(१) एवं='गोत्वाद्गौ'रित्यादिप्रकारेण। (२) एवं='सादृश्यात्स्व' इत्यादिप्रकारेण।
(३) एकप्रतीतेः(=स्वरूपप्रतीतेः) अन्यस्य प्रतियोगिनो या प्रतीतिस्तदपेक्षामात्रेणेत्यर्थः। अतिप्रसङ्गात्='गोत्वाद्गौः' 'सादृश्यात्स्मरणामि'त्यादिप्रतीतिप्रसङ्गादित्यर्थः।

द्विति । [e] अत एवान्योन्याभावं भेदमवगाहमानं प्रत्यक्षमद्वैतश्रुतिबाधकमित्यपि निरस्तम् । [f] अन्योन्याभावोपि यस्माद्भेद (१) एष्टव्यस्तमात्मन्येवान्तर्भावयेदुक्तयुक्तिभिः ।

टी० नन्वेक एव विषयः प्रतीतिभ्यामालम्ब्यतां को दोषः? इत्यत आह—। [a] "नही"ति । भवेदेवं, यदि पञ्चमी प्रथमयोरर्थयोऽभेदो भवेत्, न त्वेवं, ततश्च प्रयोगवैलक्षण्यात् प्रतीतिवैलक्षण्यं, ततश्च विषयवैलक्षण्यमित्यर्थः ॥ ननु घटस्वरूपभाने कदाचित्प्रतियोगिनः पटस्य ज्ञानं हेतुरिति ज्ञानगतहेतुत्वं पटे आरोप्य व्यपदिश्यते 'पटाद्घट'—इति, यथा 'धूमादग्निरि'ति; तथाच न पञ्चमीनिर्देशबलाद्विषयवैलक्षण्यमत आह—। [b] "नचे"ति ॥ तर्हि 'गोत्वाद्गौः' इत्यपि प्रतीतिः,'अवयवाद्गौः' इत्यपि च स्याज्जनकज्ञानविषयेपि पञ्चमीनिर्देशस्य त्वयेष्यमाणत्वादित्याह—। [c] "मा भूदि"ति । "सादृश्यादे"रित्यादिपदात्पदलिङ्गादिग्रहः । "स्पर्यमाणादे"रित्यादिपदात्पदार्थलैङ्गिकादिसंग्रहः ॥ तस्मात्स्वरूपभेदो नास्त्येव । यदि प्रतीतिबलादाऽऽस्थीयते तदाऽन्योन्याभावः स्यादपि, यदि तत्र बाधकं न भवेदित्युपसंहरन्नाह—। [d] "तस्मादि"ति ॥ [e] "अत एवे"ति । प्रतियोग्यधिकरणयोरभेदपर्य्यवसानादित्यर्थः ॥ एतदेवाह—। [f] "अन्योन्याभावोपी"ति । विश्वप्रतियोगिकान्योन्याभावस्य घटधर्मत्वे विश्वस्यापि घटधर्मत्वापत्तौ धर्मधर्मिणोरभेदपर्यवसानस्य(२) स्वरूपभेदप्रस्तावे युक्तेरुक्तत्वादित्यर्थः ॥

मू० [a] किंच, घटपटयोस्तदन्ययोश्च तादात्म्यमन्योन्याभावस्य प्रतियोगि मन्तव्यं, तद्यदि सर्वथा नेष्यते, तदा तद्विशिष्टस्तदुपलक्षितो वाऽन्योन्याभावोपि न प्रमाणेन प्रत्येतुं शक्यः । नहि शशविषाणविशिष्टस्तदुपलक्षितो वा कश्चित्प्रामाणिको भवितुमर्हति । तत्कस्य हेतोः? । तस्मिंस्त-

(१) यस्माद्भेद एष्टव्यः=यत्प्रतियोगिको भेद एष्टव्यः, तं प्रतियोगिनमात्मन्येवान्तर्भावयेत् "निष्प्रतियोगिकस्य भेदस्य प्रमाणाऽगोचरत्वादि"त्याद्युक्तयुक्तिभिरित्यर्थः ।

(२) अभेदपर्यवसानस्य युक्तेरुक्तत्वादित्यन्वयः ।

द्विशिष्टरूपेऽर्थे(१)तादृशि चोपलक्षणव्यवच्छिद्यमानात्मनि प्रमाणं निविशमानं विशेषणमपि तदीयं तदुपलक्षणमपि वा नानुल्लिखद्भवितुं प्रभवति, तस्मिं(२)श्चात्यन्तमसत्येवा-वलम्बने न तत्प्रामाण्यं शक्यसमर्थनम्। * [b]नच वाच्यं पटप्रतियोगिको घटमाश्रितोऽसावभावोऽभ्युपगम्यमानो नात्यन्ताऽसत्प्रतियोगिकतादोषमावहतीति *। [c]तथा सति संसर्गाभावादन्योन्याभावस्य को विशेषः स्यात्?। [d]नहि यथा घटाभावः पटसंसर्गीति घटसंसर्गाभावं पटे समर्थयसे तथा घटाभावः पटात्मक इति तत्तादात्म्याभावं पटस्य स्वीकरिष्यसि। तस्मात्तादात्म्यं संसर्गं च प्रतियो-गिकोटावन्तर्भाव्याऽन्योन्याभावसंसर्गाभावयोर्वैलक्षण्यम-भ्युपेयम्, तथा सति चात्यन्तासत्प्रतियोगिता दुर्वारा।

टी० 'तादात्म्याभावः'—इतिव्यपदेशानुरोधेन तादात्म्यस्यैव प्रति-योगितामभ्युपगम्य दोषमाह—। [a]"किंचे"ति। घटपटयोस्तादात्म्यमत्य-न्तासदिति तत्प्रतियोगिकाभावप्रतीतौ विशेषणत्वमुपलक्षणत्वं वा तस्या-नुपपन्नमित्यन्योन्याभावप्रतीतिरेव न भवेद् भवन्ती वा न प्रमा स्यादसद्वि-षयत्वादित्यर्थः॥ ननु न तादात्म्यं प्रतियोगि, किंतु पटादिरेव, तथाच नात्यन्तासद्विषयतान्योन्याभावप्रतीतेरत आह—। [b]"नच वाच्यमि"ति॥ [c]"तथा सती"ति। एवं सति घटनिष्ठपटप्रतियोगिकाभावोऽत्यन्ताभाव एव स्यान्न तादात्म्याभाव इत्यर्थः॥ ननु घटनिष्ठः पटप्रतियोगिकोऽभावः

(१) तद्विशिष्टरूपेऽर्थे (=अत्यन्तासद्विशिष्टरूपेऽर्थे) तस्मिन् प्रमाणं निविशमानं तदीयं विशेषणं नाऽनुल्लिखद्भवितुं प्रभवति, तादृशि चोपलक्षणव्यवच्छिद्यमानात्मनि (अत्यन्ताऽसतोपलक्षणेन व्यवच्छिद्यमान आत्मा=स्वरूपं, यस्य तस्मिन्) प्रमाणं निवि-शमानं तदुपलक्षणमपि नाऽनुल्लिखद्भवितुं प्रभवतीति योजना।

(२) तस्मिन्=विशेषणीभूते उपलक्षणीभूते वा तादात्म्ये।

संसर्गाभाव एव, अयं तु न घटनिष्ठः, किंतु घटात्मक एवेति महान्भेदोऽत आह—। [d] “नही”ति । एवमभ्युपगमे तवापसिद्धान्त इति भावः । * ननु घटपटतादात्म्यमत्यन्तासदिति न घटतादात्म्यमपि, तथाच तदेव तादात्म्याभावप्रतियोगि स्यादिति नात्यन्ताऽसत्प्रतियोगिकता * ?—इति चेन्न, घटतादात्म्यस्य पटे निषेधः संसर्गाभाव एवेत्यग्रे वक्ष्यमाणत्वात् (१) । * नचेह तादात्म्यं प्रतियोगितावच्छेदकमिति संसर्गाभावाद्भेदः *, घटमात्रतादात्म्यस्य प्रतियोगितावच्छेदकत्वे संसर्गाभावादविशेषात्; उभयतादात्म्यस्य तत्त्वेऽन्योन्याभावप्रतीतेरसद्विषयत्वापातात् ॥

मू० * [a] न च वाच्यं घटे पटत्वं नास्ति पटे च घटत्वं नास्तीत्येतावन्मात्रपर्यवसितैवान्योन्याभावस्य व्यवस्था मन्तव्येति *, यतस्तथा सति घटत्वे पटत्वे च न कश्चित्तादृशो धर्मोऽभ्युपगम्यते योऽन्योन्यस्मिन्निषेद्धुं योग्य इति तयोस्तादात्म्यापत्तौ सत्यां घटे पटत्वं, पटे घटत्वं च, निषेधत् प्रमाणं घटत्वपटत्वशून्यत्वं द्वयमप्यावेदयतीति वैधर्म्यस्य स्वरूपभेदस्य चासंभवेन किं प्रतियोगिनं, किं वालम्बनं,(२) विधाय पटघटान्योन्याभावः प्रमाणपथमवतरेदिति । [b] अत एव न वैधर्म्यमपि भेदमावेदयत् प्रत्यक्षमद्वैतश्रुतिबाधकमुपपद्यते । वैधर्म्येऽपि हि घटत्वपटत्वादौ वैधर्म्यमन्यदस्तीत्यभ्युपगमे वैधर्म्ये वैधर्म्यविश्रान्त्यनवस्थयो[c]रेकम[d]ननुभवश्च कथं प्रत्युत्तरणीयः ।

टी० [a] “नच वाच्यमि”ति ॥ घटत्वपटत्वयोरन्योन्यस्मिन्नभावोऽन्योन्याभावो यदि घटपटयोर्भेदः स्यात्तदा घटत्वपटत्वे परस्परं भिन्ने न स्यातां,

(१) “यदि तु तादात्म्यं नामाऽभेदाख्यो धर्मः कश्चिदिष्यते, स घटपटाद्यधिकरणतया निषिध्यते, तदा संसर्गाभाव एव स्यात्”—इति त्रिंशत्कारिकाव्याख्यानावसरे मूले वक्ष्यमाणत्वादित्यर्थः । (२) आलम्बनम्=अनुयोगिनम् ।

Digitized by Google

तयो(¹)स्तादृशधर्माभावात्; तदुभयाऽभेदे च घटपटयोरपि भेदो दुर्लभः, प्रतियोगितावच्छेदकाधिकरणतावच्छेदकधर्मा(²)भावादित्यर्थः । किञ्चिद्वस्तु स्वत एव विलक्षणमिति तु परिभाषामात्रमिति भावः ॥ ननु, घटनिष्ठात्यन्ताभावप्रतियोगिधर्मवत्त्वं पटस्य, पटनिष्ठात्यन्ताभावप्रतियोगिधर्मवत्त्वं घटस्य, यद्वैधर्म्यं, तदेव भेदस्तमालम्बमानं प्रत्यक्षादि श्रुतिबाधकं स्यादित्यत आह—। [b] "अत एवे"ति । तादृशो धर्मो घटत्वपटत्वादिकमेव वाच्यं, तत्र च तादृशधर्मान्तराभावादभेदसिद्धौ घटपटयोरप्यभेद एव पर्य्यवसन्न इत्यर्थः ॥ [c] "एकमि"ति । वैधर्म्यविश्रान्तिरेकं दूषणम् अनवस्था वेत्यपरम् अनयोर्दूषणयोरेकमित्यर्थः ॥ [d] "अननुभवश्चे"ति । नहि घटत्वे धर्मान्तरमनुभूयते इत्यर्थः । यद्यपि जातिव्यक्त्योरन्योन्यमेव धर्मधर्मिभाव(³)इति नानवस्था. न वाऽननुभवः, नाप्यन्योन्याश्रयः, परस्परमपेक्ष्याऽज्ञानादनुत्पादादनवस्थितेः; परस्परभेदजिज्ञासायां तु परस्परविशेषणत्वविज्ञानात्तज्ज्ञान(⁴)मिति, तथापि घटत्वपटत्वयोरेव वैधर्म्यं भेदकमिति तु दुर्वचमेवेति भावः ।

मू० [a] वैधर्म्ये च वैधर्म्याऽस्वीकारे वैधर्म्ययोरैक्यापत्त्या कथमाऽऽत्माश्रयभेदत्वेन [b] तयोः पर्यवसानं स्यात्। किंच, [c] ये ते वैधर्म्ये भेदौ ते किं घटादितो भिन्ने धर्मिणि निविशेते? किमभिन्ने? [d] परस्परविरुद्धयोरनयोः पृथग्भूतस्य(⁵)प्रका-

(१) तयोः=घटत्वपटत्वयो,स्तादृशधर्माभावात्=भेदकधर्माभावादित्यर्थः। तथाहि-घटत्वपटत्वयोः स्वतो व्यावृत्तत्वे घटपटादयएव स्वतो व्यावृत्ता अङ्गीकरणीयाः किं मुधा तद्वृत्तिवैधर्म्यस्य व्यावर्तकत्वकल्पनया, अथ घटत्वपटत्वे स्वगतघटत्वत्वपटत्वत्वादिरूपवैधर्म्यभेदभिन्ने, तर्हि ते अपि स्वगतवैधर्म्यान्तरभिन्ने, ते अप्येवमित्यनवस्थापात इति भावः ।

(२) धर्माऽभावात्, धर्मभेदाऽभावादित्यर्थः ।

(३) व्यक्तौ जातिः समवायेन, जातौ च व्यक्तिः स्वनिष्ठाधारतानिरूपिताऽऽधेयत्वसंबन्धेन, वर्तते इति परस्परं धर्मधर्मिभाव इत्यर्थः ।

(४) तज्ज्ञानम् = पारस्परिकभेदज्ञानम् ।

(५) पृथग्भूतस्य प्रकारस्य = भेदाऽभेदादिरूपस्य प्रकारस्य, असम्भवात् = परस्परं विरुद्धत्वेन सहसम्भवाऽसम्भवादित्यर्थः ।

रस्यासंभवात् । आद्ये, येन भेदेन भिन्नत्वं वैधर्म्याश्रययोर्मन्तव्यं तत्रापि पर्यनुयोग (१) इत्यनवस्थायां पर्यवसानं स्यात् । * सन्त्वनन्ता एव भेदाः *?–इति चेन्न, [c] क्रमेण तेषामाश्रयसंबन्धे, सावधिसत्त्वे (२) वस्तुनि तदन्वयासङ्गतिरेव । [f] अथ जायमानं वस्तु युगपदेव ते भेदाः परिरभन्ते, तदा किंभेदविशेषिते किंभेदव्यवस्थितिरिति किं विनिगमकं? विशेषाभावादन्योन्यकलहे तेषां कः समाधातुमीष्टे ? । [g] चरमचरमस्वीकार्येण च भेदेन प्रथमप्रथमस्वीकृतभेदोप[h]योगसिद्धेरग्रे धावन् पश्चाल्लुप्यमानो, विस्मरणशीलश्रुतवत्, स भेदप्रवाहः किमालम्बेत । [i] एवमेवंविधे विषयेऽन्यत्रापि–

[j] प्राग्लोपाविनिगम्यत्वप्रमाणाऽपगमै(३)र्भवेत् ।
अनवस्थितिमास्थातुरचिकित्स्या त्रिदोषता ॥ १९ ॥

टी० नन्वस्तु वैधर्म्ये विश्रान्तिः किमेतावतेत्यत आह–। [a] "वैधर्म्ये"ति ॥ [b] "आत्माश्रयभेदत्वेने"ति । घटत्वपटत्वयोरैक्ये कथं स्वाश्रयादेव स्वाश्रयस्य भेदौ ते(४)स्यातामित्यर्थः ॥ [c] "ये ते"इति । ये(५) ते इति द्विवचनं

(१) येन भेदेन भिन्नत्वं सोपि भिन्ने धर्मिणि निविशते? किं वाऽभिन्ने?–इति पर्यनुयोगः = प्रश्न इत्यर्थः ।

(२) अवधिः = कालमर्यादा, तेन सह वर्तमानं सत्त्वं यस्य वस्तुनस्तत्सावधिसत्त्वं वस्तु, तस्मिन्सावधिसत्त्वे वस्तुनि, कार्य्ये वस्तुनीति यावत्; तदन्वयाऽसङ्गतिः, तस्य=क्रमिकाऽनादिभेदप्रवाहस्य, योऽन्वयः=सम्बन्ध,स्तस्याऽसङ्गतिरेवेत्यर्थः; साद्यनाद्योराधाराऽऽधेयभावानभ्युपगमादिति भावः ।

(३) समुदायिनः समुदायिभिन्नत्वपक्षे तृतीयाविभक्त्यर्थः प्रयोज्यत्वं, तथाच प्राग्लोपादिप्रयोज्या त्रिदोषतेत्यर्थः, अभिन्नत्वपक्षे त्वऽभेदोऽर्थस्तथा च प्राग्लोपाद्यभिन्ना त्रिदोषतेत्यर्थः ।

(४) एकस्यैव धर्मस्य स्वाश्रयात्स्वाश्रयभेदकत्वे घटत्वमपि घटाद्घटस्य भेदकं स्यादिति भावः ।

(५) ननु मूले 'यो वैधर्म्यभेदः स किं भिन्ने निविशतेऽभिन्ने वा"–इत्येव वक्तव्यं किं "ये ते वैधर्म्ये भेदौ" इतिद्विवचनोपादानेनेत्यत आह–ये ते इति ।

विकल्पानुपयुक्तमपि भेदत्वस्फोरणाय ॥ ननु भेदाभेदाभ्यां प्रकारान्तरमपि स्यादित्यत आह—। [d] "परस्परे"ति ॥ [e] "क्रमेणे"ति । अनन्तानां यदि क्रामिकी वृत्तिस्तदा दिनद्वयस्थायिनि घटादौ न वर्तेरन्; किंच, कार्यमात्र एव न वर्तेरन्नित्यर्थः ॥ ननु, जातः, संबद्धश्चेत्येकः कालः, तथाच सर्वभेदा युगपदेव वर्तन्तामित्याशङ्कते—। [f] "अथे"ति । यद्यपि युगपदेव वर्तमानाना-मप्यन्योन्यकलहः कथं स्यात् नहि घटत्वपृथिवीत्वद्रव्यत्वसत्त्वादीनां युगप-द्वृत्तौ कलहः, तथापि भेदो भिन्ने वर्तते ऽभिन्ने वेति विकल्पे किमपि नोत्त-रमेतावतेति भावः ॥ [g] "चरमे"ति । यद्यपि युगपद्वृत्त्यभ्युपगमे "चरमचर-मस्वीकार्य्यत्वे"त्यनुपपन्नं, तथापि 'भिन्ने वर्तते' इत्याश्रयणे प्रथमविशिष्टे द्वितीय(¹)वृत्तिर्वाच्या, तत्र यौगपद्येऽपि प्रथमचरमभावसम्भव एवेति भावः ॥ [h] "उपयोगे"ति । भिन्नत्वप्रतीतिरेवोपयोगः । [i] "एवमि"ति । गवि गोत्वं वर्तते? अगवि वा?—इति विकल्प्य गोत्वादिकमपि निरसनीयमित्यर्थः ॥ [j] "प्राग्लोपे"ति । अयिमायिमभेदाङ्गीकारे तेनैवान्यथासिद्धौ पूर्वपूर्वभेदवि-लोपः, किं भेदभिन्ने को भेदो वर्तते? इत्यविनिगमः, बहवो भेदा एकत्र घटे वर्तन्ते इत्यत्र प्रमाणापगमः, ते एते दोषा अनवस्थायां पतन्तीत्यर्थः । * ननु भेदविशिष्टे एव भेदो वर्तते इति पक्षाभ्युपगमे क्व प्राग्लोपः, भेदप्रतीतेरेव तावद्भेदाभ्युपगममन्तरेणाऽनिर्वाहात् । अत एव नाऽवि-निगम्यत्वमिति । अवश्यनिर्वाह्यभेदप्रतीत्युपपादककल्पनायां तत्प्रती-त्यैव(²)भेदानां क्रमयौगपद्ययोरन्यतरस्याऽऽक्षेपात् । "सर्वतो बलवती ह्यन्यथानुपपत्तिरि"ति त्वयोक्तत्वात् । अत एव न प्रमाणापगमो भेदप्र-तीत्यन्यथानुपपत्तेरेव प्रमाणत्वात् । अन्यथा घटकादाचित्कत्वानुरोधेन तत्रापि सामग्रीपरम्पराभ्युपगमो न स्यात् । नचाऽनवस्थापि, तद्भेदभिन्न एव तद्भेदवृत्तेः । तद्वृत्तौ तद्भेदस्योपलक्षणत्वविशेषण(³)त्वाभ्यामुपपाद्य-

(१) द्वितीयवृत्तिर्वाच्या, अपरेषां सर्वेषां युगपद्वृत्तिर्वाच्येत्यर्थः ।

(२) अवश्यनिर्वाह्यभेदप्रतीत्यैवेत्यर्थः ।

(३) व्यावर्तकत्वमात्रं गुणमुपादाय विशेषणत्वमित्तोपाधित्वं ग्राह्यं, तथाच न पूर्वं विशेषणपक्षोक्त आत्माश्रयाख्यो दोष इति भावः । यद्वा, विशिष्टवृत्तेर्धर्मस्य विशेषणवृत्तित्वानभ्युपगममतेनैतत् ।

त्वात् । न वा भिन्ने भेदेन वर्तितव्यमिति नियमः । "कुत्र वर्त्तते?–इति-प्रश्ने, यत्र प्रतीयते इत्युत्तरं, कुत्र प्रतीयते?–इतिप्रश्ने, यत्र वर्तते", इति वार्त्तिककारादिग्रन्थाप्युपपत्तेः । विप्रपञ्चितश्चायमुद्धारो भेदप्रकाशे * ?। नैवम् । भेदप्रतीतेराविद्यकं भेदमादायोपपाद्यत्वात् । परमार्थे तु भेदे एते विकल्पा इति भावः । यत्तु,([1])"भेदप्रतीतिरनन्तभेदालम्बना, ? एकभेदालम्बना वा ?"–इत्यादिना प्राम्लोपाऽविनिगम्यत्वादीनामुपपादनं केनचित् कृतं तदनुपपन्नम्,"अनवस्थितिमास्थातु"रित्यभिधानादनवस्थापत्ते एव दोषत्रयस्याभिधानादिति ॥

मू० [a]यदि च क्वचिद् गत्वा स्वरूपमेवान्योन्यं व्यावर्तमानं भेद इष्यते तदा ययोः स्वरूपं [b]तथैष्टव्यं [c]तयोर्निःस्वरूपतापत्तिः ; [d]अथ * न स्वरूपमात्रं मिथो व्यावर्तते किंनाम स्वरूपविशेषः *–इत्युच्यते, [e]तर्हि स्वरूपविशेषमात्रव्यावृत्त्या स्वरूपमात्रं तयोः ([2]) स्यादित्येकत्वापत्तिः ।

टी० ननु स्वरूपभेदभिन्नयोरेव वैधर्म्यं भेदो वर्ततामिति नानवस्थेत्यत आह–। [a]"यदि चे"ति ॥ [b]"तथैष्टव्यमि"ति । व्यावर्तमानमेष्टव्यमित्यर्थः ॥ [c]"तयोरि"ति । ययोर्घटपटयोः स्वरूपं व्यावर्तमानं तयोर्निःस्वरूपत्वापत्तिरित्यर्थः ॥ ननु घटपटस्वरूपयोरन्योन्यव्यावृत्तावपि स्वरूपमात्रं न व्यावर्तते इति कुतो निःस्वरूपत्वापत्तिरित्याह–। [d]"अथे"ति ॥ घटपटयोः स्वरूपं न परस्परं व्यावृत्तं, किंतु स्वरूपविशेषः परस्परव्यावृत्त इति तयोरैक्यमेव पर्यवसन्नमित्याह–। [e]"तर्हीं"ति । * नच विशेषव्यावृत्त्यैव तयोर्भेद इति वाच्यम् *, स्वरूपाऽव्यावृत्तौ स्वरूपविशेषस्य([3])परस्परमव्यावृत्तेः, तद्व्यावृत्तौ वा स्वरूपव्यावृत्तेरावश्यकतया पुनः सैव निःस्वरूपतेति भावः ॥ (शेषमत्र)

---

(१) कारिकाया व्याख्यामान्तरं दूषयति–यस्त्वित्यादिना ।

(२) तयोः=घटपटयोः स्वरूपमात्रमव्यावृत्तं स्यादित्यर्थः ।

(३) स्वरूपविशेषस्येत्यतोऽग्रे"ऽपि"शब्दो द्रष्टव्यः । तद्व्यावृत्तौ=स्वरूपविशेषव्यावृत्तौ ।

Digitized by Google

॥ श्रीः ॥

सटीकसंक्षेपशारीरकम् ।

॥ सटीकसंक्षेपशारीरकस्य द्वितीयोऽध्यायः ॥

(*Continued from page* 402. Vol. VII.)

मू० ॥ ह्रस्वाणुत्वे कारणद्वित्वहेतो-
र्जाते नैते पारिमाण्डल्यहेतोः ॥
दीर्घत्वं यद् यच्च दीर्घे महत्त्वं
द्रव्ये ते द्वे कारणत्रित्वहेतोः ॥ ७२ ॥

टी० ॥ सूत्रस्थवाशब्दसमुच्चितं व्यभिचारं दर्शयन् द्व्यणुकत्र्यणुकपरिमाणयोस्तदभिमतं कारणमाह। ह्रस्वाणुत्वे इति । द्व्यणुकगतह्रस्वत्वाणुत्वे इत्यर्थः । कारणद्वित्वहेतोः परमाणुसमवेतद्वित्वाद्धेतोर्जाते भवतः, नैते परिमाण्डल्याद्धेतोरिति, पारिमाण्डल्यस्य परमाणुपरिमाणस्यानारम्भकत्वाङ्गीकारात्, अन्यथा द्व्यणुकस्यापि परिमण्डलत्वापत्तेरिति हि तेषां मतम्। एवं दीर्घे द्रव्ये त्र्यणुके यद् दीर्घत्वं यच्च महत्त्वं ते द्वे द्व्यणुकगतबहुत्वादेव हेतोर्जाते इत्यपि तेषां मतम् । तथा च कुतस्तदुक्तो नियम इति भावः ॥ ७२ ॥

मू० ॥ द्व्यणुकस्य जन्म परमाणुयुगात्
परिमण्डलादिति कणादमतम् ॥
द्व्यणुकत्रयात् त्र्यणुकजन्म पुन-
र्नियमं न कश्यपसुतो वदति ॥ ७३ ॥

टी० ॥ किं चैकत्राभ्युपेतमन्यत्राभ्युपगन्तव्यमिति न तेषामप्यस्ति नियमः, तथा सति हि परमाणुद्वयादिव द्व्यणुकं द्व्यणुकद्वयादपि किंचित् कार्यं स्यात्, न च तदप्यणवेव स्यादित्यारम्भेऽप्यर्थाद् द्व्यणुकद्वयमारम्भकं नेति वाच्यम्, द्वित्वसंख्या हि परमाणुगता स्वाश्रयपरिमाणादधिकपरिमाणमारभत इति क्लृप्तम्, एवं च द्व्यणुकद्वित्वं च तादृशमेव परिमाणमारभेत तच्च महत्त्वमेव स्यात्, न हि द्व्यणुकपरिमाणादधिकपरिमाणं महत्त्वादन्यत् संभवति,

एवमपि यदि कारणबहुत्वमेव कार्यमहत्त्वारम्भकमिति तदीयो नियमः स्यात् तदैतन्न स्यात्, न च सोऽस्ति, द्व्यणुकत्र्यणुकपरिमाणातिरिक्तकार्यपरिमाणे तैरपि कारणसंख्याविशेषनियमानभ्युपगमात्, तथा च तद्वदेवेदमपि किं न स्यादित्याशयेनाह । द्व्यणुकस्य जन्मेति । परिमण्डलादिति परमाणुविशेषणम् । तद्द्वित्वारब्धं परिमाणं तदधिकमिति तन्मते प्रसिद्धं दर्शयितुमितीति द्रष्टव्यम् । त्र्यणुकजन्मेत्यत्रापि कणादमतमित्यनुषञ्जनीयम् । पुनः पश्चात्, ततोऽन्यत्र कार्यपरिमाणेषु, कश्यपसुतो वैशेषिकः । एवं च तन्तुरूपादिसाम्येन ब्रह्मचैतन्यस्य तत्कार्यसजातीयारम्भकत्वमापादयितुं कथं स शक्नुयादिति भावः ॥ ७३ ॥

मू० ॥ द्व्यणुकत्र्यणुकव्यपाश्रयं

परिमाणं प्रति कारणाश्रयः ॥

न तु कारणमिष्यते गुण-

स्तदवष्टभ्य वयं जिगीषवः ॥ ७४ ॥

टी० ॥ तस्माद् वैशेषिकेण कारणगुणारम्भकत्वविषयनियमेन न ब्रह्मकारणवादः प्रक्षेप्तुं शक्य इत्याशयेनाह । द्व्यणुकेति । कारणाश्रयो गुण इति संबन्धः, गुणः परिमाणम् । तथा सति तत्र किं स्यात् तदाह । तदवष्टभ्येति । तदाश्रित्य तं वयं जिगीषवो जेतुमिच्छामः । तद्ब्रह्मचेतनकारणत्वं तदाक्षेपं निराकृत्य वयं समर्थयितुं समर्था इत्यर्थः ॥ ७४ ॥

मू० ॥ यदि कारणसंश्रयाद् गुणाद्

द्व्यणुकादेः परिमाणमिच्छति ॥

द्व्यणुकादिसमाश्रये तदा

परिमाणेऽतिशयो विरुध्यते ॥ ७५ ॥

यदि पुनर्वैशेषिको ब्रह्मकारणताप्रद्वेषादुक्तदोषपरिहाराय तत्रापि कारणपरिमाणादेव कार्ये परिमाणारम्भं ब्रूयात् तत्राह । यदि कारणेति । गुणात् परिमाणगुणात् परिमाणस्य सजातीयपरिमाणारम्भकत्वनियमेन द्व्यणुकत्र्यणुकयोरपि पारिमाण्डल्यमेव स्यान्न तु तत्परिमाणे ततोऽतिशयः

स्यात् ततश्च त्र्यणुकादेरप्यतीन्द्रियतापत्तिः, नित्यपरिमाणस्यानारम्भकत्व-नियमोऽपि तदीयो विरुध्येत। वस्तुतस्त्वयं द्व्यणुकादिकल्पनैव निष्प्रमाणा न तावद् द्व्यणुकादि प्रत्यक्षेण सिध्यति। अमहत्त्वात्। ननु त्र्यणुकं कार्यद्रव्यावयवं जन्यमहत्त्वाधिकरणत्वात् पटवदिति द्व्यणुकसिद्धौ तत्कारणतया परमाणुरपि सिध्यतीति चेन्न। अप्रयोजकत्वात्, महत्त्वांशानर्थक्याच्च। तस्य द्व्यणुकव्यावृत्त्यर्थत्वे चान्योन्याश्रयात्। ननु त्र्यणुकस्य कार्यद्रव्यत्वेन तच्चूनपरिमाणकारणसिद्धौ तस्यातीन्द्रियस्यामहत्त्वादणुद्रव्यं तावत् सिद्धम्, तद् यदि सावयवं तर्हि सिद्धमेव द्व्यणुकम्, अथ निरवयवं तर्हि परमाणवः सिद्धाः, तथापि तन्तुद्वयवत् तद्द्वयमपि किं चिद् द्रव्यं जनयेदिति तदेव द्व्यणुकं सिध्यतीति द्व्यणुकपरमाण्वोः सिद्धिरिति चेद्, भवत्वेवं तत्संभावना तत्सत्ता तु प्रमाणं विना न सिध्यतीति। त्र्यणुके कार्यत्वं चासिद्धमिति के चित्। अस्मन्मते तु यद्यपि नासिद्धं तथाप्यप्रयोजकम्, आत्मन आकाशः संभूत इत्युपक्रम्याद्भ्यः पृथिवीति श्रुताया एवापरिच्छिन्नाया एकस्याः पृथिव्यास्तदारम्भोपपत्तेः। न चैवं सर्वत्र तदुपलम्भापत्तिः। घटशरावपिण्डतदवयवकपालादिषु तद्विकारेषु तस्या उपलभ्यमानत्वात्। न हि घटशरावाद्यात्मना मृन्नोपलभ्यते। न च यत्र कार्यं नास्ति तत्रापि सा विद्यते चेत् कथं नानुभूयेत, न चेत् कथं सैका स्यादिति वाच्यम्। तत्र सत्त्वेऽपि तस्याः पराभिमतजातिवदनुपलम्भसंभवात्, कार्यगतरूपादिष्वेव व्यवहारानुरोधेनादृष्टनिमित्तोद्भूतत्वसंभवेन तदात्मनैव तस्याः प्रत्यक्षत्वात्, परेषामपि त्र्यणुकोपादानगतोद्भूतरूपादौ प्रमाणाभावात्, अन्यथा तस्यैव लाघवेन प्रत्यक्षत्वनिमित्ततया द्व्यणुकादेरपि प्रत्यक्षत्वापत्तेः। त्र्यणुकादौ त्वदृष्टवशादुद्भूतरूपादि भविष्यति, दृश्यते हि श्यामावयवारब्धेऽपि घटादौ पाकाल्लौहित्यम्। त्र्यणुककारणैकत्वानङ्गीकारे चानन्तद्व्यणुकान्यनन्ताश्च परमाणवस्तत्र च पृथिवीत्वमेकजातिरित्यनेककल्पनागौरवप्रसङ्गात्। अस्मन्मते तु प्रकृतिरेकैव सर्वविकारानुगता मृच्छराव इत्यादिबुद्ध्यालम्बनमिति सैव सामान्यमित्युच्यते न ततः पृथक् पृथिवीत्वमस्ति। सर्वमुक्तौ प्राकृते वा प्रलये न हि तत्सत्त्वे किं चिन्मानमस्ति येन तदिदानीमसत्याः पृथिव्या-

स्मदतिरिच्येत, प्रत्युत धर्मिणं विना धर्मासंभवेन तदानीं तदभावश्च परमाण्वादेरपि विभक्तस्य तदा सत्त्वासंभवात् । सदेव सोम्येत्यादि-श्रुतिविरोधाच्च । एतेनास्वादिकमपि व्याख्यातम् । ननु त्र्यणुककारणस्यान्यत्र दर्शनानुरोधेन तदल्पपरिमाणत्वमनेकत्वं चेति कथमेतदिति चेच्च । यत्कारणं तन्महदिति तन्त्वादाववगतनियमस्याद्भ्यः पृथिवीति श्रुतैकत्व-सामर्थ्यावगतमहत्त्वानुरोधिनो बलवत्तया तद्विरोधिनः कार्यन्तुद्रारब्धत्वनि-यमस्य बाधितत्वात् । अत एवानेकारब्धत्वमपि न ग्राह्यम्, उक्तरीत्या त्र्यणुकेऽसंभवात् । किं च लोके समुद्रावयविन एकस्मादतितुद्रा बुद्बुदादिर्दृश्यते, त्वन्मते च दीर्घेभ्यस्तन्तुभ्यो ह्रस्वः पटो भवति, दीर्घादेकस्मादपि सूत्रादल्पं त्रिवृत्सूत्रं लोकशास्त्रसिद्धम् । अस्मन्मते तु विवर्त एवेति न कोऽपि नियमः। अपि च प्राक् सदसद्वा स्वसामग्रीतो जायमानं यथानेककारणे समवैति तथैकस्मिन्नपि तत्समवाये किं बाधकम् । अनेकत्र तत्समवायदर्शनस्य साव-यवसमवायदर्शनतुल्यत्वात् । अनेकावयवत्वसावयवत्वयोरविशेषात् सह-कारिसंनिधिक्रमेणैकस्मादप्युपादानात् क्रमकार्योपपत्तेः । तत्राशश्चादृष्ट-नाशायत्त इति न किं चिदवद्यम् । किं च निरवयवपरमाणुसंयोगासंभ-वादपि न तेषां कारणता भवेत्, न हि विश्लिष्टा एव ते जगज्जनयेयुः, संयोगश्चाव्याप्यवृत्तिरेव लोके समधिगतः, न हि कुड्यादेर्वस्त्वन्तरेण संयो-गस्तस्य परभागस्थमपि व्याप्नोति । न च निरवयवसंयोगः स्वाश्रयं व्याप्नुया-दिति वाच्यम् । तथा सति कर्णशष्कुलीसंयोगो गगनमात्रवृत्तिरिति तन्मात्रं श्रोत्रं सर्वदेशस्थानपि शब्दानुपलम्भयेत् । परमाणुसंयोगस्यापरपरमाणुव्यापने च परमाणुद्वयमेकपरमाणुमात्रं स्यादिति न तत्कार्ये परिमाणोपचयो भवे-त् । अव्याप्यवर्तनं च संयोगस्य निरवयवे न संभवति विरोधादित्यन्यत्रोप-पादितम् । एवं कार्यस्य प्रागुत्पत्तेरसत्त्वे नरशृङ्गादविशेषादुत्पत्तिर्न स्यात् । प्रा-गभावप्रतियोगित्वादि तद्विशेषणं तदाऽसतोऽनुपपन्नम् । धर्मकाले विद्यमा-नस्यैव धर्मिणोऽतदधिकरणत्वेन यदा कदा चित् स तदधिकरणमिति तु बालभाषितम् । एवमसतः कारणविशेषसंबन्धान्तरासंभवादपि न तदर्थं कारणविशेषे प्रेक्षावत्प्रवृत्तिरुपपद्येत्यारम्भवादोऽनुपपन्न एवेति भावः ॥ ७५ ॥

मू० ॥ परिणामवादमुपगम्य तथा
रचनाद्यसंभवमुवाच मुनिः ॥
परमेश्वरं न हि विना घटते
जडरूपवस्तुपरिणाम इति ॥ ७६ ॥

टी० ॥ अस्तु तर्हि परिणामवादस्तत्र च मृद् घट इति प्रत्यक्षं प्रमाणम्, मृद्घटयोरत्यन्तभेदे गवाश्वयोरिव सामानाधिकरण्यप्रतीत्यनुपपत्तेः, एवमत्यन्ताभेदेऽपि न हि भवति घटो घट इति धीः, तस्मात् कार्यकारणयोर्भेदाभेदस्तात्त्विक इति परिणामवादः प्रमाणाढ्य इति तत्राह । परिणामवादमिति । यथा संघातादिवादस्यासंभवमुवाच तथा रचनानुपपत्तेश्च नानुमानमित्यादिभिः सूत्रैः परिणामवादेऽपि रचनाद्यसंभवं मुनिरुवाचेत्यर्थः । रचना कार्यगतावयवविन्यासः, आदिपदेन कार्योत्पादनादिलक्षणप्रवृत्त्यादिरुच्यते । कुतस्तन्मते रचनाद्यसंभवस्तत्राह । परमेश्वरमिति । लोके हि कुलालादिश्चेतनोऽचेतनमृदादि परिणमयति, साङ्ख्यमते च जगत्परिणामकर्ता परमेश्वरो नास्तीति कथं लौकिकन्यायसिद्धं परमेश्वरं विना जडरूपवस्तुनः प्रधानस्य जगत् परिणामो घटेत, न हि जीवास्तत्परिणामयितारस्तेषां निर्विशेषाणां तन्मत उदासीनत्वात्, न हि किं चिदपि वस्तु स्वयमेव परिणममानमुभयसंप्रतिपन्नमस्ति, अतः स वादोऽनुपपन्न एव । घटादेः कार्यस्य वस्तुतो मृदादिकारणाभेदे मृदादिरिव कुलालादिव्यापारात् प्राक् सोऽपि किमिति नोपलभ्यते, कुलालादिव्यापारो वा किमर्थः । ननु मृदादिगतपिण्डाद्यवस्थयाऽऽवरणात् तदा विद्यमानोऽपि घटादिर्नानुभूयते । आवरणादिभङ्गार्थश्च कुलालादिव्यापार इति चेच । सर्वस्यापि तत्कार्यस्य सर्वदा तत्कारणात्मना सत्त्वेन सर्वं सर्वस्यावरकमिति तदा किमपि नानुभूयेत, वक्तव्यो वा घटादेः स्थित्यवस्थातः प्रागवस्थायां विशेषः, पिण्डाद्यावरणभङ्गोऽपि प्राक् सन्नेव जन्यत इति कृतं कुलालादिव्यापारेण, असंश्चेदसतोऽप्युत्पत्तौ घटादिरपि तथैव भवितुमर्हतीति किं प्राक्सत्त्वकल्पनया । यत्तु मृद् घट इति प्रतीत्या तयोर्भेदाभेद इति तन्न । तयोः

परस्पराभावरूपयोरेकदैकत्रानुपपत्तेः, न वा प्रतीयमानाभेदस्याभावं कश्चिदनुभवति। ननु भेदो नाभावः किं तु व्यावृत्तघटादिस्वरूपमेव, अभेदस्तु घटपटादौ सर्वत्रानुगता पृथिवीति पृथिव्यात्मना घटपटाद्यभिन्नं घटाद्यात्मना च भिन्नमिति भेदाभेदव्यवहार इति चेद्, भवत्वेवं सर्वत्र पृथिव्येका घटादेस्तस्याश्च भेद एव चेद् भेदवादिमतमेव समर्थितं स्यात्, तथा च प्रागुत्पत्तेर्घटादेः सत्त्वासत्त्वाद्याश्रितदोषस्तदवस्थ एव, अभेदे च तस्याः प्रागुत्पत्तेरुपलम्भप्रसङ्गादिदोषो न निवर्ततेति, सर्वस्य पृथिव्यात्मनेव घटाद्यात्मनाऽप्यभेदः स्यात्, पटाद्यभिन्नपृथिव्यभिन्नत्वाद् घटादेस्तयोर्भेदाभेद इति चेत्, तस्यैवेदानीं दुर्निरूपत्वात्, तस्मान्नास्त्येव भिन्नाभिन्नं वस्तु, एवं च कारणाभिन्नकार्यस्य कारणातिरिक्तसत्ताशून्यत्वमेव कारणतादात्म्यम्, तदेव च मृद् घट इत्यादिसामानाधिकरण्यप्रतीत्यालम्बनमिति विवर्तवाद एव प्रमाणसिद्धो न वादान्तरमिति भावः ॥ ७६ ॥

मू० ॥ क्व चिदभ्युपेत्य कथनं कुरुते
परपक्षदूषणकथावसरे ॥
निजपक्षदोषपरिहारपरः
क्व चिदभ्युपेत्य वदतीह मुनिः ॥ ७७ ॥

टी० ॥ नन्वारम्भादिपक्षत्रयनिराकर्तुः सूत्रकारस्य किं सर्वत्राविशिष्ट एवाशयः किं वा क्व चिद् विशेषोऽस्तीति जिज्ञासायामाह। क्व चिदभ्युपेत्येति। परपक्षदूषणकथावसरे परपक्षदूषणप्रधाने तर्कपादे क्व चिद् वैशेषिकाधिकरणे तदुक्ताणुकारणप्रक्रियामभ्युपेत्य तेनैव न्यायेन चेतनब्रह्मकार्यं जगदिति स्वपक्षे वैशेषिकोक्तकारणगुणारम्भदोषपरिहारपरः सन् महद्दीर्घवदित्यादिना कथनं कुरुते, क्व चिद् रचनानुपपत्त्याद्यधिकरणे तन्मतं केवलमुपेत्योपन्यस्येह शास्त्रे मुनिर्दूषणमात्रं वदतीति विशेष इत्यर्थः। वैशेषिकाणां हि कारणगुणारम्भाश्रयं दोषं तदभ्युपगमेनैव व्यभिचारेण परिहर्तुं प्रथममेवमधिकरणं विरच्योभयथापि न कर्मातस्तदभाव इत्यधिकरणान्तरेण तदीयं मतं दूषयामास न तथेतरयोः, केवलतन्मतदूषणस्यैव तत्र कृतत्वादिति भावः ॥ ७७ ॥

Digitized by Google

मू० ॥ परपक्षनिषेधमाचरन्
क्व चिदङ्गीकरणं करोति सः ॥
परदर्शितदोषनुत्तये
क्व चिदित्येष विशेष ईरितः ॥ ७८ ॥

टी० ॥ उक्तमेव विवेचयति । परपक्षेति । परिणामादिपक्षनिषेधमित्यर्थः । आचरन्निति हेतौ शतृप्रत्ययस्तेन परपक्षनिषेधहेतोस्तदर्थमङ्गीकारः क्व चित् परोक्तदोषपरिहारार्थमित्यर्थः । अङ्गीकरणं करोति । परपक्षस्यानुवादमात्रं करोति न तु तद्दृष्टान्तमाश्रित्य स्वपक्षे कं चिद् दोषं परिजिहीर्षतीत्यर्थः । उत्तरार्द्धे क्व चिदिति वैशेषिकाधिकरण इत्यर्थः ॥ ७८ ॥

मू० ॥ भोक्त्रादिसूत्रे परिणामवाद-
माश्रित्य तद्वादिभिरुक्तदोषम् ॥
समादधानो मुनिराह तस्मात्
सिद्धान्तसिद्धिः पुनरुत्तरत्र ॥ ७९ ॥

टी० ॥ यस्मादेवं सूत्रकारः संघातादिवादमिव परिणामवादमपि निराचकार तस्माद् भोक्त्रापत्तेरविभागश्चेदित्यादिसूत्रे यद् वादिभिरद्वैतसमन्वये भोक्तृभोग्यादिसांकर्यं प्रसञ्जितं तत् परिजिहीर्षुर्भेदाभेदघटितं परिणामवादमभ्युपगम्य स्याल्लोकवदिति तत्परिहारं मुनिराह न तु स्वसिद्धान्ततया, तथा सति तत्प्रतिषेधायोगात्, स्वसिद्धान्तसिद्धिस्तूत्तरत्र तदनन्यत्वमारम्भणशब्दादिभ्य इत्यत्र द्रष्टव्येत्याह । भोक्त्रादीति ॥ ७९ ॥

मू० ॥ प्रत्यासन्ना परिणतिरियं विप्रकृष्टस्तु पूर्वः
संघातादिः सकल उदितो वेदसिद्धान्तसिद्धेः ॥
एतावत्त्वादियमभिमता सूत्रकारस्य भाति
भ्रान्तिभ्रष्टस्फुटनिजमनःकौशलानां नराणाम् ॥ ८० ॥

(शेषमग्रे)

॥ माधवीयधातुवृत्तिः ॥

(*Continued from page* 481. VOL. VII.)

चीवृ आदानसंवरणयोः ॥ चीवति । चिचीव । चीविता । चिचीविषति । चेचीव्यते । चीवयति । अचिचीवत् । चीवते । चिचीवे इत्यादि । ऊङ्भावित्वाभावात् यङ्लुगस्ति । अनुदिदित्येके । चीवरम् । छित्वरेत्यादिना वरचि वलोपः । चिनोतेर्वा निपातनम् । संचीवरयते भिक्षुः । चीव-

Subscribers will accept, we trust, our apology for the unavoidably delayed issue of the current number and for the insufficiency of its letter-press. The November number will contain twelve additional pages.

THE PUBLISHERS.

दाशृ दाने ॥ दाशति । ददाश । दाशिता । दिदाशिषति । दादाश्यते । दादाष्टि । दाशयति । अददाशत् । दाशते । ददाशे इत्यादि । दाश्वान् साह्वान् इति क्वसावद्वित्वमनिट्त्वं च निपात्यते । दाशतेऽस्मै इति दाशः । 'दाशगोघ्नौ संप्रदाने' इति अचि निपात्यते । पुरो दाश्यत इति पुरोडाशः । तत्सहचरितमन्त्रोऽपि पुरोडाशः । पुरोडाशस्य संस्कारको मन्त्रस्य भ्रिरोऽसि इत्यादि मन्त्रः । पौरोडाशः । पुरोडाशस्य पौरोडाशस्य च व्याख्यानं तत्र भवं वा पुरोडाशिकं, पौरोडाशिकम् । 'पौरोडाशपुरोडाशात्ष्ठन्' इति

मू० ॥ परपक्षनिषेधमाचरन्
क्व चिदङ्गीकरणं करोति सः ॥
परदर्शितदोषनुत्तये
क्व चिदित्येष विशेष ईरितः ॥ ७८ ॥

टी० ॥ उक्तमेव विवेचयति । परपक्षेति । परिणामादिपक्षनिषेध-मित्यर्थः । आचरन्निति हेतौ शतृप्रत्ययस्तेन परपक्षनिषेधहेतोस्तदर्थमङ्गीकारः क्व चित् परोक्तदोषपरिहारार्थमित्यर्थः । अङ्गीकरणं करोति ।

न्यत्वमारम्भणशब्दादिभ्य इत्यत्र द्रष्टव्यमित्याह । भोक्त्रादीति ॥ ७९ ॥

मू० ॥ प्रत्यासन्ना परिणतिरियं विप्रकृष्टस्तु पूर्वः
संघातादिः सकल उदितो वेदसिद्धान्तसिद्धेः ॥
एतावत्त्वादियमभिमता सूत्रकारस्य भाति
भ्रान्तिभ्रष्टस्फुटनिजमनःकौशलानां नराणाम् ॥ ८० ॥

(शेषमग्रे)

काशीस्थराजकीयप्रधानपाठालयाध्यापकेन श्रीद्विवेदहरिनाथशर्म्मणा ।

Digitized by Google

॥ माधवीयधातुवृत्तिः ॥

(*Continued from page* 481. VOL. VII.)

चीवृ आदानसंवरणयोः ॥ चीवति । चिचीव । चीविता । चिचीविषति । चेचीव्यते । चीवयति । अचिचीवत् । चीवते । चिचीवे इत्यादि । ऊङभावित्यस्य यङ्लुगस्ति । अनुदित्त्विन्येके । चीवरम् । छित्वरेत्यादिना वरचि वलोपः । चिनोतेश्चा निपातनम् । संचीवरयते भिक्षुः । चीवरमर्जयति परिधत्तइति वार्थः । 'पुच्छभाण्डचीवराण्णिङि'ति णिङ् । तत्र चीवरादर्जने परिधाने वेति वृत्तिः । अयं चुरादौ वा ॥ ८३० ॥

चायृ पूजानिशामनयोः ॥ चायति । चचाय । चायिता । चिचायिषति । चेकीयते । 'चायः की'ति यङ्यङ्लुकोः कीभावः । दीर्घोच्चारणं यङ्लुगर्थं स्थितम् । चेकयीति । चेकेति । चेकीतः । चाययति । अचचायत् । चायते । चचाये । इत्यादि । अचायिष्ट । चायित्वा । अपचितः । 'अपचितश्चे'ति निष्ठायामनिट्त्वम् चिभावश्च पक्षे निपात्यते, अन्यदा अपचायितम् । क्तिनि नित्यं चिभावो वक्तव्यः । अपचितिः । चनः । चनम् । चायतेर्ह्रस्वश्चेत्यसुनि नुडागमे ह्रस्वश्च यलि लोपः ॥ ८३१ ॥

व्यय गतौ ॥ व्ययति । वव्याय । व्ययिता । व्याययति । अविव्ययत् । व्ययते । वव्यये इत्यादि । व्ययतइति वित्तत्यागे नित्यमात्मनेपदी । अयं चुरादावदन्तः ॥ ८३२ ॥

दाशृ दाने ॥ दाशति । ददाश । दाशिता । दिदाशिषति । दादाश्यते । दादाष्टि । दाशयति । अददाशत् । दाशते । ददाशे इत्यादि । दाश्वान् साह्वान् इति क्वसावद्वित्वमनिट्त्वं च निपात्यते । दाशतेऽस्मै इति दाशः । 'दाशगोघ्नौ संप्रदान'इति अचि निपात्यते । पुरो दाश्यतइति पुरोडाशः । तत्सहचरितमन्त्रोऽपि पुरोडाशः । पुरोडाशस्य संस्कारको मन्त्रस्य शिरोसि इत्यादि मन्त्रः । पौरोडाशः । पुरोडाशस्य पौरोडाशस्य च व्याख्यानं तत्र भवं वा पुरोडाशिकं, पौरोडाशिकम् । 'पौरोडाशपुरोडाशात्ष्ठन्' इति

प्रत्येकं षष्ठ्यन्ताभ्यामाभ्यां भवव्याख्यानयोरर्थयोरुक्तन्। अत्रैव निर्देशात् दाशे-रीकारस्य इकारः । अस्मादनन्तरं स्वामिकाश्यपावयतिं पठतः । तदनार्षं प्रतीयते । यदाह । 'उपसर्गस्यायता'वित्यत्र हरदत्तः । अयतिरनुदात्तेत् इति ॥ ८३३ ॥

भेषृ भये ॥ क्वचित् गताविति पठ्यते । भेषति । बिभेष । भेषिता । बिभेषिषति । बेभेष्टि । भेषयति । अबिभेषत् । भेषते । बिभेषेइत्यादि ॥ ८३५ ॥

भ्रेषृ भ्लेषृ गतौ ॥ भ्रेषतीत्यादि पूर्ववत् । भ्रेषः ॥ ८३६ ॥

अस गतिदीप्त्यादानेषु ॥ असति । असिता । असिसिषति । आसयति । आसिसत् । आसते । आसे इत्यादि । अष इत्येकइति क्षीरस्वामिमैत्रेयौ । शाकटायनस्तूभावपि ॥ ८३७ ॥

स्पश बाधनस्पर्शनयोः ॥ स्पर्शनं ग्रथनमिति स्वामी । ग्रहणश्लेषयोरयं चुरादौ । स्पशति । पस्पाश । स्पशिता । अस्पाशीत् । अस्पशीत् । पिस्पशिषति । पास्पश्यते । पास्पष्टि । पस्पशा । यङ्लुगन्तादत्र टाप्, संज्ञापूर्वको विधिरनित्य इति नाभ्यासस्य दीर्घः । स्पाशयति । अपास्पशत् । अत्स्मृदृत्वरेत्यादिनाभ्यासस्यात्त्वम् । स्पशते । पस्पशे इत्यादि । अत्र स्वामी पष इत्येकइति तेन पाषण्डः, पाषाणा, इत्याह । दुर्गशाकटानयोरप्ययमेव पक्षः । अनयोः पाठे प्रतिस्पशो विसृज तूर्णितमः यतो व्रतानि पस्पशे । अपसर्गहस्त्वस्य स्पशः । शब्दविक्रेता नो भाति राजनीतिरपस्पशेत्यादि प्रयोगोऽननुगुणः । पाषण्डपाषाणप्रयोगस्तु अनुपसर्गादिति कथादेर्भविष्यति । यद्वा पषबन्धनइति युजादेः । अस्ति चायं युजादौ, यद्भुत्यति चुरादौ प्रेत्रेयः । पष बन्धनइति युजादावेके पठन्ति । अत्र स्वामिकाश्यपादयः । पाशादिदर्शनात् पशेति पठन्ति । पाशादयोऽपि चौरादिकेन बन्धनार्थेनापि सिद्धाः । पशुशब्दस्तु दृशेर्व्युत्पादयिष्यते । पसेति दन्त्यान्तस्तोऽत्रो धातुः । तस्य पसतीत्यादि । पशेर्यङ्लुकि जपजभेत्यादिना अभ्यासस्य नुकि पंपश्यते । पंपशीतीत्यादि । पंपश्यतीति कण्ड्वादेः । दुःखायतइत्यर्थः ॥ ८३८ ॥

लष कान्तौ ॥ कान्तिरिच्छा । लषति । ललाष । अलषीत् । अलाषीत् । लिलषिषति । लालष्यते । लालष्टि । लाषयति । अलीलषत् । लषते । लेषे इत्यादि । वा भ्राशेत्यादिना शब्विषये वा श्यनि । लष्यति, लष्यते । लषणः । जुचङ्क्रम्येत्यादिना युच् । लाषुकः । लषपतेत्यादिनोकञ् । विलाषी । अपलाषी । 'अपे च लष' इति घिनुण् । चशब्दाद्वौ अयेपि ताच्छीलिकाः ॥ ८३९ ॥

चष भक्षणे ॥ चषतीत्यादि । लषतिवत् । चषकः क्वुन् शिल्पिसंज्ञयोरिति क्वुन् । चाषः ॥ घञ् ॥ ८४० ॥

छष हिंसायाम् ॥ छषतीत्यादि पूर्ववत् । चच्छाष । चच्छषतुरित्यादौ अभ्यासस्य जश्त्वम् चर्त्वमेत्वतुक्कोः सिद्धं वक्तव्यमित्यत्र यथासंख्यानाश्रयणात् एत्वाभ्यासलोपयोरपि चर्त्वस्यासिद्धत्वादादेशादित्वादेत्वाभ्यासलोपौ ॥ ८४१ ॥

झष आदानसंवरणयोः ॥ झषत इत्यादि लषिवत् । अयं हिंसार्थः परस्मैपदिषु गतः ॥ ८४२ ॥

भक्ष अदने ॥ भ्रक्षेति क्षीरस्वामी । भक्षेति मैत्रेयः । तत्र गतिबुद्धीत्यत्र भक्षेरहिंसार्थस्य प्रतिषेध इति वार्त्तिकस्य भक्षयति पिण्डीं देवदत्तः । भक्षयति पिण्डीं देवदत्तेनेति ण्यन्ताद्धेतुमण्णौ प्रयोज्यस्याकर्मकत्वाभावं दर्शयता भाष्यकृता भक्षतिरभिहितः । सति हि अणि कर्त्ता स णाविति सामञ्जस्यादस्मादेव हेतुमण्णावुदाहृतं स्यात् तथा वृत्तितद्व्याख्यानेष्वपि भक्षेरहिंसार्थस्येत्यत्र चुरादिण्यन्तादेव भक्षेर्हेतुमण्णावुदाह्रियते । भ्रक्षति । बभ्रक्ष । भ्रक्षिता । बिभ्रक्षिषति । बाभ्रक्ष्यते । बाभ्रक्ष्टि । स्कोरिति कलोपः । लोटि हौ बाभ्रड्ढि । धित्वष्टुत्वजश्त्वानि । लङि तिप्सिपोर्हल्ङ्यादिलोपे अबाभ्रट् । भ्रक्षयति । अबभ्रक्षत् । भ्रक्षते । बभ्रक्षे इत्यादि । योत्र भ्लक्ष इति केषां चित् पाठः सोपि भक्षरतीति भ्लक्ष इति प्रपूर्वात् क्षरतेः प्रक्षशब्दस्य भाष्यकारेण व्युत्पादितत्वादनार्ष एव । तथा च श्रुतिरपि तस्य शिरश्छित्त्वा मेध्यं प्राक्षारयत् स प्लक्षोऽभवत्प्लक्षस्य प्लक्षत्वं यत् प्लक्षणाखेति अत्र लत्वं कपिलादित्वाद् द्रष्टव्यम् ॥ ८४३ ॥

दासृ दाने ॥ दासति । ददास । दासिता । दासतइत्यादि दासिवत् ॥ ८४४ ॥

माहृ माने ॥ माहति । ममाह । माहिता । माहते । ममाहे । मिमाहिषते । मामाह्यते । मामाढि । धित्वढत्वष्टुत्वढलोपाः । माहयति । अममाहत् ॥ ८४५ ॥

गुहू संवरणे ॥ गूहति । जुगूह 'ऊदुपधाया गोह' इति अजादौ प्रत्यये ऊकारः । स च गोह इति विकृतनिर्देशात् गुणविषय एव, तेन जुगुहतुरित्यादौ न भवति । गूहिता । ऊदित्त्वादनिट्पक्षे धत्वढत्वष्टुत्वढलोपगुणेषु गोढा । ढत्वादेरसिद्धत्वात्पूर्वमेव गुण इति ढलोपदीर्घाप्रसङ्गः । गूहिष्यति । घोक्ष्यति । ढत्वभष्भावयोः 'षढोः कः सि' इति कत्वम् । गूहतु । अगूहत् । गूहेत् । आशिषि गुह्यात् । अगुणविषयत्वादजादित्वाच्च च ऊत्वं न भवति । अगूहीत् इड्भावे शल इगुपधेति क्सढत्वभष्भावेषु अघुक्षत् । गूहते । जुगुहे । गूहिता । गोढा । गूहिष्यते । घोक्ष्यते । गूहताम् । अगूहत । गूहेत । आशिषि गूहिषीष्ट । इड्भावे लिङ्सिचाविति कित्त्वाच्च गुणः । तत एव गोहिरूपाप्रसङ्गात् अजादित्वाभावाच्चोत्वं न भवति घुक्षीष्टेति । अगूहिष्ट । इड्भावे 'लुग्वा दुहदिहलिहगुहामात्मनेपदे दन्त्य' इति दन्त्यादावात्मनेपदे पक्षे लुक् धत्वष्टुत्वढलोपदीर्घेषु अगूढ । अगूढाः । अत्र ताविति वक्तव्ये दन्त्यग्रहणस्य दन्त्योष्ठस्यापि परिग्रहार्थत्वात् अगुह्वहीत्यत्रापि लुग्भवति । अलुक्पक्षे ढत्वभष्भावकत्वष्टुत्वेषु अघुक्षत, अघुक्षातामित्यादि । क्सस्याचीत्यजादावल्लोपः । कर्मण्येकवचने चिणि अगूहि । अन्यत्र पूर्ववत् । सनि 'सनि ग्रहगुहोश्च' इति इण्निषेधे 'हलन्ताच्च' इति कित्त्वढत्वादौ जुघुक्षति । जोगुह्यते । जोगुहीति । नाभ्यस्तस्येति गुणनिषेधादूत्वाभावः । जोगोढि । अनजादित्वादूत्वाभावः । गूहयति । अजूगुहत् । ऊदिति तपरकरणात् णौ चङ्युपधाह्रस्वत्वं बाध्यते इति के चिदाहुः । एतद्भाष्यवार्त्तिकादौ न दृश्यते । अपरे तु ब्रुवते निगुह्य गत इत्यत्र 'ल्यपि लघुपूर्वादि' इति णेरयादेशे कर्तव्ये असिद्धवदत्रेत्यूत्वस्यासिद्धत्वनिवृत्त्यर्थमिति । नैतद्युक्तम् । व्याख्यातत्वेना-

Digitized by Google

सिद्धत्वाप्रसङ्गात् । ल्यपि णेरयादेशे । ऊत्वगुणावुपधायाः । गूह्यं, शासिदु-हिगुहिभ्यो वेति वक्तव्यमिति क्यप् । तदभावे ण्यति गोह्यं, काकेभ्यो गुह्य-न्तइति काकगुह्यास्तिलाः । मूलविभुजादिभ्य उपसंख्यानमिति कः ॥ गूहते-ऽनयेति वा गुहा । गिर्यौषध्योरित्यङ् । गूढिरन्यत्र । गूहित्वा । गूढ्वा । गूढः ॥ हिक्कादय उदात्ताः स्वरितेतः ॥ ८४६ ॥

अथाजन्तानुभयपदिन आह । श्रिञ् सेवायाम् ॥ उदात्तः । श्रयति । शिश्राय । शिश्रियतुः । शिश्रियुः । शिश्रयिथ । शिश्राय । शिश्रय । शिश्रि-यिव । अचि इयङादेशः । अन्यत्र वृद्धिगुणौ अत्र 'असंयोगाल्लिट् कि'दिति लिटः कित्त्वात् 'श्र्युकः किती'ति प्राप्तस्येटो निषेधस्य क्रादिनियमेन बाधः । श्रयिता । श्रयिष्यति । श्रयतु । अश्रयत् । आशिषि श्रीयात् । अकृत्सार्व-धातुकयोरिति दीर्घः । अशिश्रियत् । णिश्रीति चङ् । लघूपधगुणादन्तरङ्ग-त्वादियङ् । श्रयते । शिश्रिये इत्यादि । शिश्रयिषति । शिश्रीषति । सनी-वन्तर्धेत्यादिना इड्विकल्पः । अनिट्पक्षे अज्झनेति दीर्घः । 'इको झलि'ति कित्त्वादगुणत्वं, शेश्रीयते । शेश्रयिता । शेश्रेति । श्राययति । अशिश्र-यत् । वृद्ध्यायौ, णौ कृतस्य स्थानिवत्त्वात् श्रीशब्दस्य द्विर्वचनम् । श्रायः । 'श्रीणीभुवोनुपसर्गे' इति घञ् । उच्छ्रायः । 'उदि श्रयतियौतिपूद्रुव' इति घञ् । कथं पतनान्ताः समुच्छ्रया इति 'कृत्यल्युटो बहुल'मिति वचनात्, एवं च उदिश्रयतीति तिपा निर्देशात् यङ्लुगन्तात् 'उच्छेश्रय' इति अजेव । विश्रयी । जिदृक्षिविश्रीति ताच्छीलिक इनिः ॥ श्रित्वा । श्रितः । 'श्र्युकः किती'-ति इण्निषेधः । कष्टश्रितः । द्वितीयाश्रितेति समासः । श्रेणिः । वहिश्रिश्रुयुद्रु-ग्लाहात्वरिभ्यो निदिति निः । श्रेणीकृताः । 'श्रेण्यादयः कृतादिभि'रिति तत्पुरुषः । श्रेण्यादिषु च्व्यर्थवचनमिति तत्र वार्त्तिकम् । क्विब् वचिप्र-च्छ्यायतस्तुकटप्रुजुश्रीणां दीर्घो ऽसंप्रसारणं च इति क्विब्दीर्घौ । इयङ्-स्थानित्वात्, नदीत्वाभावात् हे श्रीरित्यत्र 'अम्बार्थनद्योर्ह्रस्व' इति न ह्रस्वः । ङिद्वचनेषु 'ङिति ह्रस्वश्चे'ति पक्षे नदीत्वादाटि श्रियाः । श्रिया-मित्यादि । अन्यदेयङि श्रिये, श्रियः । षष्ठीबहुवचने च 'वामी'ति नदीत्वे नुटि श्रीणां, श्रियाम् । श्रिमन्यं ब्राह्मणकुलम् । भाष्यकारवचनात् श्रीश

ख्यस्य ह्रस्वः मुमभावश्च । श्मश्रु । श्मनि श्रयतेर्डुन्निति श्मन्शब्द उपपदे डुन् टिलोपः । श्मश्रुणः । पामादित्वान्नः ॥ ८४७ ॥

भृञ् भरणे ॥ एतदादयो नयत्यन्ता अनुदात्ता उभयपदिनः । भरति । बभार । बभ्रतुः । बभर्थ । बभृव । क्रादिनियमादिडभावः । पिति गुणः, वृद्धिः, अन्यत्राजादौ यण् । भर्त्ता । भरिष्यति । 'ऋद्धनोः स्ये' इतीट् । भरतु । अभरत् । भरेत् । आशिषि भ्रियात् । 'रिङ् शयग्लिङ्क्षु' इति रिङादेशः । रीङि प्रकृते रिङ्ग्रहणात् अकृत्सार्वधातुकयोर्न दीर्घः । अभार्षीत् । भरते । बभ्रे । भर्त्ता । संभरिष्यते । भरताम् । अभरत् । भरेत् । आशिषि भृषीष्ट । 'उश्चे'ति आत्मनेपदविषययोर्झलाद्योर्लिङ्सिचोः कित्त्वाच्च गुणः । अभृत । 'ह्रस्वादङ्गा'दिति सिचो लोपः । सिज्भावे गुण'उश्चे'ति कित्त्वाच्च भवति । बिभरिषति । सनीवन्तेत्यादिना वेट् । इडभावे सनो झलादित्वा'दिको झलि'ति कित्त्वे अज्झनगमामिति दीर्घे 'उदोष्ठ्यपूर्वस्ये'ति उत्वरपरत्वयो'र्हलि चे'ति दीर्घे बुभूर्षति । बेभ्रीयते । 'रीङ् ऋत' इति परत्वाद्रीङि कृते द्विर्वचनं, बर्भर्त्ति । लोटि हेर्ङित्त्वादगुणत्वे बर्भृहि । लङि हल्ङ्याबिति लोपे अबर्भः । एवं रिग्रीकोरपि । सनीवन्तेत्यत्र भरेति शपा निर्देशात् यङ्लुकि नेड्विकल्प इति बर्भरिषति इत्येव भवति । अत एव शपा निर्देशात् आचार्याः शब्विकरणं नेच्छन्तीति मतं प्रत्युक्तम् । तथा च वर्द्धमानसुधाकरशिवस्वाम्यादयो भरेति शपा निर्देशाद्भृञ् भरण इति भौवादिकस्य ग्रहणमिच्छन्ति । भारयति । अबीभरत् । भर्त्ता । भर्त्तुर्भावकर्मणी, भात्रम् । उद्गात्रादित्वादञ् । ग्रामभर्त्ता । याजकादित्वात् समासः । जारं भरति इति जारभरः । जारभरेति पचादिपाठादच् । भृत्यो भरणीयः । 'भृञोऽसंज्ञाया'मिति क्यपि तुक् । संपूर्वाद् विभाषेत्युक्तत्वात् ण्यदपि भवतीति संभृत्यः, संभार्य,इति क्यब्ण्यतोर्भवतः । संज्ञायां ण्यदेव भार्येति, पाणिगृहीतीत्यर्थः । संभार्ये गवामयनो हविर्विशेषः । भृत्या भरणविशेषः । संज्ञायां समजेत्यादिना स्त्रियां भावे क्यप् 'कर्मणि भृता'विति निर्देशात् भृतिरिति क्तिन् भवति । आत्मंभरिः । 'फलेग्रहिरात्मम्भरिश्चे'ति इन्प्रत्ययान्तो निपातितः । चकारात् कुक्षिंभरिश्चेति

वृत्तौ । अत एव चकारात् ज्योत्स्नाकरंभमुदरम्भरयश्चकोरा इत्यपि निर्वाह्यः । विश्वम्भरा । संज्ञायां भृतृवृजीत्यादिना खचि मुमागमः । भारः । घञ् । वंशभारं वहति, वांशभारिकः 'तद्धरतिवहत्यावहति भाराद्वंशादिभ्यः' । वंशादिपूर्वपदाद् भारान्तात् प्रातिपदिकात् द्वितीयासमर्थात् वहत्यादिष्वर्थेषु ठगिति ठक् । अपो भरतीति अभ्रम् । मूलविभुजादित्वात् कः । अभ्रं करोति, अभ्रायते । 'शब्दवैरकलहाभ्रकण्वमेघेभ्यः करणे' इति द्वितीयान्तात् करणे क्यङ् । करणं क्रिया । अकृत्सार्वधातुकयोरिति दीर्घः । भरुः, भर्त्ता । भृमृशीत्युप्रत्ययः । बभ्रुः पिङ्गलो नकुलश्च । कुर्भ्रश्चेति कुप्रत्यये द्वित्वम् । भरतः । भृशियजित्यतच् । द्वितयं जुहोत्यादौ । चकान्तो भर्त्सनादौ क्र्यादौ ॥ ८४८ ॥

हृञ् हरणे ॥ हरणं प्रापणं स्वीकारः स्तेन्यं नाशनं च । यथा भारं हरति ग्रामम् अंशं हरति सुवर्णं हरति चोरः पापं हरतीति, विहाराहारादावर्थान्तराभिधानं तूपसर्गवशात् । यदा प्रापणार्थस्तदा 'अकथितं चे'ति द्विकर्मकोयम् । तत्रास्य लादयः प्रधानकर्मणि भवन्ति । ह्रियते भारो ग्रामम् । हर्त्तव्यः, हृतः सुहर इति कृद्योगलक्षणा षष्ठी द्वितीयावत् उभयत्र भवति । हर्त्ता हारस्य ग्रामस्येति । उभयथा गोणिकापुत्र इति भाष्यउक्तत्वात् गुणकर्मणि द्वितीयापि द्रष्टव्या । हर्त्ता हारस्य ग्राममिति । हर्त्तव्यो भारो ग्रामं देवदत्तेनेत्यत्र 'कर्तृकर्मणोः कृती'ति प्राप्ता षष्ठी 'कृत्यानां कर्त्तरि वे'ति कृत्यानामिति योगं विभज्य उभयप्राप्ताविति नेति चानुवर्त्य उभयप्राप्तौ कृत्ये षष्ठी नेति भाष्ये प्रतिपादनाच्च भवति । स्पष्टं चैतत् क्षीरपटादौ । हरति । हरते इत्यादि । भरतिवत् । हारयति, अजीहरत् भारं देवदत्तं यज्ञदत्तः देवदत्तेनेति वा, 'हृक्रोरन्यतरस्या'मित्यणौ कर्त्तुर्णौ वा कर्मत्वम् । इयं च विभाषा यत्रायमभ्यवहारार्थे तदा पूर्वेण नित्ये कर्मत्वे प्राप्ते, अन्यदा त्वप्राप्तइत्युभयत्र विभाषा द्रष्टव्या । हारयति भारमित्यत्र प्रापणार्थत्वेप्यस्ति गतिप्रतीतिरिति गत्यर्थत्वेन प्राप्तिहता, स्पष्टं चैतत् हृक्रोरित्यत्र न्यासपदमञ्जर्योः । क्षीरटकारस्याप्यत्र गत्यर्थत्वमनभिमतइव, यदाह । 'न वेति विभाषे'त्यत्र हृक्रोरित्यस्य

उभयत्रविभाषोक्तौ प्रत्युदाहरणप्रदर्शने विपूर्वोहरतिर्गत्यर्थ इति । संप्रहरन्ते राजान इत्यत्र हरतेर्हिंसार्थत्वेपि न गतिहिंसेति निषेधस्य हृवहोरप्रतिषेध इति तङ् । अत्र हरदत्तः । अर्थग्रहणसामर्थ्यात् ये शब्दान्तरनिरपेक्षा गतिहिंसनयोर्वर्तन्ते तदिह गृह्यन्ते इत्युपसर्गवशेन हिंसार्थत्वाद्धरतेरप्रतिषेध इत्याहुरिति । एवं हि अभ्यवहारयतीत्यत्र निगरणचलनार्थेभ्य इति परस्मैपदनियमो न स्यात् तथा इह येषामभ्यवहृतमित्यत्र क्तोधिकरणे चेति क्तो न स्यात् । किं चार्थग्रहणमन्तरेणापि यत एवान्यापेक्षया तदर्थाभिधायिनां ग्रहणस्य सिद्धत्वादर्थग्रहणं यथाकथंचित्तदर्थाभिधायिनां ग्रहणएव प्रत्युत प्रमाणम्, एवं हि उपमानं शब्दार्थप्रकृतावेवेति प्रकृतिग्रहणमप्यर्थवत् । तस्येदं हि प्रयोजनं यत्र णिनिप्रकृतिरेव शब्दार्थं तत्रैवायं स्वरो यथा स्यात्, यत्रोपसर्गाद्यपेक्षया शब्दार्थत्वं गर्दभोच्चारीत्यादौ तत्र मा भूदिति । यद्यर्थग्रहणमप्यन्यानपेक्षयोपात्तार्थाभिधायिनां ग्रहणार्थं स्यात् किं प्रकृतिग्रहणेन, तथा च तत्र वृत्तिरपि, प्रकृतिग्रहणं किं, प्रकृतिरेव यत्रोपसर्गनिरपेक्षा शब्दार्था भवतीति । एवं तत्र न्यासपदमञ्जर्योरपि, तस्मादर्थग्रहणं यथाकथं चिदुपात्तार्थाभिधायिनो ग्रहणएव प्रमाणम् । अत एव न गतिहिंसेत्यत्र पदमञ्जर्यामाहुरिति कर्त्रन्तरनिर्देशः, । ततः संप्रहरिष्यन्तौ दृष्ट्वा कर्णधनञ्जयौ इत्यत्र युद्धाभिमुख्यमात्रमर्थ इति कर्मव्यतिहारस्याभावात् परस्मैपदम् । पैतृकमश्वा अनुहरन्ते, पितुरागतं प्रकारं सततं शीलयन्तीत्यर्थः । हरतेर्गतताच्छील्यइति तङ् । गतं प्रकारः । ताच्छील्यं तत्स्वभावता । न्यासे तु गतीति पठ्यते । यदाह गतौ ताच्छील्यमिति, शतस्य व्यवहरति शतं पणते, क्रीणाति विक्रीणीतइति वार्थः । ‘व्यवहृपणोः समर्थयो’रिति शेषे कर्मणि षष्ठी । द्यूते क्रयविक्रयव्यवहारयोः समानार्थत्वमनयोः । अन्यत्र शलाकां व्यवहरतीति द्वितीयैव विक्षिपतीत्यर्थः । प्रतिहर्त्ता, तस्य भावकर्मणी प्रातिहर्त्रम्, । उद्गात्रादित्वादञ् । अवहारः । पाहः । ग्रहः । श्याद्व्यधेत्यादिना णः । अंशहरः ‘हरतेरनुद्यमनेच्’ इति कर्मण्युपपदे ऽच् । अनुद्यमनमनुत्क्षेपणम् । उद्यमने तु भारहार इत्येव । कवचहरः ‘वयसि चे’ति कर्मोपपदात् हरतेः

वयसि गम्यमाने । कालकृतशरीरावस्था यौवनादिर्वयः । उद्यमनार्थोयमारम्भः । उद्यमनं क्रियमाणं संभाव्यमानं वा वयो गमयतीति वृत्तिः । पुष्पाहरः । 'आङि ताच्छील्य' इति कर्मोपपदात् आङुपसृष्टात् ताच्छील्ये ऽच् प्रत्ययः । दृतिहरिः पशुः । नाथहरिः पशुः । 'हरतेर्दृतिनाथयोः पशा'विति दृतिनाथयोः कर्मणोरुपपदयोः हृञः पशौ कर्त्तरि इन् प्रत्ययः । संह्रियन्तेऽनेनार्थैरिति वा संहारः । 'अध्यायन्यायोद्यावसंहाराधारावायाश्चे'ति करणाधिकरणयोर्घञ् निपात्यते । हरणं हारा, काराबन्धनइति भिदादिपाठादङ् गुणो दीर्घत्वं च । आह्रियन्तेस्मादूस इत्याहारः । अकर्तरि च कारकइति घञ् ॥ ८४९ ॥ (शेषमग्रे)

॥ श्रीः ॥

श्रौतपदार्थनिर्वचनम् ।

अथाग्निष्टोमसम्बन्धिपदार्थनामान्युच्यन्ते ।

(*Continued from page* 490 Vol VII.)

१ तस्य वसन्ततौ देवनक्षत्रेषु पौर्णमास्याममावास्यायां तयोः प्रतिपदि वा यथा सुत्या दीक्षा वा भवेत्तथारम्भः क्रियते ॥ इत्ययमग्निष्टोमारम्भकाल इत्युच्यते ॥

२ एका तिस्रो वा दीक्षा । अमावास्यायां सुत्यायां तत्प्रतिपद्यपि द्वादश । बहुदीक्षासु त्वन्तिमदिने प्रवर्ग्यसम्भरणम् । एकदीक्षायां तद्दिने वरणात्पुरो वा । अयमग्निष्टोमीयदीक्षानिर्णय इत्युच्यते ॥

३ यस्य पित्रादिभिः सोमयागो न कृतस्तस्य प्रायश्चित्तत्वेन ऐन्द्राग्नः पशुः श्रुतिचोदितः । तस्य पूर्वं पृथगनुष्ठानम् । अथवाऽग्निष्टोमाङ्गाग्नीषोमीयपशुना समानतन्त्रता । एवं यस्य-

त्रिपुरुषपर्यन्तं वेदाध्ययनं न जात,मग्न्याधानं च न जातं स दुर्ब्राह्मण इत्युच्यते । तस्य प्रायश्चित्तत्वेनाश्विनः पशुर्विहितः तस्यानुष्ठानमपि पूर्वपशुवद्विकल्पेन बोध्यम् ॥

४ अग्निष्टोमारम्भस्य पूर्वदिने नान्दीश्राद्धं भवति । रात्रावुदकशान्तिः प्रतिसरबन्धश्च । आरम्भदिने प्रातः स्नानादिपञ्चकं-यजमानपत्न्योः षोडशर्त्विजाञ्च । पुण्याहवाचने इन्द्रादयः प्रीयन्तामिति विशेषः । यजमानो गार्हपत्यस्य पश्चादुपविश्य पत्न्या सह प्राणानायम्य पुरुष एवेदमित्यृचा विष्णुं स्मृत्वा याः पुरस्तादित्यादि हृदये निविष्टमित्यन्तं जपति । ततो देशकालौ सङ्कीर्त्य विच्छिन्नसोमपीथसन्धानार्थमैन्द्राग्नेन पशुना दौर्ब्राह्मण्यपरिहारार्थमाश्विनेन पशुना च अग्नीषोमीयेण पशुना समानतन्त्रं यक्ष्यमाणो द्वादशस्तोत्रेण द्वादशशस्त्रेण रथन्तरसाम्ना सप्रवर्ग्येण शतगवदक्षिणेन ज्योतिष्टोमेनाग्निष्टोमसंस्थेन चतुष्टोमेन सोमेन स्वर्गकामो यक्ष्ये । एवं त्रिरुपांशु त्रिरुच्चैः सङ्कल्पयति । अयमग्निष्टोमसङ्कल्प इत्युच्यते ॥

५ सङ्कल्पानन्तरं तन्म इत्यादि ओं तथेत्यन्तं प्रकृतिवत् । सोमादि द्रव्यं इन्द्रादयो देवताः अस्मिन् ज्योतिष्टोमेऽग्निष्टोमे सोमे सोमप्रवाकं त्वामहं वृणे । इति सोमप्रवाकं वृणीते । स भविष्यामीति वदति । इदं सोमप्रवाकवरणमुच्यते ॥

६ सोमाख्ये यज्ञे यो यजमानेन वृतः सन् ब्रह्मादीनामाह्वानं करोति स सोमप्रवाक इत्युच्यते ॥

७ ततो यजमानः सोमप्रवाक सोमं मे प्रब्रूह्यृत्विग्भ्यः । इति

सोमप्रवाकं प्रत्याह । ततः स केभ्य इति पृच्छति । ततो यजमानः देवदत्तादिभ्यइति ब्रह्मादीनां नामान्याह । ततः सोमप्रवाको ब्रह्मादीनां गृहेषु क्रमेण गत्वा तानाह्वयति । तद्यथा । यज्ञदत्तशर्मणः सोमो भविष्यति तत्र भवता ब्रह्मत्वं कर्तव्यम् । ततो ब्रह्मा को यज्ञः क ऋत्विजः का दक्षिणेति सोमप्रवाकं पृच्छति । ततः स ज्योतिष्टोमोऽग्निष्टोमः सोमो यज्ञः । रङ्गनाथशर्मादयऋत्विजः । शतं गावो दक्षिणेति प्रत्याह । एवं सर्वेषामृत्विजां सोमप्रवाकेन साकं प्रश्नोत्तराणि भवन्ति । तत्र ब्रह्मत्वमित्यस्य स्थाने होत्रं आध्वर्यवं औद्गात्रं प्राशास्त्रं ब्राह्मणाच्छंसित्वं प्रतिप्रस्थातृत्वं प्रस्तोतृत्वं अच्छावाकीयं नेष्टृत्वं प्रतिहर्तृत्वं आग्नीध्रं उन्नेतृत्वं सुब्रह्मण्यत्वं पोतृत्वं ग्रावस्तुत्वं एते शब्दा बोध्याः । इदमृत्विगाह्वानमित्युच्यते ॥

८ यजमानः सोमप्रवाकेनाहूतान् यज्ञशालायां प्राप्तानृत्विजः क्रमेणाधानवद्वृत्वाहयति द्वितीयिनस्तृतीयिनः पादिनश्च । होता ब्रह्माऽध्वर्युरुद्गाता च प्रथमा इत्युच्यन्ते ॥

९ मैत्रावरुणो ब्राह्मणाच्छंसी प्रतिप्रस्थाता प्रस्तोता च द्वितीयिन इत्युच्यन्ते ॥

१० अच्छावाक आग्नीध्रो नेष्टा प्रतिहर्ता च तृतीयिन इत्युच्यन्ते ॥

११ ग्रावस्तुत्पोतोन्नेता सुब्रह्मण्यश्च पादिन इत्युच्यन्ते ॥

१२ ततो दश चमसाध्वर्यून् परिकर्मिणश्च सोमप्रवाकवद्वृत्वाहयति । इदं सौमिकर्त्विग्वरणमित्युच्यते ॥

१३ अध्वर्युस्तीर्थेन प्रविश्येडादिशान्तिं जपित्वा पशुबन्धवद्यजमानेन सहायन्तेयोनिर्ऋत्वियइत्यृचाऽग्निं समारोपयति । यजमान उदकुम्भं पुरस्कृत्य पत्न्यन्वारब्धः सोमारखीसहितः सर्वैः सम्भारैश्च सहितः सर्त्विक् आनोभद्रा इत्यादिशान्तिसूक्तानि पठन् यज्ञशाला स्वस्य दक्षिणतः पश्चाद्वाचेदुत्तरेण शालां परीत्य पूर्वाह्णे पूर्वद्वारेण प्रविशति । सा च भृत्यैः कुशलैः पूर्वमेव कारिता भवति । प्राचीनवंशा चतुर्दिक्ष्वतीकाशा दक्षिणतो वर्षीयसी चतुर्दिक्ष्वरत्निमात्रमध्यद्वारवती षोडशप्रक्रमव्यासा द्वादशप्रक्रमविस्तीर्णा दीर्घचतुरस्रा । तस्याः शालाया दक्षिणे व्रतश्रयणागारं भवति । पश्चात्पत्नीशाला । इदं कर्म शालाप्रवेश इत्युच्यते ॥

१४ इयं शाला प्राग्वंश इत्युच्यते ॥

१५ प्राग्वंशस्य पश्चिमाच्छङ्कोरनुस्यन्द्यं सार्धपदत्रयं सार्धतिलद्वयाधिकाङ्गुलद्वयं च मुक्त्वा शङ्कुं निहन्ति । स च गार्हपत्यमध्यशङ्कुः । सार्धतिलद्वयाधिकसप्तदशाङ्गुलया रज्ज्वा शङ्कौ पाशं प्रतिमुच्य मण्डलं परिलिखति । तद्गार्हपत्यस्यायतनं भवति । एवं सति पश्चाद्गार्हपत्यस्य सार्धपदद्वयमवशिष्टं भवति । पञ्चतिलाधिकचतुस्त्रिंशदङ्गुलं च गार्हपत्यस्यायतनं सम्पद्यते । प्राग्वंशपूर्वशङ्कोः प्रत्यङ्मनुस्यन्द्यं सार्धपदत्रये शङ्कुं निहन्ति । स आहवनीयमध्यः । द्विपदमाहवनीयायतनं सम्पद्यते । आहवनीयस्याग्रे सार्धपदमवशिष्टं भवति । गार्हपत्याहवनीययोरन्तरालं पञ्चधा षोढा वेत्यादिप्रकारेण दक्षिणाग्नेर्मध्यदेशं कल्पयित्वा शङ्कुं निहत्य पादोनतिलाधिकचतुर्विंशत्यङ्गुलया रज्ज्वा

मण्डलं परिलिख्य मध्यशङ्कोरज्ज्वा उदगध्यर्धतिलद्वयाधि-
कद्वादशाङ्गुले षडङ्गुले वा शङ्कुं निहत्य तत्र पाशं प्रतिमुच्य
तयैव रज्ज्वा मण्डलं परिलिख्य तयोः संसर्गो नियम्योत्तरं धनु-
रुत्सृजेत्, दक्षिणं दक्षिणाग्नेरायतनं भवति । आहवनीयस्य
पश्चात्प्राकृतवेदिः । तत्पश्चादवशिष्टो विषयः । इत्यन्तादन्त-
पक्षेण द्वादशिको विहारः । शेषं प्रकृतिवत् । अयं द्वादशिको
विहार इत्युच्यते ॥

१६ ऋत्विजस्तीर्थेन प्रविश्येडादिशान्तिं जपन्ति अध्वर्युः पशुब-
न्धवन्मथित्वाऽऽयतनान्युद्धृत्यावोक्ष्याग्नीन् विहृत्य परिस्तीर्य
परिषिच्य गार्हपत्ये स्मार्तवदाज्यं संस्कृत्य स्रुचि चतुर्गृहीतं
गृहीत्वा मनस्वत्याहवनीये जुहोति । पुनर्विहृत्याध्वर्युब्रह्माग्नी-
द्यजमाना यथायतनं पूर्वां शान्तिं पठन्ति । नमो वाचे नमो वाचे
या चोदिता या चानुदिता तस्यै वाचे नमो नमो वाच-
स्पतये नम ऋषिभ्यो मन्त्रकृद्भ्यो मन्त्रपतिभ्यो मा मामृषयो म-
न्त्रपतयः परादुर्माहमृषीन्मन्त्रकृतो मन्त्रपतीन् परादां वैश्वदेवीं
वाचमुद्यासꣳशिवामदस्तां जुष्टां देवेभ्यः शर्म मे द्यौः शर्म पृथिवी
शर्म विश्वमिदं जगत् ॥ शर्म चन्द्रश्च सूर्यश्च शर्म ब्रह्म प्रजा-
पती ॥ भूतं वदिष्ये भुवनं वदिष्ये तेजो वदिष्ये यशो वदिष्ये
तपो वदिष्ये ब्रह्म वदिष्ये सत्यं वदिष्ये तस्मा अहमिदमुप-
स्तरणमुपस्तृणउपस्तरणं मे प्रजायै पशूनां भूयासं प्राणापानौ
मृत्योर्मा पातं प्राणापानौ मा मा हासिष्टं मधु मनिष्ये मधु जनिष्ये
मधु वक्ष्यामि मधु वदिष्यामि मधुमतीं देवेभ्यो वाचमुद्यासꣳ-
शुश्रूषेण्यां मनुष्येभ्यस्तं मा देवा अवन्तु शोभायै पितरोनुम-

दन्तु ॥ ओं शान्तिः शान्तिः शान्तिः ॥ नमो वाचे इत्यत आरभ्यैतावान्मन्त्रः पूर्वशान्तिरित्युच्यते ॥

१७ अथाऽध्वर्युः प्राग्वंशशालाया अग्रभागे धनुर्मोने गते खात्वा शोधितया मृदाऽभिपूर्य तदुत्तरतस्तृणेष्वुदक्संस्थं वराहविहतं वल्मीकवपां शुक्लां दूर्वां कंसे छागापय इत्यासाद्य तेषामुत्तरतः प्रागग्रेषु दर्भेषु प्राचीनग्रीवमुत्तरलोम कृष्णाजिनमास्तीर्य उत्तरस्य शालाखण्डस्याग्रे स्फ्येनोद्धृत्यावोक्ष्य सैकतं परिमण्डलं खरं कृत्वा तं कुशैर्दूर्वाभिः प्रच्छाद्य परिश्रित्योत्तरतो द्वारं कृत्वा खरसमीपे अमेकपालपिष्टानि शर्करापिष्टानि अजकृष्णाजिनलोमानि फलकं वेणुशलाकां च सादयति । कुशलं कर्तारं सन्निधाप्य गार्हपत्ये प्रवर्ग्यमदन्तीरधिश्रित्य वेद्यामुभयतस्तृष्णामरत्निमात्रीं वैणवीमभ्रिं प्राचीं निधाय द्वाराणि परिश्रित्य पत्नीशालायां पत्नीमुपवेश्याग्नीन्परिस्तीर्य दक्षिणेनाहवनीयं ब्रह्मयजमानावुपवेश्य यजमानेऽन्वारब्धे युञ्जते मन उत युञ्जते धियो विप्रा विप्रस्य बृहतो विपश्चितः । विहोत्रा दधे वयुनाविदेक इन्मही देवस्य सवितुः परिष्टुतिः स्वाहा । इति मन्त्रेणाहवनीये जुहोति। यजमानः देवाय सवित्र इदं न ममेति त्यागं पठति । दीक्षिते तु यजमाने स्वाहाकाररहितं पूर्वोक्तं मन्त्रं जपत्यध्वर्युः । वराहेणोत्खाता मृत्तिका वराहविहतमुच्यते ॥

१८ वल्मीकमृत्तिका वल्मीकवपेत्युच्यते ॥

१९ ततोऽध्वर्युः देवस्य त्वा सवितुः प्रसवेऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्यामाददे । इति पूर्वं वेद्यां स्थापितां वैणवीमभ्रिमादत्ते । अभ्रिरसि नारिरस्यध्वरकृद्देवेभ्यः । इति अभ्रिं सव्येन धृत्वा दक्षिणहस्तेनाभिमन्त्रयते । उत्तिष्ठ ब्रह्मणस्पते देवयन्तस्त्वे-

महे । उपप्रयन्तु मरुतः सुदानव इन्द्रप्राशूर्भवासचा । इत्युत्तिष्ठते । प्रैतु ब्रह्मणस्पतिः प्रदेव्येतु सूनृता । अच्छा वीरं नर्यं पङ्क्तिराधसं देवा यज्ञं नयन्तु नः । इति तीर्थेन निष्क्रामति । तूष्णीं दक्षिणतो ब्रह्मयजमानावुपवेशयति । देवी द्यावापृथिवी अनु मे मंश्साथम् । इति मृदमुपतिष्ठते । ऋध्यासमद्य मखस्य शिरः । इति मृदमभ्र्या प्रहरति । अप उपस्पृश्य मखाय त्वा । इति मृदं हरति । मखस्य त्वा शीर्ष्णे । मृदमुत्तरतः कृष्णाजिने निवपति । एवमभिप्रहरणादि निवपनान्तं समन्त्रकं त्रिः कृत्वा तूष्णीं चतुर्थं करोति । स्वल्पां मृदं परिशेषयति । ततः इयत्यग्र आसीः । इति वराहविहतमुपतिष्ठते । अभिप्रहरणादि समन्त्रकं त्रिः कृत्वा चतुर्थं तूष्णीं कृत्वा वराहविहतमपि परिशेषयति । देवीर्वम्रीरस्य भूतस्य प्रथमजा ऋतावरीः । इति वल्मीकवपामुपतिष्ठते । अभिप्रहरणादि वराहविहतवत् । इन्द्रस्यौजोसि । इति दूर्वामुपतिष्ठते । अभिप्रहरणादि पूर्ववत् । अग्निजा असि प्रजापतेरेतः । इति छागापय उपतिष्ठते । अभिप्रहरणादि पूर्ववत् । छागापयो न परिशेषयति । मृद्वशेषानप्येव कृष्णाजिने प्रकिरति । अध्वर्युब्रह्मयजमाना अन्यतोमुखा अनभिश्वसन्तः प्रैतु ब्रह्मणस्पतिरादेव्येतु सूनृता । अच्छा वीरं नर्यं पङ्क्तिराधसं देवा यज्ञमानयन्तु नः । इति तत्कृष्णाजिनमानयन्ति । आयुर्धेहि प्राणं धेह्यपानं धेहि व्यानं धेहि चक्षुर्धेहि श्रोत्रं धेहि मनो धेहि वाचं धेह्यात्मानं धेहि प्रतिष्ठां धेहि मां धेहि मयि धेहि । इति तत्कृष्णाजिनं खरे सादयन्ति । अध्वर्युः अश्मकपालशर्करापिष्टैरजकृष्णाजिनलोमभिश्च कृष्णाजिनस्थां मृदं संसृज्य । मधु त्वा मधुला करोतु । इति

मदन्तीभिरद्भिः संस्मिश्रयति । मखस्य शिरोसि । इति मृदः पिण्डं करोति । स्वल्पां मृदं परिशेषयति । यज्ञस्य पदेस्थः । इति अङ्गुष्ठाभ्यां पिण्डं त्रेधा विभज्य त्रीन् पिण्डान् कृत्वैकैकस्य त्रींस्त्रीन् पिण्डान् करोति । गायत्रोसि । इति तेषां एकं पिण्डं कर्त्रे प्रयच्छति । कर्ता गायत्रेण त्वा छन्दसा करोमि । इति तेन पिण्डेन महावीरस्य मूलं करोति । अध्वर्युः । त्रैष्टुभोसि । इति द्वितीयं पिण्डं प्रयच्छति । कर्ता । त्रैष्टुभेन त्वा छन्दसा करोमि । इति तेन मध्यं करोति । अध्वर्युः । जागतोसि । इति तृतीयं प्रच्छयति । कर्ता जागतेन त्वा छन्दसा करोमि । इति तेन बिलं करोति । प्रादेशोच्छ्रायं पृथुबुध्नं पृथुग्रीवं मध्ये सन्नतं महावीरं कृत्वा वेणुशलाकयोदरं कृत्वा बिलस्याधस्त्यङ्गुले रास्नां परिमण्डलं पर्यस्यति मखस्य रास्नासीति मन्त्रेण । अदितिस्ते बिलं गृह्णातु पाङ्क्तेन छन्दसा । इति बिलं प्रकाशयति । सूर्यस्य हरसाश्राय । इति महावीरमादित्येनाभितपति । तूष्णीं खरे निदधाति । अध्वर्युर्निहितमनुमन्त्रयते मखोसीति मन्त्रेण । एवमेकस्य प्रथमस्य पिण्डस्य त्रिभिः पिण्डैः कृतो मन्त्रविशेषो महावीर इत्युच्यते ॥

२० एवं पिण्डद्वयस्य त्रींस्त्रीन्पिण्डान् कृत्वा तैर्महावीरद्वयं समन्त्रकं करोति । अतिशिष्टया मृदा सशेषया तूष्णीं पिन्वने रौहिणकपाले आज्यस्थालीं च करोति अवशेषितया मृदापि सशेषया प्रवाते प्रतिलिप्योपवातयति । रौहिणपुरोडाशश्रपणार्थे कपाले रौहिणकपाले इत्युच्येते ॥

(शेषमग्रे)

॥ खण्डनखण्डखाद्यम् ॥

(*Continued from page* 521. VOL. VII.)

ख० [a] "अथवा, वक्तव्योऽसौ स्वरूपमात्रादन्यो विशेषार्थः । [b] अथ "न स्वरूपं नाम किञ्चिदनुगतमिष्यते मया, विशेषरूपासु [c] व्यक्तिष्वेव स्वरूपशब्दो नानार्थः सन्निविशते"—इत्यभिधत्से, [d] तर्हि गतमनेनैव न्यायेन गोत्वादिसिद्धिप्रत्याशया, [e] नच प्रतिव्यक्ति स्वरूपपदस्यार्थशक्त्योपपत्तिः । [f] यदि (१) च स्वरूपं भेदः स्यात् तदा धर्मिणि दृष्टे स्वरूपं दृष्टमिति क्वचिन्न सन्देहः स्यादिति, [g] यदि चाऽभिन्ने भेदो निविशेत तदा याप्येका व्यक्तिः प्रतीयते घटादिः सापि तेनैव भेदेनाऽनेका स्यादित्येकाभावे नाऽनेकमपि व्यवतिष्ठते ।

टी० यद्वा(२)ऽनेनैवाशयेनाह—। [a] "अथवे"ति। घटस्वरूपं घट एव, पटस्वरूपम्पट एव, नच ताभ्यां स्वरूपान्तरमस्ति तयोर्यद्विशेषपदवाच्यं स्यादित्यर्थः॥ स्वरूपविशेषव्यावृत्त्या स्वरूपमात्रं(३) तयोः स्यादित्याशङ्कते । [b] "अथे"ति ॥ शङ्कितां स्वरूपपदशक्तिमुपपादयति—। [c] "व्यक्तिष्वेवे"ति ॥ 'इदं स्वरूपमिदं स्वरूपमि'त्यनुगतप्रतीत्यनुरोधाद्यद्येकं स्वरूपं न स्वीकरणीयं तदा गोत्वाद्यप्येकमनुगतं न स्यादित्याह—। [d] "तर्ही"ति ॥ स्वरूपसामान्याभावे दोषान्तरमाह—। [e] "नचे"ति । शक्तिग्रहस्याप्यनुगतधर्मेषु-

(१) यदि भेदः=घटपटादिलक्षणो विशेषः, स्वरूपं स्यात्तदा घटत्वपटत्वादिधर्मराहित्येन केवले धर्मिणि दृष्टे क्वचिदपि 'स्वरूपं दृष्टमि'ति सन्देहः=समानाधिकरणस्यचित्पुरुषस्य न स्यात्, किन्तु विशेषदर्शने एव 'स्वरूपं दृष्टमि'ति मतिस्स्यादित्यन्वयपूर्वकोऽर्थः ।

(२) तर्हीत्यादिपङ्क्तेर्निरुक्तभावपक्षेऽथवेत्यादिग्रन्थस्याऽन्यार्थोऽभिधायितामनुसन्धायेदानीं निरुक्तभावार्थप्रतिपादकत्वमेवाथवेत्यादिग्रन्थस्येत्याह—यद्वेति ।

(३) स्वरूपमात्रं=स्वरूपसामान्यं, तयोः स्यात् 'अव्यावृत्तम्'—इति शेषः ।

रस्कारेणैव संभवादित्यर्थः ॥ यदि घटपटादिलक्षणो विशेष एव स्वरूपं स्यात्त्वनुगतमन्यत् तदा दूराद् घटपटविशेषाऽनवगाहिज्ञानं स्वरूपमात्रावगाह्यपि न स्यादित्याह—। [f] "यदि चे"ति। भेदः=विशेषः। "संशयविपर्ययौ न स्याताम्" इति त्वपव्याख्यानम्(१)॥ नन्वभिन्नयोरेव घटपटयोर्भेदो वर्तते इति द्वितीयः पक्षोऽस्त्वित्यत आह—। [g] "यदि चे"ति। यदि घटपटावभिन्नावेव भिन्नौ स्यातां तदा घटव्यक्तिरप्यभिन्ना भिन्ना स्यादित्येकं किमपि न भवेत्, तदभावाच्च तत्पर्युदासरूपमनेकमपि न स्यादित्यर्थः॥

मू० [a] एतेन न भेदावच्छिन्ने न चाऽभेदावच्छिन्ने भेदो विनिविशते किंतूदासीने—इत्यपि निरस्तम्, [b] अत एव च भेदो नाम स्वरूपान्योन्याभाववैधर्म्याऽनात्मको धर्मान्तरं पृथक्त्वाऽपरनामकमित्यपि परास्तम्। [c] सोऽपि हि स्वाश्रये भिन्ने विनिविशेताऽभिन्ने वेत्यादियथोक्तदोषलङ्घनाऽजङ्घाल (२) एव स्यात्, [d] स्वाश्रयेण च स्वस्मिन्नभेदभयाद्यदि स एव भेदो निविशते (३) तदात्माश्रयः, अन्यश्चेत्तस्मिन्नेवं तस्मिन्नप्यन्य इत्यनवस्था, क्वचिदपि गत्वा भेदभेदाश्रययोर्भेदस्याऽस्वीकारे च तदैक्यद्वारिका मूलपर्यन्तमेकता धावेत्।

टी० ननु भेदवृत्तावाश्रयावच्छेदकतया भेदाभेदौ न वाच्यौ, किं तर्हि, कुत्र भेदो वर्तते? इति प्रश्ने, धर्मिणि भेदो वर्तते, भेदाभेदौदासी-

(१) अपव्याख्यानत्वञ्चास्य "नच प्रतिव्यक्ति स्वरूपपदसमपदहेतोपपत्तिः"-इत्यस्याऽव्यवहितमौलिकप्रतिज्ञातार्थस्योपपादनपरत्वाभावाद् द्रष्टव्यम्। एतच्चापाततः, वस्तुतस्त्वत्र प्रकृतग्रन्थाक्षरव्याख्याने एव क्लिष्टकल्पनं दोषः, व्याख्यानान्तरं तु स्वातन्त्र्येण दूषणान्तरपरतया सुव्याख्यानमेवेति विभावयामः।

(२) अजङ्घालः=मन्दगामी, तथा च यथोक्तदोषलङ्घनेऽजङ्घालो मन्दगामी यथोक्तदोषाऽनतिक्रमीत्यर्थः।

(३) "स्वस्मिन्"-इति शेषः।

Digitized by Google

न्येन वर्तते इति वा वक्तव्यमिति न पूर्वदोष इत्यत आह–। [a] "एतेने"-ति । स्वस्मादपि भेदप्रसङ्गेनेत्यर्थः । स्वस्याप्युदासीनत्वात् धर्मित्वाच्चेतिभावः ॥ ननु स्वरूपवैधर्म्यान्योन्याभावरूपभेदत्रयखण्डनेपि पृथक्त्वस्य सत्त्वाचाद्वैतमित्यत आह–। [b] "अत एवे"ति ॥ अतिदेश्यमाह–। [c] "सोपी"ति । किंच, पृथक्त्वस्य गुणकर्मादावभावात्तदभेदे द्रव्याणामप्यभेदात् । किंच, पृथक्त्वस्यावधिनिरूप्यत्वाद्भेदस्य प्रतियोगिनिरूप्यत्वा(¹)दिति भावः ॥ अन्योन्याभावे वैधर्म्ये च दोषान्तरमाह–। [d] "स्वाश्रयेणे"ति । यद्यपि क्वचिद्गत्वा स्वरूपभेदे पर्य्यवसानमदुष्टमेव,* नचाऽन्योन्याभाववैधर्म्याभ्युपगमानर्थक्यम् *, अनुभवबलेन तयोरभ्युपगमात्; मूलपर्य्यन्तमेकताधावनं स्वरूपभेदप्रतिबद्धमेव, तथापि स्वरूपभेदस्यापि निरस्तत्वादिति भावः ॥

[a] तद(²)द्वैतश्रुतेस्तावद्बाधः प्रत्यक्षतः क्षतः ।
[b] नानुमानादि तं(³) कर्तुं तवापि क्षमते मते ॥ २० ॥
[c] अद्वैतागमनासीरे साधु सा धुन्वती परान् ।
सेवामेवार्जयत्यर्थापत्तिपत्तिपरम्परा ॥ २१ ॥

मू० [d] नन्वद्वैतश्रुतयो वर्णपदविभक्तितदर्थादिभेदानुपजीव्यार्थं प्रतिपादयन्त्यः स्वोपजीव्याभि(⁴)र्भेदबुद्धिभिर्न कथं बाध्यन्ताम्, उपजीवकस्योपजीव्याद् दुर्बलत्वात् *? । मैवम् । [e] न वयं भेदस्य सर्वथैवासत्त्वमभ्युपगच्छामः; किंनाम, पारमार्थिकं सत्त्वम् । अविद्याविद्यमानत्वं तु तदीयमिष्यत एव, तदेव च कार्य्यकारणभावोपयोगि ।

(१) अत्र–"इतीतरनिरूप्यत्वसाम्यात्पृथक्त्वेपि भेदपक्षोक्तदोषापत्तिरेव"–इति शेषः कथञ्चित् प्रायः पुस्तकेषु लुप्तो द्रष्टव्यः ।

(२) तत्=तस्मात् । (३) तं=बाधम् ।

(४) उपजीव्यते कार्य्येणाश्रीयते यत्तदुपजीव्यं (=कारणम्) उपजीवति कारणाश्रितं भवति यत्तदुपजीवकं (=कार्य्यम्) इत्यर्थः ।

Digitized by Google

टी० प्रत्यक्षविषयाभावात् प्रत्यक्षबाधो न संभवतीत्युपसंहरति– [a]"तदद्वैते"ति ॥ [b]"नाऽनुमानादी"ति । अनुमानापेक्षयाऽऽगमस्य बलवत्त्वात् । अन्यथा नरशिरः कपालं शुचि, प्राण्यङ्गत्वादित्यागमप्यवकाशमासादयेदिति भावः ॥ अर्थापत्तेः स्वपक्षानुकूलत्वमुक्तं स्मारयति–। [c]"अद्वैते"ति । अद्वैतागमस्य नासीरे=पुरतः, सा=अर्थापत्तिः, परान्=विरोधिनः प्रमाणाभासान्, धुन्वती=निराकुर्वन्ती, सेवामानुकूल्यमर्जयति=भजते, अत एवार्थापत्तेः पत्तित्वेन([1]) निरूपणमुपपन्नमित्यर्थः ॥ श्रुतिजबुद्धेः ज्ञातानि नानापदानि कारणमिति नानात्वं विना कार्यकारणभावानुपपत्तिः, तमन्तरेण([2]) ज्ञातबुद्धेरनुत्पत्तौ कुत्र बाध्यबाधकभावचिन्तेति शङ्कते–। [d]"नन्वि"ति ॥ नानात्वमात्रस्योपजीव्यत्वं, नतु पारमार्थिकनानात्वस्य, येनोपजीव्यविरोधः स्यादिति परिहरति–। [e]"न वयं भेदस्ये"ति । यद्यप्यद्वैतस्याविद्यकत्वमस्तु, श्रुतिविषयत्वेन तत्पारमार्थिकत्वे प्रत्यक्षविषयतया भेदस्यैव पारमार्थिकत्वं किं न स्यात्, अबाधित सकललोकव्यवहारे प्रतीयमानेप्याविद्यकत्वस्य परिभाषामात्रत्वात्; व्यवहारविषयत्वेनैव पारमार्थिकत्वसाधनात्. व्यवहाराऽविषयस्य ब्रह्माद्वैतस्यैवापारमार्थिकत्वसंभवात्; अद्वैतानुरोधाच्छ्रुतेस्त्वयैवोपपादनीयत्वात्([3]), अन्यथा तयैव द्वैतापत्तेः; एवं तज्जनितबुद्धेरपि([4]); यदि च स्वप्रकाशबलादद्वैतं, तदा तत एव द्वैतं किं न स्यात्; न हि स्वप्रकाशस्य न द्वैतं विषय इति प्रतिपादयितुं शक्यसि, तथाप्यहं खण्डनिको नतु व्यवस्थापक इति भावः ॥

मू० [a]एतेन "एकमेवे"त्येव([5])कारव्यवच्छेद्येना"ऽद्वितीयमि"ति द्वितीयेन, "न नाने"ति नानात्वेन, "किञ्चने"त्यनेन

---

(१) पत्तित्वेन, पदातित्वेनेत्यर्थः ।

(२) तमन्तरेण=कार्य्यकारणभावाऽनुपपत्तिमन्तरेण ।

(३) "उपासनीयत्वात्–" इत्यपि पाठः ।

(४) अत्रापि "त्वयैवोपपादनीयत्वात्"–इत्यनुषञ्जनीयम् ।

(५) "एकमेव"–इत्येवकारव्यवच्छेद्येन (विजातीयभेदेनाद्वैतस्य) व्याघातः "अद्वितीयमि"ति(पदव्यवच्छेद्येन) द्वितीयेन व्याघातः, "न नाना"–इति नानात्वेन व्याघातः, "किञ्चन"–इत्यनेन वस्तुना विना नोपपद्यमानेन व्याघात–इत्यपि प्रत्यालिढमित्यन्वयः ।

वस्तुना विना नोपपद्यमानेन, व्याघातः—इत्यपि प्रत्यादिष्टम्। [b] श्रुतिभिश्चाद्वैतार्थाभिः पारमार्थिकमद्वैतं प्रतिपाद्यते, नच पारमार्थिकमतिरपारमार्थिकधिया प्रत्ययबाधा, [c] माभूत्(१) शुक्तिरजतधिया परमार्थशुक्तिमतिबाधः। [d] यत्र त्वग्निरनुष्ण इति बुद्धेरुष्णज्ञानोपजीवना(२)दुष्णबोधेनाऽनुष्णबुद्धिबाधस्तत्र द्वयोरप्यविद्याविद्यमानत्वाद्बाधो युक्तः। *[e] ननु, तथापि तर्ह्यनुष्णतापि पारमार्थिक्येव साध्यतामबाधनाय*?। नैवम्

टी० श्रोतपदवर्णनानात्वज्ञानस्योपजीव्यत्वमाशङ्क्य श्रोतपदानामर्थभेदप्रत्ययमन्तरेणाऽप्रतिपादकत्वात् तदुपजीव्यत्वमाशङ्क्याह—। [a] "एतेने"ति। आविद्यकभेदाभ्युपगमेनेत्यर्थः॥ पारमार्थिकविषयत्वेन श्रुतेरपारमार्थिकभेदविषयकप्रत्यक्षादपेक्षया बलवत्त्वमाह—। [b] "श्रुतिभिश्चे"ति॥ अत्राऽनुरूपं दृष्टान्तमाह—। [c] "मा भूदि"ति॥ ननु यदि पारमार्थिकबुद्धिरपारमार्थिकधियं बाधते इति वस्तुगतिस्तदोष्णताग्राहिप्रत्यक्षमनुष्णताऽनुमानं तव मते न बाधेताऽपारमार्थिकधर्मविषयकत्वादित्यत आह—। [d] "यत्र त्वि"ति। वस्तुगतिरियं यत् पारमार्थिकविषययैव धियाऽपारमार्थिकधीर्बाध्यते, व्यवहारस्तु वस्तुगतिमननुरुध्यापि, इति व्यवहारदशायां प्रत्यक्षस्यैव बलवत्त्वाद्बाधकत्वमुच्यते इत्यर्थः॥ ननु परमार्थसदद्वैतगोचरा श्रुतिरित्यबाध्येति यथा त्वयोच्यते तथाऽनुष्णतानुमानवादिनापि तस्याः पारमार्थिकत्वमभ्युपगम्यैव तत्रापि प्रत्यक्षबाधोऽपि निरसनीय इत्याशङ्कते—। [e] "नन्वि"ति॥

मू० [a] अनुष्णताया जलादिदृष्टान्तसजातीयायाः शीताद्यव्याहत-

(१) अत्रेत्थमक्षरयोजना—शुक्तिरजतधिया परमार्थशुक्तिमतिबाधो मा भूत् (इत्यतः) पारमार्थिकमतिरपारमार्थिकधिया प्रत्ययबाधा नच (भवति)।
(२) अनुष्णज्ञानस्य प्रतियोगिविधयोष्णज्ञानमुपजीव्यम्।

तत्स्वरूपायाः प्रसाधनेनाविद्याविद्यमानत्वे एव विश्रामात्; तत्र(१)एवंविधरूपतानङ्गीकारे चाद्वैतस्यैव नामान्तरकरणापत्तेः; ततस्तस्यां ज्ञेयज्ञानादिभेदावश्याभ्युपेयतया(२)जगद्बाधयुक्तिकवलाऽप्रवेशासंभवात्। [b]अद्वैते च द्वैताश्रयस्य बाधस्य वास्तवस्यानवकाशादपारमार्थिकत्वसंभावनापि दूरत एवापसरतीति। *[c]ननु(३)किमद्वैतपरमार्थताभ्युपगमेन समाचितं भवति, यत उपजीव्यबाधादद्वैते प्रमां श्रुतिर्जनयितुं न शक्नोतीति ब्रूमः*?। नैवम्। [d]अद्वैतं हि पारमार्थिकमिदं पारमार्थिकेन भेदेन बाध्येत(४), नत्वविद्याविद्यमानेन, तस्मादविद्याव्यवस्थितं भेदं तद्बाधं चोपजीवन्त्या(५) [e]न परमार्थाद्वैतबुद्धेरुपजीव्यबाधः। यदि श्रुतिजन्या भवन्त्यप्यद्वैतबुद्धिरविद्याविद्यमाना, तथापि तद्विषयस्तावत्परमार्थसदेवाद्वैतं, विरोधेन(६) च तस्या बाध्यता, स च नास्तीति।

(१) तत्र=अनुष्यातायाम्, एवंविधरूपताऽनङ्गीकारे=जलादिदृष्टान्तसाम्यात्मानङ्गीकारे।

(२) ज्ञेयज्ञानादिभेदस्याऽवश्यमभ्युपेयता ज्ञेयज्ञानादिभेदावश्याभ्युपेयता ("लुम्पेदवश्यमः कृत्ये तुम्काममनसोरपि" इति मलोपः) तयेत्यर्थः, जगद्बाधयुक्तयो दृश्यत्वसम्बन्धखण्डनयुक्तयस्ताभिर्यत्ताद्दृश्या अनुष्यातायाः कवलनं=ग्रसनं (बाधनमिति यावत्) तस्य योऽप्रवेशस्तस्याऽसम्भवात्, जगद्बाधयुक्तिभिर्जगदन्तर्गताऽनुष्याताया अपि बाधनाच्च ब्रह्मवदबाध इति भावः।

(३) "यद्यपि 'नच दृढान्वये'त्यादिनेदमाशङ्क्य निराकृतं पूर्वं, तथाप्युपजीव्यत्वपुरस्कारेणेदानीं शङ्काऽवधेया"–इति प्रगल्भमिश्राः श्रीदर्पणे।

(४) "विरुध्येत"–इत्यपि पाठः।

(५) उपजीवन्त्याः परमार्थाद्वैतबुद्धेरुपजीव्यबाधो नेत्यन्वयः। अथवाऽद्वैतबुद्धेरुपजीव्यस्य बाध इत्येकदेशान्वयो द्रष्टव्य, उपजीव्येन बाध इति वा।

(६) विरोधेन=विषयापहारेण, तस्याः=अद्वैतधियो, बाध्यता, सच=विषयापहारश्च, प्रकृते नास्तीत्यर्थः।

टी० जलादौ याऽनुष्णता सैव यदि वन्हौ साध्यते तदा तदितरप्रपञ्चबाध्यत्वशत्तद्बाध्यत्वमपि सुलभम्, अथ तद्विलक्षणमेवानुष्णत्वं साध्यते यत्र प्रपञ्चबाधकयुक्तयो न प्रभवन्ति तदा तदेवाऽद्वैतमिति सिद्धं नः समीहितमिति परिहरति—। [a] "अनुष्णताया" इति ॥ ननु कथमद्वैतस्यापि न जगद्बाधकयुक्तिकवलनमतआह—। [b] "अद्वैते चे" ति । बाधकयुक्तयो हि भेदगर्भाः, भेदः खण्डित इति वास्तवो बाधो नास्त्येवेति नाद्वैतस्य किञ्चिद्बाधकमित्यर्थः ॥ ननु परमार्थमतिरपरमार्थधिया न शक्यबाधेति तदा स्यात् यदि पदार्थनानात्वस्योपजीव्यस्याविरोधादुपजीविकया श्रुत्या ज्ञानं जन्येत, तदेव नास्तीत्याशङ्कते—। [c] "नन्वि" ति ॥ भेदो, भेदबुद्धिर्वा नाद्वैतं प्रतिबद्धुमर्हति, अपारमार्थिकत्वादपरमार्थविषयत्वाच्चेति परिहरति—। [d] "अद्वैतमि" ति ॥ [e] "न परमार्थाद्वैतबुद्धेरुपजीव्यबाध" इति । (१)प्रतिबन्ध इत्यर्थः ॥ ननु यद्यद्वैतबुद्धिः पारमार्थिकी, तदा तयैव द्वैतम्; अथाऽपारमार्थिकी, तदा बाध्यत्वान्नाद्वैतसिद्धिरित्याशङ्क्याह—। [f] "यदी" ति । इतरप्रपञ्चबुद्धेरपारमार्थिकत्वेपि विषयस्या(२)द्वैतस्य न बाध इति बुद्धेरपि न बाध्यत्वमित्यर्थः । बाधस्य विषयापहाररूपत्वाद्विषयस्य च प्रत्यक्षादिभिरप्यपहर्तुमशक्यत्वादिति भावः ॥

मू० तस्मात्—

पारमार्थिक(३)मद्वैतं [a] प्रविश्य शरणं श्रुतिः ।
बाधना[b]दुपजीव्येन बिभेति न मनागपि ॥ २३ ॥

श्रुतिरपि तदाह—"द्वितीयाद्वै भयं भवती" ति । [c] तस्माद्वैतं "ब्रह्मैवेदं सर्वमि" ति श्रुत्यर्थेन सद्वैक्यमापन्नं ब्रह्मैव

(१) अत्रार्थसौकर्य्यार्थं "प्रतिबन्ध" इत्यतः प्राक् "उपजीव्यबाधः"—इति प्रतीकमनुषञ्जनीयम् ।

(२) विषयस्य=अद्वैतबुद्धिविषयस्य, बुद्धेः=अद्वैतबुद्धेः । अद्वैतबुद्धेश्च ब्रह्मरूपत्वेन द्वैतापत्तिशङ्कावारणं बोध्यम् ।

(३) श्रुतिः पारमार्थिकमद्वैतं शरणं प्रविश्य उपजीव्येन बाधनात् मनागपि (=ईषदपि) न बिभेतीत्यन्वयः ।

स्यात्, "विज्ञानमानन्दं ब्रह्मे"ति च श्रुत्या ज्ञानानन्दात्मतया व्यवतिष्ठते। [d]तेन यदिदमद्वैतज्ञानं श्रुत्या जनितं तद्विज्ञानाद्वैतात्मन्येव निविशते। *'ननु कथं तस्य श्रुत्या जन्यत्वमुपपद्यते?*। [f]सत्यमेवं(१) स्यात्, यदि तस्य पारमार्थिकी श्रुत्या जन्यतापि स्यादविद्याव्यवस्थिता तु तज्जन्यता न पारमार्थिकेनाजन्यत्वेन विरुध्यते; [g]अत एव श्रुत्येदमेकं साध्यते। यत्तु, तत्र यद्येकता भेदाभावो, यदि चैकत्वसङ्ख्या, यदि वा ज्ञानात्मकत्वं, यदि वाऽन्य एवैकत्वनामा कश्चिदभेदापरपर्यायो धर्मस्तद्वत्त्वं बोध्यते, तच्चाद्वैतव्याघातकत्वान्न सोढुं शक्नोति, तदा तदपि निष्पीडन(२)मसहमानं तज्ज्ञानं श्रुतिजन्यत्वेन सहैव निवर्त्ततां, यत्तु तादृशस्याद्वैतस्य धर्मस्य धर्मितया प्रमितं तन्मात्रमबाधादधिगतं परमार्थतो व्यवतिष्ठताम्।

टी० [a]"प्रविश्ये"ति। विषयीकृत्येत्यर्थः॥ [b]"उपजीव्येने"ति। पदपदार्थनानात्वेन तद्गोचरज्ञानेन चेत्यर्थः॥ ननु कयाचिदद्वैतं, कयाचिद्ब्रह्म, कयाचिद्विज्ञानं, कयाचिदानन्दः श्रुत्या प्रतिपाद्यते इति श्रुतीनां विरोधे किमपि न सिध्येत्; अविरोधे वा सर्वं(३)सिध्येदित्यद्वैतमनुपपन्नमेवेत्यत आह—। [c]"तच्चे"ति। यद्यपि "एकमेवाऽद्वितीयं ब्रह्मे"ति प्रस्तुत्य तयैव श्रुत्या ब्रह्मात्मकत्वसिद्धिः, तथापि श्रुत्यन्तरोपष्टम्भस्तत्राप्युक्त(४)स्तस्यां

(१) अत्र यदिशब्दानुरोधात् तदेति शब्दोऽध्याहर्तव्यः।

(२) तदपि निष्पीडनं=तादृशमपि व्याघातम्, असहमानं तज्ज्ञानम्=एकत्वादिधर्मविज्ञानम्।

(३) सर्वम्=ब्रह्मविज्ञानानन्दद्वैतरूपमद्वैतव्यतिरिक्तम्।

(४) उक्तः, मूलकारेण "ब्रह्मैवेदं सर्वम्"—इत्युक्त इत्यर्थः। तत्र हेतुः—तस्यामिति, यतस्तस्याम्="एकमेवाऽद्वितीयमि"त्याकारकश्रुतावद्वैतमात्रे तात्पर्यं, न तु ब्रह्मणि=ब्रह्मणः सर्वात्मकत्वे,—इत्यर्थः।

Digitized by Google

श्रुतावद्वैतमात्रे तात्पर्यं, न तु ब्रह्मण्यपीति भावः ॥ श्रुतीनां सामञ्जस्य-फलमाह-। [d] "तेने"ति ॥ जन्यजनकभावस्याद्वैतपरिपन्थित्वमाशङ्कते-। [e] "नन्वि"ति ॥ अपारमार्थिको जन्यजनकभावो नाद्वैतविरोधीत्याह-। [f] "सत्यमि"ति ॥ श्रुतिविषयस्याप्येकत्वादेर्धर्मस्याद्वैतपरिपन्थितामाशङ्क्याह-। [g] "अत एवे"ति । यथाऽद्वैतज्ञानस्य श्रुतिजन्यत्वमपारमार्थिकत्वान्निवर्तते तथा श्रुतिबोध्यस्य ब्रह्मण एकत्वादिधर्मस्यापारमार्थिकत्वान्निवृत्तौ न नः किञ्चिदनिष्टमित्यर्थः ॥

मू० [a] "नहि परमार्थशुक्तौ रजततया प्रतीयते यदा, तदा बाधा-त्तच रजतत्वे व्यावर्तमाने धर्मिव्यक्तिरपि तद(१)पराधा-न्निवर्तते। [b] सेयमद्वैतबुद्धिर्न तर्कशतमवतार्य प्राज्ञैरप-नेया, यद् आह श्रुतिः- [c] "नैषा(२) तर्केण मतिरापनेये"-ति । [d] तस्मात्-

धीधना ! (३)बाधनायाऽस्यास्तदा प्रज्ञां प्रयच्छथ ।
क्षेप्तुं चिन्तामणिं पाणिलब्धमब्धौ यदीच्छथ ॥ २४ ॥

[e] सेयमद्वैतदृष्टिर्दृष्टार्थापि, यदाहुः- [f] "स्वल्पमप्यस्य धर्मस्य त्रायते महतो भयात्" ।

टी० नन्वेकयैव धियाऽद्वैतं(४) विशिष्टमुपस्थापितं, तत्र विशेषणांशे ऽयाथार्थ्यमपि(५) विशेष्यांशे का प्रत्याशा-इत्याशङ्क्य निदर्शनमाह-। [a] "न-

(१) तदपराधात्=आरोपितधर्मबाधरूपापराधात् ।
(२) एषा=अद्वैतविषया मतिः, तर्केण=श्रुतिविरोधिकुतर्केणाऽऽपनेया, आ=सम-न्तात्, अपनेया=ऽपलापितव्या, न ; यद्वाऽऽपनेया=प्रापणीया नेत्यर्थः ।
(३) धीरेव धनं येषां विदुषां तत्सम्बोधनं धीधना ! इति, अस्याः=अद्वैतबुद्धेर्बा-धनाय स्वप्रज्ञां तदा प्रयच्छथ यदि पाणिलब्धं=हस्तप्राप्तं चिन्तामणिं विचित्रार्थप्रदं समुद्रे क्षेप्तुमिच्छथेत्यर्थः ।
(४) अद्वैतात्मकं ब्रह्म विशिष्टं द्वैताभावविशिष्टमित्यर्थः, "अद्वैतविशिष्टमि"ति पाठे तु 'ब्रह्म'-इत्यध्याहार्यम् ।
(५) अपिशब्दो भिन्नक्रमः, विशेष्यांशेपीत्यर्थः ।

Digitized by Google

ही''ति । ''धर्मिणि सर्वम(१)भ्रान्तं प्रकारे तु विपर्यय''—इति भावः ॥ ननु श्रुतिव्युत्पादनमेतावता षण्ढस्य(२) मैथुनवदकिञ्चित्करमेव, तदुपस्थाप्य स्याद्वैतस्य त्वयैव निरसनात्; किंच, द्वैतमेव तदुपस्थाप्यं किं न व्युत्पादितं, धर्मत्वेन तन्निवृत्तेरप्यद्वैतवदेव संभवात्; कथं वा श्रुतेः प्रामाण्यं, तज्जनितज्ञानस्याप्रमात्वपर्य्यवसानात्(३); तदप्रामाण्ये वा कथमद्वैतं, कथं वा द्वैतादिसकलधर्मविनाकृतस्य ब्रह्मणः सिद्धिः, स्वप्रकाशस्य(४) ब्रह्ममात्रविषयत्वात्, धर्माभावे तस्याऽतन्त्रत्वात्, ब्रह्मणि चाऽविप्रतिपत्तेः; द्वैताऽद्वैतविचारस्य गर्दभीक्षीरमथनायमानत्वात्; ब्रह्म सर्वैः स्वीक्रियते, तदेकत्वं त्वयाऽपि नाभ्युपगम्यते तथाच सर्वमिदमाकुलमित्यत आह—। *b* ''सेयमि''ति॥ *c* ''नैषे''ति। यद्यपि श्रुतेस्तर्कासहत्वं दोष एव, अन्यथा मीमांसाप्युच्छिद्येत, मीमांसायास्तर्कत्वात्; यदाहुः—''मीमांसासञ्ज्ञकस्तर्कः(५) सर्ववेदसमुद्भवः । सोऽतोवेदो रुमाप्राप्तकाष्ठादिलवणात्मवत्'', उक्तं च ''यस्तर्केणाऽनुसंधत्ते स धर्मं वेद नेतर''—इति, तथापि श्रुतिवाक्यानुरोधेन तर्कोऽनुसरणीयो नतु तद्विरोधेनापीति भावः ॥ श्रुत्या यदद्वैतज्ञानमुत्पन्नं तदपवर्गानुकूलमिति नापवदितव्यमित्युपसंहरति—। *d* 'तस्मादि''ति ॥ ननु मुमुक्षुतादशायां मयाप्येकमेव ब्रह्म ध्येयमिति किमनेनोपदेशेनेत्यत आह—। *e*''सेयमि''ति । मोक्षान्यप्रयोजनकत्वं दृष्टार्थत्वम् ॥ *f* ''स्वल्पमपी''ति । अद्वैतोपासनलक्षणस्य धर्मस्य स्वल्पमपि महतो भयाद्राजचौरव्याघ्रादिभयात्त्रायते इत्यर्थः । उत्पन्नमात्रेणाप्यद्वैतज्ञानेन विषयेष्वलंप्रत्ययवतोऽविचिकित्सस्य राजचौरादिभयं निवर्तते किं पुनर्गृहीतप्रामाण्येनेति भावः ॥

---

(१) सर्वं ज्ञानमित्यर्थः । (२) षण्ढस्य=नपुंसकस्य ।

(३) अद्वैतस्याप्यन्ततो बाध्यत्वेन भवताङ्गीकारात्तद्विषयकं श्रौतज्ञानमप्रमैव पर्य्यवस्यति ।

(४) ननु स्वप्रकाशचैतन्येनैव तत्सिद्धिरित्यत आह—स्वप्रकाशस्येति । धर्माऽभावे=द्वैतादिसकलधर्माभावे, तस्य=स्वप्रकाशचैतन्यस्य, अतन्त्रत्वादसाधकत्वादित्यर्थः ।

(५) यथा रुमायां लवणाकरे प्राप्तं काष्ठादिकं लवणात्मकमेव भवति तथा रुमास्थानीयवेदसमुद्भवस्तर्कोऽपि वेदरूप एवेति श्लोकार्थः ।

Digitized by Google

स्तू० [a] "तस्मात्—

ईश्वरा(१)नुग्रहादेषा पुंसामद्वैतवासना।
महाभयकृतत्राणा द्वित्राणां यदि जायते ॥ २५ ॥

तस्मात्—

[b] आपाततोर्यदिदमद्वयवादिनीनाम्(२)
अद्वैतमाकलितमर्थतया श्रुतीनाम्।
तत्स्वप्रकाशपरमार्थचिदेव भूत्वा।
[c] निष्पीडितादहह निर्वहते विचारात् ॥ २६ ॥

[d] तदिदमेताभिरात्ममतसिद्धसद्युक्तिलक्षणोपपन्नाभि(३)-र्युक्तिभिरुपनीयमानमद्वैतमविद्याविलासलालसोऽपि श्रद्दधातु तावद्भवान्, तदनु(४)चानयैवोपनिषदर्थश्रद्धयाऽध्यात्मं जिज्ञासमानः परमार्थतत्त्वं [e] क्रमाद्वृत्तिव्यावृत्तचेताः [f] स्व-

---

(१) यस्माद् दृष्टाऽदृष्टफलाऽद्वैतदृष्टिर्बहुविघ्ना च तस्मादेषाऽद्वैतवासना पुंसां यदि जायते तर्हीश्वरानुग्रहादेव, तथा च विद्योत्पत्तिपरिपन्थिकल्मषनाशायेश्वराराधने मुमुक्षुभिः प्रवर्तितव्यमित्याशयः। हेतुगर्भं विशेषणं—महाभयकृतत्राणेति, महतः संसारस्य भयात्कृतं त्राणं यया सा तथोक्ता। विशिष्टाधिकारिदुर्लभतां दर्शयति—द्वित्राणामिति।

(२) अद्वयवादिनीनां श्रुतीनां यदिदमद्वैतम् आपाततोऽर्थतयाऽऽकलितं (=विचारितम्) तत्स्वप्रकाशचिद्रूपमेव भूत्वा निष्पीडितात् (=शोधितात्) विचारान्निर्वहते (=निर्वाहं प्राप्नोति)—इत्यन्वयः।

(३) सत्यः=समीचीना युक्तयः सद्युक्तय,स्तासां ज्ञापकं लक्षणं सद्युक्तिलक्षणं, तेनोपपन्नाभिर्युक्तिभिरित्यर्थः।

(४) तदनु च स्वात्मनैव भवान् परमार्थतत्त्वं साक्षात्करिष्यतीत्यन्वयः। "अध्यात्मं जिज्ञासमान"—इत्यनेन लक्षणया ज्ञानेच्छयोरन्तर्नीतं वेदान्तविचारात्मकं श्रवणं, "क्रमादि"त्यनेन मननं, "वृत्तिव्यावृत्ते"त्यनेन विजातीयप्रत्ययानन्तरितसजातीयप्रत्ययसन्तानरूपं निदिध्यासनं चोच्यते; तथा च मनननिदिध्यासनाभ्यां फलोपकार्य्यङ्गाभ्यां सहकृताच्छ्रवणाद्भवान् साक्षात्करिष्यति—इति भावः।

Digitized by Google

प्रकाशसाक्षिकं [g] माक्षिकरसातिशायि(१)स्वात्मनैव साक्षात्करिष्यति ।

टी० एतदेवोपसंहरति–। [a] "तस्मादि"ति । (२)अद्वैतानुभवजनितः संस्कारः; यद्वाऽद्वैतं प्रति भावना, अद्वैतबुभुत्सेत्यर्थः । 'यद्वी'ति लोकोक्तिः ॥ ननु यद्यद्वैतज्ञानस्य श्रुतिजन्यत्वमपि निरस्तं, तदा तत्र किं प्रमाणं? कथं वा 'श्रुतिस्तत्र प्रमाणमि'त्यभिधीयते? इत्यत आह–। [b] "आपातत" इति । अविद्यादशायां वाच्यवाचकभावोपपत्तेरित्यर्थः । पारमार्थिकी चित्=परमार्थचित् ॥ [c] "निष्पीडितादि"ति । "ब्रह्मैवेदं सर्वमि"त्यादिश्रुत्यैकवाक्यतया परिशोधितादित्यर्थः । 'अहहे'ति स्वकीयतत्त्वानुभवचमत्काराविष्कारः ॥ नन्वेतास्त्वदुक्तयो मह्यं न रोचन्ते, न वाऽद्वैतवासनाभिर्भरमथिताभि(३)रद्वैतज्ञानं जनयितुं शक्यं, न वा जनिते तस्मिन्नस्माकमादरः, शरीरात्मभेदसाक्षात्कारलक्षणतत्त्वज्ञानपरिपन्थित्वादित्यत आह–। [d] "तदिदमि"ति । उद्धृतकण्टकत्वादिना(४)युक्तयः सद्युक्तय एव, नचाऽद्वैतज्ञानस्य तत्त्वज्ञानविरोधित्वं, भेदज्ञानस्य तत्त्वज्ञानत्वाभावादिति भावः ॥ [e] "क्रमादि"ति । तत्र बहिरिन्द्रियविषये स्पृहालेशश्चेतसो या वृत्तिस्तद्व्यावृत्तचेता युञ्जान(५)इत्यर्थः । मनोवृत्तयः कामादयस्तद्व्यावृत्त इति वार्थः ॥ ननु साक्षात्कारब्रह्मणोर्विषयविषयिभावे भेद एवेत्यत आह–। [f] "स्वप्रकाशे"ति ॥ "यं लब्ध्वा चापरं लाभं मन्यते नाधिकं ततः"–इत्याद्युक्तमानन्दहेतुत्वं योगस्याह–। [g] "माक्षिकरसातिशायी"ति ॥ (शेषमग्रे)

---

(१) माक्षिकं रसमतिशेतुं शीलं यस्य तत्तथा ।

(२) अत्र "अद्वैतवासना"–इतिप्रतीकमध्याहृत्याद्वैतानुभवेत्यादिग्रन्थो व्याख्येयः ।

(३) भरमथिताभिः=द्वैतवासनाभारेणाऽभिभूताभिरित्यर्थः । केषुचित्पुस्तकेषु "द्वैतवासनाऽभिभरमथिताभिः"–इति पाठ,स्तत्राऽद्वैतवासनाभिरित्युपरितोऽध्याहृत्य सन्योजनीयः ।

(४) उद्धृतकण्टकत्वं बाधसत्प्रतिपक्षादिशून्यत्वम्, आदिपदेन पक्षसपक्षसत्त्वादेः परिग्रहः, तथा चोद्धृतकण्टकत्वादिना=बाधशून्यत्वादिना रूपेणोपेता युक्तयोऽनुमानादिरूपाः सद्युक्तय एवेत्यर्थः ।

(५) युञ्जानः, योगीत्यर्थः ।

Digitized by Google

॥ श्रीः ॥

॥ श्रों नमः श्रीमते भगवते रामानुजाचार्याय ॥

अथ श्रीभाष्यं विशिष्टाद्वैतपरं रामानुजदर्शनम्

श्रुतप्रकाशिकासमेतं विषमपदटिप्पणीसहितम्

तत्र प्रथमोऽध्यायस्यावशेषः ।

(*Continued from page* 500. VOL VII.)

सू० "शान्तोदान्त उपरतस्तितिक्षुः समाहितो भूत्वात्मन्येवात्मानं पश्येदि"ति तदेवं जन्मान्तरशतानुष्ठितानभिसंहितफलविशेषकर्ममृदितकषायस्य विविदिषोत्पत्तौ सत्याम् ॥

टी० ॥ तथापि[1] विविदिषापेक्षितत्वात् कर्म च ज्ञानं प्रत्युपयोगि, तत्कथमेतत्त्यज्यते, शमादिरुपादीयते इति शङ्कायां कर्मणः शमादेर्वैषम्यमाह "अन्तरङ्गोपायता"मिति "भूत्वा पश्येदि"त्यन्तरङ्गत्वं स्पष्टम्, विविदिषायाः पूर्वं हि कर्मोपयोगः, शमादि तु पश्चादप्युपयुज्यत इत्यभिप्रेत्य "जातायां"मित्युक्तम् । ज्ञानं प्रति कर्मणः करणत्वमपि नास्तीत्याह "तदेव"मिति करणत्वं संभवतीत्याशङ्क्य निरस्यते, न त्वभ्युपगतत्वात् विशुद्धमनो हि करणं "मनसा तु विशुद्धेने"ति श्रुतेः "तत्"उक्तेभ्यो हेतुभ्यः । "एवं" समुच्चयेन विकल्पेन चेतिकर्त्तव्यतात्वेनुपपन्ने स्वर्गादिसाधनस्य कर्मणो विविदिषासाधनत्वानुपपत्तिपरिहारायानभिसंहितफल–शब्दः । विविदिषाया अपि तत्साध्यत्वेन फलत्वात्तस्यानभिसंहितत्वव्यावृत्त्यर्थं "फलविशेषे"त्युक्तम् । विविदिषासिद्ध्यर्थमिदानीमनुष्ठानाय कर्मज्ञानापेक्षाशङ्काव्यावृत्त्यर्थं जन्मान्तर–शब्दः । अनेकजन्मसंसिद्ध–इति वचनादिदानीमप्यनुष्ठेयमित्याशङ्कापरिहारार्थः शत–शब्दः, कार्यकल्प्यं हि कारणम्, इदानीं विविदिषोत्पत्तिदर्शनाज्जन्मान्तरशतानुष्ठानं कल्पनीयमिति भावः, तेन कर्म-

---

१ तथा विविदिषापेक्षितत्वात् इति· ख· पु· पाठः ।

णा मृदितकषायस्य नष्टपापस्य "कषायपक्तिः कर्माणि ज्ञानं तु परमा गतिः। कषाये कर्मभिः पक्के ततो ज्ञानं प्रवर्त्तते" इति स्मृतिः। एवं विविदिषोत्पत्तौ सत्यां ज्ञानोत्पत्तौ करणमाह।

सू० "सदेव सोम्येदमग्र आसीदेकमेवाद्वितीयम्" "सत्यं ज्ञानमनन्तं ब्रह्म" निष्कलं निष्क्रियं शान्तं निरवद्यं निरञ्जनम्" "अयमात्मा ब्रह्म" "तत्त्वमसी"त्यादिवाक्यजन्यज्ञानादविद्या निवर्त्तते वाक्यार्थज्ञानोपयोगीनि च श्रवणमनननिदिध्यासनानि। श्रवणं नाम वेदान्तवाक्यान्यात्मैक्यविद्याप्रतिपादकानीति तत्त्वदर्शिन आचार्यान्न्याययुक्तार्थग्रहणम्। एवमाचार्योपदिष्टस्यार्थस्य स्वात्मन्येवमेव युक्तमिति हेतुतः प्रतिष्ठापनं मननम्। एतद्विरोध्यनादिभेदवासनानिरसनायास्यार्थस्यानवरतभावना निदिध्यासनम्। एवं श्रवणमननादिभिर्निरस्तसमस्तभेदवासनस्य वाक्यार्थज्ञानमविद्यां निवर्त्तयतीत्येवंरूपस्य श्रवणस्यावश्यापेक्षितमेव पूर्ववृत्तं वक्तव्यम्॥

टी०॥ "सदेवे"ति सदेवेत्यादिकारणवाक्यम्। "सत्यं ज्ञान"मिति शोधकवाक्यम्। सत्यज्ञानादिवाक्यफलितव्यावृत्तिविशदीकरणाय "निष्कल"मित्यादिवाक्यमुपात्तम्। "अयमात्मा ब्रह्मे"त्यैक्यवाक्यम्। उपक्रमादिषड्विधतात्पर्यलिङ्गोपेतमैक्यवाक्यं दर्शयति "तत्त्वमसी"ति। अस्मिन्वाक्ये ब्रह्मणा जीवविशेषस्यैक्यं श्रुतं, श्रुतमैक्यं सर्वात्मनामिति ज्ञापनार्थ"मयमात्मा ब्रह्मे"ति वाक्यम्। इत्यादिवाक्यं ज्ञानोत्पत्तौ करणं न कर्मेत्यर्थः। वाक्यजन्यज्ञानमविद्यानिवर्त्तकं चेत् श्रवणादिपूर्वकध्यानविधिवैयर्थ्यमित्याशङ्कयाह "वाक्यार्थे"ति। चः-शङ्कावर्त्तकः, तेषां स्वरूपमाह "श्रवणं नामे"ति। प्रतिपादकानि-निष्पादनक्षमाणि वाक्यजन्यज्ञा-

नादिति युक्तम् । "एतद्विरोधि" आत्मैकत्वविद्याविरोधि, श्रवणादीत्येवं-रूपाणि स्युः कथमेषां वाक्यार्थज्ञानोपयोग? इत्यत आह "श्रवणमननादिभिरि"ति । वाक्यार्थज्ञानोत्पत्तिविरोधिनिरसनमुपयोग इत्यर्थः । "इति" । उक्तस्य हेतोः ज्ञानकर्मसमुच्चयाङ्गाङ्गिभावानुपपत्तिहेतुभ्य इत्यर्थः । "एवं-रूपस्य" बन्धनिवृत्तौ कर्मनिरपेक्षवाक्यार्थज्ञानोपक्रमभूतस्य श्रवणस्य न तु प्रासङ्गिकार्थस्य "अवश्यापेक्षितम्" । नियमेनाऽपेक्षितम् । अपेक्षितं च किं?-मित्यत आह ॥

सू० तच्च नित्यानित्यवस्तुविवेकः, शमदमादिसाधनसंपत्, इहामुत्र च फलभोगविरागो, मुमुक्षुत्वं चेत्येतत्साधनचतुष्टयम् । अनेन विना जिज्ञासानुपपत्तेः, अर्थस्वभावादेवेदमेव पूर्ववृत्तमिति ज्ञायते ॥

टी० ॥ "तच्चे"ति । कुत एतदपेक्षितमित्यत्राह "अनेन विने"ति । "जिज्ञासानुपपत्तेः" विचारा[1]नुपपत्तेः । अनुपपत्तिमुपपादयति "अर्थस्वभावादि"ति । कथमर्थस्वभावः? इत्थं, नित्यानित्यवस्तुविवेकादनित्यसांसारिकफलोपभोगविरागो नित्यपुरुषार्थेच्छा च स्यात्ततः श्रवणादौ प्रवृत्तिः, मनोवधानहेतुतया तदुपयोगिनी शमादिसंपच्चेति "अर्थस्वभावादेव" पूर्वप्रकृतादेवेत्येवकाराभिप्रायः । ज्ञानस्यैवोपायत्वं कर्मणोनपेक्षितत्वं चार्थस्वभावाद्धि पूर्वमुक्तम् । यद्वा "अनेन विना जिज्ञासानुपपत्तेरि" ति शमाद्यर्थस्वभावादित्यर्थः । शमादि पूर्ववृत्तमस्तु कर्म च पूर्ववृत्तं स्यादित्यत्राह "अर्थस्वभावादेवे"ति येनार्थस्वभावेन शमादेः पूर्ववृत्तत्वं तेनैवार्थस्वभावेनान्यस्य पूर्ववृत्तत्वनिषेध इति प्रथमस्यैवकारस्य भावः । पूर्ववृत्तान्तरव्यावृत्त्यर्थो द्वितीय एवकारः । अत्रार्थस्वभाव—शब्देन शमाद्यर्थस्वभाव उक्तः, ज्ञानार्थस्वभावः कर्मार्थस्वभावश्चाभिप्रेतः, ज्ञानस्य कर्मनिरपेक्षता—

सू० एतदुक्तं भवति—ब्रह्मस्वरूपाच्छादिकाऽविद्यामूलमपारमार्थिकं भेददर्शनमेव बन्धमूलम् । बन्धस्त्वापारमार्थिकः

१ जिज्ञासापदस्य विचारलक्षकतायाः पूर्वमुक्तत्वादिति भावः ।

स च समूलोऽपारमार्थिकत्वादेव ज्ञानेनैव निवर्त्त्यते ॥

टी० पायत्वस्वाभाव्यात् कर्मणोभेदावलम्बित्वेन विरुद्धस्वभावत्वाच्च शमादेर्निवृत्तिरूपत्वेन प्रवृत्तिरूपकर्मविरोधिस्वभावाच्च साधनचतुष्टयमेव पूर्ववृत्तं न त्वन्यदित्युक्तं भवति । "इदमेव पूर्ववृत्तमिति ज्ञायत" इति, इदमेवशब्दावयोगान्ययोगव्यवच्छेदपरौ, इदं–शब्दो हि साधनचतुष्टयपूर्ववृत्तत्वपरः, एवकारः कर्मव्युदासपरः, शमाद्यर्थस्वभावात्तदयोगव्यवच्छेदः । तस्माज्ज्ञानकर्मणोरर्थस्वभावाच्चान्ययोगव्यवच्छेदः । सकलविशेषप्रत्यनीकं ब्रह्म चेत् कथं संसारप्रवृत्तिः? कथं वाक्यार्थज्ञानादेवाविद्यानिवृत्तिः? अन्तःकरणस्य केन वा मालिन्यम्? कथं कर्मणा नैर्मल्यम्? ते चायोगान्ययोगव्यवच्छेदहेतुभूतार्थस्वभावाः कथमिति शङ्कायामुक्तार्थं संकलय्य दर्शयन् शङ्काश्च परिहरति "एतदुक्त"मिति । ब्रह्मस्वरूपाच्छादिका–शब्देन सकलविशेषप्रत्यनीकत्वेऽपि स्वरूपतिरोधानाद् भेददर्शनसंभव इत्युक्तम्, भेदो ज्ञातृज्ञेयादिः । अपारमार्थिकं भेददर्शनमेव बन्धमूलं न कर्मेत्यर्थः कर्मापि भ्रान्तिमूलमिति भावः । यद्वा अपारमार्थिकं भेददर्शनमेव, न सत्यभूतं किंचिदपीति भावः । तथा सति हि कर्मापेक्षा, बन्धो-जन्मजरामरणादिः, "बन्धश्चापारमार्थिक" इति अविद्यामूलापारमार्थिकभेददर्शनकार्यत्वादिति भावः । ततः किं कर्मनैरपेक्ष्यस्येत्यत्राह "स चे"ति । "अपारमार्थिकत्वादेवे"ति । पूर्वोक्तादेवापारमार्थ्यात् कर्मनैरपेक्ष्यसिद्धिरित्येवकाराभिप्रायः, "ज्ञानेनैव" न कर्मणेत्यर्थः, नह्यपरमार्थसर्पनिवृत्तेरज्जुज्ञानेन विना वैनतेयोपासनादिकर्मापेक्षा । एवं समुच्चयः प्रत्युक्तः । ज्ञानं प्रत्यपि कर्मणो न साधनत्वमित्याह ॥

मू० निवर्त्तकं च ज्ञानं तत्त्वमस्यादिवाक्यजन्यं तस्यैतस्य वाक्यजन्यज्ञानस्य स्वरूपे तदुत्पत्तौ कार्ये वा कर्मणो-नोपयोगः, विविदिषायामेव तूपयोगः, सा च पापमूलरजस्तमोनिबर्हणद्वारेण सत्त्वविवृद्ध्या भवतीतीममुपयोगमभिप्रेत्य "ब्राह्मणा विविदिषन्ती"त्युक्तमिति ॥

टी० ॥ "निवर्त्तकं चे"ति निवर्त्तक[१]बोधः प्रमाणजन्य इति यावत्। प्रमाणजन्यं शुक्तिज्ञानं हि रजतनिवर्त्तकम् । अत्र शमादेरितिकर्त्तव्यतात्वेन कर्मण इतिकर्त्तव्यतात्वमपि विरोधाचेत्यभिप्रेतम् । ततः किमित्यत्राह "तस्ये"ति । तस्य—कर्मनिरपेक्षस्य, एतस्य—अद्वैतविषयस्य, तदेतच्छब्दयोः प्रस्तुतवाचित्वाविशेषेऽपि दूरस्थान्तिकस्थविशेषणविशिष्टपरामर्शित्वं सूचितम् । अद्वैतविषयत्वे हेतुमाह "वाक्यजन्यस्ये"ति । तत्त्वमस्यादिवाक्यजन्यत्वादद्वैतविषयत्वमित्यर्थः । "कार्ये—मोक्षे । तर्हि कुत्रोपयोग? इत्यत्राह "विविदिषयामि"ति । तु—शब्देन करणेतिकर्त्तव्यतात्वव्युदासः । उपयोगः कथमित्यत्राह? "स चे"ति । पापमूलेत्यादिना अन्तःकरणनैर्मल्यद्वारेणेति पूर्वोक्तं विवृतं भवति । रजस्तमोनिवर्हणादिकं नास्ति वाक्ये श्रुतमित्यत्राह "इतीममि"ति । अभिप्रेत्य—शब्देन शङ्कापरिहारः, इतिहेतौ । वस्तुविरोधादितिकर्त्तव्यतात्वकरणत्वानुपपत्त्यादिहेतुभ्य इत्यर्थः । इममुपयोगम्—रजस्तमोनिवर्हणसत्त्वविवर्द्धनरूपं परम्परयोपयोगमित्यर्थः । विविदिषन्तीत्युक्तमित्येतदुक्तं भवतीत्यन्वयः । प्रकृतमुपसंहरति ।

सू० अतः कर्मज्ञानस्यानुपयोगादुक्तमेव साधनचतुष्टयं पूर्ववृत्तमिति वक्तव्यम् । अत्रोच्यते । यदुक्तमविद्यानिवृत्तिरेव हि मोक्षः सा च ब्रह्मविज्ञानादेव भवतीति तदभ्युपगम्यते ॥

टी० ॥ "अतः कर्मज्ञानस्ये"ति । अतः—हानार्थमुपादानार्थे च कर्मज्ञानस्यानपेक्षितत्वादित्यर्थः । अत्र व्याख्यातृभक्तौ सङ्ग्रहश्लोकौ "विरोधादप्रमाणत्वाच्चित्तशुद्ध्युपयोजनात् । ज्ञानमात्रस्य हेतुत्वे श्रुतेः सामर्थ्यतोऽपि च । शमाद्यङ्गकतास्नानाच धीकर्मसमुच्चयः । श्रवणादिक्रमोच्चिद्रवाक्यजा धीर्विमोचिके"ति । "विरोधादि"ति । कर्मणामनित्यफलतया भेदवासनाजनकतया च विरोधो विवक्षितः । "सामर्थ्यत"इति । ज्ञानस्य मिथ्यार्थनिवर्त्तकत्वे कर्मनिरपेक्षत्वरूपं वस्तुसामर्थ्यं विवक्षितम् । लघुसिद्धान्तारम्भः । राद्धान्तमारभते "अत्रोच्यत"इति । अस्मिन् पूर्वपक्षे सिद्धान्त उच्य-

१ निवर्तकोबोध इति तु युक्तोभाति पाठः ।

त इत्यर्थः पूर्वपक्षोक्तेष्वर्थेष्वविरुद्धांशाभ्युपगमेन प्रतिवदति "यदुक्तमि"ति "अविद्यानिवृत्तिः—प्रतिबन्धनिवृत्तिः, साधनद्वित्वसाध्यद्वित्वनिरासोऽभिमत इत्यर्थः। यः प्रतिबन्धनिरासः कर्मसाध्य उक्तः, तस्य "तमेव विदित्वाति-मृत्युमेती"त्यादिषु ज्ञानसाध्यत्वमुक्तम्, ब्रह्मप्राप्तिस्तु स्वतःसिद्धा। एवकाराभ्यां साध्यान्तरं साधनान्तरं च व्यावर्त्यते। यद्यप्यनिष्टनिवृत्तिरिष्टप्राप्तिश्च द्वयमस्ति तथापीष्टतमब्रह्मप्राप्तेः स्वतः—सिद्धायाः पृथगुपायसाध्यत्वाभावात् प्रतिबन्धनिवृत्तिरेव हि साध्या स्वत एव सर्वसाक्षात्कारक्षमं ज्ञानं प्रतिबन्धके निवृत्ते सति ब्रह्मस्वरूपरूपगुणविभवादिकं सर्वं साक्षात्करोति यथा सेतौ भग्ने जलं स्वयमेव गच्छति न केन चिच्चेतव्यं तद्वत्, यथाश्मानयने मार्गसमीकरणतत्प्राप्[1]पणे उभे अपि पृथग्यत्नसाध्ये न, तथेत्यर्थः। यद्वा भावान्तरस्यैवाभावत्वादविद्यानिवृत्तिरेव ब्रह्मप्राप्तिरित्यर्थः। साध्यसाधनद्वित्वनिरासोऽभ्युपेतश्चेत् प्रतिपत्तिविषयः कः? इत्यत्राह॥

सू० अविद्यानिवृत्तये वेदान्तवाक्यैर्विधित्सितं ज्ञानं किं रूपमिति? विवेचनीयम्। किं वाक्याद्वाक्यार्थज्ञानमात्रम्? उत तन्मूलमुपासनात्मकं ज्ञानमिति? न तावद्वाक्यजन्यम्, तस्य विधानमन्तरेणापि वाक्यादेव सिद्धेः।

टी० "अविद्ये"ति साधनस्वरूपविशेषे विप्रतिपत्तिरित्यर्थः किंरूपं? किं कर्माङ्गत्वानर्हं न भवदुक्तं ज्ञानम् उत कर्माङ्गत्वार्हमस्मदुक्तं ज्ञानमित्यर्थः। किं रूपमित्यभिप्रेतं विवृणोति "किमि"ति किं वाक्यादित्यादिना परमतं स्वमतं च वदति न तु परमतविकल्पः प्रथमं परपक्षप्रतिक्षेपः क्रियते स्वपक्षस्थापनं तु पश्चादित्यभिप्रेत्याह "न तावद्वि"ति न तु द्व्यशिरसोऽन्यतरदूषणं क्रियते कुत इत्यत्राह "तस्ये"ति "विधानमन्तरेणापी"ति प्रमाणज्ञानं वस्तुतन्त्रं न पुरुषतन्त्रं कर्तुमकर्तुमन्यथा कर्तुं वाशक्यत्वात्। अतः पुरुषतन्त्रत्वाभावान्न तद्विधेयमिति तैरेवोक्त-

[1] मार्गस्थपाषाणस्य गृहानयने मार्गसमीकरणतदानयने भवत एकयत्नसाध्ये इत्यर्थः।

मिति भावः । वाक्यादेव—स्वरूपपरवाक्यादेव व्युत्पत्तिमन्तं पुरुषं प्रति न्यायानुगृहीतस्य वाक्यस्यार्थबोधकत्वं स्वतःसिद्धं न तु विध्यधीनं तच्छ्रवणे पुरुषस्य प्रवृत्तिश्च रागादेवेत्युपपादितम् । यद्यपि न रागात्स्वाध्यायनविधिरेवाधीतकृत्स्नवेदस्य वाक्यविचारे प्रवर्त्तक इति "प्रज्ञां कुर्वीते"-त्यादिर्विधिर्निरर्थक एव ।

न च प्रमाणज्ञानस्य श्रेयःसाधनत्वमलौकिकमिति तादृश्येण तस्य विधेयत्वं शुक्तिरूप्यादिभ्रमनिवर्त्तकज्ञानस्येव बन्धनिवर्त्तकज्ञानस्य दृष्टार्थत्वाभ्युपगमात् अतोविधिर्वैयर्थ्यम् । तेनासकृदावृत्तिसाक्षात्कारभक्तिरूपत्वयावज्जीवानुष्ठेयत्वपराणां "यावन्न विमोक्ष्येथ संपत्स्य"इत्यादीनां मुक्तेः शरीरपातानन्तरभावित्वपराणां नाडी[1]विशेषनिष्क्रमणवादिनीनां मार्गपराणां वा नेकश्रुतीनां नैरर्थक्यं प्रसज्येत । एवमनेकश्रुतिविरोधस्य प्रदर्शनार्थं तस्य विधानमन्तरेणापीत्युक्तम् । अथ प्रत्यक्षविरोधं दर्शयति ॥

मू० तावन्मात्रेणाविद्यानिवृत्त्यनुपलब्धेश्च

न च वाच्यं भेदवासनायामनिरस्तायां वाक्यमविद्यानिवर्त्तकं ज्ञानं न जनयति ।

टी० ॥ "तावन्मात्रे"ति तावदंशस्ततोऽधिकोप्यस्तीति तद्व्यावृत्त्यर्थं तावन्मात्रेणेत्युक्तम् । बहुशास्त्रविरोधप्रत्यक्षविरोधरूपमिदं दूषणद्वयं वदता भगवतापस्तम्बेनापि वाक्यार्थज्ञानमात्रस्य मोक्षसाधनत्वं निरस्तम् । यथा बुद्धेः क्षेमप्रापणं तच्छास्त्रैर्विप्रतिषिद्धम् बुद्धेश्चेत्क्षेमप्रापणमिहैव न दुःखमुपलभेत एतेन परं व्याख्यातमिति शास्त्रैरिति बहुवचनेन पूर्वोदाहृतानेकश्रुतिविरोधोऽभिप्रेतः । विप्रतिषेधोऽधिकबलेन प्रतिषेधः । न तु प्रकरणसमवत् तुल्यबलेन प्रतिषेधः । बहुशास्त्रविरोधः प्रबलतरः "भूयसां स्यात् बलीयस्त्वमि"ति न्यायाभिप्रायेण विप्रतिषिद्धमित्युक्तम् । यत्तु परैरस्य दूषणस्य प्रतिवचनं द्विधाकृतं तदनुभाष्य दूषयति ।

१ नाडीविशेषः सुषुम्नारूपः ।

Digitized by Google

न च "वाच्यमि"ति वाक्यं ज्ञानोत्पत्तिमिदानीं न जनयतीति कश्चिन्निर्वाहस्तमाह "भेदे"ति इदानीमपि ज्ञानोत्पत्तिर्दृश्यत इति चेत् तत्परिहारायाह "अविद्याया निवर्त्तकमि"ति पश्चादपि वाक्यादेवावि-द्यानिवर्त्तकविशदज्ञानोत्पत्तिश्चेदिदानीमेव जनयत्वित्यत्राह "भेदवास-नायामि"ति प्रतिबन्धकाभावश्च सामग्र्यन्तर्भूतः । अतः सामग्रीवैकल्यात् ज्ञानमनुत्पन्नं ध्यानादिविधयः प्रतिबन्धकनिरासोपयिका इति भावः अनेन शास्त्रप्रत्यक्षविरोधो परिहृतो भवतः सनकादीनां ज्ञानाधिकत्वेन श्रुतिस्मृतिप्रसिद्धानामपि ज्ञानानुदयोऽनुपपन्न इति शङ्कायां निर्वाहान्तर-माह ॥

सू० जातेपि सर्वस्य सत्यैव भेदज्ञानानिवृत्तिर्न दोषाय चन्द्रै-कत्वे ज्ञातेपि द्विचन्द्रज्ञानानिवृत्तिवदनिवृत्तमपि छिन्न-मूलत्वेन न बन्धाय भवतीति सत्यां सामग्र्यां ज्ञानानु-त्पत्त्यनुपपत्तेः । सत्यामपि विपरीतवासनायामाप्तोपदेश-लिङ्गादिभिर्बाधकज्ञानोत्पत्तिदर्शनात् ॥

टी० ॥ "जातेपी"ति अविद्याया एकत्वात् प्रपञ्चप्रतिभासस्यै-कस्य ब्रह्मणः स्वरूपत्वाच्च "सर्वस्ये"त्युक्तम् । न दोषाय अनिवर्त्तकत्वं दोषाय न भवति । ज्ञानोदये विभ्रमानिवृत्तौ दृष्टान्तं दर्शयति "चन्द्रैक-त्व"इति अनिवृत्तं चेद् भेददर्शनं बन्धकं स्यात् इत्यत आह "अनिवृत्त-मपी"ति "छिन्नमूलत्वेन"छिन्नाविद्याख्यमूलत्वेनाकार्यकारि यथा दग्धः पटः पूर्वसंवेशेन प्रतीयमानोप्याच्छादनादिकार्यायोग्यः क्रमेण विनश्येत् यथा कुलालभ्रमितं चक्रं भ्रमयितृव्यापारोपरमेपि पूर्ववेगवशात् किंचित्कालं स्वयमेव भ्रमत् क्रमेणोपरमेत तद्वदिति भावः । "यत्रेति करणस्य न वाच्यमित्यनेनान्वयः प्रथमं ज्ञानानुत्पत्तिं दूषयति "सत्यामि"ति न्याया-नुगृहीतवाक्यमेव सामग्री प्रतिबन्धिका भेदवासनास्तीति चेत्तत्राह "सत्या-मपी"ति निवर्त्या वासना निवर्त्तकोत्पत्तिप्रतिबन्धिका न भवतीत्यर्थः आदि-शब्दादिन्द्रियं गृह्यते यथा चिरतरतिमिरवासितगुहायां प्रदीपो-

नोत्पद्यते तस्मिन् दीप्तिमति दीपिते सद्य एव तमो विनश्येत् । यथा क्वचिद्देशे सर्पं इति वाक्याच्चिरं भ्रमितः पुरुषो न तत्र सर्पं इत्याप्तोपदेशाज्जानाति यथा च वनं न दग्धमिति श्रुत्वा चिरं भ्रान्तस्य पश्चात्तत्र गत्वाङ्गारादिलिङ्गदर्शनेन दग्धमिति ज्ञानं जायते यथा चिरं सर्पत्वेन वासिते वस्तुनि समीपगमनानन्तरमिन्द्रियव्यापारेण रज्जुज्ञानं सहसैव जायते तद्वदित्यभिप्रायेणाप्तोपदेशलिङ्गादिभिर्बाधकज्ञानोत्पत्तिदर्शनादित्युक्तम् वेदान्तवाक्यं हि दार्ष्टान्तिकम् । अतआप्तोपदेशस्य प्रथमोपादानम् । अथ द्वितीयनिर्बाहकमनूद्य निरस्यति ॥

मू० सत्यपि वाक्यार्थज्ञानेऽनादिवासना[1]मात्रया भेदज्ञानमनुवर्त्तत इति भवता न शक्यते वक्तुम् । भेदज्ञानसामग्र्या अपि वासनाया मिथ्यारूपत्वेन ज्ञानोत्पत्त्यैव निवृत्तत्वात्, ज्ञानोत्पत्तावपि मिथ्यारूपायास्तस्या अनिवृत्तौ निवर्त्तकान्तराभावात् कदाचिदपि नास्या वासनाया निवृत्तिः ॥

टी० ॥ "सत्यपी"ति मात्रया अल्पमित्यर्थः । भवता ब्रह्मव्यतिरिक्तकृत्स्नमिथ्यात्ववादिनेति भावः । भवतेति सूचितमर्थं विवृणोति "भेदे"ति वासनाया अपि मिथ्यात्वाविशेषात्तस्या अपि ज्ञानेन निवर्त्यत्वमवश्याश्रयणीयमिति भावः । किं ज्ञानोत्पत्तावपि वासना न निवृत्तेत्युच्यते उत तन्निवृत्तावपि निर्हेतुकं भेददर्शनं भवतीति शङ्काद्वयं हृदि निधाय प्रथमां परिहरति "ज्ञानोत्पत्तावपी"ति ब्रह्मव्यतिरिक्तस्य कृत्स्नस्य मिथ्यात्वाद्वासनापि ज्ञानैकनिवर्त्या नोचेन्निवर्त्तकान्तरमपि ज्ञानत्वाविशेषाच्च निवर्त्तयेदित्यर्थः । स्वयमेव वासना नश्यतीति चेत्तदयुक्तम् । स्वयमेवेति बाधकज्ञाननैरपेक्ष्यस्य विवक्षितत्वे वासनाया नश्यन्त्या अपि सत्यत्वप्रसङ्गात् स्वयमेव नश्यतीति स्वेनैव स्वनाशकरणं विवक्षितं चेद्व्याघातः फलोपान्त्यकारणनाशादिनाश्यत्वेऽपि सत्यत्वेऽपि सत्यत्वप्रसङ्गोऽवर्जनीय एव कर्म-शब्दादिषु तथैव वैशेषिकैर्वर्णितत्वात् तेषां च पारमार्थ्यादर्श-

१ अनादिवासनयेत्यपि पाठान्तरम् ।

नात् । किंच स्वाप्नार्थोत्पत्त्यादिवद् वासनाया अपि मिथ्यात्वेन तदुत्पत्तिस्थिती अपि मिथ्याभूते इति तद्विनाशोपि मिथ्याभूतः । अतोविनाशविषयभ्रमः पुनस्तिष्ठतीति निःशेषभ्रमनिवृत्तिर्न स्यात् ॥

सू० वासनाकार्यं भेदज्ञानं छिन्नमूलम् अथवानुवर्त्तन इति बालिशभाषितम् । द्विचन्द्रज्ञानादौ तु बाधकसन्निधावपि मिथ्याज्ञानहेतोः पारमार्थतिमिरादिदोषस्य ज्ञानबाध्यत्वाभावेनाविनष्टत्वान्मिथ्याज्ञानानिवृत्तिरविरुद्धा प्रबलप्रमाणबाधितत्वेन भयादिकार्यं तु निवर्त्तते ॥

टी० ॥ अथ द्वितीयां शङ्कां परिहरति "वासने"ति छिन्नमूलं–छिन्नवासनाख्यमूलम् "बालिशभाषित"मिति । अकारणकार्योत्पत्तिप्रसङ्ग इत्यर्थः, यद्यकारणं भेददर्शनं भवति तर्हि मुक्तिरपि ज्ञाननिरपेक्षा स्यात् श्रवणादिभिर्विना वाक्यार्थज्ञानं स्यात् अविद्यया विना जगद्भ्रमश्च स्यात् अधिष्ठानेन विना अविद्यापि कार्यकरी स्यादिति भावः । कथं सत्यपि बाधकज्ञाने चन्द्रद्वित्वानिवृत्तिरित्याह "द्विचन्द्रे"ति तु–शब्दो विवक्षितार्थवैषम्यपरः । बाधकसन्निधावपि तिमिरादिदोषस्य पारमार्थ्यात् ज्ञानबाध्यत्वाभावः, तत्पारमार्थ्यं च व्यावहारिकतयापि परेणाभ्युपगन्तव्यम् । अन्यथाप्तोपदेशानन्तरं रज्जुसर्पव्यवहारोच्छेदवद्दोषोपि मिथ्येति वचनानन्तरं दोषनिवृत्त्या चन्द्रद्वित्वादिव्यवहारोच्छेदप्रसङ्गात् । अतोदोषस्य विद्यमानत्वाद् भेदभ्रमस्य समूलत्वम् । अनेन बाधकसन्निधौ बाध्यसद्भावोप्यकारणककार्योत्पत्तिश्चेतीदं दूषणद्वयं दृष्टान्ते परिहृतं भवति । परमते तु दूषणद्वयं तिष्ठत्येव । तर्ह्याप्तोपदेशादिवैषम्यमित्यत्राह 'प्रबले'ति रज्जुसर्पभ्रान्तिमत्पुरुषापेक्षया भयादिकार्यनिवृत्तिः फलत्वेनोक्ता । आदि–शब्दात् पलायनादि गृह्यते द्विचन्द्रज्ञाने च स्वस्यादुष्टकरणत्वधीनिवृत्तिरोषधादिप्रवृत्तिश्च फलम्, ऐन्द्रजालिकभ्रमादिषु भ्रमहेतोः प्राबल्यात् । वस्तुतो भ्रमत्वेप्यसत्यविषयत्वनिश्चयप्रतिबन्धः स्यादिति तद्व्यावृत्त्यर्थं प्रबलप्रमाण–शब्दः "निवर्त्तत"इति प्रतिभासे विद्यमानेपि विषयसत्यत्वा-

भावनिश्चयद्वारा भयादिनिवृत्तिहेतुराप्तोपदेश इत्यर्थः । यद्वा यथावदर्थस्वरूपापरोक्ष्यप्रवृत्तिद्वारा भयादिनिवृत्तिहेतुरित्यर्थः तु—शब्दः शङ्काव्यावर्त्तकः ज्ञानानुत्पत्तिपक्षस्य बहुभिमतत्वात् सिंहावलोकनेन तं दूषयति ॥

मू० अपि च भेदवासनानिरसनद्वारेण ज्ञानोत्पत्तिमभ्युपगच्छतां कदाचिदपि ज्ञानोत्पत्तिर्न सेत्स्यति, भेदवासनाया अनादिकालोपचितत्वेनापरिमितत्वात्, तद्विरुद्धभावनायाश्चाल्पत्वादनया तन्निरासानुपपत्तेः । अतोवाक्यार्थज्ञानादन्यदेव ध्यानोपासनादिशब्दवाच्यं ज्ञानं वेदान्तवाक्यैर्विधित्सितम् ॥

टी० ॥ "अपिचे"ति नायं सर्पारज्जुरितिवदृष्टद्वारा हि भेदनिरासः । अदृष्टमुखेन चेद् भेदसत्यत्वप्रसङ्गात् । अतो भूयस्या भेदवासनाया अल्पीयस्या द्वैतवासनया निरासोऽनुपपन्न इत्यर्थः । नन्वदृष्टद्वारा निवर्त्यत्वे निवर्त्यसत्यत्वं नाविष्टम्[1] । ध्याननिवर्त्यसर्पवद्व्यवहारदशायां वासनायाः सत्वत्वाभ्युपगमात् । उत्पन्ने तु ज्ञाने तदुत्पत्तिस्थितिविनाशाश्च बाधिताः स्युरिति । नैवम् । ध्याननिवर्त्यसर्पस्यानित्यत्वमेव न कदाचिदपि बाध्यत्वं सिद्धमिति, तद्वदेवादृष्टनिवर्त्यवासनाया अपि वास्तविकसत्यत्वप्रसङ्गात् । नत्वैक्यभावनारूपं निदिध्यासनं प्रतिबन्धनिवर्त्तकं चेदुक्तदोषः स्यात्, न तु न प्रतिबन्धनिवृत्त्यै किं तु वाक्यार्थज्ञानोदयसहकारीति । नैवम् । स्मृतिरूपस्य निदिध्यासनस्यानुभवसापेक्षतया तस्य वाक्यार्थज्ञानजननसहकारित्वात् ।

ननु यद्यपि परोक्षानुभवस्य ध्यानमनुपकारकं तथापि निदिध्यासनसहकृतं वाक्यमपरोक्षधीहेतुः स्यात् । नैवम् । निदिध्यासनसहकृतत्वेपि शब्दत्वादेवापरोक्षधीहेतुत्वायोगात्, ज्योतिष्टोमवाक्यवत् एवं शास्त्रप्रत्यक्षविरोधादविरोधनिर्वाहानुपपत्त्या वाक्यार्थज्ञानमात्रस्य निवर्त्तकत्वासंभ-

१ नाविष्टम्—अदृष्टद्वारकनिवर्त्यत्वं न निवर्त्यसत्यत्वव्याप्यम् ।

वात्, पारिशेष्याद् वाक्यार्थज्ञानादन्यदेव मुक्त्युपायज्ञानं विधित्सितमित्याह "अत"इति न केवलं पारिशेष्यम् अनुग्राहिकाः श्रुतयश्च सन्तीत्याह ॥

भू॰ तथाच श्रुतयः "विज्ञाय प्रज्ञां कुर्वीत" "अनुविद्य विजानाति" "ओमित्येवात्मानं ध्यायथ "निचाय्य तन्मृत्युमुखात्प्रमुच्यते" "आत्मानमेव लोकमुपासीत" "आत्मा वा अरे द्रष्टव्यः श्रोतव्यो मन्तव्यो निदिध्यासितव्यः" सोऽन्वेष्टव्यः स विजिज्ञासितव्य"इत्येवमाद्याः ॥

टी॰ ॥ "तथाचे"ति विज्ञायेत्यादिवाक्यद्वयेन ज्ञानसामान्यशब्दः वाक्यद्वयोपादानं च उपसर्गभेदेऽपि विधिप्रत्ययान्तत्वतद्राहित्ययोश्चार्थभेदो नास्तीति ज्ञापनार्थम् । "ध्यायथे"ति विशेषशब्दः–"निचाय्ये"ति ज्ञानस्य प्रत्यक्षसमानाकारता दर्शिता चाय् दर्शन इति हि धातुः, उपासीतेत्यनेन ज्ञानस्योपासनशब्दवाच्यत्वं सिद्धम् "अन्वेष्टव्य"इति मननशिरस्कश्रवणोक्तिः, निदिध्यासितव्यः विजिज्ञासितव्य इत्युपादानेन सनन्तत्वेऽपीष्यमाणज्ञानपरं वाक्यमिति दर्शितम् । सनन्तपदद्वयस्यापादानं सामान्यविशेषशब्दत्वात् । "इत्येवमाद्या"इति इति–शब्द उपात्तश्रुतिवाक्यस्वरूपमात्रपरः । एवं–शब्दः सनन्तत्वविधिप्रत्ययान्तत्वतद्राहित्योपसर्गभेदादिप्रकारपरः । उदाहृतवाक्येषु ज्ञानसामान्यवाचिपदानां विशेषाकाङ्क्षायां वाक्यार्थज्ञानस्वरूपो विशेषः पर्यवसानभूमिः स्यादिति शङ्कानिवृत्त्यर्थः ॥

भू॰ अत्र "निदिध्यासितव्य" इत्यादिनैकार्थ्यात् "अनुविद्य विजानाति" "विज्ञाय प्रज्ञां कुर्वीते"त्येवमादिभिर्वाक्यार्थज्ञानस्य ध्यानोपकारकत्वात् तदनुविद्य विज्ञायेत्यनूद्य "प्रज्ञां कुर्वीत विजानाती"ति ध्यानं विधीयते ॥

(शेषमग्रे)

॥ माधवीयधातुवृत्तिः ॥

(*Continued from page* 537. Vol. VII.)

हरिः । इन्प्रत्ययः । प्रह्विः । कूपः । प्रहरतेः । कूपइति प्रोपसृष्टादः स्मादिकारप्रत्ययः । तत्र डिदित्यनुवृत्तेः टिलोपः । हृदयम् । वृञ्हृञ्भ्यां युक्दुकौ चेति कयप् प्रत्ययो दुगागमः ॥ हृदयस्य प्रियं, हृद्यम्, हृदयस्य प्रिय इति षष्ठ्यन्ताद्यत्, हृदयस्य बन्धनो हृद्यो मन्त्रः 'बन्धने चर्षा'विति षष्ठ्यन्तात् यत् । बध्यते ऽनेनेति बन्धनम् । ऋषिर्वेदः । हृदये भवं हार्दम् । 'प्राग्दीव्यतोऽण्', हृदयं लिखतीति, हृल्लेखः । हृदय्यम् । ब्राह्मणादिपाठात् ष्यञ् । एवं दौहृदय्यम् । हृदयस्य लासो हृल्लासः । 'हृदयस्य हृल्लेखयदण्लासेष्वि'ति हृदादेशः । तत्र वृत्तौ लेखेत्यण्णन्तस्य ग्रहणं घञि हृदयलेख इति । हृदयस्य शोको हृच्छोकः । हृदयशोकः । रोगे, हृद्रोगः । हृदयरोगः । 'वा शोकष्यञ्रोगेष्विति' हृदादेशविकल्पः । ष्यञि हृद्भावपक्षे 'हृद्भगसिन्ध्वन्ते पूर्वपदस्य चे'त्युभयपदवृद्धिः । सुहृत् । दुर्हृत् । सुहृद्दुर्हृदौ मित्रामित्रयो'रिति बहुव्रीहौ हृदयस्य हृदादेशः समासान्तः । मित्रामित्राभ्यामन्यत्र सुहृदयो दुर्हृदय इति भवति । सुहृदो भावकर्म्मणी सौहार्दम् । 'हायनान्तयुवादिभ्यो ण्वि'ति अण् हृद्भगेत्युभयपदवृद्धिः । हृदयस्य हृल्लेखेत्यादिना हृदयस्य हृद्भावः । हृदयस्य भावकर्मणी हार्दम् । युवादिषु हृदयस्य हृद् इति पाठात् अणि हृद्भावः ॥ हृदयमस्यास्तीति हृदयालुः । 'हृदयाच्चालुरन्यतस्या'मिति मत्वर्थीय आलुच् । तदभावइनिठनौ । हृदयी हृदयिक इति । हरिणः । शास्त्याहृश्विभ्य इनच् इतीनच् । हरिणी । जातेरस्त्रीविषयादिति ङीष् । हरेणुः । गन्धद्रव्यविशेषः । स्पृहृभ्यामेणुरिति एणुः प्रत्ययः । हरितः । हृश्याभ्यां तर्न्विति तन् । हरिणी ब्राह्मणी वर्णादनुदात्तात्तोपधादिति स्त्रियां वा ङीष् तकारस्य नकारः । अयामतनो नित्त्वादुदात्तादिस्तकारोपधश्च भवति । ङीपभावे टापि हरिता ब्राह्मणी । हरित् । हृसृरुहियुषिभ्य इतिरिति इतिप्रत्ययः ॥ ८५० ॥

धृञ् धारणे ॥ धरतीत्यादि भरतिवत् । 'धारेरुत्तमर्णे' इत्यत्र धृञ् अनवस्थाने इति तौदादिकस्य ग्रहणमिति न्यासपदमञ्जर्यादिषु । इह-धार्यारित्यत्राप्यस्येति न्यासे, अध्यायन्यायेति निपातनमप्यस्येति वृत्तिकारेण दर्शितम् । धारयतीति धारयः । अनुपसर्गाल्लिम्पविन्देत्यादिना शे अपि गुणाया । वसु धारयतीति वसुन्धरा । संज्ञायां भृतृवृजीति खचि 'खचि ह्रस्वश्चे'ति ह्रस्वत्वे मुमागमः । धारा । धाराप्रपतनइति भिदादिपाठादहि गुणो दीर्घत्वं च । द्रवद्रव्यनिपातनं धारेति न्यासे खड्गधारादावुपमावत् प्रयोगः । धर्मः । अर्त्तिस्तुसुहुसृधृक्षिभायावापदियक्षिनीभ्यो मनिति मन् । धर्मं चरति धार्मिकः । 'धर्मं चरतो'ति द्वितीयान्तात् चरतीत्यर्थे ठक् । तत्र अधर्माच्चेति वक्तव्यमित्युक्तत्वात् आधर्मिकोपि । धर्मेण प्राप्यं, धर्म्यम् । नौवयोधर्मेति तृतीयान्तात् प्राप्येर्थे यत् । धर्मादनपेतमपि धर्म्यम् । धर्मादनपेतमित्यर्थे यत् । कल्याणो धर्मो ऽस्येति कल्याणधर्मा । 'धर्मादनिच् केवलादि'ति धर्मान्तात् बहुव्रीहेरनिच् । अत्र केवलादिति बहुव्रीह्यावयवस्य पूर्वपदस्य विशेषणत्वेन पूर्वपदीभवतः केवलादन्यनिरपेक्षात्परो यो धर्मशब्दस्तदन्तात् बहुव्रीहेरिति सूत्रार्थः । तेन परमस्वो धर्मोस्य परमस्वधर्मइति त्रिपदे बहुव्रीहावनिच् न भवति । अत्रान्यदपेक्षयैव स्वशब्दः पूर्वपदं भवति । सर्वनामसंख्ययोरुपसंख्यानमिति स्वशब्दस्य पूर्वनिपातो न भवति आहिताग्न्यादेराकृतिगणत्वात् । यदा स्वो धर्मः स्वधर्मः । परमः स्वधर्मोस्येति बहुव्रीहिस्तदा यद्यपि पूर्वपदं केवलं भवति तथापि ततः परो न धर्मशब्द इति समासान्ताभावः । निवृत्तधर्मा हीत्यत्र निवृत्तिशब्दो बहुव्रीहेः पूर्वपदं भवचान्यमपेक्षतइति केवलादस्मात् परो धर्मशब्द इति अनिच् संभवति । एवं साध्यसमानधर्मा सपक्ष इत्याद्यपि निर्वाह्यम् । साध्येन समानः साध्यसमानः । साध्यसमानः धर्मोस्येति । ब्राह्मणस्य धर्मो ब्राह्मणधर्मः । सोस्यास्तीति ब्राह्मणधर्मी । 'धर्मशीलवर्णान्ताच्चे'ति मत्वर्थीय इनिः । सिद्धे सति वचनं ठनो निवृत्त्यर्थम् । धृञ् अवध्वंसनइतीहैवार्यः । धृञ् धारणे चुरादौ क्षीरस्वामी । तद्भाष्यकारस्यानभिमतम् । यदाह भिदादौ धारा प्रपतने वृत्तिरस्येति । यद्ययं

चुरादिः स्यादस्मादेवाह धारणान्येति ब्रूयात् । एवं हि दीर्घनिपातनक्लेशोऽपि न भवति, न चास्त्यर्थे भेदः । तथा न्यासहरदत्तावपि न सहेते । यदाहतुः दीर्घत्वं निपातनादिति । तथानुपसर्गाल्लिम्पेत्यत्र न्यासे धृञ् हेतुमण्ण्यन्त उक्तः । स पार्यादयस्तूभयथा, यदाह, पार तीर कर्मसमाप्तौ चुरादिण्यन्तः । अथ वा पृ पालनपूरणयोर्हेतुमण्ण्यन्त इत्यादि, हरदत्तोऽपि धृञ् धारणे धृञ् अनवस्थाने णयन्तौ विद चेतनाख्याननिपातनेषु चुरादिः ॥ ज्ञानाद्यर्थानामन्यतमो वा हेतुमण्ण्यन्त इति । यदि चुरादिः स्यात् इतरच्चुरादिणयन्तौ चेति ब्रूयाताम् । अत्र के चित् कृञ् करण इति धातुं पठन्ति तत्वनार्थम् । यदाहतुर्न्यासकारहरदत्ता । कः करत् करती-त्यत्र व्यत्ययेन शबिति । किं च यद्ययं स्यात् अकरदित्येवमर्थे 'कृमृदृ-रुहिभ्यः छन्दसि' इति करोतेरङ्विधानमनर्थकं स्यात् । अस्मात् लङि अपि अस्य सिद्धे 'छन्दसि लुङ्लङ्लिट' इति लुङादीनामेकत्र विधानात् नास्त्यर्थभेदः ॥ ८५१ ॥

णीञ् प्रापणे ॥ इह प्रापणं गमनीयं भवति । प्रणयति । अन्तर्णयति । अन्तश्शब्दस्याङ्किविधिणत्वेषूपसर्गत्वमुक्तम् । निनाय । वृद्ध्यायो । 'द्विर्वचनेची'ति स्थानिवद्भाव.चीशब्दो द्विरुच्यते । निन्यतुः । इयङः स्थानिवद्भावान्निशब्दे द्विरुक्ते पुनरुत्तरखण्डस्येयङ् भवति । अस्यां दशायामनेकाच्त्वात् एरनेकाच इति यणा बाधात् इतीयेथेत्यत्रोपपादितम् । निनयिथ । निनेथ । निन्यथुः । निन्य । निनाय । निनय । गुणवृद्ध्योरयायो । निन्यिव । क्रादिनियमादिट् । थलि भारद्वाजनियमाद्विकल्पः । नेता । नेष्यति । नयतु । अनयत् । नयेत् । नीयात् । अनैषीत् । निनीषति । नेनीयते । नेनयीति । नेनेति । नेनीतः । नाययति अजां यज्ञदत्तेन देवदत्तः । नीवह्योः प्रतिषेध इति प्रयोज्यस्य कर्मत्वनिषेधः । अत्र हरदत्तः । यद्यपि नेतयोर्गतिरर्थः, तथापि गतिफलं प्रापणमर्थ इति फलतया गतिः प्रतीयते इति मत्वा प्रतिषेध इति । तथा च कैयटे यद्यप्यर्थत्वमुक्तं तत्फलतया प्रतीयमानगत्यपेक्षम् । नयते । निन्ये । निन्यिवे ।

निन्यिध्वे निन्यिढ्वे । निन्यिवहे । नेतासे । नेष्यते । नयताम् । अनयत । नयेत । नेषीष्ट । अनेष्ट । संमाननोत्सञ्जनेति आत्मनेपदम् । अकर्त्रभिप्रायार्थोऽयमारम्भः । सम्माननं पूजनम् । उत्सञ्जनमुत्क्षेपणम् । आचार्यकरणमाचार्यक्रिया । ज्ञानं प्रमेयनिश्चयः । भृतिर्वेतनम् । विगणनमृणादेः प्रतिनिर्यातनम् । व्ययो धर्मादिप्रयोजने विनियोगः । तत्र संमाननमाचार्यकरणादयो धात्वर्थविशेषणानि । अन्ये तु धात्वर्थाः । हेतुग्रहणाच्चैतेस्तङ् स्यात् । नयते चार्वी । चार्वी युक्तिभिः स्थिरीकृत्य शिष्येभ्यः प्रतिपादयतीत्यर्थः । इह पूजा शास्त्रार्थस्य युक्तिभिः स्थिरीकरणम् । शिष्याणां चैवंविधा प्रतिपादनम् । पुत्रमुदानयते । उत्क्षिपतीत्यर्थः । माणवकमुपनयते । शास्त्रीयेन विधिनात्मसमीपं प्रापयतीत्यर्थः । नयते चार्वी । तत्त्वप्रमेयं निश्चिनोतीत्यर्थः । अत्रायमकर्मकः । कर्मणो धात्वर्थान्तर्भावात् । कर्मकरानुपनयते । भृतिदानेनात्मनः समीपं प्रापयतीत्यर्थः । करं विनयते । निर्यातयतीत्यर्थः । शतं विनयते । धर्मादौ विनियुङ्क्त इत्यर्थः । 'कर्तृस्थे चाशरीरे कर्मणि' । नयत्यर्थस्य यः कर्ता तत्स्थे शरीरैकदेशवर्जिते कर्मणि कारके सति नियस्तङ् स्यात् । इह शरीरं तदेकदेश इति वृत्तौ । मन्युं विनयते । कर्तृग्रहणाद् देवदत्तस्य मन्युं विनयतीत्यत्र न भवति तथा शरीरग्रहणात् गडुं विनयतीत्यत्र न भवति । अयमकथितेप्सिततमाभ्यां द्विकर्मक इत्युक्तम् । तत्र लादयः प्रधाने कर्मणि भवन्ति षष्ठी तूभयत्र । अत्र प्रधाने पक्षे द्वितीयापि उभयप्राप्तौ कृति कर्तृकर्मणोः षष्ठी नेति सर्वमेतद्दुरतावुक्तमुदाहृतं च इहापि तथैवोदाहरणं नेयम् । 'अकथितं च'त्यत्र न्यासे नीवहिहरतिजिदण्डीन्प्रस्तुत्य ग्रामादीनामप्यजादिवत् क्रियाजन्यफलभावेऽपि तदविवक्षयाऽकथितत्वमुक्तम् । यदाह । अकथितत्वेऽप्येषां ग्रहणं यदा ग्रामादीनामीप्सिततमत्वमनीप्सिततमत्वं च न विवक्ष्यते किन्तु कर्तुरीप्सिततमत्वमात्रमेव तदर्थमिति । न्यासोद्योते च अजादीनां ग्रामादीनामीप्सिततमत्वमविशिष्टमित्युक्तम्, तत्र पद्दिनीवहिहरिपीनां प्रापणमर्थः तथा च न मर्तानिहंसेत्यत्र भाष्यम् । देशान्तरप्रापणक्रिया वहिरिति । तथैव कैयटे । देशान्तरप्राप्त्यनुकूलं प्रापणमस्य वाच्यं, तत्र गतिनो-

न्तरीयकत्वात्प्रतीयते न त्वसौ धात्वर्थ इति गतिबुद्धीत्यत्र नीवह्योर्ग्रहणस्य पदमञ्जर्यामेतयोर्गतिफलं प्राप्यमर्थ इति । तस्मादत्र गतेरधात्वर्थत्वा-त्तत्फलसंयोगादाप्यमानत्वेपि ग्रामादीनां न कर्मतोपपत्तिः । अजादीनां तु धात्वर्थकर्तृव्यापारप्रापकफलभागितद्वारेणाप्यमानत्वाद्युक्तं कर्मत्वम् । न चैवं वाच्यम् । अजादिभिः स्वव्यापारे गतौ कर्तृभिस्तत्संयोगद्वारेणाप्तु-मिष्यमाणत्वादनीप्सितकर्मत्वमिति । यतः कर्तुरीप्सिततममित्यत्र कर्तृग्रहणं कर्मणः स्वव्यापारद्वारेणाप्तुमिष्यमाणत्वमस्य कर्मत्वनिवृत्त्यर्थ-मिति स्थितम् । अत एव माषेष्वश्वं बध्नातीत्यत्र बन्धनकर्मणाश्वेन स्वव्या-पारेण भक्षणेनाप्तुमिष्यमाणानामपि माषाणां कर्मत्वं न भवति । कथं तर्हि गत्यर्थेत्यत्र भाष्यकृता उह्यन्तां देवदत्तेनेति वहिर्गत्यर्थ उदाहृतः । नैष दोषः । गतिलोटीत्युच्यमानेपि अर्थाद्गत्यर्थलोटीति सिद्धेऽर्थग्रहणस्य प्रतीयमानगतीनामीदृशामपि संग्रहार्थत्वात् । यच्च 'हृक्रोरन्यतरस्या'-मित्यत्र हरतेर्गतिबुद्धीति नित्ये प्राप्ते विकल्प इति हरदत्तादिवचनम् । तत्र गतिबुद्धीत्यत्रार्थग्रहणस्य पूर्ववद्व्यत्याद्यर्थपरिग्रहार्थत्वात् युक्तमेव । प्रती-यमानानां गतीनामपि तत्र ग्रहणमेवं नीवह्योः प्रतिषेध उपपद्यते । न गति-हिंसेत्यत्र त्वर्थग्रहणेन प्रतीयमानगतीनां ग्रहणं भाष्यकारस्य नेष्टम् । यत्तु हृवह्योरप्रतिषेध इति वार्त्तिकपरिग्रहणाच्च वहिर्गत्यर्थ इति प्रत्याचष्टे । विनीयः कल्पः कल्कश्च पिष्टौषधे पक्वाज्यतैलादीनामृजीषे पाके वर्त्तते । 'विपूयविनीयजित्या मुञ्जकल्कहलिष्वि'ति विपूर्वादस्मात्कल्के क्यपि निपात्यते । आनाय्यः गार्हपत्यादाहवनीयादानीतो दक्षिणाग्निः । तस्य हि योनिर्विकल्प्यते वैश्यकुलाद्वित्तवतो वा गृहात् गार्हपत्याद्वेति 'आना-य्योऽनित्य' इति आङ्पूर्वादस्मात् ण्यदाय्यौ निपात्येते । अनित्यत्वं चास्य नित्यमप्रज्वलनात् । निपातनस्य रूढ्यर्थत्वाद्घटादावन्ययोनौ च दक्षिणाग्नौ च आनेय इति भवति । प्रणाय्यः पूज्यो निष्कामो वा 'प्रणाय्योऽसंमता'विति प्रपूर्वादस्माण्ण्यदायौ । असंमतिः पूजाभिलाषो वा सा यस्य नास्तीत्य-सौ संमतिः । संमतौ तु प्रतिप्रसवः । सान्नाय्यं हविः । तच्च दधिपयसी । पाय्यसान्नाय्येति हविषि ण्यदायौ । उपसर्गस्य दीर्घत्वं च । नयतीति नायः

'वुन्योरनुपसर्ग' इति अनुपसृष्टादस्मात्कर्तरि णः । उपसृष्टादनुनयः । पचाद्यच् । प्रणयः । सत्सूद्विषेत्यादिना क्विप् । ग्रामणीरित्यत्र पूर्ववत् क्विपि अग्र ग्रामाभ्यां नयतेरुपसंख्यानमिति णत्वम् । नायः । 'श्रिणीभुवोऽनुपसर्गे' इति घञ् । उपसृष्टात्तु निर्णयः । दुर्णयः । निर्णाय इत्येतत्तूपसर्गप्रतिरूपकात्परस्य निञो घञि णत्वे अनुपसर्गत्वादेव भवति । कथं नय इति बाहुलकादच् । अवनायः । उन्नायः । 'अवोदोर्नियः' इति घञ् । उन्नयः पदार्थानामिति बाहुलकादच् । परिणायः । समन्तात्रयादिना यद् द्यूतम् । 'परिन्योर्नीणोर्द्यूताभ्रेषयो'रिति यथासंख्यात्परावुपपदे द्यूते नियो घञ् अक्षादिभिः क्रीडनं द्यूतम् । भ्रेषश्चलनमचलनमभ्रेषः । अनपहार इति यावत् । आनायः । 'जालमानाय' इति जाले घञि निपात्यते । निर्मिः निञो मिरिति मिः । नेमः । अर्तिस्त्वित्यादिना मन् । अस्य सर्वादित्वात् तत्कार्यं पूर्वशब्दवत् । नीथो यज्ञः । हृतिकृषीत्यादिना थुन् । नेष्टा । नयतेः षुक्चेति तृनि गुणो धातोः षुगागमः । अप्तृन्नित्यादिना ऋतो ङीत्यादिना च यथायोगं गुणदीर्घौ सर्वनामस्थाने । हरत्यादयश्चत्वारोऽनुदात्ता उभयपदिनः ॥ ८५२ ॥

अथाजन्तानानिटः परस्मैपदिन आह । धेट् पाने ॥ एतदादयो जयत्यन्ता अनुदात्ता उदात्तेतः । धयति । दधौ । दधतुः । दधुः । दधाथ । दधिथ । दधिव । 'आदेच उपदेशेऽशिती'ति एजन्तो यो धातुरुपदेशे तस्यात्वमिति सर्वत्राकारे 'आत औ णल' इति औत्वे वृद्धिः । अन्यत्र क्डित्यजादावार्धधातुके 'आतो लोप' इत्याल्लोपः । इटि च तस्य 'द्विर्वचनेऽची'ति स्थानिवत्त्वाद्धाशब्दस्य द्विर्वचनं क्रादिनियमादिट् । थलि भारद्वाजनियमादिड्विकल्पः । धाता । धास्यति । धयतु । अधयत् । धयेत् । आशिषि धेयात् । 'एर्लिङि' घुमास्थागापाजहातिसामित्येकारः । 'दाधाघ्वदाबि'ति दाण् दाने, देङ् रक्षणे, डुदाञ् दाने, दो अवखण्डने, धेट् पाने, डुधाञ् धारणादौ एते घुसंज्ञकाः । दाप् शोधने दैप्शवन इत्येतौ वर्जयित्वा । प्रकृतिवदनुकरणं भवतीत्यात्वेनैजन्तानुकरणमपि दाधारूपमेव । तत्रक्वा

तिपदोक्तपरिभाषाया नेह प्रसङ्गः । एवं हि अदाबिति सामान्यग्रहणार्थेदेपः पित्त्वमर्थवद्भवति । अदधत् । अदधताम् । 'विभाषा धेट्श्व्यो'रिति कर्तृवाचिनि लुङि च्लेर्विभाषा चङि 'आतो लोप इटि चे'त्याल्लोपस्य स्थानिवत्त्वात् 'चङी'ति धाशब्दस्य द्विर्वचनम् । चङभावे सिचि यमरमनमाताामिति सकि सिचश्चेटि अधासीत् । अधासिष्टामित्यादि । यदा 'विभाषा घ्राधेट्शाच्छास' इति घ्रादिभ्यः परस्मैपदपरस्य सिचो लुक् तदा अधात् । अधाताम् । अधुरित्यादि । 'आत'इति झेर्जुस् । सिज्लुगन्तादपि भवति आत एवेति नियमार्थमिदं सूत्रमित्युक्तम् । यदा कर्मव्यतिहारे तङ् तदा व्यतिधयते व्यतिदधइत्यादि । आदेच उपदेश इत्यत्र शितीति कर्मधारये नञः तत्पुरुषे श एव इत् शित् न शित् अशित् इति । तेन यस्मिन् विधिस्तदादावल्ग्रहणइतीत्संज्ञकशकारादावयं पर्युदास इति एशि आत्वमेव भवति । तङि विभाषा धेट्श्व्योरिति वा चङि अदधत । अदधेताम् । 'स्थाघ्वोरिच्चे'ति आत्मनेपदपरस्य सिचः कित्त्वे धातोश्चेत्वे 'ह्रस्वादङ्गा'दिति झल्परत्वेन सिचो लोपेन व्यत्यधित । व्यत्यधिषत । सिचः कित्त्वात् गुणो न भवति । इत्वविधानं तु गुणविधानार्थमेव स्यात् स्थाघ्वोरिच्चेति एकारस्याविधानमपि ह्रस्वादिति सिचो लोपार्थं लघ्वर्थमात्मनेपदार्थमेव । इदं चेत्वं न सिचीत्युच्यते । किं तर्हि इकारश्चान्तादेशः सिच् कित् भवति इत्येतावत् । तेनास्य सिग्निमित्तत्वात् संनिपातपरिभाषया सिलोपो न स्यादिति नाशङ्कनीयम् । कर्मणि लुङ्येकवचने अधायि । 'आतो युक् चिण्कृतो'रिति युक् । चिणि ञिणति कृति परे आकारान्ताङ्गस्य युगित्यर्थः ॥ द्विवचनादौ चिण्वदिट् पक्षे युकि अधायिषातामित्यादि । अन्यदा आधिषातामित्यादि । धित्सति । सनिमीमेत्यादिना इसि 'सः स्यार्द्धधातुक'इति तत्वे 'अत्र लोपोऽभ्यासस्ये'ति लोपः । देधीयते । 'घुमास्थागापाजहातिसां हली'ति एषां हलादौ क्ङित्यार्द्धधातुके परे आकारस्येकार इतीकारो द्विर्वचनं दाधेति । इटि चाद्गुणः । अन्यदा दाधाति । दादुः 'श्नाभ्यस्तयोरातः' अनयोराकारस्य क्ङिति सार्वधातुके लोप इति लोपे झषस्तथोरिति धत्वे जश्त्वम् । 'इद्दल्यघोरि'तीत्वमत्रैवाघोरिति निषेधान्न भवति ।

आकारलोपस्य पूर्वस्मादपि विधाविति स्थानिवद्भावः पूर्वत्रासिद्धे न स्थानिवदिति निषिध्यते । अत एव हि अध इति दधातिः पर्युदस्यते । धयतेस्त्वयं पर्युदासो ऽस्मात् झषन्तात्परस्मैपदपरयोरभवाच्च भवति । न च यङ्लुकि संभवात्तदर्थोऽयं पर्युदासः स्यादिति वाच्यम् । दधातो चारितार्थत्वात् । तथा च तत्र वृत्तिः । दधातिं वर्जयित्वेति । काश्यपवर्षगणौ त्वध इति पर्युदासमिच्छतः । दाधति । आल्लोपः । दाधेवि । दाधामि । दाधेमि । दाधामि । दाध्वः । लोटि हौ 'घ्वसोरेद्धावभ्यासलोपश्चे'ति अन्तस्यैकारोऽभ्यासलोपश्च । अत्र लोपस्य शित्वात्सर्वादेशत्वम् । तेन धेहीति भवति । लङि अदाधात् । अदाद्धाम् । अदाधुः । 'सिजभ्यस्तेति झेर्जुस् नित्यम् । परत्वा'ल्लङः शाकटायनस्यै'वेति अकारान्तनिबन्धनो विकल्पो नाशङ्क्यः । अस्मात्परत्वान्नित्यत्वाच्च 'श्नाभ्यस्तयोरात'इति पूर्वमेवाल्लोपे आकारान्तस्याभावाल्लिङि दाध्यात् । श्नाभ्यस्तेत्यल्लोपः । आशिषि 'एर्लिङी'त्येत्वे दाधेयात् । लुङि अदाधात् । गातिस्थेति नित्यं सिचो लुक् । विभाषा धेङिति विकल्पस्तु सानुबन्धकनिर्देशाच्च भवति । अत एव 'विभाषा घेट्श्व्यो'रिति चङपि न भवति । धापयति धापयते शिशुम् । आत्वे युक् । पादिषु धेट उपसंख्यानमिति निगरणचलनेति परस्मैपदं निषिध्यते । अदीधपतेत्यत्राकाराश्रयः पुक् तस्योपधात्वसंपादनेन णौ चङीति ह्रस्वस्य निमित्तं न स्यादिति नाशङ्क्यम् । 'मारणतोषणनिशामनेषु ज्ञे'ति जानातेर्णौ पुकि ह्रस्वार्थात् मित्त्वविधानाल्लिङ्गात् । उद्धयः । धयः । 'पाघ्राध्माधेट्दृशः शः' इति उपसृष्टादनुपसृष्टाच्च कर्त्तरि शः । स्तनंधयः । नासिकंधयः । 'नासिकास्तनयोर्ध्माधेटो'रिति खशि मुमागमः । नासिकायाः 'खित्यनव्ययस्ये'ति ह्रस्वश्च । धेटष्टित्वमवयवे ऽचरितार्थत्वात् स्तनंधयीति समुदाये ङीबर्थम् ॥

(शेषमत्र)

॥ श्रीः ॥

श्रौतपदार्थनिर्वचनम् ।

अथाग्निष्टोमसम्बन्धिपदार्थनामान्युच्यन्ते ।

(*Continued from page* 544. Vol. VII.)

२१ महावीरादिषूपवातेषु शुष्केषु सत्सु अध्वर्युर्गार्हपत्यादग्निमाहृत्य पुंसोऽश्वस्यैकविंशतिशकृत्पिण्डान् आदीपयति वृष्णो अश्वस्य निष्पदसि वरुणस्त्वा धृतव्रत आधूपयतु मित्रावरुणयोर्ध्रुवेण धर्मणेति मन्त्रेण । अस्य मन्त्रस्यावृत्त्या त्रीनपि महावीरान् क्रमेणान्तर्बहिश्च धूपयति । तूष्णीं पिन्वनादीनि धूपयति । शालाया उत्तरतो गर्तं खात्वा पचनेनावस्तीर्णादम्बिलान्महावीरानायातयति । तेषां पुरस्तात् पिन्वने पश्चाद्रौहिणकपाले आज्यस्थालीं च । इन्धनेनोपरिष्टात् प्रच्छाद्य मृदाऽवलिम्पति । अर्चिषे त्वा । इति पुरस्तादग्निनोपोषति । शोचिषे त्वा । इति दक्षिणतः । ज्योतिषे त्वा । इति पश्चात् । तपसे त्वा । इत्युत्तरतः । महावीरादिषु पक्केषु गोपयश्छागापयो धृष्टिमश्मसन्दात्रं सतं सन्दंशं खारीं शिक्यं कृष्णाजिनं चादाय । अभीमं महिना दिवं मित्रो बभूव सप्रथाः । उत श्रवसा पृथिवीम् । मित्रस्य चर्षणीधृतः श्रवो देवस्य सानसिम् । द्युम्नं चित्रश्रवस्तमम् । इत्याभ्यामृग्भ्यामपाक्रामति । सिद्ध्यै त्वा । इति धृष्टिमादत्ते । देवस्त्वा सवितोद्वपतु सुपाणिः स्वङ्गुरिः सुबाहुरुत शक्त्या । इति तया धृष्ट्या प्रथमान्महावीरादङ्गारानुद्वपति । उत्तिष्ठ बृहन् भवोर्ध्वस्तिष्ठ ध्रुवस्त्वम् । इति सन्दंशेन महावीरमुच्छ्रयति । अपद्यमाना पृथिव्याशा दिश आपृण । इति स्वस्थाने सादयति । सूर्यस्त्वा चक्षुषान्वीक्ष

ऋजवे त्वा साधवे त्वा सुक्षित्यै त्वा भूत्यै त्वा । इति महावीरमीक्षते । इदमहममुमामुष्यायणं ब्रह्मवर्चसेन पर्यूहामि । इति यजमानस्य नामगोत्रे उच्चार्य प्रदक्षिणं पुरीषेण पर्यूहति । सन्दंशेन महावीरं खरे निधाय । गायत्रेण त्वा छन्दसा छृणद्मि त्रैष्टुभेन त्वा छन्दसा छृणद्मि जागतेन त्वा छन्दसा छृणद्मि छृणत्तु त्वा वाक् छृणत्तु त्वोर्क् छृणत्तु त्वा हविश्छृन्धि वाचं छृन्ध्यूर्जं छृन्धि हविर्देव पुरश्चरसघ्यासं त्वा । इति महावीरमन्तर्बहिश्चाजापयसा छृणत्ति । गोपयसा तूष्णीमभिषिञ्चति । एवं द्वितीयतृतीययोर्महावीरयोः समन्त्रकं अङ्गारोद्वपनादि भवति । तूष्णीं पिन्वनादीनाम् । सर्वं खार्यां निधाय कृष्णाजिनेन प्रच्छाद्योत्तरे शालाखण्डे शिक्ये स्थापयन्ति । यथा पत्नीदर्शनविषयो न भवेत्तथा । पूर्ववदुत्तरां शान्तिं जपन्ति । शन्नो वातः पवतां मातरिश्वा शन्नस्तपतु सूर्यः । अहानि शं भवन्तु नः शꣳ रात्रिः प्रतिधीयताम् । शमुषा नो व्युच्छतु शमादित्य उदेतु नः । शिवा नः शन्तमा भव सुमृडीका सरस्वति । मा ते व्योम सन्दृशि । इडायै वास्त्वसि वास्तुमद्वास्तुमन्तो भूयास्म मावास्तोश्छित्स्मह्यवास्तुः स भूयाद्योस्मान् द्वेष्टि यञ्च वयं द्विष्मः । प्रतिष्ठासि प्रतिष्ठावन्तो भूयास्म मा प्रतिष्ठायाश्छित्स्मह्यप्रतिष्ठः स भूयाद्योस्मान् द्वेष्टि यञ्च वयं द्विष्मः । आवात वाहि भेषजं विवात वाहि यद्रपः । त्वꣳ हि विश्वभेषजो देवानां दूत ईयसे । द्वाविमौ वातौ वात आसिन्धोरापरावतः । दक्षं मे अन्य आवातु परान्यो वातु यद्रपः । यददो वात ते गृहे ऽमृतस्य निधिर्हितः । ततो नो देहि जीवसे ततो नो धेहि भेषजम् । ततो नो मह आवह वात आवातु भेषजꣳ शंभूर्मयोभूर्नो हृदे । प्रण आयूꣳषि

तारिषत् । इन्द्रस्य गृहोसि तन्त्वा प्रपद्ये सगुः साश्वः । सह यन्मे अस्ति तेन । भूः प्रपद्ये भुवः प्रपद्ये सुवः प्रपद्ये भूर्भुवः सुवः प्रपद्ये वायुं प्रपद्ये नार्तां देवतां प्रपद्ये श्मानमाखणां प्रपद्ये प्रजापतेर्ब्रह्म कोशं ब्रह्म प्रपद्य ओं प्रपद्ये । अन्तरिक्षं मउर्वन्तरं बृहदग्नयः पर्वताश्च पयोवातः स्वस्त्या स्वस्तिमान् तया स्वस्त्या स्वस्तिमानसानि । प्राणापानौ मृत्योर्मा पातं प्राणापानौ मा मा हासिष्टं मयि मेधां मयि प्रजां मय्यग्निस्तेजो दधातु मयि मेधां मयि प्रजां मयीन्द्र इन्द्रियं दधातु मयि मेधां मयि प्रजां मयि सूर्यो भ्राजो दधातु । द्युभिरक्तुभिः परिपातमस्मानरिष्टेभिरश्विना सौभगेभिः । तन्नो मित्रो वरुणो मामहन्तामदितिः सिन्धुः पृथिवी उत द्यौः । कया नश्चित्र आभुवदूती सदावृधः सखा । कया शचिष्ठया वृता । कस्त्वा सत्यो मदानां मꣳहिष्ठो मत्सदन्धसः । दृढाचिदारुजे वसु । अभीषुणः सखीनामविता जरितृणाम् । शतं भवास्यूतिभिः । वयः सुपर्णा उपसेदुरिन्द्रं प्रियमेधा ऋषयो नाधमानाः । अपध्वान्तमूर्णुहि पूर्धि चक्षुर्मुमुग्ध्यस्मान्निधयेवबद्धान् । शं नो देवीरभिष्टय आपो भवन्तु पीतये । शं योरभिस्रवन्तु नः । ईशाना वार्याणां क्षयन्तीश्चर्षणीनाम् । अपो याचामि भेषजम् । सुमित्रा न आप ओषधयः सन्तु । दुर्मित्रास्तस्मै भूयासुर्योस्मान् द्वेष्टि यञ्च वयं द्विष्मः । आपोहिष्ठामयोभुवस्तान ऊर्जे दधातन । महे रणाय चक्षसे । यो वः शिवतमो रसस्तस्य भाजयतेह नः । उशतीरिव मातरः । तस्मा अरङ्गमामवो यस्य क्षयाय जिन्वथ । आपो जनयथा च नः । पृथिवी शान्ता साग्निना शान्ता सा मे शान्ता शुचꣳ शमयतु । अन्तरिक्षꣳ शान्तं तद्वायुना शान्तं तन्मे शान्तꣳ शुचꣳ

Digitized by Google

शमयतु । द्यौः शान्ता सादित्येन शान्ता सा मे शान्ता शुचꣳ
शमयतु । पृथिवी शान्तिरन्तरिक्षꣳ शान्तिर्द्यौः शान्तिर्दिशः
शान्तिरवान्तरदिशाः शान्तिरग्निः शान्तिरन्तरिक्षꣳ शान्तिरा-
दित्यः शान्तिश्चन्द्रमाः शान्तिर्नक्षत्राणि शान्तिरापः शान्ति-
रोषधयः शान्तिर्वनस्पतयः शान्तिर्गौः शान्तिरजा शान्तिरश्वः
शान्तिः पुरुषः शान्तिर्ब्रह्म शान्तिर्ब्राह्मणः शान्तिः शान्तिरेव
शान्तिः शान्तिर्मे अस्तु शान्तिः । तयाहꣳ शान्त्या सर्वशान्त्या
मह्यं द्विपदे चतुष्पदे च शान्तिं करोमि शान्तिर्मे अस्तु शान्तिः ।
एह श्रीश्च ह्रीश्च धृतिश्च तपो मेधा प्रतिष्ठा श्रद्धा सत्यं
धर्मश्चैतानि मोत्तिष्ठन्तमनूत्तिष्ठन्तु मा माꣳ श्रीश्च ह्रीश्च धृतिश्च
तपो मेधा प्रतिष्ठा श्रद्धा सत्यं धर्मश्चैतानि मा मा हासिषुः ।
उदायुषा स्वायुषोदोषधीनाꣳ रसेनोत्पर्जन्यस्य शुष्मेणोदस्थाम-
मृताꣳ अनु । तच्चक्षुर्देवहितं पुरस्ताच्छुक्रमुच्चरत् । पश्येम
शरदः शतं जीवेम शरदः शतं नन्दाम शरदः शतं मोदाम
शरदः शतं भवाम शरदः शतꣳ शृणवाम शरदः शतं प्रब्रवाम
शरदः शतमजीताः स्याम शरदः शतं ज्योक् च सूर्यं दृशे ।
य उदगान्महतोऽर्णवाद्विभ्राजमानः सरिरस्य मध्यात्स मा वृषभो
लोहिताक्षः सूर्यो विपश्चिन्मनसा पुनातु । ब्रह्मणश्चोतन्यसि
ब्रह्मण आणी स्थो ब्रह्मण आवपनमसि धारितेयं पृथिवी ब्रह्मणा
धारितं मेनेन महदन्तरिक्षं दिवं दाधार पृथिवीꣳ सदेवां यदहं
वेद तदहं धारयाणि मामद्वेदो धिविस्रसत् । मेधामनीषे मा
विशताꣳ समीची भूतस्य भव्यस्यावरुध्यै सर्वमायुरयाणि सर्वमा-
युरयाणि । अभिर्गीर्भिर्यदतो न ऊनमाप्यायय हरिवो वर्धमानः ।
यदा स्तोतृभ्यो महि गोत्रा रुजासि भूयिष्ठभाजो अध ते स्याम ।

Digitized by Google

ब्रह्म प्राणादिष्म तन्नो माहासीत् । ओं शान्तिः शान्तिः शान्तिः ।
शन्नो वात इत्यादय एतावन्तो मन्त्राः उत्तरशान्तिरित्युच्यते ॥

२२ इदं महावीरादिसम्पादनं प्रवर्ग्यसम्भरणमित्युच्यते ॥

२३ यजमानो गार्हपत्यस्य पश्चादुपविश्य आज्यं पशवः पुरोडाशीया एते मे यज्ञार्थाः यावद्यज्ञे उपयोक्ष्यन्ते तावन्मे यज्ञार्थं शेषाद् ब्राह्मणा भुञ्जीरन् इह यक्ष्ये इति सङ्कल्प्य एदमगन्म देवयजनं पृथिव्या यदजुषन्त पूर्व ऋक्सामाभ्यां यजुषा सन्तरन्तो रायस्पोषेण समिषा मदेम इति मन्त्रेण । इतः पश्चादित उत्तरत इतः पुरस्तात् । इतो दक्षिणतः इति देवयजनमध्ये स्थित्वा प्रागादिदेवयजनभूमिं निश्चिनोति । अयं यज्ञभूमिनिश्चयो देवयजनाध्यवसाय उच्यते ॥

२४ अध्वर्युः वेद्युत्करयोर्मध्येन राजानं प्रपाद्य मध्यमे वंशे राजानं बध्वा पुनरग्नीन् विहृत्य परिस्तीर्य दक्षिणतो ब्रह्मयजमानावुपवेश्य स्रुचि चतुर्गृहीतं गृहीत्वा मनसा हुत्वा । महाहविर्होता । सत्यहविरध्वर्युः । अच्युतपाजा अग्नीत् । अच्युतमना उपवक्ता अनाधृष्यश्चाप्रतिधृष्यश्च यज्ञस्याभिगरौ । अयास्य उद्गाता । वाचस्पते हृद्विधेनामन् । विधेम ते नाम । विधेस्त्वमस्माकं नाम । वाचस्पतिः सोममपात् । मादेव्यस्तंतुश्छेदि मामनुष्यः । नमो दिवे । नमः पृथिव्यै स्वाहा । इति मन्त्रेण यजमाने ऽन्वारब्धे सत्याहवनीये जुहोति । यजमानो वाचस्पतये ब्रह्मण इदं न मम । इति त्यागं पठति । पुनर्विहृत्य कूष्माण्डैर्हुत्वोपस्थानं वरदानं च कृत्वा पुनर्विहृत्य चतुर्गृहीतं गृहीत्वा-पशुबन्धवद्यूपाहुतिं जुहोति । अपरं चतुर्गृहीतं गृहीत्वा-

ण्यस्थालीं समुवां बर्हिर्हिरण्यमुदपात्रमादायेत्यादिप्रकारेण सम न्त्रकेन पशुबन्धवदवतरणनिधानान्तं यूपाहरणं करोति। ततः पत्नीयजमानौ व्रतश्रयणागारे पर्युषितत्वादिदोषरहितं सर्पिर्मिश्रं पयोमिश्रं वा भक्षयतः। इदं भक्षणीयद्रव्यं व्रतमित्युच्यते॥

२५ अध्वर्युः वाससी क्षुरं द्वाविंशतिदर्भपिञ्जूलानि नवनीतमञ्जन-द्रव्यं सतूलां शरेषीकाञ्चादाय एहि यजमानेति यजमानमाह्व-यति। तीर्थदेशं गच्छति। एवं प्रतिप्रस्थाता ऽपरिमितानि दर्भपि-ञ्जूलान्यादाय पत्न्या सह तीर्थं गच्छति। अध्वर्युः आप उन्दन्तु जीवसे दीर्घायुत्वाय वर्चसे। इति प्राङ्मुखस्यासीनस्य यज-मानस्य दक्षिणं गोदानमद्भिः क्लेदयति। ओषधे त्रायस्वैनम्। इति एकदर्भपिञ्जूलस्यैकं भागं दक्षिणगोदाने ऊर्ध्वाग्रमनूक्ष्यति। स्वधिते मैनꣳ हिꣳसीः। इति पिञ्जूलस्योपरि तिर्यञ्चꣳ स्वधितिं निदधाति। देवश्रूरेतानि प्रवपे। इति दर्भपिञ्जूलं मध्ये वपति। यजमानः स्वस्त्युत्तराण्यशीय। इति उत्पान्तं प्रत्यभिमृशति। एवं वामगोदाने दर्भपिञ्जूलस्यार्धस्य वपनं कृत्वा। अध्वर्युर्नापिताय क्षुरं प्रयच्छन् नापितं प्रेष्यति। नापि-तोपकेशश्मश्रु मे निकृत्तनखं प्रब्रूतात्। अयं नापितप्रैष इत्युच्यते॥

२६ प्रतिप्रस्थाता पत्न्या दक्षिणसव्योपपक्षयोरपरिमितदर्भपिञ्जूल-वपनं करोति। ततो नापितोपप्रोपपक्षां मे निकृत्तनखां प्रब्रूतात्। अनेन प्रैषेण नापिताय क्षुरं प्रयच्छन् प्रेष्यति। अयं प्रतिप्रस्था-तृनापितप्रैष इत्युच्यते॥

२७ ततो नापितो यजमानस्य केशश्मश्रुवपनं नखनिकृन्तनं च कृत्वा

Digitized by Google

पत्न्या उपपक्षवपनं नखनिकृन्तनं च करोति । दक्षिणगोदान-च्छेदनादि एतदन्तं कर्म दीक्षाङ्गवपनमित्युच्यते ॥

२८ अध्वर्युः आपो अस्मान्मातरः शुन्धन्तु घृतेन नो घृतपुवः पुनन्तु । इति यजमानं स्नपयति । विश्वमस्मत्प्रवहन्तु रिप्रम् । इति अङ्गमूर्धानं सम्यक् प्रधाव्य प्रप्लावयति । यजमानः उदाभ्यः शुचिरापूत एमि । इति तीरं प्रत्येति । वस्त्रस्य प्रान्तभागेन आत्मानं प्रतिच्छाद्य तिरः पवित्रं पयस्वत्या पय आचामति ऐष्टिकवत् । सोमस्य तनूरसि तनुवं मे पाहि । इति प्रदक्षिणमहतं वासः परिधत्ते । प्रतिप्रस्थाता तूष्णीं पत्नीं स्नपयित्वा अहतं वासः परिधापयति । इमे दीक्षाङ्गस्नानपरिधाने उच्येते ॥

२९ यजमानः पाणिभ्यां नवनीतं सम्प्रप्लाव्य । महीनां पयोसि वर्चोधा असि वर्चो मयि धेहि । इति तेन मुखमभ्यङ्क्ते । तूष्णीमनुलोममङ्गानि । पृष्ठं यजमानस्याध्वर्युरभ्यङ्क्ते । पत्नी तूष्णीं स्वयमेवाभ्यङ्क्ते । इदं दीक्षाङ्गाभ्यञ्जनमुच्यते ॥

३० अध्वर्युः प्रत्यङ्मुख उपविश्य । वृत्रस्य कनीनिकासि चक्षुष्पा असि चक्षुर्मे पाहि । इति सव्येन पाणिना शरेषीकया यजमानस्य दक्षिणमक्ष्यनक्ति । द्विस्तूष्णीम् । एवं सव्यमक्ष्यनक्ति । पत्नी स्वयमेव तूष्णीमक्षिणी उक्तक्रमेणाङ्क्ते । इदं दीक्षाङ्गाञ्जनमुच्यते ॥

३१ चित्पतिस्त्वा पुनात्वच्छिद्रेण पवित्रेण वसोः सूर्यस्य रश्मिभिः । इति सप्तभिर्दर्भपिञ्जूलैर्यजमानस्य मुखं पवयति । वाक्पतिस्त्वा पुन० श्मिभिः । इति सप्तभिः पिञ्जूलैर्नाभिम् । देवस्त्वा सविता पुना० श्मिभिः । इति सप्तभिर्गुल्फौ । पिञ्जूलानि प्रोक्ष्योदग्दिशि

निरस्यति । तस्य ते पवित्रपते पवित्रेण यस्मै कम्पुनेतच्छकेयम् । इति मन्त्रं यजमानं वाचयति । एवं प्रतिप्रस्थाता पत्नीं तूष्णीमपरिमितैर्दर्भपिञ्जलैः पवयति । इदं दीक्षाङ्गपवनमुच्यते ॥

३२ अथाऽध्वर्युर्यजमानेनान्मनः सव्यं पाणिं ग्राहयित्वा । यद्वो देवा स आगुरे यज्ञियासो हवामहे । इति शालामानयति । इन्द्राग्नी द्यावापृथिवी आप ओषधीः । इति पूर्वया द्वारा शालां प्रवेशयति । तीर्थेन प्रवेश्याग्रेणाहवनीयं नीत्वा तस्य दक्षिणतः कुशेषु कृतनिरसनमुदङ्मुखमुपवेशयति । अयं दीक्षाङ्गशालाप्रवेश उच्यते ॥

३३ त्वं दीक्षाणामधिपतिरसि । इत्याहवनीयमीक्षयति । अध्वर्युयजमानौ इमं मन्त्रं पठतः । इह मा सन्तं पाहि । इत्युभौ स्वात्मानमीक्षेते । प्रतिप्रस्थाता पत्नीमपरया द्वारा प्रवेशयति । प्रैतु ब्रह्मणस्पत्नी वेदिं वर्णेन सीदतु । अथाहमनुकामिनी स्वे लोके विशा इह । गार्हपत्यस्योत्तरमार्गेण प्राचीमुदानयन्निमं मन्त्रं वाचयति । सा तीर्थेन प्रविश्यासने निरसनं कृत्वा । सुप्रजसस्त्वा वयꣳ सुपत्नीरुपसेदिम । अग्ने सपत्नदम्भनमदब्धासो अदाभ्यम् । इत्युपविशति । अयं पत्नीशालाप्रवेश उच्यते ॥

३४ अथ यजमानो गार्हपत्यस्य पश्चादुपविश्य दीक्षणीयेष्ट्या यक्ष्ये इति सङ्कल्पयति । दीक्षणीयेष्टिसम्बन्धि हविः । व्रीहिमयः । पुरोडाशो द्रव्यम् । पञ्च प्रयाजाः । अग्नीषोमावाज्यभागौ अग्नाविष्णू देवता । देवा आज्यपा इत्यादि प्रकृतिवत् । अध्वर्युरिडाशान्तिं देवा गातुविद इत्यृचं च गार्हपत्यस्योत्तरत उपविश्य जपति । ततोऽग्नीन् विहृत्यान्वाधानं कृत्वा आज्ये-

Digitized by Google

ष्टान्तां दीक्षणीयामिष्टिं सूर्यास्तात्प्रागेव समापयति । दीक्षणीये-ष्टिप्रभृतिष्विष्टिषु प्रतग्रहणं ब्रह्मवरणं पत्नीसन्नहनाद्यूनेतिरिक्तं धीयाते इत्यस्य वाचनान्तं ब्रह्मयजमानभागो चतुर्धा करणं अन्वाहार्यं फलीकरणं समिष्टयजुः प्रणीतास्थापनं विष्णुक्रमश्च न भवन्ति । ततस्त्वां चयोविश्यतिधेति इध्मसम्भरणमन्त्रे ऊहः । प्राकृतदेवतास्थाने अग्नाविष्णुभ्यामित्याद्यूहो यथास्थानं कर्तव्यः । प्रधानयागानुमन्त्रणमग्नाविष्णवोरहन्देवयज्यया वृत्रहा भूयासमिति । यावत्या वाचा कामयीत तावत्या दीक्षणीयाया-मनुब्रयान्मन्द्रं प्रायणीयायां मन्द्रतरमातिथ्यायामुपांशूपसत्सु इति बौधायनसूत्रात् यथेच्छस्वरो दीक्षणीयायां भवति । आज्येडा-न्ते उलूखले मुसले इत्यृचा दक्षिणाग्नौ प्रायश्चित्तहोमं कृत्वा प्राडेत्याध्वर्युरेव ध्रुवामाप्याययति । एतावत्कर्म दीक्षणीयेष्टिरि-त्युच्यते ॥

३५ ततोऽध्वर्युर्ध्रौवाज्यमाज्यस्थाल्यां प्रत्यवनीय तेनाज्येन स्रुवेण अन्वारब्धे यजमाने चतस्र आहुतीर्जुहोति । आकूत्यै प्रयुजेऽग्नये स्वाहा । मेधायै मनसेऽग्नये स्वाहा । दीक्षायै तपसेऽग्नये स्वाहा । सरस्वत्यै पूष्णेऽग्नये स्वाहा । एता आहुतयो दीक्षा-हुतय इत्युच्यते ॥

३६ स्वाहेत्यस्य स्थाने इदं न ममेति पाठेन यजमानस्य सर्वत्र त्यागः । ततः आपो देवीर्बृहतीर्विश्वशम्भुवो द्यावापृथिवी उर्वन्त-रिक्षं बृहस्पतिर्नो हविषा वृधातु स्वाहा । इति चतुर्गृहीतेन स्रुचा जुहोति । अद्भ्यो द्यावापृथिवीभ्यामन्तरिक्षाय बृहस्पतय-इदं०मेति यजमानस्य त्यागः । पुनश्चतुर्गृहीतेन स्रुचं पूरयित्वा ।

Digitized by Google

विश्वेदेवस्य नेतुर्मर्तो वृणीत सख्यम् । विश्वे राय इषुध्यसि द्युम्नं वृणीत पुष्यसे स्वाहा । इति जुहोति । यजमानः सविषद्दं० । ततस्तूष्णीमन्तर्वेदि प्रणीतां निनयति । ततः साङ्गकृष्णाजिनं कृष्णविषाणां वासो मेखलामौदुम्बरदण्डमुष्णीषं च अग्रेणाहव-नीयं पर्याहृत्य यजमानाय प्रयच्छति । प्रतिप्रस्थाता तथैव कुम्बं-कुरीरं वासो योक्त्रं च पत्न्यै प्रयच्छति । तद्यथा । अध्वर्युर्यज-मानायतने साङ्गं कृष्णाजिनं प्राचीनग्रीवमुत्तरलोमोपस्तृणाति । यजमानः । ऋक्सामयोः शिल्पे स्थस्ते वामारभेते मापातमस्य यज्ञस्येदृचः । इति आस्तीर्णस्य कृष्णाजिनस्य पश्चात्प्राङ्मुख उपविश्य कृष्णाजिनस्य श्वेतभागे दक्षिणाङ्गुष्ठो भवेत् कृष्णभागे तस्यैवाङ्गुलयो भवेयुस्तथा सम्मृशति । इमां धियꣳ शिक्षमाणस्य देवक्रतुं दक्षं वरुण सꣳशिशाधि । ययातिविश्वा दुरिता तरेम सुतर्माणमधिनावꣳ रुहेम । इति कृष्णाजिनस्योपरि दक्षिणं जान्वाच्याभिसर्पति । उपस्थं कृत्वोपविशति । इदं दीक्षोपवेश-नमुच्यते ॥

३७ ऊर्गस्याङ्गिरस्यूर्ण्णम्रदा ऊर्जं मे यच्छ । इति कटिप्रदेशे मौ-ञ्जीमेखलां प्रदक्षिणं पर्यस्यति । इति दीक्षाङ्गमेखलाबन्धन-मुच्यते ॥

३८ पाहि मा मा मा हिꣳसीः । इति निष्टर्क्यं ग्रन्थिं करोति । प्रति-प्रस्थाता । आशासाना सौ मनसमित्यृचा सन्नह्यामि पयसा घृतेन सन्त्वानह्याम्यप ओषधीभिः । सन्त्वा नह्यामि प्रजयाह-मद्य सा दीक्षिता सनवो वाजमस्मे । इत्यृचा च पत्नीं योक्त्रेण सन्नह्यति । इदं दीक्षाङ्गपत्नीसन्नहनमुच्यते ॥

३९ अध्वर्युः । विष्णोः शर्मासि शर्म यजमानस्य शर्म मे यच्छ । इति यजमानं वाससाप्रोर्णोति । नक्षत्राणामतीकाशात्पाहि । इति वसनस्यातीकाशेषु वाचयति । वस्त्रस्यान्तान् शिरस्येव सङ्क्षिपति । श्रिया ते शिरो वेष्टयामि श्रियै यशसे ब्रह्मवर्चसाय । इति दक्षिणमुष्णीषेण यजमानस्य शिरो वेष्टयति । इदमुष्णीषवेष्टनमित्युच्यते ॥

४० प्रतिप्रस्थाता कृष्णीपत्नीशिरसि कुम्बकुरीरमध्यूहति । इदं कुम्बकुरीराध्यूहनमुच्यते ।

४१ अध्वर्युः । इन्द्रस्य योनिरसि । इति यजमानाय त्रिवलिं पञ्चावलिं वा कृष्णविषाणां शाण्या रज्ज्वा बद्धां प्रयच्छति । यजमानः । मा मा हिꣳसीः । इति प्रतिगृह्य वसनप्रान्ते बद्ध्वा । कृष्यै त्वा सुसस्यायै । इति तयान्तर्वेदि विद्यमानं लोष्टमुद्धन्ति । कृष्णमृगशृङ्गं कृष्णविषाणेत्युच्यते ।

४२ सुपिप्पलाभ्यस्त्वौषधीभ्यः । इति तया दक्षिणं गोदानं कण्डूयते । प्रतिप्रस्थाता पत्न्या वसनस्यान्ते शङ्कुं बद्ध्वा । एतेन कण्डूस्वेति वदति । सूपस्था देवो वनस्पतिः । इति यजमानपरिमितं ऊर्द्ध्वाग्रं दण्डं यजमानाय ददाति । यजमानः । ऊर्द्ध्वो मा पाह्योदृचः । इति दण्डं प्रतिगृह्णाति । इदं दीक्षाङ्गदण्डग्रहणमुच्यते ॥

४३ अध्वर्युः । स्वाहा यज्ञं मनसा द्यावापृथिवीभ्याꣳ स्वाहोरोरन्तरिक्षात्स्वाहा यज्ञं वातादारभे । इति मन्त्रं यजमानं वाचयति । यजमानो मुष्टिं कृत्वा वाचं नियमयति नक्षत्रोदयपर्यन्तम् । अध्वर्युः आहवनीयसमीपे तिष्ठन् त्रिरुपांशु ब्रवीति अदीक्षिष्टा-

Digitized by Google

यं ब्राह्मणो नीलकण्ठशर्मा पाराशरगोत्रो ऽनन्तशर्मणः पुत्रो रामशर्मणः पौत्रो नृसिंहशर्मणो नप्ता तमिन्द्रायेन्द्राग्निभ्यां वसुभ्यो रुद्रेभ्य आदित्येभ्यो विश्वेभ्यो देवेभ्यो ब्राह्मणेभ्यः सोमपेभ्यश्च ब्रूमः । इति । ततः शालाया बहिर्निष्क्रम्य त्रिरुच्चैरेवमेव ब्रवीति । इदं दीक्षितत्वज्ञापनमुच्यते ॥

४४ दीक्षितोसि दीक्षितवादं वद सत्यमेव वद मा ऽनृतं मा स्मयिष्ठा मा कण्डूयथा मा ऽपावृथा यदि स्मयासे अपि गृह्यस्मयासे यदि कण्डूयासे कृष्णविषाणया कण्डूयासे यदि वाचं विसृजेर्वैष्णवीमृचमनुद्रवतान्मा त्वान्यत्र दीक्षितविमितात्सूर्योऽभ्युदियान्माभिनिर्मुक्तादानि देवतानामानि यथाख्यातं तान्याचक्षाथ यान्यदेवतानामानि यथाख्यातं तान्याचक्षाथ उपरिष्टाद्विचक्षणां धेहि चनसितवतीं विचक्षणवतीं वाचं वद कृष्णाजिनान्मा व्यच्छेत्था दण्डाच्च । इति यजमानं संशास्ति । इदं यजमानशासनमुच्यते ।

४५ यजमानः सर्वं तथा करोति । विश्वे देवा अभिमामावृत्रन्पूषा सन्यासोमो राधसा देवः सविता वसोर्वसुदावा । इत्यप्रत्याख्यायिनं दातारं प्रतिसनीहारान् प्रहिणोति ॥ सनिस्त्वप्रेषणाया- चनाभिषस्तिर्यो च नार्थनेति कोशव्याचनीयं द्रव्यं सनिरित्युच्यते ।

४६ रास्वेयत्सोमाभूयोभरमापृणन् पूर्त्या विराधिमाहमायुषा । इति धनमाहरन्तं सनीहारं दृष्ट्वा जपति । चन्द्रमसि मम भोगाय भव । इति आनीतं हिरण्यं रजतं वा प्रतिगृह्णाति । वस्त्रमसि मम भोगाय भव । इति वस्त्रम् । उस्राविसम० । इति गां हयोसि मम० । इत्यश्वम् । छागोसि मम०छागम् । मेषो ऽसि

मम० । इति मेषम् । प्राग्रापत्यमसि मम भोगाय भव । इत्यना-
दिष्टं सर्वमन्यत् । एतत्कर्म सनिपाचनमुच्यते ॥

४० अध्वर्युः आहवनीयस्योत्तरतस्तिष्ठन् । अग्नीन् ज्योतिष्मतः कुरुत
दीक्षित वाचं यच्छ पत्नि वाचं यच्छेति प्रेष्यति । ततः पूर्वद्वारेण
निष्क्रम्य गोश्चतुर्भ्यः स्तनेभ्यः पयो दोहयित्वा गार्हपत्यस्य
पश्चादुपविश्य उदीचोऽङ्गारान्निरुह्य तेषु तत्पयोऽधिश्रित्य दर्भो-
ल्मुकेनाभिद्योत्य तस्मिन् पयसि स्रुवेणापः प्रत्यानीय पुनरभि-
द्योत्य त्रिः पर्यग्निकृत्वा मोक्षणेनालोड्य श्रपयित्वोदगुद्वास्याङ्गा-
रान्प्रत्यूह्य उत्तरे शालाखण्डे शिक्ये स्थापयति । प्रतिप्रस्थाता
दक्षिणद्वारेण निष्क्रम्य पत्न्यर्थे व्रतं दोहयित्वा ऽध्वर्युवद्दक्षिणाग्नौ
श्रपयित्वा दक्षिणे शालाखण्डे शिक्ये निदधाति । एतत्पत्नीय-
जमानव्रतपयः साधनमुच्यते ॥

४८ यजमानः नक्षत्रोदये जाते सति दण्डकृष्णाजिने समादाय
पूर्वद्वारेण बहिर्निष्क्रम्य शालाया अग्रतस्तिष्ठन् भूर्भुवः सुवरिति
सकृदुपांशूक्त्वा व्रतं कृणुतेति त्रिरुच्चैर्वदति । (शेषमग्रे)

॥ खण्डनखण्डखाद्यम् ॥

(*Continued from page* 556 Vol VII.)

मू० "यथा च परिहृतचापल(१)मात्मतत्त्वामृतसरसि निमज्ज्य
रज्यति निरायासमेव मानसं तथाऽयमकथयं नैषधचरि-
तस्य परमपुरुषस्तुतौ सर्गः,—इत्येषा *b* दिक्(२) ।

(१) यथा च परिहृतचापलं मानसं निरायासमेव रज्यतीति सम्बन्धः ।
(२) इत्येषा दिक्, "अद्वैतसाधने",—इति शेषः ।

[c] (१)अभीष्टसिद्धा(२)वपि खण्डनाना-
मखण्डि राज्ञामिव नैवमाज्ञा ।
तत्तानि कस्मान्न यथाऽभिलाषं
सैद्धान्तिकेष्वप्यद्ध्वनि योजयध्वम् ॥ २७ ॥

तदे [d] तादृशीषु सर्वास्वपि दर्शनस्थितिषु काममस्माकीनाः खण्डनयुक्तयः प्रगल्भन्ते, [e] यासामीश्वरपरवशां विश्वव्यवस्थामनास्थाय निरसनमशक्यं [f] तासामेवावतारणार्थमयं प्रावादुकप्रवादोपन्यासः । [g] तथाहि—यदि शून्यवादानिर्वचनीयपक्षयोराश्रयणं, तदा तावदमूषां निराबाधैव सार्वपथीनता ।

टी० ॥ ननु चेतसो वृतिव्यावृतिरेवाशक्या, भोगस्पृहाया नित्यं जागरूकत्वादित्यत आह—। [a] "यथा चे"ति ॥ [b] "दिगि"ति । अनेन पातञ्जलाद्युक्तयोगाद्युपायं सूचयति ॥

नन्वेवं मुमुक्षुमात्रोपासनीयता ग्रन्थस्य स्यात्, तथाच "लोकेषु दिग्विजयकौतुकमातनुध्वमि"त्युपक्रमविरोध इत्याशङ्क्य तदपि फलमन्वाचिनोति—। [c] "अभीष्टे"ति । नित्यानित्यविचारेपि खण्डनयुक्तीरवताय्य विजयादिकं फलमासादनीयमित्यर्थः ॥ [d] "एतादृशीष्वपी"ति । रक्षणीयसिद्धान्तास्वपीत्यर्थः ॥ प्रागल्भ्यमेवाह—। [e] "यासामि"ति । 'इदमित्थमेवे'ति यदीश्वरः कश्चिदाज्ञामात्रेण विश्वं व्यवस्थापयति तदा परममूषां निरसनं नान्यथेत्यर्थः । यद्वा, ईश्वरः=ब्रह्म, तत्परवशामिति । यावद् "ब्रह्मैवेदं

(१) { वादजल्पवितण्डासु कथासु त्रिविधास्वपि ।
प्रचारः खण्डनोक्तानां युक्तीनामत्र कथ्यते ॥ १३ ॥ }

(२) अभीष्टसिद्धावपि खण्डनानामाज्ञा राज्ञामाज्ञेव मया नाखण्डि, तत् (=तस्मात्कारणात्) तानि (=खण्डनानि) सैद्धान्तिकेष्वप्यद्ध्वनि (=तत्तत्सिद्धान्तावलम्बिनैयायिकादिमतेपि) यथाभिलाषं कस्मान्न योजयध्वमिति सम्बन्धः ।

सर्वमि"ति विश्वं न व्यवस्थाप्यते तावत्तामूषां निरास इत्यर्थः ॥ [f] "तासामि"ति। खण्डनयुक्तीनामवतारणार्थम्=अवतारस्थल(१)ज्ञापनार्थम्, अयम्=अर्वाचीनः, प्रावादुकानां=माध्यमिकादीनां, प्रवादस्य=दर्शनस्योपन्यास इत्यर्थः ॥ विशेषदर्शनोपन्यासमेवाह—। [g] "तथाही"ति । दर्शनानि=शून्यत्वाऽनिर्वचनीयत्वादीनि ॥

मू० [a] यदि तु प्रमाणादिसत्ताभ्युपगन्तृमतावलम्बनं, तदापि लक्षणखण्डनयुक्तीनां लक्षणविशेष(२)खण्डने, [b] लक्ष्यखण्डनयुक्तीनां च तद्विषयप्रमाणादिविशेषखण्डने, [c] प्रत्येकं तात्पर्यम् । *[d] नच सौत्रादिलक्षणखण्डनेऽपसिद्धान्तापत्तिः*, [e] तादृश्याः सूत्रादिव्याख्यायाः खण्ड्यमानत्वात् । *[f] नच वाच्यं लक्षणविशेष-वस्तुव्यवस्थापकप्रमाणविशेष-सूत्रादिव्याख्याविशेष-खण्डनपरत्वेन लक्षणान्तरं, प्रमाणान्तरं, व्याख्यान्तरं च, वाच्यं प्रसज्येत भवतोपीति*, [g] वितण्डाकथामालम्ब्य खण्डनानां वक्तव्यत्वात्, तत्र च व्यावृत्य स्वपक्षनिर्वाहं प्रति पर्य्यनुयोगानवकाशात् ।

टी० ॥ नन्वनिर्वचनीयत्वादौ खण्डनयुक्त्यवतारेऽपि सैद्धान्तिकाध्वयोजनं न ज्ञातमत आह—। [a] "यदि त्वि"ति। प्रमाणादिसत्ताभ्युपगन्तारः—सिद्धान्तिनस्तेषामपि परस्परं कथायां लक्षणविशेषखण्डनार्थमवतारः संभवत्येवामूषामित्यर्थः ॥ नन्वत्र न लक्षणमात्रखण्डने युक्तयः सन्ति, किंतु लक्ष्याण्यपि प्रमाणादीनि खण्डितान्येव, तथाच तद्युक्तीनां सिद्धान्तिभिरवतारणेऽपसिद्धान्तापत्तिरित्यत आह—। [b] "लक्ष्ये"ति । येन प्रमाणेनैकस्तल्लक्ष्यं व्यवस्थापयति तत्खण्डनमेव लक्ष्यखण्डनं, नतु लक्ष्यस्य प्रमाणान्त-

(१) अवतारस्थलत्वं च खण्डनयुक्तिप्रतिपादकत्वेन, न तु खण्डनयुक्तिभिः खण्डनीयत्वेनेति बोध्यम् ।

(२) लक्षणविशेषप्रमाणविषयादिकं पराभिमतलक्षणप्रमाणादिकम् ।

रेणा(¹)पि सिद्धिरनपेक्षिता येनापसिद्धान्तः स्यादित्यर्थः ॥ [c] "प्रत्येकमि"ति । कथकयोः प्रत्येकमित्यर्थः ॥ ननु लक्षणविशेषोऽपि सोऽत्र एव, तथाच तन्मानुमतानुसारिणा तत्खण्डने कथं नापसिद्धान्त इत्यत आह—। [d] "नचेति" ॥ [e] "तादृश्या" इति । यादृश्याः प्रकृते खण्डनीयं लक्षणं पर्य्यवस्यतीत्यर्थः ॥ [f] "नचे"ति । लक्षणसामान्यस्य, लक्ष्यस्वरूपस्य, सूत्रव्याख्यायाश्च, तन्मतानुसारिभिरवश्यं रक्षणीयत्वादिति भावः(²) ॥ [g] "वितण्डेति । वितण्डायाः प्रतिपक्ष(³)स्थापनाहीनत्वेन खण्डनानन्तरं तत्र लक्षणादीनां व्यवस्थापनीयत्वाभावादित्यर्थः ॥

मू० [a] एवं च सति वादिदर्शनमाश्रित्यापि खण्डनप्रयोगो निर्बाध एव, एकदेशिवत् प्रत्यवस्थातुं शक्यत्वात् । [b] वैयाक(⁴)रणानामिव च शब्दसिद्धिप्रश्नस्य परकीयतत्त्वज्ञाननिरूपणार्थं समानपक्षस्थित्यापि पर्यनुयोगस्यांव्यवहारिकतायाः संभवात्, [c] वस्तुस्थितिं कुर्वाणेन च विचारकेणाऽवश्यमेता युक्तय उद्धरणीयाः(⁵), अन्यथा वस्तुस्थितेरशक्यत्वादिति [d] वादेऽपि प्रयोगः संभवत्येव खण्डनयुक्तीनाम् । [e] जल्पस्त्वेका कथा न संभवत्येवा[f]ऽसामयिकी(⁶), वितण्डाद्वयशरीरत्वात् ।

---

(१) प्रमाणान्तरेण=स्वाभिमतप्रमाणेन ।

(२) 'लक्षणान्तरादिकं वाच्यं प्रसज्येत भवतोपी'तिवादिनः पूर्वपक्षिणो भाव इत्यर्थः ।

(३) प्रतिपक्षः=वैतण्डिकस्य स्वपक्षः ।

(४) यथा गवादिशब्दानां सिद्धत्वसंप्रतिपत्तावपि परकीयज्ञानपरीक्षार्थं तत्साधनप्रकारनिराकरणार्थं च 'कथमयं गोशब्दः सिद्धः'?–इति प्रश्नो दृष्टस्तथा साध्यार्थसंप्रतिपत्तावपि तत्साधनविशेषनिराकरणार्थं परकीयतत्त्वज्ञानपरीक्षार्थं च वेदासंव्यवहारसिद्धतायाः सम्भवादिति समयपक्षत्यर्थः ।

(५) युक्तीनामुद्धारश्च खण्डनयुक्तिभिरेवेति वादेऽपि खण्डनयुक्तीनां प्रवेश इति भावः । [कोऽत्यर्थः ।

(६) समयः=स्वसङ्केत,तत्सिद्धा सामयिकी, तद्भिन्ना असामयिकी, अपारिभाषि-

टी० ॥ दर्शनभेदेन समानतन्त्रत्वयोर्वादिनोः खण्डनावसरमभिधाय दर्शनाभेदेनापि तदवतारमाह—। [a] "एवं चे"ति । स्वपक्षनिर्वाहं प्रति पर्यनुयोगानवकाशे सतीत्यर्थः ॥ अभिन्नदर्शनयोः कथायां दृष्टान्तमाह—। [b] "वैयाकरणानामिवे"ति ॥ ननु तत्रतत्रावतरन्तु नाम खण्डनयुक्तयः, स्थापनावादिना तु तासामुपेक्षैवोचिता, तथाच किमनेनावतारेणेत्यत आह—। [c] "वस्तुस्थितिमि"ति ॥ वादे संभवमाह—। [d] "वादेपी"ति । वस्तुस्थितिमित्यत एकैवेयं फक्किका(१) ॥ ननु जल्पे स्वस्वपक्षस्थापनाया आवश्यकत्वात् कथममूषां स्वपक्षव्याघातपराहतानामवतार इत्यत आह—। [e] "जल्पस्त्वि"ति । एकेन स्थापनायां कृतायामन्येन तद्दूषणाभिधानमित्येका वितण्डा, द्वितीयेन स्थापनायां कृतायां प्रथमेन दूषणाभिधानमित्यपरा वितण्डा, ताभ्यां वितण्डाभ्यां चैको जल्पः संपद्यते, इति तत्रा(२)भिधानमात्रमित्यर्थः ॥ ननु स्वपक्षस्थापनाऽपरपक्षदूषणसामर्थ्ये यत्र(३)द्वयोरपि निरूप्यं तत्र तथा जल्पः संभवत्येवेत्यत आह—। [f] "असामयिकी"ति । समयाधीनतया कथाप्रवृत्तौ खण्डनानवतारेपि न क्षतिः, प्रमाणसिद्धकथाप्रभेदे खण्डनप्रागल्भ्यस्यापेक्षितत्वादिति भावः ॥

मू० [a] अन्यथा जल्पद्वयेनापि किमित्येका कथा न कल्प्यते,
[b] अवोचाम(४) च जल्पविचारप्रस्तावे विस्तरेणैतदिति,

---

(१) "वस्तुस्थितिमि"त्यत आरभ्य "खण्डनयुक्तीनामि"त्यन्तमेकैव फक्किकेत्यर्थः; एवं च सति व्याख्याकारस्य "वादे सम्भवमाह"—इत्यवतरणग्रन्थानन्तरं "वस्तुस्थितिमिति"—इति प्रतीकधारणं युक्तं न तु "वादेपीति",—इत्यनुमन्ये। अत एव च प्रगल्भमिश्रेण चोदर्पणे "वादेपि खण्डनयुक्तिसम्भवमाह—वस्तुस्थितिमिति"—इत्येवोक्तम् ।

(२) तत्र=जल्पे, अभिधानमात्रं=पृथक्कथात्वमभिधानमात्रमेव, न तु पृथक्कथात्वमित्यर्थः । यद्वा वादवितण्डयोः खण्डनयुक्तीनामवतारे प्रतिपादिते तत्समुदायरूपजल्पे पुनः पृथक्प्रतिपादनमभिधानमात्रं,—वृथा प्रलापमात्रमेवेत्यर्थः ।

(३) यत्र=यस्मिन्काले, नतु यस्यां कथायामित्यर्थः; जल्पे जल्पाऽसम्भवेन "तत्र तथा जल्पः सम्भवती"त्युक्त्यनुपपत्तेः ।

(४) ननु वादस्यापि वितण्डाद्वयशरीरत्वेनाभावप्रसङ्ग इत्याशङ्क्याह—अवोचामेति,"वादस्य फलभेदेन वितण्डातो भेदो,न जल्पस्य; तदभावादि"त्यादिकमवोचामेत्यर्थः ।

‘जल्पकथयापि चाभिधाने स्वपक्षे(१)व्यावर्त्त्य सदोषस्यापि प्रमाणतयाभिधानं कृत्वा तद्दोषोद्भावनकारी कामपि खण्डनयुक्तिमवतार्य्य बाधनीय इति जल्पेपि नात्यन्तमनवकाशाः खण्डनयुक्तयः ।

---

† कीदृश्यः पुनस्ताः ? । उच्यन्ते । तथाहि–लक्षणाधीना तावल्लक्ष्यव्यवस्थिति[d] र्लक्षणानि चाऽनुपपन्नानि, ज्ञाताधिकरणादिलक्षणनिरूपणद्वारेण(२) चक्रकाद्यापत्तेः ।

टी० ॥ ननु जल्पः कथं तृतीयकथा समयमन्तरेणैव न संभवतीत्यत आह–। [a] “अन्यथे”ति । स्वपक्षद्वयस्थापनपरपक्षद्वयखण्डनशक्तिनिरूपणाऽर्थं जल्पद्वयेन कथान्तरसंभवादित्यर्थः ॥ [b] “अत्रोचामे”ति । ईश्वराभिसन्धाविति शेषः ॥ ननु दशरथदशाननतनययुद्धवत्काकोलूकयुद्धवच्च कृतवि-

---

(१) स्वपक्षे सदोषस्यापि प्रमाणस्य सदोषाद्व्यावर्त्य=पृथक्कृत्य निर्दुष्टप्रमाणतयाऽभिधानं कृत्वा पुनस्तत्र दोषोद्भावनकारी पुरुषो यां काञ्चिद्युक्तिमवतार्य्य बाधनीय इत्यर्थः; “स्वपक्षे व्यावृत्य”–इतिपाठे तु जल्पकः पुरुषः स्वयं स्वपक्षे व्यावृत्येत्यर्थः । न तु तत्र पक्षव्यावृत्तिर्ग्राह्या ।

† {
नियमाल्लक्षणाधीना भवेल्लक्ष्यव्यवस्थितिः ।
प्राहुर्यं ताञ्चिराचष्टे लक्षणस्यानिरुक्तितः ॥ ११ ॥
प्रमाया लक्षणस्यादौ निरुक्तिस्तत्र खण्ड्यते ।
अतिव्याप्त्यादिदोषोत्था प्रमामात्रानुवर्तिनी ॥ १२ ॥
}

(२) “ज्ञानाधिकरणादिलक्षणनिरूपणद्वारेण”–इति तु खण्डनभूषामणिकृद्रघुनाथविद्यासागरादिसंमतः पाठः । तदर्थस्तु किं ज्ञानम् ?–इतिप्रश्ने ज्ञानत्वयोगीति निर्वाच्यम्, पुनः किं ज्ञानत्वम् ?–इत्यनुयोगे, सुखाद्यवृत्तिरात्मविशेषगुणावृत्तिर्जातिरिति निर्वाच्यं, जातिरेव का ? इत्यनुयोगे च अनुवृत्तिज्ञानासाधारणं कारणमित्यभिधानीयमिति ज्ञानसिद्धौ जातिसिद्धिस्तत्सिद्धौ च तद्विशेषभूतज्ञानत्वस्य सिद्धिस्तत्सिद्धौ च ज्ञानसिद्धिरिति चक्रकम्; आदिशब्दात्तथैव ज्ञानसिद्धौ ज्ञानत्वसिद्धिस्तत्सिद्धौ च ज्ञानसिद्धिरित्यन्योन्याश्रयः; ज्ञानसिद्धौ ज्ञानसिद्धिरित्यात्माश्रयश्चेति; तथा लक्षणानि लक्ष्याधिकरणानि वाच्यानि ततश्च किमधिकरणमिति प्रश्ने इहप्रत्ययविषय इति कथनीयं, कः प्रत्ययः ?–इत्यनुयोगे च प्रत्ययत्वयोगीति वाच्यम्, किं प्रत्ययत्वमित्यनुयोगे च सुखाद्यवृत्तिरात्मविशेषगुणवृत्तिजातिविशेष इत्युत्तरं, क आत्मा ?–इतिजिज्ञासायामात्मत्वाधिकरणं, पुनरधिकरणमिहप्रत्ययविषय इति चक्रकं; पूर्ववदेवान्योन्याश्रयात्माश्रयौ चेत्यादिः ।

Digitized by Google

कृतकुमारद्वययुद्धमनुभवसिद्धमेव,(१) तथैव स्वपक्षरक्षणपरपक्षखण्डनफलकं कथान्तरं जल्पः किं न स्यादत(२)आह—। c "जल्पकथयापी"ति । परपक्षदूषणाभिधानानन्तरं स्वपक्षे सद्धेतोरपरिस्फूर्तौ सदोषमपि प्रमाणमुपन्यस्य तद्दोषनिरासाय खण्डनावतारसम्भवात्, पुनः स्वपक्षस्थापनाव्यावृत्तेरभावादिति भावः ॥ तत्रादौ लक्षणसामान्यखण्डनयुक्तिमवतारयति—। d "लक्षणानि चे"ति । लक्षणेन हि गन्धवत्त्वादिना ज्ञाते लक्ष्ये पृथिवीस्वरूपेऽधिकरणे प्रतिबन्ध(३)बलेन व्यवहाररूपमितरभेदरूपं वा साध्यं साधनीयं तत्र लक्षणज्ञानमन्यलक्ष्यसाधारण्येन भवदप्यकिञ्चित्करमिति व्यावृत्ततया तज्ज्ञानमुपेयं, तद्यदि लक्षणव्यावृत्तिर्लक्ष्याधीना, तदाऽन्योन्याश्रयः; लक्ष्यपरतन्त्रलक्षणान्तराधीनत्वे चक्रकं; लक्षणे लक्षणान्तरं तत्रापि लक्षणान्तरमित्यपरावृत्तावनवस्था; एवं भवदप्यकिञ्चित्करमिति । एवं जलादिसाधारण्येन ज्ञातायां पृथिव्यामितरभेदसाधनमकिञ्चित्करमिति व्यावृत्तायां तस्यां तत्साधनं वाच्यं, तद्व्यावृत्तिर्यदि प्रकृतलक्षणाधीना, तदाऽन्योन्याश्रयः; लक्षणान्तरेण चेत्तदा प्रकृतलक्षणानुपयोगः; तदपि लक्षणं व्यावृत्तायामेव तस्यामित्यधोऽधो धावन्त्यनवस्था । एवं प्रतिबन्ध(४)ज्ञानसाध्यज्ञानादावप्यूह्यम् । * ननु सर्वलक्षणखण्डनकृतः किमभिप्रेतं? किं लक्षणसाध्यस्यार्थस्य व्यवहार एव नास्ति, सन्नपि वा निर्हेतुकः, सहेतुको वा लक्षणातिरिक्तहेतुकः, सर्वलोकसिद्धे लक्ष्यव्यवहारे लक्षणानुपयोगो वा, लक्ष्यलक्षणव्यवहाराणामनिर्वचनीयत्वं वेति तत्सर्वमनुपपन्नमनुभवविरोधात् * ?—इति चेन्न, वादिनोर्लक्ष्यलक्षणव्यवस्थाभिधाननिवर्तनस्याभिप्रेतत्वात् ॥

(१) कृता=उपार्जिता पर्य्याप्ता वा विद्या यस्य क्षत्रकुमारद्वयस्य तस्य च युद्धमनुभवसिद्धं यथा तथेत्यर्थः ।

(२) अतो जल्पस्य वितण्डातो भेदमङ्गीकृत्याहेत्यर्थः ।

(३) प्रतिबन्धः=व्याप्तिः ।

(४) प्रतिबन्धः=व्याप्तिः । तत्सत्त्व एवानुमित्युत्पादाद्व्याप्त्यनुमित्योरपि परस्परं व्याप्तिरेष्टव्या; एवं तस्या अप्यन्या, तस्या अप्यन्येत्यनवस्था; तथा साध्यस्येतरभेदादेरप्यनुमितेः प्राक् ज्ञानं न तावत्पक्षभिन्ने वक्तव्यं, केवलव्यतिरेकित्वभङ्गप्रसङ्गात्, किन्तु पक्षे पक्षैकदेशे एव वा वक्तव्यम्, तदपि पक्षे पक्षैकदेशे वा साध्यान्तरज्ञानपूर्वकमेवं तत्तदपीत्यनवस्थेत्यूह्यमित्यर्थः ।

Digitized by Google

खू० तेषु तावत् [a] 'तत्त्वानुभूतिः प्रमा'—इत्यप्ययुक्तं, तत्त्वशब्दार्थस्य निर्वक्तुमशक्यत्वात्। तस्य भावो हि तत्त्वमुच्यते, [b] प्रकृतं च तच्छब्दार्थः, नचा [c] च प्रकृतं किञ्चिदस्ति यत्तच्छब्देन परामृश्यते। [d] अथ * अनुभूत्या स्वसंबन्धिविषय आचेयाद्बुद्धिस्थः कार्यते, स तच्छब्देन परामृश्यते, वक्तृश्रोतृबुद्धिस्थतायामेव प्रकरणपदार्थविश्रामात्; तेन यस्यार्थस्य यो भावस्तत्तस्य तत्त्वमुच्यते—इति *, न, [e] अरजतादेरपि रजताद्यात्मनाऽनुभूतिविषयतासंभवादसत्यानुभूत्यव्यवच्छेदात्।

टी० ॥ न्यायाचार्य(१)कृतलक्षणमालायन्थे प्राथमिकं प्रमालक्षणं खण्डयितुमुपक्रमते—। [a] "तत्त्वानुभूतिरि"ति। प्रमाव्यवस्थितौ सर्वपदार्थव्यवस्थितिरिति तल्लक्षणप्राथम्यं न्यायाचार्यस्य; प्रमालक्षणाव्यवस्थितौ सर्वपदार्थाऽव्यवस्थितिरिति तत्खण्डनप्राथम्यं खण्डनकृतः ॥ [b] "प्रकृतमि"ति। पूर्वोपक्रान्तमित्यर्थः॥ [c] "अत्रे"ति। आचार्यग्रन्थे प्रमालक्षणस्यैवादावभिधानमित्यर्थः ॥ अनुभवस्य सविषयत्वनियमादनुभवपदेन विषयाक्षेपे अनुभवविषयगतधर्मानुभूतिः प्रमेति सिद्ध्यतीत्याशङ्कते—। [d] "अथे"ति ॥ भ्रमेऽतिव्याप्त्या प्रत्याचष्टे—। [e] "अरजतादेरि"ति ॥

खू० [a] भवितु(२)रतत्त्वशब्दार्थत्वप्रसङ्गेन धर्म्यंशे विशिष्टे च प्रमाया अप्रमात्वापातात्। [b] अथोच्यते—* अवयवार्थचिन्तया दूषणाभिधानमिदं त्यज्यतां, यतोऽयं तत्त्वशब्दः

(१) न्यायाचार्यः=शिवादित्यमिश्रः।

(२) भवितुः=भावस्य घटत्वपटत्वादेराश्रयस्य धर्मिणः, उपलक्षणं चैतद्विशिष्टस्यापि, तथाच धर्मिणो विशिष्टस्य चातत्त्वशब्दार्थत्वेन तत्प्रमायामव्याप्तिः।

Digitized by Google

स्वरूपमात्रवचनः*,—इति,एतदप्ययुक्तम्, c स्वरूपत्वस्य(१) जातेरुपाधेर्वा स्वात्मनि वृत्त्यवृत्तिभ्यामनुपपत्तेः । स्वरूपशब्दार्थस्यैकस्यासंभवेन प्रतिविषयव्यावृत्त्या लक्षणस्याऽव्यापकत्वापातात् । कथं च "तत्त्वे"तिविपर्यासादेर्निरासः? । तथाहि—शुक्तौ यो रजतत्वप्रत्ययः सोऽपि स्वरूपबुद्धिर्भवत्येव; नहि धर्मी(२) वा रजतत्वं वा न स्वरूपं, नापि तयोः प्रतिभासमानः संबन्धो न स्वरूपमिति युक्तम् । समवायो हि तयोः संबन्धः प्रतिभाति, स च स्वरूपमेव ।

टी० ॥ धर्मांशानुभूतेः प्रमात्वेऽपि धर्म्यंशविशिष्टांशप्रमानुपपत्तिमाह—। a "भवितुरि"ति । भविता=धर्मी ॥ ननु तत्त्वपदं स्वरूपे रूढं, तथाच धर्मधर्मितद्वृत्तां(३) सर्वेषां स्वरूपतया तत्त्वपदवाच्यतया नाव्याप्तिरित्याशङ्कते—। b "अथे"ति ॥ स्वरूपत्वस्य स्वात्मनि वृत्त्यभ्युपगमे आत्माश्रयः, अनभ्युपगमे च तत्प्रमानुपपत्तिरिति प्रत्याचष्टे—। c "स्वरूपत्वस्ये"ति । यद्यपि स्वरूपत्वं,=प्रमेयत्वं, तच्च केवलान्वयित्वात् स्ववृत्त्यपि, नचात्माश्रयः, प्रमाणतस्तथा प्रतीतेः; तदुक्तं "प्रमाणं शरणं वृत्तौ न भिन्नाभिन्नते यत(४)"—इति; तथापि "स्वरूपं प्रमेयमि"ति सहप्रयोगाच्च तत्प्रमेयत्वं(५),

(१) स्वरूपत्वधर्माश्रयो हि स्वरूपं, तथा च स्वरूपत्वे स्वरूपत्वसत्त्वाऽसत्त्वाभ्यामात्माश्रयतत्प्रमाऽनुपपत्त्योः प्रसङ्गेन लक्षणानुपपत्तिरेवेत्यर्थः ।

(२) धर्मी=शुक्तिः ।

(३) प्रतियोगिताऽनुयोगिताऽन्यतरनिरूपकत्वसम्बन्धेन धर्मधर्म्युभयवत्ता तदुभयसम्बन्धस्य ज्ञेया, तथा च धर्मधर्मितत्सम्बन्धानामित्यर्थो निष्कर्षः ।

(४) यतो भिन्नाभिन्नते=भिन्नत्वाऽभिन्नत्वे, वस्तुनो वृत्तौ=वर्तने, शरणं=नियामके, न, तस्मात्प्रमाणमेव वृत्तौ शरणमित्यर्थः । प्रमाणबलात्स्वस्मिन्नपि स्वभिन्नेऽपि च स्ववृत्तिताङ्गीकर्तव्यैवेति भावः ।

(५) तत्=तस्य स्वरूपस्य, (स्वरूपनिष्ठमिति यावत्) प्रमेयत्वं नेत्यर्थः । यद्वा-स्वरूपत्वं प्रमेयत्वं तदा स्यादपि स्वरूपं प्रमेयं स्यात्सहप्रयोगदर्शनाच्च न स्वरूपं प्रमेयमत एव च न तत्=स्वरूपत्वं प्रमेयत्वमपीत्यर्थः । स्वरूपत्वस्य प्रमेयत्वे तु स्वरूपानुभूतिः प्रमेतिलक्षणस्य प्रमाविषयानुभूतिः प्रमेत्यर्थपर्यवसाने आत्माश्रय एवेत्यर्थः ।

Digitized by Google

तत्त्वे वा प्रमाविषयानुभूतिः प्रमेतिपर्यवसाने पुनरात्माश्रयः, आकाशा-(१)त्यन्ताभाववत्त्वं च न प्रमेयत्वं, तदविदुषोपि तत्प्रत्ययात्; नवाऽभिधेयत्वं तत्त्वं, भ्रमेतिव्याप्तेः; नच वस्तुत्वमेव तथा, तस्याऽर्थक्रियाकारित्वादिलक्षणस्यापि प्रत्याख्येयत्वात्; नच सत्तायोगित्वमेव स्वरूपत्वम्, अभावप्रमानुपग्रहप्रसङ्गादिति भावः ॥

मू० [a] * सत्यं, समवायः स्वरूपं, स एव तु शुक्तिव्यक्तौ रजतत्वस्य नास्ति? *,—इति चेत् [b] मैवम्, नच नास्तित्वेऽपि स्वरूपताया अव्याहतेः। नहि गेहे देवदत्तो नास्तीति स्वरूपं न स्यात्। * [c] न स्वरूपमात्रं तत्त्वमुच्यते, किंतु-यद्देशकालसंबन्धि यत् स्वरूपं प्रतीतं तस्य तद्देशकालसंबन्धि स्वरूपं तत्त्वमुच्यते? *,—इति मैवम्, [d] देशकालसंबन्धांशे प्रमाया अप्रमात्वापातात्। * तयोः स्वरूपमेव(२) तत्त्वशब्दार्थः? *,—इति चेन्न, तत्त्वपदस्या[e]नेकार्थत्वेन लक्षणाव्यापकतापत्तेः। [f] अथैवं ब्रूषे—* [g] यद्यथाभूतं प्रतीयते तत्तथा परमार्थतो व्यवस्थितं तत्त्वमुच्यते*?। नैतदपि युक्तम्, यद्यथाभूतं प्रतीयते तद्यदि प्रतीतिसमयमपहाय कालान्तरे तथाभूतं स्यात्तदाप्येवं तत्त्वं स्यादेवेति भाविपाकजरागः कुम्भः श्यामतादशायामपि रक्तपित्तिना रक्ततयोपलभ्यमानस्तत्त्वं स्यादिति तद्बुद्धेः प्रमात्वापातः।

(१) ननु स्वरूपत्वं प्रमेयत्वमेव, तच्च न प्रमाविषयत्वरूपं, किन्तु समनियतत्वादाकाशात्यन्ताभावो वा, ऽभिधेयत्वं वा, वस्तुत्वं वा, सत्तायोगित्वं वा, तत्स्वीकरिष्यते; इति नात्माश्रयो नापि च सहप्रयोगानुपपत्तिः, "प्राप्ते वसन्तसमये काकः काकः पिकः पिकः"-इतिवद्, घटादिशब्दार्थमजानतः शब्दान्तरेण घटः कलश इतिवद्वा तदुपपत्तेरितिविचिकित्सायामाह—आकाशेति। तदविदुषः=आकाशात्यन्ताभावमविदुषः, तत्प्रत्ययात्=स्वरूपत्वाभिन्नप्रमेयत्वप्रत्ययात्।

(२) एवकारेण देशकालसम्बन्धव्यावृत्तिः,—शुद्धं स्वरूपमित्यर्थः।

[h]"यदा तदे"ति विशेषणप्रक्षेपणे च कालविशिष्टताप्रतीते-रप्रमात्वापातः । नहि कालवैशिष्ट्येऽपि कालान्तरसंबन्धः संभवी ।

टी० ॥ ननु शुक्तौ रजतत्वसमवायो न स्वरूपं, तत्राऽविद्यमानत्वादिति शङ्कते—। [a]"सत्यमि"ति ॥ स्वरूपत्वे च तत्र विद्यमानत्वमतन्त्रमित्याह—। [b]"मैवमि"ति ॥ ज्ञानोल्लिखितदेशकालसंबद्धं स्वरूपमिह तत्त्वपदार्थ इति न भ्रमेऽतिव्याप्तिरित्याह—। [c]"न स्वरूपमात्रमि"ति ॥ देशकालयोर्देशकालसंबन्धाभावात् तदंशप्रमानुपग्रहमाह—। [d]"देशे"ति ॥ [e]"अनेकार्थत्वेने"ति । देशस्वरूपं, कालस्वरूपं, देशकालसंबद्धं च स्वरूपं, प्रत्येकं तत्त्वमिति लक्षणाऽननुगमो दोष इत्यर्थः ॥ ज्ञानोल्लिखितप्रकारवत्त्वं विषयस्य तत्त्वमित्याशङ्कते—। [f]"अथे"ति ॥ भाविरक्तरूपस्य घटस्य पूर्वं दोषवशाद् यत्र रक्ततया ज्ञानं तदपि तथा सति प्रमा स्यादित्याह—। [g]"यद्यथाभूतमि"ति ॥ ज्ञानकाले ज्ञानोल्लिखितप्रकारवत्त्वं तत्त्वमित्याशङ्क्याह—। [h]"यदे"ति । काले कालवैशिष्ट्याभावेन तदंशप्रमाऽनुपग्रहापत्तिरिति भावः । यद्यपि पाकरागात् पूर्वं 'घटो रक्त'इति प्रतीतिः प्रमैव, विषयाऽबाधात्; *तत्काले तद्बाध एव*—इति चेन्न, 'इदानीं रक्तः' इत्यप्रतीतेः; तथापि प्रवृत्त्यनुरोधादनुमितौ वर्तमानकालभानावश्यकत्वेनाऽन्यत्रापि तत्कालभानमावश्यकम् । किञ्च,'अयं रक्तः'—इति प्रतीतिः स्वविषयवर्तमानत्वविषया, अतीतानागताऽविषयत्वे सति प्रतीतित्वात्, 'घटोऽस्ती'ति प्रतीतिवदित्यनुमानाच्च 'रक्तो घटः'—इत्यादौ वर्तमानकालभानमावश्यकमित्यतिव्याप्तिरेवेति भावः ॥

मू० * [a]अन्योपाध्यवच्छिन्नः सोऽन्योपाध्यवच्छिन्नेन संभन्त्स्यति ?*,—इति चेत्, [b]तर्हि दण्ड्यपि देवदत्तः कुण्डलिनं स्वमारोक्ष्यत्येव । * उपाधिभेदेऽप्युपधेयस्यैकत्वाऽनिवृत्ते-

नैवम्? *,— इति चेत्तुल्यम्। [c] एतेन कारणं(१) तत्त्वमिति निरस्तम्, [d] सर्वस्य तथात्वे प्रमित्यभावेनात्माश्रयेण च प्रतिक्षण(२)विशिष्टविश्वावश्यकारणत्वोपगमे दुरपवादार्थक्रियाकारित्वस्वरूपसत्त्वलक्षणाङ्गीकारिजैनचरणशरणप्रवेशविडम्बनापादिदोषग्रासेन चेति।

टी० ॥ ननु 'दिनस्य प्रहरो' 'रात्रेर्यामो' 'यामवती यामिनी'त्यादिप्रतीतिदर्शनात् कालेपि कालवैशिष्ट्यमिति न तदंशप्रमानुपपत्तिरित्याशङ्कते—। [a] "अस्ये"ति ॥ उपाध्यन्तरावच्छिन्नस्य कालस्योपाध्यन्तरावच्छिन्ने काले यदि वृत्तिस्तदा दोषमाह—। [b] "तर्ही"ति । कालोपाध्यन्तरस्य च कालोपाधिवृत्तौ किमायातं कालस्ये(३)ति दोषः ॥ [c] "एतेने"ति। कालप्रमाऽनुपपत्तिप्रसङ्गेनेत्यर्थः । कारणत्वस्य नियतप्राक्कालवृत्तित्वरूपत्वात् काले च तदभावादिति भावः ॥ कारणतत्त्वे दोषान्तराण्यप्याह—। [d] "सर्वस्ये"ति। प्रमाणाभावाद्यदेव(४)न कारणं तत्प्रमायामव्याप्तिः, पारिमाण्डल्यादे(५)श्चरमध्वंसादेश्च त्वयैवाऽकारणत्वाभ्युपगमात् तत्प्रमायामव्याप्तेः, कार-

---

(१) अर्थक्रियां प्रति कारणमित्यर्थः, तथा चार्थक्रियाकारणानुभूतिः प्रमेति लक्षणस्य फलितोऽर्थः । भ्रमविषयस्याऽर्थक्रियाकारणत्वाभावेन न तज्ज्ञानेऽतिप्रसङ्गः । अत एव "वाचारम्भणं विकारो नामधेयं मृत्तिकेत्येव सत्यम्"—इति श्रुतिरपि कारणस्यैव मृदादेस्तत्त्वरूपतां कार्य्यस्य च घटादेरतत्त्वरूपतामाह । यद्वा, कारणं,—विषयविधया स्वविषयकज्ञाने कारणमित्यर्थः ; भ्रमज्ञाने विषयस्यैवासत्त्वेन ज्ञानकारणत्वाभावान्नातिप्रसङ्गः ।

(२) प्रतिक्षणविशिष्टं (=क्षणिकम्) यद्विश्वं, तत्प्रतियोगिककारणतायास्तदनुयोगिककारणताया वा वस्तुत्वपगमे दुःखेनापवादो यस्या अर्थक्रियायास्तादृशार्थक्रियाकारित्वलक्षणं यत्सुगतः सत्त्वं तदङ्गीकारिणो जैनस्य चरणशरणे प्रवेश एव विडम्बना=विनाशस्तमापादयितुं शीलं यस्य दोषस्य तद्ग्रासेन च निरस्तमिति पूर्वेणान्वयः । "विडम्बनापातादिदोषग्रासेन च"—इत्यपि बहुषु पुस्तकेषु पाठः ।

(३) कालस्य कालावृत्तित्वे किं त्वदुक्तं भवति? न किञ्चिद्, इति कालप्रमाऽनुपपत्तो दोषस्तदवस्थ एवेत्यर्थः ।

(४) यदेव=कुसूलस्थबीजादिकमङ्कुरादिकं प्रति न कारणमित्यर्थः ।

(५) पारिमाण्डल्यम्=अणुपरिमाणम् । आदिपदेन महत्परिमाणस्यापि लाभः । चरमध्वंसः=यदनन्तरं कार्य्यान्तरं नोत्पत्स्यते तादृशप्रलयकालीनकार्य्यद्रव्यध्वंसः । आदिपदेनोत्पन्नविनष्टघटादेः सङ्ग्रहः ।

षत्वे कारणत्वाभ्युपगमे स्वात्माश्रयत्वात्तदंशप्रमायामव्याप्तिः, कार्ये च वस्तूनामन्यत् प्रतिक्षणभावि नास्तीति पूर्वबीजादेरेवोत्तरबीजादिकारणत्वं वाच्यं, तथाच बौद्धमतप्रवेशादपसिद्धान्तरूपविडम्बनापादको दोषः, तद्-ग्रासश्चेति(१) दोषा इत्यर्थः । यदि च कारणत्वं कारणतावच्छेदकरूपवत्त्वं, तच्च यदाकदाचित्कारणो(२)पधानमात्रमतो नापसिद्धान्त इति, तदा भ्रमा-तिव्याप्तिः, भ्रमविषयाणामपि कारणत्वा(३)त्, कारणांश(४)प्रमानुपपत्तिश्च, यदि च तदनुभवकारणत्वमेव तत्त्वं, तदाऽनुमानाद्यसंग्रह(५)इति भावः । अत्र यद्यपि तत्त्व-मिथ्याज्ञान-विरूपादि(६)शब्दाः पामरादिप्रसिद्धार्था न व्याख्यानमपेक्षन्ते, विवेचयन्ति हि पामरा अपि—इदं तत्त्वमिदमतत्त्वमिदं स्वरूपमिदमस्वरूपमिति तदर्थप्रश्नः प्रष्टुरेव जाड्यमावेदयति, प्रसिद्ध्यनु-रोधाच्च धर्मिस्वरूपे विषयतासमानाधिकरणे च धर्मे तत्त्वपदप्रयोगः, विषयताव्यधिकरणो धर्मोऽतत्त्वं; तदेव हि रजतत्त्वं शुक्तावतत्त्वं, रजते तत्त्वं, विषयतावैयधिकरण्यसामानाधिकरण्याभ्यां व्यपदिश्यते; "तत्त्वभा-क्तयोर्नानात्वदर्शनाद्(७) अव्यभिचार"—इत्यादौ तत्त्वपदस्याव्युत्पन्नस्येव दर्शनाद्धर्मिमात्रे समानाधिकरणे(८) च धर्मे तत्त्वपदं रूढमिति तदंशे(९)पि

(१) तद्ग्रासो न पृथग्दूषणं वाच्यम् । इति दोषाः, एते चत्वारो दोषाः स्युरित्यर्थः ।

(२) कारणस्योपधानं=फलसम्बन्धः । [रजतस्यापि कारणत्वात् ।

(३) ज्ञानलक्षणाप्रत्यासत्तिजन्यशुक्तिकान्ताकारादिदेशस्थरजतज्ञाने विषयविधया-

(४) कारणे कारणोपधानाभावात्कारणांशप्रमाऽनुपपन्न इत्यर्थः । यद्वा 'कारणे'ति भावप्रधानो निर्देशः, तथा च कारणत्वे कारणतावच्छेदकरूपवत्त्वाभावेन कारणत्वांशप्रमानुपपन्न इति पूर्ववदेव बोद्धव्यम् ।

(५) अतीतानागताद्यर्थविषयकानुमितौ विषयस्याऽकारणत्वेन तदसङ्ग्रह इत्यर्थः ।

(६) विगतं रूपं यस्मात्तद्विरूपम् (अस्वरूपमिति यावत्) आदिपदेन स्वरूपस्यापि सङ्ग्रहः, एवं चाग्रे "इदं स्वरूपमिदमस्वरूपमि"त्युक्तं साधु सङ्गच्छते ।

(७) आचार्येण "तत्त्वानुभूतिः प्रमे"ति लक्षणे प्रतिपादिते, पूर्वपक्षिणा च खण्डनिकोक्तप्रकारेण तत्त्वपदस्य यौगिकार्थत्वमवलम्ब्याऽयथार्थानुभूतौ व्यभिचारे दर्शिते, आचार्य आह—"तत्त्वभाक्तयोर्नानात्वदर्शनाद् (अनेकार्थं रूढत्वदर्शनाद्) अव्यभिचारः" इति, तथा च व्युत्पत्तिसिद्धमर्थमादाय व्यभिचारोक्तिरसङ्गतैवेति भावः ।

(८) विषयतासमानाधिकरणे इत्यर्थः ।

(९) तदंशे, धर्म्यंशे इत्यर्थः । समुच्चित्योभयत्र रूढत्वाङ्गीकारस्य फलमाह (तत्रापि धर्मे विषयतासमानाधिकरणे धर्मे रूढत्वाङ्गीकारस्य भ्रमज्ञानेऽतिव्याप्तिपरिहाररूपं फलमाह)—इति नातिव्याप्तिरिति, धर्मिमात्रे रूढत्वाङ्गीकारस्य फलमाह—अत्रेति ।

Digitized by Google

प्रामाण्यमिति नातिव्याप्तिर्न वा धर्म्यंशप्रमायामव्याप्तिः, एवं च स्वरूप-पदस्यापि तत्रैव प्रयोग, इति न किंचिदनुपपन्नं, तथापि विचारकाणां न प्रसिद्धिमात्रानुरोध इति ॥

ख० [a] किं(१)चेदमनुभूतित्वं नाम?, ज्ञानत्वावान्तरजातिभेदो वा?—१ स्मृतिव्यतिरिक्तज्ञानत्वं वा?—२ स्मृतिलक्षणर-हितज्ञानत्वं वा?—३ [b] तदऽविदूरप्राक्कालोत्पत्तिनिय-ताऽसाधारणकारणकबुद्धित्वं वा?—४। न तावदाद्यः। तथा-हि—अनुभूतित्वं नाम जातिरेकाऽभ्युपगम्येति कुतः?।

टी० ॥ अनुभूतिपदस्य स्मृतिव्यावर्तकत्वं तदा स्याद्यद्यनुभूतित्वं स्मृतिव्यावृत्तं स्यात्तदेव तु नास्तीत्याह-। [a] "किंचे"ति॥ [b] "तदविदूरे"ति। तस्य=ज्ञानस्याऽविदूरो ऽव्यवहितो यः प्राक्कालस्तन्नियता यदसाधारण-कारणस्योत्पत्तिरित्यर्थः। अनुभवस्य यद् इन्द्रियसन्निकर्ष-लिङ्गज्ञान-शब्द-ज्ञान-सादृश्यज्ञानादि असाधारणं कारणं तद् अव्यवहितप्राक्कालोत्पत्ति(२), स्मृतेस्तु चिरोत्पन्न एव संस्कारोऽसाधारणं कारणं, मनःसंयोगस्तु नासा-धारणमिति भावः॥

ख० [a] *'अनुभवामी'तिप्रत्ययानुगमवशाद्?*—इति चेन्न, [b] मा-घमासीयनिशावसाने सिताऽसितसरित्संभेदस्नायिनः (३) सत्यपि शब्दजाद्दाविस्वकीय(४)स्वर्गसुखसंप्रत्यये 'सुख-

---

(१) { प्रसङ्गादनुभूतित्वं खण्डयतेऽत्र प्रघट्टके । जातितोपाधितोऽनुत्याऽनेकखण्डनयुक्तिभिः ॥ १४ ॥ }

(२) अव्यवहितप्राक्काले उत्पत्तिर्यस्य तत्तथा।

(३) सिता धवलवर्णा सरित् गङ्गा, असिता कृष्णवर्णा सरिद् यमुना, तयोर्यः संभेदः=सङ्गमः, तत्स्नायिनः (त्रिवेणीस्नायिन इति यावत्)।

(४) क्वचित् 'स्वकीये'ति पदं न दृश्यते, परञ्चाद्ये व्याख्यायां "स्वकीयस्वर्गसुखसंप्र-त्यये इत्यसङ्गतमि"त्याक्षेपदर्शनादावश्यकं तत्। संप्रत्यये=अनुमाने, तथा—अहं भाविस्व-र्गसुखवाग्भविष्यामि वेदविहितकारित्वादिन्द्रादिवदुक्तिरेके नारकादिवदिति।

मनुभवामी'तिप्रतीत्यनुदयात्, [c] 'प्रत्युत शीतसंभेदसंभूतवेदनासंवेदनादेव; [d] परस्त्रियं संभुञ्जानस्यास्तिककामुकस्य शब्दाधीने सत्यपि भाविनरकगमनानुभवनीययातनाधिगमे(१)'दुःखमनुभवामी'तिमतेरनुत्पत्तेः, प्रत्युता'ऽमन्दमानन्दं संविदन्(२)साम्प्रतमस्मी'तिप्रत्ययात् ।

टी० स्मृतिभिन्नेषु प्रत्यक्षानुमानोपमानशब्दप्रभवेषु 'अनुभवामी'त्यनुगतमतिसाक्षिकमनुभवत्वमिति शङ्कते-। [a] "अनुभवामी"ति ॥ माघे सिताऽसितस्नानफलत्वेनानुमीयमाने सुखे तदनुमितावनुभवत्वजातिसत्त्वे 'सुखमनुभवामी'त्यनुगतमतेरुदयप्रसङ्गान्नैवमित्याह-। [b] "माघमासीये"ति॥ शीतदुःखस्यैव साक्षात्कारात्तत्र 'दुःखमनुभवामी'तिवैपरीत्यस्यैव दर्शनादित्याह-। [c] "प्रत्युते"ति ॥ पराङ्गनासङ्गमस्य फलं दुःखमित्यनुमितिरूपानुभवे 'दुःखमनुभवामी'त्यनुगतमतेरभावात् नैवमित्याह- । [d] "परस्त्रियं चे"ति । यद्यपि सितासितस्नायिनः सुखानुभवो नास्त्येव, नवा पराङ्गनां भुञ्जानस्य दुःखानुभवः, किंतु शब्दात् सुखसाधनताऽनुभवः, दुःखसाधनतानुभवश्च, तत्र(३)'सुखमनुभवामि' 'दुःखमनुभवामी'ति वा कथमनुव्यवसायः स्यात्, व्यवसाये प्राधान्येन विषयीक्रियमाणस्यैवानुव्यवसाये ज्ञानविशेषणतयोल्लेखात्; 'सुखसाधनमनुभवामी'ति तु स्यादेव, यदि विषयान्तरसंचारो न स्यात्, तस्य(४) च "प्रत्युते"त्यादिना त्वयैवोपपादनात्; * नचानुभवभान(५)मावश्यकं, * तद्भानेपि तद्गतजातिभानस्यानावश्यकत्वाद्, अन्यथा सन्देहः क्वापि न स्यात्; तवैव वा कथं 'स्वर्गं जानामि' 'नरकं जानामी'ति वा नानुभवः, ज्ञानस्य त्वयाप्यभ्युपगमात् । * भवत्येव तत्र

(१) अत्रापि पूर्ववदेवाधिगमोऽनुमानम्, तथाहि-अहं भाविनरकगमनानुभवनीययातनाकः, प्रतिषिद्धकारित्वाच्चतुर्वाढवङ्गातिरेके वन्द्राढिवद्धेति । [स्मीत्यर्थः ।

(२) अमन्दम्=अनल्पम् (प्रचुरमिति यावत्) आनन्दं=सुखं, संविदन्=जानन्।

(३) तत्र=सुखसाधनत्वानुभवे सति ।

(४) तस्य=विषयान्तरे बुद्धिसञ्चारस्य ।

(५) अनुभवत्वजातिपुरस्कारेणानुभवस्य भानमित्यर्थः ।

'स्वर्गं जानामि'*?—इति चेत्तर्हि 'स्वर्गमनुभवामी'ति भवत्येवेत्यवेहि । किंच, तत्रानुव्यवसायसामग्र्यां 'सुखमनुमिनोमी'त्येवानुव्यवसायो, विशेषोल्लेखतिरस्कृतत्वात् सामान्योल्लेखस्य, अन्यथा 'गौरि'तिज्ञाने सत्त्व-द्रव्यत्व-पृथिवीत्वादीनामनुव्यवसायोल्लेखः स्यात्, एवं(१) चैकोपकारके ग्राह्ये नोपकारास्ततोऽपरे दृष्टे तस्मिन्नदृष्टा ये तद्ग्रहे सकलग्रह इत्यप्यापद्येत । *तथाप्यनुमित्यादावनुभवत्वे किं प्रमाणम्?*—इति चेत्, वह्न्याद्यनुमित्यादौ कदाचिद्वह्निमनुभवामीत्याद्यनुगतमतिरेव । निर्विकल्पके(२) एवानुभवत्वेनाभ्युपगम्यमाने कथमनुगतमतिभङ्गो न दर्शितः?, किं 'माघमासीयनिशावसाने' इत्यादिकादम्बरीगद्येन?, तथापि प्रपञ्चान्तर्गतत्वेनैवानुभवत्वस्य खण्डितत्वादिति हृदयम् ॥

मू० [a]"यदि तु शब्दोपदर्शितव्याप्तिजमनुमानमनुभव एव स्यात् तर्हि सुखं दुःखं चानुभवामीति तयोः प्रत्ययः स्यात् । अथ मन्यसे—*साक्षात्कारम[b]नुभवार्थमनुरुध्य तयोर्नैवमधिगमव्यवहारौ, शब्दज्ञानुमानापेक्षौ तु विमर्शकस्य(३) स्यातामेव तौ *—इति ।

टी० पूर्वग्रघट्टकेनानुव्यवसायाभावं व्यवस्थाप्य संप्रत्यनुव्यवसायमापादयति—। [a]''यदि त्वि''ति । तथाच नेष्टापत्तिरिति भावः । यद्वा, ननु ''स्वर्गकामो माघे सितासिते स्नायादि''तिशब्देन सितासितस्नानं स्वर्गसाधनमितिमात्रं प्रतीतं, स्वसंबन्धिता च तस्याऽऽनुमानिकी; तथाहि—सितासितस्नानं मम भाविस्वर्गजनकं, स्वर्गकाम्यैतादृशस्नानत्वादित्यनुमितेस्त-

(१) गौरितिज्ञानेऽविषयाणां सत्त्वादीनामपि भानाङ्गीकारे गौरिति ज्ञानमेवैकमुपकारकं यस्य गोत्वलक्षणस्य ग्राह्यस्य तदुपरि न गौरितिज्ञानकृतोपकारनिवृत्तिः, तथा च तस्मिन्=गोत्वलक्षणे ग्राह्ये दृष्टेऽपि येऽपरेऽदृष्टा घटपटादयस्तेषामपि ग्रहणेन सर्वज्ञत्वप्रसङ्गः स्यादित्यर्थः । एकोपकारके ग्राह्ये नोपकारा इत्यस्य, एकं ज्ञानमुपकारकं गौरिति ज्ञानं तत्र न ग्राह्योपकारकत्वसिद्धिरिति वाऽर्थः ।

(२) दोषान्तरमप्याह—निर्विकल्पके इति ।

(३) विमर्शकस्य=विचारकस्य, तौ=अधिगमव्यवहारौ, स्यातामेवेत्यर्थः ।

Digitized by Google

त्सिद्धेः; तथाच 'सत्यपि शब्दबलाद्भाविस्वकीयस्वर्गसुखसंप्रत्यये"—इत्यसङ्गतमत आह—। "यदि त्वि"ति। यत्र शब्दोपदर्शितपुमभिप्राये(१)या व्याप्तिरिष्टसाधनत्वेन सह, सैव शब्दोपदर्शितव्याप्तिरित्यर्थः ॥ ᵇ"अनुभवामी"ति । अनुभवशब्दस्यार्थमित्यर्थः । यत्र सुखदुःखे साक्षात्क्रियमाणे तत्रैव तयोरनुभवामीति प्रत्ययः सर्वसाधारणः, परीक्षकस्य तु तदनुमानयो(२)रपि तादृशः प्रत्यय इष्ट एवेति भावार्थः ॥

मू० ᵃतर्हि साक्षात्कारिणि ज्ञानेऽनुभवप्रत्ययव्यवहारौ साक्षात्वनिबन्धनाविति तत्रानुभवत्वजातिकल्पनायां न प्रयोजनप्रमाणे, इत्यनुभवत्यर्थभेदाल्लक्षणाऽननुगमो दोषः ᵇअथ(३)*स्मृतिव्यावृत्तेन रूपेण यः प्रत्यक्षादिष्वनुभव इत्यनुगतावगमः स साक्षात्कारित्वादनुपपन्नः, ततश्च साक्षात्कार्य्यसाक्षात्कारिविशेषेषु साधारणमनुभूतित्वमन्वेष्टव्यम्*—इत्युच्यते, तदपि न युक्तं, ᶜपदार्थान्तरव्यावृत्तेन रूपेण यस्तदितरेष्वनुगतप्रत्ययस्तद्व्यवहारो वा तत्र तदेव(४) रूपं निमित्तं, न तु जातिः काचित्तदनुरोधात् कल्प्यते, तथा(५) सत्यनन्तपदार्थेभ्यो घटादिभ्यो व्यावृ-

(१) अत्र घटकत्वं विषयत्वं वा सप्तम्यर्थः तथाच पुरुषाभिप्रायघटकीभूता तद्विषयीभूता वा या व्याप्तिरिष्टसाधनत्वरूपेण साध्येन सह स्वर्गकाम्यतादृशज्ञानस्वलक्षणस्य लिङ्गस्य सैव शब्दोपदर्शितव्याप्तिरित्यर्थो निष्कर्षः ।

(२) तदनुमानयोः=सुखदुःखविषयकानुमानयोः ।

(३) "अनुभवोऽनुभव इत्यनुगतव्यवहारादिकार्य्यलिङ्गेन किञ्चित्कारणमनुमीयते, न तत्साक्षात्कारित्वमननुगमादतश्च साक्षात्कार्य्यसाक्षात्कारिसाधारणमनुगतव्यवहारकारणं कल्पनीयं, सानुभूतित्वजातिरेव परिशेषात्सिध्यतीत्याशङ्कते—अथेति"—इति तु विद्यासागराः ।

(४) तदेव, इतरव्यावृत्तत्वमेवेत्यर्थः ।

(५) तथा सति=तत्कल्पने, अनन्तपदार्थेभ्यो घटादिभ्यो व्यावृत्तेनाऽनन्तभिन्नत्वादिनारूपेणापापशविभीतकोन्त्वियादिष्वनुगताऽवत्वजातिकल्पनापि प्रसज्येतेत्यर्थः ।

त्तेन रूपेण विभीतकादिषु साम्यावगमादक्षत्वादिजाति-कल्पना प्रसज्येत।

---

† इतोऽपि नानुभूतित्वं नाम स्मृतिव्यावृत्ता जातिः। [d] तथाहि—'घटः स एवायमि'ति तावत्प्रत्यभिज्ञा जायते सा किं स्मृत्यनुभवरूपं ज्ञानद्वयम्?—१ एकमेव वा विज्ञानमंशे स्मृति-रंशे चानुभवः?—२ उत स्मृतिरेव?—३ आहोस्विदनुभव एव?—४।

टी०। [a] "तर्हीति। सत्यप्यनुभवत्वे व्यवहारार्थं साक्षात्त्वमवश्यापेक्षणीयं चेत् किमनुभवत्वेन, विमर्शकस्य तु साक्षात्त्वमन्तरेणाप्यनुमानादौ तद्व्यवहाराभ्युपगमेऽननुगम एवेति परिहारार्थः॥ ननु साक्षात्त्वनिबन्धनमेव ना(१)नुभवामीतिव्यवहारं ब्रूमः, किंतु स्मृतिभिन्नेषु ज्ञानेष्वनुभवव्यवहारो न विना जातिमित्याचक्ष्महे; सुखदुःखानुभवयोस्त्वनुभवामीतिव्यवहारः साक्षात्त्वैकार्थसमवायाधीन(२) इत्युक्तमिति शङ्कते—। [b] "अथे"ति॥ तर्हि स्मृतिभिन्नज्ञानत्वमेव तत्रतत्र निमित्तमस्तु किमनुभवत्वेन, अन्यथा पाशविभीतकेन्द्रियादावप्येकमक्षत्वसामान्यमभ्युपगम्येतेत्याह—। [c] "पदार्थान्तरे"ति॥

सङ्करभयादप्यनुभवत्वं न जातिरिति दर्शयितुं प्रत्यभिज्ञानखण्डनमवतारयति—। [d] "तथाही"ति॥

मू० [a] आद्ये, य एष प्रत्यभिज्ञायां प्रागवस्थाविशिष्टादिदन्ताविशिष्टस्याभेदः प्रकाशते स न स्मृतावन्तर्भावयितुं शक्यः,

---

† प्रत्यभिज्ञात्मके ज्ञाने सङ्कीर्णत्वान्न सम्भवेत्।
स्मृतित्वं वाऽनुभूतित्वं जातिरेतद्वयोच्यते॥ १५॥
नृसिंहाकारवच्छब्दस्मरणानुभवात्मकम्।
प्रत्यभिज्ञानं नचास्त्येकं ज्ञानमित्यपि चोच्यते॥ १६॥

(१) न ब्रूमः—इति सम्बन्धः।

(२) अनुभवत्वेन सह साक्षात्त्वस्य य एकस्मिन्ननुभवलक्षणेऽर्थे समवायस्तदधीन इत्युक्तं न्यायवर्त्मन्यपीत्यर्थः।

अननुभूतचरत्वेन संस्काराानुपनेयत्वात्(१) । [b] अत एव न तृतीयः । नाप्यनुभवेऽन्तर्भावयितुमसौ शक्यः, प्रत्यभिज्ञानकालेऽनुभवेन प्रागवस्थाया असंवेदनात्; [c] संवेदने वाऽनुभव एवेतिशेषपक्षेऽन्तर्भावः स्यात्, स चाग्रे दूष्यते। [d] अत एव न द्वितीयः । प्रागवस्थाविशिष्टाऽभिन्नत्वांशे ऽनुभवत्वस्वीकारश्चेत् प्रागवस्थावैशिष्ट्यमप्यनुभवविषये एव निविष्टमिति चरमपक्षे प्रवेशः । [e] अथ * 'प्रागवस्थाविशिष्टादभिन्नः' इत्ययमर्थोऽप्यनेकांशः, तत्र 'प्रागवस्थाविशिष्टः'-इत्यंशे स्मृतित्वम्, 'अभिन्नः'- इत्यंशे चानुभवत्वम्*,-इत्युच्यते ।

टी० । [a] "आद्ये" इति । तत्तावैशिष्ट्यमात्रे संस्कारसामर्थ्येऽपि तद्विशिष्टाभेदग्रहे(२) तदसामर्थ्यादिन्द्रियस्यापीदन्ताविशिष्टमात्रग्रहसामर्थ्येऽपि प्रतियोगिनस्तत्ताविशिष्टस्यानुपस्थितौ 'सोऽयमि'त्युभयाभेदावगाहनं न स्यादित्यर्थः ॥ अतिदेश्यसन्निधानसौकर्य्यान्मध्ये एव स्मृतिरेवेतितृतीयं पक्षं निरस्यति-। [b] "अत एवे"ति । अभेदांशज्ञानस्य स्मृतावन्तर्भावयितुमशक्यत्वादेवेत्यर्थः॥ [c] "संवेदनेवे"ति । यदि तत्तेदन्ताविशिष्टस्यानुभवविषयत्वं, तदाऽनुभव एवेतिचतुर्थपक्षप्रवेश एवेत्यर्थः ॥ नरसिंहाकारं प्रत्यभिज्ञानमिति प्राभाकरमतं निरस्यति-। [d] "अत एवे"ति । स्मृत्यंशानुभवांशाभ्यामभेदस्याऽसंस्पर्शादेवेत्यर्थः ॥ अभिन्नत्वमिदन्ताविशिष्टत्वं च द्वयमेवानुभवविषयो नतु प्रागवस्थाविशिष्टत्वमपीति नानुभवमात्रं प्रत्यभिज्ञेति शङ्कते-। [e] "अथे"ति ॥ (शेषमग्रे)

(१) संस्काराानुपनेयत्वात्, संस्काराविषयत्वादित्यर्थः ।

(२) तद्विशिष्टाभेदग्रहे=तत्तावैशिष्ट्यविशिष्टेन सहेदन्ताविशिष्टस्याभेदग्रहे ।

(३) अत्र "ततः"-इति पदमध्याहृत्य ततोऽनुपस्थिता'विति सम्बन्धः । प्रतियोगिनः=तत्ताविशिष्टस्येदन्ताविशिष्टेन योऽभेदस्तत्प्रतियोगिन इत्यर्थः ।

(४) अभेदांशज्ञानस्य स्मृतावन्तर्भावयितुमशक्यत्वलक्षणं पङ्कणममतिदेश्यं, तत्सन्निधानस्य=तत्प्रतिपादनस्य, सुकरत्वादित्यर्थः ।

Digitized by Google

अष्टमः परिच्छेदः ।

(Continued from page 472. Vol. VII.)

एतानि त्रीण्यपि ज्ञानोत्पत्तौ कारणानीत्येतावन्मात्रं केचिदाचार्य्या ऊचिरे । अपरे तु श्रवणं प्रधानं मनननिदिध्यासनयोः श्रवणात्पराचीनयोरपि श्रवणफलब्रह्मदर्शननिर्व्वर्त्तकतया आरादुपकारकाङ्गत्वमित्याहुः । तदप्यङ्गत्वं न तार्त्तीयशेषत्वरूपं तस्य श्रुत्याद्यन्यतमप्रमाणगम्यस्य प्रकृते श्रुत्याद्यभावेऽसम्भवात् ।

तथाहि व्रीहिभिर्यजेत दध्ना जुहोतीत्यादाविव मनननिदिध्यास

Some teachers * have held that these three are (all equally) causes in producing a knowledge (of Brahma). Others † have held sravana to be the principal cause; and manana and nididhyásana, which follow on śravaṇa, to be subsidiary (and) contributing directly ‡ to the bringing about of the 'vision of Brahma,' which is the result of śravaṇa. This subsidiary nature of theirs, however, is not identical with '*subsidiary character*' as defined in the third adhyáya of the Mímámsá Sútras (III, i, 2 et seq:), for (in the Mímámsá) the subsidiary character (of any matter) is ascertained by any one of the six means of proof, § viz., direct enunciation and the rest, (and) cannot possibly, therefore, attach to the present case (sc. to manana and nididhyásana) with regard to which no direct enunciation, &c., exist.

We explain our meaning further—There is no direct statement conveyed in a third-case-affix to establish the subsidiary

---

* इत्याचार्य्यवाचस्पतिमिश्रमतमुपसंहरति ।

† अपरे विवरणाचार्य्याः ।

‡ For an exposition of the Mímámsá details treated in this section the reader is provided with references to G. Thibaut's edition of the Arthasaṅgraha with English translation, a work to which I must once for all acknowledge my indebtedness. Arádupakáraka, see Arth : saṅg. pp. 20, 12.

§ Arth : saṅg. p. 8 et seq.

नयोरङ्गत्वे न काचित् तृतीया श्रुतिरस्ति ।

नापि बर्हिर्देवसदनं दामीत्यादिमन्त्राणां बर्हिःखण्डनप्रकाशनसामर्थ्यंवत् किञ्चिल्लिङ्गमस्ति ।

नापि प्रदेशान्तरपठितस्य प्रवर्ग्यस्याग्निष्टोमे प्रवृणक्तीतिवाक्यवत् श्रवणानुवादेन मनननिदिध्यासनविनियोजकं किञ्चिद्वाक्यमस्ति नापि दर्शपौर्णमासाभ्यां स्वर्गकामो यजेतेतिवाक्यावगतफलसाधनताकदर्शपौर्णमासप्रकरणे प्रयाजादीनामिव फलसाधनत्वेनावगतस्य श्रवणस्य प्रकरणे मनननिदिध्यासनयोराम्नानम् ।

nature of manana and nididhyásana, as there is in the case of such passages as 'he is to sacrifice by means of rice-grains' * and 'he is to perform the oblation by means of sour milk.'

† Nor is there any suggestive power (in the words manana and nididhyásana) to establish their subsidiary character, as there is in such mantras as 'I cut grass for the seat of the gods' ‡ a suggestive power, which makes the mantra able to declare the cutting of kuśa grass only.

Nor is there any sentence which, by repetition of the word śravaṇa, is injunctive of manana and nididhyásana as subsidiary matters, as there is the sentence, *agnishṭome pravṛiṇakti*, injunctive of *pravargya* which is cited (originally) in some other place. Nor is there any mention of manana and nididhyásana in the section treating of śravaṇa, which is ascertained to be the means of obtaining a special result (sc. vision of Brahma); while there is mention of the prayájas § and like oblations in the section dealing with the darśapúrṇamása, which is known to be the means of obtaining a certain result (sc. svarga), as declared in the passage,—'let the man desirous of svarga sacrifice with the darśapúrṇamása'. ||

* Arth : saṅg. p. 9.
† Arth : saṅg. pp. 5,6.
‡ Arth : saṅg. p. 12.
§ Arth : saṅg. p. 9.
|| Arth : saṅg. p. 15.

ननु द्रष्टव्य इति दर्शनानुवादेन श्रवणरूपे गुणे विहिते सति फलवच्छ्रवणप्रकरणे तत्सन्निधावाम्नातयोर्मननिदिध्यासनयोः प्रयाजन्यायेन प्रकरणादेवाङ्गतेति चेन्न ते ध्यानयोगानुगता अपश्यन्नित्यादिश्रुत्यन्तरे ध्यानस्य दर्शनसाधनत्वेनावगतस्याङ्गाकाङ्क्षायां प्रयाजन्यायेन श्रवणमननयोरेवाङ्गतापत्तेः ।

क्रमसमाख्ये च दूरनिरस्ते ।

किञ्च प्रयाजादावङ्गत्वविचारः सप्रयोजनः पूर्व्वपक्षे विकृतिषु न

Here an objector may urge against us that, following the rule with regard to the prayájas, there is established by (the proof termed) interdependence * the subsidiary character of manana and nididhyásana, both of which are mentioned immediately after śravaṇa in the context dealing with śravaṇa as the means of obtaining a certain result; since a secondary matter in the form of śravaṇa is enjoined, by the repetition of the idea of seeing, in the text,—'Verily, the self is to be seen, to be heard, to be pondered, to be deeply thought on.' To the above objection we say no; because, following the rule with regard to the prayájas, śravaṇa and manana also turn out to be (against our objector) subsidiary, since nididhyásana † which is ascertained to be a means of vision through a second text,—'The sages, devoted to *meditation* and concentration, have *seen* the power belonging to God himself'—demands a subsidiary complement (which would of course be furnished in śravaṇa and manana).

And the two remaining means of proof, viz., order of succession and name ‡ are wholly inapplicable (to the case of manana and nididhyásana).

Moreover, the question of subsidiary character is of decided import with regard to oblations like the prayájas;

* do. do. do. do.

† Substituted for dhyána, its equivalent, in the text.

‡ Arth : saṅg. pp. 18. 19.

Digitized by Google

प्रयाजाद्यनुष्ठानं सिद्धान्ते तु तत्रापि तदनुष्ठानमिति । प्रकृते तु श्रवणं न कस्यचित् प्रकृतिः येन मनननिदिध्यासनयोस्तत्राप्यनुष्ठानमङ्गत्वविचारफलं भवेत् ।

तस्माच्च तार्त्तीयशेषत्वं मनननिदिध्यासनयोः किन्तु यथा घटादिकार्य्ये मृत्पिण्डादीनां प्रधानकारणता चक्रादीनां सहकारिकारणतेति प्राधान्याप्राधान्यव्यपदेशः तथा श्रवणमनननिदिध्यासनानामपीति मन्तव्यम् ।

सूचितं चैतद्विवरणाचार्य्यैः शक्तितात्पर्य्यविशिष्टशब्दावधारणं प्रमेयावगमं प्रत्यव्यवधानेन कारणं भवति

for according to the opponent's view of the case the prayájas are not to be performed in sacrifices which are modifications (of some fundamental sacrifice), whereas according to the accepted teaching of the Mímámsá, these are to be performed even in the modified forms of sacrifices (tatrápi). * But, as regards the point we have in hand, śravaṇa is not the fundamental form of any action, on which account the performance of nididhyásana and manana need not be regarded as the result of an inquiry into their subsidiary character with reference to any one fundamental form.

Manana and nididhyásana, therefore, are not subsidiary in the strict Mímámsá sense; but primary causality (as regards 'vision of Brahma') is to be held of śravaṇa, and secondary causality of manana and nididhyásana, just as with regard to a product like a jar, primary causality is affirmed of the lump of clay, and concurrent causality of the potter's wheel and other instruments.

And this has been declared by the author of the Vivaraṇa, as follows :—"As regards a knowledge of the object (sc. Brahma) the ascertainment of the literal and implied meaning of Scripture † is the immediate cause, since the means of knowledge is in im-

* Arth: saṅg. pp. 14,16.

† Sc. Śravaṇa, as defined supra.

प्रमाणस्य प्रमेयावगमं प्रत्यव्यवधानात् मनननिदिध्यासने तु चित्तस्य प्रत्यगात्मप्रवणतासंस्कारपरिनिष्पन्नतदेकाग्रवृत्तिकार्य्यद्वारेण ब्रह्मानुभवहेतुतां प्रतिपद्येते इति फलं प्रत्यव्यवहितकारणस्य शक्तितात्पर्य्यविशिष्टशब्दावधारणस्य अव्यवहिते मनननिदिध्यासने तदङ्गे चाङ्गीक्रियेते इति ।

mediate relation with the object of knowledge. But manana and nididhyásana become causes of the intuition of Brahma indirectly through a product of the thinking principle, sc. through a mental modification, concentrated on what has resulted from (previously existing) mental impressions which have been wholly occupied with the Self within. Thus manana and nididhyásana are indirect and must be considered subsidiaries of śravaṇa *, which is the immediate cause as regards the result, (sc. knowledge of Brahma)."

श्रवणादिषु च मुमुक्षूणामधिकारः

काम्ये कर्म्मणि फलकामस्याधिकारित्वात् ।

Men who wish for emancipation have the right to perform śravaṇa, &c.; for the right to perform a voluntary act rests with him who desires a certain result.

मुमुक्षायां नित्यानित्यवस्तुविवेकस्येहाऽमुत्रार्थफलभोगविरागस्य शमदमोपरतितितिक्षासमाधानश्रद्धानाञ्च विनियोगः । अन्तरिन्द्रियनिग्रहः शमः । बहिरिन्द्रियनिग्रहो दमः । विक्षेपाभाव उपरतिः । शीतो-

As regards the desire of emancipation, discrimination of the eternal substance from the non-eternal, and freedom from attachment to the enjoyment of the fruits of things of this world and of the world to come, and practice of śama, dama, uparati, titikshá, samádhána and śraddhá are necessary. Śama is restraint of the internal organ (manas). Dama is restraint of the external organs. Uparati is the absence of bewilderment. † Titikshá is endurance of pairs of opposites

Śravaṇa as pramáṇa is in immediate relation with Scripture, the prameya from this point of view.

* Śravaṇa, substituted for its definition in the text.

† अनादिदुर्वासनाजनितविषयान्तरविक्षेपः ।

ष्णादिद्वन्द्वसहनं तितिक्षा । चित्तैकाग्र्यं समाधानम् । गुरुवेदान्तवाक्येषु विश्वासः श्रद्धा ।

अत्रोपरमशब्देन संन्यासोऽभिधीयते तथाच संन्यासिनामेव श्रवणादावधिकार इति केचित् । अपरे तु उपरमशब्दस्य संन्यासवाचकत्वाभावाद्विक्षेपाभावमात्रस्य गृहस्थेष्वपि सम्भवात् जनकादेरपि ब्रह्मविचारस्य श्रूयमाणत्वात् सर्व्वाश्रमसाधारणं श्रवणादिविधानमित्याहुः । सगुणोपासनमपि चित्तैकाग्र्यद्वारा निर्व्विशेषब्रह्मसाक्षात्कारहेतुः ।

तदुक्तम् । निर्व्विशेषं परं । ब्रह्म साक्षात्कर्त्तुमनीश्वराः । ये मन्दास्तेऽनुकम्प्यन्ते सविशेषनिरूपणैः । वशीकृते मनस्येषां सगुणब्रह्मशीलनात् ।

like heat and cold. Samádhána is concentration of the thinking principle. Sraddhá is faith in the declarations of one's guru and of the Upanishads.

With regard to uparati, some hold that abandonment of the world is intended by the term, and that therefore the right of performing śravana, &c., belongs only to sannyásins. Others * hold that the injunction of śravana, &c., applies equally to all the áśramas, for since the term uparati does not imply abandonment of the world, it can apply to grihasthas in the sense simply of *absence of bewilderment*; and because Janaka † and others like him are mentioned in Scripture as pondering on Brahma. Further, meditation on Brahma as possessed of attributes can bring about intuition of the absolute Brahma, indirectly, through concentration of the thinking principle.

This has been declared, as follows:—"The weak-minded, who are unable to gain intuition of the absolute Brahma, are qualified for practices in which Brahma is described as possessed of attributes. When the minds of such men have been brought under subjection by constant meditation on Brahma as possessed of attributes, the absolute Brahma itself, with regard to

* अद्वेषमात्रेण कैश्चिच्छिवो दूषयन्ति । Śikhá:

† See S. Bks. Vol. XV. p. 161 note.

तद्देवाविर्भवेत्साक्षादपेतोपाधिकल्पनमिति ।

सगुणोपासकानाञ्च अर्च्चिरादिमार्गेण ब्रह्मलोकगतानां तत्रैव श्रवणाद्युत्पन्नब्रह्मसाक्षात्काराणां ब्रह्मणा सह मोक्षः । कर्म्मिणान्तु धूमादिमार्गेण पितृलोकं गतानामुपभोगेन कर्म्मक्षये सति पूर्व्वकृतसुकृतदुष्कृतानुसारेण ब्रह्मादिस्थावरान्तेषु पुनरुत्पत्तिः । तथाच श्रुतिः रमणीयचरणा रमणीयां योनिमापद्यन्ते कुपूयचरणाः कुपूयां योनिमापद्यन्ते इति । निषिद्धकर्म्मानुष्ठायिनां तु रौरवादिनरकविशेषेषु तत्तत्पापोपचिततीव्रदुःखमनुभूय श्वशूकरादितिर्य्यग्योनिषु स्थावरादिषु चोत्पत्तिरित्यलमतिप्रपञ्चेन ।

निर्गुणब्रह्मसाक्षात्कारवतस्तु न लोकान्तरगमनं न तस्य प्राणा उत्क्रा-

which the fictitious surmisal of attributes has been set aside, appears to them intuitively."

And those who meditate on Brahma as possessed of attributes, having gone to the world of Brahmá along the path of light, &c., (and) having there gained intuition of the absolute Brahma, obtain emancipation together with Brahmá (Hiranyagarbha). But those who perform good deeds (sc. sacrifice), having gone to the world of the Fathers along the path of smoke, &c., are born again in the form of Brahmá, &c., down to things stationary, in accordance with their good and evil deeds of a former life, after the store of these has been wrought out by fruition. Accordingly, Scripture declares:—"Those whose conduct has been good will attain some good birth: those whose conduct has been evil will attain some evil birth." † But those who perform forbidden works, having experienced in certain hells, Raurava and the rest, the agony accruing from their sins are born again as dogs, swine and other animals, and as inanimate things. We need say no more on this point.

But for him who has had intuition of the absolute Brahma there is no journey to another world, according to the text:—"his vital spirits do not depart

* Both the ṭíkás refer the quotation to the Kalpataru. In l. 2 Śivadatta reads अनुक्रम्यन्ते but offers no explanation. ते मन्दा निरूपितसगुणोपासनासु अधिकारिणः । Śikhá :

† S. Bks. Vol. I.

मन्तीतिश्रुतेः किन्तु यावत् प्रारब्धक-
र्म्मक्षयं सुखदुःखे अनुभूय पश्चादप-
वृज्यते ।

ननु क्षीयन्ते चास्य कर्म्माणि तस्मिन् दृष्टे परावरे इत्यादिश्रुत्या ज्ञानाग्निः सर्व्वकर्म्माणि भस्मसात् कुरुतेऽर्ज्जुनेत्यादिस्मृत्या च ज्ञानस्य सकलकर्म्मक्षयहेतुत्वनिश्चये सति प्रारब्धकर्म्मावस्थानमनुपपन्नमिति चेन्न तस्य तावदेव चिरं यावन्न विमोक्ष्येऽथ सम्पत्स्ये इत्यादिश्रुत्या नाभुक्तं क्षीयते कर्म्म कल्पकोटिशतैरपीत्यादिस्मृत्या च उत्पादितकार्य्यकर्म्मव्यतिरिक्तानां सञ्चितकर्म्मणामेव ज्ञानविनाश्यत्वावगमात् । सञ्चितं द्विविधं सुकृतं दुष्कृतञ्च ।

elsewhere" * having experienced pleasure and pain, he at length obtains emancipation, when the retributive power of his past actions † has been exhausted.

An objection may be raised that, since according to the śruti passage—"all his works (and their effects) perish when He has been beheld who is high and low (cause and effect)"—‡ and the smṛiti passage—"Arjuna! the fire of knowledge burns to ashes all actions"—§ it is certain that knowledge brings about the destruction of all (three kinds of) actions, the continuance of (the particular kind called) prárabdha is impossible (after knowledge has been gained). This objection we set aside; for only those actions technically known as sañchita, ‖ distinct from those that have produced their effects (sc. from prárabdha), are held to be capable of destruction by knowledge, in accordance with the śruti—"For him there is only delay so long as he is not delivered (from the body); then he will be perfect." ¶ —and the smṛiti—"An action, whose effect has not been experienced, is not destroyed even by the lapse of a thousand

* S. Bks. Vol. XV. p. 176.

† For the three-fold division of karma into prárabdha, sañchita and kriyamáṇa, see Hall's "Rational Refutation," p. 30. and note.

‡ S. Bks. Vol. XV. p. 37.

§ Bhag. Gít. IV. 37.

‖ Ratnl. Refutn. p. 30.

¶ S. Bks. Vol. I. p. 107 and note.

तथाच श्रुतिः तस्य पुत्रा दायमुपयन्ति सुहृदः साधुकृत्यां द्विषन्तः पापकृत्यामिति ।

ननु ब्रह्मज्ञानान्मूलाज्ञाननिवृत्तौ तत्कार्य्यप्रारब्धकर्म्मणोऽपि निवृत्तेः कथं ज्ञानिनां देहधारणमुपपद्यते इति चेन्न अप्रतिबद्धज्ञानस्यैवाज्ञाननिवर्त्तकतया प्रारब्धकर्म्मरूपप्रतिबन्धकदशायामज्ञाननिवृत्तेरनङ्गीकारात् ।

नन्वेवमपि तत्त्वज्ञानादेकमुक्तौ सर्व्वमुक्तिः स्यात् अविद्याया एकत्वेन तन्निवृत्तौ क्वचिदपि संसारायोगादिति चेन्न । इष्टापत्तेरित्येके । अपरे त्वेतद्दोषपरिहारायैव इन्द्रो-

millions of kalpas." And the kind of action termed sanchita is two-fold, good and evil. Thus śruti declares:—"His sons obtain wealth, his friends the good, his enemies the evil he has done." *

Here an other objection may be raised:—Since through knowledge of Brahma there is an end to the primal nescience, there must also be an end to its product, sc. prárabdha; how then is embodied existence possible for those who have gained knowledge of Brahma? This objection is not to be entertained; for we do not admit that there can be an end to primal nescience while an impediment in the form of prárabdha exists, since it is only unimpeded knowledge that can put an end to primal nescience.

Granting the above, an objector may continue that, on the emancipation of one soul through knowledge of Brahma, there must be emancipation for all souls; for when nescience, which is a thing one in its nature, has ceased, a transmigratory world is an impossibility for the remaining souls. This objection, too, must be set aside. For some Vedantic teachers accept as their own the conclusion urged by the objector. Others, to avoid the fault in this conclusion, teach that the plurality of nescience is to be maintained,

* See Ved. Sú. III, 3,26, Śárír: bháshya.

मायाभिरिति बहुवचनश्रुत्यनुगृहीतमविद्यानानात्वमङ्गीकर्त्तव्यमित्याहुः ।

अन्ये त्वेकैवाविद्या तस्याश्चाविद्याया जीवभेदेन ब्रह्मस्वरूपावरणशक्तयो नाना तथाच यस्य ब्रह्मज्ञानं तस्य ब्रह्मस्वरूपावरणशक्तिविशिष्टाविद्यानाशः नत्वन्यं प्रति ब्रह्मस्वरूपावरणशक्तिविशिष्टाविद्यानाश इत्युपगमाच्चैकमुक्तौ सर्व्वमुक्तिः ।

अत एव यावदधिकारमवस्थितिराधिकारिकाणामित्यस्मिन्नधिकरणे अधिकारिपुरुषाणामुत्पन्नतत्त्वज्ञानानामिन्द्रादीनां देहधारणानुपपत्तिमाशङ्क्याधिकारापादकप्रारब्धकर्म्मसमाप्त्यनन्तरं विदेहकैवल्यमिति सिद्धान्तितम् ।

तदुक्तमाचार्य्यवाचस्पतिमिश्रैः उपासनादिसंसिद्धितोषितेश्वरचोदितम् । अधिकारं समाप्यैते प्रविशन्ति

which is taught in śruti by the use of the plural number in the text "Indro máyábhih."

Others again hold that there is only one nescience, and that its powers of concealing the absolute Brahma are many, as determined by the many jívas. Accordingly, there is for him, who has knowledge of Brahma, an end to nescience as regards its power of concealing the absolute Brahma; but there is no end of nescience for any other jíva. Therefore emancipation of all jívas does not follow, according to this view, on the emancipation of a single jíva.

Hence also in the adhikarana dealing with the sútra:—"For those to whom offices pertain there is bodily existence so long as the office lasts,"* wherein occurs the doubt that jívas like Indra and the rest, who are possessed of certain offices and have gained knowledge of Brahma, cannot maintain corporeal existence, the conclusion arrived at is that incorporeal emancipation is attained by them after the store of their prárabdha, which brought about their right of office, has been exhausted.

This has been declared by Váchaspati Miśra, thus:—"These souls attain the perfect state after they have finished their office to which Isvara, pleased with their thorough performance of meditative worship, &c., ap-

* Ved. Sú. III, 3,32.

परमपदमिति । एतच्चैकमुक्तौ सर्व्वे-मुक्तिरितिपक्षे नोपपद्यते । तस्मादे-काविद्यापक्षेऽपि प्रतिजीवमावरणभे-दोपगमेन व्यवस्थोपपादनीया ।

तदेवं ब्रह्मज्ञानान्मोक्षः मोक्षश्चा-नर्थनिवृत्तिर्निरतिशयब्रह्मानन्दावा-प्तिश्चेति सिद्धं प्रयोजनम् ।

इति श्रीधर्मराजाध्वरीन्द्रविरचिता समाप्ता ।

pointed them."* And this is impossible on the view that there is emancipation for all jívas when one jíva is emancipated. Hence, even on the view that nescience is one only, the settled opinion (regarding moksha) is to be formed on the supposition of a plurality of concealing powers of nescience as determined to each jiva.

Emancipation comes from a knowledge of Brahma. And emancipation is a cessation of evil and attainment of the absolute Bliss—Brahma:—thus the motive of the Vedánta has been established. ARTHUR VENIS.

THE END.

* Bhámatí (ed. Bála Śástrí) p. 637, where the reading is विद्याकर्मस्वनुष्ठानतोविनेश्वरचोदितम् ।

॥ श्रीः ॥

॥ ओं नमः श्रीमते भगवते रामानुजाचार्याय ॥

अथ श्रीभाष्यं विशिष्टाद्वैतपरं रामानुजदर्शनम्

श्रुतप्रकाशिकासमेतं विषमपदटिप्पणीसहितम्

तत्र प्रथमाऽध्यायस्यावशेषः ।

(Continued from page 568. Vol VII.)

टी० ॥ "अत्रे"ति अत्र उपास्तेषु वाक्येषु, इत्येवमादिभिर्ध्यानं विधीयत इत्यन्वयः । "निदिध्यासितव्य" इत्यादिनेत्यादि-शब्देन सन्निहि-तज्ञानविशेषवाक्यान्तरं विवक्षितम् । ऐकार्थ्ये च सर्वशाखा[1]प्रत्ययन्यायात् स हि अनुक्ताकाङ्क्षितस्वीकारफलस्तत्र "छागो वा मन्त्रवर्णादि"ति न्यायात्

१ वैदिकेषु यावच्छाखासु प्रतीतार्थो ग्राह्यो न त्वेकत्र यथाश्रुताक्षरलभ्य इत्येतदर्थ-फलकन्यायावलम्बादित्यर्थः ।

सामान्यवाचिशब्दानां विशेषे पर्यवसानम् । "अनुविद्य विजानाति विज्ञाय प्रज्ञां कुर्वीते"त्यत्र केन पदेन वाक्यार्थज्ञानमनूद्यते : केन वा ध्यानं विधीयते? इत्यपेक्षायामाह "अनुविद्य विज्ञायेत्यनूद्य"ति अनुवादः किमर्थः? इत्यत्राह "ध्यानोपकारकत्वादि"ति प्रज्ञां कुर्वीत विजानातीति वाक्यद्वयोपादानस्य पूर्वोक्तमेव फलम् । एवं स्मृतिष्वपि सामान्यशब्दः सति विशेषोपस्थापके तत्पर्यवसितो दृष्टः । "निषिद्धभक्षणं जैह्म्यमुत्कर्षे च वचोऽनृतम् । रजस्वलामुखास्वादः सुरापानसमानि त्वि"त्यत्र निषिद्धसामान्यस्य भक्षणसामान्यं पातित्यहेतुरवगतम् । "छत्राकं विड्वराहं च लशुनं ग्रामकुक्कुटम् पलाण्डुं गृञ्जनं चैव मत्या जग्ध्वा पतेद् द्विज" इत्यत्र निषिद्धविशेषस्य भक्षणसामान्यं पातित्यहेतुर्दृष्टः । अत्र पूर्वमन्यच्चरममन्यार्थे पर्यवस्यति । भवतु सामान्यशब्दो विशेषपर्यवसायी, अत्र तु ज्ञानसामान्यवाचिनः शब्दाः श्रोतव्य इति श्रवणरूपज्ञानविशेषे पर्यवस्यन्त्वित्यत्राह ।

भू० श्रोतव्य इति चानुवादः, स्वाध्यायस्यार्थपरत्वेनाधीतवेदः पुरुषः प्रयोजनवदर्थावबोधित्वदर्शनात्तन्निर्णया यस्वयमेव श्रवणे प्रवर्त्तत इति श्रवणस्य प्राप्तत्वात् श्रवणप्रतिष्ठार्थत्वान्मननस्य मन्तव्य इति चानुवादः, तस्माद्ध्यानमेव विधीयते ॥

टी० ॥ "श्रोतव्य इति चे"ति चः शङ्कानिवृत्तौ समुच्चये वा, विज्ञायानुविद्येतिवद्वयं चानुवाद इत्यर्थः । तत्संक्षेपेणोपपादयति "स्वाध्यायस्ये"ति । आपातप्रतीत्या स्वतःप्राप्तिः श्रवणस्य स्यात्, मनने तादृशहेतुत्वाभावात्तत्र पर्यवसानं मास्त्वित्यत्राह "श्रवणप्रतिष्ठार्थत्वादि"ति चः पूर्ववत् "तस्माद्ध्यानमेवे"ति न तु वाक्यार्थज्ञानमित्यर्थः ।

ननु श्रोतव्य इति पुस्तकनिरीक्षणादिव्यावृत्त्यर्थो विधिः किं न स्यात्? । नैवम् । वेदान्तवाक्यानामपि पुस्तकनिरीक्षणादिव्युदासस्याध्ययनविधिसिद्धत्वाद् ब्रह्ममीमांसाया लिखितपठनादेरप्रतिषिद्धत्वात् गुरूपसत्तौ श्रवणशब्दस्य मुख्यार्थत्वाभावात्तस्याश्चाचारविहितत्वेऽपि "गुरुमेवाभिगच्छेदि"ति वाक्यान्तरसिद्धत्वाच्च ।

Digitized by Google

ननु न्यायोपेतवाक्यमात्रानवगम्यकेवलोपदेशगम्यार्थविशेषश्रवणं श्रोतव्य—इति विधेयमिति चेन्न मननपूर्वभावितयाऽस्य श्रवणस्य न्यायानुगृहीतवाक्यजन्यज्ञानरूपतावगमात् शब्दस्वारस्याच्च ।

नच मन्तव्य इत्यारम्भणसंशीलरूपमननविधिरिति वाच्यम् । श्रवणशब्दस्य न्यायोपेतवाक्यजन्यज्ञान इव मन्तव्यशब्दस्य तत्प्रतिष्ठापने प्रसिद्धिप्राचुर्यात्तस्य चापवादाभावादुभयोरप्राप्तार्थद्वयविधायित्वे वाक्यभेदप्रसङ्गात् सति गत्यन्तरे विशिष्टविधानाश्रयणस्यान्याय्यत्वाच्च । विधिर्हि पदावगतेष्वर्थेष्वेकत्रोपक्षीणशक्तिर्लाघवाय तदितरेषु स्वतोऽनुवादमपेक्षमाणः प्रापकाभावाद्विशिष्टे तात्पर्यं भजते, अत्र त्वनुवादसंभवान्न विशिष्टविषयविधिकल्पनं युक्तम् । तस्मादनुवादः । अनेन श्रवण—शब्दस्य यादव[1]मिश्रोक्तनिर्वाहो निरस्तः । अत्र द्रष्टव्य—शब्द उपायोपेयदशासाधारणत्वादुपरि नियामकस्फुटार्थवाक्यान्तरेण सह व्याख्यायते ।

ननु न साधारणत्वं द्रष्टव्य इति तव्यता दर्शनस्य विधेयत्वप्रतीतेः फलस्य चाविधेयत्वात् । उच्यते निदिध्यासनवद्दर्शस्य विधाने वाक्यभेदप्रसङ्गान्निश्चितानुवादश्रवणमननसाहचर्याच्च विधित्वानिश्चयप्रतिबन्धादुपायस्य दर्शनरूपस्य त्वविषयप्रमाणादर्शने विशिष्टविधित्वाश्रयणायोगात् "मनसैतान् कामान् पश्यन् रमते य एतं ब्रह्मलोके परात्परं पुरिशयं पुरुषमीक्षते" इत्यादिभिः फलदशायां दर्शनस्य प्रामाणिकत्वाच्च श्रोतव्य-इतिवत्तव्यदर्थमनादृत्य फलसमर्पकत्वं द्रष्टव्यशब्दस्य शङ्कितुं युक्तमिति अत उपरिष्टाद्व्याख्येयत्वम् ।

सू० वक्ष्यति "चावृत्तिरसकृदुपदेशादि"ति तदिदम् अपवर्गोपायतया विधित्सितं वेदनमुपासनमित्यवगम्यते ॥

टी० ॥ अथोपासनस्य विधित्सितत्वदृढिम्ने सूत्रकारोक्तिं दर्शयति 'वक्ष्यति चे"ति । तादृशसूत्रासंभवव्युदासाय सूत्रमुपादत्ते "आवृत्तिरि"ति ।

[1] यादवाचार्यो द्रविडदेशोद्भवो ब्राह्मणस्तेन व्याससूत्रेषु भाष्यं निरमायि तदपि चाद्वैतपरमेव परं तु शङ्करमतापेक्षया भास्करीयदर्शन इव महानतिशयो वैपरीत्यं च, श्री ६ रामानुजाचार्याः पूर्वं वयसि यादवाचार्येभ्यः पठितवन्तः, अतएव श्रुतप्रकाशिकाकृतो यादवाचार्यनाम्नि मिश्रपदमुपात्तवन्तः । यादवभाष्यमधुनाप्यस्मद्देशे नोपलभ्यते ।

उपासनशब्दाश्रवणात् सूत्रस्य तत्परत्वमस्फुटमिति तस्यार्थमाह "तदिदमि" ति आवृत्तिद्वयत्रयव्याप्त्यर्थमसकृदिति सौत्रं पदम् । कस्यावृत्ति? रित्यपेक्षायामाह "तदिदं वेदनमि"ति तदिदं तृतीयाध्यायावसाने "एवं मुक्तिफलानियमस्तदवस्थावधृतेस्तदवस्थावधृते"रिति प्रस्तुतं मोक्षफलकं ज्ञानमित्यर्थः । यद्वा प्रज्ञां कुर्वीतेत्यादि सामान्यशब्दोक्तं वेदनमसकृदावृत्तिरूपमुपासनमित्यर्थः ।

सू० विद्युपास्त्योर्व्यतिकरेणोपक्रमोपसंहारदर्शनात् "मनो ब्रह्मेत्युपासी"तेत्यत्र "भाति च तपति च कीर्त्या यशसा ब्रह्मवर्चसेन यएवं वेद" "न स वेद" "अकृत्स्नो ह्येषः" "आत्मेत्येवोपासीत" "यस्तद्वेद यत्स वेद स मयैतदुक्त" इत्यत्र "अनु म एतां भगवो देवतां शाधि यां देवतामुपास्स" इति ।

टी० ॥ "अवगम्यत" इत्यन्तेनावृत्तिरसकृदिति सूत्रांशो व्याख्यातः । उपदेशादिति पदं व्याचष्टे "विद्युपास्त्योरि"ति स्थलत्रयमुदाहरति "मन" इति मनो ब्रह्मेति वाक्यं रात्रीरुपेयादितिवत् प्रतितिष्ठन्तीह वा एते य एता रात्रीरुपयन्तीत्यत्र य एता रात्रीरिति सत्रानुवादवद्य एवं वेदेति पूर्वविहितोपासनस्य फलार्थमनुवादः । वितरणविक्रमा[1]दिहेतुभेदात् कीर्त्तियशसोर्भेदः । मनो ब्रह्मेत्युपासीतेत्यादिप्रकरणे यस्तद्वेदेत्यादिप्रकरणे च वेदनोपासनवाचिशब्दयोर्विप्रकर्षात् प्रकरणैकत्वज्ञापनायात्रेत्युक्तम् "अनु म" इति यां देवतामुपास्से एतां देवतामनुशाधि, अनुपूर्वः शासिर्विविच्य ज्ञापनार्थः । विविच्य ज्ञापयेत्यर्थः, "व्यवहिताश्चेति" सूत्रेण छन्दस्युपसर्गाणां व्यवहितप्रयोगः । न स वेदेत्यत्र सन्निकर्षादत्र शब्दाप्रयोगः । न स वेदेत्यस्या 'थ योऽन्यां देवतामुपास्त" इत्येतद्वाक्योपक्रमत्वादुक्रमोपसंहारयोरुपासनशब्दः मध्ये वेदनशब्दः इदं च पूर्वस्मिन्वाक्ये उपक्रमोपसंहारदर्शनादित्यनेनाभिप्रेतम् यस्तद्वेद तस्य ब्रह्मणो वेदिता यो रैक्कः, यद् वेद तस्य रैक्कस्य वेद्यं यद् ब्रह्म स वेदिता रैक्क, एतद्द्वयं च उभयं तव मयोक्तमित्यर्थः । सामान्यविशेषन्यायेन

[1] वितरणमन्या कीर्त्तिर्विक्रमजन्यं यशः ।

प्रकरणान्तरोक्तज्ञानसामान्यवाचिनां शब्दानां प्रकरणान्तरोक्तविशेषे पर्यवसायित्वं पूर्वमेव स्वयमेव भाष्यकारेण दर्शितम् । सूत्रव्याख्याने त्वेकैकप्रकरणे व्यतिक्रमेणोपक्रमोपसंहारदर्शनमुपदेशादिति पदस्यार्थस्त्वेनोक्तम् । उभयत्राभयं हेतुत्वेन वाच्यं तथाप्यविस्तरार्थमेकैकमुक्तम् । अत एव हि चतुर्थाध्याये उभयमपि हेतुत्वेन वक्ष्यते । तदिदमित्यादिकं सूत्रव्याख्यानम् । अन्यथा तदिदमपवर्गोपायतया विधित्सितं वेदनमिति नोच्येत, किं तु ध्यानमुपासनमित्येवोच्येत । इतरथा प्रकृलितोक्तिप्रकरणानौचित्यात् पश्चादपि ध्यानं च तैलधारावदविच्छिन्नस्मृतिसंतानरूपमिति पूर्वप्रकृतध्यानशब्देन निर्देशात् पूर्वग्रन्थे ध्यानस्योपासनत्वं विवक्षितं चेत् पश्चादुपासनमविच्छिन्नस्मृतिसंतानरूपमित्युपासनशब्देनोच्येत ।

सू० ध्यानं च—तैलधारावदविच्छिन्नस्मृतिसंतानरूपा ध्रुवा स्मृतिः "स्मृत्युपलम्भे सर्वग्रन्थीनां विप्रमोक्ष" इति ध्रुवायाः स्मृतेरपवर्गोपायत्वश्रवणात् ।

टी० ॥ एवं प्रकृतसूत्रार्थे विवृते पूर्वप्रकृतस्य ध्यानस्य ध्रुवानुस्मृतित्वमुपपादयति "ध्यानं चे"ति वेदनस्यासकृदावृत्तिं वदतः सूत्रकारस्यायं भावः यथा ज्ञानसामान्यवाचिनां शब्दानां विशेषपर्यवसायित्वेनासकृदावृत्तिरूपज्ञानपरत्वं सिद्धम् । एवं विशेषान्तरोपस्थापकेषु सत्सु तद्विशेषपर्यवसायित्वं न्याय्यमिति । तस्मात्सूत्रकारेण कण्ठोक्तां ज्ञानस्यासकृदावृत्तिरूपतामुपपाद्य तेनाभिप्रेतं श्रुत्यन्तरोपस्थापितं विशेषान्तरमाह "ध्यानं चे"ति अनेन ग्रन्थेनासकृदावृत्तेर्व्यवहितत्वशङ्कानिरासार्थं विजातीयप्रत्ययान्तराव्यवहितत्वमुक्तम् । अत्र विच्छिन्नाविच्छिन्नस्मृतिसंततिसाधारणो ध्यानशब्दश्चेत् ध्यानं चेत्यादिना विशेषान्तरे पर्यवसानमुक्तं भवति, ध्यानशब्दस्याविच्छिन्नस्मृतिसंतानसाधारणत्वे ध्यानशब्दो व्याख्यातो भवति, अविच्छिन्नस्मृतिसंततित्वे वचनमाह "ध्रुवे"ति स्मृतेर्ध्रुवत्वं नाम विजातीयप्रत्ययान्तराव्यवहितं संततित्वं, स्मृतिव्यक्तीनां क्षणिकत्वात् "अपवर्गोपायत्वश्रवणादि"ति तत्रापवर्गोपायभूतवेदनस्यासकृदावृत्तिरुक्ता । अत्रापि तदुपायत्वप्रत्यभिज्ञानात्तस्या एवाविच्छिन्नस्मृतिसंततिरूपत्वं विवक्षितमिति भावः ।

Digitized by Google

भा० सा च स्मृतिर्दर्शनसमानाकारा "भिद्यते हृदयग्रन्थिश्छिद्यन्ते सर्वसंशयाः क्षीयन्ते चास्य कर्माणि तस्मिन् दृष्टे परावरे" इत्यनेनैकार्थ्यात् एवं च सति "आत्मा वाऽरे द्रष्टव्य" इत्यनेन निदिध्यासनस्य दर्शनरूपता विधीयते ।

टी० ॥ तस्या दर्शनरूपत्वमुच्यते "सा चे"ति न केवलं विषयैक्यतः साम्यम्, अपित्वापरोक्ष्येणापीत्याकार-शब्दस्य भावः । हृदयस्य—मनसो ग्रन्थयो रागादयः । यद्वा मज्ज्वाः शयन्तीति वा हृदयशब्दस्तत्स्थजीवपरः हृत्स्थानमयतीति व्युत्पत्तेर्वा तस्य ग्रन्थिः—प्रकृतिसंबन्धः, हृदयशब्दोपलक्षितं वा शरीरं ग्रन्थिः । संशयशब्दो विपर्ययस्यापि प्रदर्शनार्थः । देहात्माभिमानादिरूपाऽविद्येत्यर्थः, कर्माणि पुण्यपापरूपाणि अविद्यासंचितकर्मकृतप्रकृतिसंबन्धनिवृत्तिर्दर्शनसमानाकारोपासनेनेत्यर्थः । "एवं च सती"ति उपायदशापन्नज्ञानस्य दर्शनरूपत्वे स्फुटार्थवाक्यान्तरसिद्धे सतीत्यर्थः । चःशब्दो द्रष्टव्यशब्दस्य फलदशाभिप्रायत्वशङ्कानिवृत्त्यर्थः । दर्शनशब्दस्य ज्ञानसामान्यपरत्वसंभवेऽपि "द्रष्टव्यः श्रोतव्यो मन्तव्यो निदिध्यासितव्यः" "आत्मनि खल्वरे दृष्टे श्रुते मते विज्ञात इदं सर्वं विदितमि"ति श्रवणादीनां पृथगुक्तत्वाद्द्रष्टव्य इतिपदं साक्षात्काररूपत्वपरं, दृष्ट—शब्दश्च तत्तुल्यार्थः, स चोपायदशाभिप्रायः, तस्मिन् दृष्टे हृदयग्रन्थिर्भिद्यत इत्युक्तत्वात् । "येनाहं नामृती स्याम्" "अमृतत्वस्य तु नाशास्ति वित्तेन" "एतावद्देवारे खल्वमृतत्व"मिति पूर्वापरवाक्येषु फलस्य निर्दिष्टत्वात् प्रकरणान्तरोक्तस्य साक्षात्कारस्येहापि वक्तुमपेक्षितत्वादपेक्षितविधेरनपेक्षितविधानदौर्बल्याच्च ।

टी० ॥ ननु ध्रुवानुस्मृतेरेव दर्शनरूपत्वविधिरयुक्तः, ध्रुवानुस्मृतिदर्शनयोर्भिन्नप्रकरणाम्नातयोर्दहरशाण्डिल्यादिवेदनानामिव[1] परस्परानपेक्षोपायत्वप्रतीतेः । नैवम् । "द्रष्टव्यो निदिध्यासितव्य" इत्येकवाक्यविहितत्वात् । नचात्रापि विद्याद्वयविधानं शङ्क्यं, रूपभेदाभावात्, तत एव वाक्यैकत्वे संभवति वाक्यभेदाश्रयणायोगात्, विद्यान्तराणामिव तयोर्वि-

१ अन्त्यवेदनशब्दो विद्यार्थकः ।

Digitized by Google

कल्पप्रसङ्गाच्च। तयोर्निरपेक्षोपायत्वाद्व्रीहिवद्विकल्प इष्ट इति चेत् न, तस्याष्टदोषदुष्टस्य सति गत्यन्तरेऽभ्युपगन्तुमयुक्तत्वात्, दृश्यते हि व्रीहियवशास्त्रयोस्त्वष्टदोषदुष्टत्वम्। व्रीह्यनुष्ठाने यवशास्त्रस्य प्रामाण्यत्यागः, अविद्यमानाप्रामाण्यकल्पनं, यवानुष्ठाने तस्य त्यक्तप्रामाण्यस्वीकारः स्वीकृताप्रामाण्यत्यागश्चेति यवशास्त्रे चत्वारो दोषाः, यवानुष्ठानवेलायामेव प्रथमप्रयोगस्वीकृतव्रीहिशास्त्रप्रामाण्यत्यागः, तदप्रामाण्यकल्पनं च तृतीयप्रयोगे व्रीहिषूपादीयमानेषु द्वितीयप्रयोगस्वीकृतव्रीहिशास्त्राप्रामाण्यत्यागस्त्यक्तप्रामाण्यस्वीकारश्चेति व्रीहिशास्त्रे चत्वारो दोषाः, इहापि यथासंभवं दोषप्राप्तिः। यद्वा प्रतिपत्तिबाधोऽनुष्ठानबाधोऽपूर्वबाधः फलबाधश्चेति। एकैकशिरसि[1] दोषचतुष्टयादष्टदोषदुष्टत्वम्। अतो गत्यन्तरे सति विकल्पायोगाच्च न ध्रुवानुस्मृतिदर्शनयोः पृथगुपायत्वम्। नापि समुच्चयः। च-शब्दाश्रवणात् दर्शपूर्णमासयोरिव द्वन्द्व[2]निर्देशाभावाच्च परमात्मनोऽतीन्द्रियत्वात्तत्साक्षात्कारस्य चक्षुषा शब्दश्रवणस्येव प्रक्रान्तयोगं प्रत्यशक्यविधानत्वाच्च शब्दविषययोः स्मरणचाक्षुषज्ञानयोरिव समुच्चयोऽनुपपन्नः।

ननु परमात्मनो योगपरिशुद्धमनोग्राह्यत्वान्न दर्शनस्य चक्षुषा शब्दज्ञानतुल्यतेति तद्दर्शनोपायभूतव्यापारस्य विधेयत्वोपपत्तेः समुच्चयसंभव इति सत्यं, कस्तद्दर्शनोपायः? ततस्तु "तं पश्यते निष्कलं ध्यायमान" इति श्रुतेर्ध्यानमेवेति चेत् तर्हि द्रष्टव्यनिदिध्यासितव्यपदयोः पुनरुक्तिः स्यात् उभयोरपि दर्शनोपायध्यानविधिपरत्वाविशेषात्। द्रष्टव्य इति दर्शनोपाये विहिते, क उपाय? इत्यपेक्षायां निदिध्यासनं विधीयते, द्रष्टव्यपदाभावे निदिध्यासनस्य तदुपायत्वं न ज्ञायत इति तज्ज्ञापनार्थत्वान्न पुनरुक्तिरिति चेत् न, द्रष्टव्यपदश्रवणेऽपि दर्शनस्य ध्यानसाध्यत्वाप्रतीतेः, न हि दर्शनकामेनेति श्रूयते तथा सति हि स्वर्गयागयोरिव साध्यसाधनभावावगमः स्यात्।

१ यवानुष्ठानव्रीह्यनुष्ठानपक्षयोरेकैकपक्षे इत्यर्थः।

२ द्वन्द्वस्यैकक्रियान्वयित्वलक्षणसाहित्ये साधुत्वेन द्वन्द्वनिर्देशसंभवात्तत्र समुच्चयो बोध्यत इति भावः।

न च ध्यानं प्रति श्रवणमननयोरिव दर्शनं प्रति ध्यानस्य दृष्टकिंचित्कारः, अतो मानान्तरेण तयोः साध्यसाधनभावावगम इति वैषम्यम् किंच ध्यानसाध्यं दर्शनं चेत् ध्यानदर्शनयोः समुच्चयश्च न संभवति दर्शनं प्रति समुच्चये, दर्शनस्य दर्शनं साधनमित्यात्माश्रयप्रसङ्गात् ।

न च मोक्षं प्रति समुच्चयसंभवः, ध्यानस्य साध्यदर्शनव्यवहितस्य मोक्षं प्रति दर्शनेन सहाव्यवहितकिंचित्कारायोगात्, न हि यागनिष्पन्नार्थानां प्रोक्षणावघातादीनामपूर्वनिष्पत्तौ यागेन सह समुच्चयः, यदि साक्षात्कारं प्रति ध्यानेन सहाव्यवहितकिंचित्कारोपपत्तये दर्शनसमानाकारं ज्ञानान्तरं विधेयमित्युच्येत तदयुक्तम् । स्वर्गं प्रति ज्योतिष्टोमस्येव निदिध्यासनस्य स्वसाध्यं प्रति निरपेक्षोपायताप्रतीतिस्वारस्यभङ्गप्रसङ्गात् । न हि "ज्योतिष्टोमेन स्वर्गकामो यजेते"ति वाक्यप्रतिपन्नं ज्योतिष्टोमस्य स्वर्गसाधनत्वं कर्मान्तरसापेक्षमवगम्यते । नचात्र च-शब्दो द्वन्द्वसमासो वा यतो दर्शनसमानाकारतारूपविशेषणस्य किं विशेष्यमि त्याकाङ्क्षायां विशेष्यान्तरं च न दृश्यते निदिध्यासनं च सन्निहितम्, अतस्तदेव दर्शनसमानाकारतया विधित्सितमिति युक्तमभ्युपगन्तुम् । ततश्च वाक्यभेदोऽपि न स्यात्, निदिध्यासनस्य निरपेक्षोपायताप्रतीतिस्वारस्यं च न बाध्येत

ननु विशिष्टविध्याश्रयणं चेदुपदेशैकगम्यार्थश्रवणशुभाश्रयमननदर्शनरूपताविशिष्टनिदिध्यासनविधिः किच स्यात्? । नैवम् । चतुर्ष्वंशेषु तात्पर्यकल्पनादपि द्वयोस्तत्कल्पनस्य लघुत्वात्, लघुपक्षसंभवे गुरुपक्षाश्रयणायोगाच्च । नचास्मिन्वाक्ये विधानाभावादौपदेशिकार्थाधिगमालम्बनसंशीलनयोरसिद्धिः शङ्कनीया, "तस्माद् ब्राह्मणः पाण्डित्यं निर्विद्य बाल्येन तिष्ठासेद् बाल्यं च पाण्डित्यं च निर्विद्याथ मुनि"रित्यनन्यथासिद्धवाक्यान्तरसिद्धत्वात् तद्धि निरूपयिष्यते "सह कार्यन्तरविधि"रिति सूत्रेण, तस्माद्दर्शनसमानाकारत्वगुणविशिष्टनिदिध्यासनविधिः । नन्वेवमपि न सर्वोपासनानां दर्शनसमानाकारनिदिध्यासनरूपतासिद्धिः "द्रष्टव्यो निदिध्यासितव्य" इति वाक्यस्य मैत्रेयीब्राह्मणस्थत्वात्, अतस्तत्र प्रतिपाद्यस्यैवोपासनविशेषस्य तादृरूपता प्रतिपाद्या स्यात् । नैवम् । "आत्मनि

खल्वरे दृष्टे श्रुते मते विज्ञात इदं सर्वं विदितमि''ति तत्रत्येनैव वाक्येन जगत्कारणविषयसर्वोपासनानां दर्शनसमानाकारनिदिध्यासनरूपतावगमात्, नहीदं वाक्यं विद्याविशेषविधायकम्, कारणज्ञानेन सर्वज्ञातताप्रतिज्ञापरत्वात् कारणमेव सर्वविद्योपास्यम् । कश्च ध्येय: इत्युपक्रम्य "कारणं तु ध्येय'' इति कारणस्यैव ध्येयत्वविधानात्कारणविषयं चोपासनमत्र दर्शनसमाकारनिदिध्यासनरूपमवगम्यते। अस्मिन्वाक्ये विज्ञात—शब्दो हि निदिध्यासनपरः "द्रष्टव्यः श्रोतव्यो मन्तव्यो निदिध्यासितव्यः'' "दृष्टे श्रुते मते विज्ञात'' इति स्थानप्रमाणात् । अतोऽस्य वाक्यस्य सर्वविद्यासाधारणकारणमात्रविषयत्वात् जगत्कारणविषयमुपासनं चेद्दर्शनसमानाकारनिदिध्यासनरूपमित्यवगम्यते। किंच नानाविद्यानां विकल्पस्य वक्तव्यत्वात् गुरुपक्षविषयशास्त्रवैयर्थ्यप्रसङ्गेन लघुगुरुपक्षविकल्पायोगात्, वस्तुसामर्थ्यस्य प्रकरणाद् बलीयस्तया च ध्रुवानुस्मृतिरूपत्वं दर्शनरूपत्वं वक्ष्यमाणं भक्तिरूपत्वं च सर्वविद्यासाधारणाकारं भवितुमर्हति ।

सू० भवति च स्मृतेर्भावनाप्रकर्षाद्दर्शनरूपता ।

टी० ॥ नन्विन्द्रियजन्मनोऽनुभवस्य ह्यपरोक्षत्वं तत्कथं स्मृतेः संभवती?त्यत्राह "भवति चे''ति भावना—वासना, दर्शनरूपता—दर्शनसमानाकारता वृत्ते वृत्ते च पश्यामीत्यादिष्वपि दर्शनसमानाकारत्वं स्मृतेश्च दृष्टमिति भावः, तच्च विशदतराभासरूपत्वं, नचैतदनुभवासाधारणं स्मृतेरपि तत्सद्भावस्य प्रा[1]माणिकत्वात् ।

ननु दर्शनसमानाकारत्वविधानमयुक्तं, दर्शनवाचिशब्देन तत्समानाकारोपस्थापनस्यामुख्यत्वात् "न विधौ परः शब्दार्थ''इति न्यायविद इति चेत्, "नचैतैरेव दर्शपूर्णमासाभ्यां स्वर्गकामो यजेते''त्यत्र दर्शपूर्णमासशब्दयोर्लक्षणया श्येनादिवाक्येषु श्येनादिशब्दानां गौण्या वृत्त्या कर्मनामधेयत्वाभ्युपगमात् "अङ्गुष्ठमात्रं द्रविणमनुपादन्तं यष्टिवेदी''त्यत्र मध्यदेशलक्षणायाः अङ्गीकृतत्वाच्च विशदतरत्वस्य फलरूपस्य ...पुनरनन्तरस्य कथं विधान?मिति चेन्न, न्याय्यावेतस्यैव विधानोपपत्तेः । तत्रान्यसाक्षात्कारहेतु

[1] तत्संभवस्य प्रामाणिकत्वाद्विति ख॰ पु॰ पाठः ।

भूतव्यापारविषयो विधिरिति चेत् इहापि विशदतरत्वावहस्मृतिसंतति-
विषयमनोव्यापारविधिरित्युपपन्नम् ॥

सू० वाक्यकारेणैतत्सर्वं प्रपञ्चितम् । "वेदनमुपासनं स्यात् तद्वि-
षये श्रवणादिति सर्वासूपनिषत्सु मोक्षसाधनतया विहितं
वेदनमुपासनमि"त्युक्तं, "सकृत्प्रत्ययं कुर्याच्छब्दार्थस्य कृत-
त्वात्प्रयाजादिवदिति" पूर्वपक्षं कृत्वा "सिद्धं तूपासनशब्दा-
दिति वेदनमसकृदावृत्तं मोक्षसाधनमिति निर्णीतम् ।
उपासनं स्याद् ध्रुवानुस्मृतिदर्शनान्निर्वचनाच्चेति तस्यैव वे-
दनस्योपासनरूपस्यासकृदावृत्तस्य ध्रुवानुस्मृतित्वमुपवर्णि-
तम् ॥

टी० ॥ अथ सूत्रकाराभिप्रायविदां वचनं दर्शयति "वाक्यकारे-
णे"ति "एतत्सर्व"मिति सूत्रकारेण कण्ठोक्तमभिप्रेतं चेत्यर्थः "प्रपञ्चित"-
मिति पूर्वपक्षसिद्धान्तरूपेणोक्तमित्यर्थः प्रपञ्चनं च वेदनमुपासनं स्यादित्या-
दिवाक्यचतुष्टयेन वाक्यमेकैकं व्याचष्टे "सर्वासूपनिषत्स्वि"ति न केवलं
छान्दोग्य इत्यर्थः, "मोक्षसाधनतया विहितं वेदन"मिति घटादिज्ञानव्या-
वृत्तिः । "विहित"मित्यनूदितश्रवणादिव्यावृत्तिः । अस्यार्थस्य पूर्वपक्षसिद्धा-
न्तरूपेण स्फुटीकरणार्थं सकृत्प्रत्ययं कुर्यादिति वाक्यप्रवचनेन वेदनमुपासनं
स्यादिति वाक्यस्य पूर्वपक्षपरत्वशङ्काव्यावृत्त्यर्थं च सकृदित्यादिकं व्याचष्टे
"सकृदि"ति सकृदित्यादिवाक्यमेव पूर्वपक्षपरं न तु वेदनमुपासनं स्यादिति
वाक्यम् अनन्तरमेवोपासनरूपत्वस्य सिद्धान्तित्वादिति भावः । तथा सिद्धा-
न्तितत्वं दर्शयति "सिद्धं त्वि"ति । सिद्धन्तु सिद्धान्तस्त्वित्यर्थः । क्वचित् वेद-
नमुपासनं सिद्धमित्यर्थः । उपासनशब्दादित्येतद्व्याचष्टे "वेदनमसकृदावृ-
त्त"मिति अस्याविच्छिन्नस्मृतिसंतानरूपत्वं सूत्रकाराभिप्रेतं वाक्यकारक-
ण्ठोक्तं दर्शयति "उपासनं स्यादि"ति दर्शनात् लोके दर्शनात् । निर्वचना-
त्—श्रुतिवाक्यात् "तस्यैवे"ति मोक्षसाधनतया विहितस्येत्यर्थः । "उपासन-

Digitized by Google

रूपस्ये''ति हेतुगर्भम् । उपासनरूपत्वात्—उपासनशब्दवाच्यत्वादसकृदावृत्तस्येत्यर्थः । असकृदावृत्तं ज्ञानं ह्युपासनम्, एवमविच्छिन्नस्मृतिसंततिरूपत्वमुपपादितम् । सूत्रकारकण्ठोक्तमसकृदावृत्तिरूपत्वं तदभिप्रेतं ध्रुवानुस्मृतित्वं च वदतो वाक्यकारस्यायं भावः ॥

सू० सेयं स्मृतिर्दर्शनरूपा प्रतिपादिता दर्शनरूपता च प्रत्यक्षतापत्तिः, एवं प्रत्यक्षतापन्नामपवर्गसाधनभूतां स्मृतिं विशिनष्टि "नायमात्मा प्रवचनेन लभ्यो न मेधया न बहुना श्रुतेन यमेवैष वृणुते स तेन लभ्यस्तस्यैष आत्मा विवृणुते तनूं स्वामि''ति अनेन केवलश्रवणमनननिदिध्यासनानामात्मप्राप्त्यनुपायत्वमुक्त्वा "यमेवैष आत्मा वृणुते तेनैव लभ्य'' इत्युक्तम् ॥

टी० ॥ एतत्तुल्यन्यायतया विशेषान्तरोपस्थापकवाक्ये सति वेदनादिशब्दास्तत्पर्यन्ताः स्युरिति, तस्मात् पूर्वोक्तं दर्शनाकारत्वमपि वाक्यकाराभिप्रेतमित्यभिप्रयन्नाह "सेयमि''ति सेयमसकृदावृत्तिरूपा, ध्रुवानुस्मृतिरूपा चेत्यर्थः । दर्शनशब्दस्यार्थदर्शी तत्त्वदर्शीत्यादिप्रयोगात् परोक्षापरोक्षसाधारण्यमाशङ्क्याह "दर्शनरूपता च'' "प्रत्यक्षतापत्तिरि''ति प्रत्यक्षसमानाकारतापत्तिरित्यर्थः "आत्मनि खल्वरे दृष्टे श्रुते मते विज्ञात इदं सर्वं विदितम्'' "आत्मा वारे द्रष्टव्यः श्रोतव्यो मन्तव्यो निदिध्यासितव्य'' इति श्रवणादिपरोक्षज्ञानपूर्वसूत्रेष्वपि पृथङ्निर्देशादिति भावः । सूत्रकारवाक्यकारयोः कतिपयविशेषं वदतोः सति विशेषान्तरोपस्थापके तत्पर्यवसायित्वस्याभिप्रेतत्वाच्छ्रुत्यन्तरसिद्धं विशेषान्तरमस्तीत्याह "एवमि''ति । अनेन श्रवणादीनां मुक्त्युपायत्वनिषेधाच्चोपासनस्य मोक्षोपायत्वमिति शङ्काव्युदासश्च भवति एवम्—उक्तेन प्रकारेण सामान्यविशेषन्यायेन प्रत्यक्षतापन्नामित्यर्थः । "अपवर्गसाधनभूतामि''ति । प्रतीकोपासनव्यवच्छेदः । "नायमात्मे''ति प्रवचन-शब्दो मननं लक्षयति मननफलत्वात् प्रवचनस्य,

Digitized by Google

मननस्याचार्यप्रवचनफलत्वात्। प्रोच्यतेऽनेनेति करणव्युत्पत्त्या वा प्रवचनं मननं मेधा निदिध्यासनं परिशेषात्, अस्मिन्वाक्ये श्रवणादीनामनुपायत्वं प्रतीतं ध्रुवानुस्मृतिविशेषणत्वेन न किंचित्प्रतिपन्नम् अतस्तद्भावष्टे 'अनेने'ति केवलश्रवणमनननिदिध्यासनानां वक्ष्यमाणविशेषणविरहितानामपीत्यर्थः यथा "न पृथिव्यामग्निश्चेतव्य" इत्यत्र हिरण्योपधानरहितपृथिव्यां चयनं निषिध्यते न तु पृथिवीमात्रे तद्वदिति भावः। विवक्षितविशेषणं वाक्यतात्पर्यनिरूपणेन दर्शयिष्यन्वाक्यस्यार्थान्वयं दर्शयति "यमेवैष आत्मा वृणुते तेनैव लभ्य इत्युक्त"मिति ॥

सू० प्रियतम एव हि वरणीयो भवति, यस्यायं निरतिशयप्रियः स एवास्य प्रियतमो भवति ॥

टी० ॥ वरणीयेन लभ्ये स्तु ततः कथं ध्रुवानुस्मृतेर्विशेषितत्व? मिति शङ्कायां तद्दर्शयितुं लोकसिद्धप्रतीतिमाह "प्रियतम एव ही"ति प्रीतिविषयमात्रस्य न वरणीयत्वं किन्तु स्वयमुपस्थितस्य स्वीकार एव, अतस्तद्व्यावृत्त्यर्थं "प्रियतम" इत्युक्तम्। ततः किमित्यत्राह 'यस्ये'ति यस्योपासकस्यायं परमात्मा निरतिशयप्रीतिविषयः स एवास्य परमात्मनो निरतिशयप्रीतिविषयो भवति, चेतनत्वे सति भगवता वरणीयत्वं भगवति निरतिशयप्रीतिमत एव भवति। यद्वा स्वतः प्रियत्वं स्वस्मिन् प्रीतिमत एव पुण्यक्षेत्रादिषु भगवतः प्रीतिः स्वस्मिन् प्रीतिमत्पुरुषत्वार्था पत्रपुष्पफलादिषु तत्संबन्धनिबन्धना। "स एवे"त्येवकारेण केवलश्रवणादिव्यावृत्तिः ॥

सू० यथायं प्रियतम आत्मानं प्राप्नोति, तथा स्वयमेव भगवान् प्रयतत इति भगवतैवोक्तं "तेषां सततयुक्तानां भजतां प्रीतिपूर्वकं ददामि बुद्धियोगं तं येन मामुपयान्ति ते" इति "प्रियो हि ज्ञानिनोऽत्यर्थमहं स च मम प्रिय" इति च ॥

टी० ॥ भगवति प्रीतिमति भगवत्प्रीतिविषयत्वमिति कथमिदमवगम्यत? इत्यपेक्षायामत्र प्रमाणतया स्मृतिवचनमर्थोपन्यासपूर्वकं

Digitized by Google

दर्शयन्वरणप्रकारमपि विवृणोति "यच्चे"ति "अयं"—भगवति निरतिशयप्रीतिमान्, प्रियतमः—निरतिशयभगवत्प्रीतिविषयो भवतीत्यर्थः, ददामि बुद्धियोगमित्यस्यार्थविवक्षया "स्वमेव भगवान् प्रयतत" इत्युक्तम्। अनेन वरणप्रकारो दर्शितः। भगवतैवोक्तमित्येवकारेण भगवदाग्रहातिशयः सूचितः "तेषामिति सततयुक्तानां—सततयोगं काङ्क्षमा[१]णानाम् "आशंसायां भूतवच्चे"ति कर्तरि क्तः प्रीतिपूर्वकं ददामीत्यन्वयः। अनेन परस्परविषयप्रीतिरुपास्योपासकयोर्दर्शिता सततयुक्तशब्दार्थस्फुटीकरणायाह "प्रियो ही"ति अत्यर्थम् अतिक्रान्ताभिधेयं प्रियत्वं वाचामगोचरमित्यर्थः, ध्रुवानुस्मृतिं विशिनष्टीति हि पूर्वमुक्तम्। अत्र यो भगवति प्रीतिमान् भवति तस्मिन्नुपासके भगवतः प्रीतिमत्त्वमुक्तम्। तत्कथं ध्रुवानुस्मृतेर्विशेषितत्वमित्यत आह॥ "अत" इति॥

मू॰ अतः साक्षात्काररूपा स्मृतिः, स्मर्यमाणात्यर्थप्रियत्वेन स्वयमप्यत्यर्थप्रिया यस्य स एव परमात्मना वरणीयो भवतीति तेनैव लभ्यते परमात्मेत्युक्तं भवति, एवंरूपा ध्रुवानुस्मृतिरेव भक्तिशब्देनाभिधीयते॥

टी॰॥ अतः—उक्तार्थस्य लोकस्मृतिभ्यां सिद्धत्वादित्यर्थः। यद्वा ध्रुवानुस्मृतिवचनाद्वरणीयस्य भगवति निरतिशयप्रीतिमत्त्ववचनाच्चेत्यर्थः साक्षात्काररूपा स्मृतिरित्यनेन पूर्वोक्ताकारविशिष्टाया विशेषान्तरमिति दर्शितम्। "स्मर्यमाणात्यर्थप्रियत्वेन स्वयमप्यत्यर्थप्रिये"ति "अर्थेनैव विशेषो हि निराकारतया धियामि"ति भावः। स्वयमप्यर्थप्रिया—अनुभूयमानो नुभवइतिवदयं निर्देश औपचारिकः। अत्यर्थप्रतिरूपेत्यर्थः। यद्वा अत्यर्थप्रिया अत्यर्थानुकूलरूपा स्मर्यमाणस्य भगवद्विषयस्य निरुपाधिकनिरवधिकानुकूलत्वेन तद्विषयानुस्मृतिरपि निरतिशयानुकूला भवति। यद्वा ध्रुवानुस्मृतिः स्वयमत्यन्तानुकूलत्वान्मुक्त्यवस्थायामपि प्रीतिरूपज्ञानेन प्रतिसंधीयत इति, प्रिया। अत एव हि "या प्रीतिरविवेकाना"मित्यादिना सा प्रार्थ्यते। प्रीतिरूपध्रुवानुस्मृतेरपवर्गोपायत्वमुक्तम्, अन्यत्र भक्तेरुपायत्वमुच्यते

१ काङ्क्षतेः परस्मैपदित्वेन काङ्क्षमाणानामिति शानच् परं चिन्तनीयः।

कथमनयोरैकार्थ्यमित्यत्राह । "एवंरूपे"ति । यद्वा "शेमुषी भक्तिरूपे"ति भक्तिरूपज्ञानस्योपायत्वं प्रागुक्तम्, कथमिदानीं प्रीतिरूपध्रुवानुस्मृतेरुपायत्वं प्रतिपाद्यत ? इत्यत्राह । "एवंरूपे"ति एवंरूपा—साक्षात्कारप्रीतिरूपत्वपर्यन्ता ध्रुवानुस्मृतिरेव भक्तिशब्दवाच्येत्यर्थः ॥

सू० उपासनपर्यायत्वाद्भक्तिशब्दस्य, अतएव श्रुतिस्मृतिभिरेवमभिधीयते ॥

कुत इत्यत्राह । "उपासने"ति । "उपासनपर्यायत्वा"दिति । उपासनादिशब्दानां भक्तिशब्दस्य चैकार्थवृत्तित्वं विवक्षितम् । न तु घटकुम्भशब्दयोरिव पर्यायत्वम् । एकार्थवृत्तित्वं च "सेवा भक्तिरुपास्ति"रिति नैघण्टुकोक्तेरेव गम्यते, "स्नेहपूर्वमनुध्यानं भक्तिरित्यभिधीयते । भज इत्येष धातुर्वै सेवायां परिकीर्तितः । तस्मात्सेवा बुधैः प्रोक्ता भक्तिशब्देन भूयसी"त्यादि चानुसंधेयम् ॥ यद्यपि साक्षात्काररूपत्वभक्तिरूपत्वादिपराणां वाक्यानां विद्याविशेषविषयप्रकरणगृहीतत्वेपि सर्वोपासनासाधारणत्वं लघुगुरुपक्षविकल्पानुपपत्तेः प्राप्तं, तथापि प्रपदेन तु लघुगुरुपक्षविकल्पानुपपत्तिरूपन्यायो वचनबलप्रतिक्षिप्तः । न हि वचनविरोधे न्यायः प्रभवति, वचनविरोधाभावादुपासनेषु तस्य प्रवृत्तिः वेदान्तेषूपासनपराणां वाक्यानामेकार्थ्यसिद्ध्यर्थं भक्तिवशापवर्गस्यैवोपासनस्यापवर्गोपायवेदनत्वमुक्तं, स्मृतिवचनप्रदर्शनं च अस्यार्थस्यैवशदनाय कृतम् । इदानीं तु श्रुतिस्मृत्योरैकार्थ्येन मुक्त्युपायवेदनस्य भक्तिरूपोपासनत्वमुपपाद्यते । "अत एवे"ति । अपवर्गोपायवेदनस्य भक्तिरूपापन्नत्वादित्यर्थः ॥

सू० "तमेव विदित्वातिमृत्युमेति" "तमेवं विद्वानमृत इह भवति" "नान्यः पन्था अयनाय विद्यते" नाहं वेदैर्न तपसा न दानेन नचेज्यया शक्य एवं विधो द्रष्टुं दृष्टवानसि मां यथा भक्त्या त्वनन्यया शक्य अहमेवंविधोऽर्जुन ? ज्ञातुं द्रष्टुं च तत्त्वेन प्रवेष्टुं च परन्तप ? पुरुषः स परः पार्थ ? भक्त्या लभ्यस्त्वनन्यया" इति ॥

टी० ॥ "तमेव विदित्वे"ति वाक्यं श्वेताश्वतरोपनिषदि श्रूयते तत्र "तस्मात्सर्वगतः शिव" इति शब्दश्रवणाच्छिवस्य परमात्मत्वविषयभ्रमः कस्यचिन्मन्दधियः स्यादिति तन्निवृत्त्यर्थं "वेदाहमेतं पुरुषं महान्तम्" "महान् प्रभुर्वै पुरुषः स त्वस्यैव प्रवर्तक इत्युपक्रमोपसंहारयोरवगतपरमपुरुषपरैव सोपनिषदिति पुरुषसूक्तैकार्थ्यं दर्शयितुं" तमेवं विद्वानिति वाक्यमुपात्तम् तमेवं विद्वानिति वाक्येन नान्यः पन्था इति परमपुरुषवेदनव्यतिरिक्तोपायनिषेधः कृतः, नाहं वेदैरित्यादिना तद्भक्तिव्यतिरिक्तोपायनिषेधः कृतः, उभयोरप्युपबृंहणीयवचनयोः प्रमाणतमत्वेन सर्वाविगीतयोरैकार्थ्यं वेदनादिशब्दानां भक्तिपर्यन्तत्वे सिद्ध्यतीति भावः । उपायान्तरनिषेधकण्ठोक्तज्ञानदर्शनप्राप्तीनां भक्तिसाध्यत्वकण्ठोक्त्या च नाहं वेदैरिति वचनमुपात्तम् ।

ननु "भक्त्या मामभिजानाति ततो मां तत्त्वतो ज्ञात्वा विशते तदनन्तरमिति भक्तिजन्यज्ञानस्यैवाव्यवहितोपायत्वमवगम्यते न तु भक्तेरिति शङ्का च नाहं वेदैरित्यनेन परिहृता भवति । अत्र ज्ञानदर्शनयोरिव प्राप्तेरपि भक्तिसाध्यत्वावगमात् भक्त्या प्रवेष्टुं च शक्य इतीह्यन्वयः भक्त्या मामिति वचनेपि ततो मां विशत इति तच्छब्दपरामृष्टाया भक्तेरेव प्राप्त्युपायत्वमवगम्यते । तत इति भक्तिपरामर्शाभावे तदनन्तरमित्यनेन पौनरुक्त्यप्रसङ्गात् अतश्च भक्तिरेवाव्यवहितोपायः "पुरुषः स परः पार्थ" त्यत्र च भक्त्या लभ्य इति भक्तेः प्राप्तिसाधनत्वं स्वरसतोवगम्यते । अनेन पुरुषशब्दप्रत्यभिज्ञापितपुरुषसूक्तप्रतिपाद्यवस्त्वैक्यवत् तत्प्रतिपत्त्युपायैक्यं न्याय्यमिति सूचितम् ॥

मू० एवंरूपाया ध्रुवानुस्मृतेः साधनानि यज्ञादीनि कर्माणीति "यज्ञादिश्रुतेरश्ववदि"त्यभिधास्यते ॥

टी० ॥ अस्त्वेवं वेदनस्य भक्तिरूपोपासनत्वसिद्धिः, ततः प्रकृतस्य कर्मापेक्षितत्वस्य किमायातं? मित्यत्राह "एवमि"ति एवंरूपाया आपरोक्ष्यमितिरूपत्वविशेषणविशिष्टायाः । वाक्यकारसूत्रकाराभ्यामभिप्रेताः कण्ठोक्ताश्च मोक्षोपायज्ञानावस्थाविशेषाः कर्मसाध्या इति भावः । "ध्रुवा-

नुस्मृतेः साधनानी”ति । यथा असिना जिघांसतीत्यत्रासेर्हननसाधनत्वं न त्विच्छासाधनत्वं यथा यज्ञेन विविदिषन्तीत्यत्रापि विद्यासाधनत्वमेवोक्तं न तु तदिच्छासाधनत्वं यज्ञादेर्वेदनेच्छासाधनत्वेन विनियोगायोगादिति- भावः । तथा हि । सर्वेषां पुरुषाणामवान्तरसाध्योपाये प्रवृत्तिः परमसाध्येच्छया विना नोपपद्यते । यथा यागाद्युपायभूतद्रव्यार्जनादौ प्रवृत्तिः, यागादिसाध्यापूर्वादिविषयेच्छया विना नोपपद्यते । तथेच्छा- सिद्ध्यर्थमनुष्ठानमिच्छासंपाद्यवेदनेच्छया विना नोपपद्यते । अतो वेदने- च्छायां जातायां वेदनोपायभूतेच्छासिद्ध्यर्थानुष्ठानं तस्यां जातायां च तदर्थमनुष्ठानमपेक्षितमिति तदनुष्ठानविधिवैयर्थ्यं स्यात् । किंच । स्वसि- द्धिसापेक्षा स्वसिद्धिरित्यात्माश्रयः । वेदनेच्छया इच्छासिद्ध्यर्थकर्मानुष्ठानम् इच्छासिद्ध्यर्थकर्मानुष्ठानाद्वेदनेच्छासिद्धिरित्यन्योन्याश्रयणं वा । अतोविवि- दिषासाधनत्वं कर्मणो न युक्तम् । तन्विच्छार्थं कर्मानुष्ठानस्यात्माश्रयादि- ग्रस्तत्वे क्वचिदपीच्छा न संभवेत् । इच्छाहेतुभूतकर्मानुष्ठानायोगात् । नचे- च्छायाविषयवैलक्षण्यज्ञानमात्राधीनत्वं वैलक्षण्ये ज्ञातेपि कस्यचिदिच्छानु- त्पत्तिदर्शनात् । अतः कस्यचिदिच्छोत्पत्तिः कर्महेतुकत्वमाश्रयणीयं, तच्च तवानुपपन्नं, नैवं भोगादृष्टोद्बोधितपूर्ववासनासचिवाद्विषयवैलक्षण्यज्ञाना- दिच्छोत्पत्तेः, नचाज्ञातसुकृतवशाद्दुर्मेधविवद्यज्ञादिना वेदनेच्छासिद्धि- रिति वाच्यम् । बह्वर्थव्ययायाससाध्यानां यज्ञादीनामज्ञातसुकृतरूपत्वासं- भवात् यज्ञेन विविदिषन्तीति वाक्यस्य स्वर्थश्चिन्त्यते अतो बुद्धिपूर्वकमेव- यज्ञाद्यनुष्ठानं तत्र मोक्षोपायवेदनेच्छाया अभावे बह्वर्थव्ययायाससाध्यक- र्मणां फलान्तराभिसंधिपूर्वकत्वनियमाच्च विविदिषां साधयति फलान्तराभि- संधिविधुरं तु यज्ञादिकं वेदनेच्छया विना नोपपद्यते प्रयोजनानुद्देशेन प्रेक्षा- वतः प्रवृत्त्ययोगात् प्रकृष्टप्रयोजनतदुपायेच्छाविरहे क्षुद्रप्रयोजनपरित्या- गायोगाच्च अतोवान्तरसाध्येच्छासिद्ध्यर्थमनुष्ठानं परमसाध्यवेदनेच्छया विना नोपपद्यत इति स्वसिद्ध्यर्थकर्मानुष्ठानस्य स्वसिद्धिसापेक्षत्वादात्माश्र- यादिस्यादेव “अभिधास्यत” इति अत्रोपपादयिष्याम इत्यर्थः ॥

मू० यद्यपि विविदिषन्तीति यज्ञादयो विविदिषोत्पत्तौ विनियुज्यन्ते तथापि तस्यैव वेदनस्य ध्यानरूपस्याहरहरनुष्ठीयमानस्याभ्यासाधेयातिशयस्याप्रयाणादनुवर्त्तमानस्य ब्रह्मप्राप्तिसाधनत्वात्तदुत्पत्तये सर्वाण्याश्रमकर्माणि यावज्जीवमनुष्ठेयानि ॥

टी० ॥ विविदिषासाधनत्वे यज्ञादेरात्माश्रयादिदोषाभावमभ्युपगम्याह "यद्यपी"ति तस्यैव, इच्छाविषयभूतस्य "ध्यानरूपस्ये"ति वाक्यार्थज्ञानव्युदासः, ध्यानस्याप्येकदिनानुष्ठेयत्वव्युदासार्थमाह 'अहरहरि"ति अहरहरनुष्ठानफलमाह "अभ्यासे"ति अहरहरनुष्ठानेपि मासर्त्तुसंवत्सराद्यवधित्वव्यावृत्त्यर्थमाह "आप्रयाणादि"ति आप्रयाणादनुवर्त्तमानत्वेपि एकद्वित्रिदिनान्तरितव्यावृत्त्यर्थमहरहरनुष्ठीयमानस्येत्युक्तम् तत्रापि स्मृतिविच्छेदव्युदासार्थं ध्यानरूपस्येत्युक्तम् । तदुत्पत्तये–विविदिषोत्पत्तये वेदनस्याव्यवहितप्रकृतत्वेप्यर्थवशात्तच्छब्दो विविदिषापरः, विविदिषासाधनत्वं ह्यभ्युपगम्योच्यते ॥

मू० वक्ष्यति च "आप्रयाणात्तत्रापि हि दृष्टम्" अग्निहोत्रादि तु तत्कार्यायैव तद्दर्शनात्सहकारित्वेन चेत्यादिषु वाक्यकारश्च ध्रुवानुस्मृतेर्विवेकादिभ्य एव निष्पत्तिमाह ।

टी० ॥ आप्रयाणादहरहरभ्यासनानुवृत्तौ यावज्जीवं कर्मणोपेक्षितत्वे च किं प्रमाणमित्यत्राह । "वक्ष्यतिचे"ति च "शङ्कानिवृ"त्तौ । सूत्रसंदर्शनेन तद्विषयभूतश्रुतिवाक्यमपि दर्शितं भवतीत्यभिप्रायेणोपासनानुवृत्तिपरं सूत्रं दर्शितम् । आप्रयाणादिति । "स खल्वेवं वर्त्तयन्यावदायुषमि"ति श्रुतिः । यावच्छब्दस्य साकल्यार्थत्वात् । अहरहरनुष्ठानसिद्धिः तावत्कर्मापेक्षायामाह । "अग्निहोत्रे"ति । आश्रमधर्माणामाश्रमशेषत्वेपि विद्याङ्गत्वमप्यस्तीत्याह

"सहकारित्वेन चे"ति इत्यादिषु सूत्रेषु इममर्थं वक्ष्यतीत्यर्थः । उक्तं कर्मणो विद्याङ्गत्वमुपासनस्य शमाद्यङ्गत्वं च विरोधाच्चोपपद्यत इत्याशङ्क्य विरोधं परिहरिष्यन् तद्विषयश्रुतिवाक्यप्रदर्शनेनाप्रमाणतां च निराचिकीर्षुराह "वाक्ये"ति सूत्रकाराभिप्रायज्ञैरप्येतदुक्तमिति भावः । ध्रुवानुस्मृति-शब्देन तत्र तल्लब्धिरित्यत्र तच्छब्दो व्याख्यातः । विवेकादिभ्य एव न तु केवलकर्मणा केवलशमादिना चेत्यर्थः, वाक्यकारयन्थ उपादीयते ॥

सू० तल्लब्धिर्विवेकविमोकाभ्यासक्रियाकल्याणानवसादानुद्धर्षेभ्यः संभवान्निर्वचनाच्चेति । विवेकादीनां स्वरूपं चाह ॥

टी० ॥ "तल्लब्धि"रिति ॥ उपासनं स्याद् ध्रुवानुस्मृतिरिति हि प्रकृतम् । अतो ध्रुवानुस्मृतिलब्धिरित्यर्थः । विवेकविमोकाभ्यासक्रियाकल्याणानवसादानुद्धर्षेभ्य इति द्वन्द्वसमासः स चेतरेतरयोगार्थ एवान्यतमेन तल्लब्धेर्दुष्करत्वात् समुच्चये संभवति पाक्षिकबाधगर्भविकल्पो ह्ययुक्तः, तस्याष्टदोषदुष्टत्वात्, समुच्चयस्य चात्र संभवात्, एवं विवेकादिविधायिनां वाक्यानां समुच्चये तात्पर्यमिति दर्शयितुमितरेतरयोगद्वन्द्वेन वाक्यकारनिर्देशः । ननु समुच्चयादर्थान्तरमितरेतरयोगः, तत्कथमितरेतरयोगद्वन्द्वेन समुच्चयलाभः? । उच्यते अन्वयादिसहपठितात् समुच्चयाद् विकल्पप्रतिसंबन्धिसमुच्चययोर्थान्तरम् । एकस्मिन् कार्ये मिथोनिरपेक्षसाधनानामन्वयोऽन्वाचयसहपठितः । विकल्पसम्भिव्याहृतसमुच्चयस्त्वेकस्मिन् कार्ये मिथः सापेक्षाणामन्वयः स एव चेतरेतरयोग इत्यविरोध इति निवृत्तिरूपशमादेः, प्रवृत्तिरूपयज्ञादेश्च विरोधाच्च समुच्चय इति चेन्न भिन्नविषयत्वेन विरोधाभावात्, अविहिताप्रतिषिद्धकाम्यविषया हि शमादयः संभवात् उपपन्नत्वात्, निर्वचनाच्च श्रुतिवचनात् प्रमाणोपपत्तिभ्यामित्यर्थः, विवेकादयः किं रूपाः? कथं वा शमादेः कर्मणश्चाविरोधः? इत्यत्राह "विवेकादीनां स्वरूपं चाहे"ति न केवलं परिगणनामात्रं तत्स्वरूपं च वाक्यकार एवाहेत्यर्थः ॥

॥ ओं नमो भगवते मीमांसाद्वयगुरवे श्रीरामानुजाचार्याय ॥

॥ शास्त्रदीपिका ॥

भट्टकुमारिलमतानुगा पूर्वमीमांसासूत्रव्याख्या विषमपदटिप्पणीसमेता ।

ओं श्रीगणेशाय नमः ।

(Continued from page 507 VOL VII.*)*

न च प्रसिद्धस्य प्रामाण्यस्य प्रामाण्यमन्येन परीक्षितव्यम्, स्वत एव तस्य स्वविषयोपस्थापनसामर्थ्यात् । यदि च परीक्ष्येत, ततो येन परीक्ष्येत तस्याप्यन्येनेत्यनवस्था स्यात् । तस्मात्प्रसिद्धत्वात्प्रामाण्यस्य चोदनापि प्रमाणमिति ।

ननु न ज्ञानमुत्पन्नमित्येवार्थतथात्वमध्यवसातुं शक्यम्, प्रसिद्धतरस्यापि प्रत्यक्षस्यायथार्थस्योत्पत्तिदर्शनात् । यथा शुक्तिकायां रजतमिति प्रत्यक्षमेवायथार्थं । न । शुक्तिकायां रजतज्ञानस्य प्रत्यक्षाभासत्वात् । किं पुनराभासासंकीर्णं प्रत्यक्षलक्षणं स्यात्? । तद्दर्शयति । सत्संप्रयोगे पुरुषस्येन्द्रियाणां बुद्धिजन्म तत्प्रत्यक्षम् । यदाभासं विज्ञानं तेनेन्द्रियाणां संप्रयोगे यद्विज्ञानं तत्सत्प्रत्यक्षम् । तत्सतोऽव्यत्ययादाभासासंकरसिद्धिः । तदिति चाव्ययं तृतीयान्तं तेनेत्यर्थे । नन्वसत्यपि व्यत्यये नास्ति संकरः । इन्द्रियसंप्रयोगजं ज्ञानं प्रत्यक्षमित्येतावदेव वक्तव्यं, न हि शुक्तिकायां रजतज्ञानमिन्द्रियसंप्रयोगजं, किं तर्हि? । इन्द्रियसंप्रयोगाच्छुक्तिशकलं रजतसाधारणेन भास्वरत्वादिरूपेण गृहीतमसाधारणं तु शुक्तिकात्वमिन्द्रियदौर्बल्यादगृहीतमनन्तरं च संस्कारोद्बोधाद्रजतं स्मृतं ततः स्मृतरजतात्मना शुक्तिर्दोषाद्गृह्यते अतो नेन्द्रियसंप्रयोगजं रजतविज्ञानमिति नातिप्रसङ्गः । प्रणाड्यास्तीन्द्रियसंप्रयोगजत्वमिति तद्व्यावृत्त्यर्थं तत्संयोगजमिति तद्विशेषणं वक्तव्यमिति चेत् । तच्च । न हीह यथाकथंचित्संप्रयोगजत्वं लक्षणं, किन्तु साक्षात्तज्जन्यत्वम् । यदि च यथाकथंचिदित्याश्रीयते ततो विशेषणे सत्यप्यतिव्याप्तिमल्लक्षणं स्यात् । आरादग्निमध्यक्षयतो यदोष्वयविषयमनुमानं तदपि

प्रत्यक्षं स्यात् । यथाक्षेन्द्रियसंप्रयोगजत्वात्संप्रयुक्तविषयत्वाच्च । अस्ति ह्येषोप्यस्येन्द्रियसंप्रयोगः, संयुक्तसमवायलक्षणः । तस्मादवश्यं साक्षात्संप्रयोगजत्वं लक्षणमित्यङ्गीकर्तव्यम् । अतः शुक्तिरजतवेदनेपि व्यभिचाराभावादनर्थकस्तत्सतोर्व्यत्ययः । सत्यम् । साक्षात्संप्रयोगत्वं लक्षणम् । सत्यं च शुक्तिरजतज्ञानेपि नातिप्रसङ्गः पीतशङ्खद्विचन्द्रादिज्ञानेष्वतिव्याप्तिः स्यात् साक्षात्संप्रयोगजत्वात् । अपि च स्मृतेन रजताकारेण यत्संनिहितस्य शुक्तिशकलस्य तादात्म्यग्रहणं तदनुपरतेन्द्रियव्यापारस्य भवत्साक्षात्संप्रयोगजमेवापरोक्षत्वात्, तस्मादाभासनिवृत्त्यर्थस्तत्सतोर्व्यत्यय इति सूक्तम् । भाष्ये त्वाभासप्रदर्शनार्थं शुक्तिकारजतज्ञानोदाहरणमित्यनवद्यम् । तत्संप्रयोगजत्वाऽतत्संप्रयोगजत्वे कथं विविच्येते । उच्यते । ज्ञानस्वरसादेव विषयस्य तथात्वमध्यवसीयते । तदन्यथात्वन्तु कारणदोषज्ञानादर्थान्यथात्वज्ञानाद्वावगन्तव्यम् । अतो यत्र प्रयत्नेनान्विष्यमाणेपि कारणदोषो बाधकज्ञानं वा नोपलभ्यते तत्प्रमाणमितरच्चाप्रमाणं चोदनार्थज्ञानस्य तूभयाभावात्सिद्धं प्रामाण्यम् ।

ननु सर्व एव निरालम्बन इत्यादिना पूर्वोक्तहेतुद्वयनिमित्तमिथ्यात्वाक्षेपेण शून्यवादी प्रत्यवतिष्ठते । तथा हि यत्र कारणदोषज्ञानं बाधकज्ञानं वा तत्र मिथ्यात्वमन्यत्र सत्यत्वमिति व्यवस्था नोपपद्यते, सर्वज्ञानानां मिथ्यात्वात्सर्वमेव हि ज्ञानमात्मांशपर्यवसितमनादिवासनावशादात्मानमेव बाह्यतयाध्यवस्यन्मिथ्यैव, कथं पुनरात्मांशपर्यवसायित्वं गम्यते? । अनुमानात्, बाह्ये च प्रवृत्तिसामर्थ्यात् । यथा चासामर्थ्यं तथा वक्ष्यामः । संप्रत्यनुमानमुच्यते—स्तम्भादिप्रत्ययाः स्वांशमेव बाह्यतयाध्यवस्यन्तो मिथ्याभूताः प्रत्ययत्वात् स्वप्नप्रत्ययवत् शुक्तिरजतप्रत्ययवदिति च ॥ स्वप्नादिप्रत्यया हि यथावगम्यमानबाह्यार्थाभावाद्देशान्तरकालान्तरवर्तिनां च संनिहितदेशकालतया प्रतिभासासंभवात् क्वचित्कदाचिदप्यसंभवतां स्वशिरश्छेदादीनां स्वप्ने प्रतिभासादवश्यं स्वात्मांशमेव बहिर्वद्गृह्णन्तीत्यभ्युपगन्तव्यम् । अतस्तत्सामान्याज्जाग्रज्ज्ञानानामपि स्वांशपर्यवसायित्वान्मिथ्यात्वमिति प्राप्तेऽभिधीयते । न तावत्स्वप्नादिप्रत्ययाः स्वांशावलम्बनाः ।

तेपि बाह्यार्थमेवान्यथा सन्तमेवान्यथा गृह्णन्तीति वक्ष्यामः भवतु वा। तत्रात्मख्यातिं न तावता नीलादिप्रत्ययास्तथा भवितुमर्हन्ति। तत्र हि नीलमिदं पीतमिदं स्तम्भोऽयं घटोऽयमित्येवमिदमाकारास्पदीभूतं बाह्यं नीलादिप्रत्यक्षेणावगम्यमानं न शक्यमनुमानेनापह्नोतुम्। आत्मख्यातित्वे अहं नीलमिति स्यात्। तदेवं प्रत्यक्षमेव बाह्यार्थमुपस्थापयत् तदपह्नवप्रवृत्तस्यानुमानस्योदयं निरुणद्धि। स्वप्नादिषु तु बाधकेन ज्ञानान्तरेण बाह्यसद्भावनिराकरणादुच्यतात्मख्यातिः। नत्विह तथा बाधकमस्त्यन्यत् भवदुक्तादनुमानात्। नचानुमानमलं बाधितुमित्युक्तम्। दूषणसहस्रं चास्यानुमानस्य वार्त्तिके प्रपञ्चितमित्युपरम्यते।

इति निरावलम्बनवादः।

एवमनुमाने प्रत्यक्षविरोधेन निराकृते प्रत्यक्षस्य बहिः प्रवृत्तौ सः मध्ये नास्तीत्येवं पूर्वोक्ताक्षेपेण शून्यस्त्वित्यादिना स एव शून्यवादी पुनः प्रत्यवतिष्ठते। तदिहेवं चिन्त्यते। यदिदं नीलमिदं पीतमिदमिति नीलाद्याकारं वस्तु प्रथते तत्किं विज्ञानमेव तथा प्रथते? किं वा बाह्यं वस्त्विति। तदर्थमिदं विचार्यते। किं विज्ञानं प्रत्यक्षमुतानुमेयमिति। प्रत्यक्षत्वे सति निराकारस्य प्रत्यक्षग्रहणायोगात्। आकारस्य चैकस्यैव गृह्यमाण आकारो ज्ञान एवावतिष्ठतइत्यर्थस्याग्राह्यमाणत्वात्। असत्त्वमेव भवति। तच्च। "ज्ञानमेवैवमाकारमात्मना प्रथते कुतः?" "नाप्रत्यक्षस्य तस्यास्ति प्रमाणान्तरतोगतिः। संवेद्यत्वाच्च नीलादेर्ज्ञानाकारत्वनिश्चयः। अर्थान्तरस्य च ग्राह्यलक्षणं न हि युज्यते"। यो हि विज्ञानमप्रत्यक्षमिच्छति तस्य ज्ञानमेव न सिद्ध्येत्। प्रमाणान्तरासंभवात्। अनुमानमिति चेन्न। लिङ्गाभावात्। न तावदर्थो लिङ्गम्। विनापि तेन सुषुप्त्याद्यवस्थायामर्थसद्भावाभ्युपगमात्। अर्थव्यवहारो लिङ्गं स हि कादाचित्कं कारणं कल्पयतीति चेदेवं तु प्राग्व्यवहाराज्ज्ञानप्रतिभासो न स्यात्। अव्यवहरन्नपि घटं पश्यञ्जानेऽहं घटमिति ज्ञानमनुसंधत्ते इति प्रतीतिसाक्षिकम्। अर्थधर्मो ज्ञानजन्मा लिङ्गमिति चेत् न तत्सद्भावे प्रमाणाभावात्। अतीतानागत-

Digitized by Google

योश्चार्थयोर्धर्मासंभवादतीताद्यनुमाने ज्ञानसिद्धिर्न स्यात् । तस्मादवश्यं विज्ञानं प्रत्यक्षमेषितव्यम् । एवं च तस्यैवायमाकार इति निश्चमाणकोऽर्थः ।

किञ्च । वेद्यत्वादपि नीलादेर्ज्ञानाकारत्वं, नह्यनात्मनो नीलस्य पीतवद्वेद्यता संभवति । यदि चार्थान्तरं नीलं ततोऽस्य किं लक्षणं वेद्यत्वम्? । यद्यर्थत्वलक्षणं स्यात्, सर्वं सर्वस्य वेद्यं स्यात् । व्यवस्थाहेत्वभावात् । अथ हेतुत्वं व्यवस्थापकम् । यएवार्थो ज्ञानस्य हेतुः स एव वेद्यो नान्य इति चेत् न । नेत्रादेरपि वेद्यत्वप्रसङ्गः । सादृश्यं हेतुत्वं च विषयत्वम् । नीलार्थश्च नीलज्ञानेन सदृशो न नेत्रमिति चेत् । एवमपि समनन्तरप्रत्ययस्य हेतुत्वात्, विज्ञानत्वेन च सादृश्याद्विषयत्वं स्यात् । अथासाधारणेन विषयाकारेण सादृश्यं विषयलक्षणम् । ज्ञानत्वं हि सर्वज्ञानसाधारणं, नीलाद्याकारस्तु केषांचिदेवासाधारणः, तेन तदाकारेण सादृश्यं विषयत्वम् । एवमपि धारावाहिकेषु पूर्वमुत्तरस्य विषयः स्यात् । उभयोर्नीलरूपत्वाद्धेतुत्वाच्च । स्यान्मतम् । न सादृश्यं विषयत्वम् । किन्तु यो ज्ञाने नीलाद्याकारविशेषसमर्पको हेतुः स विषयः । समनन्तरप्रत्ययस्तु न नीलाद्याकाराणां समर्पकः, तथा सति नीलज्ञानानन्तरं सर्वदैव नीलविज्ञानं स्यात् । तत्रैकस्मिन्संताने नीलपीतादिविचित्राकारोदयो न स्यात् । कारणावैलक्षण्ये कार्यवैलक्षण्यायोगात् । नीलपीतादिविचित्रार्थसंनिधिविशेषकृतश्चायं विचित्राकारोदय इत्यर्थस्यैव ग्राह्यत्वम् ।

ननु कार्यभूतज्ञानसमये कारणभूतस्यार्थस्य क्षणिकत्वेनातीतत्वात्कथं प्रत्यक्षग्राह्यत्वम्? । एतदेवार्थस्य ग्राह्यत्वं यज्ज्ञानाकारार्पणक्षमं हेतुत्वम् । यथाहुः । "भिन्नकालं कथं ग्राह्यमिति चेद् ग्राह्यतां विदुः । हेतुत्वमेव तद्युक्तं ज्ञानाकारार्पणक्षम"मिति । यद्येवं कस्यायमाकारो यो वर्तमानः प्रथते? । यदि ज्ञानस्यैव, एवं तर्हि अर्थस्याप्रथमानस्य सद्भावे, ज्ञानं प्रति हेतुत्वे च किं प्रमाणम्? । ज्ञानवैचित्र्यमेव, न हि तत्समनन्तरप्रत्ययमात्रात्संभवतीत्युक्तम् । एवं तर्ह्यनुमेयोऽर्थः कथं प्रत्यक्षग्राह्य? इत्युच्यते । एतदेव हि प्रत्यक्षग्राह्यत्वमर्थस्य, यत्साक्षादाकारसमर्पणेन हेतुत्वम् । यस्तु परम्परया ज्ञानाकारसमर्पको हेतुश्च, सोऽनुमेयः । तद्यथा । वह्निस्वलक्षणं, धूमस्वलक्ष-

यातद्दर्शनतद्विकल्पप्रणाड्या वह्निज्ञानं जनयदनुमेयम्। अतएव प्रत्यक्षमनुमानं च द्वे एव प्रमाणे, ज्ञानार्थयोर्भिन्नत्वात्। असति तादात्म्ये तदुत्पत्तिनिबन्धन एव ज्ञानादर्थे निश्चयः। तच्च साक्षादुत्पत्तौ प्रत्यक्षं, प्रणाड्या त्वनुमेयमिति द्वे एव विधे। अत एव विषयसादृश्यमेव प्रामाण्यं, तदधीनत्वादर्थविशेषव्यवस्थापनस्य। न हि ज्ञानमित्येव नीलवेदनं भवति। पीतादावपि तुल्यत्वात्। नीलिम्ना तु नीलवेदनसिद्धिः। यथाहुः। "न हि संवित्तिसत्तयैव तद्वेदना युक्ता। तस्याः सर्वत्राविशेषादविशेषप्रसङ्गात्। तान्तु सारूप्यमाविशत् सरूपयितु घटयेदिति। तस्मात्साकारे विज्ञाने सिद्धमर्थस्य सत्त्वं, ग्राह्यत्वलक्षणं चेति सौत्रान्तिकाः। अत्र वदामः॥ स्यादिदं ग्राह्यलक्षणं, यद्यर्थस्याकारसमर्पकत्वे हेतुत्वे वा प्रमाणं स्यात्। न तु तदस्ति, समनन्तरप्रत्ययविशेषादेव विचित्राकारोदयसंभवात्। त्वयापि हि स्वप्नावस्थायामसत्यप्यर्थसंबिधौ ज्ञानवैचित्र्यदर्शनादवश्यं समनन्तरप्रत्ययकृतत्वमङ्गीकर्तव्यम्। एवं चेज्जाग्रत्प्रत्ययानामपि तथैवास्तु किमर्थग्रहणेन?। अतो न हेतुत्वं ग्राह्यलक्षणम्। अथ ज्ञाननिबन्धनो यत्रोपादानादिव्यवहारः स विषयइत्युच्यते। तथा सति नीलज्ञानस्य नीलान्तर्गताः परमाणवो रसादयश्च विषयभावमश्नुवीरन्। उपादीयमानत्वात्। अथ द्रव्यस्यैवोपादानं न गुणानां रसादीनाम्। एवं तर्हि रूपस्यापि विषयत्वं न स्यात्।

किञ्च सुखार्थः सर्वो व्यवहारोऽतोऽनुभूते सुखे न कश्चित्सुखविषयो व्यवहारोस्ति।

न च संभवति। यतः सुखप्रतिबद्धव्यवहारानुगुण्यं तद्वित्तेः स्यात्। तथा घ्राण[1]गृहीतेन गन्धेन न कश्चिदुपादानादिव्यवहारोस्तीति कथं तस्य विषयत्वम्?

ननु नोपादानमेव व्यवहारः, शब्दप्रयोगस्यापि व्यवहारत्वात्। अतो नीलज्ञाननिबन्धनशब्दप्रयोगगोचरत्वान्नीलिम्नो विषयत्वमेवं सुखादेरपि। एवमप्युपादानस्यापि व्यवहारत्वात्तद्विषयभूतानां परमाणूनां विषयत्वापत्तिस्तदवस्थैव। (शेषमग्रे)

१ प्रमाणागृहीतेनेति पाठस्तु पुस्तकान्तरस्थो न युक्तो भाति ।

॥ माधवीयधातुवृत्तिः ॥

(*Continued from page* 576. VOL. VII.)

अत्र हरदत्तः । स्तनंधयीत्यत्रैव ङीबिष्यते नान्यत्रेत्याहुरिति । इदं खच्प्रत्ययान्तोपलक्षणमित्येके । तथा च क्षीरस्वामी स्तनंधयीत्यादौ ङीबर्थ इति । वर्द्धमानोपि शुनिंधयी स्तनंधयी खश्प्रत्ययान्तएव ङीबिति । नाडिन्धयः । मुष्टिंधयः । 'नाडीमुष्ट्योश्चे'ति खश् । शुनिंधयः । खश्प्रकरणे वातशुनीतिलशर्धेष्वजधेट्तुदजहातिभ्य उपसंख्यानमिति शुनीशब्दउपपदे खश् । घटंधयः । खारिंधयः । खरी गर्दभी वातंधयः । खरीघटवातेष्विति वक्तव्यात् खश् । केचित्तु खरीशब्दस्थाने खारीशब्दं परिमाणवचनं पठन्ति वातशब्दो भाष्ये न दृश्यतइति हरदत्तः । धारुर्वत्सो मातरं दाधेट्सीति रुः । न लोकाव्ययेति कर्मणि षष्ठ्या निषेधः । तत्र हि उकारोऽपि प्रश्लिष्यते । उउक इति, धयन्ति तामिति धात्री स्तनपायिकी 'धः कर्मणि ष्ट्रन्' इति कर्मणीतीहाभिधेयनिर्द्देशः । षित्त्वं ङीषर्थं, धीत्वा । घुमास्थेतीत्त्वम् । प्रधाय 'न ल्यपी' तीत्वनिषेधः ईत्त्वमवकाराद्वाविति भाष्ये स्थितमिति क्विप्यपि धीः । सन्धिः 'उपसर्गे घोः कि'रिति किप्रत्ययः । धीयतइति धाना । धामिज्वरिभ्यां न इति नः । धेनुः । धेट इच्चेति नुप्रत्ययः इकारश्च धातोरिति । ङिद्वचनेषु 'ङिति ह्रस्वश्चे'ति, पक्षे नदीसंज्ञायामाट् । धेन्वा इति धेन्वामित्यत्र 'इदुद्भ्या'मिति इकारोकाराभ्यां परस्य ङेरामादेशः । घिसंज्ञापक्षे गुणादौ धेनवे, धेनोरिति धेनावित्यत्र 'अच्च घे'रिति ङेरौत्वं, घेश्चाकारः । धेनूनां समूहो, धैनुकम् । 'अचित्तहस्तिधेनोष्ठगि'ति ठक् 'इसुसुक्तान्तात् क'इति कादेशः । सामूहिकेषु तदन्तविधिरिष्यते तेन गोधेनूनां समूहो, गौधेनुकमिति भवति । 'अङ्गुलधेनुवलजान्तस्य विभाषितमुत्तर'मिति वृद्धिनिमित्ते तद्धितउत्तरपदस्य वा वृद्धिः, पूर्वपदस्य तु नित्यम् । पोटायुवतीत्यादिना समासः । अधेनूनां समूहो आधेनवमित्यत्र धेनोरनञिति तन्निषेधात् प्राग्दीव्यतीय उत्सादिलक्षणोञ् । धेनुष्या बन्धकीकृता । धेनुराहितदुग्धेति यस्याः प्रसिद्धिः 'संज्ञायां धेनुष्ये'ति यत्

Digitized by Google

प्रत्ययः मुगागमश्च निपात्यते । धेनुर्भविष्यतीति, धेनुंभव्या । 'धेनोर्भव्या-मुमि'ति मुमागमः ॥ ८५३ ॥

ग्लै म्लै हर्षक्षये ॥ हर्षक्षयो धातुक्षयः । ग्लायति । जग्लौ । जग्लतुः । जग्लाथ । जग्लिथ । जग्लौ । जग्लिव । जग्लिम । ग्लाता । ग्लास्यति । ग्लायतु । अग्लायत् । ग्लायेत् । आशिषि ग्लायात् । ग्लेयात् । 'वान्यस्य संयोगादेरि'ति घुमास्थादेरन्यस्य संयोगादेरार्द्धधातुके क्ङिति लिङि वा एत्वम् । अग्लासीत् । सगिटौ । जिग्लासति । जाग्लायते । जाग्लेति । जाग्लीतः । 'ई हल्यघो'रिति क्ङिति सार्वधातुके श्नाप्रत्ययस्य चाघोरभ्यस्तस्य चाकारस्य ईकारविधानादीत्वं, लोटि हेरपित्त्वात् ङित्त्वादीत्वं, जाग्लीहि । ग्लापयति । अजिग्लपत् । प्रग्लापयति । 'ग्लास्नावनुवमां चे'ति अनुपसर्गस्य वा मित्त्वमुक्तम् । सुग्लायनीति सुग्लः । आदेच इत्यात्वं प्रागेव प्रत्ययोत्पत्तेरनैमित्तिकमिति 'आतश्चोपसर्ग'इति उपसृष्टादाकारान्तात् विहितः को भवति । ग्लानः । 'संयोगादेरातो धातोर्यण्वत'इति निष्ठानत्वम् । ग्लास्नुः । 'ग्लाजिस्थश्च क्स्नुः । सुग्लानं भवता । 'आतो युजि'ति ईषदादिषु कृच्छ्राकृच्छ्रार्थेषूपपदेषु युच् । स्त्रियाम् ग्लानिः । ग्लाज्याहात्वरिभ्यो निः । ग्लौः । ग्लानुदीभ्यां डौरिति डौ डित्त्वात् टिलोपः । च्विरव्ययम् । एषां च्व्यन्तानामेवाव्ययत्वमिति नियमात् 'कृन्मेजन्त'इत्यव्ययत्वाभावात् ग्लावौ ग्लाव इत्यादि यथासंभवं नेयम् । म्लै गात्रविनामइति क्वचित्पठ्यते । गात्रविनामः कान्तिहानिः ॥ ८५५ ॥

द्यै न्यक्करणे । न्यक्कृविधानइति क्षीरस्वामी । न्यक्कं कुत्सिताक्रम् । द्यायति । दद्यावित्यादि । ग्लायतिवत् ॥ ८५६ ॥

द्रै स्वप्ने । ध्रै तृप्तौ ॥ ध्यै चिन्तायाम् ॥ द्रायति । ध्रायति । ध्यायति । इत्यादि ग्लायतिवत् । निद्रालुः । स्पृहिगृहीत्यालुचि द्रा कुत्सायां गतावित्यदादिकस्य ग्रहणमिति वृत्तौ । निद्रा । 'आतश्चोपसर्ग'इत्यङ् । अनिद्रो निद्रावान् भवति, निद्रायते । 'लोहितादिडाज्भ्यः क्यषि'ति लोहितादेराकृतिगणत्वादस्मात् च्व्यर्थे भवत्यर्थे वा क्यष् ।

'वा क्यषः' इति पक्षे तङ् । निद्राशब्दो वृत्तिविषये तद्वति वर्तते इति न्यासकैयटपदमञ्जर्यादिषु । निद्रातीति निद्रः । अस्माद्वा युक्तं चैतत् द्रा कुत्सायां गतावित्यत्र गणे । निद्राणः । अकर्मकत्वात् कर्तरि निष्ठा संयोगादेरिति निष्ठानत्वम् । निद्रित इति तारकादेराकृतिगणत्वादितच् । सुष्ठु ध्यायतीति ध्यायतेः क्विप्प्रसारणयोः 'संप्रसारणाच्चे'ति परपूर्वत्वे 'हल'इति दीर्घः । सुधीः । सुधियावित्यादौ एरनेकाच इति यणो 'न भूसुधियो'रिति निषेधात् अचि श्नुधात्विति इयङ् । ध्यातः । संयोगादेरिति निष्ठानत्वं न ध्याख्येति निषिध्यते । धीवा 'ध्याप्योः संप्रसारणं चे'ति क्वनिपि संप्रसारणं पूर्वत्वं दीर्घत्वं, स्त्रियां 'वनो र चे'ति ङीप् । धीवरी ॥ ८५९ ॥

रै शब्दे ॥ रायति । ररौ । रातेत्यादि पूर्ववत् । कीति रायति इति कीरः । 'सुपि स्थ'इति अत्र सुपीति योगविभागात्कः । एवमीदृशा अन्येपि निर्वाह्याः । रा दानइत्यदादौ ॥ ८६० ॥

स्त्यै ष्ट्यै शब्दसंघातयोः ॥ एको दन्त्यादिः । परो मूर्द्धन्यादिः । षोपदेशलक्षणपर्युदासएक एव गृह्यते उभयोः पाठवैयर्थ्यप्रसङ्गात् । तत्रार्थयोर्यथासंख्यं न भवति पृथग् निर्देशात् । स्त्यायति । तस्त्यावित्यादि ग्लैवत् । षोपदेशस्यापि 'धात्वादेः षः स' इदमेव रूपम् । प्रयोजनं तु तिष्ट्यासति । अतिष्ट्यपदित्यादावादेशसकारत्वात् षत्वम् । यत्तु मैत्रेयसम्मताकारकाश्यपादिभिरुक्तं पुनः पाठफलं 'धात्वादेः षः स' इति सत्वाभाव इति । तत् अजदन्त्यपराः सादयः षोपदेशा इति लक्षणस्याव्याप्तिप्रसङ्गादुपेक्ष्यम् । पाठे षोपदेशानां प्रयोगे सादित्वादजन्त्यपरत्वं हि लक्षणं व्यापकेन च नाम लक्षणेन भवितव्यम् । प्रस्तीतः । प्रस्तीतवान् । प्रस्तीमवान् । 'स्त्यः प्रपूर्वस्ये'ति निष्ठायां संप्रसारणे परपूर्वत्वदीर्घत्वयोः 'प्रस्त्योन्यतरस्यामि'ति प्रोपसृष्टादस्मात्परस्या निष्ठायास्तकारस्य पक्षे मकारः । मकाराभावे संयोगादेरिति निष्ठानत्वस्य स्त्यइति संप्रसारणे पूर्वत्रासिद्धत्वात् कृते च तस्मिन् यण्वत्त्वात्तकारान्तत्वयोरभावादप्रसङ्गः । प्रस्त्य इति लघु वक्तव्ये 'स्त्यः प्रपूर्वस्ये'ति वचनं प्रशब्दो यस्माद्धातूपसर्ग-

Digitized by Google

समुदायात्पूर्वं इत्याश्रयणार्थम्। तेन प्रसंस्तीत इत्यादावन्योपसर्गव्यवधानेपि संप्रसारणं भवति। मत्वं तु प्रस्त्यइति निर्देशाद्व्यवहिते न भवति। संस्त्यानः, संस्त्यान इत्यादौ प्रस्त्याभावाच्च संप्रसारणं, नापि मत्वं, संप्रसारणविधौ षोपदेशोप्ययं स्त्यायो गृह्यतइति वृत्त्यादौ, तेन तस्यापि निष्ठायामुक्तान्येवोदाहरणानि द्रष्टव्यानि। येऽस्य सत्वं नेच्छन्ति तेषां स्त्याद्रूपमापत्त्योर्द्वयोरपीह इति वृत्त्यादिमहायन्थविरोधश्च। न च स्त्यस्य प्रकृतिवदनुकरणमिति स्त्याद्रूपत्वं यतस्तैः प्रकृतावेव सत्वं नाभ्युपगम्यते। स्त्यायति संहन्यते ऽस्यां गर्भ इति स्त्री। संस्त्याने स्त्यायतेर्ड्रडिति ड्रटि डित्त्वाट्टिलोपे वलि लोपे च टित्त्वान्ङीप्। अजादौ 'स्त्रियाम्' इतीयङि स्त्रियावित्यादि। अम्शसोस्तु 'वाम्शसो'रिति इयङ्विकल्पनात् स्त्रीम्। स्त्रियम्। स्त्रियः। स्त्रीरिति प्रथमयोः पूर्वसवर्णदीर्घो भवति। नेयङुवङ्स्थानावस्त्रीति निषेधादियङ्स्थानत्वेपि नदीत्वात् स्त्रियै स्त्रियामित्यत्र 'आण् नद्या' इति ङिद्वचनस्याडागमो ङेराम्मिति ङेराम्च भवति। तथा स्त्रीणामित्यत्र ह्रस्वनदीति नुड् भवति। हे स्त्रि इत्यत्र अम्बार्थनद्योरिति ह्रस्वो भवति। स्त्रियाः संबन्धि स्त्रैणम्। 'स्त्रीपुंसाभ्यां नञ्स्नञौ भवनात्'। आभ्यां यथासंख्यं प्राग्भवार्थेष्वर्थेषु तत्तदर्थानुकूलसमर्थविभक्तिभ्यां नञ्स्नञाविति नञ्। स्त्रीत्वम् स्त्रीता। 'आ च त्वादि'ति चकारेण त्वतलोरभ्यनुज्ञानात् त्वतलौ। स्त्रीषन्मा भूमेति भाष्यकारप्रयोगाद्वृत्तिस्साधुः। 'स्त्री पुंवच्चे'त्यादिनिर्देशस्य प्रयोगापेक्षत्वाद्वा। अत्र विषये बाधकान्येव निपातनानीति नञ्स्नञौ बाध्येते। यथा सर्वनामेत्यत्र णत्वम्। परस्त्रिया अपत्यं, पारशवम्। परस्त्री परशुं चेति शिवादिपाठादपत्ये परशुभावश्च। पारस्त्रैणेयम्। 'कल्याण्यादीनामिनङि'ति ठकि एयादेशोऽन्त्यस्येनङ्। अनुशतिकादित्वादुभयपदवृद्धिः कुस्त्रिया भावः कर्म वा कौस्त्रम्। युवादित्वादण्। एवं दौस्त्रम्। स्त्रीतरा, स्त्रितरा। नद्याः शेषस्येति ह्रस्वो वा। सूत्रार्थश्च ज्वलत्यादौ द्रष्टव्यः। स्तूपः। उच्छ्रायः। स्त्यः संप्रसारणमुच्चेति पप्रत्ययः प्रसारणपूर्वत्वे तस्य वकारस्य

अकारो दीर्घः । अच्चेत्येव वक्तव्ये दीर्घविधानं ह्रस्वस्यापि श्रवणार्थं तेन स्तुप इत्यपि भवति ॥ ५६२ ॥

खै खदने ॥ खदनं स्थैर्यं हिंसा च । खायति । चखौ । खाते-त्यादि ॥ ५६३ ॥

त्रै त्रै षै क्षये ॥ क्षायति । चक्षौ । क्षातेत्यादि । क्षामः । क्षामवान् । 'क्षायो मः' इति निष्ठातो मः । णौ क्षपयति । अयं मिदिति घटादौ ध्व-नतावुक्तम् । एवं जायति, जज्ञौ, जाता । सायति । ससौ । साता । घुमास्थेत्यत्र सायहणेन स्यतेर्ग्रहणं नास्येति आशीर्लिङि एत्वाभावात्सा-यादिति भवति । अत एव सासायते सायतइत्यादौ घुमास्थेति ईत्वं न भवति । तथा च तत्र न्यासे । गामादाग्रहणेष्वविशेषमुक्त्वा षो अन्त-कर्मणीत्ययमेवोपात्तः । तथा च तन्त्रान्तरे । पास्यति जास्यति सास्यतीति स्पष्टं षो अन्तकर्मणीत्ययमेव निर्दिश्यते । 'विभाषा घ्राधेट्-शाच्छास' इति सिचो लुग्विधावपि श्यन्विकरणाभ्यां साहचर्यात्स्यतिरेव गृह्यते इत्यस्मात्सिचि सति च असासीदित्येव भवति । सिषासति । आदे-शसकारत्वात्षत्वम् । सापयति । असीषपत् । शाच्छासेति युग्विधावपि श्यन्विकरणाभ्यां साहचर्यात् स्यतिरेव गृह्यते इति अस्य पुगेव भवति । केचिदमुं दन्त्यादिं पठन्ति । तत् षोपदेशलक्षणविरोधादुपेक्ष्यम् ॥ ५६६ ॥

कै गै शब्दे ॥ इह शब्दः शब्दविशेषः । उक्तं ह्येवं स्वामिना । कायति । चकौ । काता । काकः । इणभीकेति कन् । गायति । जगौ । गातेत्यादि । घुमास्थेत्यत्र गामादाग्रहणेष्वविशेष इति लावणिकगाङ्-वस्य गायतेरपि ग्रहणात् आशीर्लिङि एत्वं गेयादिति भवति । गाति-स्थेत्यत्र गापोर्ग्रहणे इण्पिबत्योर्ग्रहणमिति वृत्तावुक्तत्वात् अस्मात्सिचो लु-गभावात् अगासीदिति भवति । गायकः । गायनः । 'गस्थकनि'ति ण्युट् चेति कर्त्तरि थकन् ण्युटो णित्त्वादातो युगिति युक्, टित्त्वात् स्त्रियां गायनी । वा सरूपेण ण्वुल्तृचौ, गायकः, गातेति भवति । उद्गा-ता । तस्य भावकर्म्मणी चौद्गात्रम् । उद्गात्रादिभ्योऽञि'ति अञ् । साम गाय-

तीति, सामगः । 'गापोष्टगि'ति कर्मण्युपपदे टक् । टित्वात् स्त्रियां सामगी । गीत्वा । गीतम् । घुमास्थेति इत्वम् । प्रगीतिः । 'स्थागापापचो भाव'इति स्त्रियां भावे क्तिन् । 'स्त्रियां क्तिनि'त्येव सिद्धे पुनर्वचन'मातश्चोपसर्ग'इति अङो बाधनार्थम् । गाथा गद्यविशेषः । उषिकुषिगर्त्तिभ्यस्थनिति स्थन् । अवगथः प्रातस्सवनं, सोमो वा । निशीथगोपीथावगथा इत्यवपूर्वादस्मात्थनि धातोर्ह्रस्वत्वं च निपात्यते । उद्गीथः 'गश्चोदी'ति । उदुपसृष्टादथन् । घुमास्थेतीत्वम् ॥ ५६८ ॥

श्रै श्रै पाके ॥ इह पाको विक्लित्तिः । तथा 'शृतं पाक'इत्यत्र वृत्त्यादावुक्तम् । श्रायति । शश्रौ । श्राता । श्रायति । शश्रौ श्रातेत्यादि । गायतिवत् । श्रपयतीति घटादित्वात्पाके मित्त्वम् । अन्यत्र श्रापयति । स्वेदयतीत्यर्थः । शृतं क्षीरम् । 'शृतं पाक'इति क्ते शृभावो निपात्यते । तत्र पाको विक्लित्तिः तत्फलको व्यापारश्च । तत्र तत्फलके व्यापारे णिचमन्तरेण वृत्तेरभावात् अपेरप्ययं शृभाव इति शृतं क्षीरं देवदत्तेनेति भवति । तथा च तत्र वार्त्तिकं,श्राश्रप्योः शृभावो निपात्यते इति । यत्तु अपेर्णिचि अपिशब्दः, न तस्यायमादेशः पाक इति वचनात् अत्र याचनार्थः पाकस्तु गुणीभूतः, अयं शृभावो व्यवस्थितविभाषाविज्ञानात् क्षीरहविषोर्नित्यं भवति । अन्यत्र तु न भवति । श्राणा यवागूः । श्रपिता यवागूरिति । संयोगादेरिति निष्ठानत्वम् । श्राणास्मै नियमेन दीयते श्राणिकः । 'श्राणामांसौदनाट्टिठनि'ति नियमेन दीयमानोपाधिकार्थात्तदस्मै च इत्यर्थे टिठन् । स्त्रियां श्राणिकी । श्रातीत्यादादिकस्य श्रापयतीति चौरादिकस्य ॥ ५७० ॥

पै ओवै शोषणे ॥ पायति । पपौ । पाघ्रेत्यत्र नास्य ग्रहणम् । पारूपस्य लाक्षणिकत्वात् । एजन्तोपदेशसामर्थ्यादशिति पारूपस्य भेदाभावात् । पपौ । पाता । पास्यति । पायतु । अपायत् । पायेत् । आशिषि पायात् । घुमास्थेतीत्वं तद्विशेष 'एर्लिङी'त्येत्वं चास्य न भवति पारूपस्य लाक्षणिकत्वात् । अत एव गातिस्थेति सिज्लुग्विधावपि अस्याग्रहणात् अपासीदिति भवति । पिपासति । पापायते । 'ई हल्यघो'रित्यभ्यस्ताश्रयमीत्वं

Digitized by Google

ङित्सार्वधातुकविषयमितीह भवति । पापाति । पापेति । ईटि गुणः पापीतः । 'ई हल्यघो'रिति ङित्सार्वधातुकपरत्वादीत्वम् । पापति । श्नाभ्य-स्तयोरित्यालोपः । लङि अपापेत् । अपापात् । अपापीतामित्यादि । सिजभ्यस्तेति नित्यं जुसभावे अपापुः । 'लङः शाकटायनस्यैवे'ति विकल्पो नेति धयतावुक्तम् । आशिषि लिङि आर्द्धधातुकत्वात् 'ई हल्यघो'रिती-त्वाभावात् पापायादिति भवति । घुमास्थेति ईत्वमस्य नेति प्रागेवोक्तं पायययि । 'शाच्छासाह्वाव्यावेपां युक्' इति णौ युगागमः । तत्र लाक्षणि-कपारूपस्य ग्रहणमिति वृत्तिन्यासपदमञ्जर्यादिषु । पीत्वा । पानं सरः । पा इति पानार्थं इहार्थे । रक्षणार्थोदादौ ॥ वायति । ववौ । इत्यादि पायतिवत् । णौ वापयति शिरः । आत्वे युक् । 'वो विधूने जुगि'ति अत्र वा गतिगन्धनयोरित्यादादिकस्यैव ग्रहणं तस्यैव विधूनने वृत्तिसंभवादिति व्याख्यातारः । शाच्छासेति युक् तत्रैव वा इति निर्देशात् । वेञ् तन्तुस-न्तानइत्यत्र पठिष्यमाणस्यैव न त्वस्य प्रसजति वानं तु फलम्, ओदित्वा-न्नत्वम् ॥ ५७२ ॥

ष्टै वेष्टने । स्तायति । तस्तौ । स्ताता । स्तापयति । अतिष्ठपत् इत्यादि । अयं च पाठो मैत्रेयस्य । भट्टभास्करोप्यत्रैवानुकूलः । यदाह स्ता-यूनां पतये नम इत्यत्र स्तेना वस्त्रादीनपहरन्ति, स्तायवः । ष्टै वेष्टन-इत्यस्माद्बाहुलकादुणिति । स्वाम्यादयस्तु ष्णै वेष्टनइति पठन्ति, तथा च निरुक्तम् । उष्णीषं स्नायतेर्व्याचरकः । एवमुष्णीषं शिरोवेष्टनम् । स्नायतेः शोभार्थस्य उभयत्रापि संभवादिति । अत एव व्याख्यानात् । ष्णै शोभ-न इत्यपि भूवादौ द्रष्टव्यः । प्रयुज्यते च भारते ॥ पाञ्चाल्याः पद्मपत्राक्ष्याः स्नायन्ति जघनं घनम् । याः स्त्रियो दृष्टवन्त्यस्ताः पुम्भावं मनसा ययुः, इति । क्रियानिघण्टौ च स्नायति स्नायत्याप्लवत इति दैवे च स्नातीति । शौचे स्नायेदिति चेच्छन्ति के च नेति ॥ ५७३ ॥

दैप् शोधने ॥ पकारो ऽदाबिति विशेषणार्थः । अयमेव लाक्षणिका-नामपि घुसंज्ञकानां ग्रहणे लिङ्गम् । दायतीत्यादि पायतिवत् । णिचि दापयति । अदीदपत् । दाण् दाने । देङ् रक्षणइतीहैवार्थे । दाप् लव-

नदत्यदादौ । डुदाञ् दानइति जुहोत्यादौ । दो अवखण्डने दोङ् रक्षणइति दिवादौ ॥ ५७४ ॥

पा पाने । पिबति । पाघ्रेत्यादिना पिबादेशः ॥ पिबेर्गुणप्रतिषेध इति कात्यायनः । वर्द्धमानस्तु लोपः पिबतेरिति लिङ्गाद्गुणो नेति । वृत्तौ तु अकारान्तोयमादेश आद्युदात्त इति अतो लघूपधत्वाभावाच गुणप्रसङ्गः । पपौ । पाता । पास्यति । पिबतु । अपिबत् । पिबेत् । आशिषि पेयात् । 'एर्लिङी'त्येत्वम् । अपात् । गातिस्थेति सिचो लुक् । पिपासति । पेपीयते । घुमास्थेत्यादिनेत्वे द्वित्वम् । पापेति । पापाति । पापीतः । 'ई हल्यघो'रितीत्वम् । पापति । श्नाभ्यस्तयोरित्याल्लोपः । पापितेत्यादाविडि 'आतो लोप इटि चे'त्याल्लोपः । लङि सिजभ्यस्तेति नित्यं जुसि अपापुः । 'लङः शाकटायनस्यैवे'ति विकल्पो नेति धयतावुक्तम् । लिङि पापायात् । अनार्धधातुकत्वात् घुमास्थेतीत्वं न भवति । आशिषि अर्द्धधातुकत्वादीत्वापवादः 'एर्लिङी'त्येत्वम् पापेयात् । लुङि गातिस्थेति सिचो लुकि अपपात् । अपापुः । आत इति जुस् । पाययति । पाययते । न पादमीति निगरणे परस्मैपदनिषेधः । शाच्छासेत्यादिना युक् । णेश्चङि 'लोपः पिबतेरीच्चाभ्यासस्ये'त्युपधाया आकारस्य लोपः । युक्ययमुपधा भवति । अल्लोपस्य यो कृतं स्थानिवदिति स्थानिवत्त्वात् पाय्शब्दस्य द्विर्वचनमीच्चाभ्यासस्येतीकारे अपीप्यत् । तत्र पिबतेरिति निर्देशाद् यङ्लुकि अपापदिति भवति । उत्पिबः । 'पाघ्राध्माधेट्दृशः श' इति कर्तरि शप्रत्यये पिबादेशः । सुरापः । शीधुपः । 'गापोष्टगि'ति कर्मण्युपपदे टक् कित्वात् स्त्रियां सुरापी । अत्र पिबतेः सुराशीध्वोरित्युपपदनियमादुपपदान्तरे 'आतोऽनुपसर्गे क' इति को भवतीति विशेषः । स्त्रियां ङीबभावः चोरपा ब्राह्मणीति । द्वाभ्यां पिबतीति द्विपः 'सुपि स्थ' इत्यत्र सुपीति योगविभागात्तत्र चात इत्यनुवर्त्तनादाकारान्तादस्मात्सुप्युपपदे कप्रत्ययः । एवं कच्छपादयः । प्रपिबन्त्यस्यामिति प्रपा । घञर्थे कविधानमिति कः । प्रपीतिः । 'स्थागापापचो भाव'इति भावे क्तिन् । 'स्त्रियां क्तिनि'त्येव सिद्धे वचनमातश्चोपसर्गइत्यङ्बाधनार्थम् । पीत्वा । घुमास्थेतीत्वम् । प्रपाय । 'न

ल्यपी'तीत्वनिषेधः । निपीयेति पीङो रूपम् । पीत्वास्थिरकः । 'मयूरव्यंसकादयश्चे'ति तत्पुरुषः । समासे नञ्पूर्वे इति क्त्वो ल्यबादेशोऽत एव मयूरव्यंसकादिपाठाच्च भवति । यद्वा अनञिति नञ्सदृशमव्ययं परिगृह्यते तेन नञोऽन्येनाव्ययेन क्त्वान्तस्य समासेऽयं ल्यब्विधिरिति इह नैव प्रसजति । पीतिः । पीयतेऽनेनेति पानं क्षीरस्य पानं क्षीरपानं क्षीरपाणमिति वा 'वा भावकरणयो'रिति पूर्वपदस्थान्निमित्तादुत्तरस्य भावकरणविषयपानकारस्य णत्वविकल्पः । क्षीरं पानं येषां ते क्षीरपाणा उशीनरा इत्यत्र 'पानं देश'इति पूर्वपदस्थान्निमित्तादुत्तरस्य भावकरणविषयपाननकारस्य देशेऽभिधेये नित्यं णत्वम् ॥ (शेषमग्रे)

॥ श्रीः ॥

श्रौतपदार्थनिर्वचनम् ।

अथाग्निष्टोमसम्बन्धिपदार्थनामान्युच्यन्ते ।

(Continued from page 589. Vol. VII.)

अध्वर्युणा वाचं यच्छेति प्रोक्तस्य वाङ्नियमस्य इदानीमेव विसर्गः अबद्धं मनो दरिद्रं चक्षुः सूर्यो ज्योतिषाᳪ श्रेष्ठो दीक्षे मा मा हासीः । अमेध्यदर्शने सत्युक्तमन्त्रेण यजमानः सूर्यमुपतिष्ठते । रात्रौ तु आहवनीयम् । उन्दतीर्बलं धत्तौजो धत्त बलं धत्त मा मे दीक्षां मा तपो निर्वधिष्ट । इमं मन्त्रं पर्जन्येनाभिवृष्टोऽभिवृष्यमाणो वा जपति । अनृतभाषणे कृते सति इमं मे वरुण तत्त्वायामि त्वं नो अग्ने सत्वं नो अग्न इति चतस्रो वारुणीर्ऋचो जपति । देवाञ्जनमगन्यज्ञस्ततो मास्य यज्ञस्याशीरनुवर्धताम् । भूतिर्दध्ना घृतेन मुञ्चतु यज्ञो यज्ञपतिमᳪहसः । दण्डस्य कृष्णाजिनस्य वा विच्छेदे सति इमं मन्त्रं जपति । असंस्कृतपयःपाने यथाविहितस्तनातिक्रमे च जलेना-

वमनं कृत्वा । शिवाः पीता भवथ यूयमापोऽस्माकं येनावु३रे सुशेवाः । इरावतीरनमीवा अनागसः स्वस्ति नो भवथ जीवसे । इति जपति । वमने ष्ठीवने वा जाते । यद्वापि रसस्य मे निरष्ठु विषमस्पृनः । अग्निष्टत्सोमः पृथिवी पुरात्मन् दधातु मे । इति जपति । रेतस्कन्दने सति । यन्मे रेतः परितोषात्तदपिथ । अग्निहोत्रमिव सोमेन तदहं पुनराददे । इति तद्रेतोऽनुमन्त्र्य । इमं मे वरुण तत्त्वायामीति द्वे स्रुवाहुती जुहोति । मूत्रं करिष्यन् पुरीषं वा पृथिव्याः सकाशात् लोष्ठमादत्ते । इयं ते यज्ञिया तनूः । इति । ततो मूत्रं पुरीषं वा तस्मिन् स्थले करोति अपो मुञ्चामि न प्रजा३हो मुच । स्वाहा कृताः पृथिवीमाविशतेति मन्त्रान्ते । तत आचम्य । पृथिव्या सम्भव । इति लोष्ठं पूर्वगृहीतं यथास्थानं निदधाति । कफे निर्गते सति । कफस्या नामापः स्थ स्वाहाकृताः पृथिवीमाविशत । इति जपति । अश्रुपाते जाते । बीभत्सा नामापः स्थ स्वाहा० । इति जपति । स्वेदे निर्गते सति । तपस्या नामापः स्थ स्वाहा० । इति जपति । दुःस्वप्नदर्शने सत्युत्थायाहवनीयसमीपमेत्य । दुःस्वप्नपापस्वप्नोपभुक्तेर्ब्रह्माहमन्तरं करवे नहि स्वप्नमुपयथत । इति जपति । स्वप्ने ऽन्नभोजने दृष्टे । यदन्नमद्यते नक्तं न तत्प्रातः क्षुधो ऽवति । सर्वं तदस्मान्मा हिंसीर्नहि तद्ददृशे दिवा । इति जपति । स्वदेहे रुधिरमुत्पतितं दृष्ट्वा कण्डूयित्वा वा । नमो रुद्रियाभ्योऽद्भ्यः स्वाहा । इति जपति । पर्जन्ये वर्षति सति यदि धावेत्तदा । नमो रुद्राय वास्तोष्पतय आयने विद्रवण उद्याने यत्परायणे । आवर्तने विवर्तने यो गोपायति तं हुवे । इति जपति । अन्येन

दीक्षितेन सह समागमे । कया नश्चित्र आभुवदित्यृचं जपति । देवयजनादन्यत्र स्थाने सूर्योदयास्तमयौ यदि स्यातां तदा । सूर्यो मा देवो देवेभ्यः पातु वायुरन्तरिक्षाद्यजमानोऽग्निर्मा पातु चक्षुषः । सक्षयूष सवितर्विश्वचर्षण एतेभिः सोमनामभिर्विधेम ते तेभिः सोम नामभिर्विधेम ते । इति जपति एतानि दीक्षाव्रतश्रेयप्रायश्चित्तानीत्युच्यन्ते ॥

४६ शयनकाले स्वायतने प्राचीनग्रीवमुत्तरलोम कृष्णाजिनमास्तीर्य । अग्ने त्वꣳसुजागृहि वयꣳ सुमन्दिषीमहि गोपाय नः स्वस्तये प्रबुधे नः पुनर्दद: । अनेन मन्त्रेणाग्न्यभिमुखः शेते । अयं दीक्षितस्य यजमानस्य शयनमन्त्र इत्युच्यते ॥

५० पत्नी गार्हपत्यस्य पश्चात्तूष्णीं शेते । अध्वर्युः मध्यरात्रे यजमानं प्रबोध्य । त्वमग्ने व्रतपा असि देव आ मर्त्येष्वा । त्वं यज्ञेष्वीड्यः । इति यजमानः पयो व्रतयिष्यन्नप आचामति । देवीं धियं मनामहे सुमृडीकामभिष्टये । वर्चोधां यज्ञवाहसꣳ सुपारा नो असद्वशे । इति ततोऽध्वर्युणा दत्तं व्रतं पयः स्वायतने उपविश्य कंसेन परिश्रित्य व्रतयति । ये देवा मनोजाता मनोयुजः सुदक्षा दक्षपितारस्ते नः पान्तु ते नोऽवन्तु तेभ्यो नमस्तेभ्यः स्वाहा । इति प्राश्याचम्य । शिवाः पीता भवथ यूयमापोऽस्माकं योनावुदरे सुशेवाः । इरावतीरनमीवा अनागसः स्वस्ति नो भवथ जीवसे । इति जपति । प्रतिप्रस्थात्रा दत्तं व्रतं पयः परिश्रित्य पत्नी तूष्णीं व्रतयति । उभावपि स्वं स्वं पात्रं निर्णिज्य प्रयच्छतः । इदं व्रतसंज्ञकपयोभक्षणमुच्यते ।

५१ अध्वर्युः अपररात्रे प्रेष्यति । चिस्तनव्रतं दोहयत ग्रीन् ज्योति-

ममतः कुरुत व्रत्य वाचं यच्छ पत्नि वाचं यच्छ । इति अध्वर्युप्रति-
प्रस्थातारौ पूर्ववद्दोहयित्वा श्रपयित्वा पूर्ववत्संस्कृत्य शिक्ये
स्थापयतः । दैवमेव चतुःस्तनं व्रतं पत्न्या भवति । यजमानः
सूर्योदयानन्तरं श्रयेण शालां तिष्ठन् । भूर्भुवः सुवरिति जपित्वा
व्रतं कृणुतेति त्रिरुच्चैर्वदति । अध्वर्युः यज्ञ यजमान इत्याहूय
शालां प्रपादयति । यजमानो गार्हपत्यस्य पश्चादुपविश्य
प्रायणीयेष्ट्या यक्ष्ये इति प्रकृतिवत्सङ्कल्पयति । प्रायणीयेष्टिस-
म्बन्धि हविः । व्रीहिमयश्चरुः । आज्यम् । पञ्च प्रयाजाः
अग्नीषोमावाज्यभागौ । पथ्या स्वस्ति । अग्निः । सोमः । सविता ।
अदितिश्च प्रधानदेवताः । देवा आज्यपा इत्यादि प्रकृतिवत् ।
अस्यामिष्टौ अन्वाधाने नास्ति । अध्वर्युः अधिदाद्दानादि कर्म
प्रकृतिवत्करोति । चरोः पयसि जले वा श्रपणम् । पयसि
श्रपणपक्षे तु व्रतव्रपः पयश्च प्रोक्ष्यामीति विशेषः । यजुर्यो-
गमन्त्रजपान्ते गार्हपत्ये स्मार्तवदाज्यं संस्कृत्याहवनीये स्रुवेण
जुहोति । कविर्यज्ञस्य वितनोति पन्थां नाकस्य पृष्ठे अधिरोचने
दिवः । येन हव्यं वहसि यासि दूत इतः प्रचेता अमुतः सनी-
यान् स्वाहा । इति । कवयेऽग्नय इदम्० । इति यजमान-
स्त्यजति । अयमुपहोमः सोमशोधनादि प्रैषाज्जुहोम इत्युच्यते ॥
५२ अध्वर्युः उपनिष्क्रम्य प्रेष्यति । सोमविक्रयिन् सोमꣳ शोध-
योपरवाणां काले रोहेति चर्मण्यपामन्ते ब्राह्मणो दक्षिणत आस्तां
ता गावो दूरं मा गुर्यासु सोमक्रयणी च सोमवाहनावनड्वाहौ
सोमवाहनमनः प्रक्षालयतोद्धृतफलकम् । इत्यनेन प्रैषेण प्रेषितः
सोमविक्रयी सोमशोधनादि यथोक्तं करोति । ततोऽध्वर्युः
प्रकृतिवत् धृष्ट्यादानादि कृत्वा चातुर्मास्यवत् चरुं श्रपयित्वा ।

Digitized by Google

सूर्यन्ते चक्षुः । वातं प्राणः । द्यां पृष्ठम् । अन्तरिक्षमात्मा । अङ्गैर्यज्ञम् । पृथिवीꣳ शरीरैः । इति चक्षुर्नामकेन वाक्यसमूहेनान्तर्वेदि चरुमासादयति । प्रकृतौ तु समस्तव्याहृतिभिर्हविरासादनम् । प्रयाजशेषेणाभिघारणे विशेषः । प्रथमं ध्रुवां पञ्चकृत्वोऽभिघार्य ततश्चरुमभिघार्य उपभृतमभिघारयति । अस्यामिष्टौ आज्यभागप्रचारो वैकल्पिकः । पृथक् पृथक् चतुर्गृहीतेन ध्रौवाज्येन प्राच्यां दक्षिणस्यां प्रतीच्यां उदीच्यां च क्रमेण पथ्यां स्वस्तिं अग्निं सोमं सवितारं चोपांशु यजति । सर्वत्र दब्धिरसीत्यनुमन्त्रणम् यजमानस्य । अदितिम् चरुणा मध्ये यजति । अन्नाद इत्यनुमन्त्रणम् । अदितियागानन्तरं अध्वर्युः । मरुतो यद्वो दिवः सुम्नायन्तो हवामहे । आ तू न उपगन्तन । इति मारुतीमृचमनुपठति । स्विष्टकृद्यागे विशेषः । जुहूमुपस्तीर्य ध्रुवाज्याच्चतुरवदाय सकृच्चरोरुत्तरार्धादवदाय द्विरभिघार्य चरुसम्बन्धिमेक्षणं जुहूपभृतोरधोभागेन नीत्वा आग्नीध्राय प्रयच्छन्नाह । अतिवालयतादेव मा नुप्राहार्षीः । इति । ततोऽन्याक्रम्य स्विष्टकृता प्रचरन्ति । आग्नीध्रो मेक्षणमग्नेरुपरि प्राङ्नीत्वाऽभ्युक्ष्योत्तरतः सादयति । ततोऽध्वर्युर्जुहूसङ्क्षालनादि करोति । इडावदाने विशेषः । इडामुपस्तीर्य ध्रुवाज्यादष्टकृत्वोऽवदाय द्विश्चरोरवदायाभिघारयति । हविरुच्छिष्टोद्वासनानन्तरं परिकर्मिणः सम्प्रेष्यति । अनुच्छिष्टीकुर्वन्त एतं चरुं व्युद्धृत्य प्राश्नीताथैतां चरुस्थालीꣳ सक्षामकाषामेतन्मेक्षणमेतं वेदमेतद्बर्हिश्चतुष्टयमुदयनीयामुपनिधत्तात् । परिकर्मिणो यथाप्रैषं कुर्वन्ति । स्रुग्विमोक्षानन्तरं तूष्णीमन्तर्वेदि प्रणीता निनीय तूष्णीं ध्रुवामाप्याय्य स्रुचि चतुर्गृहीतं गृहीत्वा स्रुगग्रे स्रुवेण हिरण्यं निष्टक्यं बद्ध्वा

दर्भमूले प्रबध्य जुहूये लम्बमानमवदधाति । इयं ते शुक्र तनुरिदं वर्चस्तया सम्भव भ्राजं गच्छेति मन्त्रेण । जूरसि धृना मनसा जुष्टा विष्णवे तस्यास्ते सत्यसवसः प्रसवे वाचो यन्त्र-मशीय स्वाहा । इत्यन्वारब्धे यजमाने जुहोति । वाचे सोम-क्रयण्यादर्द० मेति यजमानोऽनुमन्त्रयते । इयं सोमक्रयाहुति-रित्युच्यते ॥

५३ पुनश्चतुर्गृहीतं गृहीत्वा स्फ्यमुद्पात्रं बर्हिर्हिरण्यं चादाय एहि यजमानेति तमामन्त्र्य उद्धुरणीहस्तया पत्न्याऽनुगतेन यजमानेन सह पूर्वद्वारेण शालाया बहिर्निष्क्रम्य शालाया अग्रे तिष्ठन् चतुर्गृहीतं स्रुक्स्थमाज्यं यजमानमवेक्षयति । शुक्रमस्यमृतमसि वैश्वदेवꣳ हविः । इति यजुर्मन्त्रेण । हिरण्यमन्तर्धायादित्यमु-दीक्षयति । सूर्यस्य चक्षुरारुहमग्नेरक्ष्णः कनीनिकां यदेतशेभिरीयसे भ्राजमानो विपश्चिता । इति मन्त्रेण । सोमक्रयणीं गां शालाया अग्रे पृष्ठ्या सूत्रस्थाने उदङ्मुखीं स्थितामनुमन्त्रयते । चिदसि मनासि धीरसि दक्षिणासि यज्ञियासि क्षत्रियास्यदितिरस्युभयतः शीर्ष्णी सा नः सुप्राची सुप्रतीची सम्भव मित्रस्त्वा पदि बध्नातु पूषाऽध्वनः पात्विन्द्रायाऽध्यक्षायानु त्वा माता मन्यतामनु पिता नु भ्राता सगर्भ्यो नु सखा सयूथ्यः सा देवि देवमच्छेहीन्द्राय सोमꣳ रुद्रस्त्वा वर्तयतु मित्रस्य पथा स्वस्ति सोमसखा पुनरेहि सह रय्या । इदं सोमक्रयण्यनुमन्त्रणं उच्यते ॥

५४ दक्षिणस्येमस्य सप्तमं पदं जोषयध्वम् । इति प्रेष्यति । उदग्दिशं प्रतिनीयमानायाः सोमक्रयण्या दक्षिणस्य दोष्णः षट्पदान्य-नुक्रामति । तत्रैकैकपदा तु क्रमशः षण्णां मन्त्राणां मध्ये एकैको

मन्त्रः पठनीयः । वस्व्यसि । रुद्रासि । अदितिरसि । आदित्यासि । शुक्रासि । चन्द्रासि । एतैः षड्भिर्मन्त्रैः अध्वर्युः गोर्द्दोष्णः प्रक्षेपस्थाने स्वदक्षिणं पादं प्रक्षिप्य क्रमेण गच्छति । इदं सोमक्रयण्यनुगमनमुच्यते ॥

५५ बृहस्पतिस्त्वा सुम्ने रण्वतु रुद्रो वसुभिराचिकेतु । इत्यनेन मन्त्रेण सप्तमस्य दोष्णः प्रक्षेपस्य स्थानं दक्षिणहस्तेन गृह्णाति स्पृशतीति यावत् । तस्मिन् स्थाने हिरण्यं निधाय परिस्तीर्य परिषिच्य पूर्वाहृतेन चतुर्गृहीतेन । पृथिव्यास्त्वा मूर्धन्नाजिघर्मि देवयजन इडायाः पदे घृतवति स्वाहा । इति मन्त्रेण । सोमक्रयण्या इदमिति याजमानम् । हिरण्यमपनीय । परिलिखितꣳ रक्षः परिलिखिता अरातय इदमहꣳ रक्षसो ग्रीवा अपि कृन्तामि योस्मान् द्वेष्टि यञ्च वयं द्विष्म इदमस्य ग्रीवा अपिकृन्तामि । स्फ्येन पदं परिलिखति सकृन्मन्त्रेण द्विस्तूष्णीम् । अप उपस्पृश्य । स्फ्येनोपसङ्गृह्य पद्धूरण्यां संवपति । अस्मे रायः इति मन्त्रेण । मन्त्रकर्मणोस्त्रिरावृत्तिः । त्वे रायः । इति पद्धूरणीं यजमानाय प्रयच्छति । यजमानः । तोते रायः । इति मन्त्रेण पत्न्यै प्रयच्छति । सन्देवि देव्योर्वश्या पश्यस्व । इति पत्नीं सोमक्रयण्या समीक्षयति । पत्नी । त्वष्टीमती ते सपेय सुरेता रेतो दधाना वीरं विदेय तव सन्दृशि । इति यजमानं समीक्षते । यजमानः । माहꣳरायस्पोषेण वियोषम् । इति सोमक्रयणीं समीक्षते । अध्वर्युः हिरण्यं प्रक्षाल्य मध्यमायामङ्गुलौ बध्वा पददेशे उदकमपनिनीय पत्नीं गमयति । एतावत्कर्म पद्धूरणीयहणमुच्यते ॥

Digitized by Google

५६ ततोऽध्वर्युस्तत्रैव चन्द्रं छागां कृष्णशुक्ले ऊर्णास्तुके उष्णीषं वाससी कृष्णाजिने सोमक्रयणीं चादायोपरवदेशं गत्वा पृच्छति । सोमविक्रयिन् शुद्धस्ते सोमा३ । इति सोमविक्रयी शुद्ध इति ब्रवीति । यजमानः । एष ते गायत्रो भाग इति मे सोमाय ब्रूतात् । एष ते त्रैष्टुभो भाग इति मे सोमाय ब्रूतात् । एष ते जागतो भाग इति मे सोमाय ब्रूतात् । छन्दोमानाꣳ साम्राज्यं गच्छेति मे सोमाय ब्रूतात् । इति मन्त्रैः सुविचितं राजानमुपतिष्ठते । इदं क्रयणाङ्गसोमोपस्थानमित्युच्यते ॥

५७ अध्वर्युः वस्त्रं द्विगुणं कृत्वा चर्मण उत्तरार्धे प्राग्दशमास्तृणाति । अꣳशुना ते अꣳशुः पृच्यतां परुषा परुर्गन्धस्ते काममवतु मदाय रसो अच्युतोऽमात्योऽसि शुक्रस्ते ग्रहः । इति सहिरण्येन पाणिना राजानमभिमृशति । इदं क्रयणाभिमर्शनमित्युच्यते ॥

५८ अभि त्यं देवꣳ सवितारमूण्योः कविक्रतुमर्चामि सत्यसवꣳ रत्नधामभिप्रियं मतिमूर्ध्वा यस्यामतिर्भा अदिद्युतत्सवीमनिहिरण्यपाणिरमिमीत सुक्रतुः कृपा स्वः । इत्यस्य मन्त्रस्य पञ्चकृत्व आवृत्त्या सोमस्य पञ्चमुष्टीर्विमाति । तत्र प्रथमविमानं अङ्गुष्ठसहितया प्रदेशिन्या । द्वितीयं साङ्गुष्ठयोपकनिष्ठिकया । तृतीयं तथैव प्रदेशिन्या । चतुर्थं तथैव कनिष्ठिकया । पञ्चमं तथैव मध्यमया । इति समन्त्रकविमानम् । ततस्तूष्णीं पञ्चकृत्वो विमाति । तच्च कनिष्ठिकया मध्यमया कनिष्ठिकया प्रदेशिन्या महानाम्न्येति क्रमेण । एवं दशकृत्वो मिमानः सन् क्रीयमाणस्य सोमस्यार्धं मुष्टिदशकरूपं द्विगुणिते वस्त्रे गृहीत्वा प्रजा-

Digitized by Google

भ्यस्त्वा इति मन्त्रेणाविशिष्टमर्धं गृह्णाति । तच्च विमिते सोमे प्रक्षिपति । एतत्सोमविमानमित्युच्यते ॥

५९ ततो वस्त्रस्य प्रान्तानेकत्र करोति । प्राणाय त्वा । इति प्रदक्षिणमुष्णीषेण वेष्टयति । व्यानाय त्वा । इति प्रान्तभागानुपगूहति । अङ्गुल्या मध्ये वायुसञ्चारार्थमवकाशं करोति । एतत्सोमवेष्टनमित्युच्यते ॥

६० प्रजास्त्वमनुप्राणिहि प्रजास्त्वामनुप्राणन्तु । इति यजमानं सोममवेक्षयति । ततस्तत्सोमवद्वस्त्रं चर्मणि निदधाति । एतत्सोमावेक्षणमित्युच्यते ॥

६१ सोमविक्रयिणा तस्मिन् गृहीते सति अध्वर्युर्जलेन तदभ्युक्षति । चर्म दूरे प्रक्षिप्योत्थाय पृच्छति । सोमविक्रयिन् क्रय्यस्ते सोमाः ३ । सोमविक्रयी क्रय्य इति प्रत्याह । अध्वर्युराह । मूजवताः ३ । इति । मूजवतो हि इति स प्रत्याह । अध्वर्युराह । गवा ते क्रीणानि । इति सोमक्रयण्या सोमं पणते । ततः क्रीतः सोमः वयांसि व्याचक्ष्व इति सोमविक्रयी प्रत्याह । अध्वर्युः एषा ते सोमक्रयणी चन्द्रं ते छागं ते वस्त्रं ते । ततो हिरण्येन पणते । सोमं ते क्रीणाम्यूर्जस्वन्तं पयस्वन्तं वीर्यावन्तमभिमातिषाहं शुक्रं ते शुक्रेण क्रीणामि चन्द्रं चन्द्रेणामृतममृतेन सम्यत्ते गोः । इति क्रीत्वाय हिरण्यं दर्शयति । अस्मे चन्द्राणि । इति यजमानाय प्रददाति । तपसस्तनूरसि प्रजापतेर्वर्णस्तस्यास्ते सहस्रपोषं पुष्यन्त्याश्चरमेण पशुना क्रीणामि । इति प्रतीचीनग्रीवयाऽजया सोमं राजानं पणते । अस्मे ते बन्धुः । इति यजमानं समीक्षते । तदनन्तरम् मयि ते रायः श्रयन्ताम् ।

Digitized by Google

इति आत्मानं समीक्षते । तदनन्तरमजां प्रदक्षिणमावर्त्य अभ्युत्थ्योदङ्मुखीं तां कौत्साय ददाति । ब्रह्मा । मित्रो न एहि सुमित्रधाः । इति सोमं राजानमादत्ते । इन्द्रस्योरुमाविश दक्षिणमुशन्नुशन्तꣳस्योनः स्योनम् । इति यजमानस्य दक्षिणे ऊरौ सादयति । अध्वर्युः वयः सुपर्णा उपसेदुरिन्द्रं प्रियमेधा ऋषयो नाधमानाः । अपध्वान्तमूर्णुहि पूर्धिचक्षुर्मुमुग्ध्यस्मान्नि धयेऽवबद्धान् । इति कृष्णविषाणया यजमानस्योष्णीषमपनयति । यजमानः । उष्णीषं जलेनाभ्युक्ष्य कौत्साय परिकर्मिणे वा ददाति । दण्डं मैत्रावरुणाय प्रयच्छति । तदानीमध्वर्युर्यजमानं वाचयति । त्वां गावो वृणत राज्याय त्वाꣳ हवन्त मरुतः स्वर्काः । वर्ष्मन् क्षत्रस्य ककुभि शिश्रियाणस्ततो न उग्रो विभजा वसूनि । मित्रावरुणयोस्त्वा बाहुभ्यां प्रशास्त्रोः प्रशिषा-प्रयच्छामि । इति । अध्वर्युः । अस्मे ज्योतिः । इति शुक्लोर्णास्तुक-यजमाने प्रक्षिपति । कृष्णोर्णास्तुकान्तु । इदमहꣳ सर्पाणां दन्द-शूकानां ग्रीवा उपग्रथ्नामि । इत्युपग्रथ्य । सोमविक्रयिणि तमः । इति तया सोमविक्रयिणं भुवोर्विध्यति । सोमक्रयहेतून् पदा-र्थाननुदिशति । स्वानभ्राजाङ्घारे बम्भारे हस्त सुहस्त कृशानवेते वः सोमक्रयणास्तान्रक्षध्वं मा वो दभन् । इति मन्त्रेण । तत-स्तस्मिन्नेव स्थाने उदकुम्भस्थजलं सर्वं प्रक्षिपति । सोमविक्रयिन् क्रय्यस्ते सोमा इत्यारभ्यैतदन्तं कर्म सोमक्रयणमित्युच्यते ॥

(शेषमग्रे)

॥ ओं नमो भगवते मीमांसाद्वयगुरवे श्रीरामानुजाचार्याय ॥

॥ शास्त्रदीपिका ॥

भट्टकुमारिलमतानुगा पूर्वमीमांसासूत्रव्याख्या विषमपदटिप्पणीसमेता ।

ओं श्रीगणेशाय नमः ।

(*Continued from page* 640. Vol VII.)

किं च न शब्दप्रयोगवशेन ज्ञानस्य विषयनिरूपणं शक्यं, विपरीतत्वात् । अर्थसंबद्धशब्दप्रयोगो हि लक्षणं न शब्दमात्रप्रयोगः, प्रत्याय्यप्रत्यायकत्वमेव हि शब्दार्थयोः संबन्धोऽतो यदर्थविषयं ज्ञानं यः शब्दो जनयति स तस्य वाच्यः । अतो ज्ञानविषयनिरूपणापूर्वकं शब्दविषयनिरूपणं, तदधीने तु तस्मिन्दुरुत्तरमितरेतराश्रय[1]मापद्यते । ज्ञानजन्यातिशयभाक्त्वमेव ग्राह्यत्वमिति चेत् । नासावुपलभ्यते ।

न च संभवति भूतभविष्यतोरित्युक्तम् । अथ यत्संप्रयुक्तेन्द्रियजं ज्ञानं यद्व्याप्तलिङ्गजं वा स विषय इति मतं, ततो नेत्रजन्यस्य नीलज्ञानस्य स्पर्शो विषयः स्यात् । अस्ति च स्पर्शस्यापि रूपस्येव संयुक्तसमवायलक्षणस्स संबन्धो नेत्रेण । तथा गन्धलिङ्गस्य रसानुमानस्य रूपमपि विषयः स्यात्, रूपेणापि रसेनेव तस्य व्याप्तत्वात् । तस्माज्ज्ञानात्मकमेव नीलादेर्विषयलक्षणमिति सिद्धं तादात्म्यम् । सहोपलम्भनियमोऽपि ज्ञानार्थयोरनियमव्याप्तं भेदं व्यापकविरुद्धोपलब्ध्या प्रतिषेधदभेदमुपस्थापयति । भिन्नानां घटपटादीनामनियतसहोपलम्भत्वात् । न चासिद्धो वेद्योपलम्भसमये वित्तेरुपलम्भ इति वाच्यम् । उत्तरकालं सहैव ज्ञानेन विषयस्मरणदर्शनात्—ज्ञातो घट इति । न चाननुभूतस्य स्मरणं संभवति । तस्मादवश्यमुत्पत्तिवेलायामेव ज्ञानस्य प्रकाशनमङ्गीकर्तव्यम् ।

न च निराकारस्योपलब्धिरस्तीति, सिद्धं ज्ञानात्मकत्वं नीलादेः ।

---

१ दुरुत्तर इतरेतराश्रय आपद्यते इति युक्तः पाठः ।

अवश्यं च स्वप्नादिबोधे, वन्ध्यासुतो याति, शकुन्ते हस्तिकयूथशतमित्यादौ चात्यन्तासंभवाद्ग्राह्यस्य ज्ञानात्मकत्वमेवाकाराणामभ्युपगन्तव्यम् । तथा-न्यत्राप्यस्तु, तस्माच्च बाह्यमस्तीति प्राप्तेऽभिधीयते "नीलादिवित्तेरात्मांश-ग्राहित्वं केन गृह्यते? १ नात्मना नान्यसंवित्त्या सापि ह्यात्मावसायिनी• ज्ञानस्थैर्यचित्रत्वबाह्यत्वादेरनात्मनः । असतो वा सतो वापि कथं विज्ञानवेद्यता" । विज्ञानवादी हि सर्वमेव विज्ञानमात्मानमेव गृह्णाति नान्यत् । आत्मनैव च गृह्यते नान्येन । तस्याप्यन्यस्य स्वात्मपर्यवसायित्वा-दिति वदति । यथोक्तं "नान्योऽनुभाव्यो बुद्ध्यास्ति तस्या नानुभवोऽपरः । ग्राह्यग्राहकवैधुर्यात्स्वयं सैव प्रकाशते" इति । तमेवं वादिनं प्रत्युच्यते । नीलज्ञानस्यात्मावसायित्वं नीलस्य वा विज्ञानाकारत्वं केन ज्ञानेन गृह्यते? न तावदात्मनैव । न हि नीलमिदमित्यत्र स्वात्मपर्यवसायित्वं नीलाकारस्य च ज्ञानात्मकत्वं प्रकाशते । नीलमात्रप्रकाशनात् । संवेद्यत्वग्राह्यत्वव्या-योगसहोपलम्भनियमादिलिङ्गनिमित्तकेन त्वनुमानेनैव तदवगन्तव्यम् । तदपि त्वनुमानमात्मांशग्राहि चेत् । न ज्ञानान्तरस्य स्वात्मपर्यवसायितां ग्रहीतुमलम् । अथानुमानं न स्वांशग्राहि । ततो नीलादिज्ञानैः किमपराद्धं? यत्तानीदङ्कुरास्पदीभूतबाह्यनीलादिप्रकाशकत्वेनावभासमानान्यपि स्वा-त्मन्येवावरुध्यन्ते । न हि तदेतद्वक्तुं शक्यम् । नानात्मनः संवेदने ग्राह्य-त्वयं सहोपलम्भनियमो वा संभवतीति । सर्वेषामेवैतस्मिन्नेव भवदीये-नुमाने व्यभिचारात् तत्खल्वात्मानमतिक्रम्य नीलादिवित्तेर्नीलाद्यात्मभू-तस्वांशावसायितां गृह्णातीत्यभ्युपगन्तव्यम् । तस्यापि स्वात्मपर्यवसायित्वे नीलबुद्धेस्तद्वशेन नीलस्वांशग्राहिता न सिध्येत् । आह च । "चैत्रादि-प्रत्ययानां च निरालम्बनता यदि । धर्मभूता न गृह्येत साधनोत्थितया धिया । ततो विषयनानात्वात्प्रतियोग्यनिराकृतात् स्वपात्सालम्बनप्राप्तिः सती केन निवार्यते" इति । किं चाज्ञानमित्यस्य ज्ञानस्य–ज्ञानाभावो ग्राह्यः । न च ज्ञानाभावस्य ज्ञानात्मता संभवति । अत्यन्तविपरीतत्वात् । तथा तदेवेदमिति ज्ञाने पूर्वापरकालावस्थायित्वं प्रकाशते ।

१ भातीति युक्तः पाठः ।

न च क्षणिकस्य स्थायित्वमात्मा संभवति तथा विषयबुद्धौ नानाकाराणामवभासो, न चैकस्य नानाकारता संभवति । नन्वर्थस्यापि स्थायित्वमेकस्य च नानाकारत्वं न संभवत्येव, संभवतु वा, मा वा, ज्ञानस्य तावत् तावन्न संभवति, तदसंभवे चार्थाकारो वा स्थायित्वविकल्पे स्वमतम् । प्रत्यक्षसरूपे वा द्विधापि ज्ञानानात्मकयोर्ज्ञानेनावगमात्सिद्धं नः समीहितं तथा बाह्यं नास्तीति निषेधताप्यवश्यं बाह्यं बुद्धावारोपयितव्यं, तावता सिद्धं च बाह्यम् ।

न च ज्ञानाकारता तस्य संभवति, तस्मादेवमादिविरुद्धधर्मावश्यं विज्ञानस्यानात्मग्राहित्वं बलादभ्युपगन्तव्यं भवद्भिरनुमानार्थं च । तदेवं संविदुल्लसितस्य बाह्यस्य संभवे वेद्यत्वादिभिर्नापि[1] हेतुः संभवति । बाह्यस्यैव हि तदा संवेद्यत्वं बलादभ्युपगम्यते । प्रत्युतात्मन एव संवेद्यत्वं न संभवति नीलादिवित्तीनामिदं नीलमिदं पीतमित्यनात्मावभासित्वात्, आत्मावभासाभावात् । अहंप्रत्ययस्तर्हि ज्ञानावलम्बनो भवतु सोऽपि संवेदकालम्बनो न ज्ञानात्मकावलम्बन इत्यात्मवादे वक्ष्यामः । तथा ग्राह्यलक्षणमपि ग्राह्यस्यैव किंचि[2]दन्वेष्टव्यम् । अन्यथा साधनोक्तस्य स्वसंवेदनानुमानस्य नीलादिवित्तिगतं स्वांशविषयत्वं ग्राह्यं न स्यात् । स्थायित्वादयश्च तद्बुद्धीनाम् । तत्तद्धर्ममन्तरेणानुपलम्भात् । ज्ञानजन्यफलभागित्वमेवाभ्यसितव्यम् । ज्ञानक्रिया हि सकर्मिका कर्मभूतेऽर्थे फलं जनयति । पचादिवत् । तच्च फलमैन्द्रियकज्ञानजन्यमापरोक्ष्यम् । लिङ्गादिज्ञानजन्यं तु पारोक्ष्यमित्युच्यते । अस्ति हि विषयाविषयविभागः । विषयेष्वपि पारोक्ष्यापरोक्ष्यविभागः सार्वजनीनः ।

न च फलमन्तरेणायं विभागः संभवतीति तदाश्रीयते । तदेव च फलं कार्यभूतं कारणभूतं विज्ञानमुपकल्पयतीति सिध्यत्यप्रत्यक्षमपि ज्ञानम् । अथवा ज्ञानक्रियाद्वारको यः कर्तृभूतस्यात्मनः कर्मभूतस्य चार्थस्य परस्परसंबन्धो व्याप्तृव्याप्यत्वलक्षणः समानः स प्रत्यक्षावगतो विज्ञानं कल्पयति ।

---

१ ज्ञानत्वं न संभवतीति पाठान्तरम् ।

२ किंचिद्वेष्टव्यम् ।

न ह्यागन्तुककारणमन्तरेणात्मनोर्थं प्रति व्याप्तृत्वमुत्पत्तुमर्हति । तच्च कारणं लोके ज्ञानशब्देनाभिधीयते । येपि स्वप्रकाशां संविदमातिष्ठन्ते तैरप्ययं संबन्धो मानसप्रत्यक्षगम्योऽवश्यमभ्युपगमनीयः । अन्यथा ज्ञातो मया घट इति ज्ञानज्ञेयसंबन्धो ज्ञातृज्ञेयसंबन्धो वा न व्यवहर्तुं शक्यते, यन्मात्रं हि प्रकाशितं तन्मात्रमेव व्यवहर्तुं शक्यते, नान्यत् । इह च संविन्मात्रं स्वयं प्रकाशितम् । अर्थोपि तद्वशात् । ज्ञानसम्बन्धस्तु केन प्रकाशितः ? । सोपि तयैव संविदा प्रकाशत इति चेत् न । तदुत्पत्त्यवस्थायां संबन्धस्यानिष्पन्नत्वात् । प्रकाशकत्वमेव हि संविदो विषयेण संबन्धो नान्यः । तेन जातायां संविदि विषये च प्रकाशिते निष्पद्यमानसंबन्धो न तया संविदा शक्यते विषयीकर्तुम् । विरम्य व्यापारासंभवात् । न हि प्रथममर्थं प्रकाश्य पुनः संबन्धं प्रकाशयितुमर्हति क्षणिकत्वात् । अथ संबन्धोपि स्वयं प्रकाशत इति मन्येथाः, नात्र प्रमाणमस्ति । तस्मान्मानसप्रत्यक्षगम्योऽर्थेन सहात्मनः संबन्धो ज्ञानं कल्पयतीति रमणीयम् । अस्ति हि कोपि संबन्धोर्थेन सहात्मनो मानसप्रत्यक्षगम्यः सर्वजनीनः स ज्ञानस्य कल्पकोथवा ज्ञानजन्योतिशयः कल्पयति ज्ञानम् । अवश्याङ्गीकरणीयश्चायमतिशयः, त्रितयप्रतिभासवादिभिरपि, त्रितयं प्रतिभासत इति वदता ज्ञानज्ञेयज्ञातृष्वनुगतं प्रकाशनपदवाच्यमवश्यमङ्गीकर्तव्यम् । तत्र ज्ञानत्वं तावन्नानुगतम् । तद्धि ज्ञान एव, न ज्ञातृज्ञेययोः, ज्ञेयत्वमपि ज्ञेय एव, न ज्ञातृज्ञानयोः, ज्ञातृत्वं ज्ञातर्येव, न ज्ञानज्ञेययोः । व्यवहारविषयत्वं प्रकाशनत्वमिति चेत् । न संविदि व्यवहाराभावाद् विनष्टत्वात् । शब्दप्रयोगो व्यवहार इति चेत् न । उक्तदोषत्वात् । तदवश्यं प्रकाशनभासनादिपर्यायो धर्मविशेषस्त्रिष्वनुवृत्तो गोत्वमिव गोव्यक्तिष्वस्ति । स च धर्मो ज्ञातरि ज्ञेये च ज्ञानवशाज्जायते, ज्ञानस्य तु स्वाभाविकोऽग्नेरिवौष्ण्यमिति स्वप्रकाशं ज्ञानम् । इतरौ परप्रकाश्यावित्याश्रयणीयम् । तन्निमित्तं च विषयस्य विषयत्वं, व्यवहारादीनां हि विषयलक्षणत्वं प्रागेव दूषितम् । एकदेशिनान्तु व्यवहारनिबन्धनविषयताङ्गीकरणे रजतवित्तेरपि शुक्तिका विषयः स्यात् । न चैवमिच्छन्ति । तदेवमविवादसिद्धेऽर्थगतेऽतिशये तेनैव

ज्ञानस्यानुमानं, पूर्वोक्तेन वा मानसप्रत्यक्षगम्येन संबन्धेन संभवत्यतिक्रान्त-दिवसगतसंख्यावच्चासतोभूतभविष्यतोरविद्यमानत्वेपि धर्मिणः प्रकाश-नधर्मो जायत इति प्रमाणबलादभ्युपगम्यते, अतो न प्रत्यक्षत्वं संविदो-ऽभ्युपगन्तव्यम् ।

न च प्रतीतिबलादपि प्रत्यक्षत्वम् । अर्थावभाससमये संविदः प्रतिभास एव नास्ति नतरामापरोक्ष्यम् । एवं च सहोपलम्भस्यैवाभावात्त-न्नियमो य उक्तः स दूरापास्त इति प्रत्युक्तमेतत् "सहोपलम्भनियमाद-भेदो नीलतद्धियो"रिति । यत्तु पश्चात्स्मरणदर्शनात् ज्ञानमपि प्रागनुभू-तमिति तदप्यसिद्धम् । अर्थ एव हि तदा स्मर्यते । स्मरणाच्च तदेवार्थे-व्याप्तिरात्मनो मनसाऽवगम्यते । तद्वशाच्च तदा स्वेतावज्ज्ञानं कल्पयति । तस्य च ज्ञानस्येन्द्रियादिकारणाभावात्स्मृतित्वं निश्चित्य स्मृतिकारणभूतं पूर्वज्ञानं तदेव कल्पयतीति नास्य स्मरणम् । इतश्च न नीलादेर्ज्ञानात्म-कत्वम् अनुमानादिषु विषयाकाराणां परोक्षत्वात् । ज्ञानस्य च सर्वत्र प्रत्यक्षत्वाभ्युपगमात् । न हि परोक्षाऽपरोक्षयोरेकत्वं युक्तम् । एवमत्यन्ता-सद्रूपत्वेनाभिमतस्य स्थायित्वादेः सद्रूपज्ञानात्मकत्वमत्यन्तासंभाव्यम् । तथा भूतानुमाने भूतत्वमवभासते ।

न च वर्तमानस्य ज्ञानस्य भूतमात्मा भवति । भिन्नत्वेपि ग्राहका-द्ग्राह्यस्य ज्ञानमेवातीतमुत्तरस्य ग्राह्यं नार्थ इति चेत् न । प्रमाणाभावात् । अत्र चातीतं त्रेधा विकल्प्या"तीतं यच्च विज्ञान"मित्यादिना दूषणमुक्तम् । उत्तरमपि त्रेधैव विकल्प्य "ग्राकारकल्पनायां चे"त्यादिना दूषणमुक्तमिति विवेचनीयम् । तस्मादिदमपि वैभाषिकमतमयुक्तमेव, तस्माद्ग्राह्यार्थाकार एवनीलादिर्न ज्ञानाकारः । कथं तर्हि स्वप्ने । तत्रापि बाह्यमेव देशकालान्त-रगतमदृष्टोद्बोधितसंस्कारवशात्स्मर्यमाणं निद्रादूषितमनस्कतया भ्रान्त्या संनिहितदेशकालमिव मन्यते । विस्पष्टं चैतदनन्तरदिवसानुभूतस्य स्वप्ने वर्तमानावभासदर्शनादन्यत्रापि स्वप्ने तथाङ्गीकर्तुं युक्तम् । शिरश्छेदाद्यन्यत्रा-वगतः स्वसंबन्धितया दोषवशादवगम्यते सर्वत्र संसर्गमात्रमसदेवावभा-

Digitized by Google

यते। संसर्गिणस्तु सन्त एव। सेयं विपरीतख्यातिरुच्यते मीमांसकैः। असत्ख्यातिवादिनस्तु संसर्गिणोऽप्यपलपन्तीति विशेषः। शुक्तिरजतवेदनेऽपि विद्यमानैव रजतत्वजातिर्विद्यमानस्यैव शुक्तिकाशकलस्यानात्मभूतेनात्मतयाऽवगम्यते, तथा वन्ध्यासुतादिष्वपि विद्यमान एव सुतशब्दार्थो वन्ध्यान्विततया तत्पदसंनिधिदोषादवगम्यते। यत्तु कैश्चिदेवमादिषु तदाकारावभासमपह्नुत्य विवेकाग्रहणमेव भ्रान्तिरित्युक्तम्। तत्संविद्विरोधादेवोपेक्षणीयम्। को हि नामाङ्गुलिनिपीडितदृष्टिश्चन्द्रद्वित्वं न प्रकाशत इति ब्रूयात्। किं चैक एवायं चन्द्रो न द्वाविति द्वित्वविवेकं चन्द्रस्य स्पष्टमनुसंदधानस्य चक्षुषा द्वित्वभ्रमो जायमानः कथं विवेकाग्रहणनिमित्तः संभवति? एवमवगतदिक्कस्य दिग्भ्रमो नाग्रहनिमित्तः संभवति। कथं पुनर्द्वित्वस्यावगमः। न संस्मरणम्, तद्द्वित्व[1]भावात्। न ग्रह[2]णम्। अप्राप्तस्य चक्षुषा ग्रहणासंभवात्। उच्यते। देशद्वयं नेत्रेण प्राप्तं चन्द्रश्च तयोश्च संसर्गो दोषवशादवगम्यते देशद्वये चन्द्रं प्रतीत्य देशगतं द्वित्वं दोषवशाच्चन्द्रेऽध्यवस्यति। तथा[3]पि पित्तवर्तिपीतत्वं शङ्खस्वरूपं च चक्षुषा गृह्णन्दोषवशात्संबन्धं बुद्ध्यत इत्यवगन्तव्यम्।

किंच यदि सम्यग्रजतबोधे तादात्म्यमवभासते न शुक्तिरजतवेदने ततोऽवभास्यभेदादवभासस्य वैलक्षण्यं प्रागेव बाधकादनुसंधातुं शक्नुयात्। वैलक्षण्यावगमाच्च न प्रवर्तेत।

किंच यदि रजतार्थी शुक्तेरुपादानं कार्यतयावगच्छेत् ततोऽकार्यस्य कार्यतया भानाद्विपरीतख्यात्याप[4]त्तिः। अथ नावगच्छेन्न प्रवर्तेत तत्कार्यावगमाधीनत्वात्प्रवृत्तेः। अथाकार्यत्वानवगमेऽपि कार्यावगतिसादृश्यात्प्रवृत्तिः। ततस्तत्कार्यत्वानवगमे नाकार्यावगतिसादृश्यमप्यस्तीति निवृत्तिरपि स्यात् सादृश्ययोरविशेषात्। न चासति कारणे कारणसदृशं तत्कार्यं कारयितुमर्हति। मासीषधत् शुक्तिका रजतकार्यमाभरणम्।

---

१ पूर्वमनुभवस्याभावादित्यर्थः।
२ ग्रहणमिह प्रत्यक्षम्।
३ अत्र तथैवेति युक्तः पाठ इति प्रतीमः।
४ तथा च परमतप्रवेश इति भावः।

ननु व्रीहिकार्यमपूर्वं नीवाराः साधयन्ति नैवं । व्रीह्यंशाएव तत्र कार्ये कुर्वन्ति । ते च विकलाः सन्तोऽप्यशक्त्यवस्थायां तत्साधनत्वेन यथा-शक्तिप्रयोगाभिधानादवगताइति नाकारणात्तत्सदृशात्कार्योत्पत्तिः । अथ स्वकार्यानवगमेनैव प्रवृत्तेः कारणं, ततो बाह्या अपि वेदार्थे प्रवर्तेरन् अका-र्यस्यानवगमात् । अथ स्वकार्यमेव तेऽवगच्छेयुः, ततः कार्यस्याकार्यतया-वगमात् विपरीतख्यातिरित्यास्तां तावत् । तस्मात्स्वप्नादिष्वपि बाह्यस्यै-वाऽन्यथावभासात्सिद्धं सर्वत्र बाह्यालम्बनत्वम् । अथ स्वप्नवत्प्रत्ययत्वात् स्तम्भादिज्ञानमप्यन्यथा ज्ञातमित्यनुमीयते । तदसत् । तथा सति प्रत्य-यत्वाविशेषात्त्वदीयमप्यनुमानं मिथ्या स्यात् । मिथ्यात्वप्रतिषेधानुमान-स्याऽमिथ्यात्वे वा तत्रैव हेतोर्व्यभिचारः । तस्मात्सूक्तं यस्य च दुष्टं करणं यत्र च मिथ्येति प्रत्ययः स एवासमीचीनः प्रत्ययो नान्य इति । तस्मादव्यभिचारात्प्रत्यक्षं न परीक्षितव्यम् ॥

॥ इति शून्यवादः ॥ (शेषमग्रे)

॥ श्रीः ॥

॥ ओं नमः श्रीमते भगवते रामानुजाचार्याय ॥

अथ श्रीभाष्यं विशिष्टाद्वैतपरं रामानुजदर्शनम्

श्रुतप्रकाशिकासमेतं विषमपदटिप्पणीसहितम्

तत्र प्रथमाऽध्यायस्यावशेषः ।

(*Continued from page* 635. VOL VII.)

श्रु॰ जात्याश्रयनिमित्तदुष्टादन्नात्कायशुद्धिर्विवेक इत्यत्र निर्व-चनम् "आहारशुद्धौ सत्त्वशुद्धिः सत्त्वशुद्धौ ध्रुवा स्मृ-ति"रिति । विमोकः—कामानभिष्वङ्ग इति "शान्तउपा-सीते"ति निर्वचनम् आरम्भणसंशीलनं—पुनःपुनरभ्यासः, निर्वचनं च स्मार्त्तमुदाहृतं भाष्य¹कारेण, "सदा तद्भाव-भावित" इति ॥

---

१ अत्र भाष्यकारशब्देन द्रमिडाचार्याभिमतो रामानुजाचार्याणाम् ।

टी० ॥ प्रथमं विवेकस्वरूपविषयवाक्यमुदाहरति "जात्याश्रये"ति आहारविषयविवेचनं विवेक-शब्देन विवक्षितं भवति, दुष्टाहारात् सात्त्विकाहाराणां विवेचनं विवेकः, जातिदुष्टाः कलञ्जगृञ्जनादयः। आश्रयो-दुष्टस्वामिपुरुषः, अभिशस्तपतितचण्डालादिद्रव्यमाश्रयदुष्टम्। उच्छिष्टकेशाद्युपहतं निमित्तदुष्टम्। एतत्त्रिविधदोषरहिताहारविवेचनफलभूतकायशुद्धौ विवेकशब्द उपचरितः। यद्वा विविक्ताहारसेवया राजसतामसाप्यायितदेहात् स्वदेहस्य विवेचनं विवेकः। अशुद्धेभ्यो विवेचनं हि शुद्धिरिति शब्दो भाष्यकारीयः। अत्र निर्वचनमिति च भाष्यग्रन्थः। निर्वचनं निष्कृष्टं वचनम् अप्रमाणेभ्यो निष्कृष्टं प्रमाणभूतं वचनमित्यर्थः। आहारशुद्धाविन्यादिनिर्वचनं, विमोकः-कामानभिष्वङ्गः-विषयमभुञ्जान स्यातुं शक्नोति येन स विकारोऽभिष्वङ्गः "कामात् क्रोधोऽभिजायत" इत्यादिवचनात् क्रोधाद्यभावश्चात्रफलितः-"शान्त उपासीते"ति निर्वचने शान्तशब्देन रागद्वेषाद्यभावो-विवक्षितः, अभ्यासः-आलम्बनं शुभाश्रयः, तस्य संशीलनं कथमेतत्साधनं साध्यं हीदं "शुचौ देशे प्रतिष्ठाप्ये"त्याद्युक्तदेशकालविशेषाभ्यसनीया योगशब्दवाच्या ध्रुवानुस्मृतिर्हि साध्या, इदं तु योगकालकर्तव्यध्यानानुग्राहकं सदा संशीलनं "सदा तद्भावभावित" इति हि वक्ष्यति, सदा भगवत्संशीलनाभावे योगकालेऽपि कालान्तरसंशीलितं विषयान्तरं बुद्धिस्थं स्यात्, अतो न साध्याविशिष्टत्वम् आलम्बनसंशीलनस्य, निर्वचनं च स्मार्तमुदाहृतं भाष्यकारेणेत्यनेन पूर्वोपात्तनिर्वचनान्यपि द्रमिडभाष्योक्तानीति ज्ञायते। "अथ मुनि"रिति श्रौतनिर्वचनम्। तस्य न्यायोपन्याससापेक्षत्वेन "सहकार्यन्तरविधि"रित्यधिकरणे व्याख्येयत्वात्, स्मार्तनिर्वचनस्य च स्पष्टार्थत्वाच्च स्मार्तनिर्वचनमुदाहृतम् "तस्मात्सर्वेषु कालेषु मामनुस्मरे"त्येवमन्तं वचनजातमिहाभिप्रेतम् ॥

श्रु० "पञ्चमहायज्ञानुष्ठानं शक्तितः क्रिये"ति निर्वचनं "क्रियावानेष ब्रह्मविदां वरिष्ठः" "तमेतं वेदानुवचनेन ब्राह्मणा विविदिषन्ति यज्ञेन दानेन तपसाऽनाशकेने"ति च

सत्यार्जवदयादानाहिंसानभिध्याः कल्याणानीति निर्वचनम् ॥

टी० ॥ 'पञ्चमहायज्ञे''ति शङ्कितः, न हि शास्त्रमशक्यं विदधाति "क्रियावानेव" इति सविहितवाक्यम् । "ब्रह्मे''ति ब्रह्मविदां मध्ये वरिष्ठः, न हि ब्रह्मविविदिषुणामित्युक्तम् । क्रिया-शब्दार्थविशदीकरणायाह "तमेत"मिति सत्यं-भूतहितम् । आर्जवं-मनोवाक्कायानामैकरूप्यम्, दया-स्वार्थनिरपेक्षपरदुःखासहिष्णुत्वम् । अहिंसा-करणत्रयेणापि परपीडानिवृत्तिः, । दानं-लोभराहित्यम् अभिध्या-परकीये स्वबुद्धिः । यद्वा निष्फलचिन्ता । अथवा पराकृतापराधचिन्ता[१] तद्राहित्यमनभिध्या ॥

सू० "सत्येन लभ्यस्तेषामेवैष विरजो ब्रह्मलोक" इत्यादि देशकालवैगुण्याच्छोकवस्त्वाद्यनुस्मृतेश्च, तज्जं दैन्यमभास्वरत्वं मनसोऽवसादस्तद्विपर्ययोऽनवसाद इति निर्वचनम् "नायमात्मा बलहीनेन लभ्य इति ॥

टी० ॥ "सत्येने''ति इत्यादीत्यादि-शब्देन आर्जवादिप्रतिपादकवाक्यजातं क्रोडीकृतम् "देशे''त्यादि अनवसादानुद्धर्षयोरवसादोद्धर्षविपर्ययरूपत्वादवसादोद्धर्षलक्षणमात्रमुक्तं वाक्यकारेण, तद्विपर्ययरूपोनयोऽर्थोऽत्सिध्यतीति वाक्यकाराभिप्रायः । शोकवस्तु-शोकनिमित्तवस्तु अतीतं पुत्रमरणादि । आदि-शब्देन भयनिमित्तमागामि विवक्षितम् अतीतविषयो हि शोकः, आगामिविषयं च भयम् "अभास्वरत्वमि''ति दैन्यशब्दविवरणम् अभीष्टकार्यप्रवृत्त्यक्षमत्वरूपं दैन्यमित्युक्तं भवति "भास्वरत्वविरोधी''ति वा दैन्यविशेषणं, च-शब्दोभिन्नक्रमः तज्जं च-दैन्यजं चेत्यर्थः, बन्धुजनदैन्ये दृष्टे हि दैन्यं स्यात् देशकालवैगुण्यशोकवस्त्वाद्यनुस्मृतिहेतुकं मनसो भास्वरत्वाभावरूपं भास्वरत्वविरोधि वा दैन्यं दैन्यजं च दैन्यं मनसोऽवसाद इत्यर्थः । यद्वा भिन्नवाक्यतया योजनीयं देशकालवैगुण्यशोकवस्त्वाद्यनुस्मृतिजनितं

१ पराकृतापकारचिन्ता इति ख· पु· पा· ।

मनसो भास्वरत्वमवसादः । किमुक्तं भवती? त्याह "तज्जं दैन्य"मिति तच्चाभास्वरत्वं, तज्जम्—उक्तहेतुजं दैन्यमिति व्याख्येयव्याख्यानरूपं वाक्यद्वयमिति "तद्विपर्यय"इत्यादिभाष्यान्वयः । बलहीनेन—मनोबलहीनेन ॥

मू० तद्विपर्ययजा तुष्टिरुद्धर्षस्तद्विपर्ययोऽनुद्धर्ष इति, अतिसंतोषस्य विरोधीत्यर्थः, निर्वचनमपि "शान्तोदान्त" इति, एवं नियमयुक्तस्याश्रमविहितकर्मानुष्ठानेनैव विद्यानिष्पत्तिरित्युक्तं भवति, तथाच श्रुत्यन्तरम् "विद्यां चाविद्यां च यस्तद्वेदोभयं सह अविद्यया मृत्युं तीर्त्वा विद्ययाऽमृतमश्नुत" इति ।

टी० ॥ तद्विपर्ययजा—देशकालसानुकूल्यप्रियवस्त्वाद्यनुस्मृतिजा तुष्टिरुद्धर्ष इत्येतावदेव वाक्यं तद्विपर्ययोऽनुद्धर्ष इत्यर्थसिद्धं कथं स्वाध्यायशौचसंतोषतपांसि नियतात्मवानित्यपेक्षितस्य त्याज्यत्व? मित्यत्राह "अतिसंतोषस्य विरोधी इत्यर्थः" इति च । न केवलं संतोष एव विरोधी अतिसंतोषस्य विरोधीति वार्थः, यथान्यविषयेष्वेव प्रवृत्तिः स्यात्तथा संतोषोऽतिसंतोषः स त्याज्य इत्युक्तं भवति । निर्वचनमपीत्यपि—शब्दः सर्वनिर्वचनसमुच्चये । एवं पदार्था व्याख्याताः । तल्लब्धिरित्यादेर्वाक्यकारवचनस्य वाक्यार्थमाह । "एवमि"ति । "एवं नियमयुक्तस्याश्रमविहितकर्मानुष्ठाने"ति । पृथङ्निर्देशेन प्रवृत्तिनिवृत्तिरूपकोटिद्वयविभागो दर्शितः । एतेन पदद्वयेन केवलशमादि केवलकर्म च व्यावर्तितम् । शमादि कर्म च समुच्चित्याङ्गमित्यर्थः । यद्विविदिषासाधनमिति त्वयोक्तं तेनैव विद्यानिष्पत्तिरित्येवकाराभिप्राय इत्युक्तं भवति—इति वाक्यार्थो भवतीत्यर्थः । विद्यां चाविद्यां चेति श्रुतेः शङ्करयादवप्रकाशाभिमतयोजनाव्युदासार्थं व्याचिख्यासुरुपादत्ते । "तथाचे" ति । अनेन कर्मणोपेक्षितत्वे सन्निहितश्रुत्यन्तरं च दर्शितं भवति । तथा च श्रुत्यन्तरं यदन्यथा भवद्भिर्व्याख्यातं तच्चास्मदुक्तार्थानुगुणमिति तथा—शब्दमन्तर—शब्दं च प्रयुञ्जानस्य भावः । सन्निहिततया यज्ञादिवाक्यवैलक्षण्यं चान्तरशब्दाभिप्रेतम् ॥

मू० अथाविद्याशब्दाभिहितं वर्णाश्रमविहितं कर्म, अविद्यया कर्मणा ।

टी० ॥ अस्मिन्वाक्ये न कर्मवाची शब्दः श्रूयत इत्यत्राह "अत्रे"ति अत्र—श्रुतिवाक्ये नन्वनात्मन्यात्मबुद्धिर्येत्यादिषु अविद्याशब्दाभिहितं वर्णाश्रमविहितं कर्मास्तु ततः किमुक्तं भवती? त्याशङ्कायां पदान्तराण्यपि विवृण्वन् वाक्यार्थमाह "अविद्यये"ति अविद्यया—कर्मणा, विद्यया—ज्ञानेनेत्यत्र कर्मज्ञानशब्दाभ्यां "कषायपक्तिः कर्माणि ज्ञानं तु परमा गतिः कषाये कर्मभिः पक्वे ततो ज्ञानं प्रवर्त्तते" इति स्मृतिः स्वोपजीव्यार्था स्मारिता भवति, कर्माणि कषायपक्तिः—कषायपक्तिनिमित्तानि कषायशब्दः पापपरः, धर्मेण पापमनुदतीत्यनेनैकार्थ्यात् कषायशब्दस्य रागादिपरत्वेपि तत्पक्तिहेतुत्वं पापनिवर्हणद्वारा ज्ञानं परमा गतिः—परमगत्युपायः उभयत्र कारणे कार्योपचारः कर्मभिः कषायेपक्वे ततो ज्ञानं प्रवर्तते—प्रसरतीत्यर्थः अत्रोपायविरोधिनिरासकत्वं कर्मणः स्पष्टम् ।

न च विविदिषा प्रवर्त्तते मोक्षः प्रवर्त्तेत इति वोक्तम् अपितु ज्ञानं प्रवर्त्तेत इत्येवोक्तम् ॥

मू० मृत्युं--ज्ञानोत्पत्तिविरोधिप्राचीनम् कर्म, तीर्त्वा—अपोह्य विद्यया—ज्ञानेनामृत्युं—ब्रह्माश्नुते--प्राप्नोतीत्यर्थः ॥

टी० ॥ अस्य वाक्यस्यार्थमुपजीव्याह "मृत्युं ज्ञानोत्पत्तिविरोधी"ति न तु ब्रह्मप्राप्तिविरोधि । न च विविदिषाविरोधीत्यर्थः । उपेयविरोधिकर्मणो ज्ञाननिवर्त्यत्वं श्रुतिस्मृतिशतसिद्धम् । यथा "तमेव विदित्वाऽतिमृत्युमेति नान्यः पन्थाः" । एव"मेवं विदि पापं कर्म न श्लिष्यते" । "क्षीयन्ते चास्य कर्माणि तस्मिन् दृष्टे परावरे" । "निचाय्य तं मृत्युमुखात् प्रमुच्यते" "ज्ञात्वा देवं मुच्यते सर्वपाशैः" । "ज्ञानाग्निः सर्वकर्माणि भस्मसात्कुरुते तथे"ति । एवमुपेयविरोधिनो ज्ञाननिवर्त्यत्वश्रवणेन परिशेषाच्चान्यः पन्था इत्युपेयविरोधिनिरासे उपायान्तरनिषेधस्वारस्यात् समुच्चयपक्षे कर्मणोप्युपायतया वेदनव्यतिरिक्तत्वगोचरान्यशब्दस्य संकोचप्रसङ्गात् । "यज्ञेन विविदिष-

न्ती''ति कर्मण उपायहेतुत्वस्य कण्ठोक्त्या "कषाये कर्मभिः पक्वे ततो ज्ञानं प्रवर्तते" इति स्मृत्यानुगुण्याच्च सामान्येन मृत्युशब्देन प्रतिपन्नमपि निरसनीयम् उपायविरोधिकर्मरूपे विशेषे पर्यवस्यति । तथा विविदिषासाधनत्वस्य प्रागुक्तान्योन्याश्रयनिरस्तत्वेन परिशेषाद्विविदिषन्तीत्यत्र प्रकृतिप्रत्ययार्थयोर्वेदनतदिच्छयोरविशेषेण यज्ञादीनां साधनत्वे प्रतीतेऽपि "ततो ज्ञानं प्रवर्तते" इति स्मृत्यानुगुण्यादिष्यमाणप्रकृत्यर्थप्राधान्यस्य नीतिविद्भिर्निर्णीतत्वाच्च प्रकृत्यर्थभूतवेदनसाधनत्वं सिद्धम् । तस्मादुपायविरोधि कर्मैवात्र मृत्युशब्दवाच्यमविद्यानिवर्त्यमित्यभिप्रायः । उपासनरूपं न्यासरूपं चोपेयविरोधिनिरासकं ज्ञानम् उत्तरपूर्वाघयोरुभयोरपि निरासकं स्यादिति तद्व्यावृत्त्यर्थं प्राचीनमित्युक्तम् । उपायविरोधिनिरासकं कर्म प्राचीनमेव पापं शमयति न नूतनाघमित्यर्थः । तीर्त्वेति पदं व्याचष्टे । "अपोह्ये"ति । न त्वेतं सेतुं तीर्त्वेतिवत् प्राप्तिवचन इत्यर्थः । अविद्यया तीर्त्वेति पदद्वयव्याख्यानेन शङ्करमतयोजनाव्यावृत्तिः, अज्ञानेन संसारं प्राप्य स्थित इति तद्योजना, तन्मते अविद्याया ज्ञातव्यत्वं च हेयत्वेन, अविद्याशब्दो विविदिषाविरोधिनिवर्तककर्मवाचीति वा शङ्कराभिमतयोजना स्यात् अविद्याशब्द उपेयविरोधिनिवर्तककर्मवाचीति यादवप्रकाशाभिमतयोजना, ज्ञानोत्पत्तिविरोधीति मृत्युशब्दव्याख्यानेन तदुभयव्युदासः ॥

श्रु० मृत्युतरणोपायतया प्रतीता विद्या, विद्येतरद्विहितं कर्मैव ।

टी० ॥ अयमविद्या-शब्दः संसारहेतुभूताज्ञानपरः किं न स्यात्? कथं च तस्य कर्मवाचित्वमि? त्यत्राह "मृत्युतरणे"ति तरतेरुत्तरणवाचित्वं स्वरससिद्धम्, प्राप्तिवाचित्वे तु स्वारस्यभङ्ग इत्यभिप्रेतम् । अविद्याशब्दस्य कर्मवाचित्वं दर्शयति "विद्येतरदि"ति तदन्यार्थे नञिति भावः, विहितं कर्मैवेत्येवकारेणाज्ञानमविहितं कर्म च व्यावर्त्यते, अत्र "विद्यां चाविद्यां चे"ति च-शब्दावुक्तसमुच्चयपरौ । विद्यानुबन्धि कर्मानुबन्धि च यदनुक्तं तत्समुच्चेतव्यं विद्यानुबन्धिशमदमादि, कर्मानुबन्धि फलाभिसंधिकर्तृत्वाभिमानराहित्यादिकं तदुभयं च-शब्दसमुच्चेतव्यम् । यद्वा "धर्मे चार्थे च कामे च मोक्षे

च भरतर्षभ" ? इत्यत्र च–शब्दवदत्राप्युक्तार्थविरोधिसमुच्चयपरौ च–शब्दौ स्याताम् विद्याविरोधि कर्मविरोधि च चशब्दाभ्यां हानार्थं ज्ञातव्यतया समुच्चिते । भवतः विद्या–ब्रह्मज्ञानं तद्विरोधि तदितरविषयतद्विषयरागद्वेषादिकम् अविद्या विद्याङ्गं कर्म तद्विरोधि संसारहेतुभूतं फलाभिसंध्यादिसहितं कर्म पापञ्च ज्ञातव्यमिति तदुभयं हानार्थम् ज्ञातव्यमिति च–शब्दयोरभिप्रायः । यद्वा । प्रतिपदद्योतको चशब्दौ भवतः । "यथा धर्मे चार्थे च कामे चे"ति । प्रतिपदं यदभिधेयं तस्य समुच्चयद्योतकत्वं प्रतिपदद्योतकत्वम् तच्चापि स्यात् ॥

सू० यथोक्तम् "इयाज सोऽपि सुबहून् यज्ञान् ज्ञानव्यपाश्रयः, ब्रह्मविद्यामधिष्ठाय तर्त्तुं मृत्युमविद्यये"ति ज्ञानविरोधि च कर्म पुण्यपापरूपम्, ज्ञानोत्पत्तिविरोधित्वेनानिष्टफलतयोभयोरपि पापशब्दाभिधेयत्वम् ।

टी० ॥ अस्मिन्वाक्ये अविद्याशब्दतरणशब्दयोरुक्तार्थपरत्वस्यापनायोपबृंहणवचनं दर्शयति "यथोक्त"मिति । ज्ञानव्यपाश्रयः–आगमोत्थज्ञानवान् । ब्रह्मविद्यामधिष्ठाय–उपासनात्मकज्ञानं साध्यत्वेनावलम्ब्येत्यर्थः ज्ञानविद्याशब्दयोरर्थभेदबुभुत्सायामागमोत्थविवेकादिजन्यज्ञानयोः प्रकृतत्वात् तत्परत्वाश्रयणं हि युक्तम् । तर्त्तुं मृत्युमित्यनेन तरतेः प्राप्तिवाचित्वशङ्का व्युदस्ता, न हि संसार[1]प्राप्तं ब्रह्मविदा केशिध्वजेन नृपेण यज्ञादिकर्मानुष्ठीयते, मृत्युशब्दस्य विविदिषाविरोधिकर्मपरत्वमपि न शङ्कनीयम्, ज्ञानव्यपाश्रय इत्यनेन शास्त्रजन्यज्ञानवत्ताया अभिहितत्वात् ब्रह्मविद्यामधिष्ठायेत्युक्तत्वाच्च । न हि ब्रह्मविदिच्छामधिष्ठायेत्युक्तम् । कथं ज्ञानोत्पत्तिविरोधि प्राचीनं कर्मेति पुण्यपापसाधारणकर्मशब्देन कर्ममात्रं निरसनीयमित्युक्तं श्रुतिर्हि "धर्मेण पापमपनुदती"ति पापरूपविशेषस्य निरसनीयत्वमाहेति शङ्कायां तत्रापि पापशब्दस्य पुण्यपापपरत्वं दर्शयितुं पुण्यपापयोरुभयोरपि पापशब्दवाच्यत्वोपपादनाय तयोर्ज्ञानोत्पत्तिविरोधि-

(१) संसारं प्राप्तुमिति पुस्तकान्तर पाठः ।

Digitized by Google

त्वमाह "ज्ञानविरोधि चे"ति च:शङ्काभिवृत्तौ पुण्यपापे उभे अपि ज्ञानविरोधिनी चेत् कथं तयोरन्यतरस्य पापस्य निरसनीयत्वमन्यतरस्य पुण्यस्य निरासकत्वं च ब्रूयत इत्यत्राह "उभयोरपी"ति तयोर्द्वयोरपि निवर्त्यत्वं फलाभिसंध्यादि रहितस्य धर्मान्तरस्यैव निवर्तकत्वं च विवक्षितमिति भावः। कथमुभयोः पापशब्दवाच्यता? तत्राह "ब्रह्मज्ञानोत्पत्ती"ति "अनिष्टफलतये"ति प्रवृत्तिनिमित्तसूचनम्। मुक्तौ विवक्षित्वे सत्यनिष्टफलासाधारणकारणत्वं पापत्वमिति भावः। अत एव शास्त्रादावीश्वरे च मातिव्याप्तिः "वासुदेवे मनो यस्य जपहोमार्चनादिषु तस्यान्तरायो मैत्रेय? देवेन्द्रत्वादिकं फलम्", एते वै निरयास्तात? स्थानस्य परमात्मन इत्यादिभिः पुण्यस्यापि मुमुक्षुं प्रत्यनिष्टफलप्रदत्वं सिद्धम्। श्रुतिश्च दुष्कृतेन सह पूर्वनिर्दिष्टं सुकृतमपि पाप्मशब्देन निर्दिशन्ती निगमयति "नैतं सेतुमहोरात्रे तरतो न जरा न मृत्युर्न शोको न सुकृतं दुष्कृतं सर्वे पाप्मानोऽतो निवर्तन्ते" इति। न चानुक्तपापान्तरविषयपापशब्दः, दुष्कृतशब्दस्य संप्रतिपन्नसमस्तपापसाधारणतयानुक्तपापान्तरासंभवेन तद्विषयत्वायोगात्संभवेपि न तन्मात्रपापान्तरविषयः पाप्मशब्दः, उक्तसर्वहेयनिवृत्तिसंवादितयोपात्ते "अपहतपाप्मा ह्येष ब्रह्मलोक" इत्यनन्तरवाक्ये पाप्मशब्दस्य सर्वहेयविषयत्वदर्शनात्। न ह्यनुक्तकतिपयपापनिवृत्त्युक्तो उक्तसर्वहेयनिवृत्तिसंवादसिद्धिः शोकादिषु पापशब्दस्यामुख्यत्वेपि सुकृतदुष्कृतयोः प्रवृत्तिनिमित्तसंभवाच्च मुख्यत्वं त्याज्यम् क्वचिदमुख्यस्य सर्वत्रामुख्यत्वनियमाभावात्, अतः "सर्वे पाप्मान" इत्यत्राजहल्लक्षणा, छत्रि-न्यायात् "धर्मेण पाप"मित्यत्र तु मुख्यत्वमेव ॥

मू० अस्य च ज्ञानोत्पत्तिविरोधित्वं ज्ञानोत्पत्तिहेतुभूतशुद्धसत्त्वविरोधिरजस्तमोविवृद्धिद्वारेण, पापस्य च ज्ञानोत्पत्तिविरोधित्वम् "एष एवासाधु कर्म कारयति तं यमधो निनीषती"ति श्रुत्याऽवगम्यते ॥

१ देवदेहाप्तिर्वा विशेषत इन्द्रशरीराप्तिरेव वा तस्य भगवत्यनन्यस्यान्तरायो व्यवधायिका भवति तादृशशरीरलाभेऽपि तेषां विद्विष्ट इति भावः।

टी० ॥ कथं पापस्य ज्ञानविरोधित्वं? रजस्तमसोर्हि तदवगम्यत इति शङ्कायां द्वारद्वारिभावादविरोधमाह "अस्ये"ति पापस्य रजस्तमसोश्च ज्ञानविरोधित्वे प्रामाणिके सति द्वारद्वारिभावः कल्पनीय इत्यत्राह "पापस्य चे"ति नन्वियं श्रुतिर्निरयनिनीषाविषया किं न स्यात्? उन्नयनप्रत्यनीकत्वादधोनयनस्येति । ब्रूमः—अत्र विवक्षितमुन्नयनहेतुत्वं ह्युपासननिष्पादनरूपम् । न चोन्नयनमपि नाकादिनयनमिति शङ्कनीयं "एभ्यो लोकेभ्य उन्निनीषती"त्यत्र गतस्य समस्तलोकेभ्य उन्नयनस्यापवर्गप्रापणरूपत्वात् तर्हि गर्भजन्मजरामरणादिसंसारप्रापणमधोनयनं स्यात् न तूपासननिरोध इति चेत् न। उन्नयनस्य ज्ञानोत्पादनद्वारकत्वावगमात् "यं त्वं मनुष्याय हिततमं मन्यसे" इत्युपक्रमवाक्येन मामुपास्स्वेति विधित्सितस्य उपासनस्य ह्यव्यवहितोपायत्वमवगतम् । "नान्यः पन्था" इत्यादीनि च श्रुत्यन्तराणि तथावगमयन्ति, तत्र कर्मणामपवर्गं प्रत्यव्यवहितोपायत्वे विरुध्येत, अत उपक्रमाद्यविरोधात् साधुकर्मणामपवर्गं प्रत्युपायत्वमुपासनद्वारकमवसीयते, अतः कर्मणामुन्नयनहेतुत्वमुपासननिष्पादनरूपमिति तद्विपरीतमधोनयनमुपासनप्रतिबन्धरूपमिति स्फुटतरमवगम्यते। किं च यद्यप्युन्नयनाधोनयने स्वर्गनरकप्रापणरूपे तथाप्यसाधुकर्मणां ज्ञानविरोधित्वं सिद्ध्यति तथा हि उन्निनीषाधोनिनीषयोर्निर्हेतुकत्वे परमात्मनो वैषम्यनैर्घृण्यप्रसङ्गात् नेतव्यचेतनगोचरं यद्वृत्तद्वयं गतिद्वयनिनीषानिमित्तातिप्रभूतपुण्यपापकर्तृविषयं विज्ञायते । तत्र गतिद्वयपर्याप्तोत्तरोत्तरसाध्वसाधुकर्मकारयितृत्वमीश्वरस्य, न भूतावेशादिवज्जीवबुद्ध्यनपेक्षं भवति । तथा सति ज्ञानचिकीर्षाद्यभावाद्दारुयन्त्रकादिनर्तकादेरिव संसारिणां शास्त्रवश्यत्वाभावेन कर्मफलभोगानुपपत्तेः। एवं संसारिकर्मफलभोक्तृत्वान्यथानुपपत्तिरूपं न्यायानुगृहीतम् "एष एवे"त्यादिकं वाक्यद्वयं ज्ञानप्रदानद्वारककारयितृत्वविषयमवसीयते, तथा सति स्मृत्यनुग्रहश्च भवति । "न देवा यष्टिमादाय रक्षन्ति पशुपालवत् । यं हि रक्षितुमिच्छन्ति बुद्ध्या संयोजयन्ति तम् ॥ यस्मै देवाः प्रयच्छन्ति पुरुषाय पराभवं बुद्धिं तस्यापकर्षन्ति सोऽपनीतो विनश्यती"ति ह्युच्यते तथा "पुण्यं प्रज्ञां वर्धयति क्रियमाणं पुनः पुनः । वृद्ध-

Digitized by Google

प्रज्ञः पुण्यमेव नित्यमारभते नरः पापं प्रज्ञां नाशयति क्रियमाणं पुनः पुनः। नष्टप्रज्ञः पापमेव नित्यमारभते नरः" । इति च, तत्र बुद्धिमपकर्षन्ति प्रज्ञां नाशयन्ति च सम्यग्ज्ञानहानिपूर्वकतद्विपरीतज्ञान[1]निष्पत्तिरिह विवक्षिता अन्यथा कर्मान्तरप्रारम्भानुपपत्तेः, यद्यपीदं वचनजातं सर्वदेवतासामान्यविषयं, तथापि भगवज्ज्ञानस्य सम्यग्ज्ञानसामान्याबहिर्भावादसाधुकर्मणस्तद्विरोधित्वसिद्धिः। तथा विशेषतश्चोच्यते "ददामि बुद्धियोगन्तं येन मामुपयान्ति ते । आसुरीयोनिमापन्ना मूढा जन्मनि जन्मनि मामप्राप्यैव कौन्तेय ? ततो यान्त्यधमां गति"मिति एवं न्यायस्मृत्युपबृंहितया तया श्रुत्या सामान्येन ज्ञानविरोधित्वमसाधुकर्मणां सिद्धम्। अस्मादपि निर्बाहात् पूर्वोक्तउपपन्नतरः प्रकरणानुगुण्यात्, एवं पापस्य ज्ञानविरोधित्वे प्रमाणं दर्शितम्। अथ रजस्तमसोर्ज्ञानविरोधित्वे, सत्त्वस्य ज्ञानहेतुत्वे च प्रमाणं दर्शयति ॥

भू० रजस्तमसोर्यथार्थज्ञानावरणत्वं, सत्त्वस्य च यथार्थज्ञानहेतुत्वं भगवतैव प्रतिपादितं "सत्त्वात्संजायते ज्ञान"मित्यादिना, अतश्च ज्ञानोत्पत्तये पापं कर्म निरसनीयं तन्निरसनं चानभिसंहितफलेनानुष्ठितेन धर्मेण, तथा च श्रुतिः "धर्मेण पापमपनुदती"ति ॥

टी० ॥ "रजस्तमसो"रिति ततः किं प्रस्तुतस्य कर्मापेक्षितस्य ?-त्यत्राह्ना"त"श्चेति,अतः–पापस्य ज्ञानविरोधित्ववचनात्। ततोपि किमि ?-त्यत्राह "तन्निरसनं"चेति, पापशब्दाभिधेययोः पुण्यपापयोरुभयोरपि निरसनीयत्वेन पापनिरासककर्मासंभवमाशङ्क्योक्तम् "अनभिसंहितफलेने"ति अनेन स्वर्गादिफलप्रदकर्मव्यावृत्तिः। अनुष्ठितेन–न तु ज्ञातमात्रेणेति भावः। तत्र किं प्रमाण ? मित्यत्राह "तथा च श्रुति"रिति, इदानीं निरासकविशेषप्रमाणतयोदाहृतस्य वाक्यस्यार्थनिर्णयोपयोगितयैतद्वाक्यस्थनिरसनीयवाचिपदस्यार्थः पूर्वमेव शिक्षितः, निरासकवाचिपदस्यार्थोनन्तरमुक्तः। नन्वयं धर्मशब्दः कृच्छ्रचान्द्रायणादिप्रायश्चित्तरूपधर्ममात्रविषयः किं न स्यात् ?

[1] तद्विपरीतज्ञाननिवृत्तिरिति पाठान्तर।

Digitized by Google

अनभिसंहितफलधर्मविषयेति: कुतो निर्णीयते? उच्यते "यज्ञेन दानेन तपसा नाशकेन" "शान्तो दान्त उपरतस्तितिक्षुः" "कषाये कर्मभिः पक्वे ततो ज्ञानं प्रवर्तते" "यज्ञो दानं तपः कर्म न त्याज्यं कार्यमेव तत्" "यज्ञो दानं तपश्चैव पावनानि मनीषिणां शमो दमस्तप: शौच"मित्यादिश्रुतिस्मृतिभिर्मुमुक्षोरपेक्षितत्वेनोक्तानां यज्ञदानतपःशमादीनामत्र प्रथमाणत्वात् विज्ञानानन्दो ब्रह्मयोनिरित्यादिनास्य प्रकरणस्य ब्रह्मविद्याविषयत्वावगमाच्चायं धर्म-शब्दो मुमुक्ष्वपेक्षितानभिसंहितफलधर्मविषय इत्यवगम्यते। अत्र यज्ञदानादिपर्यायेषु दानेन द्विषन्तो मित्रा भवन्तीत्यादिना सांसारिकफलकीर्तनम् अन्नवानन्नादो भवतीत्यादिवत् ब्रह्मवेदनानुगुणानुषङ्गिकफलाविषयं मन्तव्यं भूयो न मृत्युमुपयाहि विद्वान्"ति । विद्वानिति विद्वान् प्रधानफलश्रवणात् । यद्यपीदं वाक्यं न मुमुक्षुमात्रविषयं तथाप्यमुमुक्षुमात्रविषयं च न भवेत् प्रवृत्तिनिमित्तसाधारण्यात्, न हि काम्यफलप्रदत्वं धर्मशब्दार्थः । अलौकिकेष्टासाधारणसाधनेनालौकिकमनिष्टासाधारणकारणमपनुदेदिति ह्यर्थः स्यात् । ततश्च मुमुक्षुं प्रति काम्यकर्मणोऽनिष्टफलदत्वेन धर्मशब्दवाच्यत्वायोगात् पापशब्दवाच्यान्तर्भावाच्च पत्रधर्मताबलादनभिसंहितफलेन धर्मेण पुण्यपापयोरपि अपनोद्यत्वमुक्तं स्यात् ।

मू० तदेवं ब्रह्मप्राप्तिसाधनं ज्ञानं, सर्वाश्रमकर्मापेक्षम्, अतोपेक्षितकर्मस्वरूपज्ञानं केवलकर्मणामल्पास्थिरफलत्वज्ञानं च कर्ममीमांसावसेयमिति सैवापेक्षिता ब्रह्ममीमांसायाः पूर्ववृत्ता वक्तव्या ॥

टी० ॥ ज्ञानस्य कर्मसापेक्षत्वं निगमयति "तदेव"मिति । तत्—श्रुतिस्मृतितदनुग्राहकोपपत्तिसूत्रवाक्यकारवचनेभ्यः । एवमुपायप्रतिबन्धनिरसनार्थं सर्वाश्रमिणान्ततदाश्रमधर्माङ्गकोपासनाधिकारस्य वक्ष्यमाणत्वं हृदि निधाय सर्वाश्रमकर्मापेक्षमित्युक्तम् । ततः किं कर्म विचारस्य ब्रह्मविचारपूर्ववृत्तत्व? इत्यपेक्षायामनुष्ठानस्य ज्ञानसापेक्षत्वात्, ज्ञानस्य मीमांसाधीन-

स्याच्च तदधिगमः पूर्वं वृत्त इत्याह "ज्ञात" इति, ज्ञातः—अज्ञातस्य फला-भिसन्धिरहिताश्रमकर्मापेक्षत्वात्, ज्ञानं हि ज्ञानार्थमुपादानार्थं वा यत्र तत्प्रमाणमित्यत आह। "अपेक्षिते"ति तत्तु स्वं ज्ञानं स्वरूपेणोपादानं। मीमांसाशास्त्रस्य पूर्वं तत्साधारणत्वात् कर्ममीमांसावसेयमित्युक्तं सेयं—या त्वया जिज्ञासितेति जिज्ञासा सैवेत्यर्थः।

॥ खण्डनखण्डखाद्यम् ॥

(*Continued from page* 607 Vol VII.)

मू० "एवं तर्हि प्रागवस्थाविशिष्टः स(१), इदन्ताविशिष्टोऽभिन्नश्चायम्,—इति स्मृत्यनुभूतिभ्यामावेदितं भवति, [b] प्रागवस्थाविशिष्टाश्रयतया त्वभेदः केनापि न प्रकाशित इति 'य एव प्रागवस्थाविशिष्टः, स एवायम्'—इति प्रत्यभिज्ञायाः शरीरं न स्यात्। * [c] अथानुभवेन योऽसावनुभूयमानधर्म्याश्रयतयाऽभेदो बोधितः स कोट्यन्तर(२)मनालम्ब्य न पर्य्यवस्यतीति(३) केनचित्खलु कस्यचिदभेदो भवति, ततः स्मृत्युपनीतमेव सन्निधानात् कोट्यन्तरं प्रागवस्थाविशिष्टरूपमालम्बते, इत्यभेदस्य प्रागवस्थाविशिष्टाश्रयतया सिद्धिरिति *। तदेतत्तुच्छतरम्। [d] कोट्यन्तरमालम्बते इति किं कोट्यन्तराश्रितो भवति ?(४), उत कोट्यन्तराश्रिततया ज्ञायते इति ?। नाद्यः। अभेदस्येदानीं प्रागवस्था-

(१) स इति प्रागवस्थाविशिष्टोऽयमितीदन्ताविशिष्टोऽभिन्नश्चेति स्मृत्यनुभूतिभ्यामावेदितं भवतीत्यन्वयः।

(२) कोट्यन्तरम्=तत्ताविशिष्टं प्रतियोगिनम्।

(३) इतिशब्दो यस्मादित्यर्थे, यस्मात् केनचित्कस्यचिदभेदः=किञ्चिदनुयोगिकः किञ्चित्प्रतियोगिकोऽभेद इत्यर्थः।

(४) कोट्यन्तराश्रितो भवति=कोट्यन्तराश्रिततयोत्पद्यते।

विशिष्टधर्म्याश्रययोरुत्पत्तौ पूर्वं प्रागवस्थाविशिष्टेदन्ताविशिष्टयोर्भेदः स्यात् । द्वितीये तु यदेव कोऽप्यन्तराश्रिततया इदन्तावच्छिन्नधर्म्यभेदस्य ज्ञानं तत्स्मृतौ नाऽन्तर्भावयितुं शक्यं, नाप्यनुभवांशे, इत्युक्त एव दोषः ।

टी० ॥ विशकलितमेव प्रत्यभिज्ञानं स्यादिति परिहरति—। [a] "एवमि"ति ॥ तदेव विशदयति—। [b] "प्रागवस्थे"ति ॥ इदन्ताविशिष्टधर्मिण्यभेदोऽनुभूयमानः स्मर्यमाणतत्ताविशिष्टधर्म्मिप्रतियोगिक एवं पर्यवस्यतीति न प्रत्यभिज्ञाया विशकलितत्वं, न वाऽनुभवमात्रत्वमिति शङ्कते—। [c] "अथे"ति ॥ प्रत्यभिज्ञानकाले तत्तेदन्ताविशिष्टाऽभेदपर्य्यवसानाभिधानं पूर्वं तयोर्भेदमापादयतीति तत्तुच्छमेव ; अथ, प्रत्यभिज्ञाकाले तयोरभेदो भासते एवेत्युच्यते, तत्र स्मृत्यंशानुभवांशाभ्यां प्रत्येकं तज्ज्ञानमनुपपन्नमेवेत्युक्तमिति परिहरति—। [d] "कोऽप्यन्तरे"ति ॥

मू० [a] किंच, यदा च प्रत्यभिज्ञानं "स" इत्यंशे स्मृतिः, "अयम्" इत्यंशे चानुभव, इत्येकं ज्ञानमभ्युपेयते तदा धर्मिणमादायापि स्मृत्यनुभवसङ्करो दुर्वारः । तथाहि—संस्कारेण तत्तामात्रं चो(¹)पनीयते ? तत्ताविशिष्टो वा धर्मी ? । आद्ये "स"—इति प्रत्यभिज्ञायाः शरीरं न स्यात्, तत्तायाः केवलायाः संस्कारेणोपनीतत्वात् । नापि द्वितीयः । तथा सति 'अयमि'त्यनुभवांशेऽपि धर्मिप्रकाशोऽवश्य एव, अन्यथा इदन्तामात्रप्रकाशि "अय(²)मि"ति तच्छरीरं न स्यात्, एवं च संस्कारस्य चेन्द्रियस्य च धर्मिप्रतीतिहेतोरुभयस्योपनिपाते किं विशेष्यांशे भिन्नाभ्यां ज्ञानाभ्यामुत्पत्तव्यम् ?

(१) चकारो वाकारार्थे ।
(२) अयमित्यंशेऽपीदन्ताविशिष्टतया धर्मिण उपस्थितिर्न स्यादित्यर्थः ।

उत कारणद्वयसम्भेदाद्भेदमात्रभाजा ज्ञानेन? । प्रथमे प्रत्यभिज्ञानस्यैकज्ञानव्यक्तिताभ्युपगमव्याघातः, [b] भेदपक्षोक्तदूषणापातश्च । द्वितीये धर्म्यंशे प्रत्यभिज्ञायां स्मृतित्वमप्यनुभवत्वमपीत्यनुभूतिस्मरणसङ्कर इति विषयव्यवस्थयापि नियमो भग्नः ।

टी० नरसिंहाकारं प्रत्यभिज्ञानमित्यत्र दोषान्तरमाह—। [a] "किंचे"-ति। प्रत्यभिज्ञायां स्मृतित्वानुभूतित्वयोर्विषयांशावच्छेदभेदेन वृत्तिर्वाच्या, तत्र तत्तेदन्तयोर्विषययोरसाङ्कर्येण कपिसंयोगं (१)प्रति शाखामूलयोरिवावच्छेदकत्वमस्तु, तदुभयविशिष्टस्तु धर्मी द्वाभ्यां स्मृत्यंशानुभवांशाभ्यां विषयीकर्त्तव्य, इति(२) द्वयमप्यवच्छिन्द्यादिति धर्मिविषयतया स्मृतित्वानुभूतित्वसङ्करो दुर्वारः स्यादित्यर्थः । संयोग(३)प्रतिबन्दी तु न भवति, तस्यापि खण्ड्यमानत्वादिति भावः ॥ [b] "भेदपक्षोक्तदूषणापात"इति । अभेदस्योभयोरेकेना(४)प्यविषयीकरणम्—इति दूषणमित्यर्थः ॥

मू० [a] अथोच्यते * मा भूद्विषयोपाधिभेदाद्व्यवस्थानमुपाध्यन्तरात्तु भविष्यति, तद्यथा ;—संस्कारजत्वमादाय स्मृतित्वव्यवस्थितिरिन्द्रियसन्निकर्षजत्वमादाय चानुभवत्वव्यवस्थानम्, इति विरोधपरिहारोऽस्तु * । [b] न । प्रमात्वसामान्यान-

(१) कपिसंयोगतदभावौ प्रतीति तु परमार्थः ।

(२) इतिहेतोः स धर्मी द्वयम्=स्मृतित्वमनुभूतित्वं च, अवच्छिन्द्यात्=स्वनिष्ठावच्छेद्यतानिरूपितावच्छेदकत्वेन संपादयेदित्यर्थः (स्मृतित्वानुभूतित्वोभयावच्छेद्यो भवेदिति यावत्) तथाचैकधर्म्यवच्छेदेन सङ्कर एवेति भावः ।

(३) नन्वेवं संयोगतदभावयोरप्येको वृक्षलक्षणो धर्मी संयोगतदभावावुभावप्यवच्छिन्द्यात्तथा च संयोगतदभावयोरपि मिथः साङ्कर्यं,—संयोगवति प्रदेशे तदभावोऽभाववति प्रदेशे च संयोग इति स्यादित्यत आह—संयोगेति । तस्यापि=संयोगस्यापि ।

(४) उभयोः स्मृत्यनुभवयोर्मध्ये एकतरेणापि (स्मृत्या, अनुभवेन वा) इत्यर्थः ।

Digitized by Google

ङ्गीकारे प्रमारूपताया विषय(१)व्यवस्थित्यैवोपगमेनोपाध्य-
न्तरोपन्यासेऽपि स्मृतित्वानुभूतित्वयोरेकस्मिन्नेव धर्मि-
ण्यर्थे निवेशात् प्रमात्वाप्रमात्वयोरेकविषयतैव(२)। c किंच,
ज्ञानविकल्पानामध्यात्मं भावाभावसंवेदनात् स्मृतित्वानु-
भूतित्वयोर्द्वयोरपि प्रत्यभिज्ञायां स्वतःप्रतिभासेन विषय-
(३)निरूपणाव्यवस्थित्यनङ्गीकारे स्मृतित्वादेरिदन्तायामपि
स्मृत्यवगमप्रसङ्गात् ।

टी० ॥ ननु स्मृतित्वानुभूतित्वयोरेकज्ञानसमावेशेऽपि संस्कारजत्वे-
न्द्रियजत्वाभ्यामवच्छेदकाभ्यामविरोधो भविष्यतीत्याह—। a "अथोच्यते"-
इति ॥ b "न। प्रमात्वे"ति । साक्षात्त्वादिना परापरभावानुपपत्त्या(४) प्रमा-
त्वाप्रमात्वे न जाती, किं तर्हि? विषयतथात्वातथात्वनिबन्धनावुपाधी,
तद्यदि स्मृत्वानुभूतित्वयोर्विषयावच्छेदकभेदेन वृत्तिर्न स्यात्तदा तयोः
प्रमात्वाप्रमात्वयोरपि तथा(५) न स्याद्, इत्येकस्मिन्नेव विषये तज्ज्ञानं
प्रमा चाऽप्रमा च स्यात् । नहि स्मृतिश्च नाऽप्रमा, यथार्थानुभवश्च न
प्रमेत्यर्थः ॥ c "किंचे"ति । ज्ञानविकल्पानां=ज्ञानवैचित्र्याणाम्, अध्यात्म-
म्=आत्मन्यधिकरणे, भावाभावसंवेदनात्=सदसत्त्वसंवेदनात्, मानसेन प्र-
त्यक्षेण समुत्पन्नमात्रे प्रत्यभिज्ञाने विषयव्यवस्थामनपेक्ष्यैव तत्तेदन्तासामा-
नाधिकरण्येन स्मृतित्वानुभूतित्वयोर्ग्रहणप्रसङ्ग इत्यर्थः ॥

---

(१) विषयव्यवस्थित्या=विषयतथात्वातथात्वव्यवस्थया, उपाध्यन्तरोपन्यासे
=इन्द्रियजत्वसंस्कारजत्वरूपोपाध्युपन्यासे । (२) "प्रसज्येत"—इति शेषः ।

(३) विषयेण निरूप्यते यासा विषयनिरूपणी, (विषयाधीनेति यावत्,) सा चासौ
व्यवस्थितिश्चेति तथा, तदनङ्गीकारे इत्यर्थः । स्मृतित्वादेरित्यस्य पूर्वत्रैवान्वयः, स्मृति-
त्वादेर्विषयनिरूपणाव्यवस्थित्यनङ्गीकारे—इति । इदन्तायामपि स्मृत्यवगमप्रसङ्गात्, इद-
न्तायां स्मृत्या, तत्तायां चानुभवेन ज्ञानप्रसङ्गादित्यर्थः ।

(४) यदि साक्षात्त्वापेक्षया प्रमात्वं परं, तदा साक्षात्कारिणि भ्रमेऽपि प्रमात्वप्र-
सङ्गः; अथ प्रमात्वापेक्षया साक्षात्त्वं परं, तदा प्रमात्मकपरोक्षानुमित्यादावपि साक्षा-
त्त्वप्रसङ्ग इति साक्षात्त्वेन प्रमात्वस्य परापरभावानुपपत्तिर्द्रष्टव्या ।

(५) तथा=अवच्छेदकभेदेन वृत्तिः ।

Digitized by Google

मू० [a]यदि च संस्कारजत्वमेव स्मृतित्वं, तदा तस्यैव विरोधे(१)ऽभिधीयमाने स एव विरोधसामञ्जस्यायोपाधिरुपन्यस्यते-इति नान्यस्य चेतसि निविशते(२)। [b]अथाऽन्यत्स्मृतित्वं नाम*, तदाप्यनुपपत्तिः। [c]तथाहि-संस्कारजत्वं=संस्कारादनन्तरं नियमेन भावः, नियतत्वं च नानाव्यक्तिगतमेकं रूपं ग्राहकमक्रोडीकृत्या(३)संभवीति स्मृतित्वेनैव संस्कारजत्वं वक्तव्यं, तथाच संस्कारजत्वव्यवस्थितौ स्मृतित्वमुपाधिः, स्मृतित्वव्यवस्थितौ संस्कारजत्वम्,-इत्यन्योन्याश्रयः। [d]तस्मात् स्मृत्यनुभवसङ्करो दुर्वार एव। [e]अपिच, स्मृत्यनुभवयोर्ये कारणसामग्र्यौ, ते प्रत्यभिज्ञायां सन्त्येव? न वा?। न चेत्कथमंशतोऽपि स्मृतित्वमनुभवत्वं च प्रत्यभिज्ञानस्य?। एवमेव(४) तथात्वेऽतिप्रसङ्गात्-स्मृत्यनुभूत्योः [f]स एव सङ्करः। प्रथमे तु पृथगेव कार्य्योत्पत्तिप्रसङ्गः, प्रत्येकं स्वस्वकार्ये समर्थत्वात् सामग्रीभेदस्य कार्यभेदहेतुत्वेनावधारितत्वात्।

टी० ॥ ननु स्मृतित्वं न संस्कारजन्यत्वादन्यदेव, तथाच संस्कारातीन्द्रियत्वे तदप्यतीन्द्रियमेवेति न तत्तदन्यासाधारण्येन स्मृतित्वानुभूतित्वयोर्ग्रहणप्रसङ्ग इत्याशङ्क्याह-। [a]"यदि चे"ति। प्रत्यभिज्ञायां केनांशभेदेन संस्कारजत्वं?, केन चेन्द्रियजत्वम्?,-इत्येव विचार्यते, तत्र च संस्कारजत्वा-

(१) विरोधे=साङ्कर्ये। विरोधसामञ्जस्याय=साङ्कर्यरूपदोषपरिहाराय।
(२) 'आत्माश्रयादि'ति शेषः।
(३) अक्रोडीकृत्य=अविषयीकृत्य।
(४) एवमेव=संस्कारजत्वादिकमन्तरेव, तथात्वे=स्मृतित्वाद्यङ्गीकारे, अतिप्रसङ्गात्=स्मृतावनुभूतित्वस्यानुभूतौ च स्मृतित्वस्य साङ्कर्यप्रसङ्गादित्यर्थः।

Digitized by Google

वच्छेदेन संस्कारजत्वं व्यवस्थापयितुमशक्यमित्यर्थः ॥ ननु स्मृतित्वं जातिर्वा, ततोऽन्योऽपि ज्ञानत्वमुपाधिर्वा, तदवच्छेदेन संस्कारजत्वं स्यादित्याह–। [b]"अथे"ति ॥ स्मृतित्वावच्छेदेन संस्कारजत्वं, तदवच्छेदेन प्रत्यभिज्ञायां स्मृतित्वम्,–इत्यन्योन्याश्रयमाह–। [c]"तथाही"ति ॥ [d]"तस्मादि"ति । तत्तांशेऽनुभवत्वमिदन्तांशेपि स्मृतित्वमिति कुतो नरसिंहाकारत्वमित्यर्थः॥ सामग्रीभेदेन कार्यभेदमाह–। [e]"अपिचे"ति ॥ [f]"स एवे"ति । सामस्त्येनैव प्रत्यभिज्ञायां स्मृतित्वानुभवत्वप्रसङ्ग इत्यर्थः ॥

मू० [a]अथ * यत्र(१)ते पृथग्जायेते तत्र पृथगेव कार्य्यं, प्रत्यभिज्ञायां तु तयोर्युगपज्ज्ञातत्वेन सम्भूय जननात् कारम्बितकार्योत्पत्तिः । [b]यद्यपि घटपटादिसामग्र्योर्नैवं दृश्यते तथापि तद्विलक्षणस्वभावत्वाद् [c]अनयोरीदृशत्वमुपपद्यते; [d]नहि एकस्य(२), यादृक्, पदार्थस्य स्वभावस्तादृगऽन्यस्यापि सर्वस्य भवति, जगद्वैचित्र्यभङ्गप्रसङ्गाद् *–इति । नैतद्युक्तं । [e]यत्र हि मिलितत्वं तयोस्तत्र किं परस्परसहकारित्वमनयोरेष्टव्यं ? न वा ? । न चेत्, परस्परमेलनलक्षणो विशेषोऽनुपयोगी कार्यजननं प्रति, मिथः सहकारिभावविरहेणाऽप्रयोजकत्वात् ; ततस्तदविशेषात्पृथगेव कार्य्यं प्रसज्येत । अथ परस्परसहकारित्वं तयोरिष्यते, तदाऽनुभवांशेपि संस्कारस्य व्यापारः, स्मरणांशेप्यक्षस्य,इति नियामकत्वाभिमतयोस्तयोरुभयांशे साधारण्यात् स्मृत्यं-

(१) यत्र ते=कारणसामग्र्यौ पृथक्=अन्योन्यनिरपेक्षतया जायेते=उत्पद्येते तत्र पृथगेव कार्यं जनयतः, प्रत्यभिज्ञायां पुनस्तयोः संस्कारसंप्रयोगयोः संभूयान्योन्यसापेक्षतया जननात्=कार्योत्पादकत्वात् मिलितस्य=मिलितस्यैव कार्यस्य स्मृत्यनुभवोभयरूपस्योत्पत्तिरित्यर्थः ।

(२) एकस्य पदार्थस्य तादृक्स्वभाव इत्यन्वयः ।

शेऽप्यनुभूतिरनुभूत्यंशेऽपि स्मरणमिति सुवज्ज्वलेपायितं प्रत्यभिज्ञाया(१)मनुभूतित्वस्मृतित्वसङ्करेणेति । [f]नाप्यनुभव एवेति पक्षः । [g]तथा सति तत्तावच्छिन्नस्याभेदाश्रयतायां न संस्कारो, नेन्द्रियसन्निकर्षश्चेति तद्विषयत्वा-पातः ।

टी० ॥ सामग्रीद्वयसमाजादेकमेव कार्यमित्याह—। [a]"अथे"ति ॥ अन्यत्रापि तथाप्रसङ्गं वारयति—। [b]"यद्यपी"ति ॥ [c]"अनयोरि"ति । स्मृत्यनुभवसामग्र्योरित्यर्थः । ईदृशत्वम्=एककार्य्यजनकत्वम् ॥ ननु कथमेवमित्यत आह—। [d]"नही"ति ॥ परस्परनिरपेक्षयोः सामग्र्योः समाजे कार्यभेदः, सापेक्षयोः समाजे कार्य्यावैचित्र्यं, वैचित्र्ये वा सामग्र्यं(२)प्रत्यभिज्ञानं स्मृत्याकारमनुभवाकारं च भवेदित्याह—। [e]"यत्र द्वौ"ति ॥ नैयायिकमतमास्कन्दति—। [f]"नापी"ति ॥ [g]"तथा सती"ति । संस्कारेन्द्रियाभ्यां मिलित्वा प्रत्यभिज्ञालक्षणोऽनुभवो जन्यते, तत्र तत्तावैशिष्ट्यांशे संस्कार, इदन्तावैशिष्ट्यांशे चेन्द्रियमस्तु कारणं, तत्ताविशिष्टोपरक्ताभेदांशे नैकस्यापि सामर्थ्यं, संस्कारस्य तदगोचरत्वादिन्द्रियस्य च तेन सममसन्निकर्षादित्यर्थः । अभेदो हि नात्र स्वरूपमात्रं, किं नाम तत्ताविशिष्टप्रतियोगिकान्योन्याभावात्यन्ताभाववत्त्वं, तच्च प्रतियोगिघटितमूर्तित्वेन तदसन्निकर्षा(३)दसन्निकृष्टमेवेति भावः ॥

ख॰ *[a]नच संस्कारद्वारा प्रत्यासत्त्या संबद्धविशेषणतया तद्ग्रहः* । क्वचित्‘सोऽयं नवे’ति [b]तर्हि संशयो न स्यात् । *[c]दोषवशात्तच तत्प्रकाशो, न संबद्धविशेषणत्वाद्?* –

(१) प्रत्यभिज्ञायाम्=प्रत्यभिज्ञैकदेशयोः स्मृत्यनुभूत्योः ।

(२) सामर्थ्यं=सामग्रीनिष्पाद्यं समस्तमपि प्रत्यभिज्ञानमित्यर्थः; "समग्रमि"ति पाठे तु राजमार्ग एव समस्तमितिपदान्तरस्य तत्राऽकल्पनात् । यद्वा समग्रमेव सामर्थ्यमिति स्वार्थे ष्यञ् ।

(३) तदसन्निकर्षात्=तेन प्रतियोगिना सममिन्द्रियस्याऽसन्निकर्षात् ।

इति चेत्, [d] विनापि संस्कारं दोषवशात्तदापत्तेः(१) । [e] वस्तुप्रकाशिनि च दोषवाचोयुक्त्यनिरुक्तेः । [f] क्वापि तस्याऽवस्तुप्रकाशित्वाद्दोषत्वे कथमन्यादेरपि तन्न स्यात् । [g] विशिष्टत्वेन तथात्वस्य प्रकृतेप्यपरिहारः ।

टी० ॥ नन्विन्द्रियेणैव संयुक्तसंयुक्तसमवेतविशेषणविशेषणतया प्रत्यासत्त्या तदुपरक्ताभेदस्य भासतां, तथाहि—इन्द्रियसंयुक्तं मनः, तत्संयुक्त आत्मा, तत्समवेतः संस्कारस्तद्विशेषणं च घटः, तद्विशेषणं च तत्ताविशिष्टाभेद,—इतिशङ्कां निरस्यति—। [a] "नचे"ति ॥ अनया प्रत्यासत्त्या सर्वत्र तत्तोपरक्ताभेदस्य प्रमैव स्यान्न तु संशय इत्याह—। [b] "तर्ही"ति । पूर्वानुभूते प्रत्यासत्तेः सत्त्वान्निश्चय एव स्यादननुभूते तत्तोल्लेखानुपपत्तेरित्यर्थः ॥ ननु दोषमाहात्म्यात्संशय एवोत्पद्यते, न निश्चयः,—इत्याह—। [c] "दोषे"ति ॥ संस्कारनिरपेक्षस्य दोषस्य तथासंशयकारणत्वे ऽतिप्रसङ्ग—इत्याह—। [d] "विनापी"ति ॥ दोषान्तरमाह—। [e] "वस्त्वि"ति । 'सोयं नवे'तितत्तेदन्ताविशिष्टाभेदस्य वस्तुनो भानात् कथं दोषस्तत्कारणं स्यादित्यर्थः ॥ ननु प्रकृतेन दोषेण यदि वस्तु प्रकाशितमेतावतैव कथमस्याऽदोषत्वं, यावता तेन पित्तादिना दोषेण 'पीतः शङ्ख'—इत्यादाववस्त्वपि प्रकाशितं, प्रकृतसंशयस्यैव वा कोट्यन्तरमवस्त्वेवेत्याशङ्क्याह—। [f] "क्वापी"ति । क्वाचित्काऽवस्तुप्रकाशाधीनं यदि दोषत्वं तदेन्द्रियशब्दलिङ्गादीनामपि दोषत्वं भवेदित्यर्थः ॥ ननु पित्तादिविशिष्टस्येन्द्रियादेर्दोषत्वं, नतु केवलस्य, तथाच नागृहीतविशेषणा(२)न्यायेन पित्तादिकमेव दोषो, नत्विन्द्रियादिकमपीत्याशङ्क्याह—। [g] "विशिष्टत्वेने"ति । एवं सतीन्द्रियादिविशिष्टस्यैव पित्तादेरपि भ्रमजनकत्वेन दोषत्वमिति नागृहीतविशेषणान्यायादिन्द्रियादेरेव दोषत्वमायातं, नतु पित्तादेरित्यर्थः । तथात्वस्य=दोषत्वस्य, प्रकृतेपि=इन्द्रियादावपीत्यर्थः ॥

---

(१) तदापत्तेः=संशयापत्तेः ।
(२) "नागृहीतविशेषणा बुद्धिर्विशेष्यमुपसङ्क्रामति"—इतिन्यायेनेत्यर्थः ।

मू० [a]"नहि विनैव कुतोऽपि विशेषादस्याऽवस्तुप्रकाशिता, [b]सत्यप्यर्थे दोषादवस्तुन एव प्रकाशे संशयात्प्रेक्षावत्प्रवृत्त्यादेरसम्भवापत्तेः। [c]*वस्तुविषयत्वेऽपि दोषादनिश्चयता?*—इति चेन्न। [d]वस्तुतस्तस्या([1])सङ्कीर्णत्वात्तस्य प्रकाशे तदेव संशयैककोटौ प्रकाशितमिति कुतस्तदनिश्चयता। [e]निश्चयार्थस्य च संशयकोटावखण्डने संशये तदभावाधिकग्राहित्वेऽपि निश्चयत्वस्याप्रत्यूहत्वादेव, अभावनिश्चयः कोऽप्यन्तरं केवलमधिकं स्यात्।

टी० ॥ ननु भवेदेवं यदि पित्तादिकमिन्द्रियादिसाहित्येनैव भ्रमं जनयेदित्यत आह—। [a]"नही"ति। अस्य=पित्तादेर्दोषस्य, कुतोऽपि विशेषादिन्द्रियादेर्विना नावस्तुप्रकाशकत्वमित्यर्थः ॥ ननु संशये विपर्यये वा धर्मी वस्तुभूतोऽस्तु, तथापि ताभ्यां([2]) न स प्रकाश्यते, किंत्वलीकमेव किंचित्प्रकाश्यते, तथा चावस्तुभानात्तत्प्रकाशकयोस्तयो([3])र्जनकः स कथं न दोषः स्यादित्याशङ्क्याह—। [b]"सत्यप्यर्थे" इति। वस्तुमात्रं संशयस्य विषय—इति जानतां प्रेक्षावतां क्वचिदपि संशयात् प्रवृत्तिनिवृत्ती न स्याता-मित्यर्थः। यद्वा, वस्तुनो= धर्मिणोऽप्यभाने कुत्र संशयः प्रवर्तेतेत्यर्थः ॥ ननु प्रवृत्त्यनुरोधात्संशयस्यास्तु वस्तुविषयता, यत्पुनरयमनिश्चयाकारस्तत्र दोष एव तन्त्रं, तथाच निश्चयप्रतिबन्धकत्वमेव दोषत्वमित्याह।— [c]"वस्तुविषयत्वेपी"ति ॥ धर्मी तावत्र सङ्कीर्णः=न स्थाणुपुरुषोभयात्मा, किंत्वेकरूप एव, तथाच वस्तुतो यद्रूपो धर्मी तत्र संशयो निश्चयरूप एवेति क्वायमनिश्चयो येन निश्चयप्रतिबन्धकतया तज्जनको दोषः स्यादित्याह—। [d]"वस्तुत" इति ॥ ननु भवेदेवं निश्चयो यदि पुरुषे

(१) तस्य=धर्मिणः।
(२) ताभ्याम्=संशयविपर्ययाभ्याम्।
(३) "अवस्तुमात्रप्रकाशकयोस्तयो"रित्यपि पाठः।

धर्मेपि पुरुषत्वमात्रमुल्लिखेदपि तु स्थाणुत्वं पुरुषत्वाभावं वाऽवगाहमानमधिकमुल्लिखेत् निश्चय इत्यत आह—। c"निश्चयार्थस्ये"ति । निश्चयस्य योऽर्थो विषयः—पुरुषत्वविशिष्टो धर्मी, स चेद्बाधकप्रत्ययेनाखण्डितस्तदा तत्र नायमनिश्चयो,ऽधिकं तु यद्भासते तत्राप्ययं विपर्ययरूपो निश्चय एवेत्यर्थः ॥

मू० "*जातिः संशयत्वं, तत्प्रयोजकस्य दोषः? * —इति चेद्, b"इदं तद्वा न वे'तिसंशयकोट्यर्थनिर्देशसमन्वयेन वाशब्दप्रतीतिव्यवहारयोरभावापत्तेः । c'प्रतीत्या सह वाकारार्थसंबन्धे,'प्रत्येमि न वे'तितदापत्तेः । dवाकारार्थस्य प्रतीतिगतत्वेपि निश्चयत्ववत्(१)'स्थाणुमानय पुरुषं वे'ति-स्थाणुपुरुषगतपाक्षिकलोकव्यवहारानुपपत्तेः । eतस्माद् वाकारार्थस्य ज्ञानधर्मत्वे साक्षात्कारित्वादिवद्विषयानन्वयापत्तिरेवेति ।

टी० ॥ नन्वेककोटिकनिश्चयाद्विरुद्धोभयकोटिकनिश्चयोप्ययं विजातीय एवाभ्युपगन्तव्यः, तथाच संशयत्वमेव तत्र जातिरिति तदवच्छिन्नज्ञानासाधारणकारणं दोष इत्याह—। a"जातिरि"ति ॥ संशयकोट्योरर्थौ स्थाणुत्वपुरुषत्वे, तयोर्निर्देशः(२)=स्थाणुशब्दः पुरुषशब्दश्च, तत्समन्वित(३) एव वाशब्दः प्रतीयते व्यवह्रियते च, तेन स्थाणुत्वपुरुषत्वयोरेवाऽव्यवस्थितत्वं वाशब्दार्थः, तथाच विषयवैलक्षण्यकृतमेव निश्चयात् संशयस्य वैलक्षण्यं, नतु जातिकृतमित्याह—। b"इदं तद्वे"ति ॥ ननु

(१) यथा निश्चयत्वस्य ज्ञानधर्मत्वेनार्थनिर्देशकशब्देन समन्वयो नास्ति तथा वाकारार्थस्याऽव्यवस्थितत्वस्य ज्ञानधर्मत्वे स्थाणुं पुरुषो वेत्यर्थगतत्वेन प्रतीतिर्न स्यादिति भावः । "निश्चयवदि"ति स्वपाठः ।

(२) निर्दिश्यतेऽर्थोऽनेनेतिव्युत्पत्त्या निर्देशपदस्य निर्देशकशब्दपरतामाह—निर्देश इति ।

(३) समन्वयः=सामानाधिकरण्यम्, तथाच तत्समानाधिकरण इत्यर्थः ।

प्रतीतिगतमेवाऽव्यवस्थितत्वं वाशब्दार्थो, नतु विषयाऽव्यवस्थितत्वं वाशब्दार्थं(१) इत्यत आह—। [c]"प्रतीत्ये"ति ॥ अत्रैव दोषान्तरमाह—। [d]"वाकारार्थस्ये"ति । संशयाद्विषये पाक्षिको व्यवहार इति वाकारार्थः । पाक्षिकत्वम्(=अव्यवस्थितत्वं) विषयगतं, नतु ज्ञानगतमित्यर्थः ॥ [e]"तस्मादि"ति । यद्यव्यवस्थितत्वं (वाकारार्थः) संशयगतं स्यात्तर्हि यथा विषये साक्षात्त्वं नानुभूयते तथा संशयविषयेऽप्यव्यवस्थितत्वं नानुभूयेतेत्यर्थः ॥

यद्यपि ज्ञानगतेनापि ज्ञानत्वानुभवत्वसाक्षात्त्वादिना ज्ञातोऽनुभूतः, साक्षात्कृत, इति विषयोऽप्युपरक्तो गृह्यते, इति तद्वदेव संशयगतेनापि वाकारार्थेन विषयानुरञ्जनमस्तु, तथापि 'साक्षात्कृत' इति यथा तद्विषये सर्वत्र तदुपरागस्तथा धर्म्यंशेपि वाशब्दार्थोपधानमिह स्यादिति भावः अत्र प्रसङ्गतो दोषखण्डनं, संशयखण्डनं, वाकारार्थखण्डनं च कृतं; तत्र यद्यपि प्रमाऽप्रमयोर्वैलक्षण्यदर्शनात्कार्य्यवैलक्षण्यस्य च कारणवैलक्षण्यप्रयोज्यत्वात् प्रमाकारणविलक्षणं कारणमवश्यमप्रमायामवगन्तव्यं, तच्च नेन्द्रियादि, उभयसाधारणत्वादित्यसाधारणं पित्तादिरेव तथा वाच्यम्, तस्य चाऽननुगतस्यापि तत्तदप्रमाप्रयोजकत्वं गृहीत्वा दोषवाचोयुक्तिः; प्रमाप्रतिबन्धकत्वेनाऽप्रमात्वावच्छिन्नकार्यताप्रतियोगिक(२)कारणतावच्छेदकरूपवत्त्वेन वा दोषपदशक्तिग्रहात्; स्व(३)प्रमां प्रति कारणत्वेपि पित्तादेर्विषयत्वातिरिक्तेन रूपेणाप्रमां प्रत्यसाधारण्यस्य विवक्षितत्वात्; एवं 'स्थाणुत्वेन पुरुषत्वेन वा न निश्चिनोमि धर्मिणं किंतु सन्दिहानोस्मी'तिनिश्चयविलक्षणस्य सर्वलोकसिद्धस्य संशयस्य निश्चयत्वमापाद्यापह्नवयितुमशक्यत्वं; कारणस्याऽपि समानधर्म्मदर्शना(४)साधारणधर्मदर्शनविप्र-

(१) "वाशब्दार्थः"—इत्ययं प्रायः पुस्तकान्तरेषु पाठो नोपलभ्यते ।

(२) कार्य्यतानिरूपितकारणतेत्यर्थः ।

(३) ननु पित्तादेर्दोषस्य स्वविषयकप्रमाजनकत्वमप्यस्ति तत्कथमप्रमाजनकतावच्छेदकरूपवत्त्वेनैव तत्सिद्धिरित्यत आह—स्वेति ।

(४) समानो धर्मः स्थाणुपुरुषयोरुच्चैस्तरत्वादिः, तद्दर्शनेन स्थाणुर्वा पुरुषो वेति संशयः; असाधारणो धर्मः नित्येभ्योऽनित्येभ्यो व्यावृत्तं शब्दत्वं तज्ज्ञानतोपि भवति शब्दो नित्यो नवेति संशयः; वादिनोर्विप्रतिपत्त्यनन्तरं मध्यस्थस्य जायमानः संशयस्तु प्रसिद्ध एवेति । समानधर्मदर्शनाद्यन्यतमस्य प्रतिस्वमनुभवादिति सम्बन्धः ।

Digitized by Google

तिपत्तीनामन्यतमस्य प्रतिस्वं निश्चयकारणविलक्षणस्याऽनुभवात्कार्ये च संशये विधिकोटिप्राधान्यं निषेधकोटिप्राधान्यं वाऽनुभूयमानमवश्यं वाच्यम्, वाकारार्थश्च विरोध एव, भवति हि 'स्थाणुर्वा पुरुषो वे'ति-शब्दश्रवणानन्तरं स्थाणुपुरुषविरोधज्ञानं, विरोधप्रतिसन्धायिन एवैतादृशः शब्दप्रयोग इति; तथापि प्रपञ्चखण्डनयुक्तिरत्रापि एहीतेति भावः ॥

मू० [a] * नच प्रत्यासत्तौ सत्यामपि प्रत्यासत्त्यपुरस्कारान्मनसा न ग्रहणं नच दोषवशा(१)दित्यस्तु * । दोषे सत्यपि वस्तुनः संस्कारेण, संस्कारस्यात्मना, तस्य मनसा, तस्य च बाह्ये-न्द्रियेण, प्रत्यासत्त्यपेक्षणे एव तदर्थप्रकाशनियमोपपत्तेः कः प्रत्यासत्त्यपुरस्कारस्त्वन्मते स्यात्?। [b] यदि तु संस्कारप्रत्या-सत्तिमनपेक्ष्य तथा सन्दिह्यते तदाऽननुभूय [c] प्रस्मृत्य वा तथा सन्दिह्येत । [d] वस्तुनस्तु, मनसा(२)संस्कारग्रा-हिणा, चक्षुरादिना चात्माऽग्राहिणा, तादृशप्रत्यासत्त्या ग्रहणानुपपत्तेः(३)नियमेन ।

टी० ॥ ननु प्रत्यासत्तौ सत्यामपि तत्तानिश्चयो न भवति, दोषेण प्रत्यासत्तेस्तिरस्कृतत्वात्; साधारणधर्मदर्शनात्सन्देह एवेत्याह—। [a] "न-

(१) दोषवशात्प्रत्यासत्त्यपुरस्कारान्मनसा न ग्रहणमित्यन्वयः ।

(२) तादृशप्रत्यासत्त्या तत्तावैशिष्ट्यं मनसा गृह्यते? चक्षुरादिना वा?, न तावन्म-नसा, तस्यात्मग्राहकत्वेपि संस्काराग्राहकतया तद्विशेषणतत्तावैशिष्ट्यग्राहकत्वायोगात्, नापि चक्षुरादिना, तस्यात्मग्राहकत्वाभावेन तत्समवेतसंस्कारादिग्राहकत्वस्य सुतरामस-म्भवादित्याह—मनसेत्यादिना ।

(३) यद्यपि "ग्रहणानुपपत्तेः नियमेने"त्येव प्रायः पुस्तकेषु पाठ उपलभ्यते तथा-प्यत्र प्रतिज्ञान्तरस्याप्रदर्शनात्सहेतुकप्रतिज्ञाप्रदर्शनपरत्वेन "ग्रहणानुपपत्तिः नियमेन" इतिपाठेन भाव्यम्, "ईदृशप्रत्यासत्त्या ग्रहणानुपपत्तिनियमादि"ति तु "नियमेने"त्येता-वन्मात्रस्यैव व्याख्यातुरभिप्रायप्रदर्शनं, नतु समग्रफक्किकायाः, इति व्याख्यातुरभिप्रा-यानबोधविजृम्भित एव पाठप्रमादो लेखकानामित्यालक्ष्यते । यथाश्रुतपाठदुराग्रहग्रहगृही-तान्तःकरणैस्तु प्रतिज्ञावाक्यमध्याहृत्य कथञ्चिद्योजनीयो ग्रन्थ इति श्रीमन्तो गुरुच-रणाः श्री ६ रामविश्वशास्त्रिचरणाः ।

च्चे''ति । वास्तवी प्रत्यासत्तिः कथं दोषेण तिरस्करणीया?, प्रत्युत तत्ताऽऽरोपार्थं पुरस्करणीयैव, स्मृतायाः एव तत्तायाः 'सोयं नवे'त्यत्रारोपादित्यर्थः । यद्यपि 'इदं रजतमि'त्यारोपे शुक्तित्वेन सह सतोपि संयुक्तसमवायस्य दोषेण तिरस्कारो दृष्टः, तथापि तस्यापि खण्ड्यत्वादिति भावः ॥ उक्तमेव द्रढयति—। [b]''यदि त्वि''ति ॥ [c]''प्रस्मृत्ये''ति । विस्मृत्येत्यर्थः ॥ संस्कारद्वारा संबद्धविशेषणतया प्रत्यासत्त्या तत्ताभाने 'सोयं नवे'तिसंशयानुपपत्तिमुक्त्वा प्रकृते संबद्धविशेषणताप्रत्यासत्तिरेव न भवतीत्याह—। [d]''वस्तुतस्त्वि''ति । ''नियमेन''—इत्यन्तेयं फक्किका । ईदृशप्रत्यासत्त्या ग्रहणानुपपत्तिनियमादित्यर्थः ॥

मू० [a]तदिन्द्रियाग्राह्याश्रयकप्रतियोगिकेतरस्य ग्रहणे स्वग्राह्यसंबद्धविशेषणतायाः प्रत्यासत्तित्वनियमात् ।

टी० ॥ अत्र हेतुमाह—। [a]''तदिन्द्रिये''ति । 'विशेषणताप्रत्यासत्तिः सर्वत्र स्वग्राह्यसंबद्धविशेषणतारूपैव भवति नत्वन्ये'तिनियमादित्यर्थः । प्रकृते च संस्कारो नेन्द्रियग्राह्य इति तद्विशेषणतया तज्ज्ञानं न संभवतीत्यर्थः ॥ ननु नेयं व्याप्तिः यद् विशेषणता स्वग्राह्यसंबद्धविशेषणतारूपैव भवति, घ्राणरसनाभ्यां गन्धरसविशेषाभावस्य घ्राणरसनाऽग्राह्येपि द्रव्ये विशेषणतया ग्रहणाद्, अत एनां(१) विशिनष्टि—। ''तदिन्द्रियाग्राह्ये''ति । प्रतियोगिग्राहकेन्द्रियाग्राह्य आश्रयो यस्य स तदिन्द्रियाग्राह्याश्रयको गन्धरसादिः, स प्रतियोगी यस्य गन्धाद्यभावस्य, तदितरत् प्रमेयं यत्र विशेषणतया गृह्यते तत्रेयं व्याप्तिरिति न व्यभिचार इत्यर्थः । यद्वा, ''नियमेने''त्यत्र योजनीयम् । तदिन्द्रियाऽग्राह्येत्यत्र नियतं तदिन्द्रियाग्राह्यत्वं विवक्षितं, नतु कादाचित्कम् । अन्यथा चक्षुषा कदाचिद्भूतलादि न गृह्यते इति तदाश्रयस्य(२) घटादेरभावो विशेषणतया गृह्यमाणोपि तदिन्द्रियाग्राह्याश्रयकप्रतियोगिकेतरो न भवतीति सहचारदर्शनस्थलाभा-

(१) एनां=व्याप्तिम् ।

(२) तद्भूतलादि आश्रयो यस्येतिव्युत्पत्त्या तदाश्रयस्येत्यर्थः ।

वाद् व्याप्तिपरिच्छेदः[1] कुत्र स्यात्?, तथाच तदिन्द्रियाऽग्राह्यत्वं तदिन्द्रियस्वरूपायोग्यत्वं विवक्षितं, तच्च नियमपदान्तर्भावेन निर्वहतीति भावः । प्रतियोगिग्राहकेन्द्रियाग्राह्येऽधिकरणे यः प्रतियोगी समारोप्य निषिध्यते स एव तदिन्द्रियाग्राह्याश्रयकः प्रतियोगी, तस्य योऽभावस्तद्वितरत्रायं नियमः, तेन वायौ रूपाभावस्य चाक्षुषत्वमुपपद्यते । अन्यथा[2] घटादौ रूपाभावस्य रूपग्राहकेन्द्रियग्राह्याश्रयकप्रतियोगिकत्वेन तद्ग्रहेऽपि वायुविशेषणतया न स्यात् । * वायौ रूपाभावप्रतीतिर्लिङ्गजा? *,—इत्यनुपपन्नमेव, सर्वत्र तथाभावप्रसङ्गात् । यदि अन्यत्र योग्यानुपलब्धिरिन्द्रियसहकारिणी, तदा प्रकृतेऽपि समानं, वायावपि रूपानुपलम्भस्य प्रतियोगिसत्त्वविरोधित्वात् । महतो रूपसमवाये ग्रहणावश्यम्भावात् । केचित्तु "नियमेन तदिन्द्रियाग्राह्यो यस्याश्रयः[3] स्वेतरोपलम्भकव्यतिरेकोपलम्भाविषयो, यथा परमाणौ पृथिवीत्वादि, नतु वायौ रूपादि, ततश्च तत्प्रतियोगीतरग्रहणे विशेषणतया व्याप्तिः"—इत्याहुः । यद्यपि घटादौ विशेषणतया तत्ताभानमविरुद्धमेव, तथापि संस्कारविशेषणतया तावच्च भानमित्यर्थः ॥

मू० "अन्यथाऽप्यपरमाण्वादौ पृथिवीत्वादेरन्यत्र ग्राह्यतया

(१) व्याप्तिपरिच्छेदः=व्याप्तेरवधारणम् ।

(२) अन्यथा, यत्किञ्चिदधिकरणकसमारोपितप्रतियोगीतरप्रतियोगिकाभावस्थले स्वग्राह्यसम्बद्धविशेषणताप्रत्यासत्तेर्नियमाङ्गीकारे—इत्यर्थः ।

(३) स्वशब्दो दृष्टान्ते पृथिवीत्वादिपरो दार्ष्टान्तिके स्वभावाश्रयत्वाभिमतवस्तुपरः । यथा पार्थिवपरमाणौ पृथिवीत्वं स्वस्मात्पृथिवीत्वादितरस्य महत्त्वसमानाधिकरणोद्भूतरूपवत्त्वलक्षणस्योपलम्भकस्य व्यतिरेकेण चाक्षुषोपलम्भाविषयः नत्वेवं वायौ रूपादि स्वस्माद्रूपादितोऽतिरिक्तस्य महत्त्वलक्षणस्योपलम्भकस्य व्यतिरेकेण चाक्षुषोपलम्भाऽविषयः, किन्तु रूपादिव्यतिरेकादेव, एवमेव यस्याऽभावस्याश्रयः स्वस्मादतिरिक्तस्योपलम्भकस्य व्यतिरेकेणोपलम्भाविषयः स्यात्तदीयप्रतियोगीतरप्रतियोगिकाभावग्रहणे एव स्वग्राह्यसम्बद्धविशेषणतया व्याप्तिरित्यर्थः । रूपाभावपृथिवीत्वाभावयोरप्याश्रयौ, वाय्वाद्यपरमाणुलक्षणौ, अतः स्वेतरोपलम्भकस्य महत्त्वसमानाधिकरणोद्भूतरूपवत्त्वस्य व्यतिरेकेण चाक्षुषोपलम्भाऽविषयावतस्तयोः स्वग्राह्यसम्बद्धविशेषणताप्रत्यासत्तिमन्तरेणैव भानमित्यर्थः । यद्वा, यस्य=समारोपितप्रतियोगिनः, आश्रयः=आश्रयत्वेन संमतः,—इत्यर्थः । अस्मिन्नर्थेऽपि "तत्प्रतियोगीतरग्रहणे"—इत्यस्य तस्मात्प्रतियोगिन इतरप्रतियोगिकस्याभावस्य ग्रहणे—इत्यर्थः ।

निरस्तस्वरूपायोग्यत्वस्याभावो दृगादिभिर्गृह्येत। [b]नह्यती-न्द्रियविहारदेशेषु निष्परमाणुकत्वनियमो युक्ताभ्युपगमः। [c]शब्दाभावप्रत्यक्षतावादिनये श्रोत्रेन्द्रियविशेषणता सप्तमः सन्निकर्षः, ननु तत्र संबद्धविशेषणतेत्यतोऽपि न व्यभिचारः।

टी० ॥ उक्तव्याप्तौ विपक्षबाधकमाह—। [a]"अन्यथे"ति। यद्यप्य-भावग्रहे प्रतियोगियोग्यतावदधिकरणयोग्यतापि तन्त्रमिति प्रत्यासत्ता-सत्यामपि तद्विरहादेव न परमाणौ पृथिवीत्वाभावग्रह इति, तथापि शब्दाभावप्रत्यक्षतावादिमते नैतदिति भावः ॥ ननु पृथिवीत्वाभावेन संब-द्धविशेषणतापि प्रकृते नास्तीत्यत आह—। [b]"नही"ति। "तदिन्द्रियाया-ह्याश्रयके"त्यादिविशेषणव्युदस्तमपि व्यभिचारं प्रकारान्तरेणापि व्युद-स्यति—। [c]"शब्दाभावे"ति। व्यभिचारनिरासेऽयमपि प्रकार इत्यपेरर्थः। 'सप्तम'—इति संबद्धविशेषणतापेक्षया, विशेषणतया षष्ठ एव; शब्दसा-क्षात्कारानुरोधेन यथा शुद्धसमवायः प्रत्यासत्तिरेवं शब्दाभावसाक्षात्कारानु-रोधेन विशेषणताया अपि शुद्धायाः प्रत्यासत्तित्वोपगमात्। संबद्धविशे-षणताया एव यत्र ग्राहकत्वं तत्परं व्याप्त्युपदर्शनमिति भावः ॥

मू० *[a]नचात्मसंयुक्तमनः (१) प्रति [b]पूर्वानुभूतार्थात्मप्रत्यास-त्तिरेव संस्कारः इति तदतीन्द्रियत्वं न दोषाय, प्रत्यासत्तेर-तीन्द्रियाया इन्द्रियार्थसन्निकर्षस्यो(२)पगमादिति स्वीकृते

(१) वस्तुत एकैव ग्राह्यासत्तिर्विवक्षावशाद्ग्राह्यासत्तिग्राहकासत्तिभेदेन द्विधा विभ-ज्यते; तत्रात्मसंयुक्तमनः प्रति (=आत्मसंयुक्तमनसा सह निरुक्तमनसो वा) संस्कारः (संस्का-रलक्षणा, अर्थात् मनः संयुक्तात्मसमवेतसंस्कारलक्षणा) ग्राहकासत्तिः, (=अर्थग्राहकेण संस्कारेण समं निरुक्तसंस्कारस्य वा सम्बन्धः,) तथा आत्मसंयुक्तमनः प्रति पूर्वानुभू-तार्थात्मप्रत्यासत्तिरपि (=पूर्वमनुभूतौ यावर्थात्मानौ तयोः प्रत्यासत्तिरपि) संस्कारः, (=संस्कारलक्षणा, अर्थात् मनः संयुक्तात्मसमवेतसंस्कारविषयत्वलक्षणा) ग्राह्यासत्तिः, सोऽह-मिति प्रत्यभिज्ञायां संस्कारः पूर्वानुभूतात्मप्रत्यासत्तिः, सोऽयं घट इत्यत्र तु पूर्वानुभूतोऽर्थः प्रत्यासत्तिरिति विभागः।

(२) इन्द्रियार्थसन्निकर्षस्य प्रत्यासत्तेरतीन्द्रियाया उपगमादित्यन्वयः। इन्द्रिया-र्थसन्निकर्षाभिन्नप्रत्यासत्तेरतीन्द्रियत्वोपगमादित्यर्थः।

Digitized by Google

निस्सारः*, [c] तथा सति "स"-इत्यंशे चक्षुरादेः प्रत्यासत्त्य-भावात्प्रत्यभिज्ञाया अचाक्षुषत्वापातात् । [d] "अयमि"त्यंशो दृगादिना, तदंश(१)स्तु मनसा, गृह्यतां, तदेतदभेदस्तु केनेत्युक्तमप्याऽवर्तते इति । [e] एतेन 'संस्कारः सहकारिमात्रम् इन्द्रियस्यातिप्रसङ्गनिवारकः प्रत्यभिज्ञायां, तदर्थे(२)इन्द्रियेणासन्निकृष्टेऽपि स्मिन्ये विभ्रमे यथैवत्, सन्निकृष्टग्राहिता चेन्द्रियस्य सन्निकर्षसहकार्य्यवश्यम्भावमात्रं, तच्चेदमंशसन्निकर्षादेव स्यात्तु सर्वग्राह्यसन्निकर्षसहकारिता'-इत्यपि निरस्तम्, [f] 'सोऽयं(३) न वेति संशयाभावापातेनैवेति ।

टी० ॥ ननु मा भूच्चक्षुषस्तया सह संयुक्तमनःसंयुक्तात्मसमवेत संस्कारविशेषणताप्रत्यासत्तिरपितु यथा घटेन सह चक्षुषः संयोगस्तथा मनसस्संस्कार एव प्रत्यासत्तिरस्त्वित्यत आह—। [a] "नचे"ति । संस्कारोऽसंबद्धः कथं मनःप्रत्यासत्तिः स्यादित्यत उक्तम्—"आत्मसंयुक्तमनः प्रती"ति । तथाच मनःसंयुक्तात्मसमवेतः संस्कारो मन प्रत्यासत्तिरिति ॥ संस्कारस्यासहकारित्व(४)मभिधाय बाह्यासत्तिमाह—। [b] "पूर्वानुभूते"ति ॥ एवं शङ्कायां परिहारमाह—। [c] "तथा सती"ति । एतावतापि चक्षुषा समं प्रत्यासत्तिर्नोपपादितेति प्रत्यभिज्ञायाश्चाक्षुषत्वं न स्यात्, प्रत्युत मानसत्वं स्यात्. तथाच विरोध इत्यर्थः ॥ ननु तत्तांशे मानसत्वमिदन्तांशे च चाक्षुषत्वमस्तु को विरोधः? इत्यत आह—। [d] "अयमि"ति ॥ ननु यावत्प्रत्येतव्येन्द्रियसन्निकर्षो न तन्त्वं, किंतु प्रत्येतव्येन्द्रियसन्निकर्षमात्रं, स चेदमंशेनैव, तदंशस्त्वऽसन्निकृष्ट एव भासते, तत्रातिप्रसङ्गः सहकारिणा संस्कारेण वार-

(१) तदंशः, तत्तांश इत्यर्थः ।
(२) तदर्थः, तच्छब्दार्थ इत्यर्थः ।
(३) "एतेने"त्यस्यैवातिदेशमाह—सोऽयमिति ।
(४) संस्कारेणार्थग्राहकेण मनसः सम्बन्धमित्यर्थः ।

णीय इत्याशङ्क्याह—। [e] "एतेने"ति ॥ [f] "सोयमि"ति । उक्तसामग्रीसत्त्वे निश्चय एव स्याद्, दोषस्य खण्डितत्वादिति भावः ॥

मू० [a] 'तद्द्राक्षमि'त्यादिस्मृतिरपि चैवमनुभवः स्यात्, मनस-(१)आत्मसंयोगसहकृतादर्थात्मसन्निकर्षात्संस्काराज्जायमानायास्तस्या इन्द्रियार्थसन्निकर्षजत्वादेव; मनसात्मसंयोगादात्मसमवायेन प्रत्यक्षीक्रियमाणैर्ज्ञानादिभिः स्मर्यमाणस्यार्थस्याविशेषादिति । [b] एतेन 'तत्त्वावच्छिन्नप्रतियोगिकान्योन्याभावविरहः स्वरूपाभेदो वाऽयं भाती'(२)त्यपि निरस्तम् । अन्योन्याभावव्यतिरेकोऽन्योन्यमेव तत्तदन्तोपाध्यवच्छिन्नयोः स्यात्, नच तन्मिलितमेकेन सुग्रहम् । एवं स्वरूपाभेदोऽपि तयोरैक्यं तदनवगाहिना दुरवगममेव । [c] संस्कारोपनीते च विषये यदि ज्ञानमनुभवः स्यात् स्मृतिरपि कुतो नानुभूतिः ? । [d] अथ * न संस्काराधीनत्वमात्रेण स्मृतित्वं, किंत्वनुभवकारणासंपृक्तसंस्कारजत्वेन, ततश्चाधिकार्थाक्षसन्निकर्षापेक्षं प्रत्यभिज्ञानमनुभव एव भवति, नतु स्मृतिः ? * —इति चेन्न ।

टी० ॥ संस्कारस्य प्रत्यासत्तित्वपक्षे सहकारित्वपक्षे च दोषान्तरमाह—। [a] "तदद्राक्षमि"ति । यथा 'जानामी'त्यनुभवः संयुक्तसमवायान्मानसस्तथा 'अद्राक्षमि'ति स्मृतिरपि संस्कारलक्षणात्सन्निकर्षान्मानसोऽनुभवः स्यादित्यर्थः ॥ [b] "एतेने"ति । यथा 'सोयं, नतु तद्विधर्मे'ति तद्वैधर्म्याभावः संस्कारेन्द्रियाभ्यां प्रत्येकं मिलित्वा चोपनेतुमशक्य(३)एवं 'सोयं, न तदन्यो-

(१) मनःप्रतियोगिकात्मसंयोगसहकृतात्पूर्वानुभूतार्थस्मारकसन्निकर्षोऽभिन्नात्तज्जटकाद्वा संस्काराज्जायमानायाः स्मृतेरिन्द्रियार्थसन्निकर्षजत्वादनुभवत्वं स्यादित्यर्थः ।

(२) 'इदन्त्वावच्छिन्ने'-इति शेषः । [णादिति भावः ।

(३) संस्कारेण वैधर्म्याभाववतो धर्मिणः, इन्द्रियेण च तत्तायाः, अविषयीकर-

न्याभाववान्’एवं ‘न स्वरूपभिव’ इत्यत्राप्यन्योन्याभावात्यन्ताभाववत्त्वं तत्स्वरूपाभेदो वा न ताभ्यामुपनेतुं शक्यमित्यर्थः ॥ संस्कारजत्वेपि यथा प्रत्यभिज्ञाऽनुभव एवं स्मृतिरप्यनुभव एव स्यादित्याह–। [c] “संस्कार”ेति । एतच्चाचार्यमतेन ; वार्तिककारमते तु प्रत्यभिज्ञापि स्मृतिजन्या, न संस्कारजन्येति ॥ ननु संस्कारजन्यत्वमात्रं न स्मृतित्वप्रयोजकं येन प्रत्यभिज्ञापि स्मृतिः स्यादपित्विन्द्रियसन्निकर्षाजन्यत्वे सति संस्कारजन्यत्वं, तच्च प्रत्यभिज्ञायां नास्तीति न तस्याः स्मृतित्वमित्याह–। [d] “अथे”ति ॥

मू० [a] संस्काराऽसम्पृक्तानुभवकारणजत्वेनानुभवत्वं भवति प्रत्यभिज्ञानं तु संस्कारसंवलितानुभवकारणजं स्मृतिरेवेति वैपरीत्यं किं न स्यात्? । [b] ‘अन्यत्र न स्मृति(१)रनुभवकारणसम्पृक्तसंस्कारजन्या’–इति तु‘नान्यत्रानुभवोऽपि संस्कारसम्पृक्तार्थेन्द्रियसंप्रयोगजन्य’–इतिसाम्यादेवाबाधकम्। [c] तदेवं(२)विनिगमनाय प्रमाणाभावात्, स्वयंकल्पितव्यवस्थावैपरीत्येनापि कल्पनासंभवात्, प्रत्यभिज्ञानमुभयकारणसंभवात् स्मृतिश्चानुभवश्चेति मन्तव्यम् । तथाच स्मृतिव्यावृत्तमनुभवत्वं जातिरस्तीति प्रत्याशा निरवकाशा । नच विषयांशे स्मृतित्वानुभवत्वयोर्व्यवस्था कर्तुं शक्यते, तन्निरासस्य निवेदितत्वात्(३) । ततश्च तदेव ज्ञानं तस्मि-

(१) स्मृतिरन्यत्राऽनुभवकारणासंपृक्तसंस्कारजन्या न,–इत्यबाधकम्, अन्यत्राऽनुभवोपि संस्कारसंपृक्तार्थेन्द्रियसंप्रयोगजन्यो न,–इतिसाम्यादेवेत्यन्वयः ।

(२) तदेवं (संस्कारजत्वात्प्रत्यभिज्ञानं स्मृतिरुत संप्रयोगजत्वादनुभव इत्यत्र) विनिगमनायां प्रमाणाभावात्प्रत्यभिज्ञानं स्मृतिश्चाऽनुभवश्चेति मन्तव्यमिति सम्बन्धः । ननु केवलसंस्कारजत्वं स्मृतित्वस्य, अतिरिक्तकारणजत्वं चानुभवत्वस्य प्रयोजकमिति मत्कल्पनमेव नियामकमित्याशङ्क्य प्रतिकल्पनत्वान्मैवमित्याह–स्वेति । प्रमाणाभावादुभयात्मत्वमपि नेष्टव्यमित्यत आह–उभयेति ।

(३) “तदा धर्मिणमादायापि स्मृत्यनुभवसङ्करो दुर्वारः”–इत्यत्र निवेदितत्वात् ।

न्वेवांशे स्मृतिश्चानुभवश्चेत्यापतितेऽपि यदि न विरोधबुद्धि भवतस्तदा [d] तदधीने तत्रैवार्थे प्रमात्वाप्रमात्वापाते(१)- सा तेऽस्तु ।

टी० ॥ तर्हीन्द्रियजन्यत्वेन प्रत्यभिज्ञाऽनुभवोऽपि न स्यात्, संस्कारा-जन्यत्वे सतीन्द्रियजन्यत्वस्यानुभवत्वप्रयोजकत्वात्, प्रत्यभिज्ञायां च तदभा-वाद्,—इत्यपि स्यादित्याह—। [a]"संस्कारे"ति ॥ नन्वनुभवसामग्रीजन्यत्वेऽपि संस्कारमात्राधीनत्वेन कुत्र स्मृतित्वं दृष्टं येन प्रत्यभिज्ञायां तदापादनीय-मित्यत आह—। [b]"अन्यत्रे"ति । तर्हि संस्कारजन्यत्वेऽपि कुत्रेन्द्रियजन्यत्व-मात्रेणानुभवत्वं दृष्टं येन प्रत्यभिज्ञायां तत्कल्पनीयमित्यपि तुल्यमित्यर्थः ॥ प्रकृतमुपसंहरति—। [c]"तदेवमि"ति । संस्कारजन्यत्वेन स्मृतित्वमिन्द्रियज-न्यत्वेन चानुभवत्वं, नचात्रावच्छेदकभेदेन, द्वयोर्वृत्तिस्तस्या निरस्तत्वादिति स्मृतित्वसाङ्कर्यादनुभवत्वं न जातिरित्यर्थः । यद्यपि प्रत्यभिज्ञानमेकं ज्ञानं साक्षात्कार्यनुभवरूपतयाऽनुव्यवसायसिद्धं, तस्य च विषयस्तत्तेदन्तावच्छि-न्नयोरन्योन्याभावात्यन्ताभावः, स च स्वरूपमेव तयोस्तद्गताऽसाधारणधर्मो वा कश्चिदित्यन्यदेव, तत्तदनुभवस्य दुरपह्नवत्वात्, तच्च संस्कारेन्द्रियाभ्यां जन्यते, अन्वयव्यतिरेकाभ्यां द्वयोरपि कारणत्वावधारणात्, अन्यथा कार्य्य-स्याकस्मिकत्वेनाहेतुकत्वेन परप्रतिपादनार्थं(२)तवापि वाग्व्यवहारो न स्यात्, प्रतिनियतविषययोरपि संस्कारेन्द्रिययोः संभूयकारित्वं प्रत्यभिज्ञान्यथानुपप-त्त्यैव, तत्र सोपपद्यतां प्रत्यभिज्ञानं, सा च तत्तेदन्ताविशिष्टाभेदस्तद्विषयो-ऽस्त्विति त्वयापि वक्तुमशक्यम्, अनुभवविरोधात्; क्षणभङ्गापत्तेश्च । 'योऽहम-द्राक्षं सोऽहं स्मरामी'त्यभेदप्रतिसन्धानस्य सर्वतैर्थिक(३)सिद्धत्वात् । तत्ताऽभे-दश्चेन्द्रियसंबद्धविशेषणतयैव भासते, घटादेश्च प्रत्यभिज्ञायमानस्य ग्राह्य-त्वेन स्वग्राह्यसंबद्धविशेषणताया एव सत्त्वात् । *तत्तांशमात्रे संस्कारेणापि

(१) प्रमात्वाप्रमात्वापातेऽपि सा=अविरोधबुद्धिस्तेऽस्त्वित्यर्थः ।

(२) परप्रतिपादनार्थम्=परप्रतिपत्तिजननार्थम् ।

(३) तैर्थिकाः=शास्त्रकाराः ।

तदवच्छिन्नाभेदांशो(१)ऽपि विशेषणतया कथं भासेत? *,–इति चेन्न, संस्कारानुपनीतस्यापि विशेषणताभ्युपगमात्। *भूतले घटाभावस्येव(२)विशेषणतयैव तत्ताभाने किं संस्कारेण?–इति चेन्न, अननुभूते प्रत्यभिज्ञाया अदर्शनाद् अनुभवस्यापि तत्कारणत्वसिद्धौ तस्य च चिरध्वस्तस्य व्यापारापेक्षायां संस्कारकारणत्वकल्पनात्। *अतीतापि तत्ता विशेषणमेव, 'द्वे द्रव्ये'–इत्यत्र द्वित्व(३)मिव, तत्ता च पूर्वानुभववैशिष्ट्यं, तदसत्त्वकाले तज्ज्ञानं न भ्रमः *कथम्? *–इति चेन्न 'सोऽयमि'ति 'तदभिन्नोऽयमि'ति प्रतीयते, नतु 'तदवच्छिन्न(४) इदानीमि'ति प्रत्यभिज्ञाविषयो येन भ्रमः स्यात्, संस्कारजन्यत्वेन च न स्मृतित्वमिन्द्रियाजन्यत्वस्योपाधित्वात्। *नचेन्द्रियजन्यत्वेन चानुभवत्वे मध्ये संस्काराजन्यत्वमुपाधिः*। अनुभवत्वस्य प्रत्यक्षसिद्धत्वेनोपाधिव्यतिरेकेण(५)तद्व्यतिरेकस्य साधयितुमशक्यत्वेनोपाधेर्बाधितविपर्ययत्वेनाऽऽभासत्वात्। अस्तु वा प्रत्यभिज्ञानं स्मृतिजन्यं, तथाच संस्कारजन्यत्वेन स्मृतित्वापादनमिन्द्रियजन्यत्वेन चानुभवत्वसाधने संस्काराऽजन्यत्वमुपाधिश्चानवकाशः। स्मृत्युपनीतैव तत्ता भासते, भ्रमे इव रजतत्वमिति प्रत्यभिज्ञाखण्डनमनवकाशं, तथापि इस्तसमावरणमात्रमेतत्सर्वमिति हृदयम्॥[b] तदधीने' इति। स्मृतित्वेनाप्रमात्वं, यथार्थानुभवत्वेन प्रमात्वम्, अवच्छेदभेदं विनैव प्रत्यभिज्ञायां स्यादिदं च तवानिष्टमित्यर्थः॥

मू० [a]एतेन(६)विरोधापत्त्याऽनुभवत्वस्वीकारे बाधकेन स्मृति-

(१) "अभेदांशोऽपी"ति स्वपपाठः।

(२) भूतले घटाभावप्रत्यक्षस्थले प्रागनधिगतस्यैव घटाभावस्य विशेषणतया भानाङ्गीकारेण संस्कारानुपनीतस्यैव तस्य विशेषणता।

(३) द्वित्वं ह्यपेक्षाबुद्धिजन्यत्वेन चतुर्थक्षणादावतीतमपि द्रव्यविशेषणं यथा तद्वदित्यर्थः।

(४) तदवच्छिन्नः, तत्तावच्छिन्न इत्यर्थः।

(५) उपाधिव्यतिरेकेण=संस्कारजन्यत्वेन, तद्व्यतिरेकस्य=अनुभवत्वव्यतिरेकस्येत्यर्थः।

(६) एतेनेत्यस्यैव विवरणं,–बाधकेनेत्यन्तम्। विरोधापत्त्या=प्रत्यभिज्ञायां स्मृतित्वानुभवत्वयोः प्रमात्वाप्रमात्वयोश्च विरुद्धधर्मयोः समावेशेन, अनुभवत्वस्वीकारे=अनुभवत्वस्य जातित्वस्वीकारे, बाधकेनेत्यर्थः।

व्यतिरिक्तमनुभवत्वं नामानुगतं साक्षात्कारिज्ञानानुमित्यादिसाधारणमनुभवबुद्ध्यैव व्यवस्थापनीयमिति प्रतीतिकलहोऽपि(१)निरस्तः । *[b]ननु चाऽनुभव एव स्मरणमिदं, प्रत्यभिज्ञाने ह्यनुभव एवैवानुभूयते न तु स्मृतित्वं, तेन संस्कारजत्वेऽपीन्द्रियार्थसन्निकर्षाधिकापेक्षयाऽनुभवत्वमेवेति विनिगमनायामपीदमेव प्रमाणम्। अन्यथा प्रत्यभिज्ञानेऽनुभवप्रत्ययो न स्यादिति प्रतीतिकलहेन प्रत्यवस्थेयमिति ?*। न, [c]इदन्तातत्तावभासयोरनुभवस्मरणभागयोः सत्त्वेनानुभवस्यैकपक्षेऽसाधारणीकृत्य प्रमाणयितुमिच्छा ऽशक्यत्वात् ।

टी० ॥ अनुगतप्रतीत्यभावादनुभवत्वं न जातिरित्युक्तमिदानीं जातिसाङ्कर्यादपि न तदित्याह—। [a]"एतेने"ति । यद्वा, प्रघट्टकनिष्कृष्टमर्थं संक्षिपतोऽनुवदति—। "एतेने"ति ॥ नन्वनुगतानुभवत्वजातौ प्रतीतिकलहः (१)प्रत्यभिज्ञायां स्मृतित्वानुभवत्वविरोधात्तदाहूतप्रमात्वविरोधाद्वा निरसनीयः, स एव नास्ति, अनुभवत्वेनैव सर्वप्रतीतिसिद्धत्वादित्याह—। [b]"ननु चे"ति ॥ यथेदन्तांशेऽनुभवामी'त्यनुभवः तथा तत्तांशे 'स्मरामी'त्यनुभव इति न सकलांशानुभवत्वानुभव इत्याह—। [c]"इदन्ते"ति । यद्वा, तत्तांशे स्मृतित्वधौव्येणानुभवत्वेनानुभवोऽयं कूटसाक्षी(२)त्यर्थः ॥

(शेषमग्रे)

---

(१) इतिहेतोः प्रत्यभिज्ञायामनुभवत्वास्वीकारे सोऽयं घट इत्याकारकस्येदन्तावगाहिज्ञानेऽनुभवत्वावगाहिप्रतीत्या कलहः =विरोधो निरस्त इत्यर्थः ।

(२) कूटसाक्षी=मिथ्यार्थगोचरः ।

Digitized by Google

Digitized by Google